तथा च प्रतिज्ञाहानिः जीवन्मुक्तस्यात्राधिकृतत्वात् इत्यत्राह—धर्मचक्रेति। द्वितीयदिवसकरप्रतिबिम्ब-बिम्बशङ्काकरजाज्वलद्धर्मचक्रायुधं बिभर्ति धर्मचक्रभृत् "स्फुरदरसहस्ररुचिर" इत्यादि प्रवचनात् "धर्मचक्रायुधो देवः" इति वचनाच्च, तस्मै। जीवन्मुक्तस्यैव धर्मचक्रायुधेन योग इति प्रकृतार्थस्यैव स्वीकरणात्। अनेन तदविनाभूतं समवसरणादिकमप्युपलक्षितम्। अथवा विशेष्यस्य उभयलक्ष्मीरमणत्वस्य व्यावर्णनया एतद्द्वयं संभवद्विशेषणं "सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्" इति न्यायात्।

किं च सकलज्ञानसाम्राज्यपदप्राप्तिः कस्यायुधस्य धारणयेत्यत्र धर्मेति। धर्मः चरित्रम् "चारित्तं खलु धम्मो" इति कुन्दकुन्दस्वामिभिर्निरूपितत्वात्। तदत्र प्रकरणबलात् यथाख्यातचारित्रं तदेव चक्रमिव चक्रं दुर्जयघातिकर्मारिनिर्जयेन सकलसाम्राज्यपदप्राप्तिहेतुत्वात्। तत्सदा बिभर्ति इति धर्मचक्रभृत् तस्मै, अनेन यथाख्यातचारित्रस्य [illegible] सकलज्ञानसाम्राज्यपदप्राप्तेः साध्यसाधनभावः कथञ्चिन्निरतिशयं सानुग्राहकत्वं चोपढौकितम्।

ननु निरतिशयं परानुग्राहकेणापि भवितव्यम्। यतः तन्नमस्कारः पल्फुलीतीत्यत्राह—भर्त्रे इति, विश्वं जगत् बिभर्ति पुष्णात्येवंशीलो भर्ता तस्मै भर्त्रे विश्वस्य जगतः स्वामिने पोषणनिरताय, अनेन अपारानुग्रहशीलत्वमुक्तम्। कुतोऽयं निरतिशयं पराननुगृह्णातीति निश्चयः? इत्यत्रोत्तरयति "संसारेति"। अत्र 'गुरवो राजमाषा न भक्षणीयाः' इत्यादिवत् संसारिणां संसारभीमुट्त्वादिहेतुगर्भविशेषणेन उत्तरमिति निर्णयः। स्वभर्तृत्वस्य स्वसंसारभीमुट्त्वस्य च प्रागुक्तविशेषणद्वयेनैव व्यज्यमानत्वात्। क्षुधातृषाजननमरणादिनानाघोरदुःखानामाकरः संसारः भव इति यावत्। "क्षुत्तृष्णाश्वासकास-ज्वरमरणजरारिष्टयोगप्रमोहव्यापत्त्याद्युग्रदुःखप्रभवभवहृते"रिति पूज्यपादैर्निगदितत्वात्, तस्माद्भीः तां मुष्णाति लुण्टयतीति संसारभीमुट् तस्मै। अत्र संसारिणां संसारभयलुण्टाकत्वव्यावर्णनया निरायासेन संसारभयापहरणदक्षचातुर्यातिशयः प्रकाशितः तीर्थंकरसत्कर्मणः तस्य तादृग्विधाति-शयस्य दुर्वारसंसारविच्छेदोपायनियुक्तदिव्यध्वनिप्रवर्तनामात्रेणैव संसिद्धेः। तदेवं विश्वविद्यापरमेश्वरस्य विश्वस्य

पदको प्राप्त है, (सकलाश्च ये ज्ञाश्च सकलज्ञाः, सकलज्ञानाम् असं जीवनं यस्मिंस्तत् तथाभूतं यत्साम्राज्यपदं तत् ईयुषे) जो पूर्व जन्ममें किए हुए धर्मके फलस्वरूप चक्ररत्नको धारण करता है, (धर्मेण पुराकृतसुकृतेन प्राप्तं यच्चक्रं तद् बिभर्तीति तस्मै) जो, षट्खण्ड भरतक्षेत्रकी रक्षा करनेवाला है और जिसने संसारके जीवोंका भय नष्ट किया है अथवा षट्खण्ड भरत-क्षेत्रमें सब ओर भ्रमण करनेमें जिसे किसी प्रकारका भय नहीं हुआ है (समन्तात् सरणं भ्रमणं संसारस्तस्मिन् भियं मुष्णातीति तस्मै) अथवा जो समीचीन चक्रके द्वारा सबका भय नष्ट करनेवाला है (अरैः सहितं सारं चक्ररत्नमित्यर्थः, सम्यक् च तत् सारञ्च संसारं तेन भियं मुष्णातीति तस्मै) ऐसे तद्भवमोक्षगामी चक्रधर भरतको नमस्कार है।

बाहुबलीके पक्षमें निम्न प्रकार व्याख्यान है—जो भरत चक्रधरको त्रिविध युद्धमें परास्त कर अद्भुत शौर्यलक्ष्मीसे युक्त हुए हैं जो धर्मके द्वारा अथवा धर्मके लिए चक्ररत्नको

जगतः सम्यक् समुद्धरणपाण्डित्यपराकाष्ठामधिष्ठितस्य परमात्मत्यादिब्रह्मणः पारमेश्वर्यं चतुरलौकिकजनेऽपि प्रथयितुं श्रीमत्साम्राज्यपदचक्रभृत् भर्तृभीमुट्पदप्रयोगसामर्थ्यात्भरतचक्रधरवदितीव श्रुतेर्भावाच्च व्यक्तयतया भरतचक्रधरेणोपमालङ्कारः प्रथते । तथा हि—यथाभूतसंरक्षणादिक्षात्रधर्मस्य रक्षितयक्षसहस्रचक्ररत्नस्य च धारणया धर्मचक्रभृत् भरतचक्रवर्ती ।

अथवा कैवल्याभ्युदयत्रये निवेदिते धर्ममेव बहु मन्वाना कैवल्यपूजां विधाय 'संचितधर्मा तदनुचक्रं पूजयामासेति' स्मृतेर्धर्मादनन्तरं चक्ररत्नं बिभर्ति—पुष्णाति—पूजयति—धरतीति वा धर्मचक्रभृदिति भरत एव प्रोच्यते । स च सम्यग्दर्शनादिरूपधर्मसम्पत्त्या नवनिध्यादिजनितार्थसम्पत्त्या सुभद्रमहादेव्यादिवस्तु कृतकाम-सम्पत्त्या "श्रीमान्"- आदिब्रह्मोपदिष्टकलासहितज्ञानपदप्राप्त्या साम्राज्यपदप्राप्त्या च सकलज्ञानसाम्राज्यपद-मासवान् षट्खण्डभूमण्डलस्वामित्वेन भर्ता संक्षोभेण सारयन्ति इतस्ततो गमयन्ति जनान् इति णिजन्तात्कर्तरि यचि, संसाराश्चोरचरटमन्त्रयादयो (?) राष्ट्रकण्टकाः तेभ्यो जनतानां भियं स्वप्रतापेन मुष्णातीति संसारभीमुट् जनतायाः नमस्याश्रयो भवति । तथा सद्धर्मचक्रवर्तित्वेन चक्रभृदयं आदितीर्थेश्वरः, बहिरङ्गलक्ष्म्या संयुक्तत्वेन अन्तरङ्गलक्ष्मीभिर्नित्ययुक्तत्वेन श्रीमान् गणधराहमिन्द्रदेवेन्द्रचक्रवर्त्यादिप्रार्थनीयं सकलज्ञानसाम्राज्यपदमधि-तिष्ठन् त्रिजगतो भर्ता जनताया आजवंजवदस्युभयलुण्टाकत्वेन ससारभीमुट्—अनन्तानन्तसुखदायकस्य महा-पुरुषस्य नमस्याश्रयो न स्यात् इति ।

अथवा षट्खण्डभर्तृचक्रधरात्त्रिजगत्स्वामिनः श्रीमत इत्यादिषु सर्वत्राधिक्यत् व्यतिरेकालङ्कारो वा ध्वन्यते सादृश्यमात्रापेक्षया प्रागुपमालङ्कारस्य प्रकाशितत्वात् । नन्वेवंविधप्रथमानुयोगमहाशास्त्रस्यादौ पञ्चपर-मेष्ठिनां नमस्कारं भगवानाचार्यः कुतो नाङ्गीचकार भूतबलिभट्टारकैर्महाकर्मप्रकृतिप्राभृतद्रव्यानुयोग-महाशास्त्रस्यादावनादिसिद्धपञ्चमहाशब्दैः पञ्चपरमेष्ठिनां नमस्कारकरणादित्याकाङ्क्षायां श्रीमदित्यादि पञ्चपदरत्न-प्रदीपाः पञ्चपरमेष्ठिनां प्रकाशकत्वेन नमः शिखया प्रज्वलन्तीत्याह श्रीमत इत्यादि "श्रीमते नमः" । एवं सर्वत्र सम्बद्धव्यम् । 'श्रीरार्हन्त्यमहिमाघातिकर्मारिनिर्जयप्रादुर्भूतनवकेवललब्ध्यात्मा 'श्रीरार्हन्त्यमहिमेति' न्यासकार-वचनात् । सोऽस्यास्तीति श्रीमान् तस्मै श्रीमते नमः, अर्हते नमः, 'णमो अरहंताणं' इति यावत्—

"केवलणाणदिवायरकिरणकलावप्पणासि अण्णाणो ।णवकेवललद्धुग्गमसुजणिय परमप्पववएसो ।"

इत्यर्हल्लक्षणप्रतिपादकप्रवचनसद्भावात् । अनन्तानन्तस्वविभागैः सम्पूर्णत्वात् सकलं तच्च तज्ज्ञानं च सकलज्ञानम् उपलक्षणात् सम्यग्दर्शनादिसप्तगुणानां ग्रहणं ततस्तत्सहितं तदेव साम्राज्यपदं गुणाष्टक-साम्राज्यपदमिति यावत् । अथवा सकलैरशेषैरशेषैरेकार्थसमवायिभिः क्षायिकसम्यग्दर्शनादिसप्तगुणैः

धारण करनेवाले भरतके स्तवन आदिसे केवलज्ञानरूप साम्राज्यके पदको प्राप्त हुए हैं। एक वर्षके कठिन कायोत्सर्गके बाद भरत द्वारा स्तवन आदि किए जानेपर ही बाहुबली

सहितं च तज्ज्ञानं च सकलज्ञानं तदेव साम्राज्यपदम्। अथवा सकलज्ञानामनन्तानन्तानां सर्वज्ञानाम् आनः प्राणनं विशुद्धचैतन्यमयभावप्राणैर्जीवनमत्रेति सकलज्ञानः तनुवातस्तत्रैवमुच्यते तदेव साम्राज्यपदं सकलज्ञान साम्राज्यपदं तदीयविषये प्राप्तवते नमः सिद्धपरमेष्ठिने नमः 'णमो सिद्धाणमिति' यावत् "अट्ठगुणा किदकिच्चा लोयग्गणिवासिणो सिद्धा" इति प्रवचनात्। स्वयमाचरन् धर्मैः सम्यग्दर्शनाचारादिपञ्चाचारैर्यथायथं चक्रं द्वादशगणं बिभर्तीति धर्मचक्रभृत् गणधर आचार्यवृषभः तस्मै धर्मचक्रभृते नमः आचार्यपरमेष्ठिने नमः 'णमो आइरियाणमिति'यावत्।" पञ्चमुक्तयै स्वयं ये आचारानाचरन्तः परमकरुणयाचारयन्ते मुमुक्षून् लोकाग्रगण्यशरण्यान् गणधरवृषभान्"इत्याशाधरैर्निरूपणात्। षड्द्रव्यसप्ततत्त्वादीनां सदोपदेशेनैव मुमुक्षून् बिभर्त्ति पुष्णातीत्येवशीलो भर्ता तस्मै भर्त्रे नमः उपाध्यायपरमेष्ठिने नमः 'णमो उवज्झायाणमिति' यावत् "जो रयणत्तयजुत्तो णिच्चं धम्मोवदेसणे णिरदो। सो उवझाओ अप्पा जदिवरउसहो णमो तस्स" इत्यागमात्। सद्ध्याननिलीनः सन् दर्शनज्ञानसमग्रभावमोक्षस्य साधकतमं विशुद्धचारित्रं नित्यं साधयन् यतीन्द्रो भावसंसारमियं मुष्णातीति संसारभीमुट् तस्मै संसारभीमुषे नमः साधुपरमेष्ठिने नमः 'णमो लोए सव्वसाहूणमिति' यावत्। "दंसणणाणसमग्गं मग्गं मोक्खस्स जोहु चारित्तं। साधयदि सुद्धणिच्चं साहू स मुणी णमो तस्स॥" इति प्रवचनात्। अत्र इतरपदवत् चतुर्थीविभक्त्यन्तत्वेन पदत्वं हित्वा सकलज्ञानसाम्राज्यपदमिति व्यासवचनन्तु मतमहातिशयज्ञापनार्थं प्रतिज्ञावचनमाचार्यस्येति ब्रूमः। तथाहि सकलतत्त्वव्यवस्थाजीवातुस्याद्वादामोघलाञ्छनलाञ्छितत्वेन सर्वबाधाविधुरसाधनसाधितत्वेन सर्वोदयवत्त्वेन च श्रीमदर्हन्मतं तीर्थं श्रीमतं "सर्वोदयं तीर्थमिदन्तवैव"इति युक्त्यनुशासनात्। तस्मिन् श्रीमत एव सकलज्ञानसाम्राज्यपदं श्रीमत्त्वान्यथानुपपत्तेरिति। तदीयुषे इति सम्बन्धः। अत्र पुराणे न केवलमादितीर्थंकरः भरतधर्मचक्रभृच्छलाकापुरुषश्च प्रतिपाद्यत इति प्रकाशितः। अपरदानश्रेयोनृपतिप्रभृतिधार्मिकोत्तंसो जनोऽपीति प्रतिपाद्यार्थं प्रकाशयति श्रीमत इति। श्रीर्मतिपर्यायोऽस्यास्तीति श्रीमतः 'अभ्रादिभ्यः' इत्यद्विधानात् दानश्रेयो नृपतिरित्यर्थः तस्य श्रीमतिचरत्वात् तस्मिन् सति सकलज्ञानसाम्राज्यपदमीयुषे इति सम्बन्धः इत्यनेन नानाकथासम्बन्धो दानतीर्थंकरश्च प्रतिपाद्य इति प्रकाशितः।

'जीयाज्जिनो जगति नाभिनरेन्द्रसूनुः श्रेयान् नृपश्च कुरुगोत्रगृहप्रदीपः।
याभ्यां बभूवतुरिह व्रतदानतीर्थे सारक्रमे परमधर्मरथस्य चक्रे॥'

इति दानतीर्थंकरत्वप्रसिद्धेः। किञ्च सर्वपादाद्यक्षराणां पठनेन श्रीसाधनमिति प्रयोजनप्रतिपादनातिशयः सद्धर्मलक्षणं प्रेक्षावद्भिरवगन्तव्य इत्युपरम्यते। अत्रैव पुनः प्रेक्षावतामानन्दकन्दल्यां नान्द्यां श्रीमद्वेणुपुरभव्यजनं सम्बोधयन्नाचार्यः प्रश्नोत्तरेण सद्धर्मसर्वस्वरहस्यमत्रैवेत्यन्तर्लापित्वेन हृदयसाक्षिषमाह—श्रीमत इति। लक्ष्म्यां वा मतिर्यस्य असौ श्रीमतिः तस्य सम्बुद्धिः श्रीमते! भो भो भरतसौधर्माधिपतिदुर्लभकलियुगजैनमार्गप्रभावभासन्तोषितसौधर्मेन्द्रलौकान्तिकेन्द्रविदेहचक्रीन्द्रसालुविम्मणिदेवेन्द्र! अभ्युदयनिःश्रेयसलक्ष्मीस्वसात्करणलोलुपबुद्धे! सकलज्ञानसाम्राज्यपदं क्वेति जिज्ञासायां श्रीमत एव अर्हच्छासन एव तस्मिन् सति सकलज्ञानसाम्राज्यपदमीयुषे धर्मचक्रभृते भर्त्रे संसारभीमुषे श्रीमते आदीश्वराय अथवा पार्श्वतीर्थंकृत्सम्मुखीनत्वादि प्रकरणबलात् भुवं धरतीति धर्मो धरणीन्द्रस्तं चक्राकारेण वलयाकारेण समीपे बिभर्तीति धर्मचक्रभृत् पार्श्वतीर्थंकरः तस्मै शेषविशेषणविशिष्टाय श्रीमत्पार्श्वतीर्थकृते नमस्कुरु यतस्ते सुरासुरेन्द्रमकुटतटगतदिव्यमणिकिरणजालबालातपकवचितचारुचरणारविन्दतीर्थंकरपरमदेवनिरतिशयकल्याणपरम्परा स्यादिति सर्वे समन्ततो भद्रम्।

नमस्तमःपटच्छन्नजगदुद्योतहेतवे । जिनेन्द्रांशुमते तत्त्वप्रभाभाभारभासिने ॥ २ ॥
जयत्यजय्यमाहात्म्यं विशासितकुशासनम् । शासनं जैनमुद्भासि मुक्तिलक्ष्म्येकशासनम् ॥ ३ ॥
रत्नत्रयमयं जैनं जैत्रमस्त्रं जयत्यदः । येनाव्याजं व्यजेष्टार्हन् दुरितारातिवाहिनीम् ॥ ४ ॥
यः साम्राज्यमधःस्थायि गीर्वाणाधिपवैभवम् । तृणाय मन्यमानः सन् प्राव्राजीदग्रिमः पुमान् ॥ ५ ॥

स्वामीने निःशल्य हो शुक्लध्यान धारणकर केवलज्ञान प्राप्त किया था । जो इभर्त्रे–(इश्चासौ भर्ता च तस्मै) कामदेव और राजा दोनों हैं अथवा ईभर्त्रे (या भर्ता तस्मै)–लक्ष्मीके अधिपति हैं और कर्मबन्धनको नष्ट कर संसारका भय अपहरण करनेवाले हैं ऐसे श्री बाहुबली स्वामीको नमस्कार हो ।

इस पक्षमें श्लोकका अन्वय इस प्रकार करना चाहिए—श्रीमते, धर्मचक्रभृता सकलज्ञानसाम्राज्यपदमीयुषे, संसारभीमुषे इभर्त्रे नमः ।

वृषभसेन गणधर पक्षमें व्याख्यान इस प्रकार है । श्रीमते यह पद चतुर्थ्यन्त न होकर सप्तम्यन्त है–(श्रिया–स्याद्वादलक्ष्म्या उपलक्षितं मतं जिनशासनं तस्मिन्) अतएव जो स्याद्वादलक्ष्मीसे उपलक्षित जिनशासन–अर्थात् श्रुतज्ञानके विषयमें परोक्ष रूपसे समस्त पदार्थोंको जाननेवाले ज्ञानके साम्राज्यको प्राप्त हैं, जो धर्मचक्र अर्थात् धर्मोंके समूहको धारण करनेवाले हैं-पदार्थोंके अनन्त स्वभावोंको जाननेवाले हैं, मुनिसंघके अधिपति हैं और अपने सदुपदेशोंके द्वारा संसारका भय नष्ट करनेवाले हैं ऐसे वृषभसेन गणधरको नमस्कार हो ।

"भुवं धरतीति धर्मो धरणीन्द्रस्तं चक्राकारेण वलयाकारेण समीपे बिभर्तीति धर्मचक्रभृत् पार्श्वतीर्थंकरः तस्मै" । उक्त व्युत्पत्तिके अनुसार 'धर्मचक्रभृते' शब्दका अर्थ पार्श्वनाथ भी होता है अतः इस श्लोकमें भगवान् पार्श्वनाथको भी नमस्कार किया गया है । इसी प्रकार जयकुमार, नारायण, बलभद्र आदि अन्य कथानायकोंको भी नमस्कार किया गया है । विशेष व्याख्यान संस्कृत टिप्पणसे जानना चाहिए । इस श्लोकके चारों चरणोंके प्रथम अक्षरोंसे इस ग्रन्थका प्रयोजन भी ग्रन्थकर्ताने व्यक्त किया है—'श्रीसाधन' अर्थात् कैवल्यलक्ष्मीको प्राप्त करना ही इस ग्रन्थके निर्माणका प्रयोजन है ॥१॥

जो अज्ञानान्धकार रूप वस्त्रसे आच्छादित जगत्को प्रकाशित करनेवाले हैं तथा सब ओर फैलनेवाली ज्ञानरूपी प्रभाके भारसे अत्यन्त उद्भासित–शोभायमान हैं ऐसे श्रीजिनेन्द्ररूपी सूर्यको हमारा नमस्कार है ॥२॥ जिसकी महिमा अजेय है, जो मिथ्यादृष्टियोंके शासनका खण्डन करनेवाला है, जो नय प्रमाणके प्रकाशसे सदा प्रकाशित रहता है और मोक्षलक्ष्मी का प्रधान कारण है ऐसा जिनशासन निरन्तर जयवन्त हो ॥३॥ श्री अरहन्त भगवान्ने जिसके द्वारा पापरूपी शत्रुओंकी सेनाको सहजही जीत लिया था ऐसा जयनशील जिनेन्द्रप्रणीत रत्नत्रयरूपी अस्त्र हमेशा जयवन्त रहे ॥४॥ जिन अग्रपुरुष–पुरुषोत्तमने इन्द्रके वैभवको तिरस्कृत करनेवाले अपने साम्राज्यको तृणके समान तुच्छ समझते हुए मुनिदीक्षा धारण की

---

१ तत्त्वप्रभाभा–अ०, प०, स०, द०, ल० । २ प्रकृष्टशासनम् । ३ -त्म्यविशा–स० । ४ विनाशित । ५ मुक्तिलक्ष्म्या एकमेव शासनं यस्मात् तत् । ६ जिनस्येदम् । ७ पराविर्जेरिति सूत्रादात्मनेपदी । ८ तृणं मन्यमानः 'मन्यस्योकाकादिषु यतोऽवज्ञा' इति चतुर्थी ।

[1]यमनुप्राव्रजन् भूरि सहस्राणि महीक्षिताम् । इक्ष्वाकुभोजमुख्यानां[2] स्वामिभक्त्यैव केवलम् ॥ ६ ॥
कच्छाद्या यस्य सद्वृत्तं निर्वोढुमसहिष्णवः । [3]वसानाः पर्णवल्काद्यान् वन्यां [4]वृत्तिं प्रपेदिरे[5] ॥ ७ ॥
[6]अनाश्वान्यस्तपस्तेपे[6] चिरं सोढ्वा परीषहान् । सर्वंसहत्वमाध्याय[7] निर्जरासाधनं परम् ॥ ८ ॥
चिरं तपस्यतो यस्य जटा मूर्ध्नि बभुस्तराम् । ध्यानाग्निदग्ध[8]कर्मेन्धनिर्यद्धूमशिखा इव ॥ ९ ॥
मर्यादाविष्क्रिया[9]हेतोर्विहरन्तं यदृच्छया । चलन्तमिव हेमाद्रिं ददृशुर्यं सुरासुराः ॥१०॥
श्रेयसि [10]प्रयते दानं यस्मै दत्वा प्रसेदुषि[11] । पञ्चरत्नमयीं वृष्टिं ववृषुः सुरवारिदाः ॥११॥
[12]उदपादि विभोर्यस्य घातिकर्मारिनिर्जयात् । केवलाख्यं परं ज्योतिर्लोकालोकावभासकम् ॥१२॥
येनाभ्यधायि सद्धर्मः कर्मारातिनिवर्हणः । सदःसरोमुखाम्भोजवनदीधितिमालिना ॥१३॥
यस्मात् स्वान्वयमाहात्म्यं शुश्रुवान् [13]भरतात्मजः । सलीलमनटच्चारु[14]चञ्चच्चीवरवल्कलः[15] ॥१४॥
तमादिदेवं नाभेयं वृषभं वृषभध्वजम् । [16]प्रणौमि [17]प्रणिपत्याहं [18]प्रणिधाय मुहुर्मुहुः ॥१५॥
अजितादीन् महावीरपर्यन्तान् परमेश्वरान् । जिनेन्द्रान् [19]पर्युपासेऽहं धर्मसाम्राज्यनायकान् ॥१६॥
सकलज्ञानसाम्राज्ययौवराज्यपदे स्थितान् । [20]तोष्टवीमि गणाधीशानाप्तसंज्ञानकण्ठिकान् ॥१७॥

थी जिनके साथ ही केवल स्वामिभक्तिसे प्रेरित होकर इक्ष्वाकु और भोजवंशके बड़े बड़े हजारों राजाओंने दीक्षा ली थी। जिनके निर्दोष चरित्रको धारण करनेके लिए असमर्थ हुए कच्छ महाकच्छ आदि अनेक राजाओंने वृक्षोंके पत्ते तथा छालको पहिनना और वनमें पैदा हुए कंद-मूल आदिका भक्षण करना प्रारम्भ कर दिया था। जिन्होंने आहार पानीका त्यागकर सर्वंसहा पृथिवीकी तरह सब प्रकारके उपसर्गोंके सहन करनेका दृढ़ विचारकर अनेक परीषह सहे थे तथा कर्मनिर्जराके मुख्य कारण तपको चिरकाल तक तपा था। चिरकाल तक तपस्या करने वाले जिन जिनेन्द्रके मस्तकपर बढ़ी हुई जटाएँ ध्यानरूपी अग्निसे जलाए गए कर्मरूप ईंधनसे निकलती हुई धूमकी शिखाओंके समान शोभायमान होती थीं। मर्यादा प्रकट करनेके अभि-प्रायसे स्वेच्छापूर्वक चलते हुए जिन भगवान्को देखकर सुर और असुर ऐसा समझते थे मानो सुवर्णमय मेरु पर्वत ही चल रहा है। जिन भगवान्की हस्तिनापुरके राजा श्रेयांसके दान देनेपर देवरूप मेघोंने पाँच प्रकारके रत्नोंकी वर्षा की थी। कुछ समय बाद घातियाकर्मरूपी शत्रुओंको पराजित कर देनेपर जिन्हें लोकालोकको प्रकाशित करनेवाली केवलज्ञानरूपी उत्कृष्ट ज्योति प्राप्त हुई थी। जो सभारूपी सरोवरमें बैठे हुए भव्य जीवोंके मुखरूपी कमलोंको प्रकाशित करनेके लिए सूर्यके समान थे, जिन्होंने कर्मरूपी शत्रुओंको नष्ट करनेवाले समीचीन धर्मका उपदेश दिया था। और जिनसे अपने वंशका माहात्म्य सुनकर वल्कलोंको पहिने हुए भरतपुत्र मरीचिने लीलापूर्वक नृत्य किया था। ऐसे उन नाभिराजाके पुत्र वृषभचिह्नसे सहित आदिदेव (प्रथम तीर्थंकर) भगवान् वृषभदेवको मैं नमस्कार कर एकाग्र चित्तसे बार बार उनकी स्तुति करता हूँ ॥५-१५॥ इनके पश्चात्, जो धर्मसाम्राज्यके अधिपति हैं ऐसे अजितनाथको आदि लेकर महावीर पर्यन्त तेईस तीर्थंकरोंको भी नमस्कार करता हूँ ॥१६॥ इसके बाद, केवलज्ञान-

---

१ येन सह। २ भोजवंशाः। ३ परिदधानाः। ४ जीवनम्। ५ अनशनवान्। ६ अत्र तपस्तपसि, तपेर्धातोः कर्मवत् कार्यं भवति। तपसि कर्मणीत्यात्मनेपदी। ७ आलम्ब्य विमृश्य वा। आधाय द०, स०। ८ कर्मैध-द०। एध इन्धनम्। ९ प्रकटता। १० पवित्रे। ११ प्रसन्ने सति। १२ उत्पन्नम्। पदः 'पदः कर्तरि लुङि तेर्ङिर्नित्यं भवति जिः। १३ मरीचिः। १४ कन्थारूपवल्कलः। १५-वल्कलम् अ०। १६ णु स्तुतौ'। १७ प्रह्वो भूत्वा। १८ ध्यात्वा। १९ आराधये। २० भृशं पुनः पुनः स्तौमि।

अनादिनिधनं तुङ्गमनल्पफलदायिनम् । [1]उपाध्वं विपुलच्छाय[2] श्रुतस्कन्धमहाद्रुमम् ॥१८॥
इत्याप्तवचः[3]स्तोत्रैः कृतमङ्गलसत्क्रियः । पुराणं [4]संगृहीष्यामि त्रिषष्टिपुरुषाश्रितम् ॥१९॥
तीर्थेशामपि चक्रेशां हलिनामर्धचक्रिणाम् । त्रिषष्टिलक्षणं वक्ष्ये पुराणं तद्द्विषामपि ॥२०॥
पुरातनं पुराणं स्यात् तन्महन्महदाश्रयात् । महद्भिरुपदिष्टत्वात् महाश्रेयोऽनुशासनात् ॥२१॥
[5]कविं पुराणमाश्रित्य प्रसृतत्वात् पुराणता । महत्त्वं स्वमहिम्नैव [6]तस्येत्यन्यैर्निरुच्यते[7] ॥२२॥
महापुरुषसम्बन्धि महाभ्युदयशासनम् । महापुराणमाम्ना[8]तमत एतन्महर्षिभिः ॥२३॥
ऋषिप्रणीतमार्षं स्यात् सूक्तं सूनृतशासनात् । धर्मानुशासनाच्चेदं धर्मशास्त्रमिति[9]स्मृतम् ॥२४॥
[10]इतिहास इतीष्टं तद् इति हासीदिति श्रुतेः । [11]इतिवृत्तमथैतिह्य[12]माम्नायञ्चामनन्ति[13] तत् ॥२५॥
पुराणमितिहासाख्यं यत्प्रोवाच गणाधिपः । तत्किलाहमधीर्वक्ष्ये केवलं भक्तिचोदितः[14] ॥२६॥
पुराणं गणभृत्प्रोक्तं [15]विवक्षोर्मे महाम्भरः । [16]विवक्षोरिव दम्यस्य[17] पुङ्गवैर्भारमुद्धृतम् ॥२७॥

रूपी साम्राज्यके युवराज पदमें स्थित रहनेवाले तथा सम्यग्ज्ञानरूपी कण्ठाभरणको प्राप्त हुए गणधरोंकी मैं बार बार स्तुति करता हूँ ॥१७॥ हे भव्य पुरुषो ! जो द्रव्यार्थिक नयकी अपेक्षा आदि और अन्तसे रहित है, उन्नत है, अनेक फलोंका देनेवाला है, और विस्तृत तथा सघन छायासे युक्त है ऐसे श्रुतस्कन्धरूपी वृक्षकी उपासना करो ॥१८॥ इस प्रकार देव गुरुशास्त्रके स्तवनों द्वारा मङ्गलरूप सत्क्रियाको करके मैं त्रेशठ शलाका (चौबीस तीर्थंकर, बारह चक्रवर्ती, नव नारायण, नव प्रतिनारायण और नव बलभद्र) पुरुषोंसे आश्रित पुराणका संग्रह करूँगा ॥१९॥ तीर्थंकरों, चक्रवर्तियों, बलभद्रों, नारायणों और उनके शत्रुओं – प्रतिनारायणोंका भी पुराण कहूँगा ॥२०॥ यह ग्रन्थ अत्यन्त प्राचीन कालसे प्रचलित है इसलिये पुराण कहलाता है । इसमें महापुरुषोंका वर्णन किया गया है अथवा तीर्थंकर आदि महापुरुषोंने इसका उपदेश दिया है अथवा इसके पढ़नेसे महान् कल्याणकी प्राप्ति होती है इसलिये इसे महापुराण कहते हैं ॥२१॥ 'प्राचीन कवियोंके आश्रयसे इसका प्रसार हुआ है इसलिये इसकी पुराणता–प्राचीनता प्रसिद्ध ही है तथा इसकी महत्ता इसके माहात्म्यसे ही प्रसिद्ध है इसलिये इसे महापुराण कहते हैं' ऐसा भी कितने ही विद्वान् महापुराणकी निरुक्ति–अर्थ करते हैं ॥२२॥ यह पुराण महापुरुषोंसे सम्बन्ध रखनेवाला है तथा महान्-अभ्युदय – स्वर्ग मोक्षादिकल्याणोंका कारण है इसलिये महर्षि लोग इसे महापुराण मानते हैं । ॥२३॥ यह ग्रन्थ ऋषिप्रणीत होनेके कारण आर्ष, सत्यार्थका निरूपक होने से सूक्त तथा धर्मका प्ररूपक होनेके कारण धर्मशास्त्र माना जाता है । 'इति इह आसीत्' यहाँ ऐसा हुआ ऐसी अनेक कथाओंका इसमें निरूपण होनेसे ऋषि गण इसे 'इतिहास', 'इतिवृत्त' और 'ऐतिह्य' भी मानते हैं ॥२४-२५॥ जिस इतिहास नामक महापुराणका कथन स्वयं गणधरदेवने किया है उसे मैं मात्र भक्ति से प्रेरित हो कर कहूँगा क्योंकि मैं अल्पज्ञानी हूँ ॥२६॥ बड़े बड़े बैलों द्वारा उठाने योग्य भारको उठानेकी इच्छा करने वाले बछड़ेको जैसे बड़ी कठिनता पड़ती है वैसे ही गणधरदेवके द्वारा कहे हुए

---

१ आराधयध्वम् । २ पक्षे विपुलदयम् । ३ परापरगुरु-तद्वचनम् । ४ संक्षेपं करिष्ये । ५ पुराणं कवि– द० । पूर्वकविम् । ६ पुराणस्य । ७ निरूप्यते अ०, स०, द० । ८ कथितम् । ९ उक्तम् । १० इतिहासमिती– म०, ल० । ११ 'पारम्पर्योपदेशे स्यादैतिह्यमिति हाव्ययम्' इति वचनात् , अथवा इतिवृत्तम् ऐतिह्यम् आम्नायश्चेति नामत्रयम् । १२–मृषयो वामनन्ति स०, ल० । १३ कथयन्ति । १४–नोदितः द०, अ० । १५ वक्तुमिच्छोः । १६ वोढुमिच्छोः । १७ बालवत्सस्य ।

क्व गम्भीरः पुराणाब्धिः क्व माद्दग्बोधदुर्विधः[1] । सोऽहं महोदधिं दोर्भ्यां तितीर्षुर्यामि हास्यताम् ॥२८॥
अथवास्त्वेतदल्पोऽपि यद्घटेऽहं स्वशक्तितः । लूनबालधिरप्युक्षा किं नोत्पुच्छयते तराम् ॥२९॥
गणाधीशैः प्रणीतेऽपि पुराणेऽस्मिन्नहं यते[2] । सिंहैरासेविते मार्गे मृगोऽन्यः[3] केन वार्यते ॥३०॥
पुराणकविभिः क्षुण्णे[4] कथामार्गेऽस्ति मे गतिः[5] । [6]पौरस्त्यैः शोधितं मार्गं को वा नानुव्रजेज्जनः ॥३१॥
महाकरीन्द्रसंमर्दविरलीकृतपादपे । वने वन्येभकलभाः सुलभाः स्वैरचारिणः ॥३२॥
महातिमिपृथु[7]प्रोथपथी[8]कृतजलेऽर्णवे[9] । यथेष्टं पर्यटन्त्येव ननु पाठीनशावकाः ॥३३॥
महाभटास्त्रसम्पातनिरुद्धप्रतियोद्‌धृके[10] । [11]भटब्रुवोऽपि निश्शङ्कं वल्गत्येव रणाङ्गणे ॥३४॥
[12]तत्पुराणकवीनेव मत्वा हस्तावलम्बनम् । महतोऽस्य पुराणाब्धेस्तरणायोद्यतोऽस्म्यहम् ॥३५॥
महत्यस्मिन् पुराणाब्धौ [13]शाखाशततरङ्गके । स्खलितं यत्प्रमादान्मे तद् बुधाः क्षन्तुमर्हथ ॥३६॥
कविप्रमादजान् दोषानपास्यास्मात् कथामृतात् । सन्तो गुणान् जिघृक्षन्तु[14] [15]गुणगृह्यो हि सज्जनः ॥३७॥

महापुराणको कहनेकी इच्छा रखनेवाले मुझ अल्पज्ञको पड़ रही है ॥२७॥ कहाँ तो यह अत्यन्त गम्भीर पुराणरूपी समुद्र और कहाँ मुझ जैसा अल्पज्ञ ? मैं अपनी भुजाओंसे यहाँ समुद्रको तैरना चाहता हूँ इसलिये अवश्य ही हँसीको प्राप्त होऊँगा ॥२८॥ अथवा ऐसा समझिये कि मैं अल्पज्ञानी होकर भी अपनी शक्तिके अनुसार इस पुराणको कहनेके लिये प्रयत्न कर रहा हूँ जैसे कि कटी पूँछवाला भी बैल क्या अपनी कटी पूँछको नहीं उठाता ? अर्थात् अवश्य उठाता है ॥२९॥ यद्यपि यह पुराण गणधरदेवके द्वारा कहा गया है तथापि मैं भी यथा शक्ति इसके कहनेका प्रयत्न करता हूँ । जिस रास्तेसे सिंह चले हैं उस रास्तेसे हिरण भी अपनी शक्त्यनुसार यदि गमन करना चाहता है तो उसे कौन रोक सकता है ॥३०॥ प्राचीन कवियों द्वारा क्षुण्ण किये गये–निरूपण कर सुगम बनाये गये कथामार्गमें मेरी भी गति है क्योंकि आगे चलनेवाले पुरुषोंके द्वारा जो मार्ग साफ कर दिया जाता है फिर उस मार्गमें कौन पुरुष सरलतापूर्वक नहीं जा सकता है ? अर्थात् सभी जा सकते हैं ॥३१॥ अथवा बड़े बड़े हाथियोंके मर्दन करनेसे जहाँ वृक्ष बहुत ही विरले कर दिये गये हैं ऐसे वनमें जङ्गली हस्तियोंके बच्चे सुलभतासे जहाँ तहाँ घूमते ही हैं ॥३२॥ अथवा जिस समुद्रमें बड़े बड़े मच्छोंने अपने विशाल मुखोंके आघातसे मार्ग साफ कर दिया है उसमें उन मच्छोंके छोटे छोटे बच्चे भी अपनी इच्छासे घूमते हैं ॥३३॥ अथवा जिस रणभूमिमें बड़े बड़े शूरवीर योद्धाओंने अपने शस्त्र-प्रहारोंसे शत्रुओंको रोक दिया है उसमें कायर पुरुष भी अपनेको योद्धा मानकर निःशङ्क हो उछलता है ॥३४॥ इसलिये मैं प्राचीन कवियोंको ही हाथका सहारा मानकर इस पुराणरूपी समुद्रको तैरनेके लिये तत्पर हुआ हूँ ॥३५॥ सैकड़ों शाखारूप तरङ्गोंसे व्याप्त इस पुराणरूपी महासमुद्रमें यदि मैं कदाचित् प्रमादसे स्खलित हो जाऊँ–अज्ञानसे कोई भूलकर बैठूँ तो विद्वज्जन मुझे क्षमा ही करेंगे ॥३६॥ सज्जन पुरुष कविके प्रमादसे उत्पन्न हुए दोषोंको छोड़ कर इस कथारूपी अमृतसे मात्र गुणोंकेही ग्रहण करनेकी इच्छा करें क्योंकि सज्जन पुरुष गुण ही ग्रहण करते हैं । ॥३७॥

---

१ दरिद्रः । २ प्रयत्नं करोमि । ३ यान् अ०, प०, स०, ल०, म० । ४ सम्मर्दिते । ५ उपायः । ६ पुरोगमैः । ७ नासिका । ८ अपन्थाः पन्थाः कृतं पथीकृतं जलं यत्र । ९ जलार्णवे म०, अ०, प०, ल० । १० भटे । ११ भटजातिमात्रोपजीवी, तुच्छभट इत्यर्थः । १२ तत् कारणात् । सत्पु०–अ०, स०, द० । १३ अवान्तरकथा । १४ गृहीतुमिच्छन्तु । १५ गुणगृह्या हि सज्जनाः प० म० ल० । गुणा एव गृह्या यस्यासौ ।

सुभाषितमहारत्नसंभृतेऽस्मिन् कथाम्बुधौ । [1]दोषग्राहानमादृत्य यतध्वं सारसंग्रहे ॥३८॥
कवयः सिद्धसेनाद्या वयं च कवयो मताः । मणयः पद्मरागाद्या ननु काचोऽपि मेचकः ॥३९॥
यद्वचोदर्पणे कृत्स्नं [2]वाङ्मयं प्रतिबिम्बितम् । तान्कवीन्बहुमन्येऽहं किमन्यैः कविमानिभिः ॥४०॥
नमः पुराणकारेभ्यो यद्वक्त्राब्जे सरस्वती । येषामद्या[3] कवित्वस्य [4]सूत्रपातायितं वचः ॥४१॥
[5]प्रवादिकरियूथानां केसरी [6]नयकेसरः । सिद्धसेनकविर्जीयाद्विकल्पनखराङ्कुरः ॥४२॥
नमः समन्तभद्राय महते कविवेधसे । यद्वचोवज्रपातेन निर्भिन्नाः कुमताद्रयः ॥४३॥
[7]कवीनां गमकानाञ्च वादिनां वाग्मिनामपि । यशः [8]सामन्तभद्रीयं मूर्ध्नि [9]चूडामणीयते ॥४४॥
श्रीदत्ताय नमस्तस्मै तपःश्रीदीप्तमूर्तये । कण्ठीरवायितं येन प्रवादीभप्रभेदने ॥४५॥
[10]विदुष्विणीषु संसत्सु[11] यस्य नामापि कीर्तितम् । [12]निखर्वयति तद्गर्वं यशोभद्रः स पातु नः ॥४६॥
चन्द्रांशुशुभ्रयशसं प्रभाचन्द्रकविं स्तुवे । कृत्वा चन्द्रोदयं[13] येन शश्वदाह्लादितं जगत् ॥४७॥

उत्तम उत्तम उपदेशरूपी रत्नोंसे भरे हुए इस कथारूप समुद्रमें मगरमच्छोंको छोड़कर सार वस्तुओंके ग्रहण करनेमें ही प्रयत्न करना चाहिये ॥३८॥ पूर्वकालमें सिद्धसेन आदि अनेक कवि हो गये हैं और मैं भी कवि हूँ सो दोनोंमें कवि नामकी तो समानता है परन्तु अर्थमें उतना ही अन्तर है जितना कि पद्मराग मणि और काच में होता है ॥३९॥ इसलिये जिनके वचनरूपी दर्पणमें समस्त शास्त्र प्रतिबिम्बित थे मैं उन कवियोंको बहुत मानता हूँ—उनका आदर करता हूँ । मुझे उन अन्य कवियोंसे क्या प्रयोजन है जो व्यर्थ ही अपनेको कवि माने हुए हैं ॥४०॥ मैं उन पुराणके रचने वाले कवियोंको नमस्कार करता हूँ जिनके मुखकमलमें सरस्वती साक्षात् निवास करती है तथा जिनके वचन अन्य कवियोंकी कवितामें सूत्रपातका कार्य करते हैं—मूलभूत होते हैं ॥४१॥ वे सिद्धसेन कवि जयवन्त हों जो कि प्रवादीरूप हाथियोंके झुण्डके लिये सिंहके समान हैं, नैगमादि नय ही जिनकी केसर (अयाल—गर्दन परके बाल) तथा अस्ति नास्ति आदि विकल्प ही जिनके पैने नाखून थे ॥४२॥ मैं उन महाकवि समन्तभद्रको नमस्कार करता हूँ जो कि कवियोंमें ब्रह्माके समान हैं और जिनके वचनरूप वज्रके पातसे मिथ्यामत-रूपी पर्वत चूर चूर होजाते थे । ॥४३॥ स्वतन्त्र कविता करने वाले कवि, शिष्योंको ग्रन्थके मर्मतक पहुँचाने वाले गमक—टीकाकार, शास्त्रार्थ करने वाले वादी और मनोहर व्याख्यान देने वाले वाग्मी इन सभीके मस्तक पर समन्तभद्र स्वामीका यश चूड़ामणिके समान आचरण करने वाला है । अर्थात् वे सबमें श्रेष्ठ थे ॥४४॥ मैं उन श्रीदत्तके लिये नमस्कार करता हूँ जिनका शरीर तपोलक्ष्मीसे अत्यन्त सुन्दर है और जो प्रवादीरूपी हस्तियोंके भेदनमें सिंहके समान थे ॥४५॥ विद्वानोंकी सभामें जिनका नाम कह देने मात्रसे सबका गर्व दूर हो जाता है वे यशोभद्र स्वामी हमारी रक्षा करें ॥४६॥ मैं उन प्रभाचन्द्र कविकी स्तुति करता हूँ जिनका यश चन्द्रमा-की किरणों के समान अत्यन्त शुक्ल है और जिन्होंने चन्द्रोदयकी रचना करके जगत् को हमेशा

---

१ दोषग्रहान् ल० । २ तर्कागमव्याकरणछन्दोऽलङ्कारादिवाक्प्रपञ्चः । ३ -मन्यः कवित्वस्य अ०, प०, स०, द०, म०, ल० । ४ सूत्रपतनायितम् । ५ परवादि । ६ नैगमादिः । ७ "कविर्नूतनसन्दर्भो गमकः कृतिभेदगः । वादी विजयवाग्वृत्तिर्वाग्मी तु जनरञ्जकः ॥" ८ समन्तभ- अ०, स० । ९ चूडामणिरिवाचरति । १० विद्वांसः अत्र सन्तीति विदुष्विण्यस्तासु । ११ सभासु । १२ नितरां ह्रस्वं करोति । १३ ग्रन्थविशेषम् ।

चन्द्रोदयकृतस्तस्य यशः केन न शस्यते । यदाकल्पमनाम्लानि[1] सतां शेखरतां गतम् ॥४८॥
[2]शीतीभूतं जगद्यस्य वाचाराध्य[3]चतुष्टयम् । मोक्षमार्गं स पायान्नः शिवकोटिर्मुनीश्वरः ॥४९॥
काव्यानुचिन्तने यस्य जटाः प्रबलवृत्तयः । अर्थान् [4]स्मानुवदन्तीव[5] जटाचार्यः स नोऽवतात् ॥५०॥
धर्मसूत्रानुगा हृद्या यस्य वाङ्मणयोऽमलाः । कथालङ्कारतां भेजुः [6]काणभिक्षुर्जयत्यसौ ॥५१॥
कवीनां तीर्थकृद्देवः [7]किं तरां तत्र वर्ण्यते । विदुषां वाङ्मलध्वंसि [8]तीर्थं यस्य [9]वचोमयम् ॥५२॥
भट्टाकलङ्कश्रीपालपात्रकेसरिणां गुणाः । विदुषां हृदयारूढा हारायन्तेऽतिनिर्मलाः ॥५३॥
कवित्वस्य परा सीमा वाग्मित्वस्य परं पदम् । गमकत्वस्य पर्यन्तो वादिसिंहोऽर्च्यते न कैः ॥५४॥
श्रीवीरसेन इत्यात्तभट्टारकपृथुप्रथः । स नः पुनातु पूतात्मा [10]कविवृन्दारको[11] मुनिः ॥५५॥
लोकवित्त्वं कवित्वञ्च स्थितं भट्टारके द्वयम् । वाङ्मिता[12]ऽवाङ्मिता[13] यस्य वाचा वाचस्पतेरपि ॥५६॥
सिद्धान्तोपनिबन्धानां[14] विधातुर्मद्गुरोश्चिरम् । मन्मनःसरसि स्थेयान् मृदुपादकुशेशयम् ॥५७॥

के लिये आह्लादित किया है ॥४७॥ वास्तवमें चन्द्रोदयकी रचना करनेवाले उन प्रभाचन्द्र आचार्यके कल्पान्त काल तक स्थिर रहने वाले तथा सज्जनोंके मुकुटभूत यशकी प्रशंसा कौन नहीं करता ? अर्थात् सभी करते हैं ॥४८॥ जिनके वचनोंसे प्रकट हुए चारों आराधनारूप मोक्षमार्ग (भगवती आराधना) की आराधना कर जगत्‌के जीव सुखी होते हैं वे शिवकोटि मुनीश्वर भी हमारी रक्षा करें ॥४९॥ जिनकी जटारूप प्रबल-युक्तिपूर्ण वृत्तियाँ-टीकाएं काव्योंके अनुचिन्तनमें ऐसी शोभायमान होती थीं मानो हमें उन काव्योंका अर्थ ही बतला रही हों ऐसे वे जटासिंहनन्दि आचार्य (वराङ्गचरितके कर्ता) हम लोगोंकी रक्षा करें ॥५०॥ वे काणभिक्षु जयवान् हों जिनके धर्मरूप सूत्रमें पिरोये हुए मनोहर वचनरूप निर्मल मणि कथाशास्त्रके अलंकारपनेको प्राप्त हुए थे अर्थात् जिनके द्वारा रचे गये कथाग्रन्थ सब ग्रन्थोंमें अत्यन्त श्रेष्ठ हैं ॥५१॥ जो कवियोंमें तीर्थंकरके समान थे अथवा जिन्होंने कवियोंको पथ प्रदर्शन करनेके लिये किसी लक्षणग्रन्थकी रचना की थी और जिनका वचनरूपी तीर्थ विद्वानों के शब्दसम्बन्धी दोषोंको नष्ट करने वाला है ऐसे उन देवाचार्य-देवनन्दीका कौन वर्णन कर सकता है ? ॥५२॥ भट्टाकलङ्क, श्रीपाल और पात्रकेशरी आदि आचार्योंके अत्यन्त निर्मल गुण विद्वानोंके हृदयमें मणिमालाके समान सुशोभित होते हैं ॥५३॥ वे वादिसिंह कवि किसके द्वारा पूज्य नहीं हैं जो कि कवि, प्रशस्त व्याख्यान देनेवाले और गमकों-टीकाकारोंमें सबसे उत्तम थे ॥५४॥ वे अत्यन्त प्रसिद्ध वीरसेन भट्टारक हमें पवित्र करें जिनकी आत्मा स्वयं पवित्र है जो कवियोंमें श्रेष्ठ हैं जो लोकव्यवहार तथा काव्यस्वरूपके महान् ज्ञाता हैं तथा जिनकी वाणीके सामने औरोंकी तो बात ही क्या, स्वयं सुरगुरु बृहस्पतिकी वाणी भी सीमित-अल्प जान पड़ती है ॥५५-५६॥ धवलादि सिद्धान्तोंके ऊपर अनेक उपनिबन्ध-प्रकरणोंके रचनेवाले हमारे गुरु श्रीवीरसेन भट्टारकके कोमल चरणकमल हमेशा

---

१ ईषदुम्लानि । न आम्लानि अनाम्लानि । -मनाम्लायि द०, स०, अ०, प०, ल० । २ सुखीभूतम् । ३ आराधनाचतुष्टयम् । ४ तु हि च स्माह वै पादपूरणे । ५ सार्थकं पुनर्वचनम् अनुवादः । ६ काणभिक्षु अ०, स० । ७ कवीनां तीर्थकृदित्यनेनैव वर्णनेनालम् । तत्र देवे अन्यत् किमपि अतिशयेन न वर्णनीयमिति भावः । तदेव तीर्थकृत्त्वं समर्थम् । इतरमपरार्द्धमाह । ८ जलम् । ९ वाग्रूपम् । १० वादिवृन्दा- स०,द० । ११ श्रेष्ठः । १२ वाग्मिनो स०,द० । १३ अवाङ्मिता अल्पीकृता । १४ व्याख्यानानाम् ।

धवलां भारतीं तस्य कीर्तिञ्च विधुनिर्मलाम्। धवलीकृतनिश्शेषभुवनां [1]नन्नमीम्यहम् ॥५८॥
जन्मभूमिस्तपोलक्ष्म्याः श्रुतप्रशमयोर्निधिः। जयसेनगुरुः पातु बुधवृन्दाग्रणीः स नः ॥५९॥
स पूज्यः कविभिर्लोके कवीनां परमेश्वरः। [2]वागर्थसंग्रहं कृत्स्नं पुराणं यः [3]समग्रहीत् ॥६०॥
कवयोऽन्येपि सन्त्येव कस्तानुद्[4]दृष्टुमप्यलम्[5]। सत्कृता ये जगत्पूज्यास्ते मया मङ्गलार्थिना ॥६१॥
त एव कवयो लोके त एव च विचक्षणाः। येषां धर्मकथाङ्गत्वं भारती प्रतिपद्यते ॥६२॥
धर्मानुबन्धिनी या स्यात् कविता सैव शस्यते। शेषा पापास्रवायैव सुप्रयुक्तापि जायते ॥६३॥
केचिन्मिथ्यादृशः काव्यं ग्रथ्नन्ति श्रुतिपेशलम्। [6]तत्त्वधर्मानुबन्धित्वान्न सतां प्रीणनक्षमम् ॥६४॥
अव्युत्पन्नतराः केचित् कवित्वाय कृतोद्यमाः। प्रयान्ति हास्यतां लोके मूका इव विवक्षवः ॥६५॥
केचिदन्यवचोलेशानादाय कविमानिनः। छायामारोपयन्त्यन्यां वस्त्रेष्विव वणिग्ब्रुवाः ॥६६॥
संभोक्तुमक्षमाः केचित्सरसां[7] कृतिकामिनीम्। सहायान् कामयन्तेऽन्यानकल्या इव कामुकाः ॥६७॥
केचिदन्यकृतैरर्थैः शब्दैश्च [9]परिवर्तितैः। प्रसारयन्ति काव्यार्थान् [10]प्रतिशिष्ट्येव वाणिजाः ॥६८॥

हमारे मनरूपसरोवरमें विद्यमान रहें ॥५७॥ श्रीवीरसेन गुरुकी धवल, चन्द्रमाके समान निर्मल और समस्त लोकको धवल करनेवाली वाणी (धवलाटीका) तथा कीर्तिको मैं बार बार नमस्कार करता हूँ ॥५८॥ वे जयसेन गुरु हमारी रक्षा करें जो कि तपोलक्ष्मीके जन्मदाता थे, शास्त्र और शान्तिके भाण्डार थे, विद्वानोंके समूहके अग्रणी—प्रधान थे, वे कवि परमेश्वर लोक में कवियों द्वारा पूज्य थे ॥५९॥ जिन्होंने शब्द और अर्थके संग्रह रूप समस्त पुराणका संग्रह किया था ॥६०॥ इन ऊपर कहे हुए कवियोंके सिवाय और भी अनेक कवि हैं उनका गुणगान तो दूर रहा नाममात्र भी कहनेमें कौन समर्थ हो सकता है ? अर्थात् कोई नहीं। मङ्गल प्राप्तिकी अभिलाषासे मैं उन जगत्पूज्य सभी कवियोंका सत्कार करता हूँ ॥६१॥ संसारमें वे ही पुरुष कवि हैं और वे ही चतुर हैं जिनकी कि वाणी धर्मकथाके अङ्गपनेको प्राप्त होती है अर्थात् जो अपनी वाणी द्वारा धर्मकथाकी रचना करते हैं ॥६२॥ कविता भी वही प्रशंसनीय समझी जाती है जो धर्मशास्त्रसे सम्बन्ध रखती है। धर्मशास्त्रके सम्बन्धसे रहित कविता मनोहर होनेपर भी मात्र पापास्रवके लिये होती है ॥६३॥ कितने ही मिथ्यादृष्टि कानों को प्रिय लगनेवाले—मनोहर काव्यग्रन्थोंकी रचना करते हैं परन्तु उनके वे काव्य अधर्मानुबन्धी होनेसे—धर्म शास्त्रके निरूपक न होनेसे सज्जनोंको सन्तुष्ट नहीं कर सकते ॥६४॥ लोकमें कितने ही कवि ऐसे भी हैं जो काव्यनिर्माणके लिये उद्यम करते हैं परन्तु वे बोलनेकी इच्छा रखनेवाले गूँगे पुरुषकी तरह केवल हँसीको ही प्राप्त होते हैं ॥६५॥ योग्यता न होनेपर भी अपनेको कवि माननेवाले कितने ही लोग दूसरे कवियोंके कुछ वचनोंको लेकर उसकी छाया मात्र कर देते हैं अर्थात् अन्य कवियोंकी रचनामें थोड़ा सा परिवर्तन कर उसे अपनी मान लेते हैं जैसे कि नकली व्यापारी दूसरोंके थोड़ेसे कपड़े लेकर उनमें कुछ परिवर्तन कर व्यापारी बन जाते हैं ॥६६॥ शृङ्गारादि रसोंसे भरी हुई—रसीली कवितारूपी कामिनीके भोगनेमें—उसकी रचना करनेमें असमर्थ हुए कितनेही कवि उस प्रकार सहायकोंकी वांछा करते हैं जिस प्रकार कि स्त्रीसंभोगमें असमर्थ कामीजन औषधादि सहायकोंकी वांछा करते हैं ॥६७ कितनेही कवि अन्य कवियों

---

१ तां नमाम्य-द०। २ शब्दः। ३ संग्रहमकरोत्। ४ नाममात्रेण कथयितुम्। ५ समर्थः। ६ तुरित्य-व्ययमवधारणार्थे वर्तते। ७ स्वरसात् द०। सामर्थ्यात्। ८ नकल्या-प०,म०,ल०। कल्याः दक्षाः अकल्याः अदक्षाः स्त्रीसम्भोगे असमर्था इत्यर्थः। 'कल्यं सज्जे प्रभाते च कल्यो नीरोगदक्षयोः' इति विश्वप्रकाशः। अकल्याः पुंस्त्वरहिताः। ९ पर्यायान्तरं नीतैः। १० प्रतिनिधिव्यवहारेण।

केचिद्वर्णोज्ज्वलां वाणीं रचयन्त्यर्थदुर्बलाम् । जातुषी कण्ठिकेवासौ छायामृच्छति नोच्छ्रिताम् ॥६९॥
केचिदर्थमपि प्राप्य तद्योगपदयोजनैः[1] । न सतां प्रीणनायालं लुब्धा लब्धश्रियो यथा ॥७०॥
यथेष्टं प्रकृतारम्भाः केचिन्निर्वहणाकुलाः । कवयो बत सीदन्ति कराक्रान्तकुटुम्बिवत् ॥७१॥
आप्तपाशमतान्यन्ये कवयः पोषयन्त्यलम् । कुकवित्वाद्वरं तेषामकवित्वमुपासितम् ॥७२॥
अनभ्यस्तमहाविद्याः कलाशास्त्रबहिष्कृताः । काव्यानि कर्तुमीहन्ते केचित्पश्यत साहसम् ॥७३॥
तस्मादभ्यस्य शास्त्रार्थानुपास्य च महाकवीन् । धर्म्यं शस्यं यशस्यञ्च काव्यं कुर्वन्तु धीधनाः ॥७४॥
परेषां दूषणाज्जातु न बिभेति कवीश्वरः । किमुलूकभयाद् धुन्वन् ध्वान्तं नोदेति [2]भानुमान् ॥७५॥
परे तुष्यन्तु वा मा वा कविः स्वार्थं प्रतीहताम् । न पराराधनाच्छ्रेयः श्रेयः सन्मार्गदेशनात्[3] ॥७६॥
पुराणकवयः केचित् केचिन्नवकवीश्वराः । तेषां मतानि[4] भिन्नानि कस्तदाराधने क्षमः ॥७७॥
केचित्सौशब्द्यमिच्छन्ति केचिदर्थस्य सम्पदम्[5] । केचित्समासभूयस्त्वं परे व्यस्तां[6] पदावलीम् ॥७८॥

द्वारा रचे गये शब्द तथा अर्थमें कुछ परिवर्तन कर उनसे अपने काव्यग्रन्थोंका प्रसार करते हैं जैसे कि व्यापारी अन्य पुरुषों द्वारा बनाये हुए मालमें कुछ परिवर्तन कर अपनी छाप लगा कर उसे बेचा करते हैं ॥६८॥ कितनेही कवि ऐसी कविता करते हैं जो शब्दोंसे तो सुन्दर होती है परन्तु अर्थसे शून्य होती है। उनकी यह कविता लाखकी बनी हुई कंठीके समान उत्कृष्ट शोभाको प्राप्त नहीं होती ॥६९॥ कितनेही कवि सुन्दर अर्थको पाकर भी उसके योग्य सुन्दर पदयोजनाके बिना सज्जन पुरुषोंको आनन्दित करनेके लिये समर्थ नहीं हो पाते जैसे कि भाग्यसे प्राप्त हुई कृपण मनुष्यकी लक्ष्मी योग्य पद–स्थान योजनाके बिना सत्पुरुषोंको आनन्दित नहीं कर पाती ॥७०॥ कितनेही कवि अपनी इच्छानुसार काव्य बनानेका प्रारम्भ तो कर देते हैं परन्तु शक्ति न होने से उसकी पूर्ति नहीं कर सकते अतः वे टैक्सके भारसे दबे हुए बहुकुटुम्बी व्यक्तिके समान दुखी होते हैं ॥७१॥ कितनेही कवि अपनी कविता द्वारा कपिल आदि आप्ताभासोंके उपदिष्ट मतका पोषण करते हैं–मिथ्यामार्गका प्रचार करते हैं। ऐसे कवियोंका कविता करना व्यर्थ है क्योंकि कुकवि कहलानेकी अपेक्षा अकवि कहलाना ही अच्छा है ॥७२॥ कितनेही कवि ऐसे भी हैं जिन्होंने न्याय व्याकरण आदि महाविद्याओंका अभ्यास नहीं किया है तथा जो संगीत आदि कलाशास्त्रोंके ज्ञानसे दूर हैं फिर भी वे काव्य करनेकी चेष्टा करते हैं, अहो ! इनके साहसको देखो ॥७३॥ इसलिये बुद्धिमानोंको शास्त्र और अर्थका अच्छी तरह अभ्यास कर तथा महाकवियोंकी उपासना करके ऐसे काव्यकी रचना करनी चाहिये जो धर्मोपदेशसे सहित हो, प्रशंसनीय हो और यशको बढ़ाने वाला हो ॥७४॥ उत्तम कवि दूसरोंके द्वारा निकाले हुए दोषोंसे कभी नहीं डरता। क्या अन्धकारको नष्ट करने वाला सूर्य उलूकके भयसे उदित नहीं होता ? ॥७५॥ अन्यजन संतुष्ट हो अथवा नहीं कविको अपना प्रयोजन पूर्ण करनेके प्रति ही उद्यम करना चाहिये। क्योंकि कल्याणकी प्राप्ति अन्य पुरुषोंकी आराधनासे नहीं होती किन्तु श्रेष्ठ मार्गके उपदेशसे होती है ॥७६॥ कितनेही कवि प्राचीन हैं और कितने ही नवीन हैं तथा उन सबके मत जुदे जुदे हैं अतः उन सबको प्रसन्न करनेके लिये कौन समर्थ हो सकता है ? ॥७७॥ क्योंकि कोई शब्दोंकी सुन्दरताको पसंद करते हैं, कोई मनोहर अर्थसम्पत्तिको चाहते हैं, कोई समासकी अधिकताको

---

१ वर्णसमुदाययोजनैश्च । २ भास्करः । ३ दर्शनात् स० । ४ अभिप्रायाः । ५ सौष्ठवम् म० । ६ व्यस्तपदावलीम् अ०, व्यस्तपदावलिम् म० ।

मृदुबन्धार्थिनः केचित्स्फुटबन्धैषिणः[1] परे । मध्यमाः केचिदन्येषां रुचिरन्यैव लक्ष्यते ॥७९॥
इति भिन्ना[2]भिसन्धित्वा[3]द् दुराराधा [4]मनीषिणः । [5]पृथक्जनोऽपि सूक्तानामनभिज्ञः सुदुर्ग्रहः[6] ॥८०॥
सतीमपि कथां रम्यां दूषयन्त्येव दुर्जनाः । भुजङ्गा इव सच्छायां [7]चन्दनद्रुमवल्लरीम् ॥८१॥
सदोषामपि निर्दोषां करोति सुजनः कृतिम् । [8]घनात्यय इवापङ्कां सरसीं पङ्कदूषिताम् ॥८२॥
दुर्जना दोषमिच्छन्ति गुणमिच्छन्ति सज्जनाः । स तेषां [9]क्षेत्रजो भावो दुश्चिकित्स्यश्चिरादपि ॥८३॥
यतो गुणधनाः सन्तो दुर्जना दोषवित्तकाः । स्वंधनं गृह्णतां तेषां कः प्रत्यर्थी बुधो जनः ॥८४॥
दोषान् गृह्णन्तु वा कामं गुणास्तिष्ठन्तु नः स्फुटम् । गृहीतदोषं यत्काव्यं जायते तद्धि [10]पुष्कलम् ॥८५॥
असतां [11]दूयते चित्तं श्रुत्वा धर्मकथां सतीम् । मन्त्रविद्यामिवाकर्ण्य महाग्रहविकारिणाम् ॥८६॥
मिथ्यात्वदूषितधियामरुच्यं धर्मभेषजम् । सदप्यसदिवाभाति तेषां पित्तजुषामिव ॥८७॥
सुभाषितमहामन्त्रान् प्रयुक्तान्कविमन्त्रिभिः । श्रुत्वा प्रकोपमायान्ति दुर्ग्रहा इव दुर्जनाः ॥८८॥
चिरप्ररूढदुर्ग्रन्थिवेणुमूलसमोऽनृजुः । नर्जूकर्त्तुं खलः शक्यः श्वपुच्छसदृशोऽथवा ॥८९॥

अच्छा मानते हैं और कोई पृथक् पृथक् रहने वाली–असमस्त पदावलीको ही चाहते हैं ॥७८॥ कोई मृदुल-सरल रचनाको चाहते हैं, कोई कठिन रचनाको चाहते हैं, कोई मध्यम दर्जेकी रचना पसन्द करते हैं और कोई ऐसे भी हैं जिनकी रुचि सबसे विलक्षण–अनोखी है ॥७९॥ इस प्रकार भिन्न-भिन्न विचार होनेके कारण बुद्धिमान् पुरुषोंको प्रसन्न करना कठिन कार्य है। तथा सुभाषितोंसे सर्वथा अपरिचित रहने वाले मूर्ख मनुष्यको वशमें करना उनकी अपेक्षा भी कठिन कार्य है ॥८०॥ दुष्ट पुरुष निर्दोष और मनोहर कथाको भी दूषित कर देते हैं जैसे चन्दनवृक्ष की मनोहर कान्तिसे युक्त नयी कोपलों को सर्प दूषित कर देते हैं ॥ ८१ ॥ परन्तु सज्जन पुरुष सदोष रचनाको भी निर्दोष बना देते हैं जैसे कि शरद ऋतु पंक सहित सरोवरोंको पंक रहित–निर्मल बना देती है ॥८२॥ दुर्जन पुरुष दोषोंको चाहते हैं और सज्जन पुरुष गुणों को। उनका यह सहज स्वभाव है जिसकी चिकित्सा बहुत समयमें भी नहीं हो सकती अर्थात् उनका यह स्वभाव किसी प्रकार भी नहीं छूट सकता ॥८३॥ जब कि सज्जनोंका धन गुण है और दुर्जनोंका धन दोष, तब उन्हें अपना-अपना धन ग्रहण कर लेनेमें भला कौन बुद्धिमान् पुरुष बाधक होगा ? ॥८४॥ अथवा दुर्जन पुरुष हमारे काव्यसे दोषोंको ग्रहण कर लेवें जिससे गुण ही गुण रह जावें यह बात हमको अत्यन्त इष्ट है क्योंकि जिस काव्यसे समस्त दोष निकाल लिये गये हों वह काव्य निर्दोष होकर उत्तम हो जावेगा ॥८५॥ जिस प्रकार मन्त्रविद्याको सुन कर भूत पिशाचादि महाग्रहोंसे पीड़ित मनुष्योंका मन दुःखी होता है उसी प्रकार निर्दोष धर्मकथा को सुन कर दुर्जनोंका मन दुखी होता है ॥८६॥ जिन पुरुषोंकी बुद्धि मिथ्यात्वसे दूषित होती है उन्हें धर्मरूपी औषधि तो अरुचिकर मालूम होती ही है साथमें उत्तमोत्तम अन्य पदार्थ भी बुरे मालूम होते हैं जैसे कि पित्तज्वर वालेको औषधि या अन्य दुग्ध आदि उत्तम पदार्थ भी बुरे-कड़ुवे मालूम होते हैं ॥८७॥ कवि रूप मन्त्रवादियोंके द्वारा प्रयोगमें लाये हुए सुभाषित रूप मंत्रोंको सुनकर दुर्जन पुरुष भूतादि ग्रहोंके समान प्रकोपको प्राप्त होते हैं ॥८८॥ जिस प्रकार बहुत दिनसे जमे हुए बांसकी गाँठ-दार जड़ स्वभावसे टेढ़ी होती है उसे कोई सीधा नहीं कर सकता उसी प्रकार चिरसंचित

---

१ श्लिष्टबन्धः । गाढबन्ध इत्यर्थः । २ अभिप्रायः । ३ दुराराध्या अ०, प०, स०, द०, म०, ल०, । ४ विपश्चितः अ०, स० । ५ पामरः । ६ सुष्ठु दुःखेन महता कष्टेन ग्रहीतुं शक्यः । ७ मञ्जरीम् ल० । ८ शरत्कालः । ९ शरीरजः 'क्षेत्रं पत्नीशरीरयोः' इत्यभिधानात् । १० मनोज्ञम् । ११ दूङ् परितापे ।

सुजनः सुजनीकर्तुमशक्तो चिरादपि । खलः खलीकरोत्येव जगदाशु तदद्भुतम् ॥९०॥
सौजन्यस्य परा कोटिरनसूया दयालुता । गुणपक्षानुरागश्च दौर्जन्यस्य विपर्ययः ॥९१॥
स्वभावमिति निश्चित्य सुजनस्येतरस्य च । सुजनेष्वनुरागो नो दुर्जनेष्ववधीरणाः ॥९२॥
कवीनां कृतिनिर्वाहे सतो मत्वावलम्बनम् । कविताम्भोधिमुद्वेलं[1] लिलङ्घयिषुरस्म्यहम् ॥९३॥
कवेर्भावोऽथवा कर्म काव्यं तज्ज्ञैर्निरुच्यते । तत्प्रतीतार्थमग्राम्यं[2] सालङ्कारमनाकुलम्[3] ॥९४॥
केचिदर्थस्य सौन्दर्यमपरे पदसौष्ठवम्[4] । वाचामलंक्रियां प्राहुस्तद्द्वयं नो मतं मतम् ॥९५॥
सालङ्कारमुपारूढरसमुद्भूतसौष्ठवम्[5] । अनुच्छिष्टं[6] सतां काव्यं सरस्वत्या मुखायते ॥९६॥
अस्पृष्टबन्धलालित्यमपेतं रसवत्तया । न तत्काव्यमिति ग्राम्यं[7] केवलं कटु कर्णयोः ॥९७॥
सुश्लिष्टपदविन्यासं [8]प्रबन्धं रचयन्ति ये । [9]श्राव्यबन्धं प्रसन्नार्थं ते महाकवयो मताः ॥९८॥

मायाचारसे पूर्ण दुर्जन मनुष्य भी स्वभावसे टेढ़ा होता है उसे कोई सीधा-सरल परिणामी नहीं कर सकता अथवा जिस तरह कोई कुत्तेकी पूँछको सीधा नहीं कर सकता उसी तरह दुर्जनको भी कोई सीधा नहीं कर सकता ॥८९॥ यह एक आश्चर्यकी बात है कि सज्जन पुरुष चिरकालके सतत प्रयत्नसे भी जगत्को अपने समान सज्जन बनानेके लिए समर्थ नहीं हो पाते परन्तु दुर्जन पुरुष उसे शीघ्र ही दुष्ट बना लेते हैं ॥९०॥ ईर्ष्या नहीं करना, दया करना तथा गुणी जीवोंसे प्रेम करना यह सज्जनता की अन्तिम अवधि है और इसके विपरीत अर्थात् ईर्ष्या करना, निर्दयी होना तथा गुणी जीवोंसे प्रेम नहीं करना यह दुर्जनताकी अन्तिम अवधि है। यह सज्जन और दुर्जनोंका स्वभाव ही है ऐसा निश्चय कर सज्जनोंमें न तो विशेष राग ही करना चाहिये और न दुर्जनोंका अनादर ही करना चाहिये ॥९१-९२॥ कवियोंके अपने कर्तव्यकी पूर्तिमें सज्जन पुरुष ही अवलम्बन होते हैं ऐसा मानकर मैं अलंकार, गुण, रीति आदि लहरोंसे भरे हुए कवितारूपी समुद्रको लांघना चाहता हूँ अर्थात् सत्पुरुषोंके आश्रयसे ही मैं इस महान् काव्य ग्रन्थको पूर्ण करना चाहता हूँ ॥९३॥ काव्य स्वरूपके जाननेवाले विद्वान्, कविके भाव अथवा कार्यको काव्य कहते हैं। कविका वह काव्य सर्वसंमत अर्थसे सहित, ग्राम्यदोषसे रहित, अलंकारसे युक्त और प्रसाद आदि गुणोंसे शोभित होना चाहिये ॥९४॥ कितने ही विद्वान् अर्थकी सुन्दरताको वाणीका अलंकार कहते हैं और कितने ही पदोंकी सुन्दरताको, किन्तु हमारा मत है कि अर्थ और पद दोनोंकी सुन्दरता ही वाणीका अलंकार है ॥९५॥ सज्जन पुरुषोंका बनाया हुआ जो काव्य अलंकार सहित, शृङ्गारादि रसोंसे युक्त, सौन्दर्यसे ओतप्रोत और उच्छिष्टता रहित अर्थात् मौलिक होता है वह काव्य सरस्वतीदेवीके मुखके समान शोभायमान होता है अर्थात् जिस प्रकार शरीरमें मुख सबसे प्रधान अङ्ग है उसके बिना शरीरकी शोभा और स्थिरता नहीं होती उसी प्रकार सर्व लक्षण पूर्ण काव्य ही सब शास्त्रोंमें प्रधान है तथा उसके बिना अन्य शास्त्रोंकी शोभा और स्थिरता नहीं हो पाती ॥९६॥ जिस काव्यमें न तो रीतिकी रमणीयता है, न पदोंका लालित्य है और न रसका ही प्रवाह है उसे काव्य नहीं कहना चाहिए वह तो केवल कानोंको दुःख देनेवाली ग्रामीण भाषा ही है ॥९७॥ जो अनेक अर्थोंको सूचित करनेवाले पदविन्यासते सहित, मनोहर रीतियोंसे

---

१ वेलामतिक्रान्तम् । २ ग्राम्यं 'दुःप्रतीतिकरं ग्राम्यम्, यथा–'या भवतः प्रिया' । ३ रसालङ्कारैरसङ्कीर्णम् । ४ सहृदयहृदयाह्लादकत्वम् । ५ प्रादुर्भूत । ६ उच्छिष्टं परप्रकल्पितम् । ७ मतिग्राम्यं स०, प०, द०, म० । ८ काव्यम् । ९ श्रव्यबन्धं स०, प०, ल० ।

महापुराणसम्बन्धि महानायकगोचरम् । त्रिवर्गफलसन्दर्भं महाकाव्यं तदिष्यते ॥९९॥
[1]निस्तनन् कतिचिच्छ्लोकान् सर्वोऽपि कुरुते कविः । पूर्वापरार्थघटनैः प्रबन्धो दुष्करो मतः ॥१००॥
शब्दराशिरपर्यन्तः स्वाधीनोऽर्थः स्फुटा[2] रसाः । सुलभाश्च [3]प्रतिच्छन्दाः कवित्वे का दरिद्रता ॥१०१॥
[4]प्रयान्महति वाङ्मार्गे खिन्नोऽर्थगहनाटनैः । महाकवितरुच्छायां [6]विश्रमायाश्रयेत्कविः ॥१०२॥
प्रज्ञामूलो गुणोदग्रस्कन्धो वाक्पल्लवोज्ज्वलः । महाकवितरुर्धत्ते यशःकुसुममञ्जरीम् ॥१०३॥
प्रज्ञावेलः प्रसादोर्मिर्गुणरत्नपरिग्रहः । महाध्वानः [7]पृथुस्रोताः कविरम्भोनिधीयते ॥१०४॥
यथोक्तमुपयुञ्जीध्वं बुधाः काव्यरसायनम् । येन कल्पान्तरस्थायि वपुर्वः स्याद्यशोमयम् ॥१०५॥
यशोधनं [8]चिचीर्षूणां पुण्यपुण्यपणायिनाम्[9] । परं मूल्यमिहाम्नातं[10] काव्यं धर्मकथामयम् ॥१०६॥

युक्त एवं स्पष्ट अर्थसे उद्भासित प्रबन्धों-काव्योंकी रचना करते हैं वे महाकवि कहलाते हैं ।।९८।। जो प्राचीनकालके इतिहाससे सम्बन्ध रखने वाला हो, जिसमें तीर्थंकर चक्रवर्ती आदि महापुरुषोंके चरित्रका चित्रण किया गया हो तथा जो धर्म अर्थ और कामके फलको दिखाने वाला हो उसे महाकाव्य कहते हैं ।।९९। किसी एक प्रकीर्णक विषयको लेकर कुछ श्लोकोंकी रचना तो सभी कवि कर सकते हैं परन्तु पूर्वापरका सम्बन्ध मिलाते हुए किसी प्रबन्धकी रचना करना कठिन कार्य है ।।१००।। जब कि इस संसारमें शब्दोंका समूह अनन्त है, वर्णनीय विषय अपनी इच्छाके आधीन है, रस स्पष्ट हैं और उत्तमोत्तम छन्द सुलभ हैं तब कविता करनेमें दरिद्रता क्या है ? अर्थात् इच्छानुसार सामग्रीके मिलनेपर उत्तम कविता ही करना चाहिये ।।१०१।। विशाल शब्दमार्गमें भ्रमण करता हुआ जो कवि अर्थरूपी सघन वनोंमें घूमनेसे खेद–खिन्नताको प्राप्त हुआ है उसे विश्रामके लिए महाकवि रूप वृक्षोंकी छायाका आश्रय लेना चाहिये । अर्थात् जिस प्रकार महावृक्षोंकी छायासे मार्गकी थकावट दूर हो जाती है और चित्त हलका हो जाता है उसी प्रकार महाकवियोंके काव्यग्रन्थोंके परिशीलनसे अर्थाभावसे होनेवाली सब खिन्नता दूर हो जाती है और चित्त प्रसन्न हो जाता है ।।१०२। प्रतिभा जिसकी जड़ है, माधुर्य ओज प्रसाद आदि गुण जिसकी उन्नत शाखाएँ हैं, और उत्तम शब्द ही जिसके उज्ज्वल पत्ते हैं ऐसा यह महाकविरूपी वृक्ष यशरूपी पुष्पमञ्जरीको धारण करता है ।।१०३।। अथवा बुद्धि ही जिसके किनारे हैं, प्रसाद आदि गुण ही जिसमें लहरे हैं, जो गुणरूपी रत्नोंसे भरा हुआ है, उच्च और मनोहर शब्दोंसे युक्त है, तथा जिसमें गुरुशिष्य-परम्परा रूप विशाल प्रवाह चला आ रहा है ऐसा यह महाकवि समुद्रके समान आचरण करता है ।१०४।। हे विद्वान् पुरुषों ! तुम लोग ऊपर कहे हुए काव्यरूपी रसायनका भरपूर उपयोग करो जिससे कि तुम्हारा यशरूपी शरीर कल्पान्त कालतक स्थिर रह सके । भावार्थ—जिस प्रकार रसायन सेवन करनेसे शरीर पुष्ट हो जाता है उसी प्रकार ऊपर कहे हुए काव्य, महाकवि आदिके स्वरूपको समझकर कविता करनेवालेका यश चिरस्थायी हो जाता है ।।१०५।। जो पुरुष यशरूपी धनका संचय और पुण्य रूपी पण्यका व्यवहार-लेनदेन करना चाहते हैं उनके लिए धर्मकथाको निरूपण करनेवाला यह काव्य मूलधन (पूँजी) के समान माना गया है ।।१०६ ।

---

१ निस्तन्वन् म०। निखनन् ल०, द०, प०, स० । क्लिश्यन् । २ स्फुटो रसः द०, प० । ३ प्रविच्छन्दाः ल० । प्रतिनिधयः । ४ गच्छन् । ५ गहनं काननम् । ६ विश्रामाया–द०, स०, प०, म०, ल० । ७ अविच्छिन्न-शब्दप्रवाहः । ८ चिचीषूर्णां स०,द० । पोषितुमिच्छूनाम् । 'चृ भरणे' इति क्रयादिधातोः सन् तत उप्रत्ययः । ९ पणायिताम् स० । क्रेतॄणाम् । १० कथितम् ।

इदमध्यवसाया[1]हं कथां धर्मानुबन्धिनीम्[2] । प्रस्तुवे[3] प्रस्तुतां सद्भिर्महापुरुषगोचराम् ॥१०७॥
विस्तीर्णानेकशाखाढ्यां[4] [5]सच्छायां फलशालिनीम् । [6]आर्यैर्निषेवितां रम्यां सतीं कल्पलतामिव ॥१०८॥
प्रसन्नामतिगम्भीरां निर्मलां [7]सुखशीतलाम् । [8]निर्वापितजगत्तापां महतीं सरसीमिव ॥१०९॥
गुरुप्रवाहसंभूतिमपङ्कां तापविच्छिदम्[9] । कृतावतारां[10] कृतिभिः पुण्यां व्योमापगामिव ॥११०॥
चेतःप्रसादजननीं कृतमङ्गलसंग्रहाम् । [11]क्रोडीकृतजगद्बिम्बां हसन्तीं दर्पणश्रियम् ॥१११॥
कल्पाङ्घ्रिपादिवोत्तुङ्गादभीष्टफलदायिनः । महाशाखामिवोदग्रां श्रुतस्कन्धादुपाहृताम् ॥११२॥
प्रथमस्यानुयोगस्य गम्भीरस्योदधेरपि । वेलामिव बृहद्ध्वानां[12] प्रसृतार्थमहाजलाम् ॥११३॥
[13]आक्षिप्ताशेषतन्त्रार्थां[14] [15]विक्षिप्तपरशासनाम् । सतां संवेगजननीं निर्वेदरसबृंहिणीम् ॥११४॥
अद्भुतार्थामिमां दिव्यां [16]परमार्थबृहत्कथाम् । लम्भैरनेकैः संदब्धां गुणाढ्यैः पूर्वसूरिभिः ॥११५॥

यह निश्चयकर मैं ऐसी कथाको आरम्भ करता हूँ जो धर्मशास्त्रसे सम्बन्ध रखनेवाली है, जिसका प्रारम्भ अनेक सज्जन पुरुषोंके द्वारा किया गया है तथा जिसमें ऋषभनाथ आदि महापुरुषोंके जीवनचरित्रका वर्णन किया गया है ॥१०७॥ जो धर्मकथा कल्पलताके समान, फैली हुई अनेक शाखाओं (डालियों, कथा उपकथाओं) से सहित है, छाया (अनातप, कान्ति नामक गुण) से युक्त है, फलों (मधुर फल, स्वर्ग मोक्षादिकी प्राप्ति) से शोभायमान है, आर्यों (भोगभूमिज मनुष्य, श्रेष्ठ पुरुषों) द्वारा सेवित है, मनोहर है और उत्तम है । अथवा जो धर्मकथा बड़े सरोवरके समान प्रसन्न (स्वच्छ, प्रसाद गुणसे सहित) है, अत्यन्त गम्भीर (अगाध, गूढ़ अर्थसे युक्त) है, निर्मल (कीचड़ आदिसे रहित, दुःश्रवत्व आदि दोषोंसे रहित) है, सुखकारी है, शीतल है, और जगत्त्रयके सन्तापको दूर करनेवाली है । अथवा जो धर्मकथा आकाशगंगाके समान गुरुप्रवाह (बड़े भारी प्रवाह, गुरु परम्परा) से युक्त है, पङ्क (कीचड़, दोष) से रहित है, ताप (गरमी, संसारभ्रमणजन्य खेद) को नष्ट करने वाली है, कुशल पुरुषों (देवों, गणधरादि चतुर पुरुषों) द्वारा किये गये अवतार (प्रवेश, अवगाहन) से सहित है और पुण्य (पवित्र, पुण्यवर्धक) रूप है । अथवा जो धर्मकथा चित्तको प्रसन्न करने, सब प्रकारके मंगलोंका संग्रह करने तथा अपने आपमें जगत्त्रयके प्रतिबिम्बित करनेके कारण दर्पणकी शोभाको हँसती हुईसी जान पड़ती है ॥ अथवा जो धर्मकथा अत्यन्त उन्नत और अभीष्ट फलको देनेवाले श्रुतस्कन्धरूपी कल्पवृक्षसे प्राप्त हुई श्रेष्ठ बड़ी शाखाके समान शोभायमान हो रही है ॥ अथवा जो धर्मकथा, प्रथमानुयोगरूपी गहरे समुद्रकी वेला (किनारे) के समान महागम्भीर शब्दोंसे सहित है और फैले हुए महान् अर्थ रूप जलसे युक्त है ॥ जो धर्मकथा स्वर्ग मोक्षादिके साधक समस्त तन्त्रोंका निरूपण करनेवाली है, मिथ्यामतको नष्ट करनेवाली है, सज्जनोंके संवेगको पैदा करनेवाली और वैराग्य रसको बढ़ानेवाली है ॥ जो धर्मकथा आश्चर्यकारी अर्थोंसे भरी हुई है, अत्यन्त मनोहर है, सत्य अथवा परम

---

१ निश्चित्य । २ धर्मानुवर्तिनीम् स०, द० । ३ प्रारेभे । ४ शाखा–कथा । ५ समीचीनपुरातनकाव्यच्छायाम् । उक्तं चालङ्कारचूडामणिदर्पणे–'मुखच्छायेन यस्य काव्येषु पुरातनकाव्यच्छाया संक्रामति स महाकविः' इति । ६ भोगभूमिजैः । ७ सुखाय शीतलाम् । ८ निर्वासित-म० । ९ तापविच्छिदाम् अ०, प० । १० अवतारः अवगाहः । ११ क्रोडीकृतं स्वीकृतम् । १२ महाध्वानां ल०, द०, प०, स० । ध्वानः शब्दपरिपाटी । १३ आक्षिप्तः स्वीकृतः । १४ तन्त्रं सिद्धान्तः । १५ विक्षिप्तं तिरस्कृतम् । १६ परमार्थां बृहत्कथाम् स०, द०, ल०, अ० ।

२

यशःश्रेयस्करीं[1] पुण्यां भुक्तिमुक्तिफलप्रदाम्। पूर्वानुपूर्वीमाश्रित्य वक्ष्ये शृणुत सज्जनाः ॥११६॥
'नवभिः कुलकम्

कथाकथकयोरत्र श्रोतॄणामपि लक्षणम्। व्यावर्णनीयं प्रागेव कथारम्भे मनीषिभिः ॥११७॥
पुरुषार्थोपयोगित्वात्त्रिवर्गकथनं कथा। तत्रापि सत्कथां धर्म्यामामनन्ति[2] मनीषिणः ॥११८॥
[3]तत्फलाभ्युदयाङ्गत्वादर्थकामकथा[4] कथा। अन्यथा विकथैवासावपुण्यास्रवकारणम्[5] ॥११९॥
यतोऽभ्युदयनिःश्रेयसार्थसंसिद्धिरञ्जसा। सद्धर्मस्तन्निबद्धा या सा सद्धर्मकथा स्मृता ॥१२०॥
प्राहुर्धर्मकथाङ्गानि सप्त सप्तर्धिभूषणाः। यैर्भूषिता कथाऽऽहार्यै[6]र्नटीव रसिका भवेत् ॥१२१॥
द्रव्यं क्षेत्रं तथा तीर्थं कालो भावः फलं महत्। प्रकृतं चेत्यमून्याहुः सप्ताङ्गानि कथामुखे ॥१२२॥
द्रव्यं जीवादि षोढा स्यात्क्षेत्रं त्रिभुवनस्थितिः। जिनेन्द्रचरितं तीर्थं कालस्त्रेधा प्रकीर्तितः ॥१२३॥
प्रकृतं स्यात् कथावस्तु फलं तत्त्वावबोधनम्। भावः क्षयोपशमजस्तस्य स्यात्क्षायिकोऽथवा ॥१२४॥
इत्यमूनि कथाङ्गानि यत्र सा सत्कथा मता। यथावसरमेवैषां[7] प्रपञ्चो दर्शयिष्यते ॥१२५॥

प्रयोजनको सिद्ध करनेवाली है, अनेक बड़ी बड़ी कथाओंसे युक्त है, गुणवान् पूर्वाचार्यों द्वारा जिसकी रचना की गयी है ॥ जो यश तथा कल्याणको करनेवाली है पुण्यरूप है, और स्वर्ग मोक्षादि फलोंको देनेवाली है ऐसी उस धर्मकथाको मैं पूर्व आचार्योंकी आम्नायके अनुसार कहूँगा। हे सज्जन पुरुषों, उसे तुम सब ध्यानसे सुनो ॥१०८–११६॥ बुद्धिमानोंको इस कथारम्भके पहिले ही कथा, वक्ता और श्रोताओंके लक्षण अवश्य ही कहना चाहिए ॥११७॥ मोक्ष पुरुषार्थके उपयोगी होनेसे धर्म, अर्थ तथा कामका कथन करना कथा कहलाती है। जिसमें धर्मका विशेष निरूपण होता है उसे बुद्धिमान् पुरुष सत्कथा कहते हैं ॥११८॥ धर्मके फलस्वरूप जिन अभ्युदयोंकी प्राप्ति होती है उनमें अर्थ और काम भी मुख्य हैं अतः धर्मका फल दिखानेके लिए अर्थ और कामका वर्णन करना भी कथा कहलाती है यदि यह अर्थ और कामकी कथा धर्मकथासे रहित हो तो विकथा ही कहलावेगी और मात्र पापास्रवका ही कारण होगी ॥११९॥ जिससे जीवोंको स्वर्ग आदि अभ्युदय तथा मोक्षकी प्राप्ति हो जाती है वास्तवमें वही धर्म कहलाता है उससे सम्बन्ध रखनेवाली जो कथा है उसे सद्धर्मकथा कहते हैं ॥१२०॥ सप्त ऋद्धियोंसे शाभायमान गणधरादि देवोंने इस सद्धर्मकथाके सात अङ्ग कहे हैं। इन सात अङ्गोंसे भूषित कथा अलङ्कारोंसे सजी हुई नटीके समान अत्यन्त सरस हो जाती है ॥१२१॥ द्रव्य, क्षेत्र, तीर्थ, काल, भाव, महाफल और प्रकृत ये सात अंग कहलाते हैं। ग्रंथके आदिमें इनका निरूपण अवश्य होना चाहिये ॥१२२॥ जीव पुद्गल धर्म अधर्म आकाश और काल यह छह द्रव्य हैं, ऊर्ध्व मध्य और पाताल ये तीन लोक क्षेत्र हैं, जिनेन्द्रदेव का चरित्र ही तीर्थ है, भूत भविष्यत् और वर्तमान यह तीन प्रकारका काल है, क्षायोपशमिक अथवा क्षायिक ये दो भाव हैं, तत्त्वज्ञानका होना फल कहलाता है, और वर्णनीय कथावस्तु को प्रकृत कहते हैं ॥१२३–१२४॥ इस प्रकार ऊपर कहे हुए सात अङ्ग जिस कथामें पाए जायँ उसे सत्कथा कहते हैं। इस ग्रन्थमें भी अवसरके अनुसार इन अङ्गोंका विस्तार दिखाया जायेगा ॥१२५॥

---

१ श्रेयस्करां स०। २ म्ना अभ्यासे। ३ धर्मफलरूपाभ्युदयाङ्गत्वात्। ४ कथनम्। ५-कारिणी म०, ल०। ६ भूषणैः। ७-मेतेषां स०, द०।

तस्यास्तु कथकः सूरिः सद्वृत्तः स्थिरधीर्वशी । [1]कल्येन्द्रियः प्रशस्ताङ्गः [2]स्पष्टमृष्टेष्टगीर्गुणः ॥१२६॥
यःसर्वज्ञमताम्भोधिवार्धौतविमलाशयः । अशेषवाङ्मलापायादुज्ज्वला यस्य भारती ॥१२७॥
श्रीमाञ्जितसभो वाग्मी [3]प्रगल्भः [4]प्रतिभानवान् । यः सतां संमतव्याख्यो [5]वाग्विमर्दभरक्षमः ॥१२८॥
दयालुर्वत्सलो धीमान् परेङ्गितविशारदः[6] । योऽधीती विश्वविद्यासु स धीरः कथयेत्कथाम् ॥१२९॥
[7]नानोपाख्यानकुशलो नानाभाषाविशारदः । नानाशास्त्रकलाभिज्ञः स भवेत्कथकाग्रणीः ॥१३०॥
नाङ्गुलीभञ्जनं कुर्यान्न भ्रुवौ नर्तयेद्ब्रुवन् । नाधिक्षिपेन्न[8] च हसेन्नात्युच्चैर्न शनैर्वदेत् ॥१३१॥
उच्चैः प्रभाषितव्यं स्यात् सभामध्ये कदाचन । तत्राप्यनुद्धतं ब्रूयाद्वचः [9]सभ्यमनाकुलम् ॥१३२॥
हितं ब्रूयान्मितं ब्रूयाद् ब्रूयाद्धर्म्यं यशस्करम् । प्रसङ्गादपि न ब्रूयादधर्म्यमयशस्करम् ॥१३३॥
इत्यालोच्य कथायुक्तिमयुक्तिपरिहारिणीम् । [10]प्रस्तूयाद्यः कथावस्तु स शस्तो[11] वदतां वरः ॥१३४॥
आक्षेपिणीं कथां कुर्यात्प्राज्ञः स्वमतसंग्रहे । विक्षेपिणीं कथां तज्ज्ञः कुर्याद्दुर्मतनिग्रहे ॥१३५॥
[12]संवेदिनीं कथां [13]पुण्यफलसम्पत्प्रपञ्चने । [14]निर्वेदिनीं कथां कुर्याद्वैराग्यजननं प्रति ॥१३६॥

वक्ताका लक्षण

ऊपर कही हुई कथाका कहनेवाला आचार्य वही पुरुष हो सकता है जो सदाचारी हो, स्थिरबुद्धि हो, इन्द्रियोंको वशमें करनेवाला हो, जिसकी सब इन्द्रियाँ समर्थ हों, जिसके अङ्गोपाङ्ग सुन्दर हों, जिसके वचन स्पष्ट परिमार्जित और सबको प्रिय लगनेवाले हों, जिसका आशय जिनेन्द्रमतरूपी समुद्रके जलसे धुला हुआ और निर्मल हो, जिसकी वाणी समस्त दोषोंके अभावसे अत्यन्त उज्ज्वल हो, श्रीमान् हो, सभाओंको वशमें करनेवाला हो, प्रशस्त वचन बोलनेवाला हो, गम्भीर हो, प्रतिभासे युक्त हो, जिसके व्याख्यानको सत्पुरुष पसंद करते हों, अनेक प्रश्न तथा कुतर्कोंको सहनेवाला हो, दयालु हो, प्रेमी हो, दूसरेके अभिप्रायको समझने में निपुण हो, जिसने समस्त विद्याओंका अध्ययन किया हो और धीर वीर हो ऐसे पुरुषको ही कथा कहनी चाहिये ॥१२६–१२९॥ जो अनेक उदाहरणोंके द्वारा वस्तु स्वरूप कहनेमें कुशल है, संस्कृत प्राकृत आदि अनेक भाषाओंमें निपुण है, अनेक शास्त्र और कलाओंका जानकार है वही उत्तम वक्ता कहा जाता है ॥१३०॥ वक्ताको चाहिये कि वह कथा कहते समय अङ्गुलियाँ नहीं चटकावे, न भौंह ही चलावे, न किसीपर आक्षेप करे, न हँसे, न जोर से बोले और न धीरे ही बोले ॥१३१॥ यदि कदाचित् सभाके बीचमें जोरसे बोलना पड़े तो उद्धतपना छोड़कर सत्य-प्रमाणित वचन इस प्रकार बोले जिससे किसीको क्षोभ न हो ॥१३२॥ वक्ताको हमेशा वही वचन बोलना चाहिए जो हितकारी हो, परिमित हो, धर्मोपदेशसे सहित हो और यशको करनेवाला हो। अवसर आनेपर भी अधर्मयुक्त तथा अकीर्तिको फैलानेवाले वचन नहीं कहना चाहिए ॥१३३। इस प्रकार अयुक्तियोंका परिहार करनेवाली कथाकी युक्तियोंका सम्यक् प्रकारसे विचार कर जो वर्णनीय कथावस्तुका प्रारम्भ करता है वह प्रशंसनीय श्रेष्ठ वक्ता समझा जाता है ॥१३४॥ बुद्धिमान् वक्ताको चाहिये कि वह अपने मतकी स्थापना करते समय आक्षेपिणी कथा कहे, मिथ्यामतका खण्डन करते समय विक्षेपिणी कथा कहे, पुण्यके

---

१ कल्पेन्द्रियः म०, ल०, अ० । प्रशस्तनयनादिद्रव्येन्द्रियः । २ मृष्टा शुद्धा । ३ गम्भीराशयः । 'विद्वत्सुप्रगल्भाविशो' । ४ 'आशूत्तरप्रदात्री भा प्रतिभा सर्वतोमुखी' । ५ प्रश्नसहः । ६ इङ्गितं चित्तविकृतिः । ७ बहुकथानिपुणः । ८ धिक्कारं कुर्यात् । ९ सत्य–द०,स०,अ०,प०,म०,ल० । १० प्रारभेत । ११ शास्ता प०, द० । १२ संवेजनीं स०, प०, द० । १३ पुण्यां फल–म०, ल० । १४ निर्वेदनीं प०, स०, द० ।

इति धर्मकथाङ्गत्वादर्थाक्षिप्तां[1] चतुष्टयीम् । कथां यथार्हं श्रोतृभ्यः कथकः प्रतिपादयेत् ॥१३७॥
धर्मश्रुतौ नियुक्ता ये श्रोतारस्ते मता बुधैः । तेषां च सदसद्भावव्यक्तौ दृष्टान्तकल्पना ॥१३८॥
मृच्चालिन्यजमार्जारशुककङ्क[2]शिलाहिभिः । गोहंसमहिषच्छिद्रघटदंशजलौककैः ॥१३९॥

फलस्वरूप विभूति आदिका वर्णन करते समय संवेदिनी कथा कहे तथा वैराग्य उत्पादनके समय निर्वेदिनी कथा कहे ॥१३५–१३६॥ इस प्रकार धर्मकथाके अंगभूत आक्षेपिणी, विक्षेपिणी, संवेदिनी और निर्वेदिनी रूप चारों कथाओंका विचार कर श्रोताओंकी योग्यतानुसार वक्ताको कथन करना चाहिये । १३७॥ अब आचार्य श्रोताओंका लक्षण कहते हैं–

श्रोताका लक्षण

जो हमेशा धर्म श्रवण करनेमें लगे रहते हैं विद्वानोंने उन्हें श्रोता माना है । अच्छे और बुरेके भेदसे श्रोता अनेक प्रकारके हैं, इनके अच्छे और बुरे भावोंके जाननेके लिए नीचे लिखे अनुसार दृष्टान्तोंकी कल्पना की जाती है ॥१३८॥ मिट्टी, चलनी, बकरा, बिलाव, तोता, बगुला, पाषाण, सर्प, गाय, हंस, भैंसा, फूटा घड़ा, डाँस और जोंक इस प्रकार चौदह प्रकारके श्रोताओंके दृष्टान्त समझना चाहिये । भावार्थ—(१) जैसे मिट्टी पानीका संसर्ग रहते हुए कोमल रहती है, बादमें कठोर हो जाती है इसी प्रकार जो श्रोता शास्त्र सुनते समय कोमलपरिणामी हों परन्तु बादमें कठोरपरिणामी हो जावें वे मिट्टीके समान श्रोता हैं । (२) जिस प्रकार चलनी सारभूत आटेको नीचे गिरा देती है और छोकको बचा रखती है उसी प्रकार जो श्रोता वक्ताके उपदेशमें से सारभूत तत्त्वको छोड़कर निःसार तत्त्वको ग्रहण करते हैं वे चलनी-के समान श्रोता हैं । (३) जो अत्यन्त कामी है अर्थात् शास्त्रोपदेशके समय शृंगारका वर्णन सुनकर जिनके परिणाम शृङ्गार रूप हो जावें वे अजके समान श्रोता है । (४) जैसे अनेक उपदेश मिलनेपर भी बिलाव अपनी हिंसक प्रवृत्ति नहीं छोड़ता सामने आते ही चूहेपर आक्र-कर देता है उसी प्रकार जो श्रोता बहुत प्रकारसे समझानेपर भी क्रूरताको नहीं छोड़ें, अवसर आनेपर क्रूर प्रवृत्ति करने लगें वे मार्जारके समान श्रोता हैं । (५) जैसे तोता स्वयं अज्ञानी है दूसरोंके द्वारा कहलाने पर ही कुछ सीख पाता है वैसे ही जो श्रोता स्वयं ज्ञानसे रहित हैं दूसरोंके बतलाने पर ही कुछ शब्द मात्र ग्रहण कर पाते हैं वे शुकके समान श्रोता हैं । (६) जो बगुलेके समान बाहिरसे भद्रपरिणामी मालूम होते हों परन्तु जिनका अन्तरङ्ग अत्यन्त दुष्ट हो वे बगुला के समान श्रोता हैं । (७) जिनके परिणाम हमेशा कठोर रहते हैं तथा जिनके हृदयमें समझाये जानेपर जिनवाणी रूप जलका प्रवेश नहीं हो पाता वे पाषाणके समान श्रोता हैं । (८) जैसे साँपको पिलाया हुआ दूध भी विषरूप हो जाता है वैसे ही जिनके सामने उत्तमसे उत्तम उपदेश भी खराब असर करता है वे सर्पके समान श्रोता हैं । (९) जैसे गाय तृण खाकर दूध देती है वैसे ही जो थोड़ा सा उपदेश सुनकर बहुत लाभ लिया करते हैं वे गायके समान श्रोता हैं । (१०) जो केवल सार वस्तुको ग्रहण करते हैं वे हंसके समान श्रोता हैं । (११) जैसे भैंसा पानी तो थोड़ा पीता है पर समस्त पानीको गँदला कर देता है इसी प्रकार जो श्रोता उपदेश तो अल्प ग्रहण करते हैं परन्तु अपने कुतर्कोंसे समस्त सभामें क्षोभ

---

१ अर्थायातम् । २ कङ्कः केशसंस्कारोपकरणम् ।

श्रोतारः समभावाः स्युरुत्तमाधममध्यमाः । अन्यादृशोऽपि सन्त्येव तत्किं तेषामियत्तया ॥१४०॥
गोहंससदृशान्प्राहुरुत्तमान्मृच्छुकोपमान् । मध्यमान्विदुरन्यैश्च समकक्ष्योऽधमो मतः ॥१४१॥
[1]शेमुष्यब्दतुलादण्डनिकषोपलसन्निभाः । श्रोतारः सत्कथारत्नपरीक्षाध्यक्षका मताः ॥१४२॥
श्रोता न चैहिकं किञ्चित्फलं वाञ्छेत्कथाश्रुतौ । नेच्छेद्वक्ता च सत्कारधनभेषजसत्क्रियाः[2] ॥१४३॥
श्रेयोऽर्थं केवलं ब्रूयात् सन्मार्गं शृणुयाच्च वै । श्रेयोऽर्था हि सतां चेष्टा न लोकपरिपक्तये[3] ॥१४४॥
श्रोता शुश्रूषताद्यैः स्वैर्गुणैर्युक्तः प्रशस्यते । वक्ता च वत्सलत्वादियथोक्तगुणभूषणः ॥१४५॥
शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा । स्मृत्यूहापोहनिर्णीतीः श्रोतुरष्टौ गुणान्[4] विदुः ॥१४६॥
सत्कथाश्रवणात्पुण्यं श्रोतुर्यदुपचीयते । तेनाभ्युदयसंसिद्धिः क्रमान्नैःश्रेयसी स्थितिः ॥१४७॥
इत्याप्तोक्त्यनुसारेण कथितं वः कथामुखम् । कथावतारसम्बन्धं वक्ष्यामः[5] शृणुताधुना ॥१४८॥

पैदा कर देते हैं वे भैंसाके समान श्रोता हैं ॥ (१२) जिनके हृदयमें कुछ भी उपदेश नहीं ठहरे वे छिद्र घटके समान श्रोता हैं । (१३) जो उपदेश तो बिलकुल ही ग्रहण न करें परन्तु सारी सभाको व्याकुल कर दें वे डांसके समान श्रोता हैं । (१४) जो गुण छोड़कर सिर्फ अवगुणोंको ही ग्रहण करें वे जोंकके समान श्रोता हैं । इन ऊपर कहे हुए श्रोताओंके उत्तम, मध्यम और अधम के भेद से तीन तीन भेद होते हैं । इनके सिवाय और भी अन्य प्रकारके श्रोता हैं परन्तु उन सबकी गणनासे क्या लाभ है ? ॥१३९-१४०॥ इन श्रोताओंमें जो श्रोता गाय और हंस के समान हैं वे उत्तम कहलाते हैं, जो मिट्टी और तोताके समान हैं उन्हें मध्यम जानना चाहिये और बाकीके समान अन्य सब श्रोता अधम माने गये हैं ॥१४१॥ जो श्रोता नेत्र दर्पण तराजू और कसौटी के समान गुण दोषोंके बतलाने वाले हैं वे सत्कथा रूप रत्नके परीक्षक माने गये हैं ॥१४२॥ श्रोताओंको शास्त्र सुननेके बदले किसी सांसारिक फलकी चाह नहीं करनी चाहिये इसी प्रकार वक्ताको भी श्रोताओंसे सत्कार, धन, औषधि और आश्रय-घर आदिकी इच्छा नहीं करनी चाहिये ॥१४३॥ स्वर्ग मोक्ष आदि कल्याणोंकी अपेक्षा रख कर ही वक्त को सन्मार्गका उपदेश देना चाहिए तथा श्रोताको सुनना चाहिये क्योंकि सत्पुरुषों-की चेष्टाएँ वास्तविक कल्याणकी प्राप्तिके लिए ही होती हैं अन्य लौकिक कार्योंके लिए नहीं ॥१४४॥ जो श्रोता शुश्रूषा आदि गुणोंसे युक्त होता है वही प्रशंसनीय माना जाता है इसी प्रकार जो वक्ता वात्सल्य आदि गुणोंसे भूषित होता है वही प्रशंसनीय वक्ता माना जाता है ॥१४५॥ शुश्रूषा, श्रवण, ग्रहण, धारण, स्मृति, ऊह, अपोह और निर्णीति ये श्रोताओंके आठ गुण जानना चाहिये ॥ भावार्थ—सत्कथाको सुननेकी इच्छा होना शुश्रूषा गुण है, सुनना श्रवण है, समझकर ग्रहण करना ग्रहण है, बहुत समयतक उसकी धारणा रखना धारण है, पिछले समय ग्रहण किए हुए उपदेश आदिका स्मरण करना स्मरण है, तर्क द्वारा पदार्थके स्वरूपके विचार करनेकी शक्ति होना ऊह है, हेय वस्तुओंको छोड़ना अपोह है और युक्ति द्वारा पदार्थका निर्णय करना निर्णीति गुण है । श्रोताओंमें इनका होना अत्यन्त आवश्यक है ॥१४६॥ सत्कथाके सुननेसे श्रोताओंको जो पुण्यका संचय होता है उससे उन्हें पहले तो स्वर्ग आदि अभ्युदयोंकी प्राप्ति होती है और फिर क्रमसे मोक्षकी प्राप्ति होती है ॥१४७॥ इस प्रकार मैंने शास्त्रोंके अनुसार आप लोगोंको कथामुख (कथाके प्रारम्भ) का वर्णन किया है अब इस कथाके अवतारका सम्बन्ध कहता हूँ सो सुनो ॥१४८॥

१ तथाक्ष्यब्द—द०, स०, अ०, प०, ल० । २ संश्रयात् अ०, प०, स०, द०, म०, ल० । ३ परिपक्तये द०, ल०, म०, अ० । परिपाकाय । ४ गुणाः स्मृताः म० । ५ वक्ष्यामि अ०, स०, द० ।

इत्यनुश्रूयते देवः 'पुराकल्पे स नाभिजः । अध्युवास भुवो मौलिं 'कैलासाद्रिं यदृच्छया ॥१४९॥
तत्रासीनं च तं देवाः परिचेरुः सपर्यया । तुष्टुवुश्च 'किरीटाग्रसंदष्टकरकुड्मलाः' ॥१५०॥
सभाविरचनां तत्र सुत्रामा त्रिजगद्गुरोः । प्रीतः प्रवर्तयामास प्राप्तकैवल्यसम्पदः ॥१५१॥
तत्र देवसभे देवं स्थितमत्यद्भुतस्थितिम् । प्रणनाम मुदाभ्येत्य भरतो भक्तिनिर्भरः ॥१५२॥
स तं स्तुतिभिरर्थ्याभिरभ्यर्च्य नृसुरार्चितम् । यथोचितं 'सभास्थानमध्यास्त विनयानतः ॥१५३॥
सभा सभासुरसुरा पीत्वा धर्मामृतं विभोः । पिप्रिये पद्मिनीवोद्यदंशुजालमलं रवेः ॥१५४॥
मध्येसभमथोत्थाय भरतो रचिताञ्जलिः । व्यजिज्ञपदिदं वाक्यं प्रश्रयो मूर्तिमानिव ॥१५५॥
भवतोऽस्य मुखाम्भोजाल्लसद्दन्तांशुकेसरात् । निर्ययौ मधुरा वाणी प्रसन्नेव सरस्वती ॥१५६॥
त्वत्तः प्रबोधमायान्ती सभेयं ससुरासुरा । प्रफुल्लवदनाम्भोजा व्यक्तमम्भोजिनीयते ॥१५७॥
'तमःप्रलयलीनस्य जगतः सर्जनं प्रति । त्वयामृतमिवासिक्तमिदमालक्ष्यते वचः ॥१५८॥
नोदभास्यन् यदि ध्वान्तविच्छिदस्त्वद्वचोंऽशवः । तमस्यन्धे जगत्कृत्स्नमपतिष्यदिदं ध्रुवम् ॥१५९॥

कथावतारका वर्णन

गुरुपरम्परासे ऐसा सुना जाता है कि पहले तृतीय कालके अन्तमें नाभिराजके पुत्र भगवान् ऋषभदेव विहार करते हुए अपनी इच्छासे पृथिवीके मुकुटभूत कैलास पर्वतपर आकर विराजमान हुए ॥१४८॥ कैलासपर विराजमान हुए उन भगवान् वृषभदेवकी देवोंने भक्तिपूर्वक पूजा की तथा जुड़े हुए हाथोंको मुकुटसे लगाकर स्तुति की ॥१५०॥ उसी पर्वतपर त्रिजगद्गुरु भगवान्को केवलज्ञानकी प्राप्ति हुई, उससे हर्षित होकर इन्द्रने वहाँ समवसरणकी रचना कराई ॥१५१॥ देवाधिदेव भगवान् आश्चर्यकारी विभूतिके साथ जब समवसरण सभामें विराजमान थे तब भक्तिसे भरे हुए महाराज भरतने हर्षके साथ आकर उन्हें नमस्कार किया ॥१५२॥ महाराज भरतने मनुष्य और देवोंसे पूजित उन जिनेन्द्रदेवकी अर्थसे भरे हुए अनेक स्तोत्रों द्वारा पूजा की और फिर वे विनयसे नत होकर अपने योग्य स्थानपर बैठ गये ॥१५३॥ देदीप्यमान देवोंसे भरी हुई वह सभा भगवान्से धर्मरूपी अमृतका पानकर उस तरह संतुष्ट हुई थी जिस तरह कि सूर्यके तेज किरणोंका पानकर कमलिनी संतुष्ट होती है ॥१५४॥ इसके अनन्तर मूर्तिमान् विनय की तरह महाराज भरत हाथ जोड़ सभा के बीच खड़े होकर यह वचन कहने लगे ॥१५५॥ प्रार्थना करते समय महाराज भरतके दाँतोंकी किरणरूपी केशरसे शोभायमान मुखसे जो मनोहर वाणी निकल रही थी वह ऐसी मालूम होती थी मानो उनके मुखसे प्रसन्न हुई उज्ज्वलवर्णधारिणी सरस्वती ही निकल रही हो ॥१५६॥ हे देव, देव और धरणेन्द्रोंसे भरी हुई यह सभा आपके निमित्तसे प्रबोध—प्रकृष्ट ज्ञानको (पक्षमें विकासको) पाकर कमलिनीके समान शोभायमान हो रही है क्योंकि सबके मुख, कमलके समान अत्यन्त प्रफुल्लित हो रहे हैं ॥१५७॥ हे भगवन्, आपके यह दिव्य वचन अज्ञानान्धकाररूप प्रलयमें नष्ट हुए जगत्की पुनरुत्पत्तिके लिए सींचे गये अमृतके समान मालूम होते हैं ॥१५८॥ हे देव, यदि अज्ञाना-

१ पूर्वशास्त्रे । 'कल्पः स्यात् प्रलये न्याये शास्त्रे ब्रह्मदिने विधौ'। अथवा पुराकल्पे युगादौ । २ कैलासाद्रौ । 'वसामनूपाध्याङ्' इति सूत्रात् सप्तम्यर्थे द्वितीया । ३ तिरीटाग्र—ल०, म०, अ० । ४ कुट्मलाः म०, ल० । ५ सभास्थाने । 'शीङ्स्थासारधेराधारः' इति सूत्रात्सप्तम्यर्थे द्वितीया । ६ तमःप्रलयः—अज्ञानमूर्च्छा । 'प्रलयो मृत्युकल्पान्तमूर्च्छादिषु प्रयुज्यते ।' अथवा 'प्रलयो नष्टचेष्टता' इत्यमरः ।

युष्मत्संदर्शनादेव देवाभून्मे कृतार्थता । कस्य वा नु कृतार्थत्वं सन्निधौ महतो निधेः ॥१६०॥
श्रुत्वा पुनर्भवद्वाचं[1] कृतार्थतरकोऽस्म्यहम् । दृष्ट्वामृतं कृती लोकः किं पुनस्तद्रसोपयुक्[2] ॥१६१॥
इष्ट एव किलारण्ये वृष्टो देव[3] इति श्रुतिः । स्पष्टीभूताद्य मे देव वृष्टं धर्माम्बु [4]यत्त्वया ॥१६२॥
त्वयोपदिशता तत्त्वं किं नाम परिशेषितम् । धूतान्धतमसो भास्वान् [5]भास्यं किमवशेषयेत् ॥१६३॥
त्वयोपदर्शिते तत्त्वे सतां मोमुह्यते न धीः । [6]महत्यादर्शिते वर्त्मन्यनन्धः कः परिस्खलेत् ॥१६४॥
त्वद्वचोविस्तरे कृत्स्नं वस्तुबिम्बं मयेक्षितम् । त्रैलोक्यश्रीमुखालोकमङ्गलाब्दतलायिते ॥१६५॥
तथापि किमपि प्रष्टुमिच्छा मे हृदि वर्तते । भवद्वचोमृताभीक्ष्ण[7]पिपासा तत्र कारणम् ॥१६६॥
गणेशमथवोल्लङ्घ्य त्वां प्रष्टुं क इवाहकम्[8] । भक्तो न गणयामीदमतिभक्तिश्च नेष्यते[9] ॥१६७॥
किं[10] विशेषैषितैषा मे किमनीषल्लभादरः[11] । [12]श्रद्धोत्कर्षोचिकीर्षा [13]नु [14]मुखरीकुरुतेऽद्य माम् ॥१६८॥

न्धकारको नष्ट करनेवाले आपके वचनरूप किरण प्रकट नहीं होते तो निश्चयसे यह समस्त जगत् अज्ञानरूपी सघन अन्धकारमें पड़ा रहता ॥१५९॥ हे देव, आपके दर्शनमात्रसे ही मैं कृतार्थ हो गया हूँ, यह ठीक ही है महानिधिको पाकर कौन कृतार्थ नहीं होता ? ॥१६०॥ आपके वचन सुनकर तो मैं और भी अधिक कृतार्थ हो गया क्योंकि जब लोग अमृतको देख कर ही कृतार्थ हो जाते हैं तब उसका स्वाद लेनेवाला क्या कृतार्थ नहीं होगा ? अर्थात् अवश्य ही होगा ॥१६१॥ हे नाथ, वन में मेघका बरसना सबको इष्ट है यह कहावत जो सुनी जाती थी सो आज यहाँ आपके द्वारा धर्मरूपी जलकी वर्षा देखकर मुझे प्रत्यक्ष हो गई। भावार्थ–जिस प्रकार वनमें पानीकी वर्षा सबको अच्छी लगती है उसी प्रकार इस कैलासके काननमें आपके द्वारा होनेवाली धर्मरूपी जलकी वर्षा सबको अच्छी लग रही है ॥१६२॥ हे भगवन्, उपदेश देते हुए आपने किस पदार्थको छोड़ा है ? अर्थात् किसीको भी नहीं। क्या सघन अन्धकारको नष्ट करनेवाला सूर्य किसी पदार्थको प्रकाशित करनेसे बाकी छोड़ देता है ? अर्थात् नहीं ॥१६३॥ हे भगवन्, आपके द्वारा दिखलाये हुए तत्त्वोंमें सत्पुरुषोंकी बुद्धि कभी भी मोहको प्राप्त नहीं होती। क्या महापुरुषोंके द्वारा दिखाए हुए मार्गमें नेत्रवाला पुरुष कभी गिरता है ? अर्थात् नहीं गिरता ॥१६४॥ हे स्वामिन्, तीनों लोकोंकी लक्ष्मीके मुख देखनेके लिए मङ्गल दर्पणके समान आचरण करनेवाले आपके इन वचनोंके विस्तारमें प्रतिबिम्बित हुई संसारकी समस्त वस्तुओंको यद्यपि मैं देख रहा हूँ तथापि मेरे हृदयमें कुछ पूछनेकी इच्छा उठ रही है और उस इच्छाका कारण आपके वचनरूपी अमृतके निरन्तर पान करते रहनेकी लालसा ही समझनी चाहिये ॥१६५–१६६॥ हे देव, यद्यपि लोग कह सकते हैं कि गणधरको छोड़कर साक्षात् आपसे पूछनेवाला यह कौन है ? तथापि मैं इस बातको कुछ नहीं समझता, आपकी सातिशय भक्ति ही मुझे आपसे पूछनेके लिए प्रेरित कर रही है ॥१६७॥ हे भगवन्, पदार्थका विशेष स्वरूप जाननेकी इच्छा, अधिक लाभकी भावना, श्रद्धाकी अधिकता अथवा कुछ करनेकी इच्छा ही मुझे आपके सामने वाचाल कर रही है ॥१६८॥

१–भवद्वाक्यं अ० । २–रसोपभुक् न०, अ०, प०, स०, द०, म०, ल० । ३ इन्द्रः मेघः । ४ यस्मात् कारणात् । ५ प्रकाश्यम् । ६ महतादर्शिते ल० । ७ पुनः पुनः । ८ कुत्सितोऽहम् । ९ नेक्ष्यते अ० । १० विशेषमेष्टुमिच्छन्तीतित्येवं शीलः विशेषैषी तस्य भावः । ११ सुदुर्लभादरः । १२–त्कर्षश्चिच–ल० । १३–र्षा मु –स० । १४ सुमुखरी–प०, द०, ।

भगवन् श्रोतुकामोऽस्मि त्रिश्वभुग्धर्मसंग्रहम्। पुराणं महतां पुंसां प्रसीद कुरु मे दयाम् ॥१६९॥
त्वत्समाः कति सर्वज्ञा मत्समाः कति चक्रिणः। केशवाः कति वा देव सरामाः कति तद्द्विषः ॥१७०॥
कीदृशं [1]वृत्तकं तेषां वृत्तं [2]वर्त्स्यच्च साम्प्रतम्[3]। तत्सर्वं [4]ज्ञातुकामोऽस्मि वद मे वदतांवर[5] ॥१७१॥
[6]किन्नामानश्च ते सर्वे किंगोत्राः किंसनाभयः। किंलक्ष्माणः किमाकाराः [7]किमाहार्याः किमायुधाः ॥१७२॥
किं तेषामायुषो मानं किं वर्ष्म[8] किमथान्तरम्। कुतूहलमिदं ज्ञातुं विश्वं [9]विश्वजनीन मे ॥१७३॥
कस्मिन्युगे कियन्तो वा [10]युगांशाः किं युगान्तरम्[11]। युगानां परिवर्तो वा कतिकृत्वः प्रवर्तते ॥१७४॥
युगस्य कथिते[कतिथे[12]]भागे मनवो मन्वते[13] च किम्। किं वा मन्वन्तरं देव [14]तत्वं मे ब्रूहि तत्वतः ॥१७५॥
लोकं कालावतारञ्च [15]वंशोत्पत्तिलयस्थितीः, वर्णसंभूतिमन्यच्च [16]बुभुत्सेऽहं भवन्मुखात् ॥१७६॥
अनादिवासनोद्भूतमिथ्याज्ञानसमुत्थितम्। नुद मे संशयध्वान्तं जिनार्कवचनांशुभिः ॥१७७॥
इति प्रश्नमुपन्यस्य भरतः [17]शातमातुरः। [18]विरराम यथास्थानमासीनश्च[19] कथोत्सुकः ॥१७८॥
लब्धावसरमिद्धार्थं[20] सुसंबद्धमनुद्धतम्। अभ्यनन्दत्सभा कृत्स्ना प्रश्नमस्येशितुर्विशाम्[21] ॥१७९॥

हे भगवन्, मैं तीर्थंकर आदि महापुरुषोंके उस पुण्यको सुनना चाहता हूँ जिसमें सर्वज्ञप्रणीत समस्त धर्मोंका संग्रह किया गया हो। हे देव, मुझपर प्रसन्न होइए, दया कीजिए और कहिए कि आपके समान कितने सर्वज्ञ–तीर्थंकर होंगे? मेरे समान कितने चक्रवर्ती होंगे? कितने नारायण, कितने बलभद्र और कितने उनके शत्रु–प्रतिनारायण होंगे? उनका अतीत चरित्र कैसा था? वर्तमानमें और भविष्यत्में कैसा होगा? हे वक्तृश्रेष्ठ, यह सब मैं आपसे सुनना चाहता हूँ ॥१६९-१७१॥ हे सबका हित करनेवाले जिनेन्द्र, यह भी कहिए कि वे सब किन किन नामोंके धारक होंगे? किस किस गोत्रमें उत्पन्न होंगे? उनके सहोदर कौन कौन होंगे? उनके क्या क्या लक्षण होंगे? वे किस आकार के धारक होंगे? उनके क्या क्या आभूषण होंगे? उनके क्या क्या अस्त्र होंगे? उनकी आयु और शरीरका प्रमाण क्या होगा? एक दूसरेमें कितना अन्तर होगा? किस युगमें कितने युगोंके अंश होते हैं? एक युगसे दूसरे युगमें कितना अन्तर होगा? युगोंका परिवर्तन कितनी बार होता है? युगके कौनसे भागमें मनु कुलकर उत्पन्न होते हैं? वे क्या जानते हैं? एक मनुसे दूसरे मनुके उत्पन्न होनेतक कितना अन्तराल होता है? हे देव, यह सब जाननेका मुझे कौतूहल उत्पन्न हुआ है सो यथार्थ रीतिसे मुझे इन सब तत्त्वोंका स्वरूप कहिए ॥१७२-१७५॥ इसके सिवाय लोकका स्वरूप, कालका अवतरण, वंशोंकी उत्पत्ति विनाश और स्थिति, क्षत्रिय आदि वर्णोंकी उत्पत्ति भी मैं आपके श्रीमुखसे जानना चाहता हूँ ॥१७६॥ हे जिनेन्द्रसूर्य, अनादिकालकी वासनासे उत्पन्न हुए मिथ्याज्ञानसे सातिशय बढ़े हुए मेरे इस संशयरूपी अन्धकारको आप अपने वचनरूप किरणोंके द्वारा शीघ्र ही नष्ट कीजिये ॥१७७॥ इस प्रकार प्रश्न कर महाराज भरत जब चुप हो गए और कथा सुननेमें उत्सुक होते हुए अपने योग्य आसनपर बैठ गये तब समस्त सभाने भरत महाराजके इस प्रश्नकी सातिशय प्रशंसा की जो

---

१ चारित्रम्। २ भविष्यत्। ३ वर्तमानम्। ४ श्रोतु–म०, ल०। ५ वदतां वरः अ०, प०। ६ कानि नामानि येषां ते। ७ किमाभरणम्। ८ वर्ष्मप्रमाणं शरीरोत्सेध इत्यर्थः। ९ विश्वजनेभ्यो हित। १० युगान्ताः म०। सुषमादयः। ११ अवधिः। १२ कतीनां पूरणम्। १३ जानन्ति। १४ तत् त्वमिति पदविभागः। १५ वंशोत्पत्तिं लयस्थिती ल०। १६ बोद्धुमिच्छामि। १७ शातस्य माता शातमाता, शातमातुरपत्यं शातमातुरः। 'संख्यासम्भद्रान्मातुरुच् उर्' । १८ तूष्णीं स्थितः। १९ उपविष्टः। २० इद्धः समृद्धः। २१ विशामीशितुः राज्ञः।

तत्क्षणं सत्कथाप्रश्नात्सदर्पितदृशः सुराः । पुष्पवृष्टिमिवातेनुः प्रतीता[1] भरतं प्रति ॥१८०॥
साधु भो भरताधीश [2]प्रतीक्ष्योऽसि त्वमद्य नः । प्रशशंसुरितीन्द्रास्तं प्रश्रयात्को न शस्यते ॥१८१॥
प्रश्नाद्विनैव[3] तद्भावं जानन्नपि स सर्ववित् । तत्प्रश्नान्तमुदैक्षिष्ट [4]प्रतिपन्नुरोधतः ॥१८२॥
इति विज्ञापितस्तेन भगवानादितीर्थकृत् । व्याजहार पुराणार्थमतिगम्भीरया गिरा ॥१८३॥
अपरिस्पन्दताल्वादेरस्पष्टदशनद्युतेः । स्वयम्भुवो मुखाम्भोजाज्जाता चित्रं सरस्वती ॥१८४॥
प्रसवागारमेतस्याः सत्यं तद्वक्त्रपङ्कजम् । तत्र लब्धात्मलाभा सा [5]यज्जगद्वशमानयत्[6] ॥१८५॥
विवक्षया विनैवास्य दिव्यो वाक्प्रसरोऽभवत् । महतां चेष्टितं चित्रं जगदभ्युजिहीर्षताम्[7] ॥१८६॥
एकरूपापि तद्भाषा श्रोतॄन्प्राप्य पृथग्विधान् । भेजे नानात्मतां [8][illegible] ॥१८७॥
परार्थं स कृतार्थोऽपि यदैहिष्ट[9] जगद्गुरुः । तन्नूनं महतां चेष्टा परार्थैव निसर्गतः ॥१८८॥
स्वभ्मुखात्प्रसृता वाणी दिव्या तां महतीं सभाम् । प्रीणयामास सौधीव धारा संतापहारिणी ॥१८९॥

कि समयके अनुसार किया गया था, प्रकाशमान अर्थोंसे भरा हुआ था, पूर्वापर सम्बन्धसे सहित था तथा उद्धतपनेसे रहित था ॥१७८-१७९॥ उस समय उनके इस प्रश्नको सुनकर सब देवता लोग महाराज भरतकी ओर आँख उठाकर देखने लगे जिससे ऐसा मालूम होता था मानो वे उनपर पुष्पवृष्टि ही कर रहे हैं ॥१८०॥ हे भरतेश्वर, आप धन्य हैं, आज आप हमारे भी पूज्य हुए हैं इस प्रकार इन्द्रोंने उनकी प्रशंसा की थी सो ठीक ही है, विनयसे किसकी प्रशंसा नहीं होती ? अर्थात् सभीकी होती है ॥१८१॥ संसारके सब पदार्थोंको एक साथ जाननेवाले भगवान् वृषभनाथ यद्यपि प्रश्नके विना ही भरत महाराजके अभिप्रायको जान गये थे तथापि वे श्रोताओंके अनुरोधसे प्रश्नके पूर्ण होनेकी प्रतीक्षा करते रहे ॥१८२॥

इस प्रकार महाराज भरतके द्वारा प्रार्थना किये गये आदिनाथ भगवान् सातिशय गम्भीर-वाणीसे पुराणका अर्थ कहने लगे ॥१८३॥ उस समय भगवान्के मुखसे जो वाणी निकल रही थी वह बड़ा ही आश्चर्य करनेवाली थी क्योंकि उसके निकलते समय न तो तालु कण्ठ ओठ आदि अवयव ही हिलते थे और न दाँतोंकी कोई किरण ही प्रकट हो रही थी ॥१८४॥ अथवा सचमुचमें भगवान्का मुखकमल ही इस सरस्वतीका उत्पत्तिस्थान था उसने वहाँ उत्पन्न होकर ही जगत्को वशमें किया ॥१८५॥ भगवान्के मुखसे जो दिव्य ध्वनि प्रकट हो रही थी वह बोलनेकी इच्छाके बिना ही प्रकट हो रही थी सो ठीक है क्योंकि जगत्का उद्धार चाहनेवाले महापुरुषोंकी चेष्टाएँ आश्चर्य करनेवाली ही होती हैं ॥१८६॥ जिस प्रकार नहरोंके जलका प्रवाह एक रूप होनेपर भी अनेक प्रकारके वृक्षोंको पाकर अनेकरूप हो जाता है उसी प्रकार जिनेन्द्रदेवकी वाणी एक रूप होनेपर भी पृथक् पृथक् श्रोताओंको प्राप्तकर अनेक रूप हो जाती है। भावार्थ–भगवान्की दिव्य ध्वनि उद्गम स्थानसे एक रूप ही प्रकट होती है परन्तु उसमें सर्वभाषारूप परिणमन होनेका अतिशय होता है जिससे सब श्रोता लोग उसे अपनी अपनी भाषामें समझ जाते हैं ॥१८७॥ वे जगद्गुरु भगवान् स्वयं कृतकृत्य होकर भी धर्मोपदेशके द्वारा दूसरोंकी भलाईके लिए उद्योग करते थे। इससे निश्चय होता है कि महापुरुषोंकी चेष्टाएँ स्वभावसे ही परोपकारके लिये होती हैं ॥१८८॥ उनके मुखसे प्रकट हुई दिव्यवाणीने उस विशाल सभाको अमृतकी

---

१ प्रतीतां द०, म०, ल० । प्रतीतं प० । २ पूज्यः । ३ विनापि द०, प० । ४ प्रतिपन्नविरोधतः स० । प्रतिपत् श्रोतृ । ५ यत् कारणात् । ६ -मानयेत् द०, ब० । ७ अभ्युद्धर्तुमिच्छताम् । ८ 'पयःप्रणालीसरितीः कुल्या' । ९ चेष्टयामास ।

यत्पृष्टमादितस्तेन तत्सर्वमनुपूर्वशः[1]। वाचस्पतिरनायासाद्भरतं प्रत्यबूबुधत् ॥१९०॥
प्रागेवोत्सर्पिणीकालसम्बन्धि पुरुषाश्रयम्[2]। पुराणमतिगम्भीरं व्याजहार जगद्गुरुः ॥१९१॥
ततोऽवसर्पिणीकालमाश्रित्य प्रस्तुतां[3] कथाम्। [4]प्रस्तोष्यन्स पुराणस्य पीठिकां प्राक्समाददे[5] ॥१९२॥
[6]इतिवृत्तं पुराकल्पे यत्प्रोवाच [7]गिरांपतिः। गणी वृषभसेनाख्यस्तत्तदाधि[8]जगेऽर्थतः[10] ॥१९३॥
ततःस्वायम्भुवीं वाणीमवधार्यार्थतः कृती। जगद्धिताय सोऽग्रन्थीत्तत्पुराणं गणाग्रणीः १९४॥
शेषैरपि तथा तीर्थकृद्भिर्गणधरैरपि। [11]महर्द्धिभिर्यथाम्नायं तत्पुराणं प्रकाशितम् ॥१९५॥
ततो युगान्ते भगवान् वीरः सिद्धार्थनन्दनः। विपुलाद्रिमलंकुर्वन्नेकदास्ताखिलार्थदृक् ॥१९६॥
अथोपसृत्य तत्रैनं पश्चिमं तीर्थनायकम्। पप्रच्छामुं पुराणार्थं श्रेणिको विनयानतः ॥१९७॥
तं प्रत्यनुग्रहं भर्तुरवबुध्य गणाधिपः। पुराणसंग्रहं कृत्स्नमन्ववोचत्स गौतमः ॥१९८॥
[12]तत्तदानुस्मृतं तत्र[13] गौतमेन महर्षिणा। ततोऽबोधि सुधर्मोऽसौ जम्बूनाम्ने समर्पयत् ॥१९९॥
ततः प्रभृत्यविच्छिन्नगुरुपर्वक्रमागतम्। पुराणमधुनास्माभिर्यथाशक्ति प्रकाश्यते ॥२००॥
तत्रोऽत्र मूलतन्त्रस्य कर्त्ता पश्चिमतीर्थकृत्। गौतमश्चानुतन्त्रस्य [14]प्रत्यासत्तिक्रमाश्रयात् ॥२०१॥

धाराके समान संतुष्ट किया था क्योंकि अमृतधाराके समान ही उनकी वाणी भव्य जीवोंका संताप दूर करनेवाली थी, जन्म मरणके दुःखसे छुड़ानेवाली थी ॥१८९॥ महाराज भरतने पहले जो कुछ पूछा था उस सबको भगवान् वृषभदेव बिना किसी कष्टके क्रमपूर्वक कहने लगे ॥१९०॥ जगद्गुरु भगवान् वृषभदेवने सबसे पहले उत्सर्पिणीकाल सम्बन्धी तिरेसठ शलाकापुरुषोंका चरित्र निरूपण करनेवाले अत्यन्त गम्भीर पुराणका निरूपण किया, फिर अवसर्पिणी कालका आश्रय कर तत्सम्बन्धी तिरेसठ शलाकापुरुषोंकी कथा कहनेकी इच्छासे पीठिका सहित उनके पुराणका वर्णन किया ॥१९१-१९२॥ भगवान् वृषभनाथने तृतीय कालके अन्तमें जो पूर्वकालीन इतिहास कहा था, वृषभसेन गणधरने उसे अर्थ रूपसे अध्ययन किया ॥१९३॥ तदनन्तर गणधरोंमें प्रधान वृषभसेन गणधरने भगवान्की वाणीको अर्थरूपसे हृदयमें धारणकर जगत्के हितके लिए उसकी पुराणरूपसे रचना की ॥१९४॥ वही पुराण अजितनाथ आदि शेष तीर्थकरों, गणधरों तथा बड़े बड़े ऋषियों द्वारा प्रकाशित किया गया ॥१९५॥

तदन्तर चतुर्थ कालके अन्तमें एक समय सिद्धार्थ राजाके पुत्र सर्वज्ञ महावीर स्वामी विहार करते हुए राजगृहीके विपुलाचल पर्वतपर आकर विराजमान हुए ॥१९६॥ इसके बाद पता चलनेपर राजगृहीके अधिपति विनयवान् श्रेणिक महाराजने जाकर उन अन्तिम तीर्थकर—भगवान् महावीरसे उस पुराणको पूछा ॥१९७॥ महाराज श्रेणिकके प्रति महावीर स्वामीके अनुग्रहका विचार कर गौतम गणधरने उस समस्त पुराणका वर्णन किया ॥१९८॥ गौतम स्वामी चिरकालतक उसका स्मरण-चिन्तवन करते रहे, बादमें उन्होंने उसे सुधर्माचार्यसे कहा और सुधर्माचार्यने जम्बू स्वामीसे कहा ॥१९९॥ उसी समयसे लेकर आजतक यह पुराण बीचमें नष्ट नहीं होनेवाली गुरुपरम्पराके क्रमसे चला आ रहा है। इसी पुराणका मैं भी इस समय शक्तिके अनुसार प्रकाश करूँगा ॥२००॥ इस कथनसे यह सिद्ध होता है कि इस पुराणके मूलकर्ता अन्तिम

---

१ अनुक्रमेण। २ पुरुषाश्रितम्। ३ प्रकृताम्। ३ प्रवक्ष्यन्। ५–माददे प०, द०, स०। ६ ऐतिह्यम्। ७ सर्वज्ञः। ८ तदाधिजगदेऽर्थतः स०। ९ ज्ञातवान्। इङ् अध्ययने। 'गाङ्लिटि' इत्यो लिटि गाङ् भवति इति गाङादेशः। १० ग्रन्थरचनां विना। ११ महर्षिभि–म०,ल०। १२ प्रोक्तम्। १३ समवसरणे। १४ प्रत्यासत्तिः सम्बन्धः।

श्रेणिकप्रश्नमुद्दिश्य गौतमः प्रत्यभाषत । इतीदमनुसंधाय[1] प्रबन्धोऽयं[2] निबध्यते ॥२०२॥
[3]इतीदं [4]प्रमुखं नाम कथासम्बन्धसूचनम् । कथाप्रामाण्यसंसिद्धावुपयोगीति वर्णितम् ॥२०३॥
पुराणमृषिभिःप्रोक्तं प्रमाणं [5]सूक्तमाप्तसम् । ततःश्रद्धेयमध्येयं ध्येयं श्रेयोऽर्थिनामिदम् ॥२०४॥
इदं पुण्यमिदं पूतमिदं [6]मङ्गलमुत्तमम् । [7]इदमायुष्यमग्र्यञ्च यशस्यं स्वर्ग्यमेव च ॥२०५॥
इदमर्चयतां शान्तिस्तुष्टिः पुष्टिश्च पृच्छताम् । पठतां क्षेममारोग्यं शृण्वतां कर्मनिर्जरा ॥२०६॥
इतोदुःस्वप्ननिर्णाशः [8]सुस्वप्नस्फातिरेव[9] च । इतोऽभीष्टफलव्यक्तिर्निमित्तमभिपश्यताम् ॥२०७॥

हरिणीच्छन्दः

[10]वृषभकविभिर्यातं मार्गं वयं च किलाधुना प्रजिगमिषवो हास्यं लोके किमन्यदतः परम् ।
घटितमथवा नैतच्चित्रं पतत्पतिलङ्घितं[11] गगनमितरे नाक्रामेयुः किमल्पशकुन्तयः ॥२०८॥

मालिनीच्छन्दः

इति वृषभकवीन्द्रैर्द्योतितं मार्गमेनं वयमपि च यथावद्द्योतयामः स्वशक्त्या ।
सवितृकिरणजालैर्द्योतितं व्योममार्गं विरलमुडुगणोऽयं भासयेत्किं न लोके ॥२०९॥

तीर्थंकर भगवान् महावीर हैं और निकट क्रमकी अपेक्षा उत्तर ग्रन्थ कर्ता गौतम गणधर हैं ॥२०१॥ महाराज श्रेणिकके प्रश्नको उद्देश्य करके गौतम स्वामीने जो उत्तर दिया था उसीका अनुसंधान–विचार कर मैं इस पुराण ग्रन्थकी रचना करता हूँ ॥२०२॥ यह प्रतिमुख नामका प्रकरण कथाके सम्बन्धको सूचित करनेवाला है तथा कथाकी प्रामाणिकता सिद्ध करनेके लिए उपयोगी है अतः मैंने यहाँ उसका वर्णन किया है ॥२०३॥ यह पुराण ऋषियोंके द्वारा कहा गया है इसलिए निश्चयसे प्रमाण भूत है। अतएव आत्मकल्याण चाहनेवालोंको इसका श्रद्धान, अध्ययन और ध्यान करना चाहिये ॥२०४॥ यह पुराण पुण्य बढ़ानेवाला है, पवित्र है, उत्तम मङ्गल रूप है, आयु बढ़ानेवाला है, श्रेष्ठ है, यश बढ़ानेवाला है और स्वर्ग प्रदान करनेवाला है ॥२०५॥ जो मनुष्य इस पुराणकी पूजा करते हैं उन्हें शांतिकी प्राप्ति होती है उनके सब विघ्न नष्ट हो जाते हैं, जो इसके विषयमें जो कुछ पूछते हैं उन्हें सन्तोष और पुष्टिकी प्राप्ति होती है, जो इसे पढ़ते हैं उन्हें आरोग्य तथा अनेक मङ्गलोंकी प्राप्ति होती है और जो सुनते हैं उनके कर्मोंकी निर्जरा हो जाती है ॥२०६॥ इस पुराणके अध्ययनसे दुःख देनेवाले खोटे स्वप्न नष्ट हो जाते हैं, तथा सुख देनेवाले अच्छे स्वप्नोंकी प्राप्ति होती है, इससे अभीष्ट फलकी प्राप्ति होती है तथा विचार करनेवालोंको शुभ अशुभ आदि निमित्तों–शकुनोंकी उपलब्धि भी होती है ॥२०७॥ पूर्वकालमें वृषभसेन आदि गणधर जिस मार्गसे गये थे इस समय मैं भी उसी मार्गसे जाना चाहता हूँ अर्थात् उन्होंने जिस पुराणका निरूपण किया था उसीका निरूपण मैं भी करना चाहता हूँ सो इससे मेरी हँसी ही होगी, इसके सिवाय हो ही क्या सकता है ? अथवा यह कोई आश्चर्यकी बात नहीं है क्योंकि जिस आकाशमें गरुड़ आदि बड़े बड़े पक्षी उड़ते हैं उसमें क्या छोटे छोटे पक्षी नहीं उड़ते ? अर्थात् अवश्य उड़ते हैं ॥२०८॥ इस पुराण रूपी मार्गको वृषभसेन आदि गणधरोंने जिस प्रकार प्रकाशित किया है उसी प्रकार मैं भी इसे

---

१ अवधार्य । २ पुराणम् । ३ इदं प्रतिमुखं अ०, प०, स०, द०, म०, ल० । ४ इदं प्रमुखम् एतदादि । ५ सूक्तमजस्रं द०, म०, प०, ल० । ६ माङ्गल्य–अ०, प०, स०, द०, म०, ल० । ७ आयुःकरम् । ८ सुस्वप्नस्फीति–प०, सुस्वप्नस्याप्तिरेव ल०, म०, द०, अ० । ९ स्फातिः वृद्धिः । १० वृषभः मुख्यः । ११ पतत्त्र्यतिलङ्घितम् म० द० ल० ।

स्रग्धराच्छन्दः

श्रीमद्भव्याब्जिनीनां हृदयमुकुलितं धुन्वदाधाय[1] बोधं
मिथ्यावादान्धकारस्थितिमपघटयद्वाङ्मयूखप्रतानैः ।
[2]सद्वृत्तं शुद्धमार्गप्रकटनमहिमालम्बि यद्[3]ब्रध्नबिम्ब-
प्रस्पर्द्धीद्धर्द्धि जैनं जगति विजयतां पुण्यमेतत्पुराणम् ॥२१०॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे कथामुखवर्णनं नाम प्रथमं पर्व ॥

अपनी शक्तिके अनुसार प्रकाशित करता हूँ । क्योंकि लोकमें जो आकाश सूर्यकी किरणोंके समूहसे प्रकाशित होता है उसी आकाशको क्या तारागण प्रकाशित नहीं करते ? अर्थात् अवश्य करते हैं । भावार्थ–मैं इस पुराणको कहता अवश्य हूँ परन्तु उसका जैसा विशद निरूपण वृषभसेन आदि गणधरोंने किया था वैसा मैं नहीं कर सकता जैसे तारागण आकाशको प्रकाशित करते अवश्य हैं परन्तु सूर्यकी भाँति प्रकाशित नहीं कर पाते ॥२०९॥ बोध-सम्यग्ज्ञान (पक्षमें विकास) की प्राप्ति कराकर सातिशय शोभित भव्य जीवोंके हृदयरूपी कमलोंके संकोचको दूर करनेवाला, वचनरूपी किरणोंके विस्तारसे मिथ्यामतरूपी अन्धकारको नष्ट करनेवाला, सद्वृत्त–सदाचारका निरूपण करनेवाला अथवा उत्तम छन्दोंसे सहित (पक्षमें गोलाकार) शुद्ध मार्ग–रत्नत्रयरूप मोक्षमार्ग (पक्षमें कण्टकादिरहित उत्तममार्ग) को प्रकाशित करनेवाला, और इद्धर्द्धि–प्रकाशमान शब्द तथा अर्थ रूप सम्पत्तिसे (पक्षमें उज्ज्वल किरणोंसे युक्त) सूर्यबिम्बके साथ स्पर्धा करनेवाला यह जिनेन्द्रदेवसम्बन्धी पवित्र–पुण्यवर्धक पुराण जगत्‌में सदा जयशील रहे ॥२१०॥

इस प्रकार आर्ष नामसे प्रसिद्ध भगवज्जिनसेनाचार्य विरचित त्रिषष्टिलक्षण महापुराणके संग्रहमें 'कथामुखवर्णन' नामका प्रथम पर्व समाप्त हुआ ॥१॥

---

१ कृत्वा । २ सतां वृत्तं यस्मिन् तत् । ३ ब्रध्नः भानुः ।

द्वितीयं पर्व

तमादिदेवं देवानामधिदेवं स्वयंभुवम् । प्रणम्य तत्पुराणस्य वच्म्युपोद्धात[1]विस्तरम् ॥ १ ॥
अथातो धर्मजिज्ञासासमाहितमतिः[2] कृती । श्रेणिकः परिपप्रच्छ गौतमं गणभृत्प्रभुम् ॥ २ ॥
भगवन्नर्थतः कृत्स्नं श्रुतं स्वायम्भुवान्मुखात् । ग्रन्थतः श्रोतुमिच्छामि पुराणं त्वदनुग्रहात् ॥ ३ ॥
त्वमकारणबन्धुर्नस्त्वमकारणवत्सलः । त्वमकारणवैद्योऽसि [3]दुःखातङ्कार्दितात्मनाम् ॥ ४ ॥
पुण्याभिषेकमभितः कुर्वन्तीव शिरस्सु नः । व्योमगङ्गाम्बुसच्छाया[4] युष्मत्पादनखांशवः ॥ ५ ॥
तव दीप्ततपोलब्धे[5]रङ्गलक्ष्मीः [6]प्रतायिनी । अकालेऽप्यनुसंधत्ते सान्द्रबालातपश्रियम् ॥ ६ ॥
त्वया जगदिदं कृत्स्नम[7]विद्यामीलितेक्षणम् । सद्यः प्रबोधमानीतं भास्वतेवाब्जिनीवनम् ॥ ७ ॥
यन्नेन्दुकिरणैः स्पृष्टमनालीढं रवेः करैः । तत्त्वया हेलयोद[8]स्तमन्तर्ध्वान्तं वचोंऽशुभिः ॥ ८ ॥
तवोच्छिखाः स्फुरन्त्येता योगिन् सप्त महर्द्धयः । [9]कर्मेन्धनदहोद्दीप्ताः [10]सप्तार्चिष इवार्चिषः ॥ ९ ॥

अब मैं देवाधिदेव स्वयम्भू भगवान् वृषभदेवको नमस्कार कर उनके इस महापुराण-सम्बन्धी उपोद्धात–प्रारम्भ का विस्तारके साथ कथन करता हूँ ॥१॥ अथानन्तर धर्मका स्वरूप जाननेमें जिसकी बुद्धि लग रही है, ऐसे बुद्धिमान् श्रेणिक महाराजने गणनायक गौतम स्वामीसे पूछा ॥२॥ हे भगवन्, श्रीवर्द्धमान स्वामीके मुखसे यह सम्पूर्ण पुराण अर्थ रूपसे मैंने सुना है अब आपके अनुग्रहसे उसे ग्रन्थ रूपसे सुनना चाहता हूँ ॥३॥ हे स्वामिन्, आप हमारे अकारण बन्धु हैं, हमपर बिना कारणके ही प्रेम करनेवाले हैं तथा जन्म मरण आदि दुखदायी रोगोंसे पीड़ित संसारी प्राणियोंके लिए अकारण–स्वार्थरहित वैद्य हैं ॥४॥ हे देव, आकाशगङ्गाके जलके समान स्वच्छ, आपके चरणोंके नखोंकी किरणें जो हमारे शिरपर पड़ रही हैं वे ऐसी मालूम होती हैं मानो मेरा सब ओरसे अभिषेक ही कर रही हों ॥५॥ हे स्वामिन्, उग्र तपस्याकी लब्धिसे सब ओर फैलनेवाली आपके शरीरकी आभा असमयमें ही प्रातःकालीन सूर्यकी सान्द्र-सघन शोभाको धारण कर रही है ॥६॥ हे भगवन्, जिस प्रकार सूर्य रातमें निमीलित हुए कमलोंको शीघ्र ही प्रबोधित–विकसित कर देता है उसी प्रकार आपने अज्ञान रूपी निद्रामें निमीलित – सोये हुए इस समस्त जगत्को प्रबोधित–जाग्रत कर दिया है ॥७॥ हे देव, हृदयके जिस अज्ञानरूपी अन्धकारको चन्द्रमा अपनी किरणोंसे छू नहीं सकता तथा सूर्य भी अपनी रश्मियोंसे जिसका स्पर्श नहीं कर सकता उसे आप अपने वचन, रूपी किरणोंसे अनायास ही नष्ट कर देते हैं ॥८॥ हे योगिन्, उत्तरोत्तर बढ़ती हुई आपकी यह बुद्धि आदि सात ऋद्धियाँ ऐसी मालूम होती हैं मानो कर्मरूपी ईंधनके जलानेसे उद्दीप्त हुई

---

१ उपक्रमः । 'उपोद्धात उदाहरः' इत्यभिधानात् । २ समाहिता संलीना । ३ दुःखातङ्कार्दितात्मनाम् द०, स०, अ०, प०, ल० । ४ समानाः । ५ ऋद्धेः । ६ विस्तारिणी । ७ अविद्या अनित्याऽशुचिदुःखाज्ञानात्मसु विपरीता व्याप्तृतिरविद्या । ८ निरस्तम् । ९ कर्मेन्धनदहोद्दीप्ताः ट० । कर्मेन्धनानि दहन्तीति कर्मेन्धनदहः । १० अग्नेः ।

इदं पुण्याश्रमस्थानं पवित्रं त्वत्प्रतिश्रयात् । रक्षारण्यमिवाभाति तपोलक्ष्म्या निराकुलम् ॥१०॥
अत्रैते पशवो वन्या[1] पुष्टा मृष्टैस्तृणाङ्कुरैः । न क्रूरमृगसंबाधां जानन्त्यपि कदाचन ॥११॥
पादप्रधावनोत्सृष्टैः[2] कमण्डलुजलैरिमे । अमृतैरिव वर्द्धन्ते मृगशावाः पवित्रिताः ॥१२॥
सिंहस्तनन्धयानत्र करिण्यः पाययन्त्यमूः । सिंहधेनुस्तनं स्वैरं स्पृशन्ति कलभा इमे ॥१३॥
अहो परममाश्चर्यं यदवाचोऽप्यमी मृगाः । भजन्ति भगवत्पादच्छायां मुनिगणा इव ॥१४॥
[3]अकृत्तवल्कलाश्चामी प्रसूनफलशालिनः । धर्मारामतरूयन्ते परितो वनपादपाः ॥१५॥
इमा वनलता रम्याः [4]प्रफुल्ला भ्रमरैर्वृताः । न विदुः [5]करसंबाधां राजन्वत्य इव प्रजाः ॥१६॥
तपोवनमिदं रम्यं [6]परितो विपुलाचलम् । दयावनमिवोद्भूतं प्रसादयति मे मनः ॥१७॥
इमे तपोधना दीप्ततपसो [7]वातवल्कलाः । भवत्पादप्रसादेन मोक्षमार्गमुपासते ॥१८॥
इति प्रस्पष्टमाहात्म्यः [8]कृती जगदनुग्रहे । भगवन् [9]भव्यसार्थस्य[10] [11]सार्थवाहायते भवान् ॥१९॥
ततो ब्रहि महायोगिन् न ते कश्चिदगोचरः । तव ज्ञानांशवो दिव्याः[12] प्रसरन्ति जगत्त्रये ॥२०॥

अग्निकी सात शिखाएँ ही हों ।।९।। हे भगवन्, आपके आश्रय से ही यह समवसरण पुण्यका आश्रमस्थान तथा पवित्र हो रहा है अथवा ऐसा मालूम होता है मानो तपरूपी लक्ष्मीका उपद्रव रहित रक्षावन ही हो ।।१०।। हे नाथ, इस समवसरणमें जो पशु बैठे हुए हैं वे धन्य हैं, इनका शरीर मीठी घासके खानेसे अत्यन्त पुष्ट हो रहा है, ये दुष्ट पशुओं (जानवरों) द्वारा होने वाली पीड़ाको कभी जानते ही नहीं हैं ।।११।। पादप्रक्षालन करनेसे इधर उधर फैले हुए कमण्डलुके जलसे पवित्र हुए ये हरिणोंके बच्चे इस तरह बढ़ रहे हैं मानो अमृत पीकर ही बढ़ रहे हों ।।१२।। इस ओर ये हथिनियाँ सिंहके बच्चेको अपना दूध पिला रही हैं और ये हाथीके बच्चे स्वेच्छासे सिंहनीके स्तनोंका स्पर्श कर रहे हैं—दूध पी रहे हैं ।।१३।। अहो ! बड़े आश्चर्यकी बात है कि जिन हरिणोंको बोलना भी नहीं आता वे भी मुनियोंके समान भगवान्के चरणकमलोंकी छायाका आश्रय ले रहे हैं ।।१४।। जिनकी छालोंको कोई छील नहीं सका है तथा जो पुष्प और फलोंसे शोभायमान हैं ऐसे सब ओर लगे हुए ये वनके वृक्ष ऐसे मालूम होते हैं मानो धर्मरूपी बगीचेके ही वृक्ष हैं ।।१५।। ये फूली हुई और भ्रमरोंसे घिरी हुई वनलताएँ कितनी सुन्दर हैं ? ये सब न्यायवान् राजाकी प्रजाकी तरह कर-बाधा (हाथसे फल फूल आदि तोड़नेका दुःख, पक्षमें टैक्सका दुःख) को तो जानती ही नहीं हैं ।।१६। आपका यह मनोहर तपोवन जो कि विपुलाचल पर्वतके चारों ओर विद्यमान है, प्रकट हुए दयावनके समान मेरे मनको आनन्दित कर रहा है ।।१७।। हे भगवन्, उग्र तपश्चरण करनेवाले ये दिगम्बर तपस्वीजन केवल आपके चरणोंके प्रसादसे ही मोक्षमार्गकी उपासना कर रहे हैं ।।१८।। हे भगवन्, आपका माहात्म्य अत्यन्त प्रकट है, आप जगत्के उपकार करनेमें सातिशय कुशल हैं, अत एव आप भव्य समुदायके सार्थवाह—नायक गिने जाते हैं ।।१९।। हे महायोगिन्, संसारमें ऐसा कोई भी पदार्थ नहीं है जो आपके ज्ञानका विषय न हो, आपकी मनोहर ज्ञानकिरणें तीनों लोकोंमें फैल रही हैं इसलिए हे देव, आपही

---

१ धन्याः अ०,प०,द०,स०,म०,ल० । २ पादप्रधावनोत्सृष्टविशिष्टसलिलैरिमे प०, द० । ३ अकृत्तः अच्छिन्नः । ४ विकसिताः । ५ करः हस्तः बलिश्च । ६ विपुलगिरेरभितः । "हाधिक्समयानिकषापर्युपर्यधोऽत्यन्तरान्तरेणतस्पर्यभिसरोऽभयैश्चाप्रधानेऽमौद्शस् । ७ वायुर्वल्कलं येषां ते दिगम्बराः । ८ कुशलः । ९ भव्यसार्थस्य सार्थस्य अ०, स० । १० सङ्घस्य । ११ सार्थवाहः वणिक्श्रेष्ठः । १२ दीप्ताः अ०, स० ।

विज्ञाप्यमन्यदप्यस्ति समाधाय मनः शृणु।[1]यतो[2]भगवतश्चित्तं दृढं स्यान्मदनुग्रहे ॥२१॥
पुरा चरितमज्ञानान्मया दुश्चरितं महत्। तस्यैनसः प्रशान्त्यर्थं प्रायश्चित्तं चराम्यहम् ॥२२॥
[3]हिंसानृतान्यरैरामारत्यारम्भपरिग्रहैः। मया सञ्चितमज्ञेन पुरैनो [4]निरयोचितम् ॥२३॥
कृतो मुनिवधानन्दस्तीव्रो मिथ्यादृशा मया। येनायुष्कर्म दुर्मोचं बद्धं श्वाभ्रीं गतिं प्रति ॥२४॥
तत्प्रसीद विभो वक्तुमामूलात्पावनीं कथाम्। निष्क्रयो[5] दुष्कृतस्यास्तु मम पुण्यकथाश्रुतिः ॥२५॥
इति प्रश्रयिणीं वाचमुदीर्य[6] मगधाधिपः। व्यरमद्दशनज्योत्स्नाकृतपुष्पार्चनस्तुतिः ॥२६॥
ततस्तमृषयो दीप्ततपोलक्ष्मीविभूषणाः। प्रशशंसुरिति प्रीता धार्मिकं मगधेश्वरम् ॥२७॥
साधु भो मगधाधीश ! साधु प्रश्नविदांवर !। पृच्छताद्य त्वया तत्त्वं साधु नः प्रीणितं मनः ॥२८॥
[7]पिपृच्छिषितमस्माभिर्यदेव [8]परमार्थकम्। तदेवाद्य त्वया पृष्टं संवादः[9] पश्य कीदृशः ॥२९॥
[10]बुभुत्सावेदनं[11] प्रश्नः स ते धर्मो बुभुत्सितः। त्वया बुभुत्सुना[12] धर्मं [13]विश्वमेव बुभुत्सितम् ॥३०॥
पश्य धर्मतरोरर्थः फलं कामस्तु तद्रसः। सत्रिवर्गत्रयस्यास्य मूलं [14]पुण्यकथाश्रुतिः ॥३१॥

यह पुराण कहिये ॥२०॥ हे भगवन्, इसके सिवाय एक बात और कहनी है उसे चित्त स्थिरकर सुन लीजिए जिससे मेरा उपकार करनेमें आपका चित्त और भी दृढ़ हो जावे ॥२१॥ वह बात यह है कि मैंने पहले अज्ञानवश बड़े-बड़े दुराचरण किए हैं। अब उन पापों की शान्तिके लिए ही यह प्रायश्चित ले रहा हूँ ॥२२॥ हे नाथ, मुझ अज्ञानीने पहले हिंसा झूठ चोरी परस्त्रीसेवन और अनेक प्रकारके आरम्भ तथा परिग्रहादिकके द्वारा अत्यन्त घोर पापोंका संचय किया है ॥२३॥ और तो क्या, मुझ मिथ्यादृष्टिने मुनिराजके वध करनेमें भी बड़ा आनन्द माना था जिससे मुझे नरक ले जाने वाले नरकायु कर्मका ऐसा बन्ध हुआ जो कभी छूट नहीं सकता ॥२४॥ इसलिए हे प्रभो, उस पवित्र पुराणके प्रारम्भसे कहनेके लिए मुझपर प्रसन्न होइए क्योंकि उस पुण्यवर्धक पुराणके सुननेसे मेरे पापोंका अवश्य ही निराकरण हो जावेगा ॥२५॥ इस प्रकार दाँतोंकी कान्तिरूपी पुष्पोंके द्वारा पूजा और स्तुति करते हुए मगधसम्राट् विनयके साथ ऊपर कहे हुए वचन कहकर चुप हो गए ॥२६॥

तदनन्तर श्रेणिकके प्रश्नसे प्रसन्न हुए और तीव्र तपश्चरणरूपी लक्ष्मीसे शोभायमान मुनिजन नीचे लिखे अनुसार उन धर्मात्मा श्रेणिक महाराजकी प्रशंसा करने लगे ॥२७॥ हे मगधेश्वर, तुम धन्य हो, तुम प्रश्न करनेवालोमें अत्यन्त श्रेष्ठ हो इसलिए और भी धन्य हो, आज महापुराण सम्बन्धी प्रश्न पूछते हुए तुमने हमलोगोंके चित्तको बहुत ही हर्षित किया है ॥२८॥ हे श्रेणिक, श्रेष्ठ अक्षरोंसे सहित जिस पुराणको हम लोग पूछना चाहते थे उसे ही तुमने पूछा है। देखो यह कैसा अच्छा सम्बन्ध मिला है ॥२९॥ जाननेकी इच्छा प्रकट करना प्रश्न कहलाता है। आपने अपने प्रश्नमें धर्मका स्वरूप जानना चाहा है। सो हे श्रेणिक, धर्मका स्वरूप जाननेकी इच्छा करते हुए आपने सारे संसारको जानना चाहा है अर्थात् धर्मका स्वरूप जाननेकी इच्छासे आपने अखिल संसारके स्वरूपको जाननेकी इच्छा प्रकट की है ॥३०॥ हे श्रेणिक, देखो, यह धर्म एक वृक्ष है। अर्थ

---

१ विज्ञापनात् समाधानात्। २ भवतः। ३ अन्यधनवनितारति। ४ दति निकाचितम् अ०, स०, द०, प०। ५ निःक्रिया ट०। ६ उक्त्वा। ७ प्रष्टुमिष्टम्। ८ परमाक्षरम् अ०, स०, प०, ल०, द०। ९ प्रकृतार्थाविचलनं संवादः। १० बोद्धुमिच्छा। ११ वेदनं विज्ञापनम्। वेदनः अ०, स०, द०। १२ बुभुत्सता द०, स०, अ०, प०, म०, ल०। १३ सर्वमेव द०, प०। १४ धर्मकथा म०, प०।

धर्मादर्थश्च कामश्च स्वर्गश्चेत्यविगानतः[1] । धर्मः कामार्थयोः [2]सूतिरित्यायुष्मन्विनिश्चिनु ॥३२॥
धर्मार्थी सर्वकामार्थी धर्मार्थी धनसौख्यवान् । धर्मो हि मूलं सर्वासां धनर्द्धिसुखसंपदाम् ॥३३॥
धर्मः कामदुघा धेनुर्धर्मश्चिन्तामणिर्महान् । धर्मः कल्पतरुः स्थेयान् धर्मो हि निधिरक्षयः ॥३४॥
पश्य धर्मस्य माहात्म्यं योऽपायात्परिरक्षति । [3]यत्र स्थितं नरं [4]दूरान्नातिक्रामन्ति देवताः ॥३५॥
[5]विचारनृपलोकात्मदिव्यप्रत्ययतोऽपि[6] च । धीमन्धर्मस्य माहात्म्यं निर्विचारमवेहि भोः ॥३६॥
स धर्मो विनिपातेभ्यो यस्मात्संधारयेन्नरम् । धत्ते चाभ्युदयस्थाने निरपायसुखोदये ॥३७॥
स च धर्मः पुराणार्थः पुराणं पञ्चधा विदुः । क्षेत्रं कालश्च तीर्थञ्च सत्पुंसस्तद्विचेष्टितम् ॥३८॥
क्षेत्रं त्रैलोक्यविन्यासः कालस्त्रैकाल्यविस्तरः । मुक्त्युपायो भवेत्तीर्थं पुरुषास्तन्निषेविणः ॥३९॥
न्याय्यमाचरितं तेषां चरितं दुरितच्छिदाम् । इति कृत्स्नः पुराणार्थः प्रश्ने संभावितस्त्वया ॥४०॥
अहो प्रसन्नगम्भीरः प्रश्नोऽयं विश्वगोचरः । क्षेत्रक्षेत्रज्ञसन्मार्गकालसच्चरिताश्रयः ॥४१॥

उसका फल है और काम उसके फलोंका रस है । धर्म अर्थ और काम इन तीनोंको त्रिवर्ग कहते हैं, इस त्रिवर्गकी प्राप्तिका मूल कारण धर्मका सुनना है ॥३१॥ हे आयुष्मन्, तुम यह निश्चय करो कि धर्मसे ही अर्थ काम स्वर्गकी प्राप्ति होती है । सचमुच वह धर्म ही अर्थ और कामका उत्पत्तिस्थान है ॥३२॥ जो धर्मकी इच्छा रखता है वह समस्त इष्ट पदार्थोंकी इच्छा रखता है। धर्मकी इच्छा रखने वाला मनुष्य ही धनी और सुखी होता है क्योंकि धन ऋद्धि सुख संपत्ति आदि सबका मूल कारण एक धर्म ही है ॥३३॥ मनचाही वस्तुओं को देने के लिए धर्म ही कामधेनु है, धर्म ही महान् चिन्तामणि है, धर्म ही स्थिर रहनेवाला कल्पवृक्ष है और धर्म ही अविनाशी निधि है ॥३४॥ हे श्रेणिक, देखो धर्मका कैसा माहात्म्य है, जो पुरुष धर्म में स्थिर रहता है—निर्मल भावोंसे धर्मका आचरण करता है वह उसे अनेक संकटोंसे बचाता है । तथा देवता भी उसपर आक्रमण नहीं कर सकते, दूर दूर ही रहते हैं ॥३५॥ हे बुद्धिमन्, विचार, राजनीति, लोकप्रसिद्धि, आत्मानुभव और उत्तम ज्ञानादि की प्राप्तिसे भी धर्मका अचिन्त्य माहात्म्य जाना जाता है । भावार्थ—द्रव्योंकी अनन्त शक्तियोंका विचार, राज-सन्मान, लोकप्रसिद्धि, आत्मानुभव और अवधि मनःपर्यय आदि ज्ञान इन सबकी प्राप्ति धर्मसे ही होती है। अतः इन सब बातोंको देखकर धर्मका अलौकिक माहात्म्य जानना चाहिये ॥३६॥ यह धर्म नरक निगोद आदिके दुःखोंसे इस जीव की रक्षा करता है और अविनाशी सुखसे युक्त मोक्ष-स्थानमें इसे पहुँचा देता है इसलिए इसे धर्म कहते हैं ॥३७॥ जो पुराणका अर्थ है वही धर्म है, मुनिजन पुराणको पाँच प्रकारका मानते हैं—क्षेत्र, काल, तीर्थ, सत्पुरुष और उनकी चेष्टाएँ ॥३८॥ ऊर्ध्व मध्य और पाताल रूप तीन लोकों की जो रचना है उसे क्षेत्र कहते हैं। भूत भविष्यत् और वर्तमान रूप तीन कालोंका जो विस्तार है उसे काल कहते हैं। मोक्षप्राप्तिके उपायभूत सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्चारित्रको तीर्थ कहते हैं । इस तीर्थको सेवन करनेवाले शलाकापुरुष सत्पुरुष कहलाते हैं और पापोंको नष्ट करनेवाले उन सत्पुरुषोंके न्यायोपेत आचरणको उनकी चेष्टाएँ अथवा क्रियाएँ कहते हैं । हे श्रेणिक, तुमने पुराणके इस सम्पूर्ण अर्थको अपने प्रश्नमें समाविष्ट कर दिया है ॥३९-४०॥ अहो श्रेणिक, तुम्हारा यह प्रश्न सरल होनेपर भी गम्भीर है, सब तत्त्वोंसे भरा हुआ है तथा क्षेत्र, क्षेत्रको जाननेवाला आत्मा,

१ अविवादतः । २ कारणमित्यर्थः । ३ धर्मे । ४ अतिशयेन । ५ विचारं नृप लोकात्म-द० । ६ प्रत्ययः

इदमेव युगस्यादौ पप्रच्छ भरतः पुरुम् । ततोऽनुयुयुजे[1] सम्राट् सागरोऽजितमच्युतम् ॥४२॥
इति प्रमाणभूतेयं वक्तृश्रोतृपरम्परा । त्वयाद्यालङ्कृता धीमन् ! पृच्छतेमं महाधियम् ॥४३॥
त्वं प्रष्टा भगवान्वक्ता सहशुश्रूषवो वयम् । सामग्री नेदृशी जातु जाता नैव जनिष्यते ॥४४॥
तस्मात्पुण्यकथामेनां शृणुयामः समं वयम् । प्रज्ञापारमितो देवो वक्तुमुत्सहतामयम् ॥४५॥
इति प्रोत्साह्य तं धर्मे [2]ते समाधानचक्षुषः । ततो गणधरस्तोत्रं पेठुरित्युच्चकैस्तदा ॥४६॥
त्वां प्रत्यक्षविदां बोधैरप्यबुद्धमहोदयम् । प्रत्यक्षस्तवनैः स्तोतुं वयं चाद्य किलोद्यताः ॥४७॥
[3]चतुर्दशमहाविद्यास्थानाकूपारपारगम् । त्वामृषे ! स्तोतुकामाः स्मः केवलं भक्तिचोदिताः[4] ॥४८॥
भगवन् भव्यसार्थस्य[5] नेतुस्तव शिवाकरम्[6] । पताकेवोच्छ्रिता भाति कीर्तिरेषा विधूज्ज्वला ॥४९॥
[7]आलवालीकृताम्भोधिवलया कीर्तिवल्लरी । जगन्नाडीतरोरग्रमाक्रामति तवोच्छिखा ॥५०॥
त्वामामनन्ति मुनयो योगिनामधियोगिनम् । त्वां गण्यं गणनातीतगुणं गणधरं विदुः ॥५१॥

सन्मार्ग, काल और सत्पुरुषोंका चरित्र आदिका आधारभूत है ॥४१॥ हे बुद्धिमान् श्रेणिक, युगके आदिमें भरत चक्रवर्तीने भगवान् आदिनाथसे यही प्रश्न पूँछा था, और यही प्रश्न चक्रवर्ती सगरने भगवान् अजितनाथसे पूँछा था। आज तुमने भी अत्यन्त बुद्धिमान् गौतम गणधरसे यही प्रश्न पूछा है इस प्रकार वक्ता और श्रोताओंकी जो प्रमाणभूत–सच्ची परम्परा चली आ रही थी उसे तुमने सुशोभित कर दिया है ॥४२–४३॥ हे श्रेणिक, तुम प्रश्न करने वाले, भगवान् महावीर स्वामी उत्तर देनेवाले और हम सब तुम्हारे साथ सुननेवाले हैं। हे राजन्, ऐसी सामग्री पहले न तो कभी मिली है और न कभी मिलेगी ॥४४॥ इसलिये पूर्ण श्रुतज्ञानको धारण करनेवाले ये गौतम स्वामी इस पुण्य कथाका कहना प्रारम्भ करें और हम सब तुम्हारे साथ सुनें ॥४५॥ इस प्रकार वे सब ऋषिजन महाराज श्रेणिकको धर्ममें उत्साहित कर एकाग्रचित्त हो उच्च स्वरसे गणधर स्वामीका नीचे लिखा हुआ स्तोत्र पढ़ने लगे ॥४६॥

हे स्वामिन्, यद्यपि प्रत्यक्ष ज्ञानके धारक बड़े बड़े मुनि भी अपने ज्ञान द्वारा आपके अभ्युदयको नहीं जान सके हैं तथापि हमलोग प्रत्यक्ष स्तोत्रोंके द्वारा आपकी स्तुति करनेके लिये तत्पर हुए हैं सो यह एक आश्चर्यकी ही बात है ॥४७॥ हे ऋषे, आप चौदह महा महाविद्या (चौदह पूर्व) रूपी सागरके पारगामी हैं अतः हम लोग मात्र भक्तिसे प्रेरित होकर ही आपकी स्तुति करना चाहते हैं ॥४८॥ हे भगवन्, आप भव्य जीवोंको मोक्षस्थानकी प्राप्ति करानेवाले हैं, आपकी चन्द्रमाके समान उज्ज्वल कीर्ति फहराती हुई पताकाके समान शोभायमान हो रही है ॥४९॥ देव, चारों ओर फैले हुए समुद्रको जिसने अपना आलवाल (क्यारी) बनाया है ऐसी बढ़ती हुई आपकी यह कीर्तिरूपी लता इस समय त्रसनाड़ी रूपी वृक्षके अग्रभागपर आक्रमण कर रही है–उसपर आरूढ़ हुआ चाहती है ॥५०॥ हे नाथ, बड़े बड़े मुनि भी यह मानते हैं कि आप योगियोंमें महायोगी हैं, प्रसिद्ध हैं, असंख्यात गुणोंके धारक हैं तथा संघके अधिपति–गणधर हैं ॥५१॥

---

१ प्रश्नमकरोत् । २ ऋषयः । ३ चत्वारो वेदाः, शिक्षा कल्पो व्याकरणं छन्दोविचितिः ज्योतिषं निरुक्तम् इतिहासः पुराणं मीमांसा न्यायशास्त्रं चेति चतुर्दशमहाविद्यास्थानानि चतुर्दशपूर्वाणि वा चतुर्दशमहाविद्यास्थानानि । ४ नोदिताः अ०, स० । ५ सङ्घस्य । ६ मोक्षखनिम् । ७ आलवालः आवापः ।

गोतमा 'गौः प्रकृष्टा स्यात् सा च सर्वज्ञभारती । तां वेत्सि तामधीषे[2] च त्वमतो गौतमो मतः ॥५२॥
गोतमादागतो देवः स्वर्गाग्राद्गौतमो[3] मत[4]: । तेन प्रोक्तमधीयानस्त्वञ्चासौ गौतमश्रुतिः ॥५३॥
इन्द्रेण प्राप्तपूजर्द्धिरिन्द्रभूतिस्त्वमिष्यसे । साक्षात्सर्वज्ञपुत्रस्त्वमाप्तसंज्ञानकण्ठिकः ॥५४॥
चतुर्भिश्चामलैर्बोधैरबुद्धस्त्वं जगद्यतः । प्रज्ञापारमितं बुद्धं त्वां निराहुरतो बुधाः ॥५५॥
[5]पारेतमः [6]परं ज्योति[7]स्त्वामदृष्ट्वा दुरासदम् । ज्योतिर्मयः प्रदीपोऽसि त्वं तस्याभिप्रकाशनात् ॥५६॥
श्रुतदेव्याहितस्त्रै[8]णप्रयत्ना बोधदीपिका । तवैषा प्रज्वलत्युच्चैर्द्योतयन्ती जगद्गृहम् ॥५७॥
तव वाक्प्रकरो[9] दिव्यो विधुन्वन् जगतां तमः । प्रकाशयति सन्मार्गं रवेरिव करोत्करः ॥५८॥
तव लोकातिगा प्रज्ञा विद्यानां पारदृश्वरी । श्रुतस्कन्धमहासिन्धोरभजद्यानपात्रताम् ॥५९॥
त्वयावतारिता तुङ्गान्महावीरहिमाचलात् । श्रुतामरसरित्पुण्या निर्धुनानाखिलं रजः ॥६०॥
प्रत्यक्षश्च परोक्षश्च द्विधा ते ज्ञानपर्ययः । केवलं केवलिन्येकस्ततस्त्वं श्रुतकेवली ॥६१॥

उत्कृष्ट वाणीको गौतम कहते हैं और वह उत्कृष्ट वाणी सर्वज्ञ-तीर्थंकरकी दिव्यध्वनि ही हो सकती है उसे आप जानते हैं अथवा उसका अध्ययन करते हैं इसलिए आप गौतम माने गये है अर्थात् आपका यह नाम सार्थक है (श्रेष्ठा गौ, गौतमा, तामधीते वेद वा गौतमः 'तदधीते वेद वा' इत्यण् प्रत्ययः) ॥५२॥ अथवा यों समझिये कि भगवान् वर्धमान स्वामी, गोतम अर्थात् उत्तम सोलहवें स्वर्गसे अवतीर्ण हुए हैं इसलिए वर्धमान स्वामीको गौतम कहते हैं इन गौतम अर्थात् वर्धमान स्वामी द्वारा कही हुई दिव्यध्वनिको आप पढ़ते हैं जानते हैं, इसलिए लोग आपको गौतम कहते हैं। (गोतमादागतः गौतमः 'तत आगतः' इत्यण्, गौतमेन प्रोक्तमिति गौतमम्, गौतमम् अधीते वेद वा गौतमः) ॥५३॥ आपने इन्द्रके द्वारा की हुई अर्चारूपी विभूतिको प्राप्त किया है इसलिए आप इन्द्रभूति कहलाते हैं। तथा आपको सम्यग्ज्ञान रूपी कण्ठाभरण प्राप्त हुआ है अतः आप सर्वज्ञदेव श्री वर्धमान स्वामीके साक्षात् पुत्रके समान हैं ॥५४॥ हे देव, आपने अपने चार निर्मल ज्ञानोंके द्वारा समस्त संसार को जान लिया है तथा आप बुद्धि के पारको प्राप्त हुए हैं इसलिए विद्वान् लोग आपको बुद्ध कहते हैं ॥५५॥ हे देव, आपको बिना देखे अज्ञानान्धकार से परे रहनेवाली केवलज्ञान रूपी उत्कृष्ट ज्योतिका प्राप्त होना अत्यन्त कठिन है, आप उस ज्योतिके प्रकाश होनेसे ज्योतिस्वरूप अनोखे दीपक हैं ॥५६॥ हे स्वामिन्, श्रुत देवताके द्वारा स्त्री रूपको धारण करनेवाली आपकी सम्यग्ज्ञान रूपी दीपिका जगत्‌रूपी घरको प्रकाशित करती हुई अत्यन्त शोभायमान हो रही है ॥५७॥ आपके दिव्य वचनोंका समूह लोगोंके मिथ्यात्व रूपी अन्धकारको नष्ट करता हुआ सूर्यकी किरणोंके समूहके समान समीचीन मार्गका प्रकाश करता है ॥५८॥ हे देव, आपकी यह प्रज्ञा लोकमें सबसे चढ़ी बढ़ी है, समस्त विद्याओंमें पारङ्गत है और द्वादशाङ्ग रूपी समुद्रमें जहाजपनेको प्राप्त है—अर्थात् जहाजका काम देती है ॥५९॥ हे देव, आपने अत्यन्त ऊँचे वर्धमान स्वामीरूप हिमालयसे उस श्रुतज्ञानरूपी गङ्गा नदीका अवतरण कराया है जो कि स्वयं पवित्र है और समस्त पापरूपी रजको धोनेवाली है ॥६०॥ हे देव, केवलीभगवान्‌में मात्र एक केवलज्ञान ही होता है और आपमें प्रत्यक्ष परोक्षके भेदसे दो प्रकारका ज्ञान विद्यमान है इसलिए आप श्रुतकेवली

---

१ वाक् । 'गौः पुमान् वृषभे स्वर्गे खण्ड वज्रहिमांशुषु । स्त्री गवि भूमिदिग्नेत्रवाग्बाणसलिले स्त्रिषु ॥' इति विश्वलो० । २ मधीष्टे म०, ल० । ३ तीर्थङ्करः । ४ जिनः अ०, स०, द०, प० । ५ तमसः पारंगतम् । ६ केवलज्ञानम् । दुरासदं भवतीति सम्बन्धः । ७ द्योति स० । ८ कृतस्त्रीसम्बन्धि । ९ प्रसरो म०, ल० ।

पारेतमः परं धाम प्रवेष्टुमनसो वयम् । तद्द्वारोद्घाटनं बीजं[1] त्वामुपास्य लभेमहि ॥६२॥
[2]ब्रह्मोद्या निखिला [3]विद्यास्त्वं हि ब्रह्मसुतो मुनिः । परं ब्रह्म त्वदायत्तमतो ब्रह्मविदो विदुः ॥६३॥
मुनयो [4]वातरशनाः पदमूर्ध्वं [5]विधित्सवः । त्वां मूर्द्धवन्दिनो भूत्वा तदुपायमुपासते ॥६४॥
महायोगिन्नमस्तुभ्यं महाप्रज्ञ नमोऽस्तु ते । नमो महात्मने तुभ्यं नमः [6]स्तात्ते महर्द्धये ॥६५॥
नमोऽवधिजुषे तुभ्यं नमो देशावधित्विषे । परमावधये तुभ्यं नमः सर्वावधिस्पृशे ॥६६॥
[7]कोष्ठबुद्धे नमस्तुभ्यं नमस्ते [8]बीजबुद्धये । [9]पदानुसारिन् [10]संभिन्नश्रोतस्तुभ्यं नमो नमः ॥६७॥

कहलाते है ।.६१।। हे देव , हम लोग मोह अथवा अज्ञानान्धकारसे रहित मोक्षरूपी परम धाममें प्रवेश करना चाहते हैं अतः आपकी उपासना कर आपसे उसका द्वार उघाड़नेका कारण प्राप्त करना चाहते हैं ।।६२।। हे देव , आप सर्वज्ञ देवके द्वारा कही हुई समस्त विद्याओंको जानते हैं इसलिये आप ब्रह्मसुत कहलाते हैं तथा परंब्रह्म रूप सिद्ध पदकी प्राप्ति होना आपके अधीन है, ऐसा ब्रह्मका स्वरूप जाननेवाले योगीश्वर भी कहते हैं ।।६३।। हे देव , जो दिगम्बर मुनि मोक्ष प्राप्त करनेके अभिलाषी हैं वे आपको मस्तक झुकाकर नमस्कार करते हुए उसके उपायभूत—सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्चारित्रकी उपासना करते हैं ।।६४।। हे देव , आप महायोगी हैं—ध्यानी हैं अतः आपको नमस्कार हो, आप महाबुद्धिमान् हैं अतः आपको नमस्कार हो, आप महात्मा हैं अतः आपको नमस्कार हो, आप जगत्त्रयके रक्षक और बड़ी बड़ी ऋद्धियोंके धारक हैं अतः आपको नमस्कार हो ॥६५।। हे देव , आप देशावधि, परमावधि और सर्वावधिरूप अवधि ज्ञानको धारण करनेवाले हैं अतः आपको नमस्कार हो ।।६६।। हे देव, आप कोष्ठबुद्धि नामक ऋद्धि को धारण करने वाले हैं अर्थात् जिस प्रकार कोठेमें अनेक प्रकारके धान्य भरे रहते हैं उसी प्रकार आपके हृदयमें भी अनेक पदार्थोंका ज्ञान भरा हुआ है, अतः आपको नमस्कार हो। आप बीजबुद्धि नामक ऋद्धिसे सहित हैं अर्थात् जिस प्रकार उत्तम जमीनमें बोया हुआ एक भी बीज अनेक फल उत्पन्न कर देता है उसी प्रकार आप भी आगमके बीजरूप एक दो पदोंको ग्रहण कर अनेक प्रकारके ज्ञानको प्रकट कर देते हैं इसलिए आपको नमस्कार हो। आप पदानुसारी ऋद्धिको धारण करने वाले हैं अर्थात् आगमके आदि मध्य अन्तको अथवा जहाँ कहींसे भी एक पदको सुनकर भी समस्त आगमको जान लेते हैं अतः आपको नमस्कार हो। आप संभिन्नश्रोतृ ऋद्धिको धारण करनेवाले हैं अर्थात् आप नौ योजन चौड़े और बारह योजन लम्बे क्षेत्रमें फैले हुए चक्रवर्तीके कटक सम्बन्धी समस्त मनुष्य और तिर्यञ्चोंके अक्षरात्मक तथा अनक्षरात्मक मिले हुए हुए शब्दोंको एक साथ ग्रहण कर सकते हैं अतः आपको

---

१ कारणम् । २ ब्रह्मणा सर्वज्ञेनोक्ता । ३ विद्वांस्त्वं द०, ल० । ४ वायुकाञ्चीदामा । ५ विवित्सवः ट० । वेत्तुमिच्छवः लब्धुमिच्छव इत्यर्थः । 'विद्लृ लाभे' इति धातोरुत्पन्नत्वात् । ६ नमस्त्रात्रे ल० । स्तात् अस्तु । ७ कोष्ठागारिकधृतभूरिधान्यानामविनष्टाव्यतिकीर्णानां यथास्थानं तथैवावस्थानमवधारितग्रन्थार्थानां यस्यां बुद्धौ सा कोष्ठबुद्धिः । ८ विशिष्टक्षेत्रकालादिसहायमेकमप्युप्तं बीजमनेकबीजप्रदं यथा भवति तथैकबीजपदग्रहणादनेकपदार्थप्रतिपत्तिर्यस्यां बुद्धौ सा बीजबुद्धिः । ९ आदावन्ते यत्र तत्र चैकपदग्रहणात् समस्तग्रन्थार्थस्यावधारणा यस्यां बुद्धौ सा पदानुसारिणी बुद्धिः । १० सं सम्यक् संकरव्यतिकरव्यतिरेकेण भिन्नं विभक्तं शब्दरूपं शृणोतीति सम्भिन्नश्रोतृऋद्धिः द्वादशयोजनायामनवयोजनविस्तारचक्रधरस्कन्धावारोत्पन्नतरकरभाद्यक्षरानक्षरात्मकशब्दसन्दोहस्यान्योन्यं विभिन्नस्यापि युगपत्प्रतिभासो यस्यां बुद्धौ सत्यां भवति सा सम्भिन्नश्रोत्रीत्यर्थः ।

नमोऽस्त्वृजुमते तुभ्यं नमस्ते विपुलात्मने । नमः [1]प्रत्येकबुद्धाय [2]स्वयम्बुद्धाय वै नमः ॥६८॥
अभिन्नदशपूर्वित्वात्प्राप्तपूजाय ते नमः । नमस्ते पूर्वविद्यानां विश्वासां पारदृश्वने ॥६९॥
दीप्तोग्रतपसे तुभ्यं नमस्तप्तमहातपः । नमो घोरगुणब्रह्मचारिणे घोरतेजसे ॥७०॥
नमस्ते विक्रियर्द्धीनामष्टधा सिद्धिमीयुषे । [3]आमर्ष[4]क्ष्वेलवाग्विप्रुड्जल्ल[5]सर्वौषधे नमः ॥७१॥
नमोऽमृतमधुक्षीरसर्पिरास्त्राविणेऽस्तु[6] ते । नमो मनोवचःकायबलिनां ते बलीयसे ॥७२॥

१–स्मिन् समीक्ष्य-प०, द०, प०, म०, ल० । २ निरुक्तिं कुर्वन्ति । ३ शाश्वतः ईश्वरानिर्मितश्च । ४ नैयायिकवैशेषिकादयः । ५ सृष्टि । ६ अपरिणामी । 'एकरूपतया तु यः । कालव्यापी कूटस्थः' इत्यभिधानात् । ७ 'त्यदां द्वितीयाटौस्येनदेनः' इति अन्वादेशे एतच्छब्दस्य एनदादेशो भवति । ८ विमूर्तेः सकाशात् । ९ तनुकरणभवनादिमूर्तद्रव्यम् ।

तेषां स्वभावसिद्धत्वे लोकेऽप्येतत्प्रसज्यते । किन्च [1]निर्मातृवद्विश्वं स्वतःसिद्धिमवाप्नुयात् ॥२०॥
सृजेद्विनापि सामग्र्या स्वतन्त्रः प्रभुरिच्छया । इतीच्छामात्रमेवैतत् कः श्रद्ध्याद्युक्तिकम् ॥२१॥
कृतार्थस्य विनिर्मित्सा[2] कथमेवास्य युज्यते । अकृतार्थोऽपि न स्रष्टुं विश्वमीष्टे कुलालवत् ॥२२॥
अमूर्तो निष्क्रियो व्यापी कथमेष जगत्सृजेत् । न सिसृक्षापि तस्यास्ति विक्रियारहितात्मनः ॥२३॥
तथाप्यस्य जगत्सर्गे फलं किमपि मृग्यताम् । निष्ठितार्थस्य धर्मादिपुरुषार्थेष्वनर्थिनः ॥२४॥
स्वभावतो विनैवार्थात् सृजतोऽनर्थसंगतिः । क्रीडेयं कापि चेदस्य दुरन्ता मोहसन्ततिः ॥२५॥

यदि यह कहो कि वह कारण सामग्री स्वभावसे ही–अपने आप ही बन जाती है, उसे ईश्वरने नहीं बनाया है तो यह बात लोकमें भी लागू हो सकती है–मानना चाहिये कि लोक भी स्वतः सिद्ध है उसे किसीने नहीं बनाया। इसके अतिरिक्त एक बात यह भी विचारणीय है कि उस ईश्वर को किसने बनाया ? यदि उसे किसीने बनाया है तब तो ऊपर लिखे अनुसार अनवस्था दोष आता है और यदि वह स्वतः सिद्ध है–उसे किसीने भी नहीं बनाया है तो यह लोक भी स्वतः सिद्ध हो सकता है–अपने आप बन सकता है ॥२०॥ यदि यह कहो कि वह ईश्वर स्वतन्त्र है तथा सृष्टि बनानेमें समर्थ है इसलिए सामग्रीके बिना ही इच्छा मात्रसे लोक को बना लेता है तो आप की यह इच्छा मात्र है। इस युक्तिशून्य कथनपर भला कौन बुद्धिमान् मनुष्य विश्वास करेगा ? ॥२१॥ एक बात यह भी विचार करने योग्य है कि यदि वह ईश्वर कृतकृत्य है–सब कार्य पूर्ण कर कर चुका है–उसे अब कोई कार्य करना बाकी नहीं रह गया है तो उसे सृष्टि उत्पन्न करने की इच्छा ही कैसे होगी ? क्योंकि कृतकृत्य पुरुष को किसी प्रकार की इच्छा नहीं होती। यदि यह कहो कि वह अकृतकृत्य है तो फिर वह लोक को बनानेके लिए समर्थ नहीं हो सकता। जिस प्रकार अकृतकृत्य कुम्हार लोकको नहीं बना सकता ॥२२॥ एक बात यह भी है–कि आपका माना हुआ ईश्वर अमूर्तिक है निष्क्रिय है व्यापी है और विकार रहित है सो ऐसा ईश्वर कभी भी लोक को नहीं बना सकता क्योकि यह ऊपर लिख आये हैं कि अमूर्तिक ईश्वरसे मूर्तिक पदार्थों की रचना नहीं हो सकती। किसी कार्य को करनेके लिए हस्त पादादिके संचालन रूप कोई न कोई क्रिया अवश्य करना पड़ती है परन्तु आपने तो ईश्वर को निष्क्रिय माना है इसलिए वह लोक को नहीं बना सकता। यदि सक्रिय मानो तो वह असंभव है क्योंकि क्रिया उसीके हो सकती है जिसके कि अधिष्ठानसे कुछ क्षेत्र बाकी बचा हो परन्तु आपका ईश्वर तो सर्वत्र व्यापी है वह क्रिया किस प्रकार कर सकेगा ? इसके सिवाय ईश्वर को सृष्टि रचने की इच्छा भी नहीं हो सकती क्योंकि आपने ईश्वर को निर्विकार माना है। जिसकी आत्मामें राग द्वेष आदि विकार नहीं है उसके इच्छा का उत्पन्न होना असम्भव है ॥२३॥ जब कि ईश्वर कृतकृत्य है तथा धर्म अर्थ काम मोक्षमें किसी की चाह नहीं रखता तब सृष्टिके बनानेमें इसे क्या फल मिलेगा ? इस बात का भी तो विचार करना चाहिये, क्योंकि बिना प्रयोजन केवल स्वभावसे ही सृष्टि की की रचना करता है तो उसकी वह रचना निरर्थक सिद्ध होती है। यदि यह कहो कि उसकी यह क्रीड़ा ही है, क्रीडा मात्रसे ही जगत को बनाता है तब तो दुःखके साथ कहना पड़ेगा कि आपका ईश्वर बड़ा मोही है, बड़ा अज्ञानी है जो कि बालकोंके समान निष्प्रयोजन कार्य करता है ॥२५॥

---

१ ईश्वरवत् । जगत् । २ विनिर्मातुमिच्छा ।

कर्मापेक्षः शरीरादिर्देहिनां घटयेद्यदि । [1]नन्वेवमीश्वरो न स्यात् पारतन्त्र्यात्कुविन्दवत् ॥२६॥
निमित्तमात्रमिष्टश्चेत् कार्ये कर्मादिहेतुके । [2]सिद्धोपस्थाय्यसौ हन्त पोष्यते किमकारणम् ॥२७॥
वत्सलः प्राणिनामेकः सृजन्ननुजिघृक्षया[3] । ननु सौख्यमयीं सृष्टिं विदध्यादनुपप्लुताम् ॥२८॥
सृष्टिप्रयासवैयर्थ्यं[4] सर्जने जगतः सतः[5] । नात्यन्तमसतः सर्गो[6] युक्तो व्योमारविन्दवत् ॥२९॥
नोदासीनः सृजेन्मुक्तः संसारी [7]नाप्यनीश्वरः । सृष्टिवादावतारोऽयं [8]ततश्च न कुतश्च न ॥३०॥
महानधर्मयोगोऽस्य सृष्ट्वा संहरतः प्रजाः । दुष्टनिग्रहबुद्ध्या चेद् वरं दैत्याद्यसर्जनम् ॥३१॥
बुद्धिमद्धेतुसान्निध्ये तन्वाद्युत्पत्तुमर्हति[9] । [10]विशिष्टसंनिवेशादिप्रतीतेर्नगरादिवत् ॥३२॥

यदि यह कहो कि ईश्वर जीवोंके शरीरादिक उनके कर्मोंके अनुसार ही बनाता है अर्थात् जो जैसा कर्म करता है उसके वैसे ही शरीरादि की रचना करता है तो यह कहना भी ठीक नहीं है क्योंकि इस प्रकार मानने से आपका ईश्वर ईश्वर ही नहीं ठहरता। उसका कारण यह है कि वह कर्मों की अपेक्षा करने से जुलाहे की तरह परतन्त्र हो जायगा और परतन्त्र होने से ईश्वर नहीं रह सकेगा, क्योंकि जिस प्रकार जुलाहा सूत तथा अन्य उपकरणोंके परतन्त्र होता है तथा परतन्त्र होनेसे ईश्वर नहीं कहलाता इसी प्रकार आपका ईश्वर भी कर्मोंके परतन्त्र है तथा परतन्त्र होनेसे ईश्वर नहीं कहला सकता। ईश्वर तो सर्वतन्त्र स्वतन्त्र हुआ करता है ॥२६॥ यदि यह कहो कि जीवके कर्मोंके अनुसार सुख दुःखादि कार्य अपने आप होते रहते हैं ईश्वर उनमें निमित्त माना ही जाता है तो भी आपका यह कहना ठीक नहीं है, क्योंकि जब सुखदुःखादि कार्य कर्मों के अनुसार अपने आप सिद्ध हो जाते हैं तब खेद है कि आप व्यर्थ ही ईश्वर की पुष्टि करते हैं ॥२७॥ कदाचित् यह कहा जावे कि ईश्वर बड़ा प्रेमी है—दयालु है इसलिए वह जीवों का उपकार करनेके लिये ही सृष्टि की रचना करता है तो फिर उसे इस समस्त सृष्टि को सुख रूप तथा उपद्रव रहित ही बनाना चाहिये था। दयालु होकर भी सृष्टिके बहुभाग को दुखी क्यों बनाता है ? ॥२८॥ एक बात यह भी है कि सृष्टिके पहले जगत् था या नहीं ? यदि था तो फिर स्वतः सिद्ध वस्तुके रचनेमें उसने व्यर्थ परिश्रम क्यों किया ? और यदि नहीं था तो उसकी वह रचना क्या करेगा ? क्योंकि जो वस्तु आकाश कमलके समान सर्वथा असत् है उसकी कोई रचना नहीं कर सकता ॥२९॥ यदि सृष्टि का बनाने वाला ईश्वर मुक्त है—कर्म मल कलंकसे रहित है तो वह उदासीन—राग द्वेषसे रहित होनेके कारण जगत् की सृष्टि नही कर सकता। और यदि संसारी है—कर्ममल कलंकसे सहित है तो वह हमारे तुम्हारे समान ही ईश्वर नहीं कह लायगा तब सृष्टि किस प्रकार करेगा? इस तरह यह सृष्टि-वाद किसी भी प्रकार सिद्ध नहीं होता ॥३०॥ जरा इस बात का भी विचार कीजिये कि वह ईश्वर लोक को बनाता है इसलिए लोकके समस्त जीव उसकी सन्तानके समान हुए फिर वही ईश्वर सबका संहार भी करता है इसलिए उसे अपनी संतानके नष्ट करनेका भारी पाप लगता है। कदाचित् यह कहो कि दुष्ट जीवों का निग्रह करनेके लिए ही वह संहार करता है तो उससे अच्छा तो यही है कि वह दुष्ट जीवों को उत्पन्न ही नही करता ॥३१॥ यदि आप यह कहें—कि 'जीवोंके शरीरादि की उत्पत्ति किसी बुद्धिमान् कारण से ही हो

१ नत्वेव–अ०, ल०, । २ कार्ये निष्पन्ने सति प्राप्तः । ३ अनुगृहीतुमिच्छया । ४ व्यर्थत्वम् । ५ विद्यमानस्य । ६ सृष्टिः । ७–री सोऽप्यनीश्वरः अ०, प०, म०, द०, स०, ल० । ८ येन केन प्रकारेण नास्तीत्यर्थः । ९ उद्भवितुम । १० सन्निवेश रचना ।

इत्यसाधनमेवैतदीश्वरास्तित्वसाधने । विशिष्टसन्निवेशादेरन्यथाप्युपपत्तितः ॥३३॥
चेतनाधिष्ठितं हीदं[1] [2]कर्मनिर्मातृचेष्टितम् । नन्वक्षसुखदुःखादि [3]वैश्वरूप्याय कल्प्यते ॥३४॥
[4]निर्माणकर्मनिर्मातृकौशलापादितोदयम् । अङ्गोपाङ्गादिवैचित्र्यमङ्गिनां [5]संगिरावहे ॥३५॥
तदेतत्कर्यवैचित्र्याद् भवस्थानात्मकं जगत् । विश्वकर्माणमात्मानं साधयेत्कर्मसारथिम्[6] ॥३६॥
विधिः स्रष्टा विधाता च दैवं कर्म पुराकृतम् । ईश्वरश्चेति पर्याया विज्ञेयाः कर्मवेधसः ॥३७॥
स्रष्टारमन्तरेणापि व्योमादीनाञ्च [7]संगरात् । सृष्टिवादी स निर्ग्राह्यः शिष्टैर्दुर्मतदुर्मदी ॥३८॥
ततोऽसावकृतोऽनादिनिधनः कालतत्त्ववत् । लोको जीवादितत्त्वानामाधारात्मा प्रकाशते ॥३९॥
असृज्योऽयमसंहार्यः स्वभावनियतस्थितिः। अधस्तिर्यगुपर्याख्यैस्त्रिभिर्भेदैः समन्वितः ॥४०॥
वेत्रविष्टरझल्लर्यो मृदङ्गश्च यथाविधाः । संस्थानैस्तादृशान् प्राहुस्त्रींल्लोकाननुपूर्वशः ॥४१॥

सकती है क्योंकि उनकी रचना एक विशेष प्रकार की है। जिस प्रकार किसी ग्राम आदिकी रचना विशेष प्रकार की होती है अतः वह किसी बुद्धिमान् कारीगरका बनाया हुआ होता है उसी प्रकार जीवोंके शरीरादिककी रचना भी विशेष प्रकार की है अतः वे भी किसी बुद्धिमान् कर्ताके बनाये हुए हैं और वह बुद्धिमान् कर्ता ईश्वर ही है' ॥३२॥ परन्तु आपका यह हेतु ईश्वर का अस्तित्व सिद्ध करनेमें समर्थ नहीं क्योंकि विशेष रचना आदि की उत्पत्ति अन्य प्रकारसे भी हो सकती है ॥३३॥ इस संसारमें शरीर इन्द्रियां सुख दुख आदि जितने भी अनेक प्रकारके पदार्थ देखे जाते हैं उन सब की उत्पत्ति चेतन–आत्माके साथ सम्बन्ध रखने वाले कर्म रूपी विधाताके द्वारा ही होती है ॥३४॥ इसलिये हम प्रतिज्ञा पूर्वक कहते हैं कि संसारी जीवोंके अंग उपांग आदिमें जो विचित्रता पाई जाती है वह सब निर्माण नामक नामकर्म रूपी विधाता की कुशलतासे ही उत्पन्न होती है ॥३५॥ इन कर्मों की विचित्रतासे अनेक रूपता को प्राप्त हुआ यह लोक ही इस बात को सिद्ध कर देता है कि शरीर इन्द्रिय आदि अनेक रूप धारी संसार का कर्ता संसारी जीवों की आत्माएँ ही हैं और कर्म उनके सहायक हैं। अर्थात् ये संसारी जीव ही अपने कर्मके उदयसे प्रेरित हो कर शरीर आदि संसार की सृष्टि करते हैं ॥३६॥ विधि, सृष्टा, विधाता, दैव, पुराकृत कर्म और ईश्वर ये सब कर्म रूपी ईश्वरके पर्याय वाचक शब्द हैं इनके सिवाय और कोई लोक का बनाने वाला नहीं है ॥३७॥ जब कि ईश्वरवादी पुरुष आकाश काल आदि की सृष्टि ईश्वरके बिना ही मानते हैं तब उनका यह कहना कहाँ रहा कि संसार की सब वस्तुएँ ईश्वरके द्वारा ही बनाई गई हैं? इस प्रकार प्रतिज्ञा भंग होनेके कारण शिष्ट पुरुषों को चाहिये कि वे ऐसे सृष्टिवादी का निग्रह करें जो कि व्यर्थ ही मिथ्यात्वके उदयसे अपने दूषित मत का अहंकार करता है ॥३८॥ इसलिये मानना चाहिये कि यह लोक काल द्रव्य की भांति ही अकृत्रिम है अनादि निधन है–आदि अन्तसे रहित है और जीव अजीव आदि तत्त्वों का आधार होकर हमेशा प्रकाशमान रहता है ॥३९॥ न इसे कोई बना सकता है न इसका संहार कर सकता है यह हमेशा अपनी स्वाभाविक स्थितिमें विद्यमान रहता है तथा अधोलोक तिर्यक्लोक और ऊर्ध्व लोक इन तीन भेदोंसे सहित है ॥४०॥ वेत्रासन, झल्लरी और मृदंग का जैसा आकार होता है अधो लोक मध्य लोक और ऊर्ध्व लोक का भी ठीक वैसा ही आकार होता है। अर्थात् अधोलोक वेत्रासनके

१–तदेहं कर्म-म० । २ नाम कर्म । ३ सकलरूपत्वाय । वैश्वरूपाय अ०, स०, ल०, ट० । ४ निर्माणनामकर्म । ५ प्रतिज्ञां कुर्महे । ६ सहायम् । ७ अङ्गीकरात् ।

वैशाखस्थः कटीन्यस्तहस्तः स्याद्यादृशः पुमान् । तादृशं लोकसंस्थानमामनन्ति मनीषिणः ॥४२॥
अनन्तानन्तभेदस्य वियतो मध्यमाश्रितः । लोकस्त्रिभिर्वृतो वातैर्भाति शिक्यैरिवाततैः ॥४३॥
वातरज्जुभिरानद्धो लोकस्तिसृभिराशिखम् । पटत्रितयसंवीतसुप्रतिष्ठकसन्निभः ॥४४॥
तिर्यग्लोकस्य विस्तारं रज्जुमेकां प्रचक्षते । चतुर्दशगुणां प्राहू रज्जुं लोकोच्छ्रितिं बुधाः ॥४५॥
अधोमध्योर्ध्वमध्याग्रे लोकविष्कम्भरज्जवः । सप्तैका पञ्च चैका च यथाक्रममुदाहृताः ॥४६॥
द्वीपाब्धिभिरसंख्यातैर्द्विर्द्विर्विष्कम्भमाश्रितैः । विभाति वलयाकारैर्मध्यलोको विभूषितः ॥४७॥
मध्यमध्यास्य लोकस्य जम्बूद्वीपोऽस्ति मध्यगः । मेरुनाभिः सुवृत्तात्मा लवणाम्भोधिवेष्टितः ॥४८॥
सप्तभिः क्षेत्रविन्यासैः षड्भिश्च कुलपर्वतैः । प्रविभक्तः सरिद्भिश्च लक्षयोजनविस्तृतः ॥४९॥
स मेरुमौलिराभाति लवणोदधिमेखलः[२] । सर्वद्वीपसमुद्राणां जम्बूद्वीपोऽधिराजवत् ॥५०॥
इह जम्बूमति द्वीपे मेरोः[३]प्रत्यग्दिशाश्रितः । विषयो गन्धिलाभिख्यो भाति स्वर्गैकखण्डवत् ॥५१॥
पूर्वापरावधी तस्य [४]देवाद्रि[५]श्चोर्मिमालिनी । दक्षिणोत्तरपर्यन्तौ [६]सीतोदा [७]नील एव च ॥५२॥

समान नीचे विस्तृत और ऊपर सकड़ा है, मध्यम लोक झल्लरीके समान सब ओर फैला हुआ है और ऊर्ध्व लोक मृदंगके समान बीचमें चौड़ा तथा दोनों भागोंमें सकड़ा है ॥४१॥ अथवा दोनों पांव फैला कर और कमर पर दोनों हाथ रख कर खड़े हुए पुरुष का जैसा आकार होता है बुद्धिमान् पुरुष लोक का भी वैसा ही आकार मानते हैं ॥४२॥ यह लोक अनन्तानन्त आकाशके मध्यभाग में स्थित तथा घनोदधि घनवात औ तनुवात इन तीन प्रकारके विस्तृत वातवलयों से घिरा हुआ है और ऐसा मालूम होता है मानो अनेक रस्सियोंसे बना हुआ छींका ही हो ॥४३॥ नीचेसे लेकर ऊपर तक उपर्युक्त तीन वातवलयोंसे घिरा हुआ यह लोक ऐसा मालूम होता है मानो तीन कपड़ोंसे ढका हुआ सुप्रतिष्ठ (गौण) ही हो ॥४४॥ विद्वानोंने मध्यम लोक का विस्तार एक राजु कहा है तथा पूरे लोक की ऊँचाई उससे चौदह गुणी अर्थात् चौदह राजु कही है ॥४५॥ यह लोक अधो भागमें सात राजु, मध्य भागमें एक राजु, ऊर्ध्व लोकके मध्य भागमें पाँच राजु और सबसे ऊपर एक राजु चौड़ा है ॥४६॥ इस लोक के ठीक बीचमें मध्यम लोक है जो कि असंख्यात द्वीप समुद्रोंसे शोभायमान है। वे द्वीप समुद्र क्रम क्रमसे दूने दूने विस्तार वाले हैं तथा वलय के समान हैं। भावार्थ—जम्बू द्वीप थालीके समान तथा बाकी द्वीप समुद्र वलय के समान बीचमें खाली हैं ॥४७॥ इस मध्यम लोकके मध्य भागमें जम्बू द्वीप है। यह जम्बू द्वीप गोल है तथा लवण समुद्रसे घिरा हुआ है। इसके बीचमें नाभिके समान मेरु पर्वत है ॥४८॥ यह जम्बू द्वीप एक लाख योजन चौड़ा है तथा हिमवत् आदि छह कुलाचलों, भरत आदि सात क्षेत्रों और गङ्गा सिंधु आदि चौदह नदियोंसे विभक्त होकर अत्यन्त शोभायमान हो रहा है ॥४९॥ मेरु पर्वत रूपी मुकुट और लवण समुद्र रूपी करधनीसे युक्त यह जम्बू द्वीप ऐसा शोभायमान होता है मानो सब द्वीप-समुद्रों का राजा ही हो ॥५०॥ इसी जम्बूद्वीपमें मेरु पर्वतसे पश्चिम की ओर विदेह क्षेत्रमें एक गंधिल नामक देश है जो कि स्वर्गके टुकड़ेके समान शोभायमान है ॥५१॥ इस देश की पूर्व दिशामें मेरु पर्वत है पश्चिममें ऊर्मिमालिनी नाम की विभंग नदी है, दक्षिणमें सीतोदा नदी

---

१ द्विगुणद्विगुणविस्तारम्। २ कटीसूत्रः। ३ पश्चिमदिक्। ४ देवमाल इति वक्षागिरिः। ५ ऊर्मिमालिनी इति विभङ्गा नदी। ६ सीतोदा नदी। ७ नीलपर्वतः।

यत्र कर्ममलापायाद्विदेहा मुनयः सदा । [1]निर्वान्तीति गता रूढिं [2]विदेहाख्यार्थभागियम् ॥५३॥
नित्यप्रमुदिता यत्र[3] प्रजा नित्यकृतोत्सवाः। नित्यं सन्निहितैर्भोगैः सत्यं स्वर्गेऽप्यनादरः ॥५४॥
निसर्गसुभगा नार्यो निसर्गचतुरा नराः । निसर्गललितालापा बाला[4] यत्र गृहे गृहे ॥५५॥
[5]वैदग्ध्यम्चतुरैर्वेषैर्भूषणैश्च धनर्द्धयः । विलासैः यौवनारम्भाः [6]सूच्यन्ते यत्र देहिनाम् ॥५६॥
यत्र सत्पात्रदानेषु प्रीतिः पूजासु चार्हताम् । शक्तिरात्यन्तिकी[7] शीले प्रोषधे च रतिर्नृणाम् ॥५७॥
न यत्र परलिङ्गानामस्ति जातुचिदुद्भवः । सदोदयाज्जिनार्कस्य खद्योतानामिवाहनि ॥५८॥
यत्रारामाः सदा रम्यास्तरुभिः फलशालिभिः । पथिकानाह्वयन्तीव परपुष्टकलस्वनैः ॥५९॥
यस्य सीमविभागेषु शाल्यादिक्षेत्रसम्पदः । सदैव फलशालिन्यो भान्ति धर्म्या इव क्रियाः ॥६०॥
यत्र शालिवनोपान्ते खात्पतन्तीं शुकावलीम् । शालिगोप्योऽनुमन्यन्ते दधतीं [8]तोरणश्रियम् ॥६१॥

है और उत्तरमें नीलगिरि है ॥५२॥ यह देश विदेह क्षेत्रके अन्तर्गत है। वहाँसे मुनि लोग हमेशा कर्म रूपी मल को नष्ट कर विदेह (विगत देह)-शरीर रहित होते हुए निर्वाण को प्राप्त होते रहते हैं इसलिए उस क्षेत्र का विदेह नाम सार्थक और रूढि दोनों ही अवस्थाओं को प्राप्त है ॥५३॥ उस गंधिल देश की प्रजा हमेशा प्रसन्न रहती है तथा अनेक प्रकारके के उत्सव किया करती है, उसे हमेशा मनचाहे भोग प्राप्त होते रहते हैं इसलिये वह स्वर्ग को भी अच्छा नहीं समझती है ॥५४॥ उस देशके प्रत्येक घरमें स्वभावसे ही सुन्दर स्त्रियाँ हैं, स्वभावसे ही चतुर पुरुष हैं और स्वभावसे ही मधुर वचन बोलने वाले बालक हैं ॥५५॥ उस देशमें मनुष्यों की चतुराई उनके चतुराई पूर्ण वेषोसे प्रकट होती है। उनके आभूषणोंसे उनकी सम्पत्ति का ज्ञान होता है तथा भोग विलासोंसे उनके यौवन का प्रारम्भ सूचित होता है ॥५६। वहाँके मनुष्य उत्तम पात्रोंमें दान देने तथा देवाधिदेव अरहंत भगवान् की पूजा करने हीमें प्रेम रखते हैं। वे लोग शीलकी रक्षा करनेमें ही अपनी अत्यन्त शक्ति दिखलाते हैं और प्रोषधोपवास धारण करनेमें ही रुचि रखते हैं।

भावार्थ—यह परिसंख्या अलंकार है। परिसंख्याका संक्षिप्त अर्थ नियम है। इसलिए इस श्लोकका भाव यह हुआ कि वहाँके मनुष्योंकी प्रीति पात्र दान आदिमें ही थी विषयवासनाओंमें नहीं थी, उनकी शक्ति शील व्रतकी रक्षाके लिए ही थी निर्बलोंको पीड़ित करनेके लिए नहीं थी और उनकी रुचि प्रोषधोपवास धारण करनेमें ही थी वेश्या आदि विषयके साधनोंमें नहीं थी ॥५७॥

उस गंधिल देशमें श्री जिनेन्द्र रूपी सूर्यका उदय रहता है इसलिए वहाँ मिथ्यादृष्टियों का उद्भव कभी नहीं होता जैसे कि दिनमें सूर्यका उदय रहते हुए जुगुनुओंका उद्भव नहीं होता ॥५८॥ उस देशके बाग फलशाली वृक्षोंसे हमेशा शोभायमान रहते हैं तथा उनमें जो कोकिलाएँ मनोहर शब्द करती हैं उनसे ऐसा जान पड़ता है मानों वे बाग उन शब्दोंके द्वारा पथिकों को बुला ही रहे हैं ॥ ५९॥ उस देशके सीमा प्रदेशोंपर हमेशा फलोंसे शोभायमान धान आदि के खेत ऐसे मालूम होते हैं मानो स्वर्गादि फलोंसे शोभायमान धार्मिक क्रियाएँ ही हों। ६०॥ उस देशमें धानके खेतोंके समीप आकाशसे जो तोताओं की पंक्ति नीचे उतरती है उसे खेती

---

१ मुक्ता भवन्ति । २ विदेहाख्यार्थतामियम् स०, द०। विदेहान्वर्थभागियम् म० । विदेहान्वर्थभागयम् प० । ३ देशे । ४ बालकाः । ५ अयं श्लोकः 'म' पुस्तके नास्ति । ६ अनुमीयन्ते ज्ञायन्ते । ७ अन्तातिक्रान्तम् अत्यन्तम् अत्यन्ते भवा आत्यन्तिकी । ८ मरकतरत्नम् ।

मन्दगन्धवहाधूताः [1]शालिवप्राः फलानताः । [2]कृतसंराविणो यत्र [3]छोत्कुर्वन्तीव पक्षिणः ॥६२॥
यत्र पुण्ड्रेक्षुवाटेषु यन्त्रचीत्कारहारिषु । पिबन्ति पथिका स्वैरं रसं [4]सुरसमैक्षवम् ॥६३॥
यत्र कुक्कुटसंपात्या[5] ग्रामाः संसक्तसीमकाः । सीमानः सस्यसंपन्ना [6]निःफलाञ्चिफलोदयाः[7] ॥६४॥
कलासमाप्तिषु प्रायः [8]कलान्तरपरिग्रहः । [9]गुणाधिरोपणौद्धत्यं यत्र चापेषु धन्विनाम् ॥६५॥
मुनीनां यत्र शैथिल्यं गात्रेषु न समाधिषु । निग्रहः करणग्रामे [10]भूतग्रामे न जातुचित् ॥६६॥
[11]कुलायेषु शकुन्तानां यत्रोद्वासध्वनिः[12] स्थितः । [13]वर्णसङ्करवृत्तान्तश्चित्रादन्यत्र न क्वचित् ॥६७॥
यत्र भङ्गस्तरङ्गेषु गजेषु मदविक्रिया[14] । दण्डपारुष्यमब्जेषु सरस्सु [15]जलसंग्रहः ॥६८॥

की रक्षा करने वाली गोपिकाएँ ऐसा मानती हैं मानो हरे हरे मणियों का बना हुआ तोरण ही उतर रहा हो ॥ ६१ ॥ मन्द मन्द हवासे हिलते हुए फूलोंके बोझसे झुके हुए वायुके आघातसे शब्द करते हुए वहाँके धानके खेत ऐसे मालूम होते हैं मानो पक्षियोंको ही उड़ा रहे हों ॥६२॥ उस देशमें पथिक लोग यन्त्रोंके चीं चीं शब्दोंसे शोभायमान पौड़ों तथा ईखोंके खेतोंमें जाकर अपनी इच्छानुसार ईख का मीठा मीठा रस पीते हैं ॥६३॥ उस देशके गांव इतने समीप बसे हुए हैं कि मुर्गा एक गाँवसे दूसरे गाँव तक सुखपूर्वक उड़ कर जा सकता है, उनकी सीमाएँ परस्पर मिली हुई हैं तथा सीमाएँ भी धानके ऐसे खेतोंसे शोभायमान हैं जो थोड़े ही परिश्रमसे फल जाते हैं ॥६४॥ उस देशके लोग जब एक कलाको अच्छी तरह सीख चुकते हैं तभी दूसरी कलाओं का सीखना प्रारम्भ करते हैं अर्थात् वहाँके मनुष्य हर एक विषय का पूर्ण ज्ञान प्राप्त करने का उद्योग करते हैं तथा उस देशमें गुणाधिरोपणौद्धत्य—गुण न रहते हुए भी अपने आप को गुणी बताने की उद्दण्डता नहीं है ॥६५॥ उस देशमें यदि मुनियोंमें शिथिलता है तो शरीरमें ही है अर्थात् लगातार उपवासादिके करने से उनका शरीर ही शिथिल हुआ है समाधि—ध्यान आदिमें नहीं है। इसके सिवाय निग्रह (दमन) यदि है तो इन्द्रियसमूहमें ही है अर्थात् इन्द्रियोंकी विषय प्रवृत्ति रोकी जाती है प्राणिसमूहमें कभी निग्रह नहीं होता अर्थात् प्राणियों का कोई घात नहीं करता ॥६६॥ उस देशमें उद्वासध्वनि (कोलाहल) पक्षियोंके घोंसलोंमें ही है अन्यत्र उद्वासध्वनि—(परदेश गमन सूचक शब्द) नहीं है। तथा वर्णसंकरता (अनेक रंगों का मेल) चित्रोंके सिवाय और कहीं नहीं है—वहाँके मनुष्य वर्णसंकर—व्यभिचारजात नहीं है ॥ ६७ ॥ उस देशमें यदि भंग शब्दका प्रयोग होता है तो तरंगोंमें ही (भंग नाम तरंग—लहर का है) होता है वहाँके मनुष्योंमें कभी भंग (विनाश) नहीं होता। मद—तरुण हाथियोंके गण्डस्थलसे झरने वाला तरल पदार्थ—का विकार हाथियोंमें होता है

---

१ क्षेत्राणि । २ समन्तात् कृतशब्दाः । ३ उड्डापयन्तीव । ४ सुस्वादुम् । ५ सम्पतितुं योग्या । ६ —लाङ्गिफलो—स० । ७ फलं निरीशमश्नतीति फलाश्नी स चासौ फलोदयश्च तस्मान्निष्क्रान्ता इति । अकृष्टपच्या इत्यर्थः । "अथो फलम् । निरीशं कुटकं फालः कृषिको लाङ्गलं हलम्" इत्यमरः । फलमिति लांगलाग्रस्थायोविशेषः । ८ कलाविशेषः कालान्तरस्वीकारश्च "कला शिल्पे कालभेदेऽपि" इत्यभिधानात् । ९ गुणस्य मौर्व्या अधिरोपणे आद्धत्यं गर्वः पक्षे गुणाः शौर्यादयः । १० भूतः जीवः । ११ पक्षिगृहेषु "कुलायो नीडमस्त्रियाम्" इत्यभिधानात् । कलापेषु अ० । १२ हिंसनशब्दः । "उद्वासनप्रमथनकथनोज्जासनानि च" इत्यभिधानात्; पक्षिध्वनिश्च, अथवा शून्यमिति शब्दश्च अप्रावासश्च । १३ वर्णसंकरवृत्तान्तः इति पाठे सुगमम्, अथवा वर्णसंस्कारवृत्तान्तः इत्यत्र वर्णश्च संस्कारश्च वृत्तं च इति वर्णसंस्कारवृत्तानि तेषामन्तो नाशः, पक्षे वर्णस्य संस्कारस्तस्य वृत्तान्तो वार्ता । १४ विकारः । १५ पक्षे जलसंग्रहः ।

[1]स्वर्गावाससमाः पुर्यो [2]निगमाः [3]कुरुसन्निभाः । विमानस्पर्द्धिनो गेहाः प्रजा यत्र सुरोपमाः ॥६९॥
दिग्नागस्पर्द्धिनो नागा [4]नार्यो दिक्कन्यकोपमाः । दिक्पाला इव भूपाला यत्राविष्कृतदिग्जयाः ॥७०॥
[5]जनतापच्छिदो यत्र वाप्यः स्वच्छाम्बुसंभृताः । भान्ति तीरतरुच्छायानिरुद्धोष्णा [6]बहुप्रपाः ॥७१॥
यत्र [7]कूपतटाकाद्याः कामं सन्तु [8]जलाशयाः । तथापि जनतातापं हरन्ति रसवत्तया ॥७२॥
[9]विपङ्का ग्राहवत्यश्च स्वच्छाः कुटिलवृत्तयः । अलङ्घ्याः सर्वभोग्याश्च विचित्रा यत्र निम्नगाः ॥७३॥

वहाँके मनुष्योंमें मद अहंकार का विकार नहीं होता है। दण्ड (कमलपुष्पके भीतर का वह भाग जिसमें कि कमलगट्टा लगता है) की कठोरता कमलोंमें ही है वहाँके मनुष्योंमें दण्डपारुष्य नहीं है– उन्हें कड़ी सजा नहीं दी जाती। तथा जल का संग्रह तालाबोंमें ही होता है वहाँके मनुष्योंमें जल संग्रह (ड और ल में अभेद होनेके कारण जड़ संग्रह–मूर्ख मनुष्यों का संग्रह) नहीं होता ॥६८॥ उस देश के नगर स्वर्ग के समान हैं, गाँव देवकुरु-उत्तर-कुरु भोगभूमिके समान हैं, घर स्वर्गके विमानोंके साथ स्पर्धा करनेवाले हैं और मनुष्य देवों के समान हैं ॥६९॥ उस देशके हाथी ऐरावत आदि दिग्गजोंके साथ स्पर्धा करनेवाले हैं, स्त्रियाँ दिक्कुमारियोंके समान हैं और दिग्विजय करनेवाले राजा दिक्पालोंके समान हैं ॥७०॥ उस देश में मनुष्यों का सन्ताप दूर करनेवाली तथा स्वच्छ जल से भरी हुई अनेक बावड़ी शोभायमान हो रही हैं। किनारे पर लगे हुए वृक्षों की छाया से उन बावड़ियों में गर्मी का प्रवेश बिलकुल ही नहीं हो पाता है तथा अनेक जन उनका पानी पीते हैं ॥७१॥ उस देश के कुँआ तालाब आदि भले ही जलाशय (मूर्ख पक्षमें जड़तासे युक्त) हों तथापि वे अपनी रसवत्तासे–मधुर जलसे लोगोंका सन्ताप दूर करते हैं ॥७२॥ उस देशकी नदियाँ ठीक वेश्याओं के समान शोभायमान होती हैं। क्योंकि वेश्याएँ जैसे विपङ्का अर्थात् रजोधर्मसे रहित होती हैं उसी प्रकार नदियाँ भी विपङ्का अर्थात् कीचड़ रहित हैं। वेश्याएँ जैसे ग्राहवती–धन सञ्चय करनेवाली होती हैं उसी तरह नदियाँ भी ग्राहवती–मगर मच्छोंसे भरी हुई हैं। वेश्याएँ जैसे ऊपर से स्वच्छ होती हैं उसी प्रकार नदियाँ भी स्वच्छ साफ हैं। वेश्याएँ जैसे कुटिल-वृत्ति–मायाचारिणी होती हैं उसी तरह नदियाँ भी कुटिलवृत्ति–टेढ़ी बहनेवाली हैं। वेश्याएँ जैसे अलंघ्य होती हैं–विषयी मनुष्यों द्वारा वशीभूत नहीं होती हैं उसी प्रकार नदियाँ भी अलंघ्य हैं–गहरी होने के कारण तैर कर पार करने योग्य नहीं है। वेश्याएँ जैसे सर्व-भोग्या–ऊँच नीच सभी मनुष्यों के द्वारा भोग्य होती हैं उसी प्रकार नदियाँ भी सर्वभोग्य–पशु पक्षी मनुष्य आदि सभी जीवों के द्वारा भोग्य हैं। वेश्याएँ जैसे विचित्रा–अनेक वर्ण की होती हैं उसी प्रकार नदियाँ भी अनेकवर्ण–अनेक रंगकी है और वेश्याएँ जैसे निम्नगा–नीच पुरुषोंकी की ओर जाती है उसी प्रकार नदियाँ भी निम्नगा–ढालू जमीन की ओर जाती हैं ॥७३॥

---

१ स्वर्गभूमिः। २ वणिक्पथाः। "वेदनगरवणिक्पथेषु निगमः" इत्यभिधानात्। ३ कुरुः उत्तम-भोगभूमिः। ४ नागा कन्या दिक्– म०। ५ अयं श्लोको 'म' पुस्तके नास्ति। ६ पानीयशालिका-सदृशाः। सुरः प्राग्बहुर्वेति पदपरिसमाप्त्यर्थो सुरः प्राक् बहुप्रत्ययो भवति। ७ –तडागाद्याः अ०। ८ धाराः जडबुद्धय इति ध्वनिः। ९ चित्रार्थपक्षे ग्राहशब्दः स्वीकारार्थः। तथाहि पङ्कयुक्तानामियं स्वनिक्षिप्तस्य ग्राहः स्वीकारो घटते एता नद्यस्तु विपङ्का अपि ग्राहवत्य इति चित्रम्, उत्तरत्र चित्रार्थः सुगमः, अथवा विपङ्का निष्पापाः ग्राहवत्यः स्वीकारवत्य इति विरोधः। विचित्राः नानास्वभावाः।

[1]सरसां तीरदेशेषु रुतं हंसा विकुर्वते । यत्र कण्ठबिलालग्नमृणालशकलाकुलाः ॥७४॥
वनेषु वनमातङ्गा मदमीलितलोचनाः । भ्रमन्त्यविरतं यस्मिन्नाह्वातुमिव[2] दिग्गजान् ॥७५॥
यत्र शृङ्गाग्रसंलग्नकर्दमा दुर्दमा भृशम् । उत्खनन्ति वृषा दृप्ताः[3] स्थलेषु स्थलपद्मिनीम् ॥७६॥
जैनालयेषु सङ्गीतपटहाम्भोदनिस्स्वनैः । यत्र नृत्यन्त्यकालेऽपि शिखिनः [4]प्रोन्मदिष्णवः ॥७७॥
गवां गणा यथाकालमात्तगर्भाः कृतस्वनाः । पोषयन्ति पयोभिः स्वैर्जनं यत्र घनैः समाः ॥७८॥
बलाकालिपताकाढ्याः स्तनिता मन्द्रबृंहिताः । जीमूता यत्र वर्षन्तो भान्ति मत्ता इव द्विपाः ॥७९॥
न स्पृशन्ति करावाधा यत्र राजन्वतीः प्रजाः । सदा सुकालसांनिध्यान्नेतयो नाप्यनीतयः ॥८०॥
विषयस्यास्य मध्येऽस्ति विजयार्द्धो महाचलः । रौप्यः स्वैरांशुभिः शुभ्रैर्हसन्निव कुलाचलान्[5] ॥८१॥
यो योजनानां पञ्चाग्रां विंशतिं धरणीतलात् । उच्छ्रितः शिखरैस्तुङ्गैर्दिवं स्प्रष्टुमिवोद्यतः ॥८२॥
[6]द्विस्तौङ्ग्याद्विस्तृतो मूलात् प्रभृत्यादशयोजनम् । मध्ये त्रिंशत्पृथुर्योऽग्रे दशयोजनविस्तृतिः ॥८३॥
उच्छ्रायस्य तुरीयांशमवगाढश्च यः क्षितौ । गन्धिलादेशविष्कम्भमानदण्ड इवायतः ॥८४॥

उस देशमें तालाबोंके किनारे कण्ठमें मृणालका टुकड़ा लग जानेसे व्याकुल हुए हंस अनेक प्रकारके मनोहर शब्द करते हैं ॥७४॥ उस देशके वनोंमें मदसे निमीलित नेत्र हुए जंगली हाथी निरन्तर इस प्रकार घूमते हैं मानो दिग्गजोंको ही बुला रहे हों ॥७५॥ जिनके सींगोंकी नोकपर कीचड़ लगी हुई तथा जो बड़ी कठिनाईसे वशमें किए जा सकते हैं ऐसे गर्वीले बैल उस देशके खेतोंमें स्थल कमलिनियोंको उखाड़ा करते हैं ॥७६॥ उस देशके जिनमन्दिरोंमें संगीतके समय जो तबला बजाते हैं, उनके शब्दोंको मेघका शब्द समझकर हर्षसे उन्मत्त हुए मयूर असमयमें ही-वर्षा ऋतुके बिना ही नृत्य करते रहते हैं ॥७७॥ उस देशकी गायें यथासमय गर्भ धारण कर मनोहर शब्द करती हुई अपने पय-दूधसे सबका पोषण करती हैं, इसलिए वे मेघके समान शोभायमान होती हैं क्योंकि मेघ भी यथासमय जलरूप गर्भको धारण कर मनोहर गर्जना करते हुए अपने पय-जलसे सबका पोषण करते हैं ॥७८॥ उस देशमें बरसते हुए मेघ मदोन्मत्त हाथियों के समान शोभायमान होते हैं। क्योंकि हाथी जिस प्रकार पताकाओंके सहित होते हैं उसी प्रकार मेघ भी बलाकाओंकी पंक्तियोंसे सहित हैं, हाथी जिस प्रकार गम्भीर गर्जना करते हैं उसी प्रकार मेघ भी गम्भीर गर्जना करते हैं और हाथी जैसे मद बरसाते हैं वैसे ही मेघ भी पानी बरसाते हैं ॥७९॥ उस देशमें सुयोग्य राजाकी प्रजाको कर (टैक्स) की बाधा कभी छू भी नहीं पाती तथा हमेशा सुकाल रहनेसे वहाँ न अतिवृष्टि आदि ईतियाँ हैं और न किसी प्रकारकी अनीतियाँ ही हैं ॥८०॥ ऐसे इस गन्धिल देशके मध्य भागमें एक विजयार्ध नामका बड़ा भारी पर्वत है जो चाँदीमय है। तथा अपनी सफेद किरणोंसे कुलाचल पर्वतोंकी हँसी करता हुआ सा मालूम होता है ॥८१॥ वह विजयार्ध पर्वत के समान धरातल से पच्चीस योजन ऊँचा है और ऊँची शिखरोंसे ऐसा मालूम होता है मानो स्वर्गलोकका स्पर्श करनेके लिए ही उद्यत हो ॥८२॥ वह पर्वत मूलसे लेकर दस योजनकी ऊँचाई तक पचास योजन, बीचमें तीस योजन और ऊपर दस योजन चौड़ा है ॥८३॥ वह पर्वत ऊँचाईका

---

१ अस्य श्लोकस्य पूर्वार्धोत्तरार्द्धयोः क्रमव्यत्ययो जातः 'म०' पुस्तके। २ स्पर्धां कर्तुम्। ३ दर्पाविष्टाः। ४ प्रोन्माद्यन्ति इत्येवंशीलाः। भूष्णुभ्राजवइचरक्षापत्रपालङ्कृंदनिराकृत्प्रजनोत्पचोत्पतोन्मादिष्णुरिति सूत्रेण उत्पूर्वान्मदादेर्धातो ताच्छील्ये ष्णुच् प्रत्ययो भवति। ५ कुलाचलम् स०, ल०। ६ द्वौ वारौ द्विः, द्विस्तौङ्ग्याद् विस्तृतो मूलात्प्रभृत्यादशयोजनम्। मूलादारभ्य दशयोजनपर्यन्तं तुङ्गत्वात् पञ्चविंशतियोजनप्रमिताद् द्विवारं विस्तृतः पञ्चाशत्योजनप्रमितविस्तार इत्यर्थः।

दशयोजनविस्तीर्णश्रेणीद्वयसमाश्रयान् । यो धत्ते खेचरावासान् [1]सुरवेश्मापहासिनः ॥८५॥
[2]खेचरीजनसञ्चारसंक्रान्तपदयावकैः[3] । रक्ताम्बुजोपहारश्रीर्यत्र नित्यं वितन्यते ॥८६॥
अभेद्यशक्तिरक्षय्यः[4] [5]सिद्धविद्यैरुपासितः[6] । दधदात्यन्तिकीं[7] शुद्धिं सिद्धात्मेव विभाति यः[8] ॥८७॥
योऽनादिकालसम्बन्धिशुद्धिशक्तिसमन्वयात् । भव्यात्मनिर्विशेषोऽपि[9] दीक्षायोगपराङ्मुखः ॥८८॥
विद्याधरैः सदाराध्यो निर्मलात्मा [10]सनातनः । [11]सुनिश्चितप्रमाणो यो धत्ते जैनागमस्थितिम् ॥८९॥
भजन्त्येकाकिनो नित्यं [12]वीतसंसारभीतयः । प्रवृद्धनखरा [13]धीरा यं सिंहा इव चारणाः ॥९०॥

एक चतुर्थांश भाग अर्थात् सवा छह योजन जमीनके भीतर प्रविष्ट है तथा गन्धिला देशकी चौड़ाईके बराबर लम्बा है जिससे ऐसा जान पड़ता है मानो उस देशको नापनेका मापदण्ड ही हो ॥८४॥ उस पर्वतके ऊपर दश-दश योजन चौड़ी दो श्रेणियाँ हैं जो उत्तर श्रेणि और दक्षिण श्रेणिके नामसे प्रसिद्ध हैं। उनपर विद्याधरोंके निवासस्थान बने हैं जो अपने सौन्दर्य से देवोंके विमानोंका भी उपहास करते हैं ॥८५॥ विद्याधर स्त्रियोंके इधर-उधर घूमनेसे उनके पैरोंका जो महावर उस पर्वतपर लग जाता है उससे वह ऐसा शोभायमान होता है मानो उसे हमेशा लाल-लाल कमलोंका उपहार ही दिया जाता हो ॥८६॥ उस पर्वतकी शक्तिको कोई भेदन नहीं कर सकता, वह अविनाशी है, अनेक विद्याधर उसकी उपासना करते हैं तथा स्वयं अत्यन्त निर्मलताको धारण किये हुए है, इसलिए सिद्ध परमेष्ठीकी आत्माके समान शोभायमान होता है क्योंकि सिद्ध परमेष्ठीकी आत्मा भी अभेद्य शक्तिकी धारक है, अविनाशी है, सम्यग्ज्ञानी जीवोंके द्वारा सेवित है और कर्ममल कलंकसे रहित होनेके कारण स्थायी विशुद्धताको धारण करती है—अत्यन्त निर्मल है ॥८७॥ अथवा वह पर्वत भव्यजीवके समान है क्योंकि जिस प्रकार भव्य जीव अनादिकालसे शुद्धि अर्थात् सम्यग्दर्शन सम्यग्ज्ञान और सम्यक् चारित्रके द्वारा प्राप्त होने योग्य निर्मलताकी शक्तिको धारण करता है, उसी प्रकार वह पर्वत भी अनादि कालसे शुद्धि अर्थात् निर्मलताकी शक्तिको धारण करता है। अन्तर केवल इतना ही है कि पर्वत दीक्षा धारण नहीं कर सकता जब कि भव्य जीव दीक्षा धारण कर तपस्या कर सकता है ॥८८॥ वह पर्वत हमेशा विद्याधरोंके द्वारा आराध्य है—विद्याधर उसकी सेवा करते हैं, स्वयं निर्मल रूप है, सनातन है—अनादिसे चला आया है और सुनिश्चित प्रमाण है—लम्बाई चौड़ाई आदिके निश्चित प्रमाणसे सहित है, इसलिए ठीक जैनागमकी स्थितिको धारण करता है, क्योंकि जैनागम भी विद्याधरोंके द्वारा—सम्यग्ज्ञानके धारक विद्वान् पुरुषोंके द्वारा आराध्य हैं—बड़े-बड़े विद्वान् उसका ध्यान अध्ययन आदि करते हैं, निर्मल रूप है—पूर्वापर विरोध आदि दोषोंसे रहित है, सनातन है—द्रव्य दृष्टिकी अपेक्षा अनादिसे चला आया है और सुनिश्चित प्रमाण है—युक्तिसिद्ध प्रत्यक्ष परोक्ष प्रमाणोंसे प्रसिद्ध है ॥८९॥ उस पर्वतपर चारण ऋद्धिके धारक मुनि हमेशा सिंहके समान विहार करते रहते हैं क्योंकि जिस प्रकार सिंह अकेला होता है उसी प्रकार वे मुनि भी एकाकी (अकेले) रहते हैं, सिंहको जैसे इधर उधर घूमने का भय नहीं रहता वैसे ही उन मुनियोंको भी इधर उधर घूमने अथवा चतुर्गति रूप

१—वेश्मोप—द०, स०, ल०। २ खचरी—प०, म०, द०। ३ अलक्तकैः। ४ न क्षीयत इत्यक्षय्यः। ५ विद्याधरैः, पक्षे सम्यग्ज्ञानिभिः। ६ आराधितः। ७ अत्यन्ते भवा आत्यन्तिकी। ८ शुद्धित्वेन शक्तिः तस्याः सम्बन्धात्। उक्तं च भव्यपक्षे—"शुद्ध्यशुद्धी पुनः शक्तीस्ते पाक्यापाक्यशक्तिवदिति" पर्वतपक्षे सुगमम्। ९ सदृशः। १० नित्यः। ११ पक्षे सुनिश्चितानि प्रत्यक्षादिप्रमाणानि यस्मिन्। १२ पक्षे सम्भ्रमणम्। १३ मनीषिणः।

यो वितत्य[1] पृथुश्रेणीद्वयं पक्षद्वयोपमम् । [2]समुत्पित्सुरिवाभाति नाकलक्ष्मीदिदृक्षया ॥९१॥
यस्य सानुषु रम्येषु किन्नराः सुरपन्नगाः । रंरम्यमाणाः सुचिरं विस्मरन्ति निजालयान् ॥९२॥
यदीया राजतीर्भित्तीः शरन्मेघावलीश्रिता । [3]व्यज्यते शीकरासारैः स्तनितैश्चलितैरपि[4] ॥९३॥
यस्तुङ्गैः शिखरैर्धत्ते देवावासान्स्फुरन्मणीन् । चूडामणीनिवोदग्रान् सिद्धायतनपूर्वकान् ॥९४॥
दधात्युच्चैः स्वकूटानि मुकुटानीव [5]भूमिभृत् । परार्ध्यरत्नचित्राणि यः श्लाघ्यानि सुरासुरैः ॥९५॥
गुहाद्वयञ्च यो धत्ते स्फुरद्वज्रकवाटकम्[6] । स्वसारधननिक्षेपमहादुर्गमिवायतम् ॥९६॥
उत्सङ्गादेत्य नीलाद्रेर्गङ्गासिन्धू महापगे । विशुद्धत्वादलङ्घ्यस्य यस्य पादान्तमाश्रिते ॥९७॥
यस्तटोपान्तसं[7]रूढवनराजीपरिष्कृतः । नीलाम्बरधरस्योच्चैर्धत्ते लाङ्गलिनः श्रियम् ॥९८॥
वनवेदीं समुत्तुङ्गां यो बिभर्त्यभितो[8]वनम् । रामणीयकसीमानमिव केनापि निर्मिताम् ॥९९॥
सञ्चरत्खचरीपादनूपुरारावकर्षकः[9] । यत्र गन्धवहो वाति मन्दं [10]मन्दारवीथिषु ॥१००॥
यः पूर्वापरकोटीभ्यां दिक्तटानि विघट्टयन् । स्वगतं वक्ति माहात्म्यं [11]जगद्गुरुभरक्षमम् ॥१०१॥

संसारका भय नहीं होता, सिंहके नख जैसे बड़े होते हैं उसी प्रकार दीर्घ तपस्याके कारण उन मुनियोंके नख भी बड़े होते हैं और सिंह जिस प्रकार धीर होता है उसी प्रकार वे मुनि भी अत्यन्त धीर वीर हैं ॥९०॥ वह पर्वत अपनी दोनों श्रेणियोंसे ऐसा मालूम होता है मानो दोनों पंखे फैलाकर स्वर्गलोककी शोभा देखनेकी इच्छासे उड़ना ही चाहता हो ॥९१॥ उस पर्वतकी मनोहर शिखरोंपर किन्नर और नागकुमार जातिके देव चिरकाल तक क्रीड़ा करते-करते अपने घरोंको भी भूल जाते हैं ॥९२॥ उस पर्वतकी रजतमयी सफेद दीवालोंपर आश्रय लेनेवाले शरदृऋतुके श्वेत बादलोंका पता लोगोंको तब होता है जब कि वे छोटी-छोटी बूँदोंसे बरषते हैं, गरजते हैं और इधर उधर चलने लगते हैं ॥९३॥ वह पर्वत अपने ऊँचे-ऊँचे शिखरों द्वारा देवोंके अनेक आवासोंको धारण करता है । वे आवास चमकीले मणियोंसे युक्त हैं और उस पर्वतके चूणामणिके समान मालूम होते हैं । उन शिखरोंपर अनेक सिद्धायतन (जैन मन्दिर) भी बने हुए हैं ॥९४॥ वह विजयार्धपर्वत रूपी राजा मुकुटोंके समान अत्यन्त ऊँचे कूटोंको धारण करता है । वे मुकुट अथवा कूट महामूल्य रत्नोंसे चित्रविचित्र हो रहे हैं तथा सुर और असुर उनकी प्रशंसा करते हैं ॥९५॥ वह पर्वत देदीप्यमान वज्रमय कपाटोंसे युक्त दरवाजों को धारण करता है जिससे ऐसा मालूम होता है मानो अपने सारभूत धनको रखनेके लिए लम्बे-चौड़े महादुर्ग—किलेको ही धारण कर रहा हो ॥९६॥ वह पर्वत अत्यन्त विशुद्ध और अलङ्घ्य है इसलिए ही मानो गङ्गा सिन्धु नामकी महानदियोंने नीलगिरिकी गोदसे (मध्य भागसे) आकर उसके पादों—चरणों—अथवा समीपवर्ती शाखाओंका आश्रय लिया है ॥९७॥ वह पर्वत तटके समीप खड़े हुए अनेक वनोंसे शोभायमान है इसलिए नीलवस्त्रको पहिने हुए बलभद्रकी उत्कृष्ट शोभाको धारण कर रहा है ॥९८॥ वह पर्वत वनके चारों ओर बनी हुई ऊँची वनवेदीको धारण किए हुए है जिससे ऐसा मालूम होता है मानो किसीके द्वारा बनाई गई सुन्दर सीमा अथवा सौन्दर्यकी अवधिको ही धारण कर रहा हो ॥९९॥ उस पर्वतपर कल्पवृक्षोंके मध्य मार्गमें सुगन्धित वायु हमेशा धीरे-धीरे बहता रहता है उस वायुमें इधर-उधर घूमनेवाली विद्याधरियोंके नूपुरोंका मनोहर शब्द भी मिला होता है ॥१००॥ वह पर्वत अपनी पूर्व और

१ विस्तारं कृत्वा । २ समुत्पतितुमिच्छुः । ३ प्रकटीक्रियते । ४ चलनैः । ५ राजा । ६ कपाटकम् अ०, द०,स०,प०,ल० । ७ समुत्पन्न । ८ वनस्य अभितः । ९ आकर्षकः । १० कल्पवृक्षः । ११ जगती महाभरक्षमम् ।

[1]अनायतो [2]यदि व्योम्नि व्यवर्धिष्यत हेलया । तदा जगत्कुटीमध्ये [3]सममास्यत्क्व सोऽचलः ॥१०२॥
सोऽचलस्तुङ्गवृत्तित्वाद्विशुद्ध[4]त्वान्महोच्छ्रयैः । कुलाचलैरिव स्पर्धां शिखरैः कर्तुमुद्यतः ॥१०३॥
[5]तस्यास्त्युत्तरतः[6] श्रेण्यामलकेति परा पुरी । सालकैः [7]खचरीवक्त्रैः साकं हसति या विधुम् ॥१०४॥
सा तस्यां नगरी भाति श्रेण्यां प्राप्तमहोदया । शिलायां पाण्डुकाख्यायां जैनीवाभिषवक्रिया ॥१०५॥
महत्यां [8]शब्दविद्यायां प्रक्रियेवातिविस्तृता । भगवद्दिव्यभाषायां नानाभाषात्मतेव या ॥१०६॥
या धत्ते सालमुत्तुङ्गगोपुरद्वारमुच्छ्रितम् । वेदिकावलयं प्रान्ते जम्बूद्वीपस्थली यथा ॥१०७॥
यत्खातिका भ्रमद्भृङ्गरुचिराञ्जनरञ्जितैः । पयोजनेत्रैराभाति [9]वीक्षमाणेव खेचरान् ॥१०८॥
शोभायै केवलं यस्याः सालः [10]सपरिखावृतिः । तत्पालखगभूपालभुजरक्षाधृताः प्रजाः ॥१०९॥
यस्याः सौधावलीशृङ्गसङ्गिनी केतुमालिका । कैलासकूटनिपतद्धंसमालां विलङ्घते ॥११०॥
गृहेषु दीर्घिका [11]यस्यां कलहंसविकूजितैः । [12]मानसं व्याहसन्तीव प्रफुल्लाम्भोरुहश्रियः ॥१११॥

पश्चिमकी कोटियोंसे दिशाओंके किनारोंका मर्दन करता हुआ ऐसा मालूम होता है मानो जगत्के भारीसे भारी भारको धारण करनेमें सामर्थ्य रखनेवाले अपने माहात्म्यको ही प्रकट कर रहा हो ॥१०१॥ यदि यह पर्वत तिर्यक् प्रदेशमें लम्बा न होकर क्रीड़ामात्रसे आकाशमें ही बढ़ा जाता तो जगत्‌रूपी कुटीमें कहाँ समाता ? ॥१०२॥ वह पर्वत इतना ऊँचा और इतना निर्मल है कि अपने ऊँचे-ऊँचे शिखरों द्वारा कुलाचलोंके साथ भी स्पर्धाके लिए तैयार रहता है ॥१०३॥ ऐसे उस विजयार्ध पर्वतकी उत्तर श्रेणीमें एक अलका नामकी श्रेष्ठ पुरी है जो केशवाली विद्याधरियोंके मुखके साथ-साथ चन्द्रमाकी भी हँसी उड़ाती है ॥१०४॥ बड़े भारी अभ्युदयको प्राप्त वह नगरी उस उत्तर श्रेणीमें इस प्रकार सुशोभित होती है जिस प्रकार कि पाण्डुक शिलापर जिनेन्द्रदेवकी अभिषेक क्रिया सुशोभित होती है ॥१०५॥ वह अलकापुरी किसी बड़े व्याकरणपर बनी हुई प्रक्रियाके समान अतिशय विस्तृत है तथा भगवत् जिनेन्द्रदेवकी दिव्य ध्वनिके नाना भाषारूप परिणत होनेवाले अतिशयके समान शोभायमान है अर्थात् उसमें नाना भाषाओंके जाननेवाले पुरुष रहते हैं ॥१०६॥ वह नगरी ऊँचे ऊँचे गोपुर-दरवाजोंसे सहित अत्यन्त उन्नत प्राकार (कोट) को धारण किये हुए है जिससे ऐसी जान पड़ती है मानो वेदिकाके वलयको धारण किये हुए जम्बू द्वीपकी स्थली ही हो ॥१०७॥ उस नगरीकी परिखामें अनेक कमल फूले हुए हैं और उन कमलोंपर चारों ओर भौंरे फिर रहे हैं जिससे ऐसा मालूम होता है मानो वह परिखा इधर-उधर घूमते हुए भ्रमररूपी सुन्दर अंजनसे सुशोभित कमलरूपी नेत्रोंके द्वारा वहाँके विद्याधरोंको देख रही हो ॥१०८॥ उस नगरीके चारों ओर परिखासे घिरा हुआ जो कोट है वह केवल उसकी शोभाके लिए ही है क्योंकि उस नगरीका पालन करनेवाला विद्याधर नरेश अपनी भुजाओंसे ही प्रजाकी रक्षा करता है ॥१०९॥ उस नगरीके बड़े-बड़े पक्के मकानोंकी शिखरोंपर फहराती हुई पताकाएँ, कैलाशकी शिखरपर उतरती हुई हंसमालाको तिरस्कृत करती हैं ॥११०॥ उस नगरीके प्रत्येक घरमें फूले हुए कमलोंसे शोभायमान अनेक वापिकाएँ हैं। उनमें कलहंस (बत्तख) पक्षी मनोहर शब्द करते हैं जिनसे ऐसा जान पड़ता है मानो वे मानसरोवरकी हँसी ही कर रही हों ॥१११॥

---

१ अदीर्घः । २ यदा अ०, स०, द० । ३ माङ् माने लङ् । ४ विशुद्धित्वात् म०, प०, द०, ल० । ५ ततोऽस्त्यु–अ०, स० । ६ उत्तरस्याम् । ७ खेचरी म०, द० । ८ व्याकरणशास्त्रे । ९ वीक्ष्यमाणेव म०, प० द०, ल० । १० सपरिखावृत' स० । ११ यस्याः अ०, स०, द०, प०, म० । १२ मानसनाम सरोवरम् ।

स्वच्छाम्बुवसना वाप्यो नीलोत्पलवतंसकाः[1] । भान्ति पद्मानना यत्र लसत्कुवलयेक्षणाः ॥११२॥
यत्र मर्त्या न सन्त्यज्ञा नाङ्गनाः शीलवर्जिताः । नानारामा निवेशाश्च नारामाःफलवर्जिताः ॥११३॥
विनार्हत्पूजया जातु जायन्ते न जनोत्सवाः । विना संन्यासविधिना मरणं यत्र नाङ्गिनाम् ॥११४॥
सस्यान्यकृष्टपच्यानि यत्र नित्यं [2]चकासति । प्रजानां सुकृतानीव [3]वितरन्ति महत्फलम् ॥११५॥
यत्रोद्यानेषु पाय्यन्ते [4]पयोदैर्बालपादपाः । स्तनन्धया इवाप्राप्तस्थेमानो[5] यत्नरक्षिताः ॥११६॥
महाब्धाविव सध्वाने स्फुरद्रत्ने वणिक्पथे । विचरन्ति जना यस्यां [6]मत्स्या इव समन्ततः ॥११७॥
पद्मेष्वेव विकोशत्वं[7] प्रमदास्वेव भीरुता[8] । दन्तच्छदेष्वधरता[9] यत्र निस्त्रिंशता[10]सिषु ॥११८॥
याच्ञाकरग्रहौ यस्यां विवाहेष्वेव केवलम् । मालास्वेव परिम्लानिर्द्विरदेष्वेव बन्धनम् ॥११९॥
अनैरत्युत्सुकैर्वीक्ष्यं [11]वयस्कान्तं [12]सपुष्पकम् । [13]बाणाङ्कितं यदुद्यानं वधूवरमिव प्रियम् ॥१२०॥

उस नगरीमें अनेक वापिकाएँ 'स्त्रियों' के समान शोभायमान हो रही हैं क्योंकि स्वच्छ जल ही उनका वस्त्र है, नील कमल ही कर्णफूल है, कमल ही मुख है और शोभायमान कुवलय ही नेत्र हैं ॥११२॥ उस नगरीमें कोई ऐसा मनुष्य नहीं है जो अज्ञानी हो, कोई ऐसी स्त्री नहीं है जो शीलसे रहित हो, कोई ऐसा घर नहीं है जो बगीचेसे रहित हो और कोई ऐसा बगीचा नहीं है जो फलोंसे रहित हो ॥११३॥ उस नगरीमें कभी ऐसे उत्सव नहीं होते जो जिन-पूजाके बिना ही किये जाते हों तथा मनुष्योंका ऐसा मरण भी नहीं होता जो सन्न्यासकी विधिसे रहित हो ॥११४॥ उस नगरीमें धानके ऐसे खेत निरन्तर शोभायमान रहते हैं जो बिना बोये-बखरे ही समयपर पक जाते हैं और पुण्यके समान प्रजाको महाफल देते हैं ॥११५॥ उस नगरीके उपवनोंमें ऐसे अनेक छोटे छोटे वृक्ष (पौधे) हैं जिन्हें अभी पूरी स्थिरता—दृढ़ता प्राप्त नहीं हुई है। अन्य लोग उनकी यत्नपूर्वक रक्षा करते हैं तथा बालकोंकी भाँति उन्हें पय—जल (पक्षमें दूध) पिलाते हैं ॥११६॥ उस नगरीके बाजार किसी महासागर के समान शोभायमान हैं क्योंकि उनमें महासागरके समान ही शब्द होता रहता है, महासागरके समान ही रत्न चमकते रहते हैं और महासागरमें जिस प्रकार जलजन्तु सब ओर घूमते रहते हैं उसी प्रकार उनमें भी मनुष्य घूमते रहते हैं ॥११७॥ उस नगरीमें विकोशत्व—(खिल जानेपर कुड्मल-बौंड़ीका अभाव) कमलोंमें ही होता है वहाँके मनुष्योंमें विकोशत्व—(खजानोंका अभाव) नहीं होता। भीरुता केवल स्त्रियोंमें ही है वहाँके मनुष्योंमें नहीं, अधरता ओठोंमें ही है वहाँके मनुष्योंमें अधरता—नीचता नहीं है। निस्त्रिंशता—खड्गपना तलवारोंमें ही है वहाँके मनुष्योंमें निस्त्रिंशता—क्रूरता नहीं है। याच्ञा—वधूकी याचना करना और करग्रह—पाणिग्रहण (विवाह कालमें होनेवाला संस्कारविशेष) विवाहमें ही होता है वहाँके मनुष्योंमें याच्ञा—भिक्षा माँगना और और करग्रह—टैक्स वसूल करना अथवा अपराध होनेपर जंजीर आदिसे हाथोंका पकड़ा जाना नहीं होता। म्लानता—मुरझा जाना पुष्पमालाओंमें ही है वहाँके मनुष्योंमें म्लानता—उदासीनता अथवा निष्प्रभता नहीं है। और बन्धन—रस्सी वगैरहसे बाँधा जाना केवल हाथियोंमें ही है वहाँके मनुष्योंमें बन्धन—कारागार आदिका बन्धन नहीं है ॥११८-११९॥ उस नगरीके उपवन ठीक वधूवर अर्थात् दम्पतिके समान सबको अतिशय प्रिय लगते हैं क्योंकि वधूवरको लोग जैसे

---

१ कर्णाभरणानि । –वतंसिकाः द० । २ चकासते म०;ल०। ३ ददति । ४ पयोऽन्यै– अ०,द०,स०,प०। ५ अप्राप्तस्थिरत्वाः । ६ यस्यां यादांसीव अ०,प०,द०,म०,स०,ल० । ७ भण्डाररहितत्वम्, पक्षे विकुड्मलत्वम् । ८ स्त्रीत्वं भीतिश्च । ९ नीचत्वं च । १० निस्त्रिंशत्वं खड्गत्वम्, पक्षे क्रूरत्वं च । ११ पक्षिभिः कान्तं च । १२ सपुष्प-मस्तकम् । १३ बाणः झिण्टिः वधूवरे, पक्षे शरः ।

इति प्रतीतमाहात्म्या विजयार्द्धमहीभृतः । [1]सद्वृत्तवर्णसंकीर्णा सा पुरी तिलकायते ॥१२१॥
तस्याः [2]पतिरभूत्खेन्द्रमुकुटारूढशासनः[3] । खगेन्द्रोऽतिबलो नाम्ना प्रतिपक्षबलक्षयः[4] ॥१२२॥
स धर्मविजयी[5] शूरो जिगीषुररिमण्डले । [6]षाड्गुण्येनाजयत्कृत्स्नं विपक्षमनुपेक्षितम्[7] ॥१२३॥
सकुर्वन्वृद्धसंयोगं विजितेन्द्रियसाधनः[8] । [9]साधनैः प्रतिसामन्तान् लीलयैवोदमूलयत् ॥१२४॥
[10]महोदयो महोत्तुङ्गवंशो भास्वन्महाकरः । महादानेन सोऽपुष्णादाश्रितानिव दिग्द्विपः ॥१२५॥
लसद्दन्तांशु तस्यास्यं [11]सज्योत्स्नं बिम्बमैन्दवम् । जित्वेव भूपताकाभ्यामुत्क्षिप्ताभ्यां व्यराजत ॥१२६॥

बड़ी उत्सुकतासे देखते हैं उसी प्रकार वहाँके उपवनोंको भी लोग बड़ी उत्सुकतासे देखते हैं। वधूवर जिस प्रकार वयस्कान्त–तरुण अवस्थासे सुन्दर होते हैं उसी प्रकार उपवन भी वयस्कान्त–पक्षियोंसे सुन्दर होते हैं। बधूवर जिस प्रकार सपुष्पक–पुष्पमालाओंसे सहित होते हैं उसी प्रकार उपवन भी सपुष्पक–फूलोंसे सहित होते हैं। और वधूवर जिस प्रकार बाणाङ्कित–बाणचिह्नसे चिह्नित अथवा धनुषबाणसे सहित होते हैं उसी प्रकार उपवन भी बाण जातिके वृक्षोंसे सहित होते हैं ॥१२०॥ इस प्रकार जिसका माहात्म्य प्रसिद्ध है और जो अनेक प्रकारके सच्चरित्र ब्राह्मण, क्षत्रिय आदि वर्णोंसे व्याप्त है ऐसी वह अलका नगरी उस विजयार्ध पर्वतरूपी राजाके मस्तकपर गोल तथा उत्तम रंगवाले तिलकके समान सुशोभित होती है ॥१२१॥ उस अलकापुरीका राजा अतिबल नामका विद्याधर था जो कि शत्रुओंके बलका क्षय करनेवाला था और जिसकी आज्ञाको समस्त विद्याधर राजा मुकुटके समान अपने मस्तकपर धारण करते थे ॥१२२॥ वह अतिबल राजा धर्मसे ही (धर्मसे अथवा स्वभावसे) विजय लाभ करता था शूरवीर था और शत्रुसमूहको जीतनेवाला था। उसने सन्धि, विग्रह, यान, आसन, संश्रय और द्वैधीभाव इन छह गुणोंसे बड़े बड़े शत्रुओंको जीत लिया था ॥१२३॥ वह राजा हमेशा वृद्ध मनुष्योंकी संगति करता था तथा उसने इन्द्रियोंके सब विषय जीत लिए थे इसीलिये वह अपनी सेना द्वारा बड़े-बड़े शत्रुओंको लीलामात्रमें ही उखाड़ देता था–नष्ट कर देता था ॥१२४॥ वह राजा दिग्गजके समान था क्योंकि जिस प्रकार दिग्गज महान् उदयसे सहित होता है उसी प्रकार वह राजा भी महान् उदय (वैभव)से सहित था दिग्गज जिस प्रकार ऊँचे वंश (पीठकी रीढ़) का धारक होता है उसी प्रकार वह राजा भी सर्वश्रेष्ठ वंश–कुलका धारक था–उच्च कुलमें पैदा हुआ था। दिग्गज जिस प्रकार भास्वन्महाकर–प्रकाशमान लम्बी सूंडका धारक होता है उसी प्रकार वह राजा भी देदीप्यमान लम्बी भुजाओंका धारक था तथा दिग्गज जिस प्रकार अपने महादानसे–भारी मदजलसे भ्रमर आदि आश्रित प्राणियोंका पोषण करता है उसी प्रकार वह राजा भी अपने महादान–विपुल दानसे शरणमें आये हुए पुरुषोंका पोषण करता था ॥१२५॥ उस राजाके मुखसे शोभायमान दाँतोंकी किरणें निकल रही थीं तथा दोनों भौंहें कुछ ऊपर को उठी हुई थीं इसलिए ऐसा जान पड़ता था मानों उसके मुखने चन्द्रिकासे शोभित चन्द्रमाको जीत लिया है और इसीलिए उसने अपनी

---

१ सद्वृत्ता येषां ते तैः सङ्कीर्णाः, सद्वृत्तं च वर्णं च इति सद्वृत्तवर्णौ ताभ्यां सङ्कीर्णा च। २ प्रभु– अ०, द०, स०, द०। ३ आरोपिताज्ञः। ४ क्षयः प्रलयकालः। ५ दैवबलवान्। ६ 'सन्धिविग्रहयानासनद्वैधाश्रया इति षड्गुणाः' षड्गुणा एव षाड्गुण्यं तेन। ७ सावधानं यथा भवति। ८ करणग्रामः। ९ सेनाभिः। सामन्तैः प०। १० पक्षे पृष्ठास्थि। ११ सज्ज्योत्स्नं द०।

[1]सपुष्पकेशमस्याभादुत्तमाङ्गं [2]सदानवम् । त्रिकूटाग्रमिवोपान्तपतच्चामरनिर्झरम् ॥१२७॥
पृथु वक्षःस्थलं हारि [3]हारवल्लीपरिष्कृतम्[4] । क्रीडाद्वीपायितं लक्ष्म्याः स बभार गुणाम्बुधिः ॥१२८॥
करौ करिकराकारावूरू कामेषुधीयितौ । [5]कुरुविन्दाकृतीजङ्घे क्रमावम्बुजसच्छवी ॥१२९॥
[6]प्रतिप्रतीकमित्यस्य [7]कृतं वर्णनयानया । यद्यच्चारूपमावस्तु तत्तत्स्वाङ्गैर्जिगीषतः[8] ॥१३०॥
मनोहराङ्गी तस्याभूत् प्रिया नाम्ना मनोहरा । मनोभवस्य जैत्रेषुरिव या रूपशोभया ॥१३१॥
स्मितपुष्पोज्वला भर्त्तुः प्रियासील्लतिकेव सा । हितानुबन्धिनी जैनी[9] विद्येव च यशस्करी ॥१३२॥
तयोर्महाबलख्यातिरभूत्सूनुर्महोदयः । यस्य [10]जातावभूत्प्रीतिः पिण्डीभूतेव बन्धुषु ॥१३३॥
कलासु कौशलं शौर्य्यं त्यागः प्रज्ञा क्षमा दया । [11]धृतिः सत्यं च शौचं च गुणास्तस्य निसर्गजाः ॥१३४॥
स्पर्धयेव वपुर्वृद्धौ विवृद्धाः प्रत्यहं गुणाः । स्पर्द्धा ह्येकत्र भूष्णूनां[12] क्रियासाम्याद्विवर्धते ॥१३५॥

भौहों रूप दोनों पताकाएँ फहरा रक्खी हों ॥१२६॥ महाराज अतिबलका मस्तक ठीक त्रिकूटाचल की शिखरके समान शोभायमान था क्योंकि जिस प्रकार त्रिकूटाचल–सपुष्पकेश–पुष्पक विमानके स्वामी रावणसे सहित था उसी प्रकार उनका मस्तक भी सपुष्पकेश–अर्थात् पुष्पयुक्त केशोंसे सहित था। त्रिकूटाचलका शिखर जिस प्रकार सदानव–दानवोंसे–राक्षसोंसे सहित था उसी प्रकार उनका मस्तक भी सदानव–हमेशा नवीन था–श्याम केशोंसे सहित था। और त्रिकूटाचलके समीप जिस प्रकार जलके झरने झरा करते हैं उसी प्रकार उनके मस्तकके समीप चौंर ढुल रहे थे ॥१२७। वह राजा गुणोंका समुद्र था, उसका वक्षःस्थल अत्यन्त विस्तृत था, सुन्दर था और हाररूपी लताओंसे घिरा हुआ था इसलिए ऐसा जान पड़ता था मानो लक्ष्मीका क्रीड़ाद्वीप ही हो ॥१२८॥ उस राजाकी दोनों भुजायें हाथीकी सूंड़के समान थीं, जाँघें कामदेवके तरकसके समान थी, पिंडरियाँ पद्मरागमणिके समान सुदृढ़ थीं और चरण कमलोंके समान सुन्दर कान्तिके धारक थे ॥१२९॥ अथवा इस राजाके प्रत्येक अङ्गका वर्णन करना व्यर्थ है क्योंकि संसारमें सुन्दर वस्तुओंकी उपमा देने योग्य जो भी वस्तुएँ हैं उन सब को यह अपने अंगोंके द्वारा जीतना चाहता है। भावार्थ—संसारमें ऐसा कोई पदार्थ नहीं है जिसकी उपमा देकर उस राजाके अंगोंका वर्णन किया जावे ॥१३०। उस राजाकी मनोहर अंगोंको धारण करनेवाली मनोहरा नामकी रानी थी जो अपनी सौन्दर्य-शोभाके द्वारा ऐसी मालूम होती थी मानो कामदेवका विजयी बाण ही हो ॥१३१॥ वह रानी अपने पतिके लिए हास्यरूपी पुष्पसे शोभायमान लताके समान प्रिय थी और जिनवाणीके समान हित चाहनेवाली तथा यशको बढ़ानेवाली थी ॥१३२॥ उन दोनोंके अतिशय भाग्यशाली महाबल नामका पुत्र उत्पन्न हुआ। उस पुत्रके उत्पन्न होते ही उसके समस्त सहोदरोंमें प्रेम भाव एकत्रित होगया था ॥१३३॥ कलाओंमें कुशलता सूरवीरता, दान, बुद्धि, क्षमा, दया, धैर्य, सत्य और शौच ये उसके स्वाभाविक गुण थे ॥१३४॥ उस महाबलका शरीर तथा गुण ये दोनों प्रतिदिन परस्परकी ईर्ष्यासे वृद्धिको प्राप्त हो रहे थे अर्थात् गुणोंकी वृद्धि देखकर शरीर बढ़ रहा था और शरीरकी वृद्धिसे गुण बढ़ रहे थे। सो ठीक ही है क्योंकि एक स्थानपर रहनेवालोंमें क्रियाकी समानता होनेसे ईर्ष्या हुआ ही

---

१ पुष्पकवसहितम् पुष्पकविमानाधीशसहितं च। सरावणमिति यावत्। २ नित्यं नूतनं सराक्षसं च। ३ हारावलि– स०। ४ अलङ्कृतम्। ५ पद्मरागरत्न ?राकृती। 'कुरुविन्दस्तु मुस्तायां कुल्माषव्रीहि-भेदयोः। हिङ्गुडे पद्मरागे च मुकुरेऽपि समीरितः॥" ६ अवयवं प्रति। ७ अलम्। ८ जिगीषति स०, म०, ल०। ९ जैनागम इव। १० उत्पत्तौ। ११ सन्तोषः। १२ भूतानां स०, म०, ल०।

[1]राजविद्याश्चतस्त्रोऽपि सोऽध्यैष्ट गुरुसन्निधौ । स[2]ताभिर्विबभौ भाभिः स्वाभिरुद्यन्निवांशुमान् ॥१३६॥
[2]सोऽधीय[3]निखिलां विद्यां [4]गुरुसंस्कारयोगतः । दिदीपेऽधिकमर्चिष्मा[5]निवानिलसमन्वितः[6] ॥१३७॥
प्रश्नयाद्यान्गुणानस्य मत्वा योग्यत्वपोषकान् । यौवराज्यपदं तस्मै सोऽनुमेने खगाधिपः ॥१३८॥
संविभक्ता तयोर्लक्ष्मीश्चिरं रेजे धृतायतिः । हिमवत्यम्बुराशौ च व्योमगङ्गेव सङ्गता ॥१३९॥
स राजा तेन पुत्रेण [7]पुत्री बहुसुतोऽप्यभूत् । नभोभागो यथार्केण ज्योतिष्मानापरैर्ग्रहैः ॥१४०॥
अथान्येद्युरसौ राजा निर्वेदं विषयेष्वगात् । वितृष्णः कामभोगेषु प्रव्रज्यायै कृतोद्यमः ॥१४१॥
विषपुष्पमिवात्यन्तविषमं प्राणहारकम् । [8]महादृष्टिविषस्थानमिव चात्यन्तभीषणम् ॥१४२॥
[9]निर्भुक्तमाल्यवद् भूयो न भोग्यं मानशालिनाम् । दुष्कलत्रमिवापायि हेयं राज्यममंस्त सः ॥१४३॥
भूयोऽप्यचिन्तद्धीमानिमां संसारवल्लरीम् । [10]उत्स्रेत्स्यामि महाध्यानकुठारेण [11]क्षमीभवन् ॥१४४॥
मूलं मिथ्यात्वमेतस्याः पुष्पं [12]जात्यादिकं फलम् । [13]व्यसनान्यसुभृद्भृङ्गैः सेव्येयं [14]विषयासवे ॥१४५॥

करती है।।१३५।। उस पुत्रने गुरुओंके समीप आन्वीक्षिकी आदि चारों विद्याओंका अध्ययन किया था तथा वह पुत्र उन विद्याओंसे ऐसा शोभायमान होता था जैसा कि उदित होता हुआ सूर्य अपनी प्रभाओंसे शोभायमान होता है ।१३६।। उसने गुरुओंके संयोग और पूर्वभवके संस्कारके सुयोगसे समस्त विद्याएँ पढ़ लीं जिनसे वह वायुके समागमसे अग्निके समान और भी अधिक देदीप्यमान हो गया ।।१३७।। महाराज अतिबलने अपने पुत्रकी योग्यता प्रकट करनेवाले विनय आदि गुण देखकर उसके लिए युवराज पद देना स्वीकार किया ।।१३८।। उस समय पिता पुत्र दोनोंमें विभक्त हुई राज्य लक्ष्मी पहलेसे कहीं अधिक विस्तृत हो हिमालय और समुद्र दोनोंमें पड़ती हुई आकाश और गंगा की तरह चिरकालतक शोभायमान होती रही ।।१३९।। यद्यपि राजा अतिबलके और भी अनेक पुत्र थे तथापि वे उस एक महाबल पुत्रसे ही अपने आपको पुत्रवान् माना करते थे जिस प्रकार कि आकाशमें यद्यपि अनेक ग्रह होते हैं तथापि वह एक सूर्य ग्रहके द्वारा ही प्रकाशमान होता है अन्य ग्रहोंसे नहीं ।।१४०।। इसके अनन्तर किसी दिन राजा अतिबल विषयभोगोंसे विरक्त हुए। और कामभोगोंसे तृणारहित होकर दीक्षा ग्रहण करनेके लिए उद्यम करने लगे ।।१४१।। उस समय उन्होंने विचार किया कि यह राज्य विषपुष्पके समान अत्यन्त विषम और प्राणहरण करनेवाला है। दृष्टिविष सर्पके समान महा भयानक है, व्यभिचारिणी स्त्रीके समान नाश करनेवाला है तथा भोगी हुई पुष्पमालाके समान उच्छिष्ट है अतः सर्वथा हेय है–छोड़ने योग्य है, स्वाभिमानी पुरुषोंके सेवन करने योग्य नहीं है ।।१४२–१४३।। वे बुद्धिमान् महाराज अतिबल फिर भी विचार करने लगे कि मैं उत्तम क्षमा धारण कर अथवा ध्यान अध्ययन आदिके द्वारा समर्थ होकर–अपनी आत्मशक्तिको बढ़ाकर इस संसार रूपी बेलको अवश्य ही उखाड़ूँगा ।।१४४।। इस संसार रूपी बेलकी मिथ्यात्व ही जड़ है, जन्ममरण आदि ही इसके पुष्प हैं और अनेक व्यसन अर्थात्

१ आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरिति चतस्रो राजविद्याः । आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ । अर्थानर्थौ च वार्तायां दण्डनीत्यां नयानयौ ॥" २ सोऽवधार्याखिलां अ० । सोऽधीयान्निखिला विद्या द०,प०,म०, स० । ३ अधीयानः [स्मरन्] । ४ उपनयनादि । ५ अग्निः । ६ समिन्धितः स० । समागमात् म०,ल० । ७ पुत्रवान् । ८ दृष्टिविषाहिप्रदेशम् । ९ अनुभुक्तम् । १० छेदं करिष्यामि । उच्छेत्स्यामि द०, ट० । ११ अक्षमः क्षमो भवन् क्षमीभवन् क्षमावान् । १२ जातिजरादिकम् । १३ दुःखानि । 'व्यसनं विपरिभ्रंशे' इत्यभिधानात् । १४ विषयपुष्परसनिमित्तम् । 'हेतौ कर्मणः' इति सूत्रान्निमित्ते सप्तमी । अत्र सेव्येयम् [सेव्या इयम् इति

यौवनं क्षणभङ्गीदं भोगा भुक्ता न तृप्तये । [1]प्रत्युतात्यन्तमेवैतैस्तृष्णार्चिरभिवर्द्धते ॥१४६॥
शरीरमिदमत्यन्त[2]पूतिबीभत्स्वशाश्वतम् । [3]विलास्यतेऽद्य वा श्वो वा मृत्युवज्रविचूर्णितम् ॥१४७॥
शरीरवेणुरस्वन्तफलो[4] दुर्ग्रन्थिसन्ततः[5] । [6]प्लुष्टः कालाग्निना सद्यो [7]भस्मसात्स्यात्स्फुरद्ध्वनिः ॥१४८॥
बन्धवो बन्धनान्येते धनं दुःखानुबन्धनम् । विषया विषसंपृक्तविषमाशनसन्निभाः ॥१४९॥
तदलं राज्यभोगेन लक्ष्मीरतिचलाचला[8] । सम्पदो जलकल्लोलविलोलाः सर्वमध्रुवम् ॥१५०॥
इति निश्चित्य धीरोऽसावभिषेकपुरस्सरम् । सूनवे राज्यसर्वस्वमदितातिबलस्तदा ॥१५१॥
ततो गज इवापेतबन्धनो निःसृतो गृहात् । बहुभिः खेचरैः सार्द्धं दीक्षां स समुपाददे ॥१५२॥
जिगीषु बलवद्गुप्त्या[10] समित्या च सुसंवृतम् । महानागफणारत्नमिव चान्यैर्दुरासदम् ॥१५३॥
नाभिकालोद्भवस्कल्पतरुजालमिवाम्बरैः । भूषणैश्च परित्यक्तमपेतं दोषवस्तया ॥१५४॥
[11]उदर्कसुखहेतुत्वाद् गुरूणामिव सद्वचः । नियतावासशून्यत्वात् [12]पततामिव मण्डलम् ॥१५५॥

दुःख प्राप्त होना ही इसके फल हैं। केवल विषयरूपी आसवका पान करनेके लिये ये प्राणीरूपी भौंरे निरन्तर इस लताकी सेवा किया करते हैं ॥ यह यौवन क्षणभंगुर है और ये पञ्चेन्द्रियोंके भोग यद्यपि अनेक बार भोगे गये हैं तथापि इनसे तृप्ति नहीं होती, तृप्ति होना तो दूर रहो किन्तु तृष्णारूपी अग्निकी सातिशय वृद्धि होती है ॥ यह शरीर भी अत्यन्त अपवित्र, घृणाका स्थान और नश्वर है । आज अथवा कल बहुत शीघ्र ही मृत्यु-रूपी वज्रसे पिसकर नष्ट हो जावेगा । अथवा दुःखरूपी फलसे युक्त और परिग्रह रूपी गाँठोंसे भरा हुआ यह शरीररूपी बाँस मृत्युरूपी अग्निसे जलकर चट चट शब्द करता हुआ शीघ्र ही भस्मरूप हो जावेगा ॥ ये बन्धुजन बन्धनके समान हैं, धन दुःखको बढ़ानेवाला है और विषय विष मिले हुए भोजनके समान विषम हैं ॥ लक्ष्मी अत्यन्त चञ्चल हैं, सम्पदायें जलकी लहरोंके समान क्षणभंगुर हैं, अथवा कहाँ तक कहा जावे यह सभी कुछ तो अस्थिर है इसलिये राज्य भोगना अच्छा नहीं -इसे हर एक प्रकारसे छोड़ ही देना चाहिये ॥१४४-१५०॥ इस प्रकार निश्चय कर धीर वीर महाराज अतिबलने राज्याभिषेक पूर्वक अपना समस्त राज्य पुत्र–महाबलके लिये सौंप दिया । और अपने बन्धनसे छुटकारा पाये हुए हाथीके समान घरसे निकलकर अनेक विद्याधरोंके साथ वनमें जाकर दीक्षा लेली ॥१५१-१५२॥ इसके पश्चात् महाराज अतिबल पवित्र जिन लिङ्ग धारणकर चिरकाल तक कठिन तपश्चरण करने लगे । उनका वह तपश्चरण किसी विजिगीषु—(शत्रुओंपर विजय पानेकी अभिलाषी) सेनाके समान था क्योंकि वह सेना जिस प्रकार गुप्ति—बरछा आदि हथियारों तथा समिति यों–समूहों से सुसंवृत रहती है उसी प्रकार उनका वह तपश्चरण भी मनोगुप्ति, वचनगुप्ति, और कायगुप्ति इन तीन गुप्तियोंसे तथा ईर्या, भाषा, एषणा, आदान–निक्षेपण और प्रतिष्ठापन इन पाँच समितियोंसे सुसंवृत — सुरक्षित था । अथवा उनका वह तपश्चरण किसी महासर्पके फणमें लगे हुए रत्नोंके समान अन्य साधारण मनुष्योंको दुर्लभ था । उनका वह तपश्चरण दोषोंसे रहित था तथा नाभिराजाके समय होनेवाले वस्त्राभूषण रहित कल्पवृक्षके समान

---

१ पुनः किमिति चेत् । २ दुर्गन्धि । ३ विलयमेष्यति । विनाश्यते अ०, स० । विनश्यते म०, द० । ४ प्राणान्तफलः दुःखान्तफलश्च । ५ संस्थितः प०, म० । ६ दग्धः । ७ भस्माधीनं भवेत् । ८ अतिशयेन चञ्चला । 'चल कम्पने' इति धातोः कर्तर्यच्प्रत्यये 'चलिचलपतिवदीनामचीति द्विर्भावे अभ्यासस्य आगागिति पूर्वस्य आगागमः । ९ सह । १० [योगविग्रहतया] पक्षे रक्षया । ११ उत्तरकालः । १२ विहगानाम ।

विषादभयदैन्यादिहानेः सिद्धास्पदोपमम् । 'क्षमाधारतया वातवलयस्थितिमुद्वहत्' ॥१५६॥
निःसङ्गत्वादिवाभ्यस्तपरमाणुविचेष्टितम्[३] । निर्वाणसाधनत्वाच्च रत्नत्रयमिवामलम् ॥१५७॥
सोऽन्युदारगुणं भूरितेजोभासुरमूर्जितम् । पुण्यं जैनेश्वरं रूपं दधत्तेपे[४] चिरं तपः ॥१५८॥
ततः कृताभिषेकोऽसौ बलशाली महाबलः । राज्यभारं दधे नम्रखेचराभ्यर्चितक्रमः ॥१५९॥
स दैवबलसम्पन्नः [५]कृतधीरविचेष्टितः । दोर्बलं प्रथयामास संहरन्द्विषतां बलम् ॥१६०॥
मन्त्रशक्त्या प्रतिध्वस्त[६]सामर्थ्यास्तस्य विद्विषः । महाहय इवाभूवन् विक्रियाविमुखास्तदा ॥१६१॥
[७]तस्मिन्नारूढमाधुर्ये दधुः प्रीतिं प्रजादृशः । चूतद्रुम इव स्वादुसुपक्वफलशालिनि ॥१६२॥
नात्यर्थमभवत्तीक्ष्णो न चाति मृदुतां दधे । मध्यमां वृत्तिमाश्रित्य स जगद्वशमानयत् ॥१६३॥
[८]उभयेऽपि द्विषस्तेन शमिता भूतिमिच्छता । कालादौद्धत्यमायाता जलदेनेव पांसवः ॥१६४॥
सिद्धिर्धर्मार्थकामानां नाबाधिष्ट परस्परम् । तस्य प्रयोगनैपुण्याद्वन्धू[९]भूयमिवागताः ॥१६५॥

लिए खूनसे भरी हुई एक बावड़ी बनवा दो ॥१०४॥ राजा अरविन्दको विभंगावधि ज्ञान था इसलिए विचार कर फिर बोला—इसी समीपवर्ती वनमें अनेक प्रकारके मृग रहते हैं उन्हींसे तू अपना काम कर अर्थात् उन्हें मारकर उनके खूनसे बावड़ी भर दे ॥१०५॥ वह कुरुविन्द पापसे डरता रहता था इसलिए पिताके ऐसे वचन सुनकर तथा कुछ विचारकर पापमय कार्य करनेके लिए असमर्थ होता हुआ क्षणभर चुप चाप खड़ा रहा ॥१०६॥ तत्पश्चात् वन में गया वहाँ किन्हीं अवधि ज्ञानी मुनिसे जब उसे मालूम हुआ कि हमारे पिताकी मृत्यु अत्यन्त निकट है तथा उन्होंने नरकायुका बन्ध कर लिया है तब वह उस पापकर्मके करनेसे रुक गया ॥१०७॥ परन्तु पिताके वचन भी उल्लंघन करने योग्य नहीं हैं ऐसा मानकर उसने कृत्रिम रुधिर अर्थात् लाखके रंगसे भरी हुई एक बावड़ी बनवाई ॥१०८॥ पापकार्य करनेमें अतिशय चतुर राजा अरविन्दने जब बावड़ी तैयार होनेका समाचार सुना तब वह बहुत ही हर्षित हुआ। जैसे कोई दरिद्र पुरुष पहले कभी प्राप्त नहीं हुए निधानको देखकर हर्षित होता है ॥१०९॥ जिस प्रकार पापी—नारकी जीव वैतरणी नदी को बहुत अच्छी मानता है उसी प्रकार वह पापी अरविन्द राजा भी लाखके लाल रंगसे धोखा खाकर अर्थात् सचमुचका रुधिर समझकर उस बावड़ीको बहुत अच्छी मान रहा था ॥११०॥ जब वह उस बावड़ीके पास लाया गया तो आते ही उसके बीचमें सो गया और इच्छानुसार क्रीड़ा करने लगा। परन्तु कुल्ला करते ही उसे मालूम हो गया कि यह कृत्रिम रुधिर है ॥१११॥ यह जानकर पापरूपी समुद्रको बढ़ानेके लिये चन्द्रमाके समान वह बुद्धिरहित राजा अरविन्द, मानो नरककी पूर्ण आयु प्राप्त करनेकी इच्छासे ही रुष्ट होकर पुत्रको मारनेके लिए दौड़ा परन्तु बीचमें इस तरह गिरा कि अपनी ही तलवारसे उसका हृदय विदीर्ण हो गया तथा मर गया ॥११२-११३॥ वह कुमरणको पाकर पापके योगसे नरकगतिको प्राप्त हुआ। हे राजन्! यह कथा इस अलका नगरीमें लोगोंको आजतक याद है ॥११४॥ जिस प्रकार दाँत टूट जानेसे हाथी अपना मुँह नीचा कर लेता है, अथवा जिस प्रकार फणका मणि उखाड़ लेनेसे सर्प तेज

१ अतीरयन् असमर्थो भवन्नित्यर्थः। २ मन्दः। 'शीतकोऽलसोऽनुष्णः' इत्यमरः। ३ रक्तैः। ४ दरिद्रः। ५ कृत्रिम। ६ वञ्चितः। ७ बहुमन्यते स्म। ८ तां वर्यां वापीं वै- अ०। ९ नरकनदीम्। १० नरकायुरपर्यन्तं प०, द०, ल०। ११ पर्याप्तं कर्तुमिच्छन्। १२ पुत्रहिंसायाम्। १३ स्वच्छुरिकया। १४ दीर्णं विदारितम्। १५ तदा द०, प०, ल०। १६ नरकगतिम्।

पितुर्भानोरिवापायात् कुरुविन्दोऽरविन्दवत् । परिम्लानतनुच्छायः स शोच्यामगमद्दशाम्[1] ॥११६॥
तथात्रैव भवद्वंशे विस्तीर्णे जलधाविव । दण्डो नाम्नाभवत्खेन्द्रो दण्डितारातिमण्डलः ॥११७॥
मणिमालीत्यभूत्तस्मात्सूनुर्मणिरिवाम्बुधेः । नियोज्य यौवराज्ये तं स्वेष्टान्भोगानभुङ्क्त सः ॥११८॥
भुक्त्वापि सुचिरं भोगान्नातृप्यद्विषयोत्सुकः । [2]प्रत्युतासक्तिमभजत् स्त्रीवस्त्राभरणादिषु ॥११९॥
सोऽत्यन्तविषयासक्तिकृतकौटिल्य[3]चेष्टितः । बबन्ध तीव्रसंक्लेशात्तिरश्चामायुरार्त्तधीः ॥१२०॥
जीवितान्ते स दुर्ध्यानमार्त्तमापूर्य दुर्मृतेः । भाण्डागारे निजे मोहान् महानजगरोऽजनि ॥१२१॥
स जातिस्मरतां गत्वा भाण्डागारिकवद् भृशम् । तत्प्रवेशे निजं सूनुमन्वमंस्त न चापरम् ॥१२२॥
अन्येद्युरवधिज्ञानलोचनान्मुनिपुङ्गवात् । मणिमाली पितुर्ज्ञात्वा तं वृत्तान्तमशेषतः ॥१२३॥
पितृभक्त्या [4]सतन्मूर्च्छामपहर्तुमनाः सुधीः । [5]शयोरग्रे शनैःस्थित्वा स्नेहार्द्रां गिरमभ्यधात् ॥१२४॥
पितः पतितवानस्यां कुयोनावधुना त्वकम् । विषयास[6]ङ्गदोषेण [7]धृतमूर्छो धनर्द्धिषु ॥१२५॥
ततो धिगिदमत्यन्तकटुकं विषयामिषम्[8] । [9]वमैतद् दुर्जरं तात किम्पाकफलसन्निभम् ॥१२६॥

रहित हो जाता है अथवा सूर्य अस्त हो जानेसे जिस प्रकार कमल मुरझा जाता है उसी प्रकार पिताकी मृत्युसे कुरुविन्दने अपना मुँह नीचा कर लिया, उसका सब तेज जाता रहा तथा सारा शरीर मुरझा गया—शिथिल हो गया। इस प्रकार वह सोचनीय अवस्थाको प्राप्त हुआ था ॥११५-११६॥

हे राजन्, अब दूसरी कथा सुनिये—समुद्रके समान विस्तीर्ण आपके इस वंशमें एक दण्ड नामका विद्याधर हो गया है वह बड़ा प्रतापी था उसने अपने समस्त शत्रुओंको दण्डित किया था ॥११७॥ जिस प्रकार समुद्रसे मणि उत्पन्न होता है उसी प्रकार उस दण्ड विद्याधरसे भी मणिमाली नामका पुत्र उत्पन्न हुआ। जब वह बड़ा हुआ तब राजा दण्डने उसे युवराज पदपर नियुक्त कर दिया और आप इच्छानुसार भोग भोगने लगा ॥११८॥ वह विषयोंमें इतना अधिक उत्सुक हो रहा था कि चिरकालतक भोगोंको भोग कर भी तृप्त नहीं होता था बल्कि स्त्री वस्त्र तथा आभूषण आदिमें पहलेकी अपेक्षा अधिक आसक्त होता जाता था ॥११९॥ अत्यन्त विषयासक्तिके कारण मायाचारी चेष्टाओंको करनेवाले उस आर्तध्यानी राजाने तीव्र संक्लेश भावोंसे तिर्यञ्च आयुका बन्ध किया ॥१२०॥ चूँकि मरते समय उसका आर्तध्यान नामका कुध्यान पूर्णताको प्राप्त हो रहा था इसलिए कुमरणसे मरकर वह मोहके उदयसे अपने भण्डारमें बड़ा भारी अजगर हुआ ॥१२१॥ उसे जातिस्मरण भी हो गया था इसलिए वह भण्डारीकी तरह भण्डारमें केवल अपने पुत्रको ही प्रवेश करने देता था अन्य को नहीं ॥१२२॥ एक दिन अतिशय बुद्धिमान् राजा मणिमाली किन्हीं अवधिज्ञानी मुनिराजसे पिताके अजगर होने आदिका समस्त वृत्तान्त मालूम कर पितृ भक्तिसे उनका मोह दूर करनेके लिए भण्डारमें गया और धीरेसे अजगरके आगे खड़ा हो कर स्नेहयुक्त वचन कहने लगा। ॥१२३-१२४॥ हे पिता, तुमने धन ऋद्धि आदिमें अत्यन्त ममत्व और विषयोंमें अत्यन्त आसक्ति की थी इसी दोषसे तुम इस समय इस कुयोनिमें—सर्प पर्यायमें आकर पड़े हो ॥१२५॥ यह विषय रूपी आमिष अत्यन्त कटुक है, दुर्जर है और किंपाक (विषफल) फलके समान है इसलिए धिक्कारके योग्य है। हे पिता जी, इस विषयरूपी आमिषको अब भी छोड़ दो ॥१२६॥

१ अवस्थाम्। २ पुनः किमिति चेत्। ३ कौटिल्यं माया। ४ अज्ञानम्। ५ अजगरस्य। ६ आसङ्गः आसक्तिः। ७ धृतमोहः। ८ सम्भोगः। "आमिषं पलले लोभे सम्भोगोत्कोचयोरपि" इत्यभिधानात्। ९ उद्गारं कुरु।

[1]रथाङ्गमिव संसारमनुबध्नाति सन्ततम् । दुस्त्यजं त्यजदप्येतत् कण्ठस्थमिव जीवितम् ॥१२७॥
प्रकटीकृतविश्वासं प्राणहारि भयावहम् । [2]मृगयोरिव दुर्गीतं नृगणैणप्रलम्भकम् ॥१२८॥
ताम्बूलमिव संयोगादिदं रागविवर्द्धनम् । अन्धकारमिवोत्सर्पत् सन्मार्गस्य निरोधनम् ॥१२९॥
जैनं मतमिव प्रायः परिभूतमतान्तरम् । तडिल्लसितवल्लोलं वैचित्र्यात् सुरचापवत् ॥१३०॥
किं वात्र बहुनोक्तेन पश्येदं विषयोद्भवम् । सुखं संसारकान्तारे परिभ्रमयतीप्सितम् ॥१३१॥
नमोऽस्तु [3]तद्रसासङ्गविमुखाय स्थिरात्मने[4] । तपोधनगणायेति निनिन्द विषयानसौ ॥१३२॥
अथासौ पुत्रनिर्दिष्टधर्मवाक्यांशुमालिना । गलिताशेषमोहान्धतमसः[5] समजायत ॥१३३॥
ततो धर्मौषधं प्राप्य स कृतानुशयः[6] शयुः । ववाम विषयौत्सुक्यं महाविषमिवोल्वणम्[7] ॥१३४॥
स परित्यज्य संवेगादाहारं सशरीरकम् । जीवितान्ते तनुं हित्वा दिविजोऽभून्महर्द्धिकः ॥१३५॥
ज्ञात्वा च भवमागत्य संपूज्य मणिमालिने । मणिहारमदत्तासावुग्रि[8]न्मणिदीधितिम् ॥१३६॥
स एष भवतः कण्ठे हारो रत्नांशुभासुरः । लक्ष्यतेऽद्यापि यो लक्ष्म्याः प्रहास इव निर्मलः ॥१३७॥
तथैवमपरं[9] राजन् यथावृत्तं[10] निगद्यते । सन्ति यद्दर्शिनोऽद्यापि वृद्धाः केचन खेचराः ॥१३८॥
आसीच्छतबलो नाम्ना भवदीयः [11]पितामहः । प्रजा राजन्वतीः कुर्वन् स्वगुणै[12]रभिगामिकैः[13] ॥१३९॥

हे तात, जिस प्रकार रथका पहिया निरन्तर संसार-परिभ्रमण करता रहता है-चलता रहता है उसी प्रकार यह विषय भी निरन्तर संसार-चतुर्गतिरूप संसारका बन्ध करता रहता है। यद्यपि यह कण्ठस्थ प्राणोंके समान कठिनाईसे छोड़े जाते हैं परन्तु त्याज्य अवश्य है ॥१२७॥ ये विषय शिकारीके गानेके समान हैं जो पहले मनुष्यरूपी हरिणोंको ठगनेके लिए विश्वास दिलाता है और बादमें भयंकर हो प्राणोंका हरण किया करता है। ॥१२८॥ जिस प्रकार ताम्बूल चूना, खैर और सुपारी का संयोग पाकर राग-लालिमाको बढ़ाते हैं उसी प्रकार ये विषय भी स्त्री पुत्रादिका संयोग पाकर राग-स्नेहको बढ़ाते है और बढ़ते हुए अन्धकारके समान समीचीन मार्गको रोक देते हैं ॥१२९॥ जिस प्रकार जैन मत मतान्तरोंका खण्डन कर देता है उसी प्रकार ये विषय भी पिता गुरु आदिके हितोपदेश रूपी मतोंका खण्डन कर देते हैं, ये बिजलीकी चमकके समान चञ्चल है और इन्द्रधनुषके समान विचित्र हैं ॥१३०॥ अधिक कहनेसे क्या लाभ ? देखो, विषयोंसे उत्पन्न हुआ यह विषयसुख इस जीवको संसार रूपी अटवीमें घुमाता है ॥१३१॥ जो इस विषयरसकी आसक्तिसे विमुख रहकर अपने आत्माको अपने आपमें स्थिर रखते हैं ऐसे मुनियोंके समूहको नमस्कार हो। इस प्रकार राजा मणिमालीने विषयोंकी निन्दा की ॥१३२॥ तदनन्तर अपने पुत्रके धर्मवाक्य रूपी सूर्यके द्वारा उस अजगरका सम्पूर्ण मोहरूपी गाढ़ अन्धकार नष्ट हो गया ॥१३३॥ उस अजगरको अपने पिछले जीवनपर भारी पश्चात्ताप हुआ और उसने धर्मरूपी औषधि ग्रहण कर महाविषके समान भयंकर विषयासक्ति छोड़ दी ॥१३४॥ उसने संसारसे भयभीत होकर आहार पानी छोड़ दिया, शरीरसे भी ममत्व त्याग दिया और आयुके अन्तमें शरीर त्यागकर बड़ी ऋद्धिका धारक देव हुआ ॥१३५॥ उस देवने अवधिज्ञानके द्वारा अपने पूर्व भव जान मणिमालीके पास आकर उसका सत्कार किया तथा उसे प्रकाशमान मणियोंसे शोभायमान एक मणियोंका हार दिया ॥१३६॥ रत्नोंकी किरणोंसे शोभायमान तथा लक्ष्मीके हासके समान निर्मल वह हार आज भी आपके कण्ठमें दिखाई दे रहा है ॥१३७॥

हे राजन्, इसके सिवाय एक और भी वृत्तान्त मैं ज्योंका त्यों कहता हूं। उस वृत्तान्तके देखने वाले कितने ही वृद्ध विद्याधर आज भी विद्यमान हैं ॥१३८॥ शतबल नामके आपके दादा हो

१ शकटचक्रवत्। २ व्याधस्य। ३ विषयसुखानुरागासक्तिः। ४ स्थिरबुद्धये। ५-तामसः ल०। ६ पश्चात्तापः। ७ उत्कटम्। ८ प्रकाशमानः। ९ कथेत्यर्थः। १० यथावद् वर्तितम्। ११ पितृपिता। १२ -णैरभिरामकैः अ०। -राभिरामिकैः स०, प०। १३ अस्यादरणीयैः।

स राज्यं सुचिरं भुक्त्वा कदाचिद्भोगनिःस्पृहः । भवत्पितरि निक्षिप्तराज्यभारो महोदयः ॥१४०॥
सम्यग्दर्शनपूतात्मा गृहीतोपासकव्रतः । निबद्धसुरलोकायुर्विशुद्धपरिणामतः ॥१४१॥
कृत्वानशनसच्चर्यामवमोदर्यमप्यदः । यथोचितनियोगेन[1] [2]योगेनान्तेऽत्यजत् तनुम् ॥१४२॥
माहेन्द्रकल्पेऽनल्पर्द्धिरभूदेषः सुराग्रणीः । अणिमादिगुणोपेतः सप्ताम्बुधिमितस्थितिः ॥१४३॥
स चान्यदा महामेरौ नन्दने त्वामुपागतम् । क्रीडाहेतोर्मया सार्द्धं दृष्ट्वातिस्नेहनिर्भरः ॥१४४॥
कुमार परमो धर्मो जैनाभ्युदयसाधनः । न विस्मार्यस्त्वयेत्येवं त्वां तदान्वशिषत्तराम्[3] ॥१४५॥
नमत्ख[4]चरराजेन्द्रमस्तकारूढशासनः । सहस्रबल इत्यासीद्भवत्पितृपितामहः ॥१४६॥
स देव देवे[5] निक्षिप्य लक्ष्मीं शतबले सुते । जग्राह परमां दीक्षां जैनीं निर्वाणसाधनीम् ॥१४७॥
विजहार महीं कृत्स्नां द्योतयन् स तपोंऽशुभिः । मिथ्यान्धकारघटनां विघटय्यांशुमानिव ॥१४८॥
क्रमात् कैवल्यमुत्पाद्य पूजितो नृसुरासुरैः । ततोऽनन्तमपारञ्च सम्प्रापच्छाश्वतं पदम् ॥१४९॥
तथा युष्मत्पितायुष्मन् राज्यभूरिभरं [6]वशी । त्वयि निक्षिप्य वैराग्यात् महाप्राव्राज्यमास्थितः[7] ॥१५०॥
पुत्रनप्तृभिरन्यैश्च नभश्चरनराधिपैः । सार्द्धं तपश्चरन्नेष मुक्तिलक्ष्मीं [8]जिघृक्षति ॥१५१॥
धर्माधर्मफलस्यैते दृष्टान्तत्वेन दर्शिताः । युष्मद्वंश्याः[9] खगाधीशाः [10]सुप्रतीतकथानकाः ॥१५२॥

गये हैं जो अपने मनोहर गुणोंके द्वारा प्रजाको हमेशा सुयोग्य राजासे युक्त करते थे ।।१३९।। उन भाग्यशाली शतबलने चिरकाल तक राज्य भोगकर आपके पिताके लिये राज्यका भार सौंप दिया था और स्वयं भोगोंसे निःस्पृह हो गये थे ।।१४०।। उन्होंने सम्यग्दर्शनसे पवित्र होकर श्रावकके व्रत ग्रहण किये थे और विशुद्ध परिणामोंसे देवायुका बन्ध किया था ।।१४१।। उनने उपवास अवमोदर्य आदि सत्प्रवृत्तिको धारण कर आयुके अन्तमें यथायोग्य रीतिसे समाधिमरणपूर्वक शरीर छोड़ा ।।१४२।। जिससे महेन्द्रस्वर्गमें बड़ी बड़ी ऋद्धियोंके धारक श्रेष्ठ देव हुए। वहां वे अणिमा महिमा आदि गुणोंसे सहित थे तथा सात सागर प्रमाण उसकी स्थिति थी ।।१४३।। किसी एक दिन आप सुमेरु पर्वतके नन्दनवनमें क्रीड़ा करनेके लिये मेरे साथ गये हुए थे वहींपर वह देव भी आया था। आपको देखकर बड़े स्नेहके साथ उसने उपदेश दिया था कि 'हे कुमार, यह जैनधर्म ही उत्तम धर्म है, यही स्वर्ग आदि अभ्युदयोंकी प्राप्तिका साधन है इसे तुम कभी नहीं भूलना' ।।१४४-१४५।। यह कथा कहकर स्वयंबुद्ध कहने लगा कि–

'हे राजन्, आपके पिताके दादाका नाम सहस्रबल था। अनेक विद्याधर राजा उन्हें नमस्कार करते थे और अपने मस्तकपर उनकी आज्ञा धारण करते थे ।।१४६।। उन्होंने भी अपने पुत्र शतबल महाराजको राज्य देकर मोक्ष प्राप्त करानेवाली उत्कृष्ट जिनदीक्षा ग्रहण की थी ।।१४७।। वे तपरूपी किरणोंके द्वारा समस्त पृथिवीको प्रकाशित करते और मिथ्यात्वरूपी अन्धकारकी घटाको विघटित करते हुए सूर्यके समान विहार करते रहे ।।१४८।। फिर क्रमसे केवलज्ञान प्राप्त कर मनुष्य, देव और धरणेन्द्रोंके द्वारा पूजित हो अनन्त अपार और नित्य मोक्ष पदको प्राप्त हुए ।।१४९।। हे आयुष्मन्, इसी प्रकार इन्द्रियोंको वशमें करनेवाले आपके पिता भी आपके लिये राज्य भार सौंपकर वैराग्यभावसे उत्कृष्ट जिनदीक्षाको प्राप्त हुए हैं और पुत्र पौत्र तथा अनेक विद्याधर राजाओंके साथ तपस्या करते हुए मोक्षलक्ष्मीको प्राप्त करना चाहते हैं ।।१५०-१५१।। हे राजन्, मैंने धर्म और अधर्मके फलका दृष्टान्त देनेके लिये ही आपके वंशमें उत्पन्न हुए उन

---

१ कृत्येन। २ समाधिना। ३ नितरामनुशास्ति स्म। ४–खेचर–ग० ल०। ५ विजिगीषौ (जयनशीले इत्यर्थः) "पर्जन्ये राज्ञि निर्माणे व्यवहर्तरि भर्तरि। मूर्खे बाले जिगीषौ च देवोक्तिर्नरकुष्ठिनि ॥" इत्यभिधानात्। ६ इन्द्रियजयी। ७ आश्रितः। ८ गृहीतुमिच्छति। ९ वंशे भवाः। १० कथैव आनकः पटहः कथानकः सुप्रतीतः प्रसिद्धः कथानको येषां ते तथोक्ताः।

विद्धि ध्यानचतुष्कस्य फलमेतन्निदर्शितम् । पूर्वं ध्यानद्वयं [1]पापं शुभोदर्कं [2]परं द्वयम् ॥१५३॥
तस्माद्धर्मजुषां पुंसां भुक्तिमुक्ती न दुर्लभे । प्रत्यक्षाप्तोपदेशाभ्यामिदं निश्चिनु धीधन ॥१५४॥
इति प्रतीतमाहात्म्यो धर्मोऽयं जिनदेशितः । त्वयापि शक्तितः सेव्यः फलं [3]विपुलमिच्छता ॥१५५॥
श्रुत्वोदारं च गम्भीरं स्वयम्बुद्धोदितं[4] तदा । सभा [5]सभाजयामास [6]परमास्तिक्यमास्थिता[7] ॥१५६॥
इदमेवार्हतं तत्त्वमितोऽन्यच्च मतान्तरम् । [8]प्रतीतिरिति तद्वाक्यादाविरासीत् सभ्ः[9] [10]सताम् ॥१५७॥
सुदृष्टिर्व्रतसम्पन्नो गुणशीलविभूषितः । [11]ऋजुर्गुप्तो [12]गुरौ भक्तः श्रुताभिज्ञः प्रगल्भधीः[13] ॥१५८॥
श्लाघ्य एष गुणैरेभिः परमश्रावकोचितैः । स्वयम्बुद्धं महात्मेति तुष्टुवुस्तं सभासदः[14] ॥१५९॥
प्रशस्य खचराधीशः [15]प्रतिपद्य च तद्वचः । प्रीतः संपूजयामास स्वयम्बुद्धं महाधियम् ॥१६०॥
अथान्यदा स्वयम्बुद्धो महामेरुगिरिं ययौ । [16]विवन्दिषुर्जिनेन्द्राणां चैत्यवेश्मनि भक्तितः ॥१६१॥
[17]वनैश्चतुर्भिराभान्तं[18] जिनस्येव [19]शुभोदयम् । श्रुतस्कन्धमिवानादिनिधनं सप्रमाणकम् ॥१६२॥

विद्याधर राजाओंका वर्णन किया है जिनके कि कथा रूपी दुन्दुभि अत्यन्त प्रसिद्ध है ॥१५२॥ आप ऊपर कहे हुए चारों दृष्टान्तोंको चारों ध्यानोंका फल समझिये क्योंकि राजा अरविन्द रौद्र ध्यान के कारण नरक गया। दण्ड नामका राजा आर्त ध्यानसे भाण्डारमें अजगर हुआ, राजा शतबल धर्मध्यानके प्रतापसे देव हुआ और राजा महाबलने शुक्लध्यानके माहात्म्यसे मोक्ष प्राप्त किया। इन चारों ध्यानोंमेंसे पहलेके दो-आर्त और रौद्र ध्यान अशुभ ध्यान है जो कुगति के कारण हैं और आगे के दो-धर्म तथा शुक्ल ध्यान शुद्ध हैं, वे स्वर्ग और मोक्षके कारण हैं ॥ १५३ ॥ इसलिए हे बुद्धिमान् महाराज, धर्म सेवन करने वाले पुरुषोंको न तो स्वर्गादिकके भोग दुर्लभ हैं और न मोक्ष ही । यह बात आप प्रत्यक्ष प्रमाण तथा सर्वज्ञ वीतरागके उपदेश से निश्चित कर सकते हैं ॥१५४॥ हे राजन्, यदि आप निर्दोष फल चाहते हैं तो आपको भी जिनेन्द्रदेव के द्वारा कहे हुए प्रसिद्ध महिमासे युक्त इस जैन धर्मकी उपासना करनी चाहिये, ॥ १५५ ॥ इस प्रकार स्वयंबुद्ध मन्त्री के कहे हुए उदार और गम्भीर वचन सुनकर वह सम्पूर्ण सभा बड़ी प्रसन्न हुई तथा परम आस्तिक्य भावको प्राप्त हुई ॥१५६॥ स्वयंबुद्धके वचनोंसे समस्त सभासदोंको यह विश्वास हो गया कि यह जिनेन्द्र प्रणीत धर्म ही वास्तविक तत्त्व है अन्य मत मतान्तर नहीं ॥१५७॥ तत्पश्चात् समस्त सभासद् उसकी इस प्रकार स्तुति करने लगे कि यह स्वयंबुद्ध सम्यग्दृष्टि है, व्रती है, गुण और शीलसे सुशोभित है, मन वचन कायका सरल है, गुरुभक्त है, शास्त्रोंका वेत्ता है, अतिशय बुद्धिमान् है, उत्कृष्ट श्रावकोंके योग्य उत्तम गुणोंसे प्रशंसनीय है और महात्मा है ॥१५८-१५९॥ विद्याधरोंके अधिपति महाराज महाबल ने भी महाबुद्धिमान् स्वयंबुद्धकी प्रशंसा कर उसके कहे हुए वचनोंको स्वीकार किया तथा प्रसन्न होकर उसका अतिशय सत्कार किया ॥१६०॥ इसके बाद किसी एक दिन स्वयंबुद्ध मन्त्री अकृत्रिम चैत्यालयमें विराजमान जिन प्रतिमाओंकी भक्तिपूर्वक वन्दना करनेकी इच्छासे मेरु पर्वतपर गया ॥१६१॥

वह पर्वत जिनेन्द्र भगवान्के समवसरणके समान शोभायमान हो रहा है क्योंकि जिस

---

१ पापहेतुः । २ सुखोदर्कं त० ब०पुस्तकयोः पाठान्तर पार्श्वके लिखितम् । शुभोत्तरफलम् । 'उदर्कः फलमुत्तरम्' इत्यमरः । ३ विमल-म०, ल० । ४ वचनम् । ५ तुतोष । 'सभाज प्रीतिदर्शनयोः' इति धातुश्चौरादिकः । ६ जीवास्तित्वम् । ७ आश्रिता । ८ निश्चयः । ९ सभा । १० -सताम् ट० । सत्पुरुषाणाम् । ११ मनोगुप्त्यादिमान् । १२ -गुप्तो-ट० । १३ प्रौढबुद्धिः । १४ सभ्याः । १५ अङ्गीकृत्य । १६ वन्दितुमिच्छुः । १७ भद्रशालनन्दनसौमनसपाण्डुकैः, पक्षे अशोकसप्तच्छदचम्पकाम्रैः । १८ आराजन्तम् । १९ शुभोदयम् द०, ट० । समवसरणम् ।

महीभृतामधीशत्वात् [1]सद्वृत्तत्वात् [2]सदास्थितेः । [3]प्रवृद्धकटकत्वाच्च सुराजानमिवोन्नतम् ॥१६३॥
[4]सर्वलोकोत्तरत्वाच्च ज्येष्ठत्वात् सर्वभूभृताम् । महत्वात् स्वर्णवर्णत्वात् तमाद्यमिव[5] पूरुषम् ॥१६४॥
समासादितवज्रत्वादप्सरः[6]संश्रयादपि । [7]ज्योतिःपरीतमूर्त्तित्वात् सुरराजमिवापरम् ॥१६५॥
चूलिकाग्रसमासन्नसौधर्मेन्द्रविमानकम् । स्वर्लोकधारणे न्यस्तमिवैकं स्तम्भमुच्छ्रितम् ॥१६६॥
मेखलाभिर्वनश्रेणीर्दधानं कुसुमोज्ज्वलाः । स्पर्द्धयेव कुरुक्ष्माजैः सर्वर्तुफलदायिनीः[8] ॥१६७॥
हिरण्मयमहोदग्रवपुषं रत्नभासुरम् । जिनजन्माभिषेकाय बद्धं पीठमिवामरैः ॥१६८॥
जिनाभिषेकसम्बन्धात् जिनायतनधारणात् । स्वीकृतेनेव पुण्येन [9]प्राप्तं स्वर्गमनर्गलम्[10] ॥१६९॥

प्रकार समवसरण (अशोक, सप्तच्छद, आम्र और चम्पक) चार वनोंसे सुशोभित होता है उसी प्रकार वह पर्वत भी चार (भद्रशाल, नन्दन, सौमनस और पाण्डुक) वनोंसे सुशोभित है। वह अनादिनिधन है तथा प्रमाणसे (एक लाख योजन) सहित है इसलिये श्रुतस्कन्ध के समान है क्योंकि आर्यदृष्टि से श्रुतस्कन्ध भी अनादि निधन है और प्रत्यक्ष परोक्ष प्रमाणों से सहित है। अथवा वह पर्वत किसी उत्तम महाराज के समान है क्योंकि जिस प्रकार महाराज अनेक महीभृतों (राजाओं) का अधीश होता है उसी प्रकार वह पर्वत भी अनेक महीभृतों (पर्वतों) का अधीश है। महाराज जिस प्रकार सुवृत्त (सदाचारी) और सदास्थिति (समीचीन सभा से युक्त) होता है उसी प्रकार वह पर्वत भी सुवृत्त (गोलाकार) और सदास्थिति (सदा विद्यमान) रहता है। तथा महाराज जिस प्रकार प्रवृद्ध कटक (बड़ी सेना का नायक) होता है उसी प्रकार वह पर्वत भी प्रवृद्धकटक (ऊँचो शिखर वाला) है। अथवा वह पर्वत आदि पुरुष श्री वृषभदेवके समान जान पड़ता है क्योंकि भगवान् वृषभदेव जिस प्रकार सर्व लोकोत्तर है :-लोक में सबसे श्रेष्ठ हैं उसी प्रकार वह पर्वत भी सर्व लोकोत्तर है—सब देशोंसे उत्तर दिशा में विद्यमान है। भगवान् जिस प्रकार सब भूभृतों में (सब राजाओं में) ज्येष्ठ थे उसी प्रकार वह पर्वत भी सब भूभृतों (पर्वतों) में ज्येष्ठ-उत्कृष्ट है। भगवान् जिस प्रकार महान् थे उसी प्रकार वह पर्वत भी महान् है और भगवान् जिस प्रकार सुवर्ण वर्णके थे उसी प्रकार वह पर्वत भी सुवर्ण वर्णका है। अथवा वह मेरु पर्वत इन्द्रके समान सुशोभित है क्योंकि इन्द्र जिस प्रकार वज्र (वज्रमयी शस्त्र) से सहित होता है उसी प्रकार वह पर्वत भी वज्र (हीरों) से सहित होता है। इन्द्र जिस प्रकार अप्सरःसंश्रय (अप्सराओंका आश्रय) होता है उसी प्रकार वह पर्वत भी अप्सरःसंश्रय (जल से भरे हुए तालाबोंका आधार) है। और इन्द्रका शरीर जैसे चारों ओर फैलती हुई ज्योति (तेज) से सुशोभित होता है उसी प्रकार उस पर्वतका शरीर भी चारों ओर फैले हुए ज्योतिषी देवोंसे सुशोभित है। सौधर्म स्वर्गका इन्द्रक विमान इस पर्वतकी चूलिकाके अत्यन्त निकट है (बालमात्रके अन्तरसे विद्यमान है) इसलिये ऐसा मालूम होता है मानो स्वर्गलोकको धारण करनेके लिये एक ऊँचा खम्भा ही खड़ा हो। वह पर्वत अपनी कटनियोंसे जिन वन-पङ्क्तियोंको धारण किये हुए है वे हमेशा फूलोंसे उज्ज्वल रहती हैं तथा ऐसी मालूम होती हैं मानो कल्पवृक्षोंके साथ स्पर्धा करके ही सब ऋतुओंके फल फूल दे रही हों॥ वह पर्वत सुवर्णमय है, ऊँचा है और अनेक रत्नोंकी कान्तिसे सहित है इसलिए ऐसा जान पड़ता है मानो जिनेन्द्रदेवकी अभिषेकके लिये देवोंके द्वारा बनाया हुआ सुवर्णमय ऊँचा और रत्नखचित सिंहासन ही हो। उस पर्वतपर श्री जिनेन्द्रदेवका अभिषेक होता है तथा अनेक चैत्यालय विद्यमान हैं मानो इन्हीं दो

---

१ सुवृत्तत्वात्। २ नित्यस्थितेः। सताम् आ समन्तात् स्थितिर्यस्मिन्। ३ प्रवृद्धसानुत्वात् प्रवृद्धसैन्यत्वाच्च। ४ सर्वजनस्योत्तरदिक्स्थत्वात् सर्वजनोत्तमत्वाच्च। ५ पुरुपरमेश्वरम्। ६ अब्भिरुपलक्षितसरोवरसंश्रयात् देवगणिकासंश्रयाच्च। ७ ज्योतिर्गणः पक्षे कायकान्तिः। ८ -दायिभिः म०। ९ प्राप्तस्वर्ग- अ०, स०, द०, म०, ल०। १० अप्रतिबन्धं यथा भवति तथा।

[1]लवणाम्भोधिवेलाम्भोवलयश्लक्ष्णवाससः । *जम्बूद्वीपमहीभर्तुः तिरीटमिव सुस्थितम् ॥१७०॥
कुलाचलपृथूत्तुङ्गवीचीभङ्गोपशोभिनः । सङ्गीतप्रहतातोद्यविहङ्गरुतशालिनः ॥१७१॥
महानदीजलालोलमृणालविलसद्द्युतेः । नन्दनादिमहोद्यानविसर्पत्पत्रसम्पदः[2][3] ॥१७२॥
[4]सुरासुरसभावासभासितामरसश्रियः । [5]सुखासवरसासक्तजीवभृङ्गावलीभृतः ॥१७३॥
जगत्पद्माकरस्यास्य मध्ये [6]कालानिलोद्धृतम् । विवृद्धमिव किञ्जल्कपुञ्जमापिञ्जरच्छविम् ॥१७४॥
[7]सरत्नकटकं भास्वच्चूलिकामुकुटोज्ज्वलम्[8] । सोऽदर्शद् गिरिराजं तं राजन्तं जिनमन्दिरैः ॥१७५॥
[9]तमद्भुतश्रियं पश्यन् अगमत् स परां मुदम् । न्यरूपयच्च पर्यन्तदेशानस्येति विस्मयात् ॥१७६॥
गिरीन्द्रोऽयं स्वशृङ्गाग्रैः समाक्रान्तनभोऽङ्गणः । लोकनाडीगतायामं[10] मिमान[11] इव राजते ॥१७७॥
अस्य [12]सानूनिमे रम्यच्छायानोकहशोभिनः । सार्द्धं वधूजनैः शश्वदावसन्ति दिवौकसः ॥१७८॥
अस्य [13]पादाद्रयोऽप्यस्मा[14]दानीलनिषधं गताः । महतां पादसंसेवी को वा [15]नायतिमाप्नुयात् ॥१७९॥

कारणोंसे उत्पन्न हुए पुण्यके द्वारा वह विना किसी रोक टोकके स्वर्गको प्राप्त हुआ है अर्थात् स्वर्ग तक ऊँचा चला गया है ॥ अथवा वह पर्वत लवण समुद्रके नीले जलरूपी सुन्दर वस्त्रोंको धारण किये हुए जम्बूद्वीपरूपी महाराजके अच्छी तरह लगाये गये मुकुटके समान मालूम होता है ॥ अथवा यह जगत् एक सरोवरके समान है क्योंकि यह सरोवरकी भाँति ही कुलाचलरूपी बड़ी ऊँची लहरोंसे शोभायमान है, संगीतके लिये बजते हुए बाजोंके शब्दरूपी पक्षियोंके शब्दोंसे सुशोभित है, गङ्गा सिन्धु आदि महानदियोंके जल रूपी मृणालसे विभूषित है, नन्दनादि महावन रूपी कमल पत्रोंसे आच्छन्न है, सुर और असुरोंके सभाभवन रूपी कमलोंसे शोभित है, तथा सुखरूप मकरन्दके प्रेमी जीवन रूपी भ्रमरावलीको धारण किये हुए है । ऐसे इस जगत् रूपी सरोवरके बीचमें वह पीत वर्णका सुवर्णमय मेरु पर्वत ऐसा जान पड़ता है मानो प्रलय कालकी पवन से उड़ा हुआ तथा एक जगह इकट्ठा हुआ कमलों की केशर का समूह हो । वास्तव में वह पर्वत, पर्वतों का राजा है क्योंकि राजा जिस प्रकार रत्नजटित कटकों (कड़ों) से युक्त होता है उसी प्रकार वह पर्वत भी रत्नजड़ित कटकों (शिखरों) से युक्त है और राजा जिस प्रकार मुकुट से शोभायमान होता है उसी प्रकार वह पर्वत भी चूलिका रूपी देदीप्यमान मुकुट से शोभायमान है इस प्रकार वर्णनयुक्त तथा जिनमन्दिरों से शोभायमान वह मेरु पर्वत स्वयंबुद्ध मन्त्रीने देखा ॥ १६२-१७५ ॥ अद्भुत शोभायुक्त उस मेरु पर्वतको देखता हुआ वह मन्त्री अत्यन्त आनन्दको प्राप्त हुआ और बड़े आश्चर्यसे उसके समीपवर्ती प्रदेशोंका नीचे लिखे अनुसार निरूपण करने लगा ॥१७६॥ इस गिरिराजने अपनी शिखरोंके अग्रभागसे समस्त आकाशरूपी आंगनको घेर लिया है जिससे ऐसा शोभायमान होता है मानो लोकनाड़ीकी लम्बाई ही नाप रहा हो ॥१७७॥ मनोहर तथा घनी छायावाले वृक्षोंसे शोभायमान इस पर्वतकी शिखरोंपर वे देव लोग अपनी-अपनी देवियोंके साथ सदा निवास करते हैं ॥१७८॥ इस पर्वतके प्रत्यन्त पर्वत (समीप-

---

१ -धिनीलाम्भो- अ०, म०, द०, स०, प०, ल०, । * जम्बूद्वीपमहीभर्तुः सादृश्याभावात् जम्बूद्वीपमहीभर्तुरिति रूपकमयुक्तमिति न शङ्कनीयम् । सभाजनैरिवानेकद्वीपैः [illegible] साम्यसद्भावात् । 'यथा कथञ्चित् सादृश्य यत्रोद्भूतं प्रतीयते' इति वचनात् । नन्विदमुपलक्षणं न तु रूपकस्यैवेति वाच्य 'उपमैव तिरोभूतभेदा रूपकमिष्यते' इति वचनात् । २ ध्वनिः । ३ अत्र श्लोके पत्रशब्देन कमलिनीपत्राणि गृह्यन्ते । ४ सुरासुरसभागृहोत्कासिवमलश्रियः । ५ सुखमेव आस्रवरसः मकरन्दरसः तत्र आसक्ता जीवा एव भृङ्गाऽल्यः ता बिभर्ति तस्य । ६ काल एवानिलस्तेनोद्धृतम् । ७ रत्नमयसानुसहितम् । पक्षे रत्नमयकरवलयसहितम् । ८ पक्षे कलशोपलक्षितमुकुटम् । ९ तमद्भुत- अ०, ल० । १० उत्सेधम् । ११ प्रमाता । १२ शृङ्गेषु । 'वसोऽनुपाध्याङ्' इति सूत्रात् सप्तम्यर्थे द्वितीया विभक्तिर्भवति । १३ प्रत्यन्त पर्वताः । १४ मेरोः । १५ नायाति- म०, ल० ।

गजदन्तावयोऽस्यैते [1]लक्ष्यन्ते पादसंश्रिताः । [2]भक्त्या निषधनीलाभ्यामिव हस्ताः प्रसारिताः ॥१८०॥
इमे चैनं महानद्यौ सीतासीतोदकाह्वये । क्रोशद्वयादनासृत्य [3]यातोऽम्भोधिं भयादिव ॥१८१॥
अस्य पर्यन्तभूभागं सदालङ्कुरुते द्रुमैः । भद्रशालपरिक्षेपः[4] कुरुलक्ष्मीमधिक्षिपन्[5] ॥१८२॥
इतो नन्दनमुद्यानमितं सौमनसं वनम् । [6]इतः पाण्डुकमाभाति शश्वत्कुसुमितद्रुमम् ॥१८३॥
इतोऽर्द्धचन्द्रवृत्ताभा कुरवोऽमी चकासते । इतो जम्बूद्रुमः श्रीमान् इतः शाल्मलिपादपः ॥१८४॥
अमी चैत्यगृहा भान्ति वनेष्वस्य जिनेशिनाम् । रत्नभाभासिभिः कूटैः द्योतयन्तो नभोऽङ्गणम् ॥१८५॥
शश्वत्पुण्यजनाकीर्णः सोद्यानः सजिनालयः । पर्यन्तस्थसरित्क्षेत्रो नगोऽयं नगरायते ॥१८६॥
सङ्गतस्याङ्गभृद्भृङ्गैः क्षेत्रपत्रोपशोभिनः । जम्बूद्वीपाम्बुजस्यास्य नगोऽयं कर्णिकायते ॥१८७॥
इति प्रकटितोदारमहिमा भूभृतां पतिः । मन्ये जगत्त्रयायाममद्याप्येष विलङ्घते ॥१८८॥
तमित्थावर्णयन् दूरात् स्वयम्बुद्धः समासदत् । ध्वजहस्तैरिवाहूतः सादरं जिनमन्दिरैः ॥१८९॥
अकृत्रिमाननाद्यन्तान् [7]नित्यालोकान् सुरार्चितान् । जिनालयान् समासाद्य स परां मुदमाययौ ॥१९०॥
[8]सपर्यया स [9]पर्येत्य भूयो भक्त्या प्रणम्य च । भद्रसालादिचैत्यानि वन्दते स्म यथाक्रमम् ॥१९१॥

वर्ती छोटी-छोटी पर्वतश्रेणियाँ) यहाँ से लेकर निषध और नील पर्वततक चले गये हैं सो ठीक ही है बड़ोंकी चरणसेवा करनेवाला कौन पुरुष बड़प्पनको प्राप्त नहीं होता? ॥१७९॥ इसके चरणों (प्रत्यन्त पर्वतों) के आश्रित रहनेवाले ये गजदन्त पर्वत ऐसे जान पड़ते हैं मानों निषध और नील पर्वतने भक्तिपूर्वक सेवाके लिये अपने हाथ ही फैलाये हों ॥१८०॥ ये सीता सीतोदा नामकी महानदियाँ मानो भयसे ही इसके पास नहीं आकर दो कोशकी दूरीसे समुद्रकी ओर जा रही हैं ॥१८१॥ इस पर्वतके चारों ओर यह भद्रशाल वन है जो अपनी शोभासे देवकुरु तथा उत्तरकुरुकी शोभाको तिरस्कृत कर रहा है और अपने वृक्षोंके द्वारा इस पर्वत सम्बन्धी चारों ओरके भूमिभागको सदा अलंकृत करता रहता है ॥१८२॥ इधर नन्दनवन, इधर सौमनस वन और इधर पाण्डुक वन शोभायमान है। ये तीनों ही वन सदा फूले हुए वृक्षोंसे अत्यन्त मनोहर हैं ॥१८३॥ इधर ये अर्धचन्द्राकार देवकुरु तथा उत्तरकुरु शोभायमान हो रहे हैं, इधर शोभावान् जम्बूवृक्ष है और इधर यह शाल्मली वृक्ष है ॥१८४॥ इस पर्वतके चारों वनोंमें ये जिनेन्द्रदेवके चैत्यालय शोभायमान हैं जो कि रत्नोंकी कान्तिसे भासमान अपनी शिखरोंके द्वारा आकाशरूपी आंगनको प्रकाशित कर रहे हैं ॥१८५॥ यह पर्वत सदा पुण्यजनों (यक्षों) से व्याप्त रहता है। अनेक बाग-बगीचे तथा जिनालयोंसे सहित है तथा इसके समीप ही अनेक नदियाँ और विदेह क्षेत्र विद्यमान हैं इसलिये यह किसी नगरके समान मालूम हो रहा है। क्योंकि नगर भी सदा पुण्यजनों (धर्मात्मा लोगों) से व्याप्त रहता है, बाग-बगीचे और जिन मन्दिरोंसे सहित होता है तथा उसके समीप अनेक नदियाँ और खेत विद्यमान रहते हैं ॥१८६॥ अथवा यह पर्वत संसारी जीवरूपी भ्रमरोंसे सहित तथा भरतादि क्षेत्ररूपी पत्रोंसे शोभायमान इस जम्बूद्वीपरूपी कमल की कर्णिकाके समान भासित होता है ॥१८७॥ इस प्रकार उत्कृष्ट महिमासे युक्त यह सुमेरु पर्वत, जान पड़ता है कि आज भी तीनों लोकोंकी लम्बाईका उलंघन कर रहा है ॥१८८॥ इस तरह दूर से ही वर्णन करता हुआ स्वयंबुद्ध मन्त्री उस मेरुपर्वतपर ऐसा जा पहुँचा मानो जिन मन्दिरोंने अपने ध्वजारूपी हाथोंसे उसे आदर सहित बुलाया ही हो ॥१८९॥ वहाँ अनादिनिधन, हमेशा प्रकाशित रहनेवाले और देवोंसे पूजित अकृत्रिम चैत्यालयोंको पाकर वह स्वयंबुद्ध मन्त्री परम आनन्दको प्राप्त हुआ ॥१९०॥ उसने पहले प्रदक्षिणा दी। फिर भक्तिपूर्वक बार-बार नमस्कार किया और फिर पूजा की। इस प्रकार यथाक्रमसे भद्रशाल आदि वनोंकी समस्त अकृत्रिम

---

१ लक्षन्ते ल०। २ भक्त्यै द०,ट०। भजनाय। ३ गच्छतः। ४ परिवलयः। परिक्षेपं स०, अ०। ५ तिरस्कुर्वन्। अधिक्षिपत् अ०। ६ भद्रशालादुपरि। ७ सन्ततप्रकाशकान्। ८ पूजया। ९ प्रदक्षिणीकृत्य।

स सौमनसपौरस्त्यदिग्भागजिनवेश्मनि[1] । कृतार्चनविधिर्भक्त्या प्रणम्य क्षणमासितः[2] ॥१९२॥
[3]प्राग्विदेहमहाकच्छविषयारिष्टसत्पुरात् । आगतौ सहसैक्षिष्ट मुनी गगनचारिणौ ॥१९३॥
आदित्यगतिमप्रण्यं[4] तथारिञ्जयशब्दनम्[5] । युगन्धरमहातीर्थसरसीहंसनायकौ ॥१९४॥
तावभ्येत्य समभ्यर्च्य प्रणम्य च पुनःपुनः । पप्रच्छेति [6]सुखासीनौ मनीषी [7]स्वमनीषितम् ॥१९५॥
भगवन्तौ युवां ब्रूतं किञ्चित् पृच्छामि हृद्गतम् । भवन्तौ हि जगद्बोधविधौ[8] धत्तोऽवधित्विषम् ॥१९६॥
अस्मत्स्वामी खगाधीशः ख्यातोऽस्तीह महाबलः । स भव्यसिद्धिराहोस्वित् अभव्यः संशयोऽत्र मे ॥१९७॥
जिनोपदिष्टसन्मार्गम् अस्मद्वाक्यान्[9] प्रमाणयन् । स किं [10]श्रद्धास्यते नेति [11]जिज्ञासे [12]वामनुग्रहात् ॥१९८॥
इति प्रश्नमुपन्यस्य[13] तस्मिन् विश्रान्तिमीयुषि[14] । तयोरादित्यगत्याख्यः समाख्यदवधेक्षणः ॥१९९॥
भो भव्य, भव्य एवासौ [15]प्रत्येष्यति च [16]ते वचः । दशमे जन्मनीतश्च तीर्थकृत्त्वमवाप्स्यति ॥२००॥
द्वीपे जम्बूमतीहैव विषये भारताह्वये । [17]जनितैश्य[18]युगारम्भे भगवानादितीर्थकृत् ॥२०१॥
इतोऽतीतभवञ्चास्य वक्ष्ये शृणु समासतः । धर्मबीजमनेनोप्तं यत्र भोगेच्छयान्वितम् ॥२०२॥
इहैवापरतो मेरोर्विदेहे गन्धिलाभिधे । पुरे सिंहपुराभिख्ये पुरन्दरपुरोपमे ॥२०३॥
श्रीषेण इत्यभूद्राजा [19]राजेव प्रियदर्शनः । देवी च सुन्दरी तस्य बभूवात्यन्तसुन्दरी ॥२०४॥
जयवर्माह्वयः सोऽयं तयोः सूनुरजायत । श्रीवर्मेति च तस्याभूत् अनुजो जनताप्रियः ॥२०५॥

प्रतिमाओंकी वन्दना की ॥१९१॥ वन्दनाके बाद उसने सौमनसवनके पूर्व दिशा सम्बन्धी चैत्यालयमें पूजा की तथा भक्तिपूर्वक प्रणाम करके क्षणभरके लिये वह वहीं बैठ गया ॥१९२॥

इतनेमें ही उसने पूर्व विदेह क्षेत्रसम्बन्धी महाकच्छ देशके अरिष्ट नामक नगरसे आये हुए, आकाशमें चलनेवाले आदित्यगति और अरिंजय नामके दो मुनि अकस्मात् देखे। वे दोनों ही मुनि युगन्धर स्वामीके समवसरण रूपी सरोवरके मुख्य हंस थे ॥१९३-१९४॥ अतिशय बुद्धिमान् स्वयंबुद्ध मन्त्रीने सम्मुख जाकर उनकी पूजा की, बार-बार प्रणाम किया और जब वे सुखपूर्वक बैठ गये तब उनसे नीचे लिखे अनुसार अपने मनोरथ पूछे ॥१९५॥ हे भगवन्, आप जगत्को जाननेके लिये अवधिज्ञान रूपी प्रकाश धारण करते हैं इसलिये आपसे मैं कुछ मनोगत बात पूछता हूं, कृपाकर उसे कहिये ॥१९६॥ हे स्वामिन्, इस लोकमें अत्यन्त प्रसिद्ध विद्याधरोंका अधिपति राजा महाबल हमारा स्वामी है वह भव्य है अथवा अभव्य ? इस विषयमें मुझे संशय है ॥१९७॥ जिनेन्द्रदेवके कहे हुए सन्मार्गका स्वरूप दिखानेवाले हमारे वचनोंको जैसे वह प्रमाणभूत मानता है वैसे श्रद्धान भी करेगा या नहीं ? यह बात मैं आप दोनोंके अनुग्रहसे जानना चाहता हूं ॥१९८॥ इस प्रकार प्रश्न कर जब स्वयंबुद्ध मन्त्री चुप हो गया तब उनमेंसे आदित्यगति नामके अवधिज्ञानी मुनि कहने लगे ॥१९९॥ हे भव्य, तुम्हारा स्वामी भव्य ही है, वह तुम्हारे वचनोंपर विश्वास करेगा और दसवें भवमें तीर्थंकर पद भी प्राप्त करेगा ॥२००॥ वह इसी जम्बूद्वीपके भरत नामक क्षेत्रमें आनेवाले युगके प्रारम्भमें ऐश्वर्यवान् प्रथमतीर्थंकर होगा ॥२०१॥ अब मैं संक्षेपसे इसके उस पूर्वभवका वर्णन करता हूं जहाँ कि इसने भोगोंकी इच्छाके साथ-साथ धर्मका बीज बोया था। हे राजन्, तुम सुनो ॥२०२॥

इसी जम्बूद्वीपमें मेरुपर्वतसे पश्चिमकी ओर विदेह क्षेत्रमें एक गन्धिला नामका देश है उसमें सिंहपुर नामका नगर है जो कि इन्द्रके नगरके समान सुन्दर है। उस नगरमें एक श्रीषेण नामका राजा हो गया है। वह राजा चन्द्रमाके समान सबको प्रिय था। उसकी एक अत्यन्त सुन्दर सुन्दरी नामकी स्त्री थी ॥२०३-२०४॥ उन दोनोंके पहले जयवर्मा नामका पुत्र हुआ और उसके बाद

---

१ पूर्वदिग्भागस्थजिनगृहे । २ स्थितः । -मास्थितः द०, म० । ३ पूर्वविदेहः । ४ मुख्यम् । ५ अरिञ्जयाख्यम् । ६ सुखोपविष्टौ । ७ स्वेप्सितम् । ८ बोधविधाने । ९ वाक्यं प्र-अ०, द०, स०, प० । १० श्रद्धानं करिष्यते । ११ ज्ञातुमिच्छामि । १२ युवयोः । १३ उपन्यासं कृत्वा । १४ गच्छति सति । १५ विश्वासं करिष्यति । १६ च तद्वचः म० । १७ भविष्यति । १८ भविष्यद्युगप्रारम्भे । १९ चन्द्र इव ।

[1]पित्रोरपि निसर्गेण कनीयानभवत् प्रियः। प्रायः [2]अपत्यसाम्येऽपि क्वचित् प्रीतिः प्रजायते ॥२०६॥
जनानुरागमुत्साहं[3] पिता दृष्ट्वा कनीयसि। राज्यपट्टं बबन्धास्य ज्यायान् [4]समवधीरयन् ॥२०७॥
जयवर्माथ निर्वेदं परं प्राप्य तपोऽग्रहीत्। स्वयंप्रभगुरोः पार्श्वे [5]स्वमपुण्यं [6]विगर्हयन् ॥२०८॥
नवसंयत एवासौ [7]यान्तमृद्ध्या [8]महीधरम्। खे खेचरेशमुद्वीक्ष्य वीक्ष्यासीत् सनिदानकः ॥२०९॥
महाखेचरभोगा हि भूयासुर्मेऽन्यजन्मनि। इति ध्यायन्नसौ दष्टो वल्मीकाग्रीमभोगिना ॥२१०॥
भोगं [10]काम्यन् विसृष्टासुरिह भूत्वा महाबलः।सोऽ[11]नाशितम्भवान्[12]भोगान् भुङ्क्तेऽद्य खचरोचितान्॥२११
[13]ततो भोगेष्वसावेवं चिरकालमरज्यत। भवद्वचोऽधुना श्रुत्वा क्षिप्रमेभ्यो [14]विरंस्यति ॥२१२॥
सोऽद्य रात्रौ समैक्षिष्ट स्वप्ने दुर्मन्त्रिभिस्त्रिभिः। निमज्ज्यमानमात्मानं बालात् पङ्के दुरुत्तरे ॥२१३॥
ततो [15]निर्भर्त्स्य तान् दुष्टान् दुःपङ्कादुद्धृतं त्वया। अभिषिक्तं [16]स्वमैक्षिष्ट निविष्टं हरिविष्टरे ॥२१४॥
दीप्तामेकां च सज्ज्वालां क्षीयमाणामनुक्षणम्[17]। [18]क्षणप्रभामिवालोलाम् अपश्यत् क्षणदाक्षये[19] ॥२१५॥
दृष्ट्वा स्वप्नावतिस्पष्टं त्वामेव [20]प्रतिपालयन्। आस्ते तस्मात् त्वमाश्वेव गत्वैनं प्रतिबोधय ॥२१६॥
स्वप्नद्वयमदः पूर्वं त्वत्तः श्रुत्वातिविस्मितः। प्रीतो भवद्वचःकृत्स्नं[21] स करिष्यत्यसंशयम् ॥२१७॥

उसका छोटा भाई श्रीवर्मा हुआ। वह श्रीवर्मा सब लोगोंको अतिशय प्रिय था ॥२०५॥ वह छोटा पुत्र माता-पिताके लिये भी स्वभावसे ही प्यारा था सो ठीक ही है सन्तानपना समान रहनेपर भी किसीपर अधिक प्रेम होता ही है ॥२०६॥ पिता श्रीषेणने मनुष्योंका अनुराग तथा उत्साह देख कर छोटे पुत्र श्रीवर्माके मस्तकपर ही राज्यपट्ट बांधा और इसके बड़े भाई जयवर्माकी उपेक्षा कर दी ॥२०७॥ पिताकी इस उपेक्षासे जयवर्माको बड़ा वैराग्य हुआ जिससे वह अपने पापोंकी निन्दा करता हुआ स्वयंप्रभगुरुसे दीक्षा लेकर तपस्या करने लगा ॥२०८॥ जयवर्मा अभी नवदीक्षित ही था–उसे दीक्षा लिये हुए बहुत समय नहीं हुआ था कि उसने विभूतिके साथ आकाशमें जाते हुए महीधर नामके विद्याधरको आँख उठाकर देखा। उस विद्याधरको देखकर जयवर्माने निदान किया कि मुझे आगामी भवमें बड़े-बड़े विद्याधरोंके भोग प्राप्त हैं। वह ऐसा विचार ही रहा था कि इतनेमें एक भयंकर सर्पने बामीसे निकलकर उसे डस लिया। वह भोगोंकी इच्छा करते हुए ही मरा था इसलिये यहाँ महाबल हुआ है और कभी तृप्त न करनेवाले विद्याधरोंके उचित भोगोंको भोग रहा है। पूर्वभवके संस्कारसे ही वह चिरकाल तक भोगोंमें अनुरक्त रहा है किन्तु आपके वचन सुनकर शीघ्र ही इनसे विरक्त होगा ॥२०९–२१२॥ आज रातको उसने स्वप्नमें देखा है कि तुम्हारे सिवाय अन्य तीन दुष्ट मन्त्रियोंने उसे बलात्कार किसी भारी कीचड़में फंसा दिया है और तुमने उन दुष्ट मन्त्रियोंकी भर्त्सना कर उसे कीचड़से निकाला है और सिंहासनपर बैठाकर उसका अभिषेक किया है ॥२१३–२१४॥ इसके सिवाय दूसरे स्वप्नमें देखा है कि अग्निकी एक प्रदीप्त ज्वाला बिजली के समान चंचल और प्रतिक्षण क्षीण होती जा रही है। उसने ये दोनों स्वप्न आज ही रात्रिके अन्तिम समयमें देखे हैं ॥२१५॥ अत्यन्त स्पष्ट रूपसे दोनों स्वप्नोंको देख वह तुम्हारी प्रतीक्षा करता हुआ ही बैठा है इसलिये तुम शीघ्र ही जाकर उसे समझाओ ॥२१६॥ वह पूछनेके पहले ही आपसे इन दोनों स्वप्नोंको सुनकर अत्यन्त विस्मित होगा और प्रसन्न होकर निःसन्देह आपके समस्त वचनोंको स्वीकार करेगा ॥२१७॥

१ जननीजनकयोः। २ पुत्रत्वसमानेऽपि। ३ व्यवसायम्। 'उत्साहो व्यवसायः स्यात् सवीर्यमतिशक्तिभाक्' इत्यमरः। ४ अवज्ञां कुर्वन्। ५ आत्मीयम्। ६ निन्दन्। ७ गच्छन्तम्। ८ महीधरनामानम्। ९ भोगस्ते प०, द०, ल०,। १० भोगं काम्यतीति भोगं काम्यन्। भोगकाम–अ०, स०। भोगकाम्यन् द०। ११ सोऽनाशितभव भोगान् अ०, स०, द०। १२ अतृप्तिकरान्। १३ कारणात्। १४ विरक्तो भविष्यति। १५ सन्तर्ज्य। १६ आत्मानम्। १७ अनन्तरक्षणमेव। १८ तडिद्। १९ रात्र्यन्ते। २० प्रतीक्षमाणः। २१ –वः सूक्ष्म स अ०, द०, स०।

तृषितः पयसीवाब्दात् पतिते चातकोऽधिकम्। [1]जनुषान्ध इवानन्धङ्करणे[2] परमौषधे[3] ॥२१८॥
रुचिमेष्यति सद्धर्मे त्वत्तः सोऽद्य प्रबुद्धधीः। दूत्येव मुक्तिकामिन्याः काललब्ध्या प्रचोदितः ॥२१९॥
विद्धि तन्नाविपुण्यर्द्धिपिशुनं स्वप्नमादिमम्। द्वितीयं च तदीयायुरतिह्रास[4]निवेदकम् ॥२२०॥
मासमात्रावशिष्टञ्च जीवितं तस्य [5]निश्चिनु। तदस्य श्रेयसे भद्र [6]घटेथास्त्वमशीतकः[7] ॥२२१॥
इत्युदीर्य[8] ततोऽन्तर्द्धिम्[9] अगात् सोऽम्बरचारणः। सम सधर्मणादित्यगतिराशास्य[10] मन्त्रिणम्[11] ॥२२२॥
स्वयम्बुद्धोऽपि तद्वाक्यश्रवणात् किञ्चिदाकुलः। द्रुतं [12]प्रत्यावृतस्तस्य प्रतिबोधविधायकः ॥२२३॥
सत्वरञ्च समासाद्य तं च दृष्ट्वा महाबलम्। चारणर्षिवचोऽशेषम् आख्यत् स्वप्नफलावधि ॥२२४॥
[13]हन्त दुःखानुबन्धानां [14]हन्ता धर्मो जिनोदितः। तस्मात् तस्मिन् मतिं धत्स्व मतिमन्निति चान्वशात्[15] ॥
ततः स्वायुःक्षयं बुद्ध्वा स्वयम्बुद्धान्महाबलः। तनुत्यागे मतिं धीमान् अधत्त विधिवत्तदा ॥२२६॥
कृत्वाष्टाह्निकमिद्धर्द्धिः महामहमहापयत्[16]। दिवसान् स्वगृहोद्यानजिनवेश्मनि भक्तितः ॥२२७॥
सुतायातिबलाख्याय दत्वा राज्यं समृद्धिमत्। सर्वानापृच्छ्य[17] मन्त्र्यादीन् परं स्वातन्त्र्यमाश्रितः ॥२२८॥
सिद्धकूटमुपेत्याशु परार्ध्यं जिनमन्दिरम्। सिद्धार्चास्तत्र संपूज्य स [18]संन्यास्थदसाध्वसः ॥२२९॥
यावज्जीवं कृताहारशरीरत्यागसंगरः[19]। गुरुसाक्षि समारुक्षद् वीरशय्याममूढधीः ॥२३०॥

जिस प्रकार प्यासा चातक मेघसे पड़े हुए जलमें, और जन्मान्ध पुरुष तिमिर रोग दूर करनेवाली श्रेष्ठ औषधिमें अतिशय प्रेम करता है उसी प्रकार मुक्तिरूपी स्त्रीकी दूतीके समान काललब्धि के द्वारा प्रेरित हुआ महाबल आपसे प्रबोध पाकर समीचीन धर्ममें अतिशय प्रेम करेगा ॥२१८॥ २१९ ॥ राजा महाबलने जो पहला स्वप्न देखा है उसे तुम उसके आगामीभवमें प्राप्त होने वाली विभूतिका सूचक समझो और द्वितीय स्वप्नको उसकी आयुके अतिशय ह्रासको सूचित करने वाला जानो ॥ २२० ॥ यह निश्चित है कि अब उसकी आयु एक माहकी ही शेष रह गई है इसलिए हे भद्र, इसके कल्याणके लिए शीघ्र ही प्रयत्न करो, प्रमादी न होओ ॥२२१॥ यह कहकर और स्वयंबुद्ध मन्त्रीको आशीर्वाद देकर गगनगामी आदित्यगति नामके मुनिराज अपने साथी अरिंजयके साथ साथ अन्तर्हित हो गये ॥२२२ ॥ मुनिराजके वचन सुननेसे कुछ व्याकुल हुआ स्वयंबुद्ध भी महाबलको समझानेके लिए शीघ्र ही वहाँसे लौट आया ॥२२३॥ और तत्काल ही महाबलके पास जाकर उसे प्रतीक्षामें बैठा हुआ देख प्रारम्भसे लेकर स्वप्नोंके फल पर्यन्त विषयको सूचित करनेवाले ऋषिराजके समस्त वचन सुनाने लगा ॥२२४॥ तदनन्तर उसने यह उपदेश भी दिया कि हे बुद्धिमन्, जिनेन्द्र भगवान्‌का कहा हुआ यह धर्म ही समस्त दुःखोंकी परम्पराका नाश करनेवाला है इसलिए उसीमें बुद्धि लगाइये, उसीका पालन कीजिए ॥ २२५ ॥ बुद्धिमान् महाबलने स्वयंबुद्धसे अपनी आयुका क्षय जानकार विधिपूर्वक शरीर छोड़ने— समाधिमरण धारण करनेमें अपना चित्त लगाया ॥२२६ ॥ अतिशय समृद्धिशाली राजा अपने घरके बगीचेके जिनमन्दिरमें भक्ति पूर्वक आष्टाह्निक महायज्ञ करके वहीं दिन व्यतीत करने लगा ॥ २२७ ॥ वह अपना वैभवशाली राज्य अतिबल नामक पुत्रको सौंपकर तथा मन्त्री आदि समस्त लोगोंसे पूछकर परम स्वतन्त्रताको प्राप्त हो गया ॥ २२८ ॥ तत्पश्चात् वह शीघ्र ही परमपूज्य सिद्धकूट चैत्यालय पहुँचा। वहां उसने सिद्ध प्रतिमाओं की पूजा कर निर्भय हो संन्यास धारण किया ॥२२९॥ बुद्धिमान् महाबलने गुरुकी साक्षी पूर्वक जीवन पर्यन्तके लिये आहार पानी तथा शरीरसे ममत्व छो-

---

१ जन्मान्धः। २ अन्धमनन्धं करणमनन्धङ्करणं तस्मिन्। ३ -करणं परमौषधम् अ०। ४ स्वल्पत्वम्। ५ निश्चितम् अ०, स०। ६ चेष्टां कुरु। ७ अमन्दः। ८ उक्त्वा। ९ तिरोधानम्। १० आशीर्वादं दत्वा। -राशस्य ब०। ११ तन्मत्रम् म०, प०, ट०। तदभीष्टम्। धर्मवृद्धिमिति यावत्। १२ निजपुरं प्रत्यागतः। १३ [हन्त सम्बोधने, हे महाबल!]। १४ घातकः। १५ शिक्षामकरोत्। १६ अनयत्। -महापयन् अ०, स०। १७ सन्तोषं नीत्वा। १८ संन्यसनमकरोत्। १९ प्रतिज्ञा।

आरुह्याराधनानावं तितीर्षुर्भवसागरम् । निर्यापकं स्वयम्बुद्धं बहु मेने महाबलः ॥२३१॥
सर्वत्र समतां मैत्रीम् अनौत्सुक्यञ्च[1] भावयन् । सोऽभून्मुनिरिवासङ्गः त्यक्तबाह्यतरोपधिः[2] ॥२३२॥
देहाहारपरित्यागव्रतमास्थाय धीरधीः । परमाराधनाशुद्धिं स भेजे [3]सुसमाहितः ॥२३३॥
प्रायोपगमनं कृत्वा धीरः स्वपरगोचरान् । उपकारानसौ नैच्छत् शरीरेऽनिच्छतां गतः ॥२३४॥
तीव्रं [4]तपस्यतस्तस्य [5]तनिमानमगात् तनुः । परिणामस्त्ववर्धिष्ट स्मरतः परमेष्ठिनाम् ॥२३५॥
[6]अनाशुषोऽस्य गात्राणां परं शिथिलताऽभवत् । नारूढायाः प्रतिज्ञाया व्रतं हि महतामिदम् ।२३६।।
शरद्घन इवारूढकार्श्यो[7]ऽभूत् [8]स रसक्षयात् । मांसासृजवियुक्तं च देहं सुर इवाबिभः[9] ॥२३७॥
गृहीतमरणारम्भव्रतं तं वीक्ष्य चक्षुषी । शुचेव क्वापि संलीने प्राग्विलासाद् [10]विरेमतुः ॥२३८॥
कपोलावस्य संशुष्यत् असृङ्मांसत्वचावपि । रूढौ कान्त्यानपायिन्या नौज्झिष्टां प्राक्तनीं श्रियम्॥२३९॥

इनेकी प्रतिज्ञा की और वीरशय्या आसन धारण की ॥२३०॥ वह महाबल आराधनारूपी नावपर आरूढ़ होकर संसाररूपी सागरको तैरना चाहता था इसलिये उसने स्वयंबुद्ध मन्त्रीको निर्यापकाचार्य (सल्लेखनाकी विधि कराने वाले आचार्यपक्षमें, नाव चलाने वाला खेवड़िया) बनाकर उसका बहुत ही सन्मान किया ॥ २३१ ॥ वह शत्रु मित्र आदिमें समता धारण करने लगा, सब जीवोंके साथ मैत्रीभावका विचार करने लगा, हमेशा अनुत्सुक रहने लगा और बाह्य-आभ्यन्तर परिग्रहका त्यागकर परिग्रहत्यागी मुनिके समान मालूम होने लगा ॥२३२ ॥ वह धीर वीर महाबल शरीर तथा आहार त्याग करनेका व्रत धारण कर आराधनाओंकी परम विशुद्धिको प्राप्त हुआ था उस समय उसका चित्त भी अत्यन्त स्थिर था ॥ २३३ ॥ उस धीर वीरने प्रायोपगमन नामका संन्यास धारण कर शरीरसे बिलकुल ही स्नेह छोड़ दिया था इसलिये वह शरीर रक्षाके लिये न तो स्वकृत उपकारोंकी इच्छा रखता था और न परकृत उपकारोंकी ॥२३४॥

भावार्थ–सन्न्यास मरणके तीन भेद हैं–१ भक्त प्रत्याख्यान, २ इंगिनीमरण और ३ प्रायोपगमन । (१) भक्तप्रतिज्ञा अर्थात् भोजनकी प्रतिज्ञा कर जो सन्न्यासमरण हो उसे भक्तप्रतिज्ञा कहते हैं, इसका काल अन्तर्मुहूर्तसे लेकर बारह वर्ष तकका है । (२) अपने शरीरकी सेवा स्वयं करे, किसी दूसरेसे रोगादिका उपचार न करावे ऐसे विधानसे जो सन्न्यास धारण किया जाता है उसे इंगिनीमरण कहते हैं । (३) और जिसमें स्वकृत और परकृत दोनों प्रकारके उपचार न हों उसे प्रायोपगमन कहते हैं । राजा महाबलने प्रायोपगमन नामका तीसरा सन्न्यास धारण किया था ॥२३५॥ कठिन तपस्या करनेवाले महाबल महाराजका शरीर तो कृश हो गया था परन्तु पञ्चपरमेष्ठियोंका स्मरण करते रहनेसे परिणामोंकी विशुद्धि बढ़ गयी थी ॥२३५॥ निरन्तर उपवास करनेवाले उन महाबलके शरीरमें शिथिलता अवश्य आ गयी थी परन्तु ग्रहण की हुई प्रतिज्ञामें रंचमात्र भी शिथिलता नहीं आई थी, सो ठीक है क्योंकि प्रतिज्ञामें शिथिलता नहीं करना ही महापुरुषोंका व्रत है ॥२३६॥ शरीरके रक्त, मांस आदि रसोंका क्षय हो जानेसे वह महाबल शरद् ऋतुके मेघोंके समान अत्यन्त दुर्बल हो गया था । अथवा यों समझिये कि उस समय वह राजा देवोंके समान रक्त, मांस आदिसे रहित शरीरको धारण कर रहा था ॥२३७॥ राजा महाबलने मरणका प्रारम्भ करनेवाले व्रत धारण किये हैं यह देखकर उसके दोनों नेत्र मानो शोकसे ही कहीं जा छिपे थे और पहलेके हाव-भाव आदि विलासोंसे विरत हो गये थे ॥२३८॥ यद्यपि उसके दोनों गालोंके रक्त, मांस तथा चमड़ा आदि सब सूख गये थे तथापि

१ विषयेष्वलाम्पत्यम् । २ परिग्रहः । ३ सुष्ठु सन्नद्धः । ४ तपस्कुर्वतः । ५ अतिकृशत्वम् । ६ अश्नातीत्येवंशीलः अश्नान् न अश्नान् अनश्नान् तस्य अनाशुषः । ७ कृशस्य भावः । ८ देहो महाबलश्च । ९ बिभर्ति स्म । १० अपसरतः स्म ।

मितान्तपीवरावंसौ केयूरकिणकर्कशौ । तदास्योज्झितकाठिन्यौ मृदिमानमुपेयतुः ॥२४०॥
[1]आभुग्नमुदरञ्चास्य [2]विवलीभङ्गसङ्गमम् । निवातनिस्तरङ्गाम्बुसरः शुष्यदिवाभवत् ॥२४१॥
[3]तपस्तनूनपात्तापाद् दिदीपेऽधिकमेव सः । कनकाश्म इवाध्मातः[4] परां शुद्धिं समुद्वहन् ॥२४२॥
असह्यं तनुसन्तापं सहमानस्य हेलया । ययुः परीषहाभङ्गमभङ्गस्यास्य [5]सङ्गरे ॥२४३॥
त्वगस्थीभूतदेहोऽपि यद् व्यजेष्ट परीषहान् । स्वसमाधिबलाद् व्यक्तं स तदासीन् महाबलः ॥२४४॥
[6]मूर्ध्नि लोकोत्तमान् सिद्धान् स्थापयन् हृदयेऽर्हतः । शिरःकवचमस्त्रञ्च स चक्रे साधुभिस्त्रिभिः ॥२४५॥
चक्षुषी[7] परमात्मानम् अद्राष्टामस्य योगतः । [8]अश्रौष्टां परमं मन्त्रं श्रोत्रे जिह्वा तमापठत् ॥२४६॥
मनोगर्भगृहेऽर्हन्तं विधायासौ निरञ्जनम् । प्रदीपमिव निर्धूतध्वान्तोऽभूद् ध्यानतेजसा ॥२४७॥
द्वाविंशतिदिनान्येष कृतसल्लेखनाविधिः । जीवितान्ते [9]समाधाय मनः स्वं परमेष्ठिषु ॥२४८॥
नमस्कारपदान्यन्तर्जल्पेन [10]निभृतं जपन् । ललाटपटविन्यस्तहस्तपङ्कजकुड्मलः ॥२४९॥
कोशादसेरिवान्यत्वं देहाज्जीवस्य भावयन् । भावितात्मा सुखं प्राणान् औज्झत् सन्मन्त्रिसाक्षिकम् ॥२५०॥

उन्होंने अपनी अविनाशिनी कान्तिके द्वारा पहलेकी शोभा नहीं छोड़ी थी–वे उस समय भी पहलेकी ही भाँति सुन्दर थे ॥२३९॥ समाधिग्रहणके पहले उसके जो कन्धे अत्यन्त स्थूल तथा बाहुबन्धकी रगड़से अत्यन्त कठोर थे उस समय वे भी कठोरताको छोड़कर अतिशय कोमलताको प्राप्त हो गये थे ॥२४०॥ उसका उदर कुछ भीतरकी ओर झुक गया था और त्रिवली भी नष्ट हो गयी थी इसलिए ऐसा जान पड़ता था मानो हवाके न चलनेसे तरंगरहित सूखता हुआ तालाब ही हो ॥२४१॥ जिस प्रकार अग्निमें तपाया हुआ सुवर्ण पाषाण अत्यन्त शुद्धिको धारण करता हुआ अधिक प्रकाशमान होने लगता है उसी प्रकार वह महाबल भी तपरूपी अग्निसे तप्त हो अत्यन्त शुद्धिको धारण करता हुआ अधिक प्रकाशमान होने लगता था ॥२४२॥ राजा असह्य शरीर सन्तापको लीलामात्रमें ही सहन कर लेता था तथा कभी किसी विपत्तिसे पराजित नहीं होता था इसलिए उसके साथ युद्ध करते समय परीषह ही पराजयको प्राप्त हुए थे, परीषह उसे अपने कर्त्तव्यमार्गसे च्युत नहीं कर सके थे ॥२४३॥ यद्यपि उसके शरीरमें मात्र चमड़ा और हड्डी ही शेष रह गयी थी तथापि उसने अपनी समाधिके बलसे अनेक परीषहोंको जीत लिया था इसलिए उस समय वह यथार्थमें 'महाबल' सिद्ध हुआ था ॥२४४॥ उसने अपने मस्तकपर लोकोत्तम परमेष्ठीको तथा हृदयमें अरहंत परमेष्ठीको विराजमान किया था और आचार्य उपाध्याय तथा साधु इन तीन परमेष्ठियोंके ध्यानरूपी टोप-कवच और अस्त्र धारण किये थे ॥२४५॥ ध्यानके द्वारा उसके दोनों नेत्र मात्र परमात्माको ही देखते थे, कान परम मन्त्र (णमोकार मन्त्र) को ही सुनते थे और जिह्वा उसीका पाठ करती थी ॥२४६॥ वह राजा महाबल अपने मनरूपी गर्भगृहमें निर्धूम दीपकके समान कर्ममलकलंकसे रहित अर्हन्त परमेष्ठीको विराजमान कर ध्यानरूपी तेजके द्वारा मोह अथवा अज्ञानरूपी अन्धकारसे रहित हो गया था ॥२४७॥ इस प्रकार महाराज महाबल निरन्तर बाईस दिन तक सल्लेखनाकी विधि करते रहे। जब आयुका अन्तिम समय आया तब उन्होंने अपना मन विशेष रूपसे पञ्चपरमेष्ठियोंमें लगाया। उसने हस्तकमल जोड़कर ललाट पर स्थापित किये और मन ही मन निश्चल रूपसे नमस्कार मन्त्रका जाप करते हुए, म्यानसे तलवारके समान शरीरसे जीवको पृथक चिन्तवन करते हुए और अपने

१ आकुञ्चितम्। २ विगतवलीभङ्गः। ३ अग्नितापात्। ४ सन्तप्तः। ५ प्रतिज्ञाया युद्धे च। ६ शिखायाम्। 'शिखा हृदयं शिरः कवचम् अस्त्रम्' चेति पञ्च स्थानानि तत्र पञ्च नमस्कारं पञ्चधा कृत्वा योजयन् इत्यर्थः। ७ 'परमात्मानमद्राष्टामस्य योगतः' अत्र परमात्मशब्देन अर्हन् प्रतिपाद्यते। ध्यानसामर्थ्यादर्हन् चक्षुर्विषयोऽभूदित्यर्थः। पिहिते कारागारे इत्यादिवत्। ८ अशृणुताम्। ९ समाधानं कृत्वा। १० निश्चलं यथा भवति तथा।

मन्त्रशक्त्या यथा पूर्वं स्वयंबुद्धो न्यधाद् बलम्[1] । [2]तथापि मन्त्रशक्त्यैव बलं न्यास्थन् महाबले ॥२५१॥
साचिव्यं सचिवेनेति कृतमस्य [3]निरत्ययम् । तदा धर्मसहायत्वं निर्व्यपेक्षं प्रकुर्वता ॥२५२॥
देहभारमथोत्सृज्य लघूभूत इव क्षणात् । प्रापत् स कल्पमैशानम् [4]अनल्पसुखसन्निधिम् ॥२५३॥
तत्रोपपादशय्यायाम् उदपादि महोदयः । विमाने श्रीप्रभे रम्ये ललिताङ्गः सुरोत्तमः ॥२५४॥
यथा वियति वीताभ्रे [5]साभ्रा विद्युद् विरोचते । तथा वैक्रियिकी दिव्या तनुरस्याचिरादभात् ॥२५५॥
नवयौवनपूर्णो [6]ना सर्वलक्षणसंभृतः । सुप्तोत्थितो यथा भाति तथा सोऽन्तर्मुहूर्ततः ॥२५६॥
[7]ज्वलत्कुण्डलकेयूरमुकुटाङ्गदभूषणः । स्रग्वी सदंशुकधरः प्रादुरासीन् महाद्युतिः ॥२५७॥
तस्य रूपं तदा रेजे निमेषालसलोचनम् । झषद्वयेन निष्कम्पस्थितेनेव सरोजलम् ॥२५८॥
बाहुशाखोज्ज्वलं श्रीमत्तलपल्लवकोमलम् । नेत्रभृङ्गं वपुस्तस्य भेजे कल्पाङ्घ्रिपश्रियम् ॥२५९॥
ललितं ललिताङ्गस्य दिव्यं रूपमयोनिजम् । इत्येव वर्णनास्यास्तु किं वा वर्णनयानया ॥२६०॥
पुष्पवृष्टिस्तदापतत् मुक्ता कल्पद्रुमैः स्वयम् । दुन्दुभिस्तनितं मन्द्रं जजृम्भे रुद्धदिक्तटम् ॥२६१॥
मृदुराधूतमन्दारनन्दनादाहरन् रजः । सुगन्धिराववौ मन्दमनिलोऽम्बुकणान् किरन् ॥२६२॥
ततोऽसौ वलितां किञ्चिद् दृशं व्यापारयन् [8]दिशाम् । समन्तादानमद्देवकोटिदेहप्रभाजुषाम् ॥२६३॥

शुद्ध आत्मस्वरूपकी भावना करते हुए, स्वयंबुद्धमन्त्रीके समक्ष सुखपूर्वक प्राण छोड़े ॥२४८-२५०॥ स्वयंबुद्ध मन्त्री जिस प्रकार पहले अपने मन्त्रशक्ति (विचार शक्ति) के द्वारा महाबलमें बल (शक्ति अथवा सेना) सन्निहित करता रहता था उसी प्रकार उस समय भी वह मन्त्रशक्ति (पञ्चनमस्कार मन्त्रके जापके प्रभाव) के द्वारा उसमें आत्मबल सन्निहित करता रहा, उसका धैर्य नष्ट नहीं होने दिया ॥२५१॥ इस प्रकार निःस्वार्थ भावसे महाराज महाबलकी धर्मसहायता करनेवाले स्वयंबुद्ध मन्त्रीने अन्ततक अपने मन्त्रीपनेका कार्य किया ॥२५२॥ तदनन्तर वह महाबलका जीव शरीररूपी भार छोड़ देनेके कारण मानो हलका होकर विशाल सुख सामग्रीसे भरे हुए ऐशान स्वर्गको प्राप्त हुआ । वहाँ वह श्रीप्रभ नामके अतिशय सुन्दर विमानमें उपपाद शय्यापर बड़ी ऋद्धिका धारक ललिताङ्ग नामका उत्तम देव हुआ ॥२५३-२५४॥ मेघरहित आकाशमें श्वेत बादलों सहित बिजलीकी तरह उपपाद शय्यापर शीघ्र ही उसका वैक्रियिक शरीर शोभायमान होने लगा ॥२५५॥ वह देव अन्तर्मुहूर्तमें ही नवयौवनसे पूर्ण तथा सम्पूर्ण लक्षणोंसे सम्पन्न होकर उपपाद शय्यापर ऐसा सुशोभित होने लगा मानो सब लक्षणोंसे सहित कोई तरुण पुरुष सोकर उठा हो ॥२५६॥ देदीप्यमान कुण्डल केयूर मुकुट और बाजूबंद आदि आभूषण पहिने हुए, मालासे सहित और उत्तम वस्त्रोंको धारण किये हुए ही वह अतिशय कान्तिमान् ललिताङ्ग नामक देव उत्पन्न हुआ ॥२५७॥ उस समय टिमकार रहित नेत्रोंसे सहित उसका रूप निश्चल बैठी हुई दो मछलियों सहित सरोवरके जलकी तरह शोभायमान हो रहा था ॥२५८॥ अथवा उसका शरीर कल्पवृक्षकी शोभा धारण कर रहा था क्योंकि उसकी दोनों भुजाएँ उज्ज्वल शाखाओं के समान थीं, अतिशय शोभायमान हाथोंकी हथेलियाँ कोमल पल्लवोंके समान थीं और नेत्र भ्रमरोंके समान थे ॥२५९॥ अथवा ललिताङ्गदेवके रूपका और अधिक वर्णन करनेसे क्या लाभ है ? उसका वर्णन तो इतना ही पर्याप्त है कि वह योनिके बिना ही उत्पन्न हुआ था और अतिशय सुन्दर था ॥२६०॥ उस समय स्वयं कल्पवृक्षोंके द्वारा ऊपरसे छोड़ी हुई पुष्पोंकी वर्षा हो रही थी और दुन्दुभिका गम्भीर शब्द दिशाओंको व्याप्त करता हुआ निरन्तर बढ़ रहा था ॥२६१॥ जलकी छोटी-छोटी बूँदोंको बिखेरता और नन्दन वनके हिलते हुए कल्पवृक्षोंसे पुष्पपराग ग्रहण करता हुआ अतिशय सुहावना पवन धीरे-धीरे वह रहा था ॥२६२॥ तदनन्तर सब

---

१ बल चतुरङ्ग बलं सामर्थ्यम् । २ तदापि ब०,अ०,स०,प० । ३ निरतिक्रमम् । ४ सम्यक्स्थानम् । ५ शुभ्रमेघसमन्विता । ६ पुरुषः । ७ अयं श्लोकः 'म' पुस्तके नास्ति । ८ दिक्षु ।

अहो परममैश्वर्यं किमेतत् कोऽस्मि [1]किंन्विमे। आनमन्त्येत्य मां दूरात् इत्यासीद् विस्मितः क्षणम्॥२६४॥
क्वायातोऽस्मि कुतो वाऽद्य प्रप्रसीदति मे मनः। शय्यातलमिदं कस्य रम्यः कोऽयं [2]महाश्रमः॥२६५॥
इति चिन्तयतस्तस्य क्षणादवधिरुद्ययौ। तेनाबुद्ध सुरः सर्वं स्वयम्बुद्धादिवृत्तकम्॥२६६॥
[3]अये, तपःफलं दिव्यम् अयं स्वर्गो महाद्युतिः। इमे देवास्समुत्सर्पद्देहोद्योताः प्रणामिनः॥२६७॥
विमानमेतदुद्भासि कल्पपादपवेष्टितम्। इमा मञ्जुगिरो देव्या शिञ्जानमणिनूपुराः॥२६८॥
अप्सरःपरिवारोऽयम् इतो नृत्यति सस्मितम्। गीयते कलमामन्द्रम् इतश्च [4]मुरवध्वनिः॥२६९॥
इति निश्चित्य तत्सर्वं भवप्रत्ययतोऽवधेः। शय्योत्सङ्गे सुखासीनो नानारत्नांशुभासुरे॥२७०॥
जयेश विजयिन् नन्द [5]नेत्रानन्द महाद्युते। वर्धस्वेत्युद्गिरो[6] नम्राः तमासीदन्[7] दिवौकसः॥२७१॥
सप्रश्रयमथोपेत्य [8]स्वनियोगप्रचोदिताः। ते तं विज्ञापयामासुः इति प्रणतमौलयः॥२७२॥
प्रतीच्छ प्रथमं नाथ [9]सज्जं मज्जनमङ्गलम्। ततः पूजां जिनेन्द्राणां कुरु पुण्यानुबन्धिनीम्॥२७३॥
ततो बलमिदं दैवं[10] भवद्दैवबलार्जितम्। समालोकय [11]संघट्टैः समापतदितस्ततः॥२७४॥
इतः [12]प्रेक्षस्व [13]संप्रेक्ष्याः [14]प्रेक्षागृहमुपागताः। सलीलभ्रूलतोत्क्षेपं नटन्तीः सुरनर्तकीः॥२७५॥
मनोज्ञवेषभूषाश्च देवीर्देवाद्य [15]मानय। [16]दैवभूयस्य सम्प्राप्तौ फलमेतावदेव हि॥२७६॥

ओरसे नमस्कार करते हुए करोड़ों देवोंके शरीरकी प्रभासे व्याप्त दिशाओंमें दृष्टि घुमाकर ललिताङ्गदेवने देखा कि यह परम ऐश्वर्य क्या है? मैं कौन हूँ? और ये सब कौन हैं? जो मुझे दूर-दूरसे आकर नमस्कार कर रहे हैं। ललिताङ्गदेव यह सब देखकर क्षणभरके लिये आश्चर्यसे चकित हो गया॥२६३-२६४॥ मैं यहाँ कहाँ आ गया? कहाँसे आया? आज मेरा मन प्रसन्न क्यों हो रहा है? यह शय्यातल किसका है? और यह मनोहर महान् आश्रम कौन सा है? इस प्रकार चिन्तवन कर ही रहा था कि उसे उसी क्षण अवधि ज्ञान प्रकट हो गया। उस अवधि ज्ञानके द्वारा ललिताङ्ग देवने स्वयंबुद्ध मंत्री आदिके सब समाचार जान लिये॥२६५-२६६॥ 'यह हमारे तपका मनोहर फल है, यह अतिशय कान्तिमान् स्वर्ग है, ये प्रणाम करते हुए तथा शरीरका प्रकाश सब ओर फैलाते हुए देव हैं, यह कल्प वृक्षोंसे घिरा हुआ शोभायमान विमान है, ये मनोहर शब्द करती तथा रुनझुन शब्द करनेवाले मणिमय नूपुर पहने हुई देवियाँ हैं, इधर यह अप्सराओंका समूह मन्द-मन्द हँसता हुआ नृत्य कर रहा है, इधर मनोहर और गम्भीर गान हो रहा है, और इधर यह मृदंग बज रहा है' इस प्रकार भवप्रत्यय अवधि-ज्ञानसे पूर्वोक्त सभी बातोंका निश्चयकर वह ललिताङ्गदेव अनेक रत्नोंकी किरणोंसे शोभायमान शय्यापर सुखसे बैठा ही था कि नमस्कार करते हुए अनेक देव उसके पास आये। वे देव ऊँचे स्वरसे कह रहे थे कि हे स्वामिन्, आपकी जय हो। हे विजयशील, आप समृद्धिमान् हैं। हे नेत्रोंको आनन्द देनेवाले, महाकान्तिमान्, आप सदा बढ़ते रहें—आपके बल-विद्या ऋद्धि आदिकी सदा वृद्धि होती रहे॥२६७-२७१॥ तत्पश्चात् अपने-अपने नियोगसे प्रेरित हुए अनेक देव विनय सहित उसके पास आये और मस्तक झुकाकर इस प्रकार कहने लगे कि हे नाथ, स्नानकी सामग्री तैयार है इसलिये सबसे पहले मङ्गलमय स्नान कीजिये॥ फिर आपके भाग्यसे प्राप्त हुई तथा अपने-अपने गटों (छोटी टुकड़ियों) के साथ जहाँ तहाँ (सब ओर से) आनेवाली देवोंकी सब सेना अवलोकन कीजिये॥ इधर नाट्यशालामें आकर, लीला सहित भौंह नचाकर नृत्य करती हुई, दर्शनीय सुन्दर देव नर्तकियोंको देखिये। हे देव, आज मनोहर वेष भूषासे युक्त

१ के त्विमे अ०, प०, द०, स०। २ आश्रयः। ३ अहो। इदं अ०,स०। ४ मुरजध्वनिः द०,अ०, प०। ५ नेत्रानन्दिन् प०। नेत्रानन्दिमहा–द०, स०। ६ उच्चवचनाः। ७ आगच्छन्ति स्म। ८ –गनिवेदनः अ०,स०,द०। ९ सज्जीकृतम्। १० सुकृतम्। ११ सम्मर्दैः। १२ आलोकय। १३ दर्शनीयाः। १४ नाट्य-शालाम्। १५ सत्कुरु। १६ देवत्वस्य।

इति तद्वचनादेतत् स सर्वमकरोत् कृती । स्वनियोगानतिक्रान्तिः महतां भूषणं परम् ॥२७७॥
निष्टप्तकनकच्छायः सप्तहस्तोच्चविग्रहः । वस्त्राभरणमालाद्यैः सहजैरेव[1] भूषितः ॥२७८॥
सुगन्धिबन्धुरामोद[2]निःश्वासो लक्षणोज्ज्वलः । स दिव्यानन्वभूद् भोगान् अणिमादिगुणैर्युतः ॥२७९॥
भेजे वर्षसहस्रेण मानसीं स [3]तनुस्थितिम् । पक्षेणैकेन चोच्छ्वासं प्रवीचारोऽस्य कायिकः ॥२८०।
तनुच्छायामिवाम्लानिं दधानः स्रजमुज्ज्वलाम् । शरत्काल इवाधत्त स दिव्यमरजोऽम्बरम्[4] ॥२८१॥
सहस्राण्यभवन्[5] देव्यः चत्वार्यस्य परिग्रहः । चतस्रश्च महादेव्यः चारुलावण्यविभ्रमाः ॥२८२॥
स्वयंप्रभाग्रिमा देवी द्वितीया कनकप्रभा । कनकादिलतान्यासीत् देवी विद्युल्लतापरा ॥२८३॥
रामाभिरभिरामाभिः आभिर्भोगाननारतम् । भुञ्जानस्यास्य कालोऽगात् अनल्पः पुण्यपाकजान् ॥२८४॥
तदायुर्जलधेर्मध्ये [6]वीचीमाला इवाकुलाः । विलीयन्ते स्म भूयस्यो देव्यः स्वायुःस्थितिच्युतेः ॥२८५॥
पल्योपमपृथक्त्वा[7]वशिष्टमायुर्यदास्य च । तदोदपादि पुण्यैः स्वैः [8]प्रेयस्यस्य स्वयंप्रभा ॥२८६॥
अथ सा [9]कृतनेपथ्या प्रभातरलविग्रहा । पत्युरङ्क[10]गता रेजे कल्पश्रीरिव रूपिणी ॥२८७॥
सैषा स्वयंप्रभाऽस्यासीत् परा [11]सौहार्दभूमिका । चिरं मधुकरस्येव [12]प्रत्यग्रा चूतमञ्जरी ॥२८८॥
स्वयंप्रभाननालोकतद्गात्रस्पर्शनोत्सवैः । स रेमे करिणीसक्तः करीव सुचिरं सुरः ॥२८९ ।

तौ तु वासवदुर्दान्तौ यावली[1]कविचक्षणौ । दृष्ट्वास्मत्पट्टकं हृष्टा स्वानुमानादवोचताम् ॥११२॥
पट्टकार्थं[2] स्फुटं विद्वो[3] जातिस्मृतिमुपेयुषी । व्यलिखद्राजपुत्रीदं स्वपूर्वभवचेष्टितम् ॥११३॥
इति नागरिकत्वेन प्रवृत्तौ नायकब्रुवौ[4] । ताववोचं विहस्याहं चिरात् स्यादिदमीदृशम् ॥११४॥
हठात् प्रकृतगूढार्थं संप्रश्ने च मया कृते । जोष[5]मास्तां विलक्षौ[6] तौ मूकीभूय ततो गतौ ॥११५॥
[7]श्वसुर्यस्ते युवा वज्रजङ्घस्तत्रागमत्ततः । दिव्येन वपुषा कान्त्या दीप्त्या[8] चानुपमो भुवि ॥११६॥
अथ प्रदक्षिणीकृत्य भव्यस्सजिनमन्दिरम् । स्तुत्वा प्रणम्य चाभ्यर्च्य पट्टशालामुपासदत् ॥११७॥
निर्वर्ण्य[9] पट्टकं तत्र श्रीमानिदमवोचत । [10]ज्ञातपूर्वमिवेदं मे चरितं पट्टकस्थितम् ॥११८॥
वर्णनातीतमत्रेदं[11] चित्रकर्म विराजते । [12]मानोन्मानप्रमाणाढ्यं निम्नोन्नतविभागवत् ॥११९॥
अहो सुनिपुणं चित्रकर्मेदं विलसच्छवि । रसभावान्वितं हारि रेखामाधुर्यसङ्गतम् ॥१२०॥
अत्रास्मद्भवसम्बन्धः[13] पूर्वोऽलेखि[14] सविस्तरम् । [15]श्रीप्रभाधिपतां साक्षात् पश्यामीवेह मामिकाम् ॥१२१॥
अहो स्त्रीरूपमत्रेदं नितरामभिरोचते । स्वयम्प्रभाङ्गसंवादि[16] विचित्राभरणोज्ज्वलम् ॥१२२॥

समझ सके । इसलिये देखकर ही वापिस चले गये थे ॥ १११ ॥ हां, वासव और दुर्दान्त, जो झूठ बोलनेमें बहुत ही चतुर थे, हमारा चित्रपट देखकर बहुत प्रसन्न हुए और फिर अपने अनुमानसे बोले कि हम दोनों चित्रपटका स्पष्ट आशय जानते हैं। किसी राजपुत्रीको जाति-स्मरण हुआ है, इसलिये उसने अपने पूर्व भवकी समस्त चेष्टाएँ लिखी हैं ॥ ११२-११३ ॥ इस प्रकार कहते-कहते वे बड़ी चतुराईसे बोले कि इस राजपुत्रीके पूर्व जन्मके पति हम ही हैं। मैंने बहुत देर तक हँसकर कहा कि कदाचित् ऐसा हो सकता है ॥ ११४ ॥ अनन्तर जब मैंने उनसे चित्रपटके गूढ़ अर्थोंके विषयमें प्रश्न किये और उन्हें उत्तर देनेके लिये बाध्य किया तब वे चुप रह गये और लज्जित हो चुपचाप वहाँसे चले गये ॥११५॥ तत्पश्चात् तेरे श्वसुरका तरुण पुत्र वज्रजंघ वहाँ आया, जो अपने दिव्य शरीर, कान्ति और तेजके द्वारा समस्त भूतलमें अनुपम था ॥ ११६ ॥ उस भव्यने आकर पहले जिनमन्दिरकी प्रदक्षिणा दी। फिर जिनेन्द्रदेवकी स्तुति कर उन्हें प्रणाम किया, उनकी पूजा की और फिर चित्रशालामें प्रवेश किया ॥ ११७ ॥ वह श्रीमान् इस चित्रपटको देखकर बोला कि ऐसा मालूम होता है मानो इस चित्रपटमें लिखा हुआ चरित्र मेरा पहले का जाना हुआ हो ॥ ११८ ॥ इस चित्रपटपर जो यह चित्र चित्रित किया गया है इसकी शोभा वाणीके अगोचर है। यह चित्र लम्बाई चौड़ाई ऊंचाई आदिके ठीक-ठीक प्रमाणसे सहित है तथा इसमें ऊंचे नीचे सभी प्रदेशोंका विभाग ठीक-ठीक दिखलाया गया है ॥ ११९ ॥ अहा, यह चित्र बड़ी चतुराईसे भरा हुआ है, इसकी दीप्ति बहुत ही शोभायमान है, यह रस और भावोंसे सहित है, मनोहर है तथा रेखाओंकी मधुरतासे संगत है ॥ १२० ॥ इस चित्रमें मेरे पूर्वभवका सम्बन्ध विस्तारके साथ लिखा गया है। ऐसा जान पड़ता है मानो मैं अपने पूर्वभवमें होनेवाले श्रीप्रभ विमानके अधिपति ललिताङ्गदेवके स्वामित्वको साक्षात् देख रहा हूँ ॥ १२१ ॥ अहा, यहाँ यह स्त्रीका रूप अत्यन्त शोभायमान हो रहा है। यह अनेक प्रकारके आभरणोंसे

१ मृषा । २ पट्टे स्थितार्थम् । ३ जानीवः । ४ आत्मानं नायकं ब्रुवात इति । ५ तूष्णीम् । ६ लज्जितौ । उक्तञ्च विदग्धचूडामणौ–'विलक्षो विस्मयान्वितः' इत्येतस्य व्याख्यानावसरे 'आत्मनश्चरिते सम्यग्ज्ञातेऽन्तर्यस्य जायते । अपत्रपातिमहती स विलक्ष इति स्मृतः ॥" इति । ७ वरः । ८ तेजसा । ९ अवलोक्य । 'निवर्णनं तु निध्यानं दर्शनालोकनेक्षणम् ।' इत्यमरः । १० पूर्वस्मिन् ज्ञातम् । ११ पटे । १२ "आयामसंश्रितं मानमिह मानं निगद्यते ।' नाहसंश्रितमुन्मानं प्रमाणं व्याससंश्रितम् ॥" १३ सम्बन्धं ल० । १४ पौर्वोऽलेखि म० । १५ श्रीप्रभविमानाधिपतित्वं ललिताङ्गत्वम् । १६ समानम् ।

किन्त्वत्र कतिचित् कस्माद् गूढानि प्रकृतानि भोः । मन्ये सम्मोहनायेदं जनानामिति चित्रितम् ॥१२३॥
ऐशानो लिखितः कल्पः श्रीप्रभं च प्रभास्वरम्[१] । [२]श्रीप्रभाधिपतेः पार्श्वे दर्शितेयं स्वयम्प्रभा ॥१२४॥
कल्पानोकहवीथीयम् इदमुत्पङ्कजं सरः । दोलागृहमिदं रम्यं रम्योऽयं कृतकाचलः ॥१२५॥
कृतप्रणयकोपेयं दर्शितात्र पराङ्मुखी । मन्दारवनवीथ्यन्ते लतेव पवनाहता ॥१२६॥
[३]कनकाद्रितटे क्रीडा ललिता दर्शितावयोः । इतो मणितटोत्सर्पत्प्रभाकाण्डपटावृते[४] ॥१२७॥
निगूढ[५]प्रेमसद्भावकैतवापादितेर्ष्यया । शय्योत्सङ्गे[६] मदुत्सङ्गात्[७] बलात् पादोऽर्पितोऽनया ॥१२८॥
मणिनूपुरझङ्कारचारुणा चरणेन माम् । ताडयन्तीह संरुद्धा काञ्च्या सख्येव गौरवात् ॥१२९॥
कृतव्यलीककोपं मां प्रसादयितुमानता । स्वोत्तमाङ्गेन पादौ मे घटयन्तीह दर्शिता ॥१३०॥
अच्युतेन्द्रसमायोगगुरु[८]पूजादिविस्तरः । दर्शितोऽत्र निगूढस्तु भावः प्रणयजो मिथः[९] ॥१३१॥
इह प्रणयकोपेऽस्याः पादयोर्निपतन्निह । कर्णोत्पलेन मृदुना ताड्यमानो न दर्शितः ॥१३२॥
सालक्तकपदाङ्गुष्ठमुद्रयाऽस्मदुरःस्थले । वाल्लभ्यलाञ्छनं[१०] दत्तं प्रियया नात्र दर्शितम् ॥१३३॥

उज्ज्वल है और ऐसा जान पड़ता है मानो स्वयंप्रभाका ही रूप हो ॥ १२२ ॥ किन्तु इस चित्रमें कितने ही गूढ़ विषय क्यों दिखलाये गये हैं ? मालूम होता है कि अन्य लोगोंको मोहित करनेके लिये ही यह चित्र बनाया गया है ॥ १२३ ॥ यह ऐशान स्वर्ग लिखा गया है। यह देदीप्यमान श्रीप्रभविमान चित्रित किया गया है और यह श्रीप्रभविमानके अधिपति ललिताङ्गदेवके समीप स्वयंप्रभादेवी दिखलाई गई हैं ॥ १२४ ॥ यह कल्पवृक्षोंकी पंक्ति है, यह फूले हुए कमलोंसे शोभायमान सरोवर है, यह मनोहर दोलागृह है और यह अत्यन्त सुन्दर कृत्रिम पर्वत है ॥ १२५ ॥ इधर यह प्रणय-कोप कर पराङ्मुख बैठी हुई स्वयंप्रभा दिखलाई गई है जो कल्पवृक्षोंके समीप वायुसे झकोरी हुई लताके समान शोभायमान हो रही है ॥१२६॥ इधर तट भाग पर लगे हुए मणियोंकी फैलती हुई प्रभारूपी परदासे तिरोहित मेरुपर्वतके तट पर हम दोनोंकी मनोहर क्रीड़ा दिखलाई गई है ॥ १२७ ॥ इधर, अन्तःकरणमें छिपे हुए प्रेमके साथ कपटसे कुछ ईर्ष्या करती हुई स्वयंप्रभाने यह अपना पैर हठपूर्वक मेरी गोदीसे हटाकर शय्याके मध्यभाग पर रक्खा है ॥ १२८ ॥ इधर, यह स्वयंप्रभा मणिमय नू-पुरोंकी झंकारसे मनोहर अपने चरणकमलके द्वारा मेरा ताड़न करना चाहती है परन्तु गौरवके कारण ही मानो सखीके समान इस करधनीने उसे रोक दिया है ॥ १२९ ॥ इधर दिखाया गया है कि मैं बनावटी कोप किये हुए बैठा हूँ और मुझे प्रसन्न करनेके लिये अति नम्रीभूत हुई स्वयंप्रभा अपना मस्तक मेरे चरणों पर रख रही है ॥ १३० ॥ इधर यह अच्युत स्वर्गके इन्द्रके साथ हुई भेंट तथा पिहितास्रव गुरुकी पूजा आदिका विस्तार दिखलाया गया है और इस स्थान पर परस्परके प्रेम भावसे उत्पन्न हुआ रति आदि भाव दिखलाया गया है ॥ १३१ ॥ यद्यपि इस चित्रमें अनेक बातें दिखला दी गई हैं; परन्तु कुछ बातें छूट भी गई हैं। जैसे कि एक दिन मैं प्रणय-कोपके समय इस स्वयंप्रभाके चरणोंपर पड़ा था और यह अपने कोमल कर्णफूलसे मेरा ताड़न कर रही थी; परन्तु वह विषय इसमें नहीं दिखाया गया है ॥ १३२ ॥ एक दिन इसने मेरे वक्षःस्थल पर महावर लगे हुए अपने पैरके अंगूठेसे छाप लगाई थी। वह छाप क्या थी मानो 'यह हमारा पति है' इस बातको सूचित करनेवाला चिह्न

---

१ प्रभास्करम् अ० । २ विमानम् । ३ मेरु । ४ यवनिका । ५ नितरां गूढो निगूढः, प्रेम्णः सद्भावः अस्तित्वं प्रेमसद्भावः । निगूढः प्रेमसद्भावो यस्याः सा । कैतवेनापादिता ईर्ष्या यस्याः सा । निगूढप्रेमसद्भावा चासौ कैतवापादितेर्ष्या च तया । ६ मध्ये । ७ अङ्कात् । ८ गुरुः पिहितास्रवः । ९ रहसि । १० वल्लभाया भावो वाल्लभ्यं तस्य चिह्नम् ।

कपोलफलके चास्याः [1]फलिनीफलसत्त्विषि । लिखन्नालेख्य[2]पत्राणि नाहमत्र निदर्शितः ॥१३४॥
नूनं स्वयम्प्रभाचर्याहस्तनैपुण्यमीदृशम् । नान्यस्य स्त्रीजनस्येदृक् प्रावीण्यं स्यात् कलाविधौ ॥१३५॥
इति प्रतर्कयन्[3]नेव पर्याकुल इव क्षणम् । शून्यान्तःकरणोऽध्यासीत् [4]किमप्यामीलितेक्षणः ॥१३६॥
उदश्रुलोचनश्चायं दशामन्त्या[5]मिवोपयन् । दिष्ट्या संधारितोऽभ्येत्य तदा सख्येव मूर्च्छया ॥१३७॥
तदवस्थं तमालोक्य नाहमेवोन्मनायिता[6] । चित्रस्थान्यपि रूपाणि प्राया[7]न्प्रायोऽन्तरार्द्रताम् ॥१३८॥
[8]प्रत्याश्वासमथानीतः सोपायं परिचारिभिः । त्वदर्पितमनोवृत्तिः सोऽदर्शत्त्वन्म[9]यीर्दिशः ॥१३९॥
अचिराल्लब्धसंज्ञश्च[10] पृष्टवानिति मामसौ । भद्रे केनेदमालेख्ये[11] लिखितं नः पुरेहितम्[12] ॥१४०॥
प्रत्युक्तश्च मयेत्यस्ति स्त्रीसर्ग[13]स्यैकनायिका । दुहिता मातुलान्यास्ते श्रीमतीति पतिंवरा[14] ॥१४१॥
तां विद्धि मदनस्येव पताकामुज्ज्वलांशुकाम्[15] । स्त्रीसृष्टेरिव निर्माण[16]रेखां माधुर्यशालिनीम् ॥१४२॥
समग्रयौवनारम्भसूत्रपातैरिवायतैः । दृष्टिपातैः [17]स्वभूस्तस्याः श्लाघते शरकौशलम् ॥१४३॥
लक्ष्मीकराग्रसंसक्तलीलाम्बुजजिगीषया । तद्वक्त्रेन्दुः सदा भाति नूनं दन्तांशुपेशलः ॥१४४॥

ही था। परन्तु वह विषय भी यहाँ नहीं दिखाया गया है ॥ १३३ ॥ मैंने इसके प्रियंगु फलके समान कान्तिमान् कपोलफलक पर कितनी ही बार पत्र-रचना की थी, परन्तु वह विषय भी इस चित्रमें नहीं दिखाया है ॥ १३४ ॥ निश्चयसे यह हाथकी ऐसी चतुराई स्वयंप्रभाके जीवकी ही है क्योंकि चित्रकलाके विषयमें ऐसी चतुराई अन्य किसी स्त्रीके नहीं हो सकती ॥ १३५ ॥ इस प्रकार तर्क-वितर्क करता हुआ वह राजकुमार व्याकुलकी तरह शून्यहृदय और निमीलितनयन होकर क्षणभर कुछ सोचता रहा ॥ १३६ ॥ उस समय उसकी आँखोंसे आंसू झर रहे थे वह अन्तकी मरण अवस्थाको प्राप्त हुआ ही चाहता था कि दैव योगसे उसी समय मूर्च्छाने सखीके समान आकर उसे पकड़ लिया, अर्थात् वह मूर्च्छित हो गया ॥ १३७ ॥ उसकी वैसी अवस्था देखकर केवल मुझे ही विषाद नहीं हुआ था; किन्तु चित्रमें स्थित मूर्तियोंका अन्तःकरण भी आर्द्र हो गया था ॥ १३८ ॥ अनन्तर परिचारकोंने उसे अनेक उपायोंसे सचेत किया किन्तु उसकी चित्तवृत्ति तेरी ही ओर लगी रही। उसे समस्त दिशाएँ ऐसी दिखती थीं मानो तुझसे ही व्याप्त हों ॥ १३९ ॥ थोड़ी ही देर बाद जब वह सचेत हुआ तो मुझसे इस प्रकार पूछने लगा कि हे भद्रे, इस चित्रमें मेरे पूर्व भवकी ये चेष्टाएँ किसने लिखी हैं ? ॥ १४० ॥ मैंने उत्तर दिया कि तुम्हारी मामीकी एक श्रीमती नामकी पुत्री है वह स्त्रियोंकी सृष्टि की एक मात्र मुख्य नायिका है—वह स्त्रियोंमें सबसे अधिक सुन्दर है और पति-वरण करनेके योग्य अवस्थामें विद्यमान है– अविवाहित है ॥ १४१ ॥ हे राजकुमार, तुम उसे उज्ज्वल वस्त्रसे शोभायमान कामदेवकी पताका ही समझो, अथवा स्त्रीसृष्टिकी माधुर्यसे शोभायमान अन्तिम निर्माण-रेखा ही जानो अर्थात् स्त्रियोंमे इससे बढ़कर सुन्दर स्त्रियोंकी रचना नहीं हो सकती ॥ १४२ ॥ उसके लम्बायमान कटाक्ष क्या हैं मानो पूर्ण यौवनके प्रारम्भको सूचित करनेवाले सूत्रपात ही हैं। उसके ऐसे कटाक्षोंसे ही कामदेव अपने बाणोंके कौशलकी प्रशंसा करता है अर्थात् उसके लम्बायमान कटाक्षोंको देखकर मालूम होता है कि उसके शरीरमें पूर्ण यौवनका प्रारम्भ हो गया है तथा कामदेव जो अपने बाणोंकी प्रशंसा किया करता है सो उसके कटाक्षोंके भरोसे ही किया करता है ॥ १४३ ॥ उसका मुखरूपी चन्द्रमा सदा दांतोंकी उज्ज्वल किरणोंसे शोभाय-

१ फलिनी प्रियङ्गुः । २ मकरिकापत्राणि । ३ चिन्तयति स्म । ४ ईषत् । ५ मरणावस्थाम् । "क्षुदिदृक्षायतोच्छ्वासा ज्वरदाहाशनारुचीः । सम्मूर्च्छोन्मादमोहान्ताः कान्तामाप्नोत्यनाप्य ना॥" । ६ दुर्मना इवाचरिता। ७ अगच्छन् । ८ पुनरुज्जीवनम् । ९ त्वया निर्वृत्ताः । १० लब्धचैतन्यः । ११ पटे । १२ पूर्वभवचेष्टितम् । परेहितम् म०, ट० । १३ स्त्रीसृष्टेः । १४ कन्यका । १५ उज्ज्वलवस्त्राम् । उज्ज्वलकान्ति च । १६ जीवरेखाम् । १७ स्मरः ।

तस्याश्चरणविन्यासे लाक्षारक्तां पदावलीम् । भ्रमरा लङ्घयन्त्याशु रक्ताम्बुजविशङ्कया ॥१४५॥
कामविद्यामिवादेष्टुं[1] भ्रमर्यः कलनिस्वनाः । तस्याः कर्णोत्पले लग्ना [2]नापयान्त्यपि ताडिताः ॥१४६॥
देवस्य वज्रदन्तस्य प्रियपुत्र्या तयादरात् । कलाकौशलमात्मीयम् इहालेख्ये प्रदर्शितम् ॥१४७॥
लक्ष्मीरिवार्थिनां प्रार्थ्या सैषा कन्या घनस्तनी । [3]मृग्या मृगयते [4]त्वाद्य नान्यस्त्वमिव पुण्यवान् ॥१४८॥
ललिताङ्गं ब्रवीति त्वां प्रिया [5]दिव्येव तन्मृषा । [6]येनेहापि भवान् सौम्यो लक्ष्यते ललिताङ्गकः[7] ॥१४९॥
इत्युक्तस्तु मया साधु पण्डिते साधु जल्पितम् । विधेर्विलसितं[8] चित्रम् [9]अदृष्टार्थप्रसिद्धिषु ॥१५०॥
पश्य जन्मान्तराज्जन्तून् आनीयैवमनन्तरे । भवे संघटयत्याशु[10] विधिर्यातोऽनुलोमताम्[11] ॥१५१॥
द्वीपान्तराद्दिशामन्तात् [12]अन्तरीपादपांनिधेः । विधिर्घटयतीष्टार्थम् आनीयान्वीपतां[13] गतः ॥१५२॥
इतीरय[14]न् वचो भूयः प्रस्विद्यत्करपल्लवः । तदस्मत्पट्टकं पाणौ कृतवान् स कुतूहली ॥१५३॥
स्वपट्टकमिदं चान्यत् मम हस्ते [15]समार्पिपत् । यत्र त्वच्चित्रसंवादि[16] सर्वमालक्ष्यते स्फुटम् ॥१५४॥
सूत्रक्रमः स्फुटोऽत्रास्ति व्यक्तो वर्णक्रमोऽप्ययम् । क्रमो [17]भवानुबन्धस्य [18]प्रत्याहार इवास्त्यहो ॥१५५॥

मान रहता है। इसलिये ऐसा जान पड़ता है मानो लक्ष्मीके हाथमें स्थित क्रीड़ाकमलको ही जीतना चाहता हो ॥ १४४ ॥ चलते समय, उसके लाक्षा रससे रंगे हुए चरणोंको लालकमल समझकर भ्रमर शीघ्र ही घेर लेते हैं ॥ १४५ ॥ उसके कर्णफूल पर बैठी तथा मनोहर शब्द करती हुई भ्रमरियाँ ऐसी मालूम होती है मानो उसे कामशास्त्रका उपदेश ही दे रही हों और इसीलिये वे ताड़ना करने पर भी नहीं हटती हों ॥ १४६ ॥ राजा वज्रदन्तकी प्रियपुत्री उस श्रीमतीने ही इस चित्रमें अपना कलाकौशल दिखलाया है ॥ १४७ ॥ जो लक्ष्मीकी तरह अनेक अर्थीजनोंके द्वारा प्रार्थनीय है अर्थात् जिसे अनेक अर्थीजन चाहते है। जो यौवनवती होनेके कारण स्थूल और कठोर स्तनोंसे सहित है तथा जो अच्छे-अच्छे मनुष्यों द्वारा खोज करनेके योग्य है अर्थात् दुर्लभ है, ऐसी वह श्रीमती आज आपकी खोज कर रही है आपकी खोजके लिये ही उसने मुझे यहाँ भेजा है। इसलिये समझना चाहिये कि आपके समान और कोई पुण्यवान् नहीं है ॥ १४८ ॥ वह प्यारी श्रीमती आपका स्वर्गका (पूर्वभव का) नाम ललिताङ्ग बतलाती है। परन्तु वह झूठ है क्योंकि आप इस मनुष्य-भवमें भी सौम्य तथा सुन्दर अंगोंके धारक होनेसे साक्षात् ललिताङ्ग दिखाई पड़ते हैं ॥ १४९ ॥ इस प्रकार मेरे कहने पर वह राजकुमार कहने लगा कि ठीक पण्डिते, ठीक, तुमने बहुत अच्छा कहा। अभिलषित पदार्थोंकी सिद्धिमें कर्मोंका उदय भी बड़ा विचित्र होता है ॥ १५० ॥ देखो, अनुकूलताको प्राप्त हुआ कर्मोंका उदय जीवोंको जन्मान्तरसे लाकर इस दूसरे भवमें भी शीघ्र मिला देता है ॥ १५१ ॥ अनुकूलताको प्राप्त हुआ दैव अभीष्ट पदार्थको किसी दूसरे द्वीपसे, दिशाओंके अन्तसे, किसी अन्तरीप (टापू) से अथवा समुद्रसे भी लाकर उसका संयोग करा देता है ॥ १५२ ॥ इस प्रकार जो अनेक वचन कह रहा था, जिसके हाथसे पसीना निकल रहा था तथा जिसे कौतूहल उत्पन्न हो रहा था, ऐसे उस राजकुमार वज्रजंघने हमारा चित्रपट अपने हाथमें ले लिया और यह अपना चित्र हमारे हाथमें सौंप दिया। देख, इस चित्रमें तेरे चित्रसे मिलते-जुलते सभी विषय स्पष्ट दिखाई दे रहे है ॥ १५३-१५४ ॥ जिस प्रकार प्रत्याहारशास्त्र (व्याकरणशास्त्र) में सूत्र, वर्ण और धातुओंके

---

१ उपदेशं कर्तुम्। २ नापसरन्ति। ३ मृगयितुं योग्या। ४ भवन्तम्। ५ स्वर्गे। ६ कारणेन। ७ मनोज्ञावयवः। ८ चेष्टितम्। ९ अदृष्टपदार्थः।–मभीष्टार्थ–अ०, प०, स०, ल०। १० संघट्टयत्याशु अ०, प०, स०, द०। ११ अनुकूलताम्। १२ वारिमध्यद्वीपात्। १३ अनुकूलताम्। १४ ब्रुवन्। १५ समर्पयत् अ०, प०, स०, द०। १६ सदृशम्। १७ भावानु–अ०, प०, स०, द०, ल०। १८ अञ्झल्यादि।

इदमर्पयता नूनम् अनुरागो मनोगतः । त्वन्मनोरथसंसिद्धौ [1]सत्यङ्कारोऽर्पितोऽमुना ॥१५६॥
ततः करं प्रसार्यार्थे पुनर्दर्शनमस्तु ते । व्रज व्रजाम इत्युद्गीः निरगात् स जिनालयात् ॥१५७॥
गृहीत्वाहं च तद्वार्ताम् इहागामिति पण्डिता । प्रसारितवती[2] तस्याः पुरस्ताच्चित्रपट्टकम् ॥१५८॥
तन्निर्वर्ण्य चिरं जातप्रत्यया सा समाश्वसीत् । [3]चिरोढप्रौढसंतापा चातकीव घनाघनम् ॥१५९॥
यथा शरन्नदीतीरपुलिनं हंसकामिनी । भव्यावली यथाध्यात्मशास्त्रं प्राप्य प्रमोदते ॥१६०॥
यथा कुसुमितं चूतकाननं कलकण्ठिका । द्वीपं नन्दीश्वरं प्राप्य यथा वा पृतनामरी ॥१६१॥
तथेदं पट्टकं प्राप्य श्रीमत्यासीदनाकुला । मनोज्ञेष्टार्थसम्पत्तिः कस्य वा नोत्कतां[4] हरेत् ॥१६२॥
ततः कृतार्थतां तस्या समर्थयितुकामया । प्रोचे[5] पण्डितया वाचं श्रीमत्यवसरोचितम् ॥१६३॥
दिष्ट्या कल्याणि [6]कल्याणान्यचिरात्त्वमवाप्नुहि । प्रतीहि[7] प्राणनाथेन प्रत्यासन्नं [8]समागमम् ॥१६४॥
मागमस्त्वमनाश्वासं[9] स[10] जोषं[11] गतवानिति । मया सुनिपुणं तस्य भावस्त्वय्युपलक्षितः ॥१६५॥
चिरं विलम्बितो द्वारि वीक्षते मां मुहुर्मुहुः । व्रजन्नपि सुगे[12] मार्गे स्खलत्येव पदे पदे ॥१६६॥

अनुबन्धका क्रम स्पष्ट रहता है उसी प्रकार इस चित्रमें भी रेखाओं, रंगों और अनुकूल भावोंका क्रम अत्यन्त स्पष्ट दिखाई दे रहा है अर्थात् जहां जो रेखा चाहिये वहाँ वही रेखा खींची गई है; जहाँ जो रंग चाहिए वहाँ वही रंग भरा गया है और जहाँ जैसा भाव दिखाना चाहिये वहाँ वैसा ही भाव दिखाया गया है ॥ १५५ ॥ राजकुमारने तुझे यह चित्र क्या सौंपा है मानो अपने मनका अनुराग ही सौंपा है अथवा तेरे मनोरथको सिद्ध करनेके लिये सत्यंकार (बयाना) ही दिया है ॥ १५६ ॥ अपना चित्र मुझे सौंप देनेके बाद राजकुमारने हाथ फैलाकर कहा कि हे आर्ये, तेरा दर्शन फिर भी कभी हो, इस समय जाओ, हम भी जाते है । इस प्रकार कहकर वह जिनालयसे निकलकर बाहिर चला गया ॥ १५७ ॥ और मैं उस समाचारको ग्रहण कर यहाँ आई हूँ । ऐसा कहकर पण्डिताने वज्रजंघका दिया हुआ चित्रपट फैलाकर श्रीमतीके सामने रख दिया ॥ १५८ ॥

उस चित्रपटको उसने बड़ी देर तक गौरसे देखा, देखकर उसे अपने मनोरथ पूर्ण होनेका विश्वास हो गया और उसने सुखकी सांस ली । जिस प्रकार चिरकालसे संतप्त हुई चातकी मेघका आगमन देखकर हर्षित होती है, जिस प्रकार हंसी शरद् ऋतुमें किनारेकी निकली हुई जमीन देखकर प्रसन्न होती है, जिस प्रकार भव्य जीवोंकी पंक्ति अध्यात्मशास्त्रको देखकर प्रमुदित होती है, जिस प्रकार कोयल फूले हुए आमोंका वन देखकर आनन्दित होती है और जिस प्रकार देवोंकी सेना नन्दीश्वर द्वीपको पाकर प्रसन्न होती है; उसी प्रकार श्रीमती उस चित्रपटको पाकर प्रसन्न हुई थी । उसकी सब आकुलता दूर हो गई थी । सो ठीक ही है अभिलषित वस्तुकी प्राप्ति किसकी उत्कंठा दूर नहीं करती ? ॥ १५९-१६२ ॥ तत्पश्चात् श्रीमती इच्छानुसार वर प्राप्त होनेसे कृतार्थ हो जावेगी इस बातका समर्थन करनेके लिये पण्डिता श्रीमतीसे उस अवसरके योग्य वचन कहने लगी ॥ १६३ ॥ कि हे कल्याणि, दैवयोगसे अब तू शीघ्र ही अनेक कल्याण प्राप्त कर । तू विश्वास रख कि अब तेरा प्राणनाथके साथ समागम शीघ्र ही होगा ॥ १६४ ॥ वह राजकुमार वहांसे चुपचाप चला गया इसलिये अविश्वास मत कर, क्योंकि उस समय भी उसका चित्त तुझमें ही लगा हुआ था । इस बातका मैंने अच्छी तरह निश्चय कर लिया है ॥ १६५ ॥ वह जाते समय दरवाजेपर बहुत देर तक विलम्ब करता रहा, बार बार मुझे देखता था

---

१ सत्यापनम् । २ प्रसारयति स्म । ३ प्रवृद्धः । ४ उन्मनस्कतां चित्तव्याकुलताम् । ५ प्रोच्यते स्म । ६ श्रेयांसि । ७ विश्वासं कुरु । ८ संयोगम् । ९ अविश्वासम् । १० वज्रजङ्घः । ११ तूष्णीम् । १२ सुखेन गम्यतेऽस्मिन्निति सुगस्तस्मिन् ।

[1]स्मयते जृम्भते किञ्चित् स्मरत्याराद्विलोकते । श्वसित्युष्णञ्च दीर्घञ्च पटुरस्मिन् स्मरज्वरः ॥१६७॥
तमेव बहुमन्येते पितरौ[2] ते नरोत्तमम् । नृपेन्द्रो[3] भागिनेयत्वाद् भ्रात्रीयत्वाच्च[4] देव्यसौ[5] ॥१६८॥
लक्ष्मीवान् कुलजो दक्षः स्वरूपोऽभिमतः सताम् । इत्यनेको गुणग्रामः तस्मिन्नस्ति वरोचितः ॥१६९॥
सपत्नी श्रीसरस्वत्योः भूत्वा त्वं तदुरोगृहे । चिरं निवस कल्याणि कल्याणशतभागिनी ॥१७०॥
[6]सामान्येनोपमानं ते लक्ष्मीर्नैव सरस्वती । यतोऽपूर्वैव लक्ष्मीस्त्वम् अन्यैव च सरस्वती ॥१७१॥
भिदेलिमदले[7] शश्वत्संकोचिनि रजोजुषि । सा श्रीरश्री[8]रिवोद्भूता कुशेशयकुटीरके[9] ॥१७२॥
सरस्वती च सोच्छिष्टे [10]चलजिह्वाग्रपल्लवे । [11]लब्धजन्मा तयोः क्वत्यः[12] तवैवाभिजनः[13] शुचिः ॥१७३॥
लताङ्गि ललिताङ्गस्य विविक्ते[14] तस्य मानसे । रमस्व राजहंसीव लता[15]ङ्गमितवत्सरान् ॥१७४॥
युवयोरुचितं योगं कृत्वा यातु कृतार्थताम् । विधाता जननिर्वादात्[16] मुच्येत कथमन्यथा ॥१७५॥
समाश्वसिहि तद्भद्रे क्षिप्रमेष्यति ते वरः । त्वद्वरागमने पश्य पुरमुद्वेलकौतुकम्[17] ॥१७६॥

और सुखपूर्वक गमन करने-योग्य उत्तम मार्गमें चलता हुआ भी पद-पदपर स्खलित हो जाता था। वह हँसता था, जँभाई लेता था, कुछ स्मरण करता था, दूर तक देखता था और उष्ण तथा लम्बी सांस छोड़ता था। इन सब चिह्नोंसे जान पड़ता था कि उसमें कामज्वर बढ़ रहा है ॥ १६६–१६७ ॥ वह वज्रजंघ राजा वज्रदन्तका भानजा है और लक्ष्मीमती देवीके भाईका पुत्र (भतीजा) है। इसलिये तेरे माता पिता भी उसे श्रेष्ठ वर समझते हैं। इसके सिवाय वह लक्ष्मीमान् है, उच्चकुलमें उत्पन्न हुआ है, चतुर है, सुन्दर है और सज्जनोंका मान्य है। इस प्रकार उसमें वरके योग्य अनेक गुण विद्यमान हैं ॥ १६६ ॥ हे कल्याणि, तू लक्ष्मी और सरस्वतीकी सपत्नी (सौत) होकर सैकड़ों सुखोंका अनुभव करती हुई चिरकाल तक उसके हृदय रूपी घरमें निवास कर ॥ १७० ॥ यदि सामान्य (गुणोंकी बराबरी) की अपेक्षा विचार किया जावे तो लक्ष्मी और सरस्वती दोनों ही तेरी उपमा को नहीं पा सकतीं; क्योंकि तू अनोखी लक्ष्मी है और अनोखी ही सरस्वती है। जिसके पत्ते फटे हुए हैं, जो सदा सकुचित (संकीर्ण) होता रहता है और जो परागरूपी धूलिसे सहित है ऐसे कमलरूपी झोपड़ीमें जिस लक्ष्मीका जन्म हुआ है उसे लक्ष्मी नहीं कह सकते वह तो अलक्ष्मी है–दरिद्रा है। भला, तुम्हें उसकी उपमा कैसे दी जा सकती है? इसी प्रकार उच्छिष्ट तथा चञ्चल जिह्वाके अग्रभागरूपी पल्लवपर जिसका जन्म हुआ है वह सरस्वती भी नीच कुलमें उत्पन्न होनेके कारण तेरी उपमाको प्राप्त नहीं हो सकती। क्योंकि तेरा कुल अतिशय शुद्ध है–उत्तमकुलमें ही तू उत्पन्न हुई है ॥ १७१–१७३ ॥ हे लताङ्गि (लताके समान कृश अंगोंको धारण करनेवाली) जिस प्रकार पवित्र मानस सरोवरमें राजहंसी क्रीडा किया करती है उसी प्रकार तू भी ललिताङ्ग (वज्रजंघ) के पवित्र और एकान्त मनमें अनेक वर्षों तक क्रीडा कर ॥१७४॥ विधाता तुम दोनोंका योग्य समागमकर कृत्यकृत्यपनेको प्राप्त हो; क्योंकि यदि वह ऐसा नहीं करता अर्थात् तुम दोनोंका समागम नहीं करता तो लोकनिन्दासे कैसे छूटता? ॥१७५॥ इसलिये हे भद्रे, धैर्य धर, तेरा पति शीघ्र ही आवेगा, देख, तेरे पतिके आगमनके लिये सारा नगर कैसा अतिशय कौतुकपूर्ण हो रहा है ॥ १७६ ॥

---

१ ईषद्धसति। २ जननीजनकौ। ३ चक्री। ४ भ्रातृपुत्रत्वात्। ५ लक्ष्मीमतिः। ६ समानधर्मेण। सामान्येन इति पदविभागः। ७ [भिन्नकपाटे] भिन्नपर्णे च। ८ अश्रीः दरिद्रा। ९ तृणकुटीरे। १० चलजिह्वाग्र–अ०, द०, म०, ल०। ११ मुखे जन्म तयोः द०। १२ कुत आगतः। १३ कुलम्। १४ पवित्रे। 'विविक्तौ पूतविजनावित्यभिधानात्। १५ संख्याविशेषः। लतांगमिव म०, ल०। १६ कर्णिकारमथवा जनितान्तम्लानगन्धगुणतो जनितान्तम्। सज्जने हि विधिर-प्रतिमोहस्तस्य युक्तिघटना प्रतिमोहः ॥" इत्यभिजनापवादात्। १७ उत्साहम्।

इत्यादित[1]द्गतालापैः अन्यैस्तां सुखमानयत् । पण्डिता सा[2] तु तत्प्राप्तौ[3] नाद्याप्यासीन्निराकुला ॥१७७॥
तावच्च चक्रिणा बन्धुप्रीतिमातन्वता पराम् । गत्वार्धपथमानीतो वज्रबाहुर्महीपतिः ॥१७८॥
[4]स्वसुः पतिं स्वसारञ्च [5]स्वस्रीयञ्च विलोकयन् । प्रापच्चक्री परां प्रीतिं प्रेम्णे दृष्टा हि बन्धुता[6] ॥१७९॥
सुखसंकथया काञ्चित् स्थित्वा कालकलां पुनः । [7]प्राघूर्णकोचितां तेऽमी सत्क्रियां[8] तेन लम्भिताः[9] ॥१८०॥
चक्रवर्तिकृतां प्राप्य वज्रबाहुः स माननाम्[10] । पिप्रिये ननु संप्रीत्यै सत्कारः प्रभुणा कृतः ॥१८१॥
यथासुखं च संतोषात् स्थितेष्वेवं सनाभिषु । ततश्चक्रधरो वाचम् इत्यवोचत् स्वसुः पतिम् ॥१८२॥
यत्किञ्चिद्रुचितं तुभ्यं वस्तुजालं[11] ममालये । तद्गृहाण यदि प्रीतिः मयि तेऽस्त्यनियन्त्रणा[12] ॥१८३॥
प्रीतेरद्य परां[13] कोटिम् अधिरोहति मे मनः । त्वं सतुक्कः[14] सदारश्च यन्ममाभ्यागतो गृहम् ॥१८४॥
त्वमिष्टबन्धुरायातो गृहं मेऽद्य सदारकः । [15]संविभागोचितः कोऽन्यः प्रस्तावः स्यान्ममेदृशः ॥१८५॥
तदत्रावसरे वस्तु तन्न मे यन्न दीयते । प्रणयिन् प्रणयस्यास्य मा कृथा भङ्गमर्थिनः[16] ॥१८६॥
इत्युक्तः प्रेमनिघ्नेन[17] चक्रिणा प्रत्युवाच सः । त्वत्प्रसादात् ममास्त्येव सर्वं किं प्रार्थ्यमद्य मे ॥१८७॥
[18]साम्नानेनार्पितः स्वेन प्रयुक्तेनेति सादरम् । प्रणयस्य परां भूमिम् अहमारोपि[19]तस्त्वया ॥१८८॥

इसतरह पण्डिताने वज्रजंघ सम्बन्धी अनेक मनोहर बातें कहकर श्रीमतीको सुखी किया, परन्तु वह उसकी प्राप्तिके विषयमें अब तक भी निराकुल नहीं हुई ॥ १७७ ॥

इधर पण्डिताने श्रीमतीसे जबतक सब समाचार कहे तबतक महाराज वज्रदन्त, विशाल भ्रातृप्रेमके साथ आधी दूर तक जाकर वज्रबाहु राजाको ले आये ॥ १७८ ॥ राजा वज्रदन्त अपने बहनोई, बहिन और भानजेको देखकर परम प्रीतिको प्राप्त हुए सो ठीक ही है क्योंकि इष्टजनोंका दर्शन प्रीतिके लिये ही होता है ॥ १७९ ॥ तदनन्तर कुछ देर तक कुशल मंगलकी बातें होती रहीं और फिर चक्रवर्तीकी ओरसे सब पाहुनोंका उचित सत्कार किया गया ॥ १८० ॥ स्वयं चक्रवर्तीके द्वारा किये हुए सत्कारको पाकर राजा वज्रबाहु बहुत प्रसन्न हुआ। सच है, स्वामीके द्वारा किया हुआ सत्कार सेवकोंकी प्रीतिके लिये ही होता है ॥ १८१ ॥ इस प्रकार जब सब बन्धु संतोषपूर्वक सुखसे बैठे हुए थे तब चक्रवर्तीने अपने बहनोई राजा वज्रबाहुसे नीचे लिखे हुए वचन कहे ॥ १८२ ॥ यदि आपकी मुझपर असाधारण प्रीति है तो मेरे घरमें जो कुछ वस्तु आपको अच्छी लगती हो वही ले लीजिये ॥ १८३ ॥ आज आप पुत्र और स्त्री सहित मेरे घर पधारे हैं इसलिये मेरा मन प्रीतिकी अन्तिम अवधिको प्राप्त हो रहा है ॥ १८४ ॥ आप मेरे इष्ट बन्धु हैं और आज पुत्र सहित मेरे घर आये हुए हैं इसलिये देनेके योग्य इससे बढ़कर और ऐसा कौनसा अवसर मुझे प्राप्त हो सकता है ? ॥ १८५ ॥ इसलिये इस अवसरपर ऐसी कोई वस्तु नहीं है जो मैं आपके लिये न दे सकूं। हे प्रणयिन्, मुझ प्रार्थीके इस प्रेमको भंग मत कीजिये ॥ १८६ ॥ इस प्रकार प्रेमके वशीभूत चक्रवर्तीके वचन सुनकर राजा वज्रबाहुने इस प्रकार उत्तर दिया। हे चक्रिन्, आपके प्रसादसे मेरे यहां सब कुछ है, आज मैं आपसे किस वस्तुकी प्रार्थना करूं ? ॥ १८७ ॥ आज आपने सन्मानपूर्वक जो मेरे साथ स्वयं सामका प्रयोग किया है—भेंट आदि करके स्नेह प्रकट किया है सो मानो आपने मुझे

---

१ वज्रजङ्घगतः। २ श्रीमती। ३ तत्प्राप्त्यै द०, ल०। ४ भगिन्याः। ५ भगिनीपुत्रम्। ६ बन्धुसमूहः। ७ अतिथियोग्याम्। ८ सत्कारविशेषम्। ९ प्रापिताः। १० मानताम् प०, स०, द०, ल०, ट०। सन्मानम्। ११—जातं प०, अ०, स०, द०, ल०। १२ अनिर्बन्धा। १३ परमप्रकर्षम्। १४ सपुत्रः। सतुष्कः म०, ल०। सपुत्रः अ०, द०, स०। १५ संविभागः [त्यागः] सम्भावना वा। १६ मम। १७ स्नेहाधीनेन। १८ प्रियवचनेन। १९ प्रापितः।

कियन्मात्रमिदं देव स्वापतेयं परिक्षयि । त्वयाढ्यङ्करणी[1] दृष्टिरलमेषार्पिता मयि ॥१८९॥
अहमद्य कृती धन्यो जीवितं श्लाघ्यमद्य मे । यद्वीक्षितोऽस्मि देवेन स्नेहनिर्भरया दृशा ॥१९०॥
परोपकृतये[2] बिभ्रति अर्थवत्तां[3] भवद्विधाः । लोके [4]प्रसिद्धसाधुत्वाः शब्दा इव कृतागमाः[5] ॥१९१॥
तदेव वस्तु [6]वस्तुष्यै सोपयोगं यदर्थिनाम् । अविभक्तधनायास्तु बन्धुताया[7] विशेषतः ॥१९२॥
[8]तदेतत् स्वैरसंभोग्यम् आस्तां [9]सांन्यासिकं धनम् । न मे मानग्रहः कोऽपि त्वयि नानादरोऽपि वा ॥१९३॥
प्रार्थयेऽहं तथाप्येतत् युष्मदाज्ञां प्रपूजयन् । श्रीमती वज्रजङ्घाय देया कन्योत्तमा त्वया ॥१९४॥
भागिनेयत्वमस्त्येकम् आभिजात्यं[10] च [11]तत्कृतम् । योग्यताञ्चास्य पुष्णाति सत्कारोऽद्य त्वया कृतः॥१९५॥
अथवैतत् खलूक्त्वायं[12] सर्वथार्हति कन्यकाम् । हसन्त्याश्च[13] रुदन्त्याश्च प्राघूर्णक[14] इति श्रुतेः ॥१९६॥
तत्प्रसीद विभो दातुं भागिनेयाय कन्यकाम् । सफला प्रार्थना मेऽस्तु [15]कुमारः सोऽस्तु तत्पतिः ॥१९७॥

स्नेहकी सबसे ऊंची भूमिपर ही चढ़ा दिया है ॥ १८८ ॥ हे देव, नष्ट हो जानेवाला यह धन कितनी-सी वस्तु है ? यह आपने सम्पन्न बनानेवाली अपनी दृष्टि मुझपर अर्पित कर दी है मेरे लिये यही बहुत है ॥ १८९ ॥ हे देव, आज आपने मुझे स्नेहसे भरी हुई दृष्टिसे देखा है इसलिये मैं आज कृतकृत्य हुआ हूं, धन्य हुआ हूं और मेरा जीवन भी आज सफल हुआ है ॥ १९० ॥ हे देव, जिस प्रकार लोकमें शास्त्रोंकी रचना करनेवाले तथा प्रसिद्ध धातुओंसे बने हुए जीव अजीव आदि शब्द परोपकार करनेके लिये ही अर्थोंको धारण करते हैं उसी प्रकार आप जैसे उत्तम पुरुष भी परोपकार करनेके लिये ही अर्थों (धनधान्यादि विभूतियों) को धारण करते हैं ॥ १९१ ॥

हे देव, आपको उसी वस्तुसे सन्तोष होता है जो कि याचकोंके उपयोगमें आती है और इससे भी बढ़कर सन्तोष उस वस्तुसे होता है जो कि धन आदिके विभागसे रहित (सम्मिलित रूपसे रहनेवाले) बन्धुओंके उपयोगमें आती है ॥ १९२ ॥ इसलिये, आपके जिस धनको मैं अपनी इच्छानुसार भोग सकता हूं ऐसा वह धन धरोहररूपसे आपके ही पास रहे, इस समय मुझे आवश्यकता नहीं है। हे देव, आपसे धन नहीं माँगनेमें मुझे कुछ अहंकार नहीं है और न आपके विषयमें कुछ अनादर ही है ॥ १९३ ॥ हे देव, यद्यपि मुझे किसी वस्तुकी आवश्यकता नहीं है तथापि आपकी आज्ञाको पूज्य मानता हुआ आपसे प्रार्थना करता हूँ कि आप अपनी श्रीमती नामकी उत्तम कन्या मेरे पुत्र वज्रजंघके लिये दे दीजिये ॥ १९४ ॥ यह वज्रजंघ प्रथम तो आपका भानजा है, और दूसरे आपका भानजा होनेसे ही इसका उच्चकुल प्रसिद्ध है । तीसरे आज आपने जो इसका सत्कार किया है वह इसकी योग्यताको पुष्ट कर रहा है ॥ १९५ ॥ अथवा यह सब कहना व्यर्थ है । वज्रजंघ हर प्रकारसे आपकी कन्या ग्रहण करनेके योग्य है । क्योंकि लोकमें ऐसी कहावत प्रसिद्ध है कि कन्या चाहे हँसती हो चाहे रोती हो, अतिथि उसका अधिकारी होता है ॥ १९६ ॥ इसलिये हे

---

१ अनाढ्यः आढ्यः क्रियते यया सा । 'कृञ् करणे' खनट् । २ उपकाराय । ३ धनिकताम् । पक्षे अभिधेयवत्त्वम् । "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ।" इत्यमरः । ४ –प्रसिद्ध-धातुत्वात् अ०, ल० । लोकप्रसिद्धधातुत्वात् स० । ५ सूत्रानुसारेण निष्पन्नाः । कृतौ गताः म० । कृतागताः ट० । ६ युष्माकम् । ७ बन्धुसमूहस्य 'ग्रामजनबन्धुगजसहायात्तल्' इति समूहे तल् । ८ तत्कारणात् । ९ निक्षिप्तम् । १० कुलजत्वम् । ११ भागिनेयत्वकृतम् । १२ वचनेनालम् । 'निषेधेऽलंखलौ क्त्वा' इति क्त्वाप्रत्ययः । १३ –श्चारुदन्त्यश्च प०, म०, ल० । १४ अभ्यागतः । प्राघूर्णिकः ट० । १५ 'कुमारः कौमारः' इति द्वौ पाठौ 'त०, ब०' पुस्तकयोः । कौमारः अ०, प०, स०, द०, म०, ल०, ट० । कुमारीहृदयं प्राप्तः ।

वस्तुवाहनसर्वस्वं लब्धमेवासकृन्मया । किं तेनालब्धपूर्वं नः कन्यारत्नं प्रदीयताम् ॥१९८॥
इति विज्ञापितस्तेन चक्रभृत् प्रत्यपद्यत । तथास्तु सङ्गमो यूनोः अनुरूपोऽनयोरिति ॥१९९॥
प्रकृत्या सुन्दराकारो वज्रजङ्घोऽस्त्वयं वरः । पतिंवरा गुणैर्युक्ता श्रीमती चास्तु सा वधूः ॥२००॥
जन्मान्तरानुबद्धञ्च प्रेमास्त्येवानयोरतः[1] । समागमोऽस्तु चन्द्रस्य ज्योत्स्नायास्तु यथोचितः ॥२०१॥
प्रागेव चिन्तितं कार्यं मयेदमतिमानुषम्[2] । विधिस्तु प्राक्तरामेव सावधानोऽत्र के वयम् ॥२०२॥
इति चक्रधरेणोक्तां वाचं संपूज्य पुण्यधीः । वज्रबाहुः परां कोटिं प्रीतेरध्यारुरोह सः ॥२०३॥
वसुन्धरा महादेवी पुत्रकल्याणसम्पदा । तया प्रमदपूर्णाङ्गी न स्वाङ्गे नन्वमात्तता[3] ॥२०४॥
सा तदा सुतकल्याणमहोत्सवसमुद्गतम् । रोमाञ्चमन्वितं[4] भेजे प्रमदाङ्कुरसन्निभम् ॥२०५॥
मन्त्रिमुख्यमहामात्यसेनापतिपुरोहिताः । [5]सामन्ताश्च [6]सपौरास्तत्कल्याणं बहुमेनिरे ॥२०६॥
कुमारो वज्रजङ्घोऽयम् अनङ्गसदृशाकृतिः । श्रीमतीयं रतिं रूपसम्पदा निर्जिगीषति ॥२०७॥
अभिरूपः[7] कुमारोऽयं [8]सुरूपा कन्यकानयोः । अनुरूपोऽस्तु संबन्धः सुरदम्पतिलीलयोः ॥२०८॥
इति प्रमदविस्तारम् उद्वहत्तत्पुरं तदा । राजवेश्म च संवृत्तं[9] श्रियमन्यामिवाश्रितम् ॥२०९॥

स्वामिन्, अपने भानजे वज्रजंघको पुत्री देनेके लिये प्रसन्न होइए। मैं आशा करता हूँ कि मेरी प्रार्थना सफल हो और यह कुमार वज्रजंघ ही उसका पति हो ॥ १९७ ॥ हे देव, धन सवारी आदि वस्तुएँ तो मुझे आपसे अनेक बार मिल चुकी हैं इसलिये उनसे क्या प्रयोजन है ? अबकी बार तो कन्या-रत्न दीजिये जो कि पहले कभी नहीं मिला था ॥१९८॥ इस प्रकार राजा वज्रबाहुने जो प्रार्थना की थी उसे चक्रवर्तीने यह कहते हुए स्वीकार कर लिया कि आपने जैसा कहा है वैसा ही हो, युवावस्थाको प्राप्त हुए इन दोनोंका यह समागम अनुकूल ही है ॥ १९९ ॥ स्वभावसे ही सुन्दर शरीरको धारण करनेवाला यह वज्रजंघ वर हो और अनेक गुणोंसे युक्त कन्या श्रीमती उसकी वधू हो ॥ २०० ॥ इन दोनोंका प्रेम जन्मान्तरसे चला आ रहा है इसलिये इस जन्ममें भी चन्द्रमा और चाँदनीके समान इन दोनोंका योग्य समागम हो ॥ २०१ ॥ इस लोकोत्तर कार्यका मैंने पहलेसे ही विचार कर लिया था। अथवा इन दोनोंका दैव (कर्मोंका उदय) इस विषयमें पहलेसे ही सावधान हो रहा है। इस विषयमें हम लोग कौन हो सकते हैं ? ॥ २०२ ॥ इस प्रकार चक्रवर्तीके द्वारा कहे हुए वचनोंका सत्कार कर वह पवित्र बुद्धिका धारक राजा वज्रबाहु प्रीतिकी परम सीमापर आरूढ़ हुआ अत्यन्त प्रसन्न हुआ ॥ २०३ ॥ उस समय वज्रजंघकी माता वसुंधरा महादेवी अपने पुत्रकी विवाहरूप संपदासे इतनी अधिक हर्षित हुई कि अपने अंगमें भी नहीं समा रही थी ॥ २०४ ॥ उस समय वसुन्धराके शरीरमें पुत्रके विवाहरूप महोत्सवसे रोमांच उठ आये थे जो ऐसे जान पड़ते थे मानो हर्षके अंकुर ही हों ॥ २०५ ॥ मंत्री, महामंत्री, सेनापति, पुरोहित, सामन्त तथा नगरनिवासी आदि सभी लोगोने उस विवाहकी प्रशंसा की ॥ २०६ ॥ यह कुमार वज्रजंघ कामदेवके समान सुन्दर आकृतिका धारक है और यह श्रीमती अपनी सौन्दर्य-सम्पत्तिसे रतिको जीतना चाहती है ॥ २०७ ॥ यह कुमार सुन्दर है और यह कन्या भी सुन्दरी है इसलिये देव देवाङ्गनाओंकी लीलाको धारण करनेवाले इन दोनोंका योग्य समागम होना चाहिये ॥ २०८ ॥ इस प्रकार आनन्दके विस्तारको धारण करता हुआ वह नगर बहुत ही शोभायमान हो रहा था और

---

१ –नयोरिव प० । –नयोरति अ० । २ मानुषमतिक्रान्तः । ३ सममात्तदा अ०, प०, स०, द०, ल० । माति स्म । ४ व्याप्तम् । ५ नायकाः । ६ सपौरास्तु स० । ७ मनोज्ञः । ८ मनोज्ञा । 'प्राप्तरूप-सुरूपाभिरूपा बुधमनोज्ञयोरित्यभिधानात् । ९ सम्यग् वर्तते स्म ।

विवाहमण्डपारम्भं चक्रवर्तिनिदेशतः[1] । [2]महास्थपतिरातेने पराध्यैमणिकाञ्चनैः ॥२१०॥
चामीकरमयाः स्तम्भाः [3]तलकुम्भैर्महोदयैः । रत्नोज्ज्वलैः श्रियं तेनुः नृपा इव नृपासनैः ॥२११॥
स्फाटिक्यो भित्तयस्तस्मिन् जनानां प्रतिबिम्बकैः । चित्रिता इव संरेजुः प्रेक्षिणां[4] चित्तरञ्जिकाः ॥२१२॥
मणिकुट्टिमभूरस्मिन् नीलरत्नैर्विनिर्मिता । पुष्पोपहारैर्व्यरुचद् द्यौरिवाततत्तारका ॥२१३॥
मुक्तादामानि लम्बानि [5]तद्गर्भे व्यद्युतंस्तराम् । सफेनानि मृणालानि लम्बितानीव कौतुकात् ॥२१४॥
पद्मरागमयस्तस्मिन् वेदिबन्धोऽभवत्पृथुः । जनानामिव चित्तस्थो रागस्तन्मयतां गतः ॥२१५॥
सुधोज्ज्वलानि कूटानि पर्यन्तेष्वस्य रेजिरे । तोषात् सुरविमानानि हसन्तीवात्मशोभया ॥२१६॥
वेदिका[6]कटिसूत्रेण पर्यन्ते स परिष्कृतः । रामणीयकसीम्नेव रुद्धदिक्केन विश्वतः ॥२१७॥
रत्नैर्विरचितं तस्य बभौ गोपुरमुच्चकैः । प्रोत्सर्पद्रत्नभाजालरचितेन्द्रशरासनम् ॥२१८॥
सर्वरत्नमयस्तस्य द्वारबन्धो निवेशितः । लक्ष्म्याः प्रवेशनायेव पर्यन्तार्पितमङ्गलः ॥२१९॥
स तदाष्टाह्निकीं पूजां चक्रे चक्रधरः पराम् । कल्पवृक्षमहारूढिं महापूतजिनालये ॥२२०॥
ततश्शुभदिने सौम्ये लग्ने शुभमुहूर्त्तके । चन्द्रताराबलोपेते तज्ज्ञै[7]ः सम्यग्निरूपिते ॥२२१॥

राजमहलका तो कहना ही क्या था? वह तो मानो दूसरी ही शोभाको प्राप्त हो रहा था, उसकी शोभा ही बदल गई थी ॥ २०६ ॥ चक्रवर्तीकी आज्ञासे विश्वकर्मा नामक मनुष्यरत्नोंने महामूल्य रत्नों और सुवर्णसे विवाहमण्डप तैयार किया था ॥ २१० ॥ उस विवाहमण्डपमें सुवर्णके खम्भे लगे हुए थे और उनके नीचे रत्नोंसे शोभायमान बड़े-बड़े तलकुम्भ लगे हुए थे, उन तलकुम्भों से वे सुवर्णके खम्भे ऐसे सुशोभित हो रहे थे जैसे कि सिंहासनों से राजा सुशोभित होते हैं ॥ २११ ॥ उस मण्डपमें स्फटिककी दीवालोंपर अनेक मनुष्योंके प्रतिबिम्ब पड़ते थे जिनसे वे चित्रित हुई-सी जान पड़ती थीं और इसीलिये दर्शकोंका मन अनुरञ्जित कर रही थीं ॥ २१२ ॥ उस मण्डपकी भूमि नील रत्नोंसे बनी हुई थी, उसपर जहां तहां फूल बिखेरे गये थे। उन फूलोंसे वह ऐसी सुशोभित हो रही थी मानो ताराओंसे व्याप्त नीला आकाश ही हो ॥ २१३ ॥ उस मण्डपके भीतर जो मोतियोंकी मालाएँ लटकती थीं वे ऐसी भली मालूम होती थीं मानो किसीने कौतुकवश फेन सहित मृणाल ही लटका दिये हो ॥ २१४ ॥ उस मण्डपके मध्यमें पद्मराग मणियोंकी एक बड़ी वेदी बनी थी जो ऐसी जान पड़ती थी मानो मनुष्योंके हृदयका अनुराग ही वेदीके आकारमें परिणत हो गया हो ॥ २१५ ॥ उस मण्डपके पर्यन्त भागमें चूनासे पुते हुए सफेद शिखर ऐसे शोभायमान होते थे मानो अपनी शोभासे संतुष्ट होकर देवोंके विमानोंकी हँसी ही उड़ा रहे हों ॥ २१६ ॥ उस मण्डपके सब ओर एक छोटी सी वेदिका बनी हुई थी, वह वेदिका उसके कटिसूत्रके समान जान पड़ती थी। उस वेदिकारूप कटि सूत्रसे घिरा हुआ वह मण्डप ऐसा मालूम होता था मानो सब ओरसे दिशाओंको रोकनेवाली सौन्दर्यकी सीमासे ही घिरा हो ॥ २१७ ॥ अनेक प्रकारके रत्नोंसे बहुत ऊँचा बना हुआ उसका गोपुर-द्वार ऐसा मालूम होता था मानो रत्नोंकी फैलती हुई कान्तिके समूहसे इन्द्रधनुष ही बना रहा हो। ॥ २१८ ॥ उस मण्डपका भीतरी दरवाजा सब प्रकारके रत्नोंसे बनाया गया था और उसके दोनों ओर मङ्गल द्रव्य रखे गये थे, जिससे ऐसा जान पड़ता था मानो लक्ष्मीके प्रवेशके लिये ही बनाया गया हो ॥ २१९ ॥ उसी समय वज्रदन्त चक्रवर्तीने महापूत चैत्यालयमें आठ दिन तक कल्पवृक्ष नामक महापूजा की थी ॥ २२० ॥ तदनन्तर ज्योतिषियोंके द्वारा बताया हुआ शुभ

---

१ शासनात् । २ विश्वकर्मा । ३ [illegible] । ४ पश्यताम् । ५ तन्मण्डपान्तरे । ६ वेदिकानाम्ना हेमसूत्रत्रयेण । ७ ज्योतिःशास्त्रज्ञैः ।

कृतोपशोभे नगरे समन्तादुद्धतोरणे । सुरलोक इवाभाति परां दधति सम्पदम् ॥२२२॥
राजवेश्माङ्गणे सान्द्रचन्दनच्छटयोक्षिते[1] । पुष्पोपहारैरागुञ्जदलिभिः कृतरोचिषि ॥२२३॥
सौवर्णकलशैः पूर्णैः पुण्यतोयैः सरत्नकैः । अभ्यषेचि विधानज्ञैः विधिवत्तद्वधूवरम् ॥२२४॥
तदा महानकध्वानः शङ्खकोलाहलाकुल[2] । घनाडम्बरमाक्रम्य जजृम्भे नृपमन्दिरे ॥२२५॥
कल्याणाभिषवे तस्मिन् श्रीमतीवज्रजङ्घयोः । स नान्त[3]र्वंशिकस्तोषनिर्भरं न ननर्त यः ॥२२६॥
वाराङ्गनाः पुरन्ध्यश्च पौरवर्गश्च तत्क्षणम् । पुण्यैः पुष्पाक्षतैः शेषां [4]साशिषं तावलम्भयन्[5] ॥२२७॥
श्लक्ष्णपट्टदुकूलानि निष्प्रवाणीनि[6] तौ तदा । क्षीरोदोर्मिमयानीव [7]पर्यधत्तामनन्तरम् ॥२२८॥
प्रसाधनगृहे[8] रम्ये [9]प्राङ्मुखं सुनिवेशितौ । तावलङ्कारसर्वस्वं भेजतुर्मङ्गलोचितम् ॥२२९॥
चन्दनेनानुलिप्तौ तौ ललाटेन [10]ललाटिकाम् । चन्दनद्रवविन्यस्तां दधतुः कौतुकोचिताम्[11] ॥२३०॥
वक्षसा हारयष्टिं तौ हरिचन्दनशोभिना । अधत्तां मौक्तिकैः स्थूलैः धृत[12]तारावलिश्रियम् ॥२३१॥
पुष्पमाला बभौ मूर्ध्नि तयोः कुञ्चितमूर्द्धजे । सीतापगेव नीलाद्रिशिखरोपान्तवर्त्तिनी ॥२३२॥
कर्णिकाभरणन्यासं[13] कर्णयोनिरविक्षताम्[14] । यद्रत्नाभीशुभिर्भेजे[15] तद्वक्त्राब्जं परां श्रियम् ॥२३३॥

दिन शुभ लग्न और चन्द्रमा तथा ताराओंके बलसे सहित शुभ मुहूर्त आया। उस दिन नगर विशेष रूपसे सजाया गया। चारों ओर तोरण लगाये गये तथा और भी अनेक विभूति प्रकट की गई जिससे वह स्वर्गलोकके समान शोभायमान होने लगा। राजभवनके आंगनमें सब ओर सघन चन्दन छिड़का गया तथा गुंजार करते हुए भ्रमरोंसे सुशोभित पुष्प सब ओर बिखेरे गये। इन सब कारणोंसे वह राजभवनका आंगन बहुत ही शोभायमान हो रहा था। उस आंगनमें बधू वर बैठाये गये तथा विधिविधानके जाननेवाले गृहस्थाचार्योंने पवित्र जलसे भरे हुए रत्न-जड़ित सुवर्णमय कलशोंसे उनका अभिषेक किया ॥ २२१–२२४ ॥ उस समय राजमन्दिरमें शङ्खके शब्दसे मिला हुआ बड़े-बड़े दुन्दुभियोंका भारी कोलाहल हो रहा था और वह आकाशको भी उल्लंघन कर सब ओर फैल गया था ॥ २२५ ॥ श्रीमती और वज्रजंघके उस विवाहाभिषेकके समय अन्तःपुरका ऐसा कोई मनुष्य नहीं था जो हर्षसे सतुष्ट होकर नृत्य न कर रहा हो ॥ २२६ ॥ उस समय वारांगनाएँ, कुलवधुयें और समस्त नगर-निवासी जन उन दोनों वरवधुओंको आशीर्वादके साथ-साथ पवित्र पुष्प और अक्षतोंके द्वारा प्रसाद प्राप्त करा रहे थे ॥ २२७ ॥ अभिषेकके बाद उन दोनों वर-वधूने क्षीरसागरकी लहरोंके समान अत्यन्त उज्ज्वल महीन और नवीन रेशमी वस्त्र धारण किये ॥ २२८ ॥ तत्पश्चात् दोनों वरवधू अतिशय मनोहर प्रसाधन गृहमें जाकर पूर्व दिशाकी ओर मुँह करके बैठ गये और वहां उन्होंने विवाह मंगलके योग्य उत्तम उत्तम आभूषण धारण किये ॥ २२९ ॥ पहले उन्होंने अपने सारे शरीरमें चन्दनका लेप किया। फिर ललाटपर विवाहोत्सवके योग्य, घिसे हुए चन्दनका तिलक लगाया ॥ २३० ॥ तदनन्तर सफेद चन्दन अथवा केशरसे शोभायमान वक्षःस्थलपर गोल नक्षत्र मालाके समान सुशोभित बड़े-बड़े मोतियोंके बने हुए हार धारण किये ॥ २३१ ॥ कुटिल केशोंसे सुशोभित उनके मस्तकपर धारण की हुई पुष्पमाला नीलगिरिके शिखरके समीप बहती हुई सीता नदीके समान शोभायमान हो रही थी ॥ २३२ ॥ उन दोनोंने कानोंमें ऐसे कर्णभूषण

---

१ प्रोक्षिते। २ आकीर्णः। ३ अन्तःपुरेष्वधिकृतः। ४ आशीःसहिताम्। ५ प्रापयन्ति स्म। ६ नववस्त्राणि। –नि तत्प्रमाणानि स०। ७ परिधानमकार्ष्टाम्। ८ अलङ्कारगृहे। ९ प्राङ्मुखौ स०। १० तिलकम्। ११ उत्सवोचिताम्। १२ वृत्ततारा-अ०, स०, ल०। १३ कर्णाभरणम्। १४ अधत्ताम्। 'निर्वेशो भृतिभोगयोः' इत्यमरः। १५ यद्रत्नाम्यंशुभि–प०। यद्रत्नाभांशुभि–अ०।

आजानुलम्बमानेन तौ प्रालम्बेन[1] रेजतुः । शरज्ज्योत्स्नामयेनेव मृणालच्छविचारुणा ॥२३४॥
[2]कटकाङ्गदकेयूर[3]मुद्रिकादिविभूषणैः । बाहू व्यरूचतां कल्पतरुशाखाच्छवी तयोः ॥२३५॥
[4]जघने रसनावेष्टं[5] [6]किङ्किणीकृतनिःस्वनम् । तावनङ्गद्विपस्येव जयडिण्डिममूहतुः ॥२३६॥
मणिनूपुरझङ्कारैः क्रमौ शिश्रियतुः श्रियम् । श्रीमत्याः पद्मयोर्भृङ्गकलनिःक्वणशाभिनोः ॥२३७॥
महालङ्कृतिमाचार इत्येव[7] बिभ्रतः स्म तौ । अन्यथा[8] सुन्दराकारशोभैवालङ्कृतिस्तयोः ॥२३८॥
लक्ष्मीमतिः स्वयं लक्ष्मीरिव पुत्रीमभूषयत् । पुत्रञ्च भूषयामास वसुधेव वसुन्धरा ॥२३९॥
प्रसाधनविधेरन्ते यथास्वं तौ निवेशितौ । रत्नवेदीतटे पूर्वं कृतमङ्गलसत्क्रिये ॥२४०॥
मणिप्रदीपरुचिरा मङ्गलैरुपशोभिता । बभौ वेदी तदाक्रान्ता[9] सामरेवाद्रिराट्तटी ॥२४१॥
ततो मधुरगम्भीरम् आनकाः[10]कोणताडिताः । दध्वनुर्ध्वनदम्भोधि[11]गभीरध्वनयस्तदा ॥२४२॥
मङ्गलोद्गानमातेनुः वारवध्वः कलं तदा । [12]उत्साहान् पेठुरभितो बन्दिनः[13] सह[14]मागधाः ॥२४३॥
वर्द्धमानलयैर्नृत्तम् आरेभे ललितं तदा । वाराङ्गनाभिरुद्भ्रूभी रणन्नूपुरमेखलम् ॥२४४॥

धारण किये थे कि जिनमें लगे हुए रत्नोंकी किरणोंसे उनका मुख-कमल उत्कृष्ट शोभाको प्राप्त हो रहा था ॥ २३३ ॥ वे दोनों शरदृऋतुकी चांदनी अथवा मृणाल तन्तुके समान सुशोभित-सफेद, घुटनों तक लटकती हुई पुष्पमालाओंसे अतिशय शोभायमान हो रहे थे ॥ २३४ ॥ कड़े बाजूबंद केयूर और अंगूठी आदि आभूषण धारण करनेसे उन दोनोंकी भुजायें भूषणांग जातिके कल्प वृक्षकी शाखाओंकी तरह अतिशय सुशोभित हो रही थी ॥ २३५ ॥ उन दोनोंने अपने अपने नितम्ब भागपर करधनी पहनी थो । उसमें लगी हुई छोटी छोटी घंटियां (बोरा) मधुर शब्द कर रही थीं । उन करधनियोंसे वे ऐसे शोभायमान हो रहे थे मानो उन्होंने कामदेवरूपी हस्तीके विजय-सूचक बाजे ही धारण किये हों ॥ २३६ ॥ श्रीमतीके दोनो चरण मणिमय नूपुरोंकी झंकारसे ऐसे मालूम होते थे मानो भ्रमरोंके मधुर शब्दोंसे शोभायमान कमल ही हों ॥ २३७ ॥ विवाहके समय आभूषण धारण करना चाहिये, केवल इसी पद्धतिको पूर्ण करनेके लिये उन्होंने बड़े-बड़े आभूषण धारण किये थे नहीं तो उनके सुन्दर शरीरकी शोभा ही उनका आभूषण थी ॥२३८॥ साक्षात् लक्ष्मीके समान लक्ष्मीमतिने स्वयं अपनी पुत्री श्रीमतीको अलंकृत किया था और साक्षात् वसुन्धरा (पृथिवी) के समान वसुन्धराने अपने पुत्र वज्रजंघको आभूषण पहिनाये थे ॥ २३९ ॥ इस प्रकार अलंकार धारण करनेके बाद वे दोनों जिसकी मंगलक्रिया पहले ही की जा चुकी है ऐसी रत्न-वेदी पर यथायोग्य रीतिसे बैठाये गये ॥ २४० ॥ मणिमय दीपकोंके प्रकाशसे जगमगाती हुई और मङ्गल द्रव्योंसे शुशोभित वह वेदी उन दोनोके बैठ जानेसे ऐसी शोभायमान होने लगी थी मानो देव-देवियोंसे सहित मेरु पर्वतका तट ही हो ॥ २४१ ॥ उस समय समुद्रके समान गंभीर शब्द करते हुए, डंडोंसे बजाये गये नगाड़े बड़ा ही मधुर शब्द कर रहे थे ॥ २४२ ॥ वाराङ्गनाएं मधुर मंगल गीत गा रही थी और बन्दीजन मागध जनोंके साथ मिलकर चारों ओर उत्साहवर्धक मङ्गल पाठ पढ़ रहे थे ॥ २४३ ॥ जिनकी भौंहें कुछ कुछ ऊपरको उठी हुई है ऐसी वाराङ्गनाएं लय-तान आदिसे सुशोभित तथा रुन-

---

१ हारविशेषेण । 'प्रालम्बमृजुलम्बि स्यात्' इत्यमरः । २ भुजाभरणम् । ३ भुजशिखराभरणम् । ४ जघनं अ०, प०, स०, द०, ल०, । ५ काञ्चीदामवलयम् । ६ क्षुद्रघण्टिका । ७ इत्येवं अ०, प०, स०, द० । ८ [आचाराभावे] । ९ तद्वधूवराक्रान्ता । १० कोणः वाद्यताडनोपकरणम् । 'कोणः वीणादिवादनम्' इत्यभिधानात् । ११ –गम्भीर– अ०, प०, स०, द०, ल० । १२ मङ्गलाष्टकान् । १३ स्तुतिपाठकाः । १४ वंशवीर्यादिस्तुत्युपजीविनः । सहमागधो अ०, प०, स०, द०, ल० ।

ततो वधूवरं सिद्ध[1]स्नानाम्भःपूतमस्तकम् । निवेशितं महाभासि [2]सच्चामीकरपट्टके ॥२४५॥
स्वयं स्म करकं धत्ते चक्रवर्ती महाकरः । हिरण्मयं महारत्नखचितं मौक्तिकोज्ज्वलम् ॥२४६॥
अशोकपल्लवैर्वक्त्रनिहितैः करको[3] बभौ । करपल्लवसच्छायाम् अनुकुर्वन्निवानयोः[4] ॥२४७॥
ततो न्यपाति[5] करकाद्धारा तत्करपल्लवे[6] । दूरमावर्जिता[7] दीर्घं भवन्तौ जीवतामिति ॥२४८॥
ततः पाणौ महाबाहुः वज्रजङ्घोऽग्रहीन्मुदा । श्रीमती तन्मृदुस्पर्शसुखामीलितलोचनः ॥२४९॥
[8]श्रीमती तत्करस्पर्शाद् धर्मबिन्दूनधारयत् । चन्द्रकान्तशिलापुत्री[9] चन्द्रांशुस्पर्शनादिव ॥२५०॥
वज्रजङ्घकरस्पर्शात् [10]तनुतोऽस्याश्चिरं धृतः । संतापः क्वापि याति स्म भूमेरिव घनागमे ॥२५१॥
वज्रजङ्घसमासङ्गात् श्रीमती व्यद्युतत्तराम् । कल्पवल्लीव संश्लिष्टतुङ्गकल्पमहीरुहा ॥२५२॥
सोऽपि पर्यन्तवर्त्तिन्या तया लक्ष्मीं परामधात् । स्त्रीसृष्टेः परया कोट्या रत्येव कुसुमायुधः ॥२५३॥
गुरुसाक्षि तयोरित्थं विवाहः परमोदयः । निरवर्त्तत[11] लोकस्य परमानन्दमादधत् ॥२५४॥
ततः पाणिगृहीतीं[12] तां ते जना बहुमेनिरे । श्रीमती सत्यमेवेयं श्रीमतीत्युद्गिरस्तदा ॥२५५॥
तौ दम्पती सदाकारौ सुरदम्पतिविभ्रमौ । जनानां पश्यतां चित्तं निर्व[13]वारामृतायितौ ॥२५६॥

झुन शब्द करते हुए नूपुर और मेखलाओंसे मनोहर नृत्य कर रही थीं ॥ २४४ ॥ तदनन्तर जिनके मस्तक सिद्ध प्रतिमाके जलसे पवित्र किये गये हैं ऐसे वधू वर अतिशय शोभायमान सुवर्णके पाटेपर बैठाये गये ॥ २४५ ॥ घुटनों तक लम्बी भुजाओंके धारक चक्रवर्तीने स्वय अपने हाथमें भृंगार धारण किया। वह भृंगार सुवर्णसे बना हुआ था, बड़े बड़े रत्नोंसे खचित था तथा मोतियोंसे अतिशय उज्ज्वल था ॥ २४६ ॥ मुखपर रखे हुए अशोक वृक्षके पल्लवों से वह भृंगार ऐसा शोभायमान हो रहा था मानो इन दोनों वर-वधुओंके हस्तपल्लवकी उत्तम कान्तिका अनुकरण ही कर रहा हो ॥ २४७ ॥ तदनन्तर आप दोनों दीर्घकाल तक जीवित रहें, मानो यह सूचित करनेके लिये ही ऊँचे भृंगारसे छोड़ी गई जलधारा वज्रजंघके हस्तपर पड़ी ॥ २४८ ॥

तत्पश्चात् बड़ी बड़ी भुजाओंको धारण करनेवाले वज्रजंघने हर्षके साथ श्रीमती का पाणिग्रहण किया। उस समय उसके कोमल स्पर्शके सुखसे वज्रजंघके दोनों नेत्र बंद हो गये थे ॥ २४९ ॥ वज्रजंघके हाथके स्पर्शसे श्रीमतीके शरीरमें भी पसीना आगया था जैसे कि चन्द्रमाकी किरणोंके स्पर्शसे चन्द्रकान्त मणिकी बनी हुई पुतलीमें जलबिन्दु उत्पन्न हो जाते है ॥ २५० ॥ जिस प्रकार मेघोंकी वृष्टिसे पृथ्वीका सन्ताप नष्ट हो जाता है उसी प्रकार वज्रजंघके हाथके स्पर्शसे श्रीमतीके शरीरका चिरकालीन संताप भी नष्ट हो गया था ॥ २५१ ॥ उस समय वज्रजंघके समागमसे श्रीमती किसी बड़े कल्पवृक्षसे लिपटी हुई कल्प-लताकी तरह सुशोभित हो रही थी ॥ २५२ ॥ वह श्रीमती स्त्री-संसारमें सबसे श्रेष्ठ थी, समीपमें बैठी हुई उस श्रीमतीसे वह वज्रजंघ भी ऐसा सुशोभित होता था जैसे रतिसे कामदेव सुशोभित होता है ॥ २५३ ॥ इस प्रकार लोगोंको परमानन्द देनेवाला उन दोनोंका विवाह गुरुजनोंकी साक्षीपूर्वक बड़े वैभवके साथ समाप्त हुआ ॥ २५४ ॥ उस समय सब लोग उस विवाहिता श्रीमतीका बड़ा आदर करते थे और कहते थे कि यह श्रीमती सचमुच में श्रीमती है अर्थात् लक्ष्मीमती है ॥ २५५ ॥ उत्तम आकृतिके धारक, देव-देवाङ्ग-

---

१ सिद्धप्रतिमाभिषेकजलम् । २ सौवर्णे वधूवरासने । ३ भृङ्गारः । ४ दम्पत्योः । ५ पतितम् । ६ वज्रजङ्घहस्ते । ७ विसृष्टा । ८ अयं श्लोकः 'धर्मबिन्दून्' इत्यस्य स्थाने 'स्वेदबिन्दून्' इति परिवर्त्य द्वितीयस्तवके चन्द्रप्रभचरिते स्वकीयग्रन्थाङ्गतां नीतः । ९ पुत्रिका । १० शरीरे । ११ वर्तितम् । १२ पाणिगृहीतां प०, अ०, स०, म०, द०, ल० । १३ अतुषत् । 'वृञ् वरणे' लिट् । निर्वृतिं सन्तोषं गतवत् इत्यर्थः ।

तत्कल्याणं समालोक्य देवलोकेऽपि दुर्लभम् । प्रशशंसुर्मुदं प्राप्ताः परमां प्रेक्षका जनाः ॥२५७॥
चक्रवर्ती महाभागः[1] स्त्रीरत्नमिदमूर्जितम् । योग्ये नियोजयामास जनश्लाघास्पदे पदे[2] ॥२५८॥
जननी पुण्यवत्यस्या मूर्ध्नि [3]सुप्रजसामसौ । [4]सत्प्रसूतिरियं सूता यया लक्ष्मीसमद्युतिः ॥२५९॥
कुमारेण तपस्तप्तं किमेतेनान्यजन्मनि । येनासादि[5] जगत्सारं स्त्रीरत्नममितद्युतिः ॥२६०॥
धन्येयं कन्यका मान्या नान्या पुण्यवतीदृशी । कल्याणभागिनी यैषा वज्रजङ्घं पतिं [6]वृता ॥२६१॥
उपोषितं किमेताभ्यां किं वा तप्तं तपो महत् । किन्तु दत्तं किमिष्टं[7] वा कीदृग् वाचरितं व्रतम् ॥२६२॥
अहो धर्मस्य माहात्म्यम् अहो सत्साधनं तपः । अहो दत्तिर्महोदर्का दयावल्ली फलत्यहो ॥२६३॥
नूनमाभ्यां कृता पूजा महतामर्हतां पराम्[8] [रा] । पूज्यपूजानुसंधत्ते ननु सम्पत्परम्पराम् ॥२६४॥
अतः[9] कल्याणभागित्वं धनर्द्धिविपुलं सुखम् । वाञ्छद्भिरर्हतां मार्गे मतिः कार्या महाफले ॥२६५॥
इत्यादिजनसंजल्पैः संश्लाघ्यौ दम्पती तदा । सुखासीनौ प्रशय्यायां[10] बन्धुभिः परिवारितौ ॥२६६॥
[11]दीनैर्दैन्यं समुत्सृष्टं कार्पण्यं [12]कृपणैर्जहे[13] । [14]अनाथैश्च सनाथत्वं भेजे तस्मिन् महोत्सवे ॥२६७॥
बन्धवो मानिताः[15] सर्वे [16]दानमानाभिजल्पनैः । भृत्याश्च तर्पिता भर्त्रा चक्रिणास्मिन् महोत्सवे ॥२६८॥

नाओंके समान क्रीड़ा करनेवाले तथा अमृतके समान आनन्द देनेवाले उन वधू और वरको जो भी देखता था उसीका चित्त आनन्दसे सन्तुष्ट हो जाता था ॥ २५६ ॥ जो स्वर्गलोकमें दुर्लभ है ऐसे उस विवाहोत्सवको देखकर देखनेवाले पुरुष परम आनन्दको प्राप्त हुए थे और सभी लोग उसकी प्रशंसा करते थे ॥ २५७ ॥ वे कहते थे कि चक्रवर्ती बड़ा भाग्यशाली है जिसके यह ऐसा उत्तम स्त्री-रत्न उत्पन्न हुआ है और वह उसने सब लोगोंकी प्रशंसाके स्थान-भूत वज्रजंघरूप योग्य स्थानमें नियुक्त किया है ॥ २५८ ॥ इसकी यह पुण्यवती माता पुत्रवतियोंमें सबसे श्रेष्ठ है जिसने लक्ष्मीके समान कान्तिवाली यह उत्तम सन्तान उत्पन्न की है ॥ २५९ ॥ इस वज्रजंघकुमारने पूर्व जन्ममें कौनसा तप तपा था जिससे कि संसारका सारभूत और अतिशय कान्तिका धारक यह स्त्री-रत्न इसे प्राप्त हुआ है ॥ २६० ॥ चूँकि इस कन्याने वज्रजंघ-को पति बनाया है इसलिये यह कन्या धन्य है, मान्य है और भाग्य-शालिनी है । इसके समान और दूसरी कन्या पुण्यवती नहीं हो सकती ॥ २६१ ॥ पूर्व जन्ममें इन दोनोंने न जाने कौनसा उपवास किया था, कौनसा भारी तप तपा था, कौनसा दान दिया था, कौनसी पूजा की थी अथवा कौनसा व्रत पालन किया था ॥ २६२ ॥ अहा, धर्मका बड़ा माहात्म्य है, तपश्चरणसे उत्तम सामग्री प्राप्त होती है, दान देनेसे बड़े-बड़े फल प्राप्त होते है और दयारूपी बेल पर उत्तम उत्तम फल फलते हैं ॥ २६३ ॥ अवश्य ही इन दोनोंने पूर्वजन्ममें महापूज्य अर्हन्त देवकी उत्कृष्ट पूजा की होगी क्योंकि पूज्य पुरुषोंकी पूजा अवश्य ही सम्पदाओंकी परम्परा प्राप्त कराती रहती है ॥ २६४ ॥ इसलिये जो पुरुष अनेक कल्याण, धन-ऋद्धि तथा विपुल सुख चाहते हैं उन्हें स्वर्ग आदि महाफल देनेवाले श्री अरहन्त देवके कहे हुए मार्गमें ही अपनी बुद्धि लगानी चाहिये ॥ २६५ ॥ इस प्रकार दर्शक लोगोंके वार्तालापसे प्रशंसनीय वे दोनों वर-वधू अपने इष्ट बंधुओंसे परिवारित हो सभा-मण्डपमें सुखसे बैठे थे ॥ २६६ ॥ उस विवाहोत्सवमें दरिद्र लोगोंने अपनी दरिद्रता छोड़ दी थी, कृपण लोगोंने अपनी कृपणता छोड़ दी थी और अनाथ लोग सनाथताको प्राप्त हो गये थे ॥ २६७ ॥ चक्रवर्तीने इस महोत्सवमें दान, मान, संभाषण आदिके द्वारा अपने

१ महापुण्यवान् । २ स्थाने । ३ शोभनपुत्रवतीनाम् । ४ सती प्रसूतिर्यस्याः सा । ५ प्राप्तम् । ६ वृणीते स्म । ७ पूजितम् । ८ परा अ०, प०, ब०, द०, स०, ल० । ९ कारणात् । १० [दम्पत्यासने] । प्रसज्यायां स० । प्रशस्यायां ल० । ११ निर्धनैः । १२ लुब्धैः । १३ त्यक्तम् । १४ अगतिकैः । १५ सत्कृताः । १६ दत्तिपूजाभिसम्भाषणैः ।

गृहे गृहे महांस्तोषः केतुबन्धो गृहे गृहे । गृहे गृहे [1]वरालापो [2]वधूशंसा गृहे गृहे ॥२६९॥
दिने दिने महांस्तोषो धर्मभक्तिर्दिने दिने । दिने दिने महेन्द्रर्ध्या[3] पूज्यते स्म वधूवरम् ॥२७०॥
अथापरेद्युरुत्थावम्[4] उद्योतयितुमुद्यमी[5] । प्रदोषे[6] दीपिकोद्योतैः महापूतं[7] ययौ वरः ॥२७१॥
प्रयान्तमनुयाति स्म श्रीमती तं महाद्युतिम् । भास्वन्तमिव[8] रुद्धान्धतमसं भासुरा प्रभा ॥२७२॥
[9]पूजाविभूतिं महतीं पुरस्कृत्य जिनालयम् । प्रापदुत्तुङ्गकूटाग्रं स सुमेरुमिवोच्छ्रितम् ॥२७३॥
स तं प्रदक्षिणीकुर्वन् [10]सजानिर्विबभौ[11] नृपः । मेरुमर्क इव श्रीमान् महादीप्त्या परिष्कृतः[12] ॥२७४॥
[13]कृतेर्याशुद्धिरिद्धर्द्धिः प्रविश्य जिनमन्दिरम् । तत्रापश्यदृषीन् दीप्ततपसः कृतवन्दनः ॥२७५॥
ततो गन्धकुटीमध्ये जिनेन्द्रार्चां हिरण्मयीम् । पूजयामास गन्धाद्यैः अभिषेकपुरस्सरम् ॥२७६॥
कृतार्चनस्ततः स्तोतुं प्रारेभेऽसौ महामतिः । [14]अर्थ्याभिः स्तुतिभिः साक्षा[15]त्कृत्य [16]स्तुत्यं जिनेश्वरम् ॥२७७॥
नमो जिनेशिने तुभ्यम् अनभ्यस्तदुराधये[17] । त्वामद्याराधयामीश कर्मशत्रुबिभित्सया[18] ॥२७८॥
अनन्तास्त्वद्गुणाः स्तोतुम् अशक्या [19]गणपैरपि । भक्त्या तु प्रस्तुवे[20] स्तोत्रं भक्तिः श्रेयोऽनुबन्धिनी॥२७९॥

समस्त बंधुओंका सम्मान किया था तथा दासी दास आदि भृत्योंको भी संतुष्ट किया था ॥ २६८ ॥ उस समय घर-घर बड़ा संतोष हुआ था, घर घर पताकाएँ फहराई गई थीं, घर घर वरके विषयमें बात हो रही थी और घर घर वधूकी प्रशंसा हो रही थी ॥ २६९ ॥ उस समय प्रत्येक दिन बड़ा संतोष होता था, प्रत्येक दिन धर्ममें भक्ति होती थी और प्रत्येक दिन इंद्र जैसी विभूतिसे वधू-वरका सत्कार किया जाता था ॥ २७० ॥

तत्पश्चात् दूसरे दिन अपना धार्मिक उत्साह प्रकट करनेके लिये उद्युक्त हुआ वज्रजंघ सायंकालके समय अनेक दीपकोंका प्रकाश कर महापूत चैत्यालयको गया ॥ २७१ ॥ अतिशय कान्तिका धारक वज्रजंघ आगे-आगे जा रहा था और श्रीमती उसके पीछे-पीछे जा रही थी। जैसे कि अन्धकारको नष्ट करनेवाले सूर्यके पीछे-पीछे उसकी देदीप्यमान प्रभा जाती है ॥ २७२ ॥ वह वज्रजंघ पूजाकी बड़ी भारी सामग्री साथ लेकर जिनमन्दिर पहुँचा। वह मन्दिर मेरु पर्वतके समान ऊँचा था, क्योंकि उसके शिखर भी अत्यन्त ऊँचे थे ॥ २७३ ॥ श्रीमतीके साथ-साथ चैत्यालयकी प्रदक्षिणा देता हुआ वज्रजंघ ऐसा शोभायमान हो रहा था जैसा कि महाकान्तिसे युक्त सूर्य मेरु पर्वतकी प्रदक्षिणा देता हुआ शोभायमान होता है ॥ २७४ ॥ प्रदक्षिणाके बाद उसने ईर्यापथशुद्धि की अर्थात् मार्ग चलते समय होनेवाली शारीरिक अशुद्धताको दूर किया तथा प्रमाद वश होनेवाली जीवहिंसाको दूर करनेके लिये प्रायश्चित्त आदि किया। अनन्तर, अनेक विभूतियोंको धारण करनेवाले जिनमन्दिरके भीतर प्रवेश कर वहाँ महातपस्वी मुनियोंके दर्शन किये और उनकी वन्दना की। फिर गन्धकुटीके मध्यमें विराजमान जिनेन्द्र-देवकी सुवर्णमयी प्रतिमाकी अभिषेकपूर्वक चन्दन आदि अष्ट द्रव्योंसे पूजा की ॥ २७५-२७६ ॥ पूजा करनेके बाद उस महाबुद्धिमान् वज्रजंघने स्तुति करनेके योग्य जिनेन्द्रदेवको साक्षात् कर (प्रतिमाको साक्षात् जिनेन्द्रदेव मानकर) उत्तम अर्थोंसे भरे हुए स्तोत्रोंसे उनकी स्तुति करना प्रारम्भ किया ॥ २७७ ॥ हे देव! आप कर्मरूपी शत्रुओंको जीतनेवालोंमें सर्वश्रेष्ठ हैं, और मानसिक व्यथाओंसे रहित हैं इसलिये आपको नमस्कार हो। हे ईश, आज मैं कर्मरूपी शत्रुओंका नाश करनेकी इच्छासे आपकी आराधना करता हूँ ॥ २७८ ॥ हे देव, आपके अनन्त गुणोंकी

१ वज्रजङ्घालापः । २ श्रीमती । वधूशस्या अ०, प०, द०, स०, ल० । ३ महेन्द्रधर्या ल० । ४ उत्साहम् । ५ उद्युक्तः । ६ रात्रौ । ७ महापूतजिनालयम् । ८ रविम् । ९ पूजासामग्रीम् । १० कुलवधूसहितः । ११ -निर्बभौ म०, ल० । १२ अलङ्कृतः । १३ ईर्यापथविशुद्धिः । १४ सदर्थत्वात् स्पृहणीयाभिः । १५ प्रत्यक्षीकृत्य । १६ स्तोतुं योग्यम् । १७ आधिः मनःपीडा । १८ भेत्तुमिच्छया । १९ गणधरैः । २० प्रारेभे ।

त्वद्भक्तः सुखमभ्येति लक्ष्मीस्त्वद्भक्तमश्नुते । त्वद्भक्तिर्भुक्तये[1] पुंसां मुक्तये या [2]स्थवीयसी ॥२८०॥
अतो भजन्ति भव्यास्त्वां मनोवाक्कायशुद्धिभिः । फलार्थिभिर्भवान् सेव्यो व्यक्तं कल्पतरूयते ॥२८१॥
त्वया प्रवर्षता धर्मवृष्टिं दुष्कर्मधर्मतः । [3]प्रोदन्यज्जगत्भृङ्गारिस्तृष्णां नवघनायितम् ॥२८२॥
त्वया प्रदर्शितं मार्गम् आसेवन्ते हितैषिणः । भास्वता द्योतितं मार्गमिव कार्यार्थिनो जनाः ॥२८३॥
संसारोच्छेदने बीजं त्वया तत्त्वं निदर्शितम् । आत्रिकामुत्रिकार्थानां यतः सिद्धिरिहाङ्गिनाम् ॥२८४॥
[4]लक्ष्मीसर्वस्वमुज्झित्वा साम्राज्यं [5]प्राज्यवैभवम् । त्वया चित्रमुदूढासौ[6] मुक्तिश्रीः स्पृहयालुना ॥२८५॥
दयावल्लीपरिष्वक्तो[7] महोदर्को[8] महोन्नतिः[9] । प्रार्थितार्थान् प्रपुष्णासि भवान् कल्पद्रुमो यथा ॥२८६॥
त्वया कर्ममहाशत्रून् उच्चानुच्छेत्तु[10]मिच्छता । धर्मचक्रं तपोधारं पाणौकृतमसंभ्रमम्[11] ॥२८७॥
न बद्धो भ्रुकुटिन्यासो न दष्टौष्ठं मुखाम्बुजम् । न भिन्नसौष्ठवं स्थानं व्यरच्यरिजये त्वया ॥२८८॥
दयालुनापि दुःसाध्यमोहशत्रुजिगीषया । तपःकुठारे कठिने त्वया व्यापारितः करः ॥२८९॥
त्वया संसारदुर्वल्ली रूढाऽज्ञानजलोक्षणैः । नाना दुःखफला चित्रं [12]वर्द्धितापि न वर्द्धते ॥२९०॥

स्तुति स्वयं गणधरदेव भी नहीं कर सकते तथापि मैं भक्तिवश आपकी स्तुति प्रारम्भ करता हूँ क्योंकि भक्ति ही कल्याण करनेवाली है ॥ २७९ ॥ हे प्रभो, आपका भक्त सदा सुखी रहता है, लक्ष्मी भी आपके भक्त पुरुषके समीप ही जाती है, आपमे अत्यंत स्थिर भक्ति स्वर्गादिके भोग प्रदान करती है और अन्तमें मोक्ष भी प्राप्त कराती है ॥ २८० ॥ इसलिये ही भव्य जीव शुद्ध मन, वचन, कायसे आपकी स्तुति करते हैं। हे देव, फल चाहनेवाले जो पुरुष आपकी सेवा करते है उनके लिये आप स्पष्ट रूपसे कल्पवृक्षके समान आचरण करते हैं अर्थात् मन वांछित फल देते हैं ॥ २८१ ॥ हे प्रभो, आपने धर्मोपदेशरूपी वर्षा करके, दुष्कर्मरूपी संतापसे अत्यन्त प्यासे ससारी जीवरूपी चातकोंको नवीन मेघके समान आनन्दित किया है ॥ २८२ ॥ हे देव, जिस प्रकार कार्यकी सिद्धि चाहनेवाले पुरुष सूर्यके द्वारा प्रकाशित हुए मार्गकी सेवा करते हैं उसी मार्गसे आते जाते हैं उसी प्रकार आत्महित चाहनेवाले पुरुष आपके द्वारा दिखलाये हुए मोक्षमार्गकी सेवा करते हैं ॥ २८३ ॥ हे देव, आपके द्वारा निरूपित तत्त्व जन्ममरणरूपी संसारके नाश करनेका कारण है तथा इसीसे प्राणियोंको इस लोक और परलोक सम्बन्धी समस्त कार्योंकी सिद्धि होती है ॥ २८४ ॥ हे प्रभो, आपने लक्ष्मीके सर्वस्वभूत तथा उत्कृष्ट वैभवसे युक्त साम्राज्यको छोड़कर भी इच्छासे सहित हो मुक्तिरूपी लक्ष्मीका वरण किया है यह एक आश्चर्यकी बात है ॥ २८५ ॥ हे देव, आप दयारूपी लतासे वेष्टित है, स्वर्ग आदि बड़े-बड़े फल देनेवाले है, अत्यन्त उन्नत हैं—उदार हैं और मनवाञ्छित पदार्थ प्रदान करनेवाले हैं इसलिये आप कल्पवृक्षके समान हैं ॥ २८६ ॥ हे देव, आपने कर्मरूपी बड़े-बड़े शत्रुओंको नष्ट करनेकी इच्छासे तपरूपी धारसे शोभायमान धर्मरूपी चक्रको बिना किसी घबराहटके अपने हाथमें धारण किया है ॥ २८७ ॥ हे देव, कर्मरूपी शत्रुओंको जीतते समय आपने न तो अपनी भौंह ही चढ़ाई, न ओठ ही चबाये, न मुखकी शोभा नष्ट की और न अपना स्थान ही छोड़ा है ॥ २८८ ॥ हे देव, आपने दयालु होकर भी मोहरूपी प्रबल शत्रुको नष्ट करनेकी इच्छासे अतिशय कठिन तपश्चरणरूपी कुठारपर अपना हाथ चलाया है अर्थात् उसे अपने हाथमे धारण किया है ॥ २८९ ॥ हे देव, अज्ञानरूपी जलके सींचनेसे उत्पन्न हुई और अनेक दुःखरूपी फलको देनेवाली संसाररूपी लता आपके द्वारा वर्धित होनेपर भी—बढ़ाये जानेपर भी बढ़ती नहीं है

१ भोगाय। २ स्थूलतरा। ३ पिपासत्संसारिचातकानाम्। ४ भण्डारः। ५ भूरि। ६ विवाहिता। ७ आलिङ्गितः। ८ महोत्तरफलः। ९ महोन्नतः म०, ल०। १० –नुच्चैरुच्छेत्तु– अ०, प०, स०, ल०, द०। ११ अव्यग्रम्। १२ वर्द्धिता छेदिता च।

[1]प्रसीदति भवत्पादपद्मे पद्मा[2] प्रसीदति । विमुखे याति वैमुख्यं भवन्माध्यस्थमीदृशम् ॥२९१॥
प्रातिहार्यमयीं भूतिं त्वं दधानोऽप्यनन्यगाम् । वीतरागो महांश्चासि जगत्येतज्जिनाद्भुतम् ॥२९२॥
तवायं [3]शिशिरच्छायो भात्यशोकतरुर्महान् । शोकमाश्रितभव्यानां विदूर[4]मपहस्तयन् ॥२९३॥
पुष्पवृष्टिं दिवो देवाः किरन्ति त्वां जिनाभितः । परितो मेरुमुत्फुल्ला यथा कल्पमहीरुहाः ॥२९४॥
दिव्यभाषा तवाशेषभाषाभेदानुकारिणी । [5]विकरोति मतोध्वान्तम् अवाचामपि देहिनाम् ॥२९५॥
प्रकीर्णक[6]युगं भाति त्वां जिनोभयतो धुतम् । पतन्निर्झरसंवादि[7] शशाङ्ककरनिर्मलम् ॥२९६॥
चामीकरविनिर्माणं[8] हरिभिर्धृतमासनम् । गिरीन्द्रशिखिरस्पर्द्धि राजते जिनराज ते ॥२९७॥
ज्योतिर्मण्डलमुत्सर्पत् तवालङ्कुरुते तनुम् । मार्तण्डमण्डलद्वेषि विधुन्वज्जगतां तमः ॥२९८॥
तवोद्घोषयतीवोच्चैः जगतामेकभर्तृताम् । दुन्दुभिस्तनितं मन्द्रम् उच्चरत्पथि वार्मुचाम् ॥२९९॥
तवाविष्कुरुते देव प्राभवं भुवनातिगम् । विधुबिम्बप्रतिस्पर्द्धि छत्रत्रितयमुच्छ्रितम् ॥३००॥
विभ्राजते जिनैतत्ते प्रातिहार्यकदम्बकम् । त्रिजगत्सारसर्वस्वमिवैकत्र समुच्चितम् ॥३०१॥

यह भारी आश्चर्यकी बात है (पक्षमें आपके द्वारा छेदी जानेपर बढ़ती नहीं है अर्थात् आपने संसाररूपी लताका इस प्रकार छेदन किया है कि वह फिर कभी नहीं बढ़ती ।) भावार्थ—संस्कृतमे 'वृधु' धातुका प्रयोग छेदना और बढ़ाना इन दो अर्थोंमें होता है । श्लोकमें आये हुए वर्धिता शब्दका जब 'बढ़ाना' अर्थमें प्रयोग किया जाता है तब विरोध होता है, और जब 'छेदना' अर्थमें प्रयोग किया जाता है तब उसका परिहार हो जाता है । ॥ २९० ॥ हे भगवन्, आपके चरण-कमलके प्रसन्न होनेपर लक्ष्मी प्रसन्न हो जाती है और उनके विमुख होनेपर लक्ष्मी भी विमुख हो जाती है । हे देव ! आपकी यह मध्यस्थ वृत्ति ऐसी ही विलक्षण है ॥ २९१ ॥ हे जिनेन्द्र, यद्यपि आप अन्यत्र नहीं पाई जानेवाली प्रातिहार्यरूप विभूतिको धारण करते हैं तथापि संसारमें परम वीतराग कहलाते हैं यह बड़े आश्चर्यकी बात है ॥ २९२ ॥ शीतल छाया से युक्त तथा आश्रय लेनेवाले भव्य जीवोंके शोकको दूर करता हुआ यह आपका अतिशय उन्नत अशोक वृक्ष बहुत ही शोभायमान हो रहा है ॥ २९३ ॥

हे जिनेन्द्र, जिस प्रकार फूले हुए कल्पवृक्ष मेरु पर्वतके सब तरफ पुष्पवृष्टि करते हैं उसी प्रकार ये देव लोग भी आपके सब ओर आकाशसे पुष्पवृष्टि कर रहे हैं । ॥ २९४ ॥ हे देव, समस्त भाषारूप परिणत होनेवाली आपकी दिव्य ध्वनि उन जीवोंके भी मनका अज्ञानान्धकार दूर कर देती है जो कि मनुष्योंकी भाँति स्पष्ट वचन नहीं बोल सकते ॥ २९५ ॥ हे जिन, आपके दोनों तरफ ढुराये जानेवाले, चन्द्रमाकी किरणोंके समान उज्ज्वल दोनों चमर ऐसे शोभायमान हो रहे हैं मानो ऊपरसे पड़ते हुए पानीके झरने ही हों ॥ २९६ ॥ हे जिनराज, मेरु पर्वतकी शिखरके साथ ईर्ष्या करनेवाला और सुवर्णका बना हुआ आपका यह सिंहासन बड़ा ही भला मालूम होता है ॥ २९७ ॥ हे देव, सूर्यमण्डलके साथ विद्वेष करनेवाला तथा जगत्के अन्धकारको दूर करनेवाला और सब ओर फैलता हुआ आपका यह भामण्डल आपके शरीरको अलंकृत कर रहा है ॥ २९८ ॥ हे देव, आकाशमें जो दुन्दुभिका गम्भीर शब्द हो रहा है वह मानो जोर जोरसे यही घोषणा कर रहा है कि संसारके एक मात्र स्वामी आप ही हैं ॥ २९९ ॥ हे देव, चन्द्र-बिम्बके साथ स्पर्धा करनेवाले और अत्यन्त ऊँचे आपके तीनों छत्र आपके सर्वश्रेष्ठ प्रभावको प्रकट कर रहे हैं ॥ ३०० ॥ हे जिन, ऊपर कहे हुए आपके इन आठ प्रातिहार्योंका समूह ऐसा शोभायमान हो रहा है मानो एक जगह इकट्ठे हुए तीनों लोकोंके सर्वश्रेष्ठ पदार्थोंका सार ही

---

१ प्रसन्ने सति । २ लक्ष्मीः । ३ शीत । ४ अपसारयन् । ५ नाशयति । ६ चामर । ७ सदृशम् । ८ करणम् ।

नोपरोद्धुमलं[1] देव तव वैराग्यसम्पदम्। सुरैर्विरचितो भक्त्या प्रातिहार्यपरिच्छदः[2] ॥३०२॥
करिकेसरिदावाहिनिषाद[3]विषमाब्धयः । रोगा बन्धाश्च[4] शाम्यन्ति त्वत्पदानुस्मृतेर्जिन ॥३०३॥
करटक्षर[5]दुद्दाममदाम्बुकृतदुर्दिनम् । गजमा[6]घातुकं मर्त्या जयन्ति त्वदनुस्मृतेः ॥३०४॥
करीन्द्रकुम्भनिर्भेदकठोरनखरो हरिः । क्रमेऽपि[7] पतितं जन्तुं न हन्ति त्वत्पदस्मृतेः ॥३०५॥
नोपद्रवति दीप्तार्चिरप्यर्चिष्मान्[8]समुत्थितः । त्वत्पदस्मृतिशीताम्बुधाराप्रशमितोदयः ॥३०६॥
फणी कृतफणो[9] रोषात् उद्गिरन्[10]गरमुल्वणम् । त्वत्पदागद[11]संस्मृत्या सद्यो भवति निर्विषः ॥३०७॥
वने प्रचण्डलुण्टाककोदण्डरवभीषणे । सार्थाः[12] सार्थाधिपाः स्वैरं प्रयान्ति त्वत्पदानुगाः[13] ॥३०८॥
अपि चण्डानिलाकाण्ड[14]जृम्भणाघूर्णितार्णसम् । तरन्त्यर्णवमुद्वेलं हेलया त्वत्क्रमाश्रिताः ॥३०९॥
अप्यस्थानकृतोत्थानतीव्रव्रणरुजो जनाः । सद्योभवन्त्यनातङ्काः स्मृतत्वत्पदभेषजाः ॥३१०॥
कर्मबन्धविनिर्मुक्तं त्वामनुस्मृत्य मानवः । दृढबन्धनबद्धोऽपि भवत्याशु विशृङ्खलः ॥३११॥
इति [15]विघ्नितविघ्नौघं [16]भक्तिनिघ्नेन चेतसा । पर्युपासे जिनेन्द्र त्वां विघ्नवर्गोपशान्तये ॥३१२॥
त्वमेको जगतां ज्योतिः त्वमेको जगतां पतिः । त्वमेको जगतां बन्धुः त्वमेको जगतां गुरुः[17] ॥३१३॥

हो ॥ ३०१ ॥ हे देव, यह प्रातिहार्योंका समूह आपकी वैराग्यरूपी संपत्तिको रोकनेके लिये समर्थ नहीं है क्योंकि यह भक्तिवश देवोंके द्वारा रचा गया है ॥ ३०२ ॥ हे जिन देव, आपके चरणोंके स्मरण मात्रसे हाथी, सिंह, दावानल, सर्प, भील, विषम समुद्र, रोग और बन्धन आदि सब उपद्रव शान्त हो जाते हैं ॥ ३०३ ॥ जिसके गण्डस्थलसे झरते हुए मदरूपी जलके द्वारा दुर्दिन प्रकट किया जा रहा है तथा जो आघात करनेके लिये उद्यत है ऐसे हाथीको पुरुष आपके स्मरण मात्रसे ही जीत लेते हैं ॥ ३०४ ॥ बड़े-बड़े हाथियोंके गण्डस्थल भेदन करनेसे जिसके नख अतिशय कठिन हो गये हैं ऐसा सिंह भी आपके चरणोंका स्मरण करनेसे अपने पैरोंमें पड़े हुए जीवको नहीं मार सकता है ॥ ३०५ ॥ हे देव, जिसकी ज्वालाएँ बहुत ही प्रदीप्त हो रही हैं तथा जो उन बढ़ती हुई ज्वालाओंके कारण ऊँची उठ रही है ऐसी अग्नि यदि आपके चरण-कमलोंके स्मरणरूपी जलसे शान्त कर दी जावे तो फिर वह अग्नि भी उपद्रव नहीं कर सकती ॥ ३०६ ॥ क्रोधसे जिसका फण ऊपर उठा हुआ है और जो भयंकर विष उगल रहा है ऐसा सर्प भी आपके चरणरूपी औषधिके स्मरणसे शीघ्र ही विषरहित हो जाता है ॥ ३०७ ॥ हे देव, आपके चरणोंके अनुगामी धनी व्यापारी जन प्रचण्ड लुटेरोंके धनुषोंकी टंकारसे भयंकर वनमें भी निर्भय होकर इच्छानुसार चले जाते हैं ॥ ३०८ ॥ जो प्रबल वायुकी असामयिक अचानक वृद्धिसे कम्पित हो रहा है ऐसे बड़ी-बड़ी लहरोंवाले समुद्रको भी आपके चरणोंकी सेवा करनेवाले पुरुष लीलामात्रमें पार हो जाते हैं ॥ ३०९ ॥ जो मनुष्य कुढंगे स्थानोंमें उत्पन्न हुए फोड़ों आदिके बड़े बड़े घावोंसे रोगी हो रहे हैं वे भी आपके चरणरूपी औषधिका स्मरण करने मात्रसे शीघ्र ही नीरोग हो जाते हैं ॥ ३१० ॥ हे भगवन्, आप कर्मरूपी बन्धनोंसे रहित हैं। इसलिये मजबूत बन्धनोंसे बँधा हुआ भी मनुष्य आपका स्मरण कर तत्काल ही बन्धनरहित हो जाता है ॥ ३११ ॥ हे जिनेन्द्रदेव, आपने विघ्नोंके समूहको भी विघ्नित किया है—उन्हें नष्ट किया है इसलिये अपने विघ्नोंके समूहको नष्ट करनेके लिये मैं भक्तिपूर्ण हृदयसे आपकी उपासना करता हूं ॥ ३१२ ॥ हे देव, एकमात्र आप ही तीनों लोकोंको

१ समर्थः । २ परिकरः । ३ व्याधः । ४ बन्धनानि । ५ गण्डस्थलम् । ६ आहिंसकम् । आघातकं द०, ल० । ७ पादे । ८ समुच्छ्रितः प०, स० । ९ उत्थितकणः । १० विषम् । ११ अगदं भेषजम् । १२ अर्थेन सहिताः । १३ त्वत्पदोपगाः ट० । त्वत्पदसमीपस्थाः । १४ अकाण्डः अकालः । १५ विहतान्तरायसमुदयम् । १६ भक्त्यधीनेन । १७ पिता ।

त्वमादिः सर्वविद्यानां त्वमादिः सर्वयोगिनाम् । त्वमादिर्धर्मतीर्थस्य त्वमादिर्गुरुरङ्गिनाम् ॥३१४॥
त्वं [1]सार्वः सर्वविद्येशः सर्वलोकानलोकथाः । स्तुतिवादस्तवैतावान् अलमास्तां सविस्तरः ॥३१५॥

वसन्ततिलकम्

त्वां देवमित्थमभिवन्द्य कृतप्रणामो
नान्यत्फलं परिमितं [2]परिमार्गयामि ।
त्वय्येव भक्तिमचलां जिन मे दिश त्वं
सा सर्वमभ्युदयमुक्तिफलं प्रसूते ॥३१६॥

शार्दूलविक्रीडितम्

इत्युच्चैः प्रणिपत्य तं जिनपतिं स्तुत्वा कृताभ्यर्चनः स श्रीमान् मुनिवृन्दमप्यनुगमात्[3] संपूज्य निष्कल्मषम् ।
श्रीमत्या सह वज्रजङ्घनृपतिस्तामुत्तमर्द्धिं पुरीं प्राविक्षत्प्रमदोदयाज्जिनगुणान् भूयः स्मरन् भूतये ॥३१७॥
लक्ष्मीवानभिषेकपूर्वकमम्भौ श्रीवज्रजङ्घो भुवि द्वात्रिंशन्मुकुटप्रबद्धमहित[4]क्ष्माभृत्सहस्रैर्मुहुः ॥
तां कल्याणपरम्परामनुभवन् भोगान् परान्निर्विशन्[5] श्रीमत्या सह दीर्घकालमवसत्तस्मिन् पुरेऽर्च्चञ्जिनान् ।३१८।

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे श्रीमतीवज्रजङ्घसमागमवर्णनं नाम सप्तमं पर्व ॥७॥

प्रकाशित करनेवाली ज्योति है, आप ही समस्त जगत्के एकमात्र स्वामी हैं, आप ही समस्त संसारके एकमात्र बन्धु हैं और आप ही समस्त लोकके एकमात्र गुरु हैं ॥ ३१३ ॥ आप ही सम्पूर्ण विद्याओंके आदिस्थान हैं, आप ही समस्त योगियोंमें प्रथम योगी हैं, आप ही धर्मरूपी तीर्थके प्रथम प्रवर्तक है, और आप ही प्राणियोंके प्रथम गुरु है ॥ ३१४ ॥ आप ही सबका हित करनेवाले हैं आप ही सब विद्याओंके स्वामी है और आप ही समस्त लोकको देखनेवाले हैं । हे देव, आपकी स्तुतिका विस्तार कहां तक किया जावे । अब तक जितनी स्तुति कर चुका हूं मुझ जैसे अल्पज्ञके लिये उतनी ही बहुत है ॥ ३१५ ॥ हे देव, इस प्रकार आपकी वन्दना कर मैं आपको प्रणाम करता हूं और उसके फल स्वरूप आपसे किसी सीमित अन्य फलकी याचना नहीं करता हूं। किंतु हे जिन, आपमें ही मेरी भक्ति सदा अचल रहे यही प्रदान कीजिये क्योंकि वह भक्ति ही स्वर्ग तथा मोक्षके उत्तम फल उत्पन्न कर देती है ॥ ३१६ ॥ इस प्रकार श्रीमान् वज्रजंघ राजाने जिनेन्द्र देवको उत्तम रीतिसे नमस्कार किया, उनकी स्तुति और पूजा की । फिर राग-द्वेषसे रहित मुनिसमूहकी भी क्रमसे पूजा की । तदनन्तर श्रीजिनेन्द्रदेवके गुणोंका बार बार स्मरण करता हुआ वह वज्रजंघ राज्यादिकी विभूति प्राप्त करनेके लिये हर्षसे श्रीमतीके साथ साथ अनेक ऋद्धियोंसे शोभायमान पुण्डरीकिणी नगरीमें प्रविष्ट हुआ ॥ ३१७ ॥ वहाँ भरतभूमिके बत्तीस हजार मुकुटबद्ध राजाओंने उस लक्ष्मीमान् वज्रजंघका राज्याभिषेकपूर्वक भारी सन्मान किया था। इस प्रकार जिनेन्द्र भगवान्की पूजा करते हुए हजारों राजाओंके द्वारा बार बार प्राप्त हुई कल्याण परम्पराका अनुभव करते हुए और श्रीमतीके साथ उत्तमोत्तम भोग भोगते हुए वज्रजंघने दीर्घकाल तक उसी पुण्डरीकिणी नगरीमें निवास किया था ॥ ३१८ ॥

इस प्रकार आर्ष नामसे प्रसिद्ध भगवज्जिनसेनाचार्यप्रणीतत्रिषष्टिलक्षण महापुराण संग्रहमें श्रीमती और वज्रजंघके समागमका वर्णन करनेवाला सातवां पर्व पूर्ण हुआ ।

---

१ सर्वेभ्यो हितः । २ मृगये । ३ अनुक्रमात् । ४ महितः क्ष्माभृत् अ०, स० । ५ अनुभवम् ।

अष्टमं पर्व

अथ तत्रावसद्दीर्घं स कालं चक्रिमन्दिरे । नित्योत्सवे महाभोगसम्पदा सोपभोगया ॥१॥
श्रीमतीस्तनसंस्पर्शात् तन्मुखाब्जविलोकनात् । तस्यासीन्महती प्रीतिः प्रेम्णे वस्त्विष्टमाश्रितम् ॥२॥
तन्मुखाब्जाद् रसामोदा[1]वाहरन्नातृपन्नृपः । मधुव्रत इवाम्भोजात् कामसेवा[2] न तृप्तये ॥३॥
मुखेन्दुमस्याः सोऽपश्यत् निर्निमेषोत्कया[3] दृशा । [4]कान्तिमद्दशनज्योतिर्ज्योत्स्नया सततोज्ज्वलम् ॥४॥
[5]अपाङ्गवीक्षितैर्लीलास्मितैश्च कलभाषितैः[6] । मनो बबन्ध सा तस्य [7]स्वस्मिन्नत्यन्तभासुरैः[8] ॥५॥
त्रिवलीवीचिरम्येऽसौ नाभिकावर्त्तशोभिनि । उदरे कृशमध्याया रेमे नद्याइवह्रदे[9] ॥६॥
नितम्बपुलिने तस्याः स चिरं [10]धृतिमातनोत् । काञ्चीविहङ्गविरुते[11] रम्ये हंसयुवायितः ॥७॥
तत्स्तनांशु[12]कमाहृत्य तत्र व्यापारयन् करम् । मदेभ इव सोऽभासीत् पद्मिन्याः कुड्मलं स्पृशन् ॥८॥
स्तनचक्राह्वये तस्याः श्रीखण्डद्रवकर्दमे । उरःसरसि रेमेऽसौ सत्कुचांशुकशैवले ॥९॥

विवाह हो जानेके बाद वज्रजंघने, जहां नित्य ही अनेक उत्सव होते रहते थे ऐसे चक्रवर्तीके भवनमें उत्तम उत्तम भोगोपभोग सम्पदाओंके द्वारा भोगोपभोगोंका अनुभव करते हुए दीर्घकालतक निवास किया था ॥ १ ॥ वहां श्रीमतीके स्तनोंका स्पर्श करने तथा मुखरूपी कमलके देखनेसे उसे बड़ी प्रसन्नता होती थी सो ठीक ही है। इष्ट वस्तुके आश्रयसे सभीको प्रसन्नता होती है ॥ २ ॥ जिस प्रकार भौंरा कमलसे रस और सुवासको ग्रहण करता हुआ कभी संतुष्ट नहीं होता उसी प्रकार राजा वज्रजंघ भी श्रीमतीके मुखरूपी कमलसे रस और सुवासको ग्रहण करता हुआ कभी संतुष्ट नहीं होता था। सच है, कामसेवनसे कभी संतोष नहीं होता है ॥ ३ ॥ श्रीमतीका मुखरूपी चन्द्रमा चमकीले दांतोंकी किरणरूपी चांदनीसे हमेशा उज्ज्वल रहता था इसलिये वज्रजंघ उसे टिमकार-रहित लालसापूर्ण दृष्टिसे देखता रहता था ॥ ४ ॥ श्रीमतीने अत्यन्त मनोहर कटाक्षावलोकन, लीला सहित मुसकान और मधुर भाषणोंके द्वारा उसका चित्त अपने अधीन कर लिया था ॥ ५ ॥ श्रीमतीकी कमर पतली थी और उदर किसी नदीके गहरे कुण्डके समान था। क्योंकि कुण्ड जिस प्रकार लहरोंसे मनोहर होता है उसी प्रकार उसका उदर भी त्रिवलिसे (नाभिके नीचे रहनेवाली तीन रेखाओंसे) मनोहर था और कुण्ड जिस प्रकार आवर्तसे शोभायमान होता है उसी प्रकार उसका उदर भी नाभिरूपी आवर्तसे शोभायमान था। इस तरह जिसका मध्य भाग कृश है ऐसी किसी नदीके कुण्डके समान श्रीमतीके उदर प्रदेशपर वह वज्रजंघ रमण करता था ॥६॥ तरुण हंसके समान वह वज्रजंघ, करधनीरूपी पक्षियोंके शब्दसे शब्दायमान उस श्रीमतीके मनोहर नितम्बरूपी पुलिनपर चिरकाल तक क्रीड़ा करके संतुष्ट रहता था ॥ ७ ॥ स्तनोंसे वस्त्र हटाकर उन पर हाथ फेरता हुआ वज्रजंघ ऐसा शोभायमान होता था जैसा कि कमलिनीके कुड्मल (बौंड़ीका) स्पर्श करता हुआ मदोन्मत्त हाथी शोभायमान होता है ॥ ८ ॥ जो स्तनरूपी चक्रवाक पक्षियोंसे सहित है, चन्दनद्रवरूपी

---

१ –नाहरन्ना–द० । –दादाहरन्ना–अ०, प० । २ इष्टविषयोपभोगः । ३ उत्कण्ठया । ४ कान्तिरेषामस्तीति कान्तिमन्तः ते च ते दशनाश्च तेषां ज्योतिरेव ज्योत्स्ना तया । ५ वीक्षणैः । ६ कलभाषणैः । 'ध्वनौ तु मधुरास्फुटे । कलो मन्द्रस्तु गम्भीरे' । ७ आत्मनि । ८–त्यन्तबन्धुरैः अ०, प०, म०, स०, द० । ९ इवाह्रदे अ०, स० । १० सन्तोषम् । ११ ध्वनौ । १२ कुचांशुक–ट० । उरोजाच्छादनवस्त्रविशेषः ।

मृदुबाहुलते कण्ठे गाढमासज्य[1] सुन्दरी । कामपाशायिते तस्य मनोऽबध्नात् मनस्विनी[2] ॥१०॥
मृदुपाणितले स्पर्शं रसगन्धौ मुखाम्बुजे । शब्दमालपिते तस्याः तनौ[3] रूपं निरूपयन्[4] ॥११॥
सुचिरं तर्पयामास [5]सोऽक्षग्राममशेषतः । सुखमैन्द्रियिकं[6] प्रेप्सोः[7] गति[8]र्नातः पराङ्गिनः ॥१२॥
काञ्चीदाममहानागसंरुद्धेऽन्यैर्दुरासदे । रेमे तस्याः कटिस्थाने महतीव निधानके ॥१३॥
कचग्रहैर्मृदीयोभिः कर्णोत्पलविताडितैः[9] । अभूत् प्रणयकोपोऽस्या यूनः प्रीत्यै सुखाय च ॥१४॥
गलिताभरणन्यासे रतिधर्माम्बुकर्दमे । तस्यासीद्धृति[10]रङ्गेऽस्याः सुखोत्कर्षः स कामिनाम् ॥१५॥
सौधवातायनोपान्तकृतशय्यौ रतिश्रमम् । अपनिन्यतुरास्पृष्टौ[11] तौ शनैर्मृदुमारुतैः ॥१६॥
तस्या मुखेन्दुराह्लादं लोचने नयनोत्सवम् । स्तनौ स्पर्शसुखासङ्गम् अस्य तेनुर्दुरासदम् ॥१७॥
तत्कन्यामृतमासाद्य दिव्यौषधमिवातुरः[12] । स काले सेवमानोऽभूत् सुखी निर्मदनज्वरः ॥१८॥
कदाचिन्नन्दनस्पर्द्धिपरार्द्ध्यतरुशोभिषु । गृहोद्यानेषु रेमेऽसौ कान्तयामा महर्द्धिषु ॥१९॥
कदाचिद्बहिरुद्याने लतागृहविराजिनि । क्रीडाद्रिसहितेऽदीव्यत् प्रियया [13]समुत्सुकः ॥२०॥

कीचड़से युक्त है और स्तनवस्त्र (कंचुकी) रूपी शेवालसे शोभित है ऐसे उस श्रीमतीके वक्षःस्थलरूपी सरोवरमें वह वज्रजंघ निरन्तर क्रीड़ा करता था ॥९॥ उस सुन्दरी तथा सहृदया श्रीमतीने कामपाशके समान अपनी कोमल भुजलताओंको वज्रजंघके गलेमें डालकर उसका मन बांध लिया था–अपने वश कर लिया था ॥ १० ॥ वह वज्रजंघ श्रीमतीकी कोमल बाहुओंके स्पर्शसे स्पर्शन इन्द्रियको, मुखरूपी कमलके रस और गन्धसे रसना तथा घ्राण इन्द्रियको, सम्भाषणके समय मधुर शब्दोंको सुनकर कर्ण इन्द्रियको और शरीरके सौन्दर्यको निरखकर नेत्र इन्द्रियको तृप्त करता था । इस प्रकार वह पांचों इन्द्रियोंको सब प्रकारसे चिरकालतक संतुष्ट करता था सो ठीक ही है इन्द्रियसुख चाहनेवाले जीवोंको इसके सिवाय और कोई उपाय नहीं है ॥११-१२॥ करधनीरूपी महासर्पसे घिरे हुए होनेके कारण अन्य पुरुषोंको अप्राप्य श्रीमतीके कटिभागरूपी बड़े खजानेपर वज्रजंघ निरन्तर क्रीड़ा किया करता था ॥ १३ ॥ जब कभी श्रीमती प्रणयकोपसे कुपित होती थी तब वह धीरे धीरे वज्रजंघके केश पकड़कर खींचने लगती थी तथा कर्णोत्पलके कोमल प्रहारोंसे उसका ताड़न करने लगती थी । उसकी इन चेष्टाओंसे वज्रजंघको बड़ा ही संतोष और सुख होता था ॥ १४ ॥ परस्परकी खींचातानीसे जिसके आभरण अस्त-व्यस्त होकर गिर पड़े हैं तथा जो रतिकालीन स्वेद-बिन्दुओंसे कर्दम युक्त हो गया है ऐसे श्रीमतीके शरीरमें उसे बड़ा सन्तोष होता था । सो ठीक ही है कामीजन इसीको उत्कृष्ट सुख समझते हैं ॥ १५ ॥ राजमहलमें झरोखेके समीप ही इनकी शय्या थी इसलिये झरोखेसे आनेवाली मन्द-मन्द वायुसे इनका रति-श्रम दूर होता रहता था ॥ १६ ॥ श्रीमतीका मुखरूपी चन्द्रमा वज्रजंघके आनन्दको बढ़ाता था, उसके नेत्र, नेत्रोंका सुख विस्तृत करते थे तथा उसके दोनो स्तन अपूर्व स्पर्श-सुखको बढ़ाते थे ॥ १७ ॥ जिस प्रकार कोई रोगी पुरुष उत्तम औषधि पाकर समयपर उसका सेवन करता हुआ ज्वर आदिसे रहित होकर सुखी हो जाता है उसी प्रकार वज्रजंघ भी उस कन्यारूपी अमृतको पाकर समयपर उसका सेवन करता हुआ काम-ज्वरसे रहित होकर सुखी हो गया था ॥ १८ ॥ वह वज्रजंघ कभी तो नन्दन वनके साथ स्पर्धा करनेवाले श्रेष्ठ वृक्षोंसे शोभायमान और महाविभूतिसे युक्त घरके उद्यानोंमें श्रीमतीके साथ रमण करता था और कभी लतागृहों

---

१ संसक्तौ कृत्वा । २ 'क्लेशैरुपहतस्यापि मानसं सुखिनो यथा । स्वकार्येषु स्थिरं यस्य मनस्वीत्युच्यते बुधैः ॥" ३ शरीरे । ४ पश्यन् । ५ इन्द्रियसमुदयम् । ६ –मैन्द्रियकं द०, स०, म०, ल० । ७ प्राप्तमिच्छोः । ८ उपायः । ९ 'त' पुस्तके 'विताडनैः' इत्यपि पाठः । १० मुद् । ११ ईषत्स्पृष्टौ । १२ व्याधिपीडितः । १३ स समुत्सुकः म०, ल० ।

नदीपुलिनदेशेषु कदाचिद्विजहार सः । स्वयंगलत्संफुल्लतताकुसुमशोभिषु ॥२१॥
कदाचिद् दीर्घिकाम्भस्सु जलक्रीडां समातनोत् । मकरन्दरजःपुञ्जपिञ्जरेषु स सप्रियः ॥२२॥
चामीकरमयैर्यन्त्रैः जलकेलिविधावसौ । प्रियामुखाब्जमम्भोभिः असिञ्चत् कूणितेक्षणम्[1] ॥२३॥
साप्यस्य मुखमासेक्तुं कृतवाञ्छापि नाशकत् । स्तनांशुके गलत्याविर्भवद्व्रीडापराङ्मुखी ॥२४॥
जलकेलिविधौ तस्या लग्नं स्तनतटेऽशुकम् । जलच्छायां[3] दधे श्लक्ष्णं[4] स्तनशोभामकर्शयत्[5] ॥२५॥
स्तनकुड्मल[6]संशोभा मृदुबाहुमृणालिका । सा दधे नलिनीशोभां मुखाम्बुजविराजिनी ॥२६॥
कर्णोत्पलं स्वमित्यस्या विलोलैराददे जलैः । तन्मुखाम्बुरुहच्छायां स्वाब्जैर्जेतुमिवाक्षमैः ॥२७॥
धारागृहे स निपतद्धाराबद्धघनागमे । प्रियया विद्युतेवोच्चैः चिक्रीड सुखनिर्वृतः[7] ॥२८॥
कदाचित्सौधपृष्ठेषु तारकाप्रतिबिम्बितैः[8] । कृतार्चनेष्वसौ रेमे ज्योत्स्नां रात्रिषु निर्विशन्[9] ॥२९॥
इति तत्र चिरं भोगैः उपभोगैश्च हारिभिः । वधूवरमरंस्तैतत् स्वर्गभोगातिशायिभिः ॥३०॥
तयोस्तथाविधैर्भोगैः जितेन्द्रमहिमोत्सवैः[10] । पात्रदानविनोदैश्च तत्र कालोऽगमद्बहुः ॥३१॥
[11]नित्यप्रसा[12]दलाभेन तयोर्नित्यमहोत्सवैः । पुत्रोत्पत्त्यादिसर्गैश्च स कालोऽविदितोऽगमत् ॥३२॥

(निकुंजों) से शोभायमान तथा क्रीड़ा पर्वतोंसे सहित बाहरके उद्यानोंमें उत्सुक होकर क्रीड़ा करता था ॥ १९-२० ॥ कभी फूली हुई लताओंसे झरे हुए पुष्पोंसे शोभायमान नदीतटके प्रदेशोंमें विहार करता था ॥ २१ ॥ और कभी कमलोंकी परागरजके समूहसे पीले हुए बावड़ीके जलमें प्रियाके साथ जल-क्रीड़ा करता था ॥ २२ ॥ वह वज्रजंघ जल-क्रीड़ाके समय सुवर्णमय पिचकारियोंसे अपनी प्रिया श्रीमतीके तीखे कटाक्षोंवाले मुख-कमलका सिंचन करता था ॥ २३ ॥ पर श्रीमती जब प्रियपर जल डालनेके लिये पिचकारी उठाती थी तब उसके स्तनोंका आंचल खिसक जाता था और इससे वह लज्जासे परवश हो जाती थी ॥ २४ ॥ जलक्रीड़ा करते समय श्रीमतीके स्तनतटपर जो महीन वस्त्र पानीसे भीगकर चिपक गया था वह जलकी छायाके समान मालूम होता था । उससे उसके स्तनोंकी शोभा मन्द पड़ रही थी ॥२५॥ श्रीमतीके स्तन कुड्मल (बौंड़ी) के समान, कोमल भुजायें मृणालके समान और मुख कमलके समान शोभायमान था इसलिये वह जलके भीतर कमलिनीकी शोभा धारण कर रही थी ॥ २६ ॥ हमारे ये कमल श्रीमतीके मुखकमलकी कान्तिको जीतनेके लिये समर्थ नहीं है यह विचार कर ही मानो चंचल जलने श्रीमतीके कर्णोत्पलको वापिस बुला लिया था ॥ २७ ॥ ऊपरसे पड़ती हुई जलधारासे जिसमें सदा वर्षा ऋतु बनी रहती है ऐसे धारागृहमें (फव्वाराके घरमें) वह वज्रजंघ बिजलीके समान अपनी प्रिया श्रीमतीके साथ सुखपूर्वक क्रीड़ा करता था ॥ २८ ॥ और कभी ताराओंके प्रतिबिम्बके बहाने जिनपर उपहारके फूल बिखेरे गये है ऐसे राजमहलोंकी रत्नमयी छतोंपर रातके समय चांदनीका उपभोग करता हुआ क्रीड़ा करता था ॥ २९ ॥ इस प्रकार दोनों वधू वर उस पुण्डरीकिणी नगरीमें स्वर्गलोकके भोगोंसे भी बढ़कर मनोहर भोगोपभोगोंके द्वारा चिरकाल तक क्रीड़ा करते रहे ॥ ३० ॥ ऊपर कहे हुए भोगोंके द्वारा, जिनेन्द्रदेवकी पूजा आदि उत्सवोंके द्वारा और पात्र दान आदि माङ्गलिक कार्योंके द्वारा उन दोनोंका वहाँ बहुत समय व्यतीत हो गया था ॥३१॥ वहाँ अनेक लोग आकर वज्रजघके लिये उत्तम उत्ताम वस्तुएँ भेंट करते थे, पूजा आदिके उत्सव होते रहते थे तथा पुत्र-जन्म आदिके समय अनेक उत्सव मनाये जाते थे जिससे उन दोनोंका दीर्घ समय अनायास ही व्यतीत हो गया था ॥ ३२ ॥

---

१ कूणित सङ्कोचितम् । कोणितेक्षणम् म०, ल० । २ लज्जा । ३ जलच्छाय प०, अ०, स० । जलछाया ल० । ४ श्लक्ष्णा प० । ५ कृशामकुर्वत् । ६ –कुड्मल– अ०, प०, स०, म०, द०, ल० । ७ सुखतृप्तः । ८ प्रतिबिम्बैः । ९ अनुभवन् । 'निर्वेशो भृतिभोगयोः' । १० पूजोत्सवैः । ११ तस्य प्रसाद– म०, ल० । १२ प्रसन्नता ।

वज्रजङ्घानुजां कन्याम् अनुरूपामनुन्धरीम् । वज्रबाहुर्विभूत्यासावदितामिततेजसे ॥३३॥
चक्रिसूनु तमासाद्य सुतरां पिप्रिये सती । अनुन्धरी नवोढासौ वसन्तमिव कोकिला ॥३४॥
अथ चक्रधरः पूजा सत्कारैरभिपूजितम् । स्वपुरं प्रति यानाय[1] व्य[2]सृजसद्वधूवरम् ॥३५॥
हस्त्यश्वरथपादातं रत्नं देशं सकोशकम् । [3]तदान्वयिनिकं पुत्र्यै ददौ चक्रधरो महत् ॥३६॥
अथ प्रयाणसंक्षोभाद् दम्पत्योस्तत्पुरं तदा । परमाकुलतां भेजे तद्गुणैरुन्मनायितम् ॥३७॥
ततः प्रस्थानगम्भीरभेरीध्वानैश्शुभे दिने । प्रयाणमकरोच्छ्रीमान् वज्रजङ्घः सहाङ्गनः ॥३८॥
वज्रबाहुमहाराजो देवी चास्य वसुन्धरा । वज्रजङ्घं सपत्नीकं व्रजन्तमनुजग्मतुः ॥३९॥
पौरवर्गं तथा मन्त्रिसेनापतिपुरोहितान् । सोऽनु[4]व्रजितुमायातान्ना[5]तिदूराद् व्यसर्जयत् ॥४०॥
हस्त्यश्वरथभूयिष्ठं साधनं सहपत्तिकम् । [6]संवाहयन् स संप्रापत् पुरमुत्पलखेटकम् ॥४१॥
परार्द्ध्य[1]रचनोपेतं सोत्सवं प्रविशन्पुरम् । पुरन्दर इवाभासीद् वज्रजङ्घोऽमितद्युतिः ॥४२॥
पौराङ्गना महावीथीविशन्तं तं प्रियान्वितम् । सुमनोञ्जलिभिः प्रीत्या [7]चक्रुः सौधसंश्रिताः ॥४३॥
पुष्पाक्षतयुतां पुण्यां शेषां पुण्याशिषा समम् । प्रजाः समन्ततोऽभ्येत्य दम्पती तावलम्भयन्[8] ॥४४॥

वज्रजंघकी एक अनुंधरी नामकी छोटी बहिन थी जो उसीके समान सुन्दर थी। राजा वज्रबाहुने वह बड़ी विभूतिके साथ चक्रवर्तीके बड़े पुत्र अमिततेजके लिये प्रदान की थी ॥ ३३ ॥ जिस प्रकार कोयल वसन्तको पाकर प्रसन्न होती है उसी प्रकार वह नवविवाहिता सती अनुंधरी, चक्रवर्तीके पुत्रको पाकर अत्यन्त प्रसन्न हुई थी ॥ ३४ ॥ इस प्रकार जब सब कार्य पूर्ण हो चुके तब चक्रवर्ती वज्रदन्त महाराजने अपने नगरको वापिस जानेके लिये पूजा सत्कार आदिसे सबका सन्मान कर वधू-वरको बिदा कर दिया ॥ ३५ ॥ उस समय चक्रवर्तीने पुत्रीके लिये हाथी-घोड़े, रथ, पियादे, रत्न, देश और खजाना आदि कुलपरम्परासे चला आया बहुतसा धन दिया था ॥ ३६ ॥

वज्रजंघ और श्रीमतीने अपने गुणोंसे समस्त पुरवासियोंको उन्मुग्ध कर लिया था इसलिये उनके जानेका क्षोभकारक समाचार सुनकर समस्त पुरवासी अत्यन्त व्याकुल हो उठे थे ॥३७॥ तदनन्तर किसी शुभदिन श्रीमान् वज्रजंघने अपनी पत्नी श्रीमतीके साथ प्रस्थान किया। उस समय उनके प्रस्थानको सूचित करनेवाले नगाड़ोंका गंभीर शब्द हो रहा था ॥ ३८ ॥ वज्रजंघ अपनी पत्नीके साथ आगे चलने लगे और महाराज वज्रबाहु तथा उनकी पत्नी वसुन्धरा महाराज्ञी उनके पीछे पीछे जा रहे थे ॥ ३९ ॥ पुरवासी, मंत्री, सेनापति तथा पुरोहित आदि जो भी उन्हें पहुंचाने गये थे वज्रजंघने उन्हें थोड़ी दूरसे वापिस विदा कर दिया था ॥ ४० ॥ हाथी, घोड़े, रथ और पियादे आदिकी विशाल सेनाका सचालन करता हुआ वज्रजंघ क्रम क्रमसे उत्पलखेटक नगरमें पहुँचा ॥ ४१ ॥ उस समय उस नगरीमें अनेक उत्तम उत्तम रचनाएँ की गई थीं, कई प्रकारके उत्सव मनाये जा रहे थे। उस नगरमें प्रवेश करता हुआ अतिशय देदीप्यमान वज्रजंघ इन्द्रके समान शोभायमान हो रहा था ॥ ४२ ॥ जब वज्रजंघने अपनी प्रिया श्रीमतीके साथ नगरकी प्रधान प्रधान गलियोंमें प्रवेश किया तब पुरसुन्दरियोंने महलोंकी छतोंपर चढ़कर उन दोनोंपर बड़े प्रेमके साथ अंजलि भर भरकर फूल बरसाये थे ॥ ४३ ॥ उस समय सभी ओरसे प्रजाजन आते थे और शुभ आशीर्वादके साथ साथ पुष्प तथा अक्षतसे मिला

---

१ गमनाय । २ प्राहिणोत् । ३ अनु पश्चात्, अयः अयनं गमनं अन्वयः स्यादित्यर्थः । अनवस्थितम् अन्वयः अनुगमनम् अस्याः अस्तीत्यस्मिन्नर्थे इन् प्रत्यये अन्वयिन् इति शब्दः, ततः ङीप्रत्यये सति अन्वयिनीति सिद्धम्। अन्वयिन्याः सम्बन्धि द्रव्यमित्यस्मिन्नर्थे ठणि सति आन्वयिनिकमिति सिद्धम् । [जामातृदेयं द्रव्यमित्यर्थः] । ४ अनुगन्तुम् । ५ अनतिदूरात् । ६ सम्यग् गमयन् । ७ किरन्ति स्म । ८ प्रापयन्ति स्म ।

ततः महतगम्भीरपटहध्वानसङ्कुलम् । पुरमुत्तोरणं पश्यन् स विवेश नृपालयम् ॥४५॥
तत्र[1] श्रीभवने[2] रम्ये सर्वर्तुसुखदायिनि । श्रीमत्या सह संप्रीत्या वज्रजङ्घोऽवसत् सुखम् ॥४६॥
स राजसदनं रम्यं प्रीत्यामुष्यै प्रदर्शयन् । तत्र तां रमयामास खिन्नां गुरुवियोगतः[3] ॥४७॥
पण्डिता सममायाता सखीनामग्रणीः सती[4] । तामसौ रञ्जयामास विनोदैर्नर्त्तनादिभिः ॥४८॥
भोगैरनारतैरेवं काले गच्छत्यनुक्रमात् । श्रीमती सुषुवे पुत्रान् व्येक[5]पञ्चाशतं यमान्[6] ॥४९॥
अथान्येद्युर्महाराजो वज्रबाहुर्महाद्युतिः । शरदम्बुधरोत्थानं सौधाग्रस्थो निरूपयन् ॥५०॥
दृष्ट्वा तद्विलयं सद्यो निर्वेदं परमागतः । विरक्तस्यास्य चित्तेऽभूदिति चिन्ता गरीयसी ॥५१॥
पश्य नः पश्यतामेव कथमेष शरद्घनः । प्रासादाकृतिरुद्भूतो विलीनश्च क्षणान्तरे ॥५२॥
[7]सम्पदभ्रविलायं[8] नः क्षणादेषा विलास्यते । लक्ष्मीस्तटिद्विलोलेयं इत्वर्यो[9] यौवनश्रियः ॥५३॥
[10]आपातमात्ररम्याश्च भोगाः पर्यन्ततापिनः । प्रतिक्षणं गलत्यायुः गलन्नालिजलं[11] यथा ॥५४॥
रूपमारोग्यमैश्वर्य्यं इष्टबन्धुसमागमः । प्रियाङ्गनारतिश्चेति सर्वमप्यनवस्थितम्[12] ॥५५॥
विचिन्त्येति चलां लक्ष्मीं प्रजिहासुः[13] सुधीरसौ । अभिषिच्य सुतं राज्ये वज्रजङ्घमतिष्ठिपत् ॥५६॥
स राज्यभोगनिर्विण्णः तूर्णं[14] यमधरान्तिके । नृपैः सार्द्धं सहस्रार्द्धैं[15]मितैर्दीक्षामुपाददे ॥५७॥

हुआ पवित्र प्रसाद उन दोनों दंपतियोंके समीप पहुंचाते थे ॥ ४४ ॥ तदनन्तर बजती हुई भेरियों-के गंभीर शब्दसे व्याप्त तथा अनेक तोरणोंसे अलंकृत नगरकी शोभा देखते हुए वज्रजंघने राजभवनमें प्रवेश किया ॥ ४५ ॥ वह राजभवन अनेक प्रकारकी लक्ष्मीसे शोभित था, महा मनोहर था और सर्व ऋतुओंमें सुख देनेवाली सामग्री से सहित था। ऐसे ही राजमहलमें वज्रजंघ श्रीमतीके साथ साथ बड़े प्रेम और सुखसे निवास करता था ॥ ४६ ॥ यद्यपि माता पिता आदि गुरुजनोंके वियोगसे श्रीमती खिन्न रहती थी परन्तु वज्रजंघ बड़े प्रेमसे अत्यन्त सुन्दर राजमहल दिखलाकर उसका चित्त बहलाता रहता था ॥ ४७ ॥ शील व्रत धारण करनेवाली तथा सब सखियोमें श्रेष्ठ पण्डिता नामकी सखी भी उसके साथ आई थी। वह भी नृत्य आदि अनेक प्रकारके विनोदोंसे उसे प्रसन्न रखती थी ॥ ४८ ॥ इस प्रकार निरन्तर भोगोपभोगोके द्वारा समय व्यतीत करते हुए उसके क्रमशः उनचास युगल अर्थात् अट्ठानबे पुत्र उत्पन्न हुए ॥ ४९ ॥

तदनन्तर किसी एक दिन महाकान्तिमान् महाराज वज्रबाहु महलकी छतपर बैठे हुए शरद् ऋतुके बादलोंका उठाव देख रहे थे ॥ ५० ॥ उन्होने पहले जिस बादलको उठता हुआ देखा था उसे तत्कालमें विलीन हुआ देखकर उन्हें वैराग्य उत्पन्न हो गया। वे उसी समय संसारके सब भोगोंसे विरक्त हो गये और मनमें इस प्रकार गम्भीर विचार करने लगे ॥ ५१ ॥ देखो, यह शरद् ऋतुका बादल हमारे देखते देखते राजमहलकी आकृतिको धारण किये हुए था और देखते देखते ही क्षण भरमें विलीन हो गया ॥ ५२ ॥ ठीक, इसी प्रकार हमारी यह संपदा भी मेघके समान क्षण भरमें विलीन हो जायेगी। वास्तवमें यह लक्ष्मी बिजलाके समान चंचल है और यौवनकी शोभा भी शीघ्र चली जानेवाली है ॥ ५३ ॥ ये भोग प्रारम्भ कालमें ही मनोहर लगते हैं किन्तु अन्तकालमें (फल देनेके समय) भारी संताप देते हैं। यह आयु भी फूटी हुई नालीके जलके समान प्रत्येक क्षण नष्ट होती जाती है ॥ ५४ ॥ रूप, आरोग्य, ऐश्वर्य, इष्ट-बन्धुओंका समागम और प्रिय स्त्रीका प्रेम आदि सभी कुछ अनवस्थित है—क्षणनश्वर हैं ॥ ५५ ॥ इस प्रकार विचार कर चंचल लक्ष्मीको छोड़नेके अभिलाषी बुद्धिमान् राजा वज्र-बाहुने अपने पुत्र वज्रजंघका अभिषेक कर उसे राज्यकार्यमें नियुक्त किया ॥ ५६ ॥ और स्वयं

१ राजालये । २ लक्ष्मीनिवासे । ३ मातापितृवियोगात् । ४ प्रशस्ता । ५ एकोनम् । ६ युगलान् । ७ धनकनकसमृद्धिः । ८ अभ्रमिव विलास्यते विलयमेष्यति । ९ व्यभिचारिण्यः । १० अनुभवनकालमात्रम् । ११ पतद्घाटीनीरम् । १२ अस्थिरम् । १३ प्रहातुमिच्छुः । १४ शीघ्रम् । १५ पञ्चशतप्रमितैः ।

श्रीमतीतनयाश्चामी वीरबाहुपुरोगमाः[1] । समं राजर्षिणाऽनेन तदा संयमिनोऽभवन् ॥५८॥
[2]यमैः सममुपारूढ[3]शुद्धिभिर्विहरन्नसौ । क्रमादुत्पाद्य कैवल्यं परं धाम समासदत् ॥५९॥
वज्रजङ्घस्ततो राज्यसम्पदं प्राप्य पैतृकीम्[4] । [5]निरविक्षचिरं भोगान् प्र[6]कृतीरनुरञ्जयन् ॥६०॥
अथान्यदा महाराजो वज्रदन्तो महर्द्धिकः । सिंहासने सुखासीनो नरेन्द्रैः परिवेष्टितः ॥६१॥
तथासीनस्य[7] चोद्यानपाली विकसितं नवम् । सुगन्धिपद्ममानीय तस्य हस्ते ददौ मुदा ॥६२॥
पाणौकृत्य[8] तदाजिघ्रन् स्वाननामोदसुन्दरम् । संप्रीतः करपद्मेन सविभ्रममविभ्रमत्[9] ॥६३॥
[10]तद्गन्धलोलुपं तत्र रुद्धं लोकान्तराश्रितम्[11] । दृष्ट्वालिं विषयासङ्गाद्[12] विरराम[13] सुधीरसौ ॥६४॥
अहो मदालिरेषोऽत्र गन्धाकृष्ट्या रसं[14] पिबन् । दिनापाये निरुद्धोऽभूद् [15]व्यसुर्धिग्विषयैषिताम्[16] ॥६५॥
विषया विषमाः पाके किम्पाकसदृशा इमे । आपातरम्या[17] धिगिमान् अनिष्टफलदायिनः ॥६६॥
अहो धिगस्तु भोगाङ्गमिदमङ्ग[18] शरीरिणाम् । [19]विलीयते [20]शरन्मेघविलायमतिपेलवम्[21] ॥६७॥
तडिदुन्मिषिता[22]लोला लक्ष्मीराकालिकं[23] सुखम् । इमाः स्वप्नर्द्धिदेशीया[24] विनश्वर्यो धनर्द्धयः ॥६८॥

राज्य तथा भोगोंसे विरक्त हो शीघ्र ही श्रीयमधरमुनिके समीप जाकर पाँच सौ राजाओंके साथ जिनदीक्षा ले ली ॥ ५७ ॥ उसी समय वीरबाहु आदि श्रीमतीके अट्ठानबे पुत्र भी इन्हीं राजऋषि वज्रबाहुके साथ दीक्षा लेकर संयमी हो गये ॥ ५८ ॥ वज्रबाहु मुनिराजने विशुद्ध परिणामोंके धारक वीरबाहु आदि मुनियोंके साथ चिरकाल तक विहार किया फिर क्रम क्रमसे केवलज्ञान प्राप्त कर मोक्षरूपी परमधामको प्राप्त किया ॥ ५९ ॥ उधर वज्रजंघ भी पिताकी राज्य-विभूति प्राप्त कर प्रजाको प्रसन्न करता हुआ चिरकाल तक अनेक प्रकारके भोग भोगता रहा ॥ ६० ॥

अनन्तर किसी एक दिन बड़ी विभूतिके धारक तथा अनेक राजाओंसे घिरे हुए महाराज वज्रदन्त सिंहासनपर सुखसे बैठे हुए थे ॥ ६१ ॥ कि इतनेमें ही वनपालने एक नवीन खिला हुआ सुगन्धित कमल लाकर बड़े हर्षसे उनके हाथपर अर्पित किया ॥ ६२ ॥ वह कमल राजाके मुखकी सुगन्धके समान सुगन्धित और बहुत ही सुन्दर था। उन्होंने उसे अपने हाथमें लिया और अपने करकमलसे घुमाकर बड़ी प्रसन्नताके साथ सूंघा ॥ ६३ ॥ उस कमलके भीतर उसकी सुगन्धिका लोभी एक भ्रमर रुककर मरा हुआ पड़ा था। ज्योंही बुद्धिमान् महाराजने उसे देखा त्योंही वे विषयभोगोंसे विरक्त हो गये ॥ ६४ ॥ वे विचारने लगे कि—अहो, यह मदोन्मत्त भ्रमर इसकी सुगन्धिसे आकृष्ट होकर यहाँ आया था और रस पीते पीते ही सूर्यास्त हो जानेसे इसीमें घिरकर मर गया। ऐसी विषयोंकी चाहको धिक्कार हो ॥ ६५ ॥ ये विषय किंपाक फलके समान विषम हैं प्रारम्भकालमें अर्थात् सेवन करते समय तो अच्छे मालूम होते हैं परन्तु फल देते समय अनिष्ट फल देते हैं इसलिये इन्हें धिक्कार हो ॥ ६६ ॥ प्राणियोंका यह शरीर जो कि विषय-भोगोंका साधन है शरद् ऋतुके बादलके समान क्षणभरमें विलीन हो जाता है इसलिये ऐसे शरीरको भी धिक्कार हो ॥ ६७ ॥ यह लक्ष्मी बिजलीकी चमकके समान चंचल है, यह इन्द्रिय-सुख भी अस्थिर है और धन धान्य-आदिकी विभूति भी स्वप्नमें प्राप्त हुई विभूतिके

---

१ प्रमुखाः । २ युगलैः, श्रीमतीपुत्रैः । ३ धृता । ४ पितुः सकाशादागता पैतृकी ताम् । 'उष्ठन्' इति सूत्रेण आगतार्थे ठन् । ततः स्त्रियां ङीप्प्रत्ययः । ५ अन्वभूत् । ६ प्रजापरिवारान् । ७ तदासीनस्य म०, ल० । ८ स्वीकृत्य । 'नित्यं हस्ते पाणौ स्वीकृतौ' इति नित्यं तिसंज्ञौ भवतः । ९ –मतिभ्रमात् प० । –मविभ्रमन् ल० । १० तत् कमलम् । ११ मरणमाश्रितम् । १२ विषयासक्तेः । १३ अपसरति स्म । १४ मकरन्दम् । १५ गतप्राणः । १६ विषयवाञ्छाम् । १७ अनुभवनकालः । १८ भोगकारणम् । १९ विलीयेत ल० । २० शरदभ्रमिव । २१ अस्थिरम् । २२ कान्तिः । २३ चञ्चलम् । २४ स्वप्नसम्पत्समानाः ।

भोगान् भो गाढु[1]मीहन्ते कथमेतान् मनस्विनः । ये विलोभयितुं जन्तून् आयान्ति च विमन्ति[2] च ॥६९॥
वपुरारोग्यमैश्वर्यं यौवनं सुखसम्पदः । वस्तुवाहनमन्यच्च सुरचापवदस्थिरम् ॥७०॥
तृणाग्रलग्नवार्बिन्दुः विनिपातोन्मुखो यथा । तथा प्राणभृतामायु[3]र्विलासो विनिपातुकः[4] ॥७१॥
अग्रेसरीजरातङ्काः[5] पार्ष्णिग्राहा[6]स्तरस्विनः[7] । कषायाटविकैः[8] साद्धं [9]यमराडुमरोद्यमी[10] ॥७२॥
अक्षग्रामं दहन्त्येते [11]सन्तर्षविषमार्चिषा । विषया विषमोत्थानवेदना [12]लूषयन्त्यसून् ॥७३॥
प्राणिनां सुखमल्पीयो भूयिष्ठं दुःखमेव तु । संसृतौ तदिहाश्वासः कस्कः[13] [14]कौतस्कुतोऽथवा ॥७४॥
तनुमान् विषयानीप्सन् क्लेशैः प्रागेव ताम्यति । भुञ्जानस्तृप्तयोगेन वियोगेऽनुशयानकः[15] ॥७५॥
यदद्याढ्यतर तृप्त श्वस्तदाढ्यचर भवेत् । यच्चाद्य व्यसनैर्भुक्त तत्कुलं[16] श्वोवसीयसम्[17] ॥७६॥
सुख दुःखानुबन्धीद सदा सनिधन धनम् । सयोगा विप्रयोगान्ता विपदन्ताश्च सम्पदः ॥७७॥
इत्यशाश्वतिक विश्व जीवलोक[18] विलोकयन्[19] । विषयान् विषवन्मेने पर्यन्तविरसानसौ ॥७८॥
इति निर्विद्य[20] भोगेषु साम्राज्यभरमात्मनः । सूनवेऽमिततेजोऽभिधानाय स्म प्रदित्सति[21] ॥७९॥

समान शीघ्र ही नष्ट हो जानेवाली है ॥ ६८ ॥ जो भोग संसारी जीवोंको लुभानेके लिये आते हैं और लुभाकर तुरन्त ही चले जाते हैं ऐसे इन विषयभोगोंको प्राप्त करनेके लिये हे विद्वज्जनो, तुम क्यों भारी प्रयत्न करते हो ॥ ६९ ॥ शरीर, आरोग्य, ऐश्वर्य, यौवन, सुखसम्पदाएँ, गृह, सवारी आदि सभी कुछ इन्द्रधनुषके समान अस्थिर हैं ॥ ७० ॥ जिस प्रकार तृणके अग्रभागपर लगा हुआ जलका बिन्दु पतनके सन्मुख होता है उसी प्रकार प्राणियोंकी आयुका विलास पतनके सन्मुख होता है ॥ ७१ ॥ यह यमराज संसारी जीवोंके साथ सदा युद्ध करनेके लिये तत्पर रहता है। वृद्धावस्था इसकी सबसे आगे चलनेवाली सेना है, अनेक प्रकारके रोग पीछेसे सहायता करनेवाले बलवान् सैनिक हैं और कषायरूपी भील सदा इसके साथ रहते हैं ॥ ७२ ॥ ये विषय तृष्णारूपी विषम ज्वालाओंके द्वारा इन्द्रिय-समूहको जला देते हैं और विषम रूपसे उत्पन्न हुई वेदना प्राणोंको नष्ट कर देती है ॥ ७३ ॥ जब कि इस संसारमें प्राणियोंको सुख तो अत्यन्त अल्प है और दुःख ही बहुत है तब फिर इसमें संतोष क्या है ? और कैसे हो सकता है ? ॥ ७४ ॥ विषय प्राप्त करनेकी इच्छा करता हुआ यह प्राणी पहले तो अनेक क्लेशोंसे दुःखी होता है फिर भोगते समय तृप्ति न होनेसे दुःखी होता है और फिर वियोग हो जानेपर पश्चात्ताप करता हुआ दुखी होता है। भावार्थ—विषय सामग्रीकी तीन अवस्थाएँ होती हैं—१ अर्जन, २ भोग और ३ वियोग। यह जीव उक्त तीनों ही अवस्थाओंमें दुखी रहता है ॥७५॥ जो कुल आज अत्यन्त धनाढ्य और सुखी माना जाता है वह कल दरिद्र हो सकता है और जो आज अत्यन्त दुःखी है वही कल धनाढ्य और सुखी हो सकता है ॥ ७६ ॥ यह सांसारिक सुख दुःख उत्पन्न करनेवाला है, धन विनाशसे सहित है, संयोगके बाद वियोग अवश्य होता है और संपत्तियोंके अनन्तर विपत्तियाँ आती हैं ॥ ७७ ॥ इस प्रकार समस्त संसारको अनित्यरूपसे देखते हुए चक्रवर्तीने अन्तमें नीरस होनेवाले विषयोंको विषके समान माना था ॥ ७८ ॥ इस तरह विषय-भोगोंसे विरक्त होकर चक्रवर्तीने अपने साम्राज्यका भार अपने अमिततेज नामक पुत्रके लिये

---

१ प्रवेष्टुम्। प्राप्तुमित्यर्थः। २ नश्यन्ति। ३ जीवितस्फूर्तिः। ४ पतनशीलः। ५ व्याधयः। ६ पृष्ठवर्तिनः। ७ वेगिनः। 'तरस्वी त्वरितो वेगी प्रजवी जवनो जवः।' ८ अटवीचरैः। ९ यमराड्मरणोद्यमी अ०। १० युद्धसन्नद्धो भवति। ११ वाञ्छा। १२ चोरयन्ति। १३ 'कस्कादिषु' इति सूत्रात् सिद्धः। १४ अयमपि तथैव। १५ अनुशयान एव अनुशयानकः, पश्चात्तापवान्। १६ 'कुलमन्वयसङ्घातगृहोत्पत्त्याश्रमेषु च'। १७ मंगलार्थे निपातोऽयम्। १८ मर्त्यलोकम्। १९ विचारयन्। २० निर्वेदपरो भूत्वा। २१ प्रदातुमिच्छति।

प्रदित्सतामुना राज्यं भूयो भूयोऽनुबध्नता । समादिष्टोऽप्यसौ नैच्छत् सानुजो राज्यसम्पदम् ॥८०॥
स[1] देव यदिदं राज्यं युष्माभिः प्रजिहासितम्[2] । नेच्छाम्यलमनेनार्य मा भूदाज्ञाप्रतीपता[3] ॥८१॥
युष्माभिः सममेवाहं प्रयास्यामि तपोवनम् । यौष्माकी या गतिः सा[4] वै ममापीत्यभणीद्गिरम् ॥८२॥
ततस्तन्निश्चयं ज्ञात्वा राज्यं तत्सूनवे ददौ । पुण्डरीकाय नालाय सन्तानस्थितिपालिने ॥८३॥
स यशोधरयोगीन्द्रशिष्यं गुणधरं श्रितः । सपुत्रदारो राजर्षिः अदीक्षिष्ट नृपैः समम् ॥८४॥
देव्यः षष्टिसहस्राणि तत्र्यशप्रमिता[5] नृपाः । प्रभु[6] तमन्वदीक्षन्त सहस्रं च सुतोत्तमाः ॥८५॥
पण्डितापि तदात्मानुरूपां दीक्षां समाददे । तदेव ननु पाण्डित्यं यत्संसारात् समुद्धरेत् ॥८६॥
ततश्चक्रधरापायात् लक्ष्मीमतिरगाच्छुचम् । अनुन्धर्या महोष्णांशुवियोगान्नलिनी यथा ॥८७॥
पुण्डरीकमथादाय बालं मन्त्रिपुरस्कृतम्[7] । ते[8] प्रविष्टाः[9] पुरीं शोकाद् विच्छायत्वमुपागताम् ॥८८॥
ततोऽभून्महती चिन्ता लक्ष्मीमत्या महाभरे । राज्ये बालोऽयमव्यक्तः स्थापितो नप्तृभाण्डकम्[10] ॥८९॥
कथं नु पालयाम्येनं विना पक्ष[11]बलादहम् । वज्रजङ्घस्य तन्मूल[12] प्रहिणोम्यद्य[13] धीमतः ॥९०॥
[14]तेनाधिष्ठित[15]मस्येद राज्यं निष्कण्टकं भवेत् । अन्यथा गत[16]मेवैतत् आक्रान्त बलिभिर्नृपैः ॥९१॥

देना चाहा ॥ ७९ ॥ और राज्य देनेकी इच्छासे उससे बार बार आग्रह भी किया परन्तु वह राज्य लेनेके लिये तैयार नहीं हुआ। इसके तैयार न होनेपर इसके छोटे भाइयोंसे कहा गया परन्तु वे भी तैयार नहीं हुए ॥८०॥ अमिततेजने कहा—हे देव, जब आप ही इस राज्यको छोड़ना चाहते हैं तब यह हमें भी नहीं चाहिये। मुझे यह राज्यभार व्यर्थ मालूम होता है। हे पूज्य, मैं आपके साथ ही तपोवनको चलूँगा इससे आपकी आज्ञा भंग करनेका दोष नहीं लगेगा। हमने यह निश्चय किया है कि जो गति आपकी है वही गति मेरी है ॥ ८१-८२ ॥ तदनन्तर, वज्रदन्त चक्रवर्तीने पुत्रोंका राज्य नहीं लेनेका दृढ़ निश्चय जानकर अपना राज्य, अमिततेजके पुत्र पुण्डरीकके लिये दे दिया। उस समय वह पुण्डरीक छोटी अवस्थाका था और वही सन्तानकी परिपाटीका पालन करनेवाला था ॥ ८३ ॥ राज्यकी व्यवस्था कर राजर्षि वज्रदन्त यशोधर तीर्थंकरके शिष्य गुणधर मुनिके समीप गये और वहाँ अपने पुत्र, स्त्रियों तथा अनेक राजाओंके साथ दीक्षित हो गये ॥ ८४ ॥ महाराज वज्रदन्तके साथ साठ हजार रानियोंने, बीस हजार राजाओंने और एक हजार पुत्रोंने दीक्षा धारण की थी ॥ ८५ ॥ उसी समय श्रीमतीकी सखी पण्डिताने भी अपने अनुरूप दीक्षा धारण की थी—व्रत ग्रहण किये थे। वास्तवमें पाण्डित्य वही है जो संसारसे उद्धार कर दे ॥ ८६ ॥

तदनन्तर, जिस प्रकार सूर्यके वियोगसे कमलिनी शोकको प्राप्त होती है उसी प्रकार चक्रवर्ती वज्रदन्त और अमिततेजके वियोगसे लक्ष्मीमती और अनुन्धरी शोकको प्राप्त हुई थीं ॥८७॥ पश्चात् जिन्होंने दीक्षा नहीं ली थी मात्र दीक्षाका उत्सव देखनेके लिये उनके साथ साथ गये थे ऐसे प्रजाके लोग, मंत्रियों द्वारा अपने आगे किये गये पुण्डरीक बालकको साथ लेकर नगरमें प्रविष्ट हुए। उस समय वे सब शोकसे कान्तिशून्य हो रहे थे ॥ ८८ ॥ तदनन्तर लक्ष्मीमतीको इस बातकी भारी चिन्ता हुई कि इतने बड़े राज्यपर एक छोटासा अप्रसिद्ध बालक स्थापित किया गया है। यह हमारा पौत्र (नाती) है। बिना किसी पक्षकी सहायताके मैं इसकी रक्षा किस प्रकार कर सकूँगी। मैं यह सब समाचार आज ही बुद्धिमान् वज्रजघके पास भेजती हूँ। उनके

---

१ समीचीनमेव। २ प्रहातुमिष्टम्। ३ प्रतिकूलता। ४ सैव द०, स०, म०, ल०। ५ विंशतिसहस्रप्रमिताः। ६ 'दार्थेऽनुना' इति द्वितीया। ७ अंगीकृतम्। ८ ते प्रविष्टे पुरीं शोकाद्विच्छाय त्वमुपागते द० ट०। तं प्रविष्टाः पुरी शोकाद्विच्छायत्वमुपागताः स०। ते लक्ष्मीमत्यनुन्धर्यौ। ९ प्रविष्टे प्रविविशतुः। १० नप्तृभाण्डकः अ०। पौत्र एव मूलधनम्। ११ सहायबलाद्। १२ तत्कारणम्। १३ प्राहिणोम्यद्य ब०, प०। १४ वज्रजङ्घेन। १५ स्थापितम्। १६ नष्टम्।

निश्चित्येति समाहूय सुतौ मन्दरमालिनः । सुन्दर्याश्च खगाधीशो[1] गन्धर्वपुरपालिनः ।।९२।।
[2]चिन्तामनोगती स्निग्धौ[3] शुची दक्षौ महान्वयौ । अनुरक्तौ[4] श्रुताशेषशास्त्रार्थौ कार्यकोविदौ ।।९३।।
करण्डस्थिततत्कार्यपत्रौ सोपायनौ तदा । प्रहिणोद् वज्रजङ्घस्य पार्श्वे [5]सन्देशपूर्वकम् ।।९४।।
चक्रवर्ती वनं यातः सपुत्रपरिवारकः । पुण्डरीकस्तु राज्येऽस्मिन् पुण्डरीकाननः स्थितः ।।९५।।
क्व चक्रवर्तिनो राज्यं क्वायं बालोऽतिदुर्बलः । तदयं [6]पुङ्गवैर्धार्ये[7] भरे[8] दम्यो[9]नियोजितः ।।९६।।
बालोऽयमबले चावां राज्यञ्चेदमनायकम् । [10]विशीर्णप्रायमेतस्य पालनं त्वयि तिष्ठते[11] ।।९७।।
[12]अकालहरणं तस्मात् आगन्तव्यं महाधिया । त्वयि त्वत्सन्निधानेन भूयाद् राज्यमविप्लवम्[13] ।।९८।।
इति [14]वाचिकमादाय तौ तदोत्पेततुर्नभः । पयोदांस्त्वरया[15] दूरम् आकर्षन्तौ समीपगान् ।।९९।।
क्वचिज्जलधरांस्तुङ्गान् स्वमार्गपरिरोधिनः । विभिन्दन्तौ पयोबिन्दून् क्षरतोऽश्रुलवानिव ।।१००।।
तौ पश्यन्तौ नदीर्दूरात्[16] तन्वीरत्यन्तपाण्डुराः । घनागमस्य कान्तस्य विरहेणेव कर्शिताः ।।१०१
मन्वानौ दूरभावेन [17]पारिमाण्डल्यमागतान्[18] । भूमाविव निमग्नाङ्गान् अर्कतापभयाद् गिरीन् ।।१०२।।

द्वारा अधिष्ठित (व्यवस्थित) हुआ इस बालकका यह राज्य अवश्य ही निष्कटंक हो जावेगा अन्यथा इसपर आक्रमण कर बलवान् राजा इसे अवश्य ही नष्ट कर देंगे ।। ८९-९१ ।। ऐसा निश्चय कर लक्ष्मीमतीने गन्धर्वपुरके राजा मन्दरमाली और रानी सुन्दरीके चिन्तागति और मनोगति नामक दो विद्याधर पुत्र बुलाये । वे दोनों ही पुत्र चक्रवर्तीसे भारी स्नेह रखते थे, पवित्र हृदयवाले, चतुर, उच्चकुलमें उत्पन्न, परस्परमें अनुरक्त, समस्त शास्त्रोंके जानकार और कार्य करनेमें बड़े ही कुशल थे ।। ९२-९३ ।। इन दोनोंको एक पिटारेमें रखकर समाचारपत्र दिया तथा दामाद और पुत्रीको देनेके लिये अनेक प्रकारकी भेंट दी और नीचे लिखा हुआ संदेश कहकर दोनोंको वज्रजंघके पास भेज दिया ।। ९४ ।। 'वज्रदन्त चक्रवर्ती अपने पुत्र और परिवारके साथ वनको चले गये है—वनमें जाकर दीक्षित हो गये है । उनके राज्यपर कमलके समान मुखवाला पुण्डरीक बैठाया गया है । परन्तु कहाँ तो चक्रवर्तीका राज्य और कहाँ यह दुर्बल बालक ? सचमुच एक बड़े भारी बैलके द्वारा उठाने योग्य भारके लिये एक छोटासा बछड़ा नियुक्त किया गया । यह पुण्डरीक बालक है और हम दोनों सास बहू स्त्री है इसलिये यह बिना स्वामी-का राज्य प्रायः नष्ट हो रहा है । अब इसकी रक्षा आपपर ही अवलम्बित है । अतएव अविलम्ब आइये। आप अत्यन्त बुद्धिमान् है । इसलिये आपके सन्निधानसे यह राज्य निरुपद्रव हो जावेगा' ।। ९५-९८ ।। ऐसा संदेश लेकर वे दोनों उसी समय आकाशमार्गसे चलने लगे । उस समय वे समीपमें स्थित मेघोंको अपने वेगसे दूर तक खींचकर ले जाते थे ।। ९९ ।। वे कहींपर अपने मार्गमें रुकावट डालनेवाले ऊंचे ऊंचे मेघोंको चीरते हुए जाते थे ! उस समय उन मेघोसे जो पानीकी बूंदें पड़ रही थीं उनसे ऐसे मालूम होते थे मानो आँसू ही बहा रहे हों । कहीं नदियोंको देखते जाते थे, वे नदियाँ दूर होनेके कारण ऊपरसे अत्यन्त कृश और श्वेतवर्ण दिखाई पड़ती थीं जिससे ऐसा मालूम होता था मानो वर्षाकालरूपी पतिके विरहसे कृश और पाण्डुरवर्ण हो गई हों । वे पर्वत भी देखते जाते थे उन्हें दूरीके कारण वे पर्वत गोल गोल दिखाई पड़ते थे

---

१ विद्याधरपतेः । २ चिन्तागतिमनोगतिनामानौ । ३ स्नेहितौ । ४ सत्कारयुक्तौ । ५ सन्देशः वाचिकम् । 'सन्देशवाग् वाचिकं स्यात्' । ६ —वृषभश्रेष्ठैः । ७ पुंगवोद्धार्ये अ०, प०, स० । ८ भारे अ०, ल० । ९ बालवत्सः । १० जीर्णसदृशम् । ११ निर्णयो भवति । १२ कालहरणं न कर्तव्यम् । १३ बाधा-रहितम् । १४ 'सन्देशवाग् वाचिकं स्यात्' । १५ वेगेन । १६ दूरत्वात् । १७ परमसूक्ष्मत्वम् । १८ —त्यसंगतान् प०, ल० ।

दीर्घिकाम्भो भुवो न्यस्तमिवैकमतिवर्तुलम् । तिलकं दूरताहेतोः प्रेक्षमाणावनुक्षणम् ॥१०३॥
क्रमादवापततामेतौ पुरमुत्पलखेटकम् । मन्द्रसंगीतनिर्घोषबधिरीकृतदिङ्मुखम् ॥१०४॥
द्वाःस्थैः प्रणीयमानौ च प्रविश्य नृपमन्दिरम् । महानृपसभासीनं वज्रजङ्घमदर्शताम् ॥१०५॥
कृतप्रणामौ तौ तस्य पुरो रत्नकरण्डकम् । निचिक्षिपतुरन्तस्थपत्रकं सदुपायनम् ॥१०६॥
[1]तदुन्मुद्रय तदन्तस्थं गृहीत्वा कार्यपत्रकम् । निरूप्य विस्मितश्चक्रवर्तिप्राव्रज्य[2]निर्णयात् ॥१०७॥
अहो चक्रधरः पुण्यभागी साम्राज्यवैभवम् । त्यक्त्वा दीक्षामुपायंस्त[3] विविक्ताङ्गी[4] वधूमिव ॥१०८॥
अहो पुण्यधनाः पुत्रा चक्रिणोऽचिन्त्यसाहसाः । [5]अवमत्याधिराज्यं ये समं पित्रा दिदीक्षिरे ॥१०९॥
पुण्डरीकस्तु संफुल्लपुण्डरीकाननद्युतिः । राज्ये निवेशितो धुर्यैः[6] रूढभारे स्तनन्धयः ॥११०॥
[7]मामी च [8]सन्निधानं मे [9]प्रतिपालयति द्रुतम् । तद्राज्यप्रशमायेति दुर्बोधः कार्यसम्भवः ॥१११॥
इति निश्चितलेखार्थः कृतधीः कृत्यकोविदः । स्वयं निर्णीतमर्थं तं श्रीमतीमप्यबोधयत् ॥११२॥
वाचिकेन च संवादं लेखार्थस्य विभावयन् । प्रस्थाने पुण्डरीकिण्या मतिमाधात् स धीधनः ॥११३॥
श्रीमतीं च समाश्वास्य तद्वार्त्ताकर्णनाकुलाम् । तया समं समालोच्य प्रयाण निश्चिचाय सः ॥११४॥

जिससे ऐसे मालूम होते थे मानो सूर्यके संतापसे डरकर जमीनमें ही छिपे जा रहे हों। वे बावड़ियोंका जल भी देखते जाते थे। दूरीके कारण वह जल उन्हें अत्यन्त गोल मालूम होता था जिससे ऐसा जान पड़ता था मानो पृथ्वीरूप स्त्रीने चन्दनका सफेद तिलक ही लगाया हो। इस प्रकार प्रत्येक क्षण मार्गकी शोभा देखते हुए वे दोनों अनुक्रमसे उत्पलखेटक नगर जा पहुँचे। वह नगर संगीत कालमें होनेवाले गंभीर शब्दोंसे दिशाओंको बधिर (बहरा) कर रहा था॥ १००-१०४॥ जब वे दोनों भाई राजमन्दिरके समीप पहुँचे तब द्वारपाल उन्हें भीतर ले गये। उन्होंने राजमन्दिरमें प्रवेश कर राजसभामें बैठे हुए वज्रजंघके दर्शन किये॥ १०५॥ उन दोनों विद्याधरोंने उन्हें प्रणाम किया और फिर उनके सामने, लाई हुई भेट तथा जिसके भीतर पत्र रखा हुआ है ऐसा रत्नमय पिटारा रख दिया॥ १०६॥ महाराज वज्रजंघने पिटारा खोलकर उसके भीतर रखा हुआ आवश्यक पत्र ले लिया। उसे देखकर उन्हें चक्रवर्तीके दीक्षा लेनेका निर्णय हो गया और इस बातसे वे बहुत ही विस्मित हुए॥ १०७॥ वे विचारने लगे-कि अहो, चक्रवर्ती बड़ा ही पुण्यात्मा है जिसने इतने बड़े साम्राज्यके वैभवको छोड़कर पवित्र अंगवाली स्त्रीके समान दीक्षा धारण की है॥ १०८॥ अहो! चक्रवर्तीके पुत्र भी बड़े पुण्यशाली और अचिन्त्य साहसके धारक हैं जिन्होंने इतने बड़े राज्यको ठुकराकर पिताके साथ ही दीक्षा धारण की है॥ १०९॥ फूले हुए कमलके समान मुखकी कान्तिका धारक बालक पुण्डरीक राज्यके इस महान् भारको वहन करनेके लिये नियुक्त किया गया है। और मामी लक्ष्मीमती 'कार्य चलाना कठिन है' यह समझकर राज्यमें शान्ति रखनेके लिये शीघ्र ही मेरा सन्निधान चाहती हैं अर्थात् मुझे बुला रही है॥ ११०-१११॥ इस प्रकार कार्य करनेमें चतुर बुद्धिमान् वज्रजंघने पत्रके अर्थका निश्चय कर स्वयं निर्णय कर लिया और अपना निर्णय श्रीमतीको भी दिया॥ ११२॥ पत्रके सिवाय उन विद्याधरोंने लक्ष्मीमतीका कहा हुआ मौखिक संदेश भी सुनाया था जिससे वज्रजंघको पत्रके अर्थका ठीक ठीक निर्णय हो गया था। तदनन्तर बुद्धिमान् वज्रजंघने पुण्डरीकिणी पुरी जानेका विचार किया॥ ११३॥ पिता और भाईके दीक्षा लेने आदिके समाचार सुनकर श्रीमतीको बहुत दुःख हुआ था परन्तु वज्रजंघने उसे समझा दिया और उसके साथ भी गुण दोषका

---

१ तदुन्मुद्रितमन्तःस्थं प०। तदुन्मुद्रय ल०। २ -प्राव्राज्य- प०, अ०, द०, स०, म०। ३ उपयच्छते स्म। स्वीकरोति स्म। 'यमो विवाहे' उपाद्यमेस्तङो भवति विवाहे इति तङ्। ४ पवित्रांगीम्। ५ अवज्ञां कृत्वा। अवमन्याधि-प०। ६ धुरन्धरैः। ७ मातुलानी। ८ सामीप्यम्। ९ प्रतीक्षते।

विसृज्य च पुरो दूतमुख्यौ तौ कृतसत्क्रियौ । स्वयं तदनुमार्गेण प्रयाणायोद्यतो नृपः ॥११५॥
ततो मतिवरानन्दौ धनमित्रोऽप्यकम्पनः । महामन्त्रिपुरोधोऽग्र्य श्रेष्ठिसेनाधिनायकाः ॥११६॥
प्रधानपुरुषाश्चान्ये प्रयाणोद्यतबुद्धयः । परिवव्रुर्नरेन्द्रं तं शतक्रतुमिवामराः ॥११७॥
तस्मिन्नेवाह्नि सोऽह्नाय[1] प्रस्थानमकरोत् कृती । महान् प्रयाणसंक्षोभः तदाभूत्तन्नियोगिनाम् ॥११८॥
यूयमाबद्धसौवर्णग्रैवेयादिपरिच्छदाः[2] । करेणूर्मदवैमुख्यात्[3] सतीः कुलवधूरिव ॥११९॥
राज्ञीनामधिरोहाय सज्जाः प्रापयत द्रुतम् । यूयमश्वतरीराशु[4] पर्याणयत[5] शीघ्रगाः ॥१२०॥
नृपवल्लभिकानाञ्च यूयमर्पयताशिबिमाः । काचवाहजनान्[6] यूय गवेषयत दुर्दमान्[7] ॥१२१॥
तुरङ्गमकुलञ्चेदम् आपाय्योदकमाशुगम्[8] । बद्धपर्याणकं यूयं कुरुध्वं सुवयोऽन्वितम् ॥१२२॥
[9]भुजिष्याः सर्वकर्मीणा[10] यूयमाह्वयत द्रुतम्[11] । पाकधान्यपरिक्षोद[12] शोधनादिनियोगिनीः ॥१२३॥
यूयं सेनाग्रगा भूत्वा निवेशं प्रति सूच्छ्रिता[13] । अनुतिष्ठत[14] सत्काय[15]मानगर्भा महावृतीः ॥१२४॥
यूय महानसे राज्ञो नियुक्ताः सर्वसम्पदाः । समग्रयत[16] तद्योग्यां सामग्रीं निरवग्रहाः[17] ॥१२५॥
यूयं गोमण्डलञ्चारु वात्सकं बहुधेनुकम् । सोदकेषु प्रदेशेषु सच्छायेष्वभिरक्षत ॥१२६॥
यूयमारक्षत स्त्रैण[18] [19]राजकीय[18] प्रयत्नतः । सपाठीना इवाम्भोधेः तरङ्गा भासुरातपः[20] ॥१२७॥

विचार कर साथ साथ वहाँ जानेका निश्चय किया ॥ ११४ ॥ तदनन्तर खूब आदर-सत्कारके साथ उन दोनों विद्याधर दूतोंको उन्होंने आगे भेज दिया और स्वयं उनके पीछे प्रस्थान करनेकी तैयारी की ॥ ११५ ॥

तदनन्तर मतिवर, आनन्द, धनमित्र और अकम्पन इन चारों महामंत्री, पुरोहित, राजसेठ और सेनापतियोंने तथा और भी चलनेके लिये उद्यत हुए प्रधान पुरुषोंने आकर राजा वज्रजंघ को उस प्रकार घेर लिया था जिस प्रकार कि कहीं जाते समय इन्द्रको देव लोग घेर लेते है ॥ ११६-११७ ॥ उस कार्यकुशल वज्रजंघने उसी दिन शीघ्र ही प्रस्थान कर दिया। प्रस्थान करते समय अधिकारी कर्मचारियोंमें बड़ा भारी कोलाहल हो रहा था ॥ ११८ ॥ वे अपने सेवकोंसे कह रहे थे कि तुम रानियोंके सवार होनेके लिये शीघ्र ही ऐसी हथिनियाँ लाओ जिनके गलेमें सुवर्णमय मालाएं पड़ी हों, पीठपर सुवर्णमय झूलें पड़ी हों और जो मद-रहित होनेके कारण कुलीन स्त्रियोंके समान साध्वी हों। तुम लोग शीघ्र चलनेवाली खच्चरियोंको जीन कसकर शीघ्र ही तैयार करो। तुम स्त्रियोंके चढ़नेके लिए पालकी लाओ और तुम पालकी ले जाने वाले मजबूत कहारोंको खोजो। तुम शीघ्रगामी तरुण घोड़ोंको पानी पिलाकर और जीन कसकर शीघ्र ही तैयार करो। तुम शीघ्र ही ऐसी दासियाँ बुलाओ जो सब काम करनेमें चतुर हों और खासकर रसोई बनाना, अनाज कूटना शोधना आदिका कार्य कर सकें। तुम सेनाके आगे आगे जाकर ठरहनेकी जगह पर डेरा तंबू आदि तैयार करो तथा घास-भुस आदिके ऊंचे ऊँचे ढेर लगाकर भी तैयार करो। तुम लोग सब सम्पदाओंके अधिकारी हो इसलिये महाराजकी भोजनशालामें नियुक्त किये जाते हो। तुम बिना किसी प्रतिबन्धके भोजनशालाकी समस्त योग्य सामग्री इकट्ठी करो। तुम बहुत दूध देनेवाली और बछड़ों सहित सुन्दर सुन्दर गायें ले जाओ, मार्गमें उन्हें जल सहित और छायावाले प्रदेशोंमें सुरक्षित रखना। तुम लोग हाथमें चमकीली तलवार लेकर मछलियों

---

१ सपदि । २ कण्ठभूषादिपरिकराः । ३ विमुखत्वात् । ४ वेसरीः । ५ बद्धपर्याणाः कुरुत । ६ कावटिकजनान् । ७ निरङ्कुशान् । ८ शीघ्रगमनम् । ९ चेटीः । १० सर्वकर्मणि समर्थाः । ११ द्रुताः अ०, प०, द०, स० । १२ क्षोदः कुट्टनम् । १३ सूच्छ्रितीः द०, प० । सोच्छ्रितीः अ०, स० । उच्छ्रिताः उद्धृताः । १४ कुरुत । १५ कायमानं तृणगृहम् । 'कायमानं तृणौकसि' इत्यभिधानचिन्तामणिः । १६ समग्रं कुरुध्वम् । १७ निर्बाधाः । १८ स्त्रीसमूहम् । १९ राज्ञ इदम् । २० भासुरखड्गाः ।

यूयं कञ्चुकिनो वृद्धा मध्येऽन्तःपुरयोषिताम् । अङ्गरक्षानियोगं स्वम् अशून्यं कुरुतादृताः[1] ॥१२८॥
यूयमत्रैव पाश्चात्य[2]कर्माण्येवानुतिष्ठत । यूयं समं समागत्य स्वान्नियोगान् प्रपश्यत ॥१२९॥
देशाधिकारिणो गत्वा यूयं चोदयत द्रुतम् । [3]प्रतिग्रहीतु भूनाथं सामग्र्या स्वानुरूपया ॥१३०॥
यूयं बिभृत[4] हस्त्यश्वं यूयं पालयतौष्ट्रकम् । यूयं सवात्सकं भूरिक्षीरं रक्षत धैनुकम्[5] ॥१३१॥
यूयं जैनेश्वरीमर्च्यां रत्नत्रयपुरस्सराम्[6] । यजेत शान्तिकं कर्म समाधाय[7] महीक्षित ॥१३२॥
कृताभिषेचनाः सिद्धशेषां गन्धाम्बुमिश्रिताम् । यूयं क्षिपेत[8] पुण्याशीः शान्तिघोषैः सम प्रभोः ॥१३३॥
यूय नैमित्तिकाः सम्यग्निरूपितशुभोदयाः । प्रस्थानसमय[9] ब्रूत राज्ञो यात्राप्रसिद्धये[10] ॥१३४॥
इति [11]तन्त्रनियुक्तानां[12] तदा कोलाहलो महान् । [13]उदतिष्ठत् प्रयाणाय सामग्रीमनुतिष्ठताम् ॥१३५॥
ततः करीन्द्रैस्तुरगैः पत्तिभिश्चोद्यतायुधैः । नृपाजिरमभूद् रुद्धं स्यन्दनैश्च समन्ततः ॥१३६॥
सितातपत्रैर्मायूरपि[14]च्छच्छत्रैश्च सूच्छ्रितैः । निरुद्धमभवद्व्योम घनैरिव सितासितैः ॥१३७॥
छत्राणां निकुरम्बेण रुद्ध तेजोऽपि भास्वतः । सद्वृत्तसन्निधौ नूनं नाभा[15] तेजस्विनामपि ॥१३८॥
रथानां वारणानाञ्च केतवोऽ[16]न्योऽन्यतोऽश्लिषन्[17] । पवनान्दोलिता दीर्घकालाद् दृष्ट्वेव[18] तोषिणः ॥१३९॥

सहित समुद्रकी तरङ्गोंके समान शोभायमान होते हुए बड़े प्रयत्नसे राजाके रनवासकी रक्षा करना। तुम वृद्ध कंचुकी लोग अन्तःपुरकी स्त्रियोंके मध्यमें रहकर बड़े आदरके साथ अंगरक्षाका कार्य करना। तुम लोग यहाँ ही रहना और पीछेके कार्य बड़ी सावधानीसे करना। तुम साथ साथ जाओ और अपने अपने कार्य देखो। तुम लोग जाकर देशके अधिकारियोंसे इस बातकी शीघ्र ही प्रेरणा करो कि वे अपनी योग्यतानुसार सामग्री लेकर महाराजको लेनेके लिये आवें। मार्गमें तुम हाथियों और घोड़ोंकी रक्षा करना, तुम ऊँटोंका पालन करना और तुम बहुत दूध देनेवाली बछड़ों सहित गायोंकी रक्षा करना। तुम महाराजके लिये शान्ति वाचन करके रत्नत्रयके साथ साथ जिनेंद्रदेवकी प्रतिमाकी पूजा करो। तुम पहले जिनेंद्रदेवका अभिषेक करो और फिर शान्तिवाचनके साथ साथ पवित्र आशीर्वाद देते हुए महाराजके मस्तकपर गन्धोदकसे मिले हुए सिद्धोंके शेषाक्षत क्षेपण करो। तुम ज्योतिषी लोग ग्रहोंके शुभोदय आदिका अच्छा निरूपण करते हो इसलिये महाराजकी यात्राकी सफलताके लिये प्रस्थानका उत्तम समय बतलाओ'। इस प्रकार उस समय वहाँ महाराज वज्रजंघके प्रस्थानके लिये सामग्री इकट्ठी करनेवाले कर्मचारियोंका भारी कोलाहल हो रहा था ॥ ११८-१३५ ॥ तदनन्तर राजभवनके आगेका चौक हाथी, घोड़े, रथ और हथियार लिये हुए पियादोंसे खचाखच भर गया था ॥ १३६ ॥ उस समय ऊपर उठे हुए सफेद छत्रोंसे तथा मयूरपिच्छके बने हुए नीले नीले छत्रोंसे आकाश व्याप्त हो गया था जिससे वह ऐसा जान पड़ता था मानो कुछ सफेद और कुछ काले मेघोंसे ही व्याप्त हो गया हो ॥ १३७ ॥ उस समय तने हुए छत्रोंके समूहसे सूर्यका तेज भी रुक गया था सो ठीक ही है। सद्वृत्त—सदाचारी पुरुषोंके समीप तेजस्वी पुरुषोंका भी तेज नहीं ठहर पाता। छत्र भी सद्वृत्त—गोल थे इसलिये उनके समीप सूर्यका तेज नहीं ठहर पाया था ॥ १३८ ॥ उस समय रथों और हाथियों पर लगी हुई पताकाएँ वायुके वेगसे हिलती हुईं आपसमें मिल रही थीं जिससे ऐसा जान पड़ता था मानो बहुत समय बाद एक दूसरेको देखकर संतुष्ट हो परस्परमें मिल ही रहीं

---

१ सादराः। २ पश्चात्कर्तुं योग्यानि कार्याणि। ३ सम्मुखागन्तुम्। ४ पोषयत। ५ धेनुसमूहम्। ६ –पुरस्सराः अ०, स०। ७ समाधानं कृत्वा। ८ क्षिपत द०। ९ प्रस्थाने समयं अ०, स०। १० सिद्ध्यर्थम्। ११ तन्त्रः परिच्छेदः। १२ तन्त्रनियुक्तानां प०। १३ उदेति स्म। १४ –पिच्छच्छत्रै– अ०, प०, द०, स०, म०। १५ आभा तेजः। १६ –न्योन्यमाश्लिषन् प०, अ०, स०, द०, म०, ल०। १७ आलिङ्गनं चक्रिरे। १८ दृष्ट्वेव।

तुरङ्गमखुरोद्भूताः [1]प्रासर्पन् रेणवः[2] पुरः । मार्गमस्येव निर्देष्टुं[3] नभोभागविलङ्घिनः ॥१४०॥
करिणां मदधाराभिः शीकरैश्च करोज्झितैः । हयलालाजलैश्चापि प्रणनाश महीरजः ॥१४१॥
ततः पुराद् विनिर्यान्ती सा चमूर्व्यरुचद् भृशम् । महानदीव सच्छत्रफेना वाजितरङ्गिका ॥१४२॥
करीन्द्रपृथुयादोभिः तुरङ्गमतरङ्गकैः[4] । विलोलासिलतामत्स्यैः शुशुभे सा चमूधुनी ॥१४३॥
ततः समीकृताशेषस्थलनिम्नमहीतला । अपर्याप्तमहामार्गा यथास्वं प्रसृता चमूः ॥१४४॥
वनेभकटमुज्झित्वा दानसक्ता[5] मदालिनः । [6]न्यलीयन्त नृपेभेन्द्रकरटे[7] प्रक्षरन्मदे ॥१४५॥
रम्यान् वनतरून् हित्वा राजस्तम्बेरमानमून् । [8]आश्रयन्मधुपाः प्रायः प्रत्यग्रं लोकरञ्जनम् ॥१४६॥
नृपं वनानि रम्याणि प्रत्यगृह्णन्निवाध्वनि । फलपुष्पभरानम्रैः सान्द्रच्छायैर्महाद्रुमैः ॥१४७॥
तदा वनलतापुष्पपल्लवान् करपल्लवैः । अजहारावतंसादिविन्यासाय वधूजनः ॥१४८॥
कान्त्यासवमिवापातुम् आपतन्त्यतृपत्तराम् । जनतानेत्रभृङ्गाली तन्मुखाब्जे विकासिनि ॥२०॥
नासिकास्य रुचिं दध्रे नेत्रयोर्मध्यवर्त्तिनी । सीमेव रचिता धात्रा तयोः क्षेत्रानतिक्रमे ॥२१॥

स्थित पुष्कलावती देशकी पुण्डरीकिणी नगरीमें वज्रसेन राजा और श्रीकान्ता नामकी रानीके वज्रनाभि नामका समर्थ पुत्र उत्पन्न हुआ ॥ ८-९ ॥ पहले कहे हुए व्याघ्र आदिके जीव वरदत्त आदि भी क्रमसे उन्हीं राजा रानीके विजय, वैजयन्त, जयन्त और अपराजित नामके पुत्र हुए ॥ १० ॥ जिनका वर्णन पहले किया जा चुका है ऐसे मतिवर मंत्री आदिके जीव जो अधोग्रैवेयकमें अहमिन्द्र हुए थे वहांसे च्युत होकर उन्हीं राजा रानीके सम्पत्तिशाली पुत्र हुए ॥ ११ ॥ जो पहले (वज्रजंघके समयमें) मतिवर नामका बुद्धिमान् मंत्री था वह अधोग्रैवेयकसे च्युत होकर उनके सुबाहु नामका पुत्र हुआ। आनन्द पुरोहितका जीव महाबाहु नामका पुत्र हुआ, सेनापति अंकपनका जीव पीठ नामका पुत्र हुआ और धनमित्र सेठका जीव महापीठ नामका पुत्र हुआ। सो ठीक ही है, जीव पूर्वभवके संस्कारोंसे ही एक जगह इकट्ठे होते हैं ॥ १२-१३ ॥ श्रीमतीका जीव केशव, जो कि अच्युत स्वर्गमें प्रतीन्द्र हुआ था वह भी वहाँसे च्युत होकर इसी नगरीमें कुबेरदत्त वणिक्के उसकी स्त्री अनन्तमतीसे धनदेव नामका पुत्र हुआ ॥ १४ ॥

अथानन्तर जब वज्रनाभि पूर्ण यौवन अवस्थाको प्राप्त हुआ तब उसका शरीर तपाये हुए सुवर्णके समान अतिशय देदीप्यमान हो उठा और इसीलिये वह प्रातःकालके सूर्यके समान बड़ा ही सुशोभित होने लगा ॥ १५ ॥ अत्यन्त काले और टेढ़े बालोंसे उसका सिर ऐसा सुशोभित होता था जैसा कि वर्षा ऋतुके बादलोंसे ढका हुआ पर्वतका शिखर सुशोभित होता है ॥ १६ ॥ कुण्डलरूपी सूर्यकी किरणोंके स्पर्शसे जिसके कपोलोंका पर्यन्त भाग शोभायमान हो रहा है ऐसे मुखरूपी कमलसे वह वज्रनाभि फूले हुए कमलोंसे सुशोभित किसी सरोवरके समान शोभायमान हो रहा था ॥ १७ ॥ उसके ललाटरूपी पर्वतके तटपर दोनों भौंहरूपी लताएँ नेत्रोंकी किरणोंरूपी पुष्पमंजरियों और तारेरूप भ्रमरोंसे बहुत ही अधिक शोभायमान हो रही थीं ॥ १८ ॥ उसका मुख श्वासोच्छ्वासकी सुगन्धिसे सहित था, मुसकानरूपी केशरसे युक्त था और स्त्रियोंके नेत्ररूपी भ्रमरोंका आकर्षण करता था इसलिये ठीक कमलके समान जान पड़ता था ॥ १९ ॥ सदा विकसित रहनेवाले उसके मुख-कमलपर जनसमूहके नेत्ररूपी भ्रमरोंकी पंक्ति मानो कान्तिरूपी आसवको पीनेके लिये ही सब ओरसे आकर झपटती थी और उसका पान कर अत्यन्त तृप्त होती थी ॥ २० ॥ दोनों नेत्रोंके मध्यभागमें रहनेवाली उसकी नाक ऐसी

१ शार्दूलार्यचरवरदत्त-वराहार्यचरवरसेन-गोलाङ्गूलार्यचरचित्राङ्गद-नकुलार्यचरप्रशान्तमदनाः । २ मतिवरादिचराः । ३ –प्यभूत् ल०, म० । ४ प्रावृषि भवः । ५ विकसन् ।

हारेण कण्ठपर्यन्तवर्तिनासौ श्रियं दधे । मृणालवलयेनेव लक्ष्म्यालिङ्गनसङ्गिना ॥२२॥
वक्षोऽस्य पद्मरागांशुच्छुरितं[1] रुचिमानशे । सान्द्रबालातपच्छन्नसानोः कनकश्रृङ्गिणः ॥२३॥
वक्षःस्थलस्य पर्यन्ते तस्यांसौ रुचिमापतुः । लक्ष्म्याः क्रीडार्थमुत्तुङ्गौ क्रीडाद्री घटिताविव ॥२४॥
वक्षोभवनपर्यन्ते तोरणस्तम्भविभ्रमम् । बाहू दधतुरस्यौच्चैः हारतोरणधारिणौ ॥२५॥
[2]वज्राङ्गबन्धनस्यास्य [3]मध्येनाभि समैक्ष्यत । वज्रालाञ्छनमुद्भूत वत्स्यत्साम्राज्यलाञ्छनम् ॥२६॥
लसद्दुकूलपुलिन [4]रतिहंसीनिषेवितम् । [5]परां श्रिय[6]मधादस्य कटिस्थानसरोवरम् ॥२७॥
सुवृत्तमसृणावूरू तस्य कान्तिमवापताम् । सञ्चरत्कामगन्धेभरोधे क्लृप्ताविवार्गलौ ॥२८॥
जानु[7]गुल्फ[8]स्पृशौ जङ्घे तस्य शिश्रियतुः श्रियम् । सन्धिमेव युवाम् धत्त[9]मित्यादेष्टुमिवोद्यते ॥२९॥
पद्मकान्तिश्रितावस्य पादावङ्गुलिपत्रकौ । सिषेवे सुचिरं लक्ष्मीः नखेन्दुद्युतिकेसरौ ॥३०॥
इति लक्ष्मीपरिष्वङ्गाद्[10] अस्याति रुचिरं वपुः । नूनं सुराङ्गनानाञ्च कुर्यात् स्वे[11]स्पृहयालुताम् ॥३१॥
तथापि यौवनारम्भे मदनज्वरकोपिनि । नास्याजनि मदः कोऽपि स्वभ्यस्तश्रुतसम्पदः ॥३२॥
सोऽधीते स्म त्रिवर्गार्थसाधनीर्विपुलोदयाः । समन्त्रा राजविद्यास्ता लक्ष्म्याकर्षविधौ क्षमाः ॥३३॥

मालूम होती थी मानो अपने अपने क्षेत्रका उल्लंघन न करनेके लिये ब्रह्माने उनके बीचमें सीमा ही बना दी हो ॥ २१ ॥ गलेके समीप पड़े हुए हारसे वह ऐसा शोभायमान हो रहा था मानो वक्षःस्थलवासिनी लक्ष्मीका आलिंगन करनेवाले मृणालवलय (गोल कमलनाल) से ही शोभायमान हो रहा हो ॥ २२ ॥ पद्मरागमणियोंकी किरणोंसे व्याप्त हुआ उसका वक्षःस्थल ऐसा सुशोभित हो रहा था मानो उदय होते हुए सूर्यकी लाल लाल सघन प्रभासे आच्छादित हुआ मेरु पर्वतका तट ही हो ॥ २३ ॥ वक्षःस्थलके दोनों ओर उसके ऊँचे कन्धे ऐसे जान पड़ते थे मानो लक्ष्मीकी क्रीड़ाके लिये अतिशय ऊँचे दो क्रीड़ा पर्वत ही बनाये गये हों ॥ २४ ॥ हार-रूपी तोरणको धारण करनेवाली उसकी दोनों भुजाएँ वक्षःस्थलरूपी महलके दोनों ओर खड़े किये गये तोरण बांधनेके खम्भोंका सन्देह पैदा कर रही थीं ॥ २५ ॥ जिसके शरीरका संगठन वज्रके समान मजबूत है ऐसे उस वज्रनाभिकी नाभिके बीचमें एक अत्यन्त स्पष्ट वज्रका चिह्न दिखाई देता था जो कि आगामी कालमें होनेवाले साम्राज्य (चक्रवर्तित्व) का मानो चिह्न ही था ॥ २६ ॥ जो रेशमी वस्त्ररूपी तटसे शोभायमान था और रतिरूपी हंसीसे सेवित था ऐसा उसका कटिप्रदेश किसी सरोवरकी शोभा धारण कर रहा था ॥ २७ ॥ उसके अतिशय गोल और चिकने ऊरु, यहाँ वहाँ फिरनेवाले कामदेवरूपी हस्तीको रोकनेके लिये बनाये गये अर्गल-दण्डोंके समान शोभाको प्राप्त हो रहे थे ॥ २८ ॥ घुटनों और पैरके ऊपरकी गांठोंसे मिली हुई उसकी दोनों जङ्घाएँ ऐसी सुशोभित हो रही थीं मानो लोगोंको यह उपदेश देनेके लिये ही उद्यत हुई हों कि हमारे समान तुम लोग भी सन्धि (मेल) धारण करो ॥ २९ ॥ अँगुलीरूपी पत्तोंसे सहित और नखरूपी चन्द्रमाकी कान्तिरूपी केशरसे युक्त उसके दोनों चरण, कमलकी शोभा धारण कर रहे थे और इसी लिये लक्ष्मी चिरकालसे उनकी सेवा करती थी ॥ ३० ॥ इस प्रकार लक्ष्मीका आलिंगन करनेसे अतिशय सुन्दरताको प्राप्त हुआ उसका शरीर अपनेमें देवाङ्ग-नाओंकी भी रुचि उत्पन्न करता था—देवाङ्गनाएँ भी उसे देखकर कामातुर हो जाती थीं ॥ ३१ ॥ उसने शास्त्ररूपी सम्पत्तिका अच्छी तरह अभ्यास किया था इसलिये कामज्वरका प्रकोप बढ़ानेवाले यौवनके प्रारम्भ समयमें भी उसे कोई मद उत्पन्न नहीं हुआ था ॥ ३२ ॥ जो

१ मिश्रितम् । २ वज्रशरीरबन्धनस्य । ३ नाभिमध्ये । ४ रतिरूपमराली । ५ परांश्रय– द०, म०, ल० । ६ –श्रियमगाद– अ०, स० । ७ ऊरूपर्व । ८ गुल्फः घुटिका । ९ विभृतम् । १० आलिङ्गनात् । ११ आत्मनि ।

तस्मिंल्लक्ष्मीसरस्वत्योः अतिवा[1]ल्लभ्यमाश्रिते । ईर्ष्ययेवाभजत् कीर्तिः दिगन्तान् विधुनिर्मला ॥३४॥
नूनं तद्गुणसंख्यानं वेधसा संविधित्सुना । शलाका स्थापिता व्योम्नि तारकानिकर[2]च्छलात् ॥३५॥
तस्य तद्रूपमाहार्यं[3] सा विद्या तच्च यौवनम् । जनानावर्जयन्ति[4]स्म गुणैरावर्ज्यते न कः ॥३६॥
गुणैरस्यैव शेषाश्च कुमाराः कृतवर्णनाः । ननु चन्द्रगुणानंशैः भजत्युडुगणोऽप्ययम् ॥३७॥
ततोऽस्य योग्यतां मत्वा वज्रसेनमहाप्रभुः । राज्यलक्ष्मीं समग्रां स्वाम् अस्मिन्नेव न्ययोजयत् ॥३८॥
[5]नृपोऽभिषेकमस्योच्चैः स्वसमक्षमकारयत् । पट्टबन्धञ्च [6]सामात्यैः नृपैर्मकुटधारिभिः ॥३९॥
नृपासनस्थमेनञ्च वीजयन्ति स्म चामरैः । गंगातरंगसच्छायैः[7] भगिभिर्ललितांगनाः ॥४०॥
धुन्वानाश्चामराण्यस्य ता[8] ममोत्प्रेक्षते मनः । जनापवादजं लक्ष्म्या रजोऽ[9]पासितुमुद्यताः ॥४१॥
वक्षसि प्रणयं लक्ष्मीः दृढमस्याकरोत्तदा । पट्टबन्धापदेशेन तस्मिन् प्राध्वङ्कृतेव[10] सा ॥४२॥
मकुटं[11] मूर्ध्नि तस्याधात् नृपैर्नृपवरः समम् । स्वं भारमवतार्यास्मिन् ससाक्षिकमिवार्पयत्[12] ॥४३॥
हारेणालङ्कृतं वक्षो भुजावस्याङ्गदादिभिः[13] । [14]पट्टिकाकटिसूत्रेण कटी पट्टांशुकेन च ॥४४॥

धर्म अर्थ काम इन तीनों पुरुषार्थोंको सिद्ध करनेवाली हैं, जो बड़े बड़े फलोंको देनेवाली है और जो लक्ष्मीका आकर्षण करनेमें समर्थ है ऐसी मंत्रसहित समस्त राजविद्याएँ उसने पढ़ ली थीं ॥ ३३ ॥ उसपर लक्ष्मी और सरस्वती दोनों ही अतिशय प्रेम रखती थीं इसलिये चन्द्रमाके समान निर्मल कीर्ति मानो उन दोनोंकी ईर्ष्यासे ही दशों दिशाओंके अन्त तक भाग गई थीं ॥ ३४ ॥ मालूम होता है कि ब्रह्माने उसके गुणोंकी संख्या करनेकी इच्छासे ही आकाशमें ताराओंके समूहके छलसे अनेक रेखाएँ बनाई थीं ॥ ३५ ॥ उसका वह मनोहर रूप, वह विद्या और वह यौवन, सभी कुछ लोगोंको वशीभूत कर लेते थे, सो ठीक ही है। गुणोंसे कौन वशीभूत नहीं होता ? ॥ ३६ ॥ यहाँ जो वज्रनाभिके गुणोंका वर्णन किया है उसीसे अन्य राजकुमारोंका भी वर्णन समझ लेना चाहिये। क्योंकि जिस प्रकार तारागण कुछ अंशोंमें चन्द्रमाके गुणोंको धारण करते हैं उसी प्रकार वे शेष राजकुमार भी कुछ अंशोंमें वज्रनाभिके गुण धारण करते थे ॥ ३७ ॥ तदनन्तर, इसकी योग्यता जानकर वज्रसेन महाराजने अपनी सम्पूर्ण राज्यलक्ष्मी इसे ही सौंप दी ॥ ३८ ॥ राजाने अपने ही सामने बड़े ठाट-बाटसे इसका राज्याभिषेक कराया तथा मंत्री और मुकुटबद्ध राजाओंके द्वारा उसका पट्टबन्ध कराया ॥ ३९ ॥ पट्टबन्धके समय वह राजसिंहासनपर बैठा हुआ था और अनेक सुन्दर स्त्रियाँ गंगा नदीकी तरंगोंके समान निर्मल चमर ढोर रही थीं ॥ ४० ॥ चमर ढोरती हुई उन स्त्रियोंको देखकर मेरा मन यही उत्प्रेक्षा करता है कि वे मानो राजलक्ष्मीके संसर्गसे वज्रनाभिपर पड़नेवाली लोकापवाद रूपी धूलिको ही दूर करनेके लिये उद्यत हुई हों ॥ ४१ ॥ उस समय राजलक्ष्मी भी उसके वक्षःस्थलपर गाढ़ प्रेम करती थी और ऐसी मालूम होती थी मानो पट्टबन्धके छलसे वह उसपर बाँध ही दी गई हो ॥ ४२ ॥ राजाओंमें श्रेष्ठ वज्रसेन महाराजने अनेक राजाओंके साथ अपना मुकुट वज्रनाभिके मस्तकपर रखा था। उस समय वे ऐसे जान पड़ते थे मानो सबकी साक्षी-पूर्वक अपना भार ही उतारकर उसे समर्पण कर रहे हों ॥ ४३ ॥ उस समय उसका वक्षःस्थल हारसे अलंकृत हो रहा था, भुजाएँ बाजूबंद आदि आभूषणोंसे सुशोभित हो रही थीं और

---

१ वल्लभत्वम् । २ व्याजात् । ३ मनोहरम् । ४ नामयन्ति स्म । ५ नृपाभिषेक– अ०, प०, ब०, द० । ६ सप्रधानैः । ७ समानैः । ८ चामरग्राहिणीः । ९ अपसारणाय । १० आनुकूल्यं कृता । 'आनुकूल्यार्थकं प्राध्वम्' इत्यभिधानात् । अथवा बद्धा प्राध्वमित्यव्ययः । ११ मुकुटं अ०, प०, द०, स०, ल० । १२ –मिवार्पयन् ब०, द०, म०, ल० । १३ –वस्याङ्गदांशुभिः अ०, प०, ब०, स०, द० । १४ काञ्चीविशेषेण ।

कृती कृताभिषेकाय सोऽस्मै 'नार्पत्यमार्पिपत्[1] । नृपैः समं समाशास्य[2] महान् सम्राड् भवेत्यमुम् ॥४५॥
अनन्तरञ्च लौकान्तिकामरैः प्रतिबोधितः । वज्रसेनमहाराजो न्यधान्निष्क्रमणे मतिम् ॥४६॥
यथोचितामपचितिं[3] तन्वत्सूत्तमनाकिषु[4] । परिनिष्क्रम्य चक्रेऽसौ मुक्तिलक्ष्मीं प्रमोदिनीम् ॥४७॥
समं भगवतानेन सहस्रगणनामिताः । महत्याम्रवनोद्याने नृपाः प्राव्राजिषुस्तदा ॥४८॥
राज्यं निष्कण्टकीकृत्य वज्रनाभिरपालयत् । भगवानपि योगीन्द्रः तपश्चक्रे विकल्मषम् ॥४९॥
राज्यलक्ष्मीपरिष्वङ्गाद्[5] वज्रनाभिस्तुतोष सः । तपोलक्ष्मीसमासङ्गाद्[6] गुरुरस्यातिपिप्रिये ॥५०॥
भ्रातृभिर्धृतिरस्यासीद् वज्रनाभेः समाहितैः[7] । गुणैस्तु धृतिमातेने योगी श्रेयोऽनुबन्धिभिः ॥५१॥
वज्रनाभिर्नृपोऽमात्यैः 'संविधत्ते स्म राजकम्[9] । मुनीन्द्रोऽपि तपोयोगैः गुणग्राममपोषयत् ॥५२॥
निजे राज्याश्रमे पुत्रो गुरुरन्त्याश्रमे[10] स्थितः । परार्थबद्धकक्ष्यौ[11] तौ पालयामासतुः प्रजाः[12] ॥५३॥
वज्रनाभेर्जयागारे[13] चक्रं भास्वरमुद्बभौ । योगिनोऽपि मनोगारे ध्यानचक्रं स्फुरद्द्युतिः ॥५४॥
ततो व्यजेष्ट निश्शेषां महीमेष महीपतिः । मुनिः कर्मजयावाप्तमहिमा जगतीत्रयीम्[14] ॥५५॥

कमर करधनी तथा रेशमी वस्त्रकी पट्टीसे शोभायमान हो रही थी ॥ ४४ ॥ अत्यन्त कुशल वज्रसेन महाराजने, जिसका राज्याभिषेक हो चुका है ऐसे वज्रनाभिके लिये 'तू बड़ा भारी चक्रवर्ती हो' इस प्रकार अनेक राजाओंके साथ साथ आशीर्वाद देकर अपना समस्त राज्यभार सौंप दिया ॥ ४५ ॥

तदनन्तर लौकान्तिक देवोंने आकर महाराज वज्रसेनको समझाया जिससे प्रबुद्ध होकर उन्होंने दीक्षा धारण करनेमें अपनी बुद्धि लगाई ॥ ४६ ॥ जिस समय इन्द्र आदि उत्तम उत्तम देव भगवान् वज्रसेनकी यथायोग्य पूजा कर रहे थे उसी समय उन्होंने दीक्षा लेकर मुक्तिरूपी लक्ष्मीको प्रसन्न किया था ॥ ४७ ॥ उस समय भगवान् वज्रसेनके साथ साथ आम्रवन नामके बड़े भारी उपवनमें एक हजार अन्य राजाओंने भी दीक्षा ली थी ॥ ४८ ॥ इधर राजा वज्रनाभि राज्यको निष्कण्टक कर उसका पालन करता था और उधर योगिराज भगवान् वज्रसेन भी निर्दोष तपस्या करते थे ॥ ४९ ॥ इधर वज्रनाभि राज्यलक्ष्मीके समागमसे अतिशय संतुष्ट होता था और उधर उसके पिता भगवान् वज्रसेन भी तपोलक्ष्मीके समागमसे अत्यन्त प्रसन्न होते थे ॥ ५० ॥ इधर वज्रनाभिको अपने सम्मिलित भाइयोंसे बड़ा धैर्य (संतोष) प्राप्त होता था और उधर भगवान् वज्रसेन मुनि कल्याण करनेवाले गुणोसे धैर्य (संतोषको) विस्तृत करते थे ॥ ५१ ॥ इधर वज्रनाभि मंत्रियोंके द्वारा राजाओंके समूहको अपने अनुकूल करता था और उधर मुनीन्द्र वज्रसेन भी तप और ध्यानके द्वारा गुणोंके समूहका पालन करते थे ॥ ५२ ॥ इधर पुत्र वज्रनाभि अपने राज्याश्रममें स्थित था और उधर पिता भगवान् वज्रसेन अन्तिम मुनि आश्रममें स्थित थे। इस प्रकार वे दोनों ही परोपकारके लिये कमर बांधे हुए थे और दोनों प्रजाकी रक्षा करते थे। भावार्थ—वज्रनाभि दुष्ट पुरुषोंका निग्रह और शिष्ट पुरुषोंका अनुग्रह कर प्रजाका पालन करता था और भगवान् वज्रसेन हितका उपदेश देकर प्रजाकी (जीवोंकी) रक्षा करते थे ॥ ५३ ॥ वज्रनाभिके आयुधगृहमें देदीप्यमान चक्ररत्न प्रकट हुआ था और मुनिराज वज्रसेनके मनरूपी गृहमें प्रकाशमान तेजका धारक ध्यानरूपी चक्र प्रकट हुआ था ॥ ५४ ॥ राजा वज्रनाभिने उस चक्ररत्नसे समस्त पृथिवीको

---

१ नृपतित्वम् । २ समाश्वास्य अ०, प०, द०, म० । ३ पूजाम् । ४ लौकान्तिकेषु देवेषु । ५ आलिङ्गनात् । ६ संयोगात् । ७ समाधानयुक्तैः । ८ अनुकूलं करोति स्म, सम्यगकरोत् । ९ राज्यकम् प०, अ० । १० ब्रह्मचारी गृही वानप्रस्थो भिक्षुरिति चतुराश्रमेषु अन्त्ये । ११ कृतसहायौ । १२ जीवसमूहश्च । १३ शस्त्रशालायाम् । १४ जगतीत्रयम् ।

स्पर्द्धमानाविवान्योन्यमित्यास्तां तौ जयोद्धुरौ[1] । किन्त्वेकस्य जयोऽत्यल्पः परस्य भुवनातिग ॥५६॥
धनदेवोऽपि तस्यासीत् चक्रिणो रत्नमूर्जितम् । राज्याङ्गं गृहपत्याख्यं निधौ रत्ने च योजितम् ॥५७॥
ततः कृत[2]मतिर्भुक्त्वा चिरं पृथ्वीं पृथूदयः । गुरोस्तीर्थकृ[3]तोऽबोधि बोधि[4]मत्यन्तदुर्लभाम् ॥५८॥
सद्दृष्टिज्ञानचारित्रत्रयं यः सेवते कृती । रसायनमिवातर्क्यं[5] सोऽमृतं पदमश्नुते ॥५९॥
इत्याकलय्य[6] मनसा चक्री चक्रे तपोमतिम । जरत्तृणमिवाशेषं साम्राज्यमवमत्य[7] सः ॥६०॥
वज्रदन्ताह्वये सूनौ कृतराज्यसमर्पणः । नृपैः [8]स्वमौलिबद्धार्द्धैः [9]तुग्भिश्च दशभिश्शतैः ॥६१॥
सम भ्रातृभिरष्टाभिः धनदेवेन चाददे । दीक्षां भव्यजनोदीक्ष्यां[10] मुक्त्यै स्वगुरुसन्निधौ ॥६२॥
[11]तमन्वीयुर्नृपा जन्मदुःखार्त्तास्तपसे वनम् । शीतार्त्तः को न कुर्वीत सुधीरातपसेवनम् ॥६३॥
त्रिधा[12] प्राणिवधात् मिथ्यावादात् स्तेयात् परिग्रहात् । विरतिं स्त्रीप्रसङ्गाच्च स यावज्जीवमग्रहीत् ॥६४॥
व्रतस्थः समितीर्गुप्तीः आददेऽसौ सभावनाः । [13]मात्राष्टकमिदं प्राहुः मुनेरिन्द्र[14]सभावनाः ॥६५॥

जीता था और मुनिराज वज्रसेनने कर्मोंकी विजयसे अनुपम प्रभाव प्राप्त कर तीनों लोकोंको जीत लिया था ॥ ५५ ॥ इस प्रकार विजय प्राप्त करनेसे उत्कट (श्रेष्ठ) वे दोनों ही पिता-पुत्र परस्परमें स्पर्धा करते हुए से जान पड़ते थे। किन्तु एककी (वज्रनाभिकी) विजय अत्यन्त अल्प थी—छह खण्ड तक सीमित थी और दूसरे (वज्रसेन) की विजय संसार भरको अतिक्रान्त करनेवाली थी—सबसे महान् थी ॥ ५६ ॥ धनदेव (श्रीमती और केशवका जीव) भी उस चक्रवर्तीकी निधियों और रत्नोंमें शामिल होनेवाला तथा राज्यका अंगभूत गृहपति नामका तेजस्वी रत्न हुआ ॥ ५७ ॥ इस प्रकार उस बुद्धिमान् और विशाल अभ्युदयके धारक वज्रनाभि चक्रवर्तीने चिरकाल तक पृथ्वीका उपभोग कर किसी दिन अपने पिता वज्रसेन तीर्थंकरसे अत्यन्त दुर्लभ रत्नत्रयका स्वरूप जाना ॥ ५८ ॥ 'जो चतुर पुरुष रसायनके समान सम्यग्दर्शन सम्यग्ज्ञान और सम्यक् चारित्र इन तीनोंका सेवन करता है वह अचिन्त्य और अविनाशी मोक्षरूपी पदको प्राप्त होता है' ॥ ५९ ॥ हृदयसे ऐसा विचार कर उस चक्रवर्तीने अपने सम्पूर्ण साम्राज्यको जीर्ण तृणके समान माना और तप धारण करनेमें बुद्धि लगाई ॥ ६० ॥ उसने वज्रदन्त नामके अपने पुत्रके लिये राज्य समर्पणकर सोलह हजार मुकुटबद्ध राजाओं, एक हजार पुत्रों, आठ भाइयों और धनदेवके साथ साथ मोक्ष प्राप्तिके उद्देश्यसे पिता वज्रसेन तीर्थंकरके समीप भव्य जीवोंके द्वारा आदर करने योग्य जिनदीक्षा धारण की ॥ ६१-६२ ॥ जन्म-मरणके दुःखोंसे दुखी हुए अन्य अनेक राजा तप करनेके लिये उसके साथ वनको गये थे सो ठीक ही है, शीतसे पीड़ित हुआ कौन बुद्धिमान् धूपका सेवन नहीं करेगा ? ॥ ६३ ॥ महाराज वज्रनाभिने दीक्षित होकर जीवन पर्यन्तके लिये मन वचन कायसे हिंसा, झूठ, चोरी, स्त्री-सेवन और परिग्रहसे विरति धारण की थी अर्थात् अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य और अपरिग्रह ये पांचो महाव्रत धारण किये थे ॥ ६४ ॥ व्रतोंमे स्थिर होकर उसने पाँच महाव्रतोंकी पच्चीस भावनाओं, पाँच समितियों और तीन गुप्तियोंको भी धारण किया था। ईर्या, भाषा, एषणा, आदान, निक्षेपण और प्रतिष्ठापन ये पाँच समितियाँ तथा कायगुप्ति, वचनगुप्ति और मनोगुप्ति ये तीन गुप्तियां दोनों मिलाकर आठ प्रवचनमातृकाएँ कहलाती हैं। प्रत्येक मुनिको इनका पालन अवश्य ही करना चाहिये ऐसा इन्द्रसभा (समवसरण) की रक्षा करनेवाले गणधरादि

१ उत्ततौ। २ सम्पूर्णबुद्धिः। ३ तीर्थकरस्य। ४ रत्नत्रयम्। ५ अचिन्त्यम्। ६ विचार्य। ७ अवज्ञां कृत्वा। ८ षोडशसहस्रैः। ९ पुत्रैः। १० अभिलषणीयाम्। —जनोदीक्षां अ०, स०। ११ तेन सह गताः। 'टाऽर्थेऽनुना'। १२ मनोवाक्कायेन। १३ प्रवचनमात्रकाष्टकम्। १४ गणधरादयः।

उत्कृष्टतपसो धीरान् मुनीन् ध्यायन्ननेनसः[1]। [2]एकचर्यां ततो भेजे युक्तः सद्दर्शनेन सः ॥६६॥
स एकचरतां[3] प्राप्य चिरं गज इवागजः[4]। मन्थरं[5] विजहारोर्वीं प्रपश्यन् सवनं[6] वनम् ॥६७॥
ततोऽसौ भावयामास भावितात्मा सुधीरधीः। स्वगुरोर्निकटे तीर्थकृत्त्वस्याङ्गानि षोडश ॥६८॥
सद्दृष्टिं विनयं शीलव्रतेष्वनतिचारताम्। ज्ञानोपयोगमाभीक्ष्ण्यात्[7] संवेगं चाप्यभावयत् ॥६९॥
यथाशक्ति तपस्तेपे स्वयं वीर्यमहापयन्[8]। त्यागे च मतिमाधत्ते ज्ञानसंयमसाधने ॥७०॥
सावधानः समाधाने[9] साधूनां सोऽभवन् मुहुः। समाधये हि सर्वोऽयं [10]परिस्पन्दो हितार्थिनाम् ॥७१॥
स वैयावृत्यमातेने व्रतस्थेष्वामयादिषु। [11]अनात्मतरको भूत्वा तपसो हृदयं हि तत् ॥७२॥
स तेने भक्तिमर्हत्सु [12]पूजामर्हत्सु [13]निश्चलाम्। आचार्यान् प्रश्रयी भेजे मुनीनपि बहुश्रुतान् ॥७३॥
परां प्रवचने भक्तिम् [14]आसोपज्ञे ततान सः। न[15] पारयति रागादीन् विजेतुं [16]सन्ततानसः[17] ॥७४॥
अवश्यम[18]वशोऽप्येष वशी स्वावश्यकं दधौ। षड्भेदं देशकालादिसव्यपेक्षमनूनयन् ॥७५॥
मार्गं प्रकाशयामास तपोज्ञानादिदीधितीः। दधानोऽसौ मुनीनेनो[19]भव्याब्जानां प्रबोधकः ॥७६॥

देवोंने कहा है ॥ ६४-६५ ॥ तदनन्तर उत्कृष्ट तपस्वी, धीर वीर तथा पापरहित मुनियोंका चिन्तवन करनेवाला और सम्यग्दर्शनसे युक्त वह चक्रवर्ती एकचर्याव्रतको प्राप्त हुआ अर्थात् एकाकी विहार करने लगा ॥ ६६ ॥ इस प्रकार वह चक्रवर्ती एकचर्याव्रत प्राप्त कर किसी पहाड़ी हाथीके समान तालाब और वनकी शोभा देखता हुआ चिरकाल तक मन्द गतिसे (ईर्यासमिति पूर्वक) पृथिवीपर विहार करता रहा ॥ ६७ ॥ तदनन्तर आत्माके स्वरूपका चिन्तवन करनेवाले धीर वीर वज्रनाभि मुनिराजने अपने पिता वज्रसेन तीर्थंकरके निकट उन सोलह भावनाओंका चिन्तवन किया जो कि तीर्थंकर पद प्राप्त होनेमें कारण हैं ॥६८॥ उसने शंकादि दोषरहित शुद्ध सम्यग्दर्शन धारण किया, विनय धारण की, शील और व्रतोंके अतिचार दूर किये, निरन्तर ज्ञानमय उपयोग किया, संसारसे भय प्राप्त किया ॥ ६९ ॥ अपनी शक्तिको नहीं छिपाकर सामर्थ्यके अनुसार तपश्चरण किया, ज्ञान और संयमके साधनभूत त्यागमें चित्त लगाया ॥ ७० ॥ साधुओंके व्रत शील आदिमें विघ्न आनेपर उनके दूर करनेमें वह बार बार सावधान रहता था क्योंकि हितैषी पुरुषोंकी सम्पूर्ण चेष्टाएँ समाधि अर्थात् दूसरोंके विघ्न दूर करनेके लिये ही होती हैं ॥७१॥ किसी व्रती पुरुषके रोगादि होनेपर वह उसे अपनेसे अभिन्न मानता हुआ उसकी वैयावृत्य (सेवा) करता था क्योंकि वैयावृत्य ही तपका हृदय है—सारभूत तत्त्व है॥७२॥वह पूज्य अरहन्त भगवान्में अपनी निश्चल भक्तिको विस्तृत करता था, विनयी होकर आचार्योंकी भक्ति करता था, तथा अधिक ज्ञानवान् मुनियोंकी भी सेवा करता था ॥ ७३ ॥ वह सच्चे देवके कहे हुए शास्त्रोंमें भी अपनी उत्कृष्ट भक्ति बढ़ाता रहता था, क्योंकि जो पुरुष प्रवचन भक्ति (शास्त्रभक्ति) से रहित होता है वह बढ़े हुए रागादि शत्रुओंको नहीं जीत सकता है ॥ ७४ ॥ वह अवश (अपराधीन) होकर भी वशी—पराधीन (पक्षमें जितेन्द्रिय) था और द्रव्य क्षेत्र काल भावकी अपेक्षा रखनेवाले, समता, वन्दना, स्तुति, प्रतिक्रमण, स्वाध्याय और कायोत्सर्ग इन छह आवश्यकोंका पूर्ण रूपसे पालन करता था ॥ ७५ ॥ तप ज्ञान आदि किरणोंको धारण करनेवाला और भव्य जीवरूपी कमलोंको विकसित करनेवाला वह मुनिराजरूपी सूर्य सदा जैनमार्गको प्रकाशित (प्रभावित)

१ अपापान्। २ एकविहारित्वम्। ३ एकविहारित्वम्। ४ पर्वतजातः। ५ शनैः। ६ सजलमरण्यम्। ७ सातत्यात्। 'अभीक्ष्णं शश्वदनारते' इत्यभिधानात्। ८ अगोपयन्। ९ समाधौ। १० चेष्टा। ११ अनात्मवञ्चकः। अनात्मान्तरको– द०, ल०। १२ इन्द्रादिकृत-पूजायोग्येषु। १३ निर्मलाम् प०, द०। १४ आप्तेन प्रथमोपक्रमे। १५ समर्थो न भवति। १६ विस्तृतान्। १७ अनाप्तः। स न भवतीत्यसः। प्रवचनभक्तिरहित इत्यर्थः। १८ अनिच्छुः। १९ मुनीन्द्रसूर्यः।

वात्सल्यमधिकं चक्रे स मुनिर्धर्मवत्सलः । विनेयान् स्थापयन् धर्मे जिनप्रवचनाश्रितान् ॥७७॥
[1]इत्यमूनि महाधैर्यो मुनिश्चिरमभावयत् । तीर्थकृत्त्वस्य सम्प्राप्तौ कारणान्येष षोडश ॥७८॥
ततोऽमूर्भावनाः सम्यग् भावयन् मुनिसत्तमः[2] । स बबन्ध महत् पुण्यं त्रैलोक्यक्षोभकारणम् ॥७९॥
सकोष्ठबुद्धिममलां बीजबुद्धिञ्च शिश्रिये । पदानुसारिणीं बुद्धिं सभिन्नश्रोतृतामिति ॥८०॥
ताभिर्बुद्धिभिरिद्धर्द्धिः [3]परलोकगतागतम् । राजर्षी राजविद्याभिरिव सम्यगबुद्ध सः ॥८१॥
स दीप्ततपसा दीप्तो[4] भेजे [श्रेजे] तप्ततपाः परम् । तेपे तपोऽग्रमुग्रञ्च[5]घोरांघो [होऽ] रातिमर्मभित्॥८२॥
स तपोमन्त्रिभिर्द्वन्द्वम्[6] अमन्त्रयत मन्त्रवित् । परलोकजयोद्युक्तो विजिगीषुः पुरा यथा ॥८३॥
अणिमादिगुणोपेतां विक्रियर्द्धिमवाप सः । पदं वाञ्छन्न तामैच्छन् महेच्छो गरिमास्पदम् ॥८४॥
जल्लाद्योषधिसम्प्राप्तिः अस्यासीज्जगते[7] हिता । कल्पद्रुमफलावाप्तिः कस्य वा नोपकारिणी ॥८५॥
रसत्यागप्रतिज्ञस्य [8]रससिद्धिरभून्मुनेः । सूते निवृत्तिरिष्टार्थाद् अधिकं हि महत् फलम् ॥८६॥

करता था ॥ ७६ ॥ जैनशास्त्रोंके अनुसार चलनेवाले शिष्योंको धर्ममें स्थिर रखता हुआ और धर्ममें प्रेम रखनेवाला वह वज्रनाभि सभी धर्मात्मा जीवों पर अधिक प्रेम रखता था ॥ ७७ ॥ इस प्रकार महाधीर वीर मुनिराज वज्रनाभिने तीर्थंकरत्वकी प्राप्तिके कारणभूत उक्त सोलह भावनाओंका चिरकाल तक चिन्तन किया था ॥ ७८ ॥ तदनन्तर इन भावनाओंका उत्तम रीतिसे चिन्तन करते हुए उन श्रेष्ठ मुनिराजने तीन लोकमें क्षोभ उत्पन्न करनेवाली तीर्थंकर नामक महापुण्य प्रकृतिका बन्ध किया ॥ ७९ ॥ वह निर्मल कोष्ठबुद्धि, बीज बुद्धि, पदानुसारिणी बुद्धि और संभिन्नश्रोतृ बुद्धि इन चार ऋद्धियोंको भी प्राप्त हुआ था ॥ ८० ॥ जिस प्रकार कोई राजर्षि राजविद्याओंके द्वारा अपने शत्रुओंके समस्त गमनागमनको जान लेता है ठीक उसी प्रकार प्रकाशमान ऋद्धियोंके धारक वज्रनाभि मुनिराजने भी ऊपर कही हुई चार प्रकारकी बुद्धि नामक ऋद्धियोंके द्वारा अपने परभव-सम्बन्धी गमनागमनको जान लिया था ॥ ८१ ॥ वह दीप्त ऋद्धिके प्रभावसे उत्कृष्ट दीप्तिको प्राप्त हुआ था, तप्त ऋद्धिके प्रभावसे उत्कृष्ट तप तपता था, उग्र ऋद्धिके प्रभावसे उग्र तपश्चरण करता था और भयानक कर्मरूप शत्रुओंके मर्मको भेदन करता हुआ घोर ऋद्धिके प्रभावसे घोर तप तपता था ॥ ८२ ॥ मन्त्र (परामर्श) को जाननेवाला वह वज्रनाभि जिस प्रकार पहले राज्यअवस्थामें विजयका अभिलाषी होकर परलोक (शत्रुसमूह) को जीतनेके लिये तत्पर होता हुआ मंत्रियोंके साथ बैठकर द्वन्द्व (युद्ध) का विचार किया करता था उसी प्रकार अब मुनि अवस्थामें भी पञ्चनमस्कारादि मन्त्रोंका जाननेवाला, वह वज्रनाभि कर्मरूप शत्रुओंको जीतनेका अभिलाषी होकर परलोक (नरकादि पर्यायोंको, जीतनेके लिये तत्पर होता हुआ तपरूपी मंत्रियों (मंत्रशास्त्रके जानकार योगियों) के साथ द्वन्द्व (आत्मा और कर्म अथवा राग और द्वेष आदि) का विचार किया करता था ॥ ८३ ॥ उदार आशयको धारण करनेवाला वज्रनाभि केवल गौरवशाली सिद्ध पदकी ही इच्छा रखता था। उसे ऋद्धियोंकी बिलकुल ही इच्छा नहीं थी फिर भी अणिमा, महिमा आदि अनेक गुणों सहित विक्रिया ऋद्धि उसे प्राप्त हुई थी ॥ ८४ ॥ जगत्का हित करनेवाली जल्ल आदि औषधि ऋद्धियां भी उसे प्राप्त हुई थीं सो ठीक ही है। कल्पवृक्ष पर लगे हुए फल किसका उपकार नहीं करते ? ॥ ८५ ॥ यद्यपि उन मुनिराजके घी दूध आदि रसोंके त्याग करनेकी प्रतिज्ञा थी तथापि घी दूध आदिको झरानेवाली अनेक रस ऋद्धियां प्रकट हुई थीं। सो ठीक ही

---

१ इहामूनि ल०। २ सत्तमः श्रेष्ठः। ३ परलोकगमनागमनम्। ४ दीप्तिं। ५ घोराघारा– द०। घोराघोराति– ल०। ६ परिग्रहम्। इष्टानिष्टादिकं च। पक्षे कलहं च। ७ –जगतीहिता म०, ल०। ८ अमृतादिरससिद्धिः।

स बलर्द्धिर्बलाधानाद् असोढोग्रान् परीषहान् । अन्यथा तादृशं द्वन्द्वं[1] कः सहेत सुदुस्सहम् ॥८७॥
सोऽक्षीणर्द्धिप्रभावेणाक्षीणान्नावसथोऽभवत् । ध्रुव तपोऽकृशं तप्तं [2]पम्फुलीत्यक्षयं फलम् ॥८८॥
विशुद्धभावनः सम्यग् विशुध्यन् स्वविशुद्धिभिः[3] । तदोपशमकश्रेणीम् आरुरोह मुनीश्वर ॥८९॥
अपूर्वकरणं श्रित्वाऽनिवृत्तिकरणोऽभवत् । स सूक्ष्मरागः[4] संप्रापद् उपशान्तकषायताम् ॥९०॥
कृत्स्नस्य मोहनीयस्य प्रशमादुपपादितम् । तत्रौपशमिकं प्रापच्चारित्रं सुविशुद्धिकम् ॥९१॥
सोऽन्तर्मुहूर्त्ताद् भूयोऽपि स्वस्थानस्थो[5]ऽभवद् यतिः । नोर्ध्वं मुहूर्त्तात् तत्रास्ति[6] निसर्गात् स्थितिरात्मनः ॥९२॥
सोऽबुद्ध परमं मन्त्रं सोऽबुद्ध परमं तपः । सोऽबुद्ध परमामिष्टिं[7] सोऽबुद्ध परमं पदम् ॥९३॥
तत कालात्यये धीमान् श्रीप्रभाद्रौ समुन्नते । प्रायोपवेशनं कृत्वा शरीराहारमत्यजत् ॥९४॥
रत्नत्रयमयीं शय्याम् अधिशय्य तपोनिधिः । प्रायेणोपविशत्यस्मिन्नित्यन्वर्थमापिपत्[8] ॥९५॥
प्रायेणोपगमो यस्मिन् रत्नत्रितयगोचरः । प्रायेणापगमो[9] यस्मिन् दुरितारिकदम्बकान्[10] ॥९६॥

है, इष्ट पदार्थोंके त्याग करनेसे उनसे भी अधिक महाफलोंकी प्राप्ति होती है ॥ ८६ ॥ बल ऋद्धिके प्रभावसे बल प्राप्त होनेके कारण वह कठिन कठिन परीषहोंको भी सह लेता था सो ठीक ही है क्योंकि उसके बिना शीत उष्ण आदिकी व्यथाको कौन सह सकता है ? अर्थात् कोई नहीं ॥ ८७ ॥ उसे अक्षीण ऋद्धि प्राप्त हुई थी इसीलिये वह जिस दिन जिस घरमें भोजन ग्रहण करता था उस दिन उस घरमें अन्न अक्षय हो जाता था—चक्रवर्तीके कटकको भोजन करानेपर भी वह भोजन क्षीण नहीं होता था। सो ठीक ही है, वास्तवमें तपा हुआ महान तप अविनाशी फल को फलता ही है ॥ ८८ ॥ विशुद्ध भावनाओंको धारण करनेवाले वज्रनाभि मुनिराज जब अपने विशुद्ध परिणामोंसे उत्तरोत्तर विशुद्ध हो रहे थे तब वे उपशम श्रेणीपर आरूढ़ हुए ॥ ८९ ॥ वे अधःकरणके बाद आठवें अपूर्वकरणका आश्रय कर नौवें अनिवृत्तिकरण गुणस्थानको प्राप्त हुए और उसके बाद जहां राग अत्यन्त सूक्ष्म रह जाता है ऐसे सूक्ष्मसाम्पराय नामक दशवें गुण स्थानको प्राप्त कर उपशान्तमोह नामक ग्यारहवें गुणस्थानको प्राप्त हुए। वहां उनका मोहनीय कर्म बिलकुल ही उपशान्त हो गया था ॥ ९० ॥ सम्पूर्ण मोहनीय कर्मका उपशम हो जानेसे वहाँ उन्हें अतिशय विशुद्ध औपशमिक चारित्र प्राप्त हुआ ॥ ९१ ॥ अन्तर्मुहूर्तके बाद वे मुनि फिर भी स्वस्थान अप्रमत्त नामक सातवें गुणस्थानमे स्थित हो गये अर्थात् ग्यारहवें गुणस्थानमें अन्तर्मुहूर्त ठहरकर वहांसे च्युत हो उसी गुणस्थानमें आ पहुँचे जहाँसे कि आगे बढ़ना शुरू किया था। उसका खास कारण यह है कि ग्यारहवें गुणस्थानमें आत्माकी स्वाभाविक स्थिति अन्तर्मुहूर्तसे आगे है ही नहीं ॥ ९२ ॥ मुनिराज वज्रनाभि उत्कृष्ट मन्त्रको जानते थे, उत्कृष्ट तपको जानते थे, उत्कृष्ट पूजाको जानते थे और उत्कृष्ट पद (सिद्धपद)को जानते थे ॥ ९३ ॥ तत्पश्चात् आयुके अन्तसमयमें उस बुद्धिमान् वज्रनाभिने श्रीप्रभनामक ऊँचे पर्वतपर प्रायो-पवेशन (प्रायोपगमन नामका संन्यास) धारण कर शरीर और आहारसे ममत्व छोड़ दिया ॥ ९४ ॥ चूँकि इस संन्यासमें तपस्वी साधु रत्नत्रयरूपी शय्यापर उपविष्ट होता है—बैठता है, इसलिये इसका प्रायोपवेशन नाम सार्थक है ॥ ९५ ॥ इस संन्यासमें अधिकतर रत्नत्रयकी प्राप्ति होती है इसलिये इसे प्रायेणोपगम भी कहते हैं। अथवा इस संन्यासके धारण करनेपर अधिकतर कर्मरूपी शत्रुओंका अपगम—नाश—हो जाता है इसलिये इसे प्रायेणापगम भी कहते

---

१ इष्टानिष्टादिकम् । २ भृशं फलति । पम्फली—ब०, अ०, प०, स०, म०, द०, ल० । ३ आत्मशुद्धिभिः । ४ सूक्ष्मसाम्परायः । ५ अप्रमत्तगुणस्थानस्थः । ६ उपशान्तकषायगुणस्थाने । ७ भावपूजाम् । ८ । प्रापय ९ गमः गमनम् । १० पापारिसमूहान् ।

प्रायेणास्माज्जनस्थानाद् अपसृत्य[1] गमोऽटवेः । प्रायोपगमनं तज्ज्ञैः निरुक्तं श्रमणोत्तमैः ॥९७॥
स्वपरोपकृतां देहे सोऽनिच्छंस्तां प्रतिक्रियाम् । रिपोरिव शवं त्यक्त्वा देहमास्त निराकुलः ॥९८॥
त्वगस्थिभूतसर्वाङ्गो मुनिः परिकृशोदरः । [2]सत्त्वमेवावलम्ब्यास्थाद् [3]गणरात्रानकम्पधीः[4] ॥९९॥
क्षुधं पिपासां शीतं च तथोष्णं दंशमक्षिकम्[5] । [6]नाग्न्यं तथा रतिं स्त्रैणं[7] चर्यां शय्यां[8] निषद्यकाम् ॥१००॥
आक्रोशं वधयाञ्चे च तथालाभमदर्शनम् । रोगश्च सतृणस्पर्शं प्रज्ञाज्ञाने मलं तथा ॥१०१॥
ससत्कारपुरस्कारम् असोढैतान् परीषहान् । मार्गाच्यवनमाशंसुः[9] महतीं निर्जरामपि ॥१०२॥
स भेजे मतिमान् क्षान्तिं परं मार्दवमार्जवम् । शौचं च संयमं सत्यं तपस्त्यागौ च निर्मदः ॥१०३॥
आकिञ्चन्यमथ ब्रह्मचर्यं च वदतां वरः । धर्मो [10]दशतयोऽयं हि गणेशामभिसम्मतः[11] ॥१०४॥
सोऽनु[12]दध्यावनित्यत्वं सुखायुर्बलसम्पदाम् । तथाऽशरणतां मृत्युजराजन्मभये नृणाम् ॥१०५॥
संसृतेर्दुःस्वभावत्वं विचित्रपरिवर्तनैः । एकत्वमात्मनो ज्ञानदर्शनात्मत्वमीयुषः ॥१०६॥
अन्यत्वमात्मनो देहधनबन्धुकलत्रतः । तथाऽशौचं शरीरस्य नवद्वारैर्मलस्रुतः[13] ॥१०७॥
आस्रवं पुण्यपापात्मकर्मणां सह संवरम् । निर्जरां विपुलां बोधेः दुर्लभत्वं भवाम्बुधौ ॥१०८॥

हैं ॥ ९६ ॥ उस विषयके जानकार उत्तम मुनियोंने इस संन्यासका एक नाम प्रायोपगमन भी बतलाया है और उसका अर्थ यह कहा है कि जिसमें प्रायः करके (अधिकतर) संसारी जीवोंके रहने योग्य नगर ग्राम आदिसे हटकर किसी वनमें जाना पड़े उसे प्रायोपगमन कहते हैं ॥ ९७ ॥ इस प्रकार प्रायोपगमन संन्यास धारण कर वज्रनाभि मुनिराज अपने शरीरका न तो स्वयं ही कुछ उपचार करते थे और न किसी दूसरेसे ही उपचार करानेकी चाह रखते थे। वे तो शरीरसे ममत्व छोड़कर उस प्रकार निराकुल हो गये थे जिस प्रकार कि कोई शत्रुके मृतक शरीरको छोड़कर निराकुल हो जाता है ॥ ९८ ॥ यद्यपि उस समय उनके शरीरमें चमड़ा और हड्डी ही शेष रह गई थी एवं उनका उदर भी अत्यन्त कृश हो गया था तथापि वे अपने स्वाभाविक धैर्यका अवलम्बन कर बहुत दिन तक निश्चल चित्त होकर बैठे रहे ॥ ९९ ॥ मुनिमार्गसे च्युत न होने और कर्मोंकी विशाल निर्जरा होनेकी इच्छा करते हुए वज्रनाभि मुनिराजने क्षुधा, तृष्णा, शीत, उष्ण, दंश मशक, नाग्न्य, अरति, स्त्री, चर्या, शय्या, निषद्या, आक्रोश, वध, याचना, अलाभ, अदर्शन, रोग, तृणस्पर्श, प्रज्ञा, अज्ञान, मल और सत्कारपुरस्कार ये बाईस परिषह सहन किये थे ॥ १००-१०२ ॥ बुद्धिमान्, मदरहित और विद्वानोंमें श्रेष्ठ वज्रनाभि मुनि ने उत्तम क्षमा, मार्दव, आर्जव, शौच, सत्य, संयम, तप, त्याग, आकिञ्चन्य और ब्रह्मचर्य ये दश धर्म धारण किये थे। वास्तवमें ये ऊपर कहे हुए दश धर्म गणधरोंको अत्यन्त इष्ट है ॥ १०३-१०४ ॥ इनके सिवाय वे प्रति समय बारह अनुप्रेक्षाओंका चिन्तवन करते रहते थे जैसे कि संसारके सुख, आयु, बल और सम्पदाएँ सभी अनित्य हैं। तथा मृत्यु, बुढ़ापा और जन्मका भय उपस्थित होनेपर मनुष्योंको कुछ भी शरण नहीं है; द्रव्य, क्षेत्र, काल, भव और भावरूप विचित्र परिवर्तनोंके कारण यह संसार अत्यन्त दुःखरूप है। ज्ञानदर्शन स्वरूपको प्राप्त होनेवाला आत्मा सदा अकेला रहता है। शरीर, धन, भाई और स्त्री वगैरहसे यह आत्मा सदा पृथक् रहता है। इस शरीरके नव द्वारोंसे सदा मल झरता रहता है इसलिये यह अपवित्र है। इस जीवके पुण्य पापरूप कर्मोंका आस्रव होता रहता है। गुप्ति समिति आदि कारणोंसे उन कर्मोंका संवर होता है। तपसे निर्जरा होती है। यह लोक चौदह राजूप्रमाण ऊँचा है। संसाररूपी समुद्रमें रत्नत्रयकी

---

१ निर्गत्य। २ मनोबलम्। ३ बहुनिशाः। ४ निष्कम्पबुद्धिः। ५ मशकम्। ६ नग्नत्वम्। ७ स्त्रीसम्बन्धि। ८ शयनम्। ९ इच्छन्। १० दशप्रकारः 'प्रकारवाची तयप्'। दशतयायं द०, म०, ल०। ११ -मपि सम्मतः अ०, स०, म०, द, ल०। १२ अन्वचिन्तयत्। १३ मलस्राविणः।

धर्मस्वाख्याततां चेति [1]तत्त्वानुध्यानभावनाः । लेश्याविशुद्धिमधिकां दधानः शुभभावनः ॥१०९॥
द्वितीयवारमारुह्य श्रेणीमुपशमादिकाम् । [2]पृथक्त्वध्यानमापूर्य [3]समाधिं परमं श्रितः ॥११०॥
उपशान्तगुणस्थाने कृतप्राणविसर्जनः । सर्वार्थसिद्धिमासाद्य संप्रापत् सोऽहमिन्द्रताम् ॥१११॥
द्विषट्कयोजनैर्लोकप्रान्तमप्राप्य यत्स्थितम् । सर्वार्थसिद्धिनामाग्र्यं विमानं तदनुत्तरम् ॥११२॥
जम्बूद्वीपसमायामविस्तारपरिमण्डलम्[4] । त्रिषष्टिपटलप्रान्ते चूडारत्नमिव स्थितम् ॥११३॥
यत्रोत्पन्नवतामर्थाः सर्वे सिद्ध्यन्त्ययत्नतः । इति सर्वार्थसिद्ध्याख्यां यद्बिभर्त्यर्थयोगिनाम्[5] ॥११४॥
महाधिष्ठानमुत्तुङ्गशिखरोल्लासिकेतनैः । समाह्वयदिवाभाति यन्मुनीन् सुखदित्सया[6] ॥११५॥
इन्द्रनीलमयीं यत्र भुवं पुष्पोपहारिणीम् । दृष्ट्वा तारकितं व्योम स्मरन्ति त्रिदिवौकसः ॥११६॥
[7]द्युसदां प्रतिबिम्बानि धारयन्त्यश्मकासति । सिसृक्षव[8] इवापूर्वं स्वर्गं यन्मणिभित्तयः ॥११७॥
किरणैर्यत्र रत्नानां तमोधूतं विदूरतः । पदं न कुरुते सत्यं निर्मला मलिनैः सह ॥११८॥
रत्नांशुभिर्जटिलितैः यत्र शक्रशरासनम् । पर्यन्ते लक्ष्यते दीप्तसालशीलां विडम्बयत् ॥११९॥
भान्ति पुष्पस्रजो यत्र लम्बमानाः सुगन्धयः । सौमनस्यमिवेन्द्राणां सूचयन्तोऽतिकोमलाः ॥१२०॥
मुक्तामयानि दामानि यत्राभान्ति निरन्तरम् । विस्पष्टदशनांशूनि [9]हसितानीव तच्छ्रियः ॥१२१॥

प्राप्ति होना अत्यन्त दुर्लभ है और दयारूपी धर्मसे ही जीवोंका कल्याण हो सकता है। इस प्रकार तत्त्वोंका चिन्तन करते हुए उन्होंने बारह भावनाओंको भाया। उस समय शुभ भावोंको धारण करनेवाले वे मुनिराज लेश्याओंकी अतिशय विशुद्धिको धारण कर रहे थे॥ १०५-१०९॥ वे द्वितीय बार उपशम श्रेणीपर आरूढ़ हुए और पृथक्त्ववितर्क नामक शुक्लध्यानको पूर्ण कर उत्कृष्ट समाधिको प्राप्त हुए॥ ११०॥ अन्तमें उपशान्तमोह नामक ग्यारहवें गुणस्थानमें प्राण छोड़कर सर्वार्थसिद्धि पहुँचे और वहाँ अहमिन्द्र पदको प्राप्त हुए॥ १११॥ यह सर्वार्थसिद्धि नामका विमान लोकके अन्त भागसे बारह योजन नीचा है। सबसे श्रेष्ठ है और सबसे उत्कृष्ट है॥ ११२॥ इसकी लम्बाई, चौड़ाई और गोलाई जम्बूद्वीपके बराबर है। यह स्वर्गके तिरसठ पटलोंके अन्तमें चूडामणि रत्नके समान स्थित है॥ ११३॥ चूंकि उस विमानमें उत्पन्न होनेवाले जीवोंके सब मनोरथ अनायास ही सिद्ध हो जाते हैं इसलिये वह सर्वार्थसिद्धि इस सार्थक नामको धारण करता है॥ ११४॥ वह विमान बहुत ही ऊँचा है तथा फहराती हुई पताकाओंसे शोभायमान है इसलिये ऐसा जान पड़ता है मानो सुख देनेकी इच्छासे मुनियोंको बुला ही रहा हो॥ ११५॥ जिसपर अनेक फूल बिखरे हुए हैं ऐसी वहाँकी नीलमणिकी बनी हुई भूमिको देखकर देवता लोगोंको ताराओंसे व्याप्त आकाशका स्मरण हो आता है॥ ११६॥ देवोंके प्रतिबिम्बको धारण करनेवाली वहाँकी रत्नमयी दीवालें ऐसी जान पड़ती हैं मानो किसी नये स्वर्गकी सृष्टि ही करना चाहती हों॥ ११७॥ वहाँपर रत्नोंकी किरणोंने अन्धकारको दूर भगा दिया है। सो ठीक ही है, वास्तवमें निर्मल पदार्थ मलिन पदार्थोंके साथ संगति नहीं करते हैं॥ ११८॥ उस विमानके चारों ओर रत्नोंकी किरणोंसे जो इन्द्रधनुष बन रहा है उससे ऐसा मालूम होता है मानो चारों ओर चमकीला कोट ही बनाया गया हो॥ ११९॥ वहाँपर लटकती हुई सुगंधित और सुकोमल फूलोंकी मालाएं ऐसी सुशोभित होती हैं मानो वहांके इन्द्रोंके सौमनस्य (फूलोंके बने हुए, उत्तम मन)को ही सूचित कर रही हों॥ १२०॥ उस विमानमें निरन्तर रूपसे लगी हुई मोतियोंकी मालाएँ ऐसी जान पड़ती हैं मानो दाँतोंकी स्पष्ट किरणोंसे शोभाय-

---

[1] तत्त्वानुस्मृतिरूपभावनाः। [2] प्रथमशुक्लध्यानं सम्पूर्णीकृत्य। [3] समाधानम्। [4] परिधिः। [5] अर्थयुक्ताम्। [6] दातुमिच्छया। [7] देवानाम्। [8] स्रष्टुमिच्छवः। [9] हसनानि।

इत्यकृत्रिमनिश्शेषपराद्‌र्ध्यरचनाञ्चिते । तत्रोपपादशयने [1]पर्याप्तिं स क्षणाद् ययौ ॥१२२॥
दोषधातुमलस्पर्शवर्जितं चारुलक्षणम् । क्षणादाविरभूदस्य रूपमापूर्णयौवनम् ॥१२३॥
अम्लानशोभमस्याभाद् वपुरव्याजसुन्दरम्[2] । दृशोरुत्सवमातन्वदमृतेनेव निर्मितम् ॥१२४॥
शुभाः सुगन्धयः स्निग्धा[3] लोके ये केचनाणवः । तैरस्य देहनिर्माणम् अभूत् पुण्यानुभावतः ॥१२५॥
पर्याप्त्यनन्तरं सोऽभात् स्वदेहज्योत्स्नया वृतः । शय्योत्सङ्गे नभोरङ्गे शशीवाखण्डमण्डलः ॥१२६॥
[4]दिव्यहंसः स तत्तल्पम् आवसन् क्षणमाबभौ । गङ्गासैकतमाश्लिष्यन्निव हंसयुवैककः ॥१२७॥
सिंहासनमथाभ्यर्णम्[5]अलङ्कुर्वन्न्यभादसौ । परार्ध्य[6] निषधोत्सङ्गम् आश्रयन्निव भानुमान् ॥१२८॥
स्वपुण्याम्बुभिरेवायम् अभ्यषेचि न केवलम् । अलञ्चक्रे च शारीरैः गुणैरिव[7] विभूषणैः ॥१२९॥
सोऽधिवक्षःस्थलं दध्रे स्रजमेव न केवलम् । सहजां दिव्यलक्ष्मीञ्च यावदायुरविप्लुताम्[8] ॥१३०॥
अस्नातलिप्तदीप्ताङ्गः सहजाम्बरभूषणः । सोऽद्युतद् [9]द्युसदां मूर्ध्नि द्युलोकैकशिखामणिः ॥१३१॥
[10]शुचिस्फटिकनिर्भासिनिर्मलोदारविग्रहः । स बभौ प्रज्वलन्मौलिः पुण्यराशिरिवोच्छिखः ॥१३२॥

मान वहाँकी लक्ष्मीका हास्य ही हो ॥ १२१ ॥ इस प्रकार अकृत्रिम और श्रेष्ठ रचनासे शोभायमान रहनेवाले उस विमानमें उपपाद शय्यापर वह देव क्षणभरमें पूर्ण शरीरको प्राप्त हो गया ॥१२२॥ दोष, धातु और मलके स्पर्शसे रहित, सुन्दर लक्षणोंसे युक्त तथा पूर्ण यौवन अवस्थाको प्राप्त हुआ उसका शरीर क्षणभरमें ही प्रकट हो गया था ॥ १२३ ॥ जिसकी शोभा कभी म्लान नहीं होती, जो स्वभावसे ही सुन्दर है और जो नेत्रोंको आनन्द देनेवाला है ऐसा उसका शरीर ऐसा सुशोभित होता था मानो अमृतके द्वारा ही बनाया गया हो ॥ १२४ ॥ इस संसारमें जो शुभ सुगन्धित और चिकने परमाणु थे, पुण्योदयके कारण उन्हीं परमाणुओंसे उसके शरीरकी रचना हुई थी ॥१२५॥ पर्याप्ति पूर्ण होनेके बाद उपपाद शय्यापर अपने ही शरीरकी कान्तिरूपी चाँदनीसे घिरा हुआ वह अहमिन्द्र ऐसा सुशोभित होता था जैसा कि आकाशमें चाँदनीसे घिरा हुआ पूर्ण चन्द्रमा सुशोभित होता है ॥ १२६ ॥ उस उपपाद शय्यापर बैठा हुआ वह दिव्यहंस (अहमिन्द्र) क्षणभर तक ऐसा शोभायमान होता रहा जैसा कि गंगा नदीके बालूके टीलेपर अकेला बैठा हुआ तरुण हंस शोभायमान होता है ॥ १२७ ॥ उत्पन्न होनेके बाद वह अहमिन्द्र निकटवर्ती सिंहासनपर आरूढ़ हुआ था। उस समय वह ऐसा शोभायमान होता था जैसा कि अत्यन्त श्रेष्ठ निषध पर्वतके मध्यपर आश्रित हुआ सूर्य शोभायमान होता है ॥ १२८ ॥ वह अहमिन्द्र अपने पुण्यरूपी जलके द्वारा केवल अभिषिक्त ही नहीं हुआ था किन्तु शारीरिक गुणोंके समान अनेक अलंकारोंके द्वारा अलंकृत भी हुआ था ॥ १२९ ॥ उसने अपने वक्षःस्थलपर केवल फूलोंकी माला ही धारण नहीं की थी किन्तु जीवनपर्यन्त नष्ट नहीं होनेवाली, साथ साथ उत्पन्न हुई स्वर्गकी लक्ष्मी भी धारण की थी ॥ १३० ॥ स्नान और विलेपनके बिना ही जिसका शरीर सदा देदीप्यमान रहता है और जो स्वयं साथ साथ उत्पन्न हुए वस्त्र तथा आभूषणोंसे शोभायमान है ऐसा वह अहमिन्द्र देवोंके मस्तकपर (अग्रभागमें) ऐसा सुशोभित होता था मानो स्वर्गलोकका एक शिखामणि ही हो अथवा सूर्य ही हो क्योंकि शिखामणि अथवा सूर्य भी स्नान और विलेपनके बिना ही देदीप्यमान रहता है और स्वभावसे ही अपनी प्रभा द्वारा आकाशको भूषित करता रहता है ॥ १३१ ॥

जिसका निर्मल और उत्कृष्ट शरीर शुद्ध स्फटिकके समान अत्यन्त शोभायमान था तथा जिसके मस्तकपर देदीप्यमान मुकुट शोभायमान हो रहा था ऐसा वह अहमिन्द्र, जिसकी शिखा

---

१ स पर्याप्तिं क्ष– ब०, द०, स०, म० । २ अनुपाधिमञ्जुलम् । ३ चिक्कणाः । ४ देवश्रेष्ठः । ५ समीपस्थम् । ६ परार्धनिषधो– अ०, प०, द०, स०, ल० । ७ सौकुमार्यादिभिः । ८ अबाधाम् । ९ देवानामग्रे । १० शुद्धः ।

[1]तिरीटाङ्गदकेयूरकुण्डलादिपरिष्कृतः[2]। स्रग्वी सदंशुकः श्रीमान् सोऽधात् कल्पद्रुमश्रियम् ॥१३३॥
अणिमादिगुणैः श्लाघ्यां दधद्वैक्रियिकीं तनुम्। स्वक्षेत्रे विजहारासौ जिनेन्द्रार्चाः समर्चयन् ॥१३४॥
सङ्कल्पमात्रनिर्वृत्तैः[3] दिव्यैर्गन्धाक्षतादिभिः। पुण्यानुबन्धिनीं पूजां स जैनीं विधिवद् व्यधात् ॥१३५॥
तत्रस्थ एव चाशेषभुवनोदरवर्त्तिनीः। आनर्चार्चा जिनेन्द्राणां सोऽग्रणीः [4]पुण्यकर्मणाम् ॥१३६॥
जिनार्चास्तुतिवादेषु वाग्वृत्तिं तद्गुणस्मृतौ। स्वं मनस्तन्नतौ कायं पुण्यधीः सन्न्ययोजयत् ॥१३७॥
धर्मगोष्ठीष्वनाहूतमिलितैः स्वसमर्द्धिभिः। संभाषणादरोऽस्यासीद् अहमिन्द्रैः [5]शुभंयुभिः ॥१३८॥
क्षालयन्निव दिग्भित्तीः स्मितांशुसलिलप्लवैः। सहाहमिन्द्रैरुन्द्रश्रीः स चक्रे धर्मसंकथाम् ॥१३९॥
स्वावासोपान्तिकोद्यानसरःपुलिनभूमिषु। दिव्यहंसश्चिरं रेमे विहरन् स यदृच्छया ॥१४०॥
परक्षेत्रविहारस्तु नाहमिन्द्रेषु विद्यते। शुक्ललेश्यानुभावेन [6]स्वभोगैर्धृतिमापुषाम्[7] ॥१४१॥
स्वस्थाने या च सम्प्रीतिः निरपायसुखोदये। न सान्यत्र ततोऽन्येषां [नैषां] रिरंसा[8] परभुक्तिषु[9] ॥१४२॥
अहमिन्द्रोऽस्मि नेन्द्रोऽन्यो[10]मत्तोऽस्तीत्यात्त[11]कत्थनाः। अहमिन्द्राख्यया ख्यातिं गतास्ते हि सुरोत्तमाः ॥
नासूया परनिन्दा वा नात्मश्लाघा न मत्सरः। केवलं सुखसाद्भूता दीव्यन्ते ते प्रमोदिनः ॥१४४॥

ऊँची उठी हुई है ऐसी पुण्यकी राशिके समान सुशोभित होता था ॥ १३२ ॥ वह अहमिन्द्र, मुकुट, अनंत, बाजूबंद और कुण्डल आदि आभूषणोंसे सुशोभित था, सुन्दर मालाए धारण कर रहा था, उत्तम उत्तम वस्त्रोंसे युक्त था और स्वयं शोभासे सम्पन्न था इसलिये अनेक आभूषण, माला और वस्त्र आदिको धारण करनेवाले किसी कल्पवृक्षके समान जान पड़ता था ॥ १३३ ॥ अणिमा, महिमा आदि गुणोंसे प्रशंसनीय वैक्रियिक शरीरको धारण करनेवाला वह अहमिन्द्र जिनेन्द्रदेवकी अकृत्रिम प्रतिमाओंकी पूजा करता हुआ अपने ही क्षेत्रमें विहार करता था ॥ १३४ ॥ और इच्छामात्रसे प्राप्त हुए मनोहर गन्ध अक्षत आदिके द्वारा विधिपूर्वक पुण्यका बंध करनेवाली श्री जिनदेवकी पूजा करता था ॥ १३५ ॥ वह अहमिन्द्र पुण्यात्मा जीवोंमें सबसे प्रधान था इसलिये उसी सर्वार्थसिद्धि विमानमें स्थित रहकर ही समस्त लोकके मध्यमें वर्तमान जिनप्रतिमाओंकी पूजा करता था ॥ १३६ ॥ उस पुण्यात्मा अहमिन्द्रने अपने वचनोंकी प्रवृत्ति जिनप्रतिमाओंके स्तवन करनेमें लगाई थी, अपना मन उनके गुण चिन्तवन करनेमें लगाया था और अपना शरीर उन्हें नमस्कार करनेमें लगाया था ॥ १३७ ॥ धर्मगोष्ठियोंमें बिना बुलाये सम्मिलित होनेवाले, अपने ही समान ऋद्धियोंको धारण करनेवाले और शुभ भावोंसे युक्त अन्य अहमिन्द्रोंके साथ संभाषण करनेमें उसे बड़ा आदर होता था ॥ १३८ ॥ अतिशय शोभाका धारक वह अहमिन्द्र कभी तो अपने मन्दहास्यके किरण रूपी जलके पूरोंसे दिशारूपी दीवालोंका प्रक्षालन करता हुआ अहमिन्द्रोंके साथ तत्त्वचर्चा करता था और कभी अपने निवासस्थानके समीपवर्ती उपवनके सरोवरके किनारेकी भूमिमें राजहंस पक्षीके समान अपने इच्छानुसार विहार करता हुआ चिरकाल तक क्रीड़ा करता था ॥ १३९–१४० ॥ अहमिन्द्रोंका परक्षेत्रमें विहार नहीं होता क्योंकि शुक्ललेश्याके प्रभावसे अपने ही भोगों द्वारा संतोषको प्राप्त होनेवाले अहमिन्द्रोंको अपने निरुपद्रव सुखमय स्थानमें जो उत्तम प्रीति होती है वह उन्हें अन्यत्र कहीं नहीं प्राप्त होती। यही कारण है कि उनकी परक्षेत्रमें क्रीड़ा करनेकी इच्छा नहीं होती है ॥ १४१–१४२ ॥ 'मैं ही इन्द्र हूँ, मेरे सिवाय अन्य कोई इन्द्र नहीं है' इस प्रकार वे अपनी निरन्तर प्रशंसा करते रहते हैं और इसलिये वे उत्तमदेव अहमिन्द्र नामसे प्रसिद्धिको प्राप्त होते हैं ॥ १४३ ॥ उन अहमिन्द्रके न तो परस्परमें

१ किरीटा– अ०। २ भूषितः। ३ निष्पन्नैः। ४ शुभकर्मवताम्। ५ शुभावहैः। 'शुभेच्छुभिः' 'स' पुस्तके टिप्पणे पाठान्तरम्। शुभेपुभिः म०, ल०। ६ स्वक्षेत्रैः। ७ सन्तोषं गतवताम्। –मीयुषाम् अ०, प०, स०, द०। ८ रमणेच्छा। ९ परक्षेत्रेषु। १० मत्। ११ स्वीकृतश्लाघाः।

स एष परमानन्दं स्वसात्कृतं समुद्वहन् । त्रयस्त्रिंशत्पयोराशिप्रमितायुर्महाद्युतिः ॥१४५॥
समेन चतुरस्रेण संस्थानेनातिसुन्दरम् । हस्तमात्रोच्छ्रितं देहं हंसाभं धवलं दधत् ॥१४६॥
सहजांशुकदिव्यस्रग्विभूषाभिरलङ्कृतम् । सौन्दर्यस्येव सन्दोहं दधानो रुचिरं वपुः ॥१४७॥
[1]प्रशान्तललितोदात्तधीरनेपथ्यविभ्रमः । स्वदेहप्रसरज्ज्योत्स्नाक्षीराब्धौ मग्नविग्रहः ॥१४८॥
स्फुरदाभरणोद्योतद्योतिताखिलदिङ्मुखः । तेजोराशिरिवैकध्यम्[2] उपनीतोऽतिभास्वरः ॥१४९॥
विशुद्धलेश्यः शुद्धेद्धदेहदीधितिदिग्धदिक् । [3]सौधेनेव रसेनाप्तनिर्माणः सुख[4]निर्वृतः ॥१५०॥
सुधाशिनां सुनासीरप्रमुखाणामगोचरम् । संप्राप्तः परमानन्दप्रदं पदमनुत्तरम् ॥१५१॥
त्रिसहस्राधिक[5]त्रिंशत्सहस्राब्दव्यतिक्रमे । मानसं दिव्यमाहारं स्वसात्कुर्वन् धृतिं दधौ ॥१५२॥
मासैः षोडशभिः पञ्चदशभिश्च दिनैर्मतैः[6] । प्राप्तोच्छ्वासस्थितिस्तत्र सोऽहमिन्द्रोऽवसत् सुखम् ॥१५३॥
लोकनाडीगतं योग्यं मूर्तद्रव्यं सपर्ययम् । स्वावधिज्ञानदीपेन द्योतयन् सोऽद्युतत्तराम् ॥१५४॥
[7]तन्मात्रां विक्रियां कर्तुम् अस्य सामर्थ्यमस्त्यदः । वीतरागस्तु तन्नैवं कुरुते निष्प्रयोजनः ॥१५५॥
नलिनाभं मुखं तस्य नेत्रे नीलोत्पलोपमे । कपोलाविन्दु[8]सच्छायौ [9]बिम्बकान्तिधरोऽधरः ॥१५६॥

असूया है, न परनिन्दा है, न आत्मप्रशंसा है और न ईर्ष्या ही है । वे केवल सुखमय होकर हर्षयुक्त होते हुए निरन्तर क्रीड़ा करते रहते हैं ॥ १४४ ॥ वह वज्रनाभिका जीव अहमिन्द्र अपने आत्माके अधीन उत्पन्न हुए उत्कृष्ट सुखको धारण करता था, तैंतीस सागर प्रमाण उसकी आयु थी और स्वयं अतिशय देदीप्यमान था ॥ १४५ ॥ वह समचतुरस्र संस्थानसे अत्यन्त सुन्दर, एक हाथ ऊंचे और हंसके समान श्वेत शरीरको धारण करता था ॥ १४६ ॥ वह साथ साथ उत्पन्न हुए दिव्य वस्त्र, दिव्य माला और दिव्य आभूषणोंसे विभूषित जिस मनोहर शरीरको धारण करता था वह ऐसा जान पड़ता था मानो सौन्दर्यका समूह ही हो ॥ १४७ ॥ उस अहमिन्द्रकी वेषभूषा तथा विलास चेष्टाएँ अत्यन्त प्रशान्त थीं, ललित (मनोहर) थीं, उदात्त (उत्कृष्ट) थीं और धीर थीं । इसके सिवाय वह स्वयं अपने शरीरकी फैलती हुई प्रभारूपी क्षीरसागरमें सदा निमग्न रहता था ॥ १४८ ॥ जिसने अपने चमकते हुए आभूषणोंके प्रकाशसे दशों दिशाओंको प्रकाशित कर दिया था ऐसा वह अहमिन्द्र ऐसा जान पड़ता था मानो एक-रूपताको प्राप्त हुआ अतिशय प्रकाशमान तेजका समूह ही हो ॥ १४९ ॥ वह विशुद्ध लेश्याका धारक था और अपने शरीरकी शुद्ध तथा प्रकाशमान किरणोंसे दशों दिशाओंको लिप्त करता था, इसलिये सदा सुखी रहनेवाला वह अहमिन्द्र ऐसा मालूम होता था मानो अमृतरसके द्वारा ही बनाया गया हो ॥ १५० ॥ इस प्रकार वह अहमिन्द्र ऐसे उत्कृष्ट पदको प्राप्त हुआ जो इन्द्रादि देवोंके भी अगोचर है, परमानन्द देनेवाला है और सबसे श्रेष्ठ है ॥ १५१ ॥ वह अहमिन्द्र तैंतीस हजार वर्ष व्यतीत होने पर मानसिक दिव्य आहार ग्रहण करता हुआ धैर्य धारण करता था ॥ १५२ ॥ और सोलह महीने पन्द्रह दिन व्यतीत होने पर श्वासोच्छ्वास ग्रहण करता था । इस प्रकार वह अहमिन्द्र वहां (सर्वार्थसिद्धिमें) सुखपूर्वक निवास करता था ॥ १५३ ॥ अपने अवधिज्ञानरूपी दीपकके द्वारा त्रसनाडीमें रहनेवाले जानने योग्य मूर्तिक द्रव्योंको उनकी पर्यायों सहित प्रकाशित करता हुआ वह अहमिन्द्र अतिशय शोभायमान होता था ॥ १५४ ॥ उस अहमिन्द्रके अपने अवधिज्ञानके क्षेत्र बराबर विक्रिया करनेकी भी सामर्थ्य थी, परन्तु वह रागरहित होनेके कारण बिना प्रयोजन कभी विक्रिया नहीं करता था ॥ १५५ ॥ उसका मुख कमलके समान था, नेत्र नील कमलके समान थे, गाल चन्द्रमाके तुल्य थे और

१ प्रशान्तललितोदात्तधीरा इति चत्वारो नैपथ्यभेदाः । २ एकस्वरूपमिति यावत् । एकधा शब्दस्य भावः । ३ अमृतसम्बन्धिनेत्यर्थः । ४ सुखसन्तृप्तः । ५ त्रिसहस्रादिकं त्रिंशत् म०, ल० । ६ –नैर्गतैः ब०, द०, स० । ७ स्वावधिक्षेत्रमात्राम् । ८ सदृशौ । ९ बिम्बिकापक्वफलकान्तिधरः ।

इत्यादि वर्णनातीतं वपुरस्यातिभास्वरम् । कामनीयकसर्वस्वम् एकीभूतामिवारुधत् ॥१५७॥
आहारकशरीरं यत् निरलङ्कारभास्वरम् । योगिनामृद्धिजं तेन सदृगस्याचकाद्[1] वपुः ॥१५८॥
एकान्तशान्तरूपं यत् सुखमाप्तैर्निरूपितम् । तदैकध्यमिवापन्नम्[2] अभूत्तस्मिन् सुरोत्तमे ॥१५९॥
तेऽप्यष्टौ भ्रातरस्तस्य धनदेवोऽप्यनल्पधीः । जातास्तत्सदृशा एव देवाः पुण्यानुभावतः ॥१६०॥
इति तत्राहमिन्द्रास्ते सुखं मोक्षसुखोपमम् । भुञ्जाना निष्प्रवीचाराः चिरमासन् प्रमोदिनः ॥१६१॥
पूर्वोक्तसप्रवीचारसुखानन्तगुणात्मकम् । सुखमव्याहतं तेषां शुभकर्मोदयोद्भवम् ॥१६२॥
संसारे स्त्रीसमासङ्गाद्[3] अङ्गिनां सुखसङ्गमः । तदभावे कुतस्तेषां सुखमित्यत्र [4]चर्च्यते ॥१६३॥
[5]निर्द्वन्द्ववृत्तितामाप्ताः शमुशन्तीह देहिनाम् । तत्कुतस्त्यं सरागाणां द्वन्द्वोपहतचेतसाम् ॥१६४॥
स्त्रीभोगो न सुखं चेतःसंमोहाद् गात्रसादनात्[6] । तृष्णानुबन्धात् संतापरूपत्वाच्च यथा ज्वरः ॥१६५॥
मदनज्वरसंतप्तः तत्प्रतीकारवाञ्छया । स्त्रीरूपं सेवते श्रान्तः[7] यथा कट्वपि भेषजम् ॥१६६॥
मनोज्ञविषयासेवा तृष्णायै न वितृप्तये । तृष्णार्चिषा च संतप्तः कथं नाम सुखी जनः ॥१६७॥

अधर बिम्बफलकी कान्तिको धारण करता था ॥ १५६ ॥ अभी तक जितना वर्णन किया है उससे भी अधिक सुन्दर और अतिशय चमकीला उसका शरीर ऐसा शोभायमान होता था मानो एक जगह इकट्ठा किया गया सौन्दर्यका सर्वस्व (सार) ही हो ॥ १५७ ॥ छठवें गुणस्थानवर्ती मुनियोंके आहारक ऋद्धिसे उत्पन्न होनेवाला और आभूषणोंके बिना ही देदीप्यमान रहनेवाला जो आहारक शरीर होता है ठीक उसके समान ही उस अहमिन्द्रका शरीर देदीप्यमान हो रहा था [विशेषता इतनी ही थी कि वह आभूषणोंसे प्रकाशमान था] ॥ १५८ ॥ जिनेन्द्रदेवने जिस एकान्त और शान्त रूप सुखका निरूपण किया है मालूम पड़ता है वह सभी सुख उस अहमिन्द्रमें जाकर इकट्ठा हुआ था ॥ १५९ ॥ वज्रनाभिके वे विजय, वैजयन्त, अपराजित, बाहु, सुबाहु, पीठ और महापीठ नामके आठों भाई तथा विशाल बुद्धिका धारक धनदेव ये नौ जीव भी अपने पुण्यके प्रभावसे उसी सर्वार्थसिद्धिमें वज्रनाभिके समान ही अहमिन्द्र हुए ॥ १६० ॥ इस प्रकार उस सर्वार्थसिद्धिमें वे अहमिन्द्र मोक्षतुल्य सुखका अनुभव करते हुए प्रवीचार (मैथुन) के बिना ही चिरकाल तक सुखी रहते थे ॥ १६१ ॥ उन अहमिन्द्रोंके शुभ कर्मके उदयसे जो निर्बाध सुख प्राप्त होता है वह पहले कहे हुए प्रवीचारसहित सुखसे अनन्त गुण होता है ॥ १६२ ॥ जब कि संसारमें स्त्रीसमागमसे ही जीवोंको सुखकी प्राप्ति होती है तब उन अहमिन्द्रोंके स्त्री-समागम न होने पर सुख कैसे हो सकता है ? यदि इस प्रकार कोई प्रश्न करे तो उसके समाधानके लिये इस प्रकार विचार किया जाता है ॥ १६३ ॥ चूँकि इस संसारमें जिनेन्द्रदेवने आकुलता-रहित वृत्तिको ही सुख कहा है, इसलिये वह सुख उन सरागी जीवोंके कैसे हो सकता है जिनके कि चित्त अनेक प्रकारकी आकुलताओंसे व्याकुल हो रहे हैं ॥ १६४ ॥ जिस प्रकार चित्तमें मोह उत्पन्न करनेसे, शरीरमें शिथिलता लानेसे, तृष्णा (प्यास) बढ़ानेसे और संताप रूप होनेसे ज्वर सुख रूप नहीं होता उसी प्रकार चित्तमें मोह, शरीरमें शिथिलता, लालसा और सन्ताप बढ़ानेका कारण होनेसे स्त्री-संभोग भी सुख रूप नहीं हो सकता ॥ १६५ ॥ जिस प्रकार कोई रोगी पुरुष कड़ुवी औषधिका भी सेवन करता है उसी प्रकार काम ज्वरसे संतप्त हुआ यह प्राणी भी उसे दूर करनेकी इच्छासे स्त्रीरूप औषधका सेवन करता है ॥ १६६ ॥ जब कि मनोहर विषयोंका सेवन केवल तृष्णाके लिये है न कि सन्तोषके लिये भी, तब तृष्णारूपी ज्वालासे संतप्त हुआ यह जीव सुखी कैसे हो सकता है ? ॥ १६७ ॥

---

१ बभौ । २ प्राप्तम् । ३ संयोगात् । ४ विचार्यते । ५ निष्परिग्रहवृत्तित्वम् । ६ शरीरखलेशात् । ७ –तेऽभ्यार्तो प० । तेऽत्यार्तो अ०, द०, स०, म०, ल० । रोगी ।

[1]रुजां यन्नोपघाताय तदौषधमनौषधम् । यन्नो[2]दन्याविनाशाय नाञ्जसा तज्जलं जलम् ॥१६८॥
न विहन्त्यापदं यच्च नार्थतस्तद्धनं धनम् । तथा तृष्णाच्छिदे यन्न न तद्विषयजं सुखम् ॥१६९॥
रुजामेष प्रतीकारो यत्स्त्रीसम्भोगजं सुखम् । निर्व्याधिः स्वास्थ्यमापन्नः कुरुते किन्नु भेषजम् ॥१७०॥
परं स्वास्थ्यं सुखं नैतद् विषयेष्वनुरागिणाम् । ते हि पूर्वं [3]तदात्वे च पर्यन्ते च विदाहिनः ॥१७१॥
[4]मनोनिर्वृ[4]तिमेवेह सुखं [5]वाञ्छन्ति कोविदाः । तत्कुतो विषयान्धानां [6]नित्यमायस्तचेतसाम् ॥१७२॥
विषयानुभवे सौख्यं यत्पराधीनमङ्गिनाम् । साबाधं सान्तरं बन्धकारणं दुःखमेव तत् ॥१७३॥
[7]आपातमात्ररसिका विषया विषदारुणाः । तदुद्भवं सुखं नृणां कण्डुकण्डूयनोपमम् ॥१७४॥
दग्धव्रणे यथा सान्द्रचन्दनद्रवचर्चनम् । किञ्चिदाश्वासजननं तथा विषयजं सुखम् ॥१७५॥
दुष्टव्रणे यथा क्षार-शस्त्रपाताद्युपक्रमः । प्रतीकारो रुजां जन्तोः तथा विषयसेवनम् ॥१७६॥

जिस प्रकार, जो औषधि रोग दूर नहीं कर सके वह औषधि नहीं है, जो जल प्यास दूर नहीं कर सके वह जल नहीं है और जो धन आपत्तिको नष्ट नहीं कर सके वह धन नहीं है इसी प्रकार जो विषयज सुख तृष्णा नष्ट नहीं कर सके वह विषयज (विषयोंसे उत्पन्न हुआ) सुख नहीं है ॥ १६८-१६९ ॥ स्त्री-संभोगसे उत्पन्न हुआ सुख केवल कामेच्छा रूपी रोगोंका प्रतिकार मात्र है—उन्हें दूर करनेका साधन है। क्या ऐसा मनुष्य भी औषधि सेवन करता है जो रोगरहित है और स्वास्थ्यको प्राप्त है ? भावार्थ—जिस प्रकार रोगरहित स्वस्थ मनुष्य औषधिका सेवन नहीं करता हुआ भी सुखी रहता है उसी प्रकार कामेच्छारहित संतोषी अहमिन्द्र स्त्री-संभोग न करता हुआ भी सुखी रहता है ॥ १७० ॥ विषयोंमें अनुराग करनेवाले जीवोंको जो सुख प्राप्त होता है वह उनका स्वास्थ्य नहीं कहा जा सकता है—उसे उत्कृष्ट सुख नहीं कह सकते, क्योंकि वे विषय, सेवन करनेसे पहले, सेवन करते समय और अन्तमें केवल संताप ही देते हैं ॥ १७१ ॥ विद्वान् पुरुष उसी सुखको चाहते हैं जिसमें कि विषयोंसे मनकी निवृत्ति हो जाती है—चित्त संतुष्ट हो जाता है, परन्तु ऐसा सुख उन विषयान्ध पुरुषोंको कैसे प्राप्त हो सकता है जिनका चित्त सदा विषय प्राप्त करनेमें ही खेद-खिन्न बना रहता है ॥ १७२ ॥ विषयोंका अनुभव करनेपर प्राणियोंको जो सुख होता है वह पराधीन है, बाधाओंसे सहित है, व्यवधान सहित है और कर्मबन्धनका कारण है, इसलिये वह सुख नहीं है किन्तु दुःख ही है ॥ १७३ ॥ ये विषय विषके समान अत्यन्त भयंकर हैं जो कि सेवन करते समय ही अच्छे मालूम होते हैं। वास्तवमें उन विषयोंसे उत्पन्न हुआ मनुष्योंका सुख खाज खुजानेसे उत्पन्न हुए सुखके समान है अर्थात् जिस प्रकार खाज खुजाते समय तो सुख होता है परन्तु बादमें दाह पैदा होनेसे उल्टा दुःख होने लगता है उसी प्रकार इन विषयोंके सेवन करनेसे उस समय तो सुख होता है किन्तु बादमें तृष्णाकी वृद्धि होनेसे दुःख होने लगता है ॥ १७४ ॥ जिस प्रकार जले हुए घावपर घिसे हुए गीले चन्दनका लेप कुछ थोड़ासा आराम उत्पन्न करता है उसी प्रकार विषय सेवन करनेसे उत्पन्न हुआ सुख उस समय कुछ थोड़ासा संतोष उत्पन्न करता है। भावार्थ—जब तक फोड़ेके भीतर विकार विद्यमान रहता है तब तक चन्दन आदिका लेप लगानेसे स्थायी आराम नहीं हो सकता इसी प्रकार जब तक मनमें विषयोंकी चाह विद्यमान रहती है तब तक विषय सेवन करनेसे स्थायी सुख नहीं हो सकता। स्थायी आराम और सुख तो तब प्राप्त हो सकता है जब कि फोड़ेके भीतरसे विकार और मनके भीतरसे विषयोंकी चाह निकाल दी जावे। अहमिन्द्रोंके मनसे विषयोंकी चाह निकल जाती है इसलिये वे सच्चे सुखी होते हैं ॥ १७५ ॥ जिस प्रकार विकारयुक्त घाव होनेपर उसे

---

१ रुजो– म०, द०, ल०। २ जलपानेच्छाविनाशाय। ३ तत्काले। ४ मनस्तृप्तिम्। ५ कथयन्तीत्यर्थः। ६ आयासमितम्। ७ अनुभवमात्रम्।

प्रियाङ्गनाङ्गसंसर्गाद् यदीह सुखमङ्गिनाम् । ननु पक्षिमृगादीनां तिरश्चामस्तु तत्सुखम् ॥१७७॥
शुनोमिन्द्र[1]महे [illegible] । अवशं सेवमानः श्वा सुखी चेत् स्त्रीजुषां सुखम् ॥१७८॥
निम्बद्रुमे यथोत्पन्नः कीटकस्तद्रसोपभुक् । मधुरं तद्रसं वेत्ति तथा विषयिणोऽप्यमी ॥१७९॥
संभोगजनितं खेदं श्लाघमानः सुखास्थया[2] । तत्रैव रतिमायान्ति भवावस्करकीटकाः ॥१८०॥
विषयानुभवात् पुंसां रतिमात्रं प्रजायते । रतिश्चेत् सुखमायातं[3] नन्व[4]मेध्यादनेऽपि तत् ॥१८१॥
यथामी रतिमासाद्य विषयाननुभुञ्जते । तथा श्वसूकरकुलं तद्वत्यैवाश्यमेधकम् ॥१८२॥
गूथक्रमेर्यथा गूथरससेवा परं सुखम् । तथैव विषयानीप्सोः[5] सुखं जन्तोर्विगर्हितम् ॥१८३॥
विषयाननुभुञ्जानः स्त्रीप्रधानान् सवेपथुः[6] । श्वसन् प्रस्विन्नसर्वाङ्गः सुखी चेदसुखीह कः ॥१८४॥
आयासमात्रमत्राज्ञः सुखमित्यभिमन्यते । विषयाशाविमूढात्मा श्वेवास्थि दशनैर्दशन् ॥१८५॥

क्षारयुक्त शस्त्रसे चीरने आदिका उपक्रम किया जाता है उसी प्रकार विषयोंकी चाहरूपी रोग उत्पन्न होनेपर उसे दूर करनेके लिये विषय सेवन किया जाता है और इस तरह जीवोंका यह विषयसेवन केवल रोगोंका प्रतिकार ही ठहरता है ॥ १७६ ॥ यदि इस संसारमें प्रिय स्त्रियोंके स्तन, योनि आदि अंगके संसर्गसे ही जीवोंको सुख होता हो तो वह सुख पक्षी, हरिण आदि तिर्यञ्चोंको भी होना चाहिये ॥ १७७ ॥ यदि स्त्रीसेवन करनेवाले जीवोंको सुख होता हो तो कार्तिकके महीनेमें जिसकी योनि अतिशय दुर्गन्धयुक्त फोड़ोंके समान हो रही है ऐसी कुत्तीको स्वच्छन्दतापूर्वक सेवन करता हुआ कुत्ता भी सुखी होना चाहिये ॥ १७८ ॥ जिस प्रकार नीमके वृक्षमें उत्पन्न हुआ कीड़ा उसके कडुवे रसको पीता हुआ उसे मीठा जानता है उसी प्रकार संसाररूपी विष्ठामें उत्पन्न हुए ये मनुष्यरूपी कीड़े स्त्री-संभोगसे उत्पन्न हुए खेदको ही सुख मानते हुए उसकी प्रशंसा करते हैं और उसीमें प्रीतिको प्राप्त होते हैं। भावार्थ—जिस प्रकार नीमका कीड़ा नीमके कड़वे रसको आनन्ददायी मानकर उसीमें तल्लीन रहता है अथवा जिस प्रकार विष्ठाका कीड़ा उसके दुर्गन्धयुक्त अपवित्र रसको उत्तम समझकर उसीमें रहता हुआ आनन्द मानता है उसी प्रकार यह संसारी जीव संभोगजनित दुःखको सुख मानकर उसीमें तल्लीन रहता है ॥ १७९-१८० ॥ विषयोंका सेवन करनेसे प्राणियोंको केवल प्रेम ही उत्पन्न होता है। यदि वह प्रेम ही सुख माना जावे तो विष्ठा आदि अपवित्र वस्तुओंके खानेमें भी सुख मानना चाहिये क्योंकि विषयी मनुष्य जिस प्रकार प्रेमको पाकर अर्थात् प्रसन्नताके विषयोंका उपभोग करते हैं उसी प्रकार कुत्ता और शूकरोंका समूह भी तो प्रसन्नताके साथ विष्ठा आदि अपवित्र वस्तुएँ खाता है ॥ १८१-१८२ ॥ अथवा जिस प्रकार विष्ठाके कीड़ेको विष्ठाके रसका पान करना ही उत्कृष्ट सुख मालूम होता है उसी प्रकार विषयसेवनकी इच्छा करनेवाले जन्तुको भी निन्द्य विषयोंका सेवन करना उत्कृष्ट सुख मालूम होता है ॥ १८३ ॥ जो पुरुष, स्त्री आदि विषयोंका उपभोग करता है उसका सारा शरीर काँपने लगता है, श्वास तीव्र हो जाती है और सारा शरीर पसीनेसे तर हो जाता है। यदि संसारमें ऐसा जीव भी सुखी माना जावे तो फिर दुखी कौन होगा ? ॥ १८४ ॥ जिस प्रकार दांतोंसे हड्डी चबाता हुआ कुत्ता अपनेको सुखी मानता है उसी प्रकार जिसकी आत्मा विषयोंसे मोहित हो रही है ऐसा मूर्ख प्राणी भी विषय सेवन करनेसे उत्पन्न हुए परिश्रम मात्रको ही सुख मानता है। भावार्थ—जिस प्रकार सूखी हड्डी चबानेसे कुत्तेको कुछ भी रसकी प्राप्ति नहीं होती वह व्यर्थ ही अपनेको सुखी मानता है उसी प्रकार विषयसेवन करनेसे प्राणीको कुछ भी यथार्थ सुखकी प्राप्ति नहीं होती, वह व्यर्थ ही अपनेको सुखी मान लेता है। प्राणियोंकी इस विपरीत मान्यताका कारण

---

१ कार्तिकमासे । २ सुखबुद्ध्या । ३ आगतम् । ४ विड्भक्षणे । ५ प्राप्तुमिच्छोः । ६ सकम्पः ।

का···कः श्रयते नित्यं का···कीं सुरतप्रियाम् । [1]का···नने वदेदानीं च[2]···रक्षरविच्युतम् ॥२४१॥
[कामुकः श्रयते नित्यं कामुकीं सुरतप्रियाम् । कान्तानने वदेदानीं चतुरक्षरविच्युतम् ॥२४१॥]
[एकाक्षरच्युतकपादम्]

तवाम्ब किं वसत्यन्तः[3] का नास्त्यविधवे त्वयि । का हन्ति जनमाद्यूनं[4] वदाद्यैर्व्यञ्जनैः पृथक्[5] ॥२४२॥
[तुक्[6] शुक्[7] रुक्[8]]

वराशनेषु को रुच्यः को गम्भीरो जलाशयः । कः कान्तस्तव तन्वंगि वदादिव्यञ्जनैः पृथक् ॥२४३॥
[सूपः कूपः भूपः]

कः समुत्सृज्यते धान्ये घटयत्यम्ब को घटम् । वृषान्दशति[9][10] कः पापी वदाद्यैरक्षरैः पृथक् ॥२४४॥
[[11]पलालः, कुलालः, बिलालः[12]]

सम्बोध्यसे कथं देवि किमस्त्यर्थे[13] क्रियापदम् । शोभा च कीदृशि[14] व्योम्नि भवतीदं[15] निगद्यताम् ॥२४५॥
['भवति', निह्नुतैकालापकम्]

करनेवाला बाजा कौनसा है ? इस श्लोकमें पहले ही प्रश्न हैं । माताने इस श्लोकके तृतीय अक्षरको हटाकर उसके स्थानपर पहले श्लोकका तृतीय अक्षर बोलकर उत्तर दिया [यह श्लोक एकाक्षर-च्युतक और एकाक्षरच्युतक है] ॥ २४० ॥ कोई देवी पूछती है कि हे माता, 'किसी वनमें एक कौआ संभोगप्रिय कागलीका निरन्तर सेवन करता है' । इस श्लोकमें चार अक्षर कम हैं उन्हें पूरा कर उत्तर दीजिये । माताने चारों चरणोंमें एक एक अक्षर बढ़ाकर उत्तर दिया कि हे कान्तानने, (हे सुन्दर मुखवाली), कामी पुरुष संभोगप्रिय कामिनीका सदा सेवन करता है [यह श्लोक एकाक्षरच्युतक है] ॥ २४१ ॥ किसी देवीने फिर पूछा कि हे माता, तुम्हारे गर्भमें कौन निवास करता है ? हे सौभाग्यवती, ऐसी कौनसी वस्तु है जो तुम्हारे पास नहीं है ? और बहुत खानेवाले मनुष्यको कौनसी वस्तु मारती है ? इन प्रश्नोंका उत्तर ऐसा दीजिये कि जिसमें अन्तका व्यञ्जन एकसा हो और आदिका व्यञ्जन भिन्न भिन्न प्रकारका हो । माताने उत्तर दिया 'तुक्' 'शुक्' 'रुक्' अर्थात् हमारे गर्भमें पुत्र निवास करता है, हमारे समीप शोक नहीं है और अधिक खानेवालेको रोग मार डालता है । [इन तीनों उत्तरोंका प्रथम व्यञ्जन अक्षर जुदा जुदा है और अन्तिम व्यञ्जन सबका एकसा है ॥ २४२ ॥ किसी देवीने पूछा कि हे माता, उत्तम भोजनोंमें रुचि बढ़ानेवाला क्या है ? गहरा जलाशय क्या है ? और तुम्हारा पति कौन है ? हे तन्वंगि, इन प्रश्नोंका उत्तर ऐसे पृथक् पृथक् शब्दोंमें दीजिये जिनका पहला व्यंजन एक समान न हो । माताने उत्तर दिया कि 'सूप' 'कूप' और 'भूप', अर्थात् उत्तम भोजनोंमें रुचि बढ़ानेवाला सूप (दाल) है, गहरा जलाशय कुआँ है और हमारा पति भूप (राजा नाभिराज) है ॥ २४३ ॥ किसी देवीने फिर कहा कि हे माता, अनाजमें से कौन सी वस्तु छोड़ दी जाती है ? घड़ा कौन बनाता है ? और कौन पापी चूहोंको खाता है ? इनका उत्तर भी ऐसे पृथक् पृथक् शब्दोंमें कहिये जिनके पहलेके दो अक्षर भिन्न भिन्न प्रकारके हों । माताने कहा 'पलाल', 'कुलाल' और 'विडाल', अर्थात् अनाजमेंसे पियाल छोड़ दिया जाता है, घड़ा कुम्हार बनाता है और बिलाव चूहोंको खाता है ॥२४४॥ कोई देवी फिर पूछती है कि हे देवी, तुम्हारा संबोधन क्या है ? सत्ता अर्थको कहनेवाला क्रियापद कौनसा है ? और कैसे आकाशमें शोभा होती है ? माताने उत्तर दिया 'भवति', अर्थात् मेरा सम्बोधन भवति, (भवती शब्दका संबोधनका एकवचन) है, सत्ता अर्थको,

---

१ कानन कुत्सितवदन । २ चर रतम् । पक्षे रतविशेषः । एतौ ध्वन्यर्थौ । एतच्छ्लोकार्थः उपरिमश्लोके स्फुटं भवति । ३ गर्भे । ४ औदरिकम् । ५ भिन्नप्रथमव्यञ्जनैः । ६ पुत्रः । ७ शोकः । ८ रोगः । ९ मूषकान् । १० भक्षयति । ११ निष्फलधान्यम् । १२ मार्जारः । १३ अस्तीत्यर्थो यस्य तत् । १४ कीदृशे द०, ल० । १५ भवति इति सम्बोध्यते । भवति इति क्रियापदम् । भवति भानि नक्षत्राण्यस्य सन्तीति भवत् तस्मिन् भवति ।

जिनमानम्रनाकौको नायकार्चितसत्क्रमम् । कमाहुः करिणं चोद्ध[1]लक्षणं कीदृशं विदुः ॥२४६॥
['सुरवरदं'[2], बहिर्लापिका]

भो केतकादिवर्णेन[3] संध्यादिसजुषामुना[4] । शरीरमध्यवर्णेन[5] त्वं सिंहमुपलक्षय[6] ॥२४७॥
['केसरी' अन्तर्लापिका]

कः कीदृग् न नृपैर्दण्ड्यः कः खे भाति कुतोऽम्ब भीः । भीरोः कीदृग्निवेशस्ते ना[7]नागारविराजितः ॥२४८॥
[आदिविषममन्तरालापकं प्रश्नोत्तरम्]

कहनेवाला क्रियापद 'भवति' है (भू धातुके प्रथम पुरुषका एकवचन) और भवति अर्थात् नक्षत्र सहित आकाशमें शोभा होती है (भवत् शब्दका सप्तमीके एकवचनमें भवति रूप बनता है) [इन प्रश्नोंका 'भवति' उत्तर इसी श्लोकमें छिपा है इसलिए इसे 'निह्नुतैकालापक' कहते हैं] ॥२४५॥ कोई देवी फिर पूछती है कि माता, देवोंके नायक इन्द्र भी अतिशय नम्र होकर जिनके उत्तम चरणोंकी पूजा करते हैं ऐसे जिनेन्द्रदेवको क्या कहते हैं ? और कैसे हाथीको उत्तम लक्षणवाला जानना चाहिए ? माताने उत्तर दिया 'सुरवरद', अर्थात् जिनेन्द्र-देवको 'सुरवरद'–देवोंको वर देनेवाला कहते हैं और सु-रव-रद अर्थात् उत्तम शब्द और दाँतोंवाले हाथीको उत्तम लक्षणवाला जानना चाहिये । [इन प्रश्नोका उत्तर बाहरसे देना पड़ा है इसलिये इसे 'बहिर्लापिका' कहते है] ॥२४६॥ किसी देवीने कहा कि हे माता, केतकी आदि फूलोंके वर्णसे, संध्या आदिके वर्णसे और शरीरके मध्यवर्ती वर्णसे तू अपने पुत्रको सिंह ही समझ । यह सुनकर माताने कहा कि ठीक है, केतकीका आदि अक्षर 'के' संध्याका आदि अक्षर 'स*' और शरीरका मध्यवर्ती अक्षर 'री' इन तीनों अक्षरोंको मिलानेसे 'केसरी' यह सिंहवाचक शब्द बनता है इसलिये तुम्हारा कहना सच है । [इसे शब्द प्रहेलिका कहते हैं] ॥२४७॥ [किसी देवीने फिर कहा कि हे कमलपत्रके समान नेत्रोंवाली माता, 'करेणु' शब्दमेंसे क् , र् और ण् अक्षर घटा देने पर जो शेष रूप बचता है वह आपके लिये अक्षय और अविनाशी हो । हे देवि ! बताइये वह कौनसा रूप है ? माताने कहा 'आयुः', अर्थात् करेणुः शब्दमेंसे क् र् और ण् व्यंजन दूर कर देने पर अ+ए+उः ये तीन स्वर शेष बचते हैं । अ और ए के बीच व्याकरणके नियमानुसार सन्धि कर देनेसे दोनोंके स्थानमें 'ऐ' आदेश हो जावेगा । इसलिये 'ऐ+उः' ऐसा रूप होगा । फिर इन दोनोके बीच सन्धि होकर अर्थात् 'ऐ' के स्थानमें 'आय्' आदेश करने पर आय्+उः=आयुः ऐसा रूप बनेगा । तुम लोगोंने हमारी आयुके अक्षय और अविनाशी होनेकी भावना की है सो उचित ही है ।] फिर कोई देवी पूछती है कि हे माता, कौन और कैसा पुरुष राजाओंके द्वारा दण्डनीय नहीं होता ? आकाशमें कौन शोभायमान होता है ? डर किससे लगता है और हे भीरु ! तेरा

---

१ प्रशस्तलक्षणम् । चोद्यल्लक्षणं अ०, प०, ल० । २ चोद्ध लक्षणं व० । २ सुरेभ्यः वरमभीष्टं ददातीति सुरवरदः तम् । गजपक्षे शोभना रवरदा यस्य स सुरवरदः तम् । ध्वनद्दन्तम् । ३ केतककुन्दनद्यावर्तादिवर्णेन । पक्षे केतकीशब्दस्यादिवर्णेन 'के' इत्यक्षरेण । ४ जुषा रागेण सहितः सजुट् सन्ध्या आदिर्यस्यासौ सन्ध्यादिसजुट तेन । पक्षे सन्ध्याशब्दस्यादिवर्णं सकारं जुषते सेवते इति सन्ध्या सजुट् तेन सकारयुक्तेनेत्यर्थः । ५ शरीरमध्यप्रदेशगतरक्तवर्णेन । पक्षे शरीरशब्दस्य मध्यवर्ति 'री'त्यक्षरेण । ६ इतोऽग्रे 'त-बातिरिक्तेषु पुस्तकेषु निम्नाङ्कितः श्लोकोऽधिको दृश्यते– आसादयति यद्रूपं करेणुः करणैर्विना । तत्ते कमलपत्राक्षि भवत्यक्षयमव्ययम् । ७ नानागाः विविधापराधः । 'आगोऽपराधो मन्तुः' अनागाः ना निर्दोषः पुमान् । रविः । आजितः सङ्ग्रामात् ।

* अनुस्वार और विसर्गोंका अन्तर रहने पर चित्रालंकारका भंग नहीं होता ।

त्वत्तनौ काम्ब गम्भीरा राज्ञो[१]दोर्लम्ब आकुतः[२]। कीदृक् किन्नु विगाढव्यं[३] त्वं च श्लाघ्या कथं सती[४] ॥२४९॥

['नाभिराजानुगाधिकम्[५]' बहिरालापकमन्तविषमं प्रश्नोत्तरम्]

त्वां विनोदयितुं देवि प्राप्ता नाकालयादिमाः। नृत्यन्ति [६]करणैश्चित्रैः नभोरङ्गे सुराङ्गनाः ॥२५०॥

त्वमम्ब रेचितं[७] पश्य नाटके सुरसान्वितम्। [८]स्वमम्बरे चितं[९] वैश्य[१०]पेटकं [११]सुरसारितम् ॥२५१॥

[गोमूत्रिका]

वसुधा राजते तन्वि परितस्त्वद्गृहाङ्गणम्। वसुधारानिपातेन दधतीव महानिधिम् ॥२५२॥

निवासस्थान कैसा है? इन प्रश्नोंके उत्तरमें माताने श्लोकका चौथा चरण कहा 'नानागार-विराजितः'। इस एक चरणसे ही पहले कहे हुए सभी प्रश्नोंका उत्तर हो जाता है। जैसे—ना अनागाः, रविः, आजितः, नानागारविराजितः) अर्थात् अपराध रहित मनुष्य राजाओंके द्वारा दण्डनीय नहीं होता, आकाशमें रवि (सूर्य) शोभायमान होता है, डर आजि (युद्ध)से लगता है और मेरा निवासस्थान अनेक घरोंसे विराजमान है। [यह आदि विषम अन्तरालापक श्लोक कहलाता है] ॥२४८॥ किसी देवीने फिर पूछा कि हे माता! तुम्हारे शरीरमें गंभीर क्या है? राजा नाभिराजकी भुजाएँ कहाँ तक लम्बी हैं? कैसी और किस वस्तुमें अवगाहन (प्रवेश) करना चाहिये? और हे पतिव्रते, तुम अधिक प्रशंसनीय किस प्रकार हो? माताने उत्तर दिया 'नाभिराजानुगाधिकं' (नाभिः, आजानु, गाधि-कं, नाभिराजानुगा-अधिकं)। श्लोकके इस एक चरणमें ही सब प्रश्नोंका उत्तर आ गया है जैसे, हमारे शरीरमें गंभीर (गहरी) नाभि है, महाराज नाभिराजकी भुजाएँ आजानु अर्थात् घुटनों तक लम्बी हैं, गाधि अर्थात् कम गहरे कं अर्थात् जलमें अवगाहन करना चाहिये और मैं नाभिराजाकी अनुगामिनी (आज्ञाकारिणी) होनेसे अधिक प्रशंसनीय हूँ। [यहां प्रश्नोंका उत्तर श्लोकमें न आये हुए बाहरके शब्दोंसे दिया गया है इसलिये यह बहिर्लापक अन्त विषम प्रश्नोत्तर है] ॥२४९॥ [इस प्रकार उन देवियोंने अनेक प्रकारके प्रश्न कर मातासे उन सबका योग्य उत्तर प्राप्त किया। अब वे चित्रबद्ध श्लोकों द्वारा माताका मनोरंजन करती हुई बोलीं] हे देवि, देखो, आपको प्रसन्न करनेके लिए स्वर्गलोकसे आई हुई ये देवियाँ आकाशरूपी रंगभूमिमें अनेक प्रकारके करणों (नृत्यविशेष)के द्वारा नृत्य कर रही हैं ॥२५०॥ हे माता, उस नाटकमें होनेवाले रसीले नृत्यको देखिये तथा देवोंके द्वारा लाया हुआ और आकाशमें एक जगह इकट्ठा हुआ यह अप्सराओंका समूह भी देखिए। [यह गोमूत्रिकाबद्ध श्लोक है*] ॥२५१॥ हे तन्वि! रत्नोंकी वर्षासे आपके घरके आंगनके चारों

---

१ बाहुलम्बः। २ कुतः आसीमार्थे आङ्। कस्मात् पर्यन्त इत्यर्थः। ३ प्रवेष्टव्यम्। प्रगाढव्यम् द०। ४ पतिव्रता। सति म०, ल०। ५ नाभिः आजानु ऊरुपर्वपर्यन्तमिति यावत्। गाधिकं गाधिः तलस्पर्शिप्रदेशः अस्यास्तीति गाधि। गाधि च तत् कं जलं गाधिकं। 'कमेणः सलिलं पयः' इत्यभिधानात्। जानुदघ्न नाभिदघ्नानुजलाशयः। अधिकं नाभिराजानुवर्तिनी चेत्। ६ अङ्गकरन्यासैः। ७ वल्गितम्। ८ आत्मीयम्। ९ निचितम्। १० वैश्यानां सम्बन्धि समूहम्। ११ देवैः प्रापितम्।

*

त्वमंब रेचितं पश्य नाटके सुरसान्वितम्।
स्वमंबरे चितं वैश्यपेटकं सुरसारितम्॥

वसुधारानिभे[1]नारात्[2] स्वर्गश्रीस्त्वामुपासितुम् । सेयमायाति पश्यैनां नानारत्नांशुचित्रिताम् ॥२५३॥
मुदेऽस्तु वसुधारा ते देवताशीस्तताम्बरा । स्तुतादेशे नभाताधा[3] वशीशे[4] [5]स्वस्वनस्तसु ॥२५४॥
इति ताभिः[6] प्रयुक्तानि दुष्कराणि[7] विशेषतः । जानाना सुचिरं भेजे सान्तर्वत्नी [8]सुखासिकाम् ॥२५५॥
निसर्गाच्च [9]धृतिस्तस्याः परिज्ञानेऽभवत् परा । प्रज्ञामयं परं ज्योतिः उद्वहन्त्या निजोदरे ॥२५६॥
सा तदात्मीयगर्भान्तर्गतं [10]तेजोऽतिभासुरम् । दधानार्कांशुगर्भेव प्राची[11] प्राप परां रुचिम्[12] ॥२५७॥
सूचिता वसुधारोरुदीपेनाधः[13]कृतार्चिषा । निधिगर्भस्थलीवासौ रेजे राजीवलोचना ॥२५८॥

ओरकी भूमि ऐसी शोभायमान हो रही है मानो किसी बड़े खजानेको ही धारण कर रही हो ॥२५२॥ हे देवि ! इधर अनेक प्रकारके रत्नोंकी किरणोंसे चित्र-विचित्र पड़ती हुई यह रत्नधारा देखिये। इसे देखकर मुझे तो ऐसा जान पड़ता है मानो रत्नधाराके छलसे यह स्वर्गकी लक्ष्मी ही आपकी उपासना करनेके लिये आपके समीप आ रही है ॥२५३॥ जिसकी आज्ञा अत्यन्त प्रशंसनीय है और जो जितेन्द्रिय पुरुषोंमें अतिशय श्रेष्ठ है ऐसी हे माता ! देवताओंके आशीर्वादसे आकाशको व्याप्त करनेवाली अत्यन्त सुशोभित, जीवोंकी दरिद्रताको नष्ट करनेवाली और नम्र होकर आकाशसे पड़ती हुई यह रत्नोंकी वर्षा तुम्हारे आनन्दके लिये हो। [यह*अर्धभ्रम श्लोक है—इस श्लोकके तृतीय और चतुर्थ चरणके अक्षर प्रथम तथा द्वितीय चरणमें ही आ गये हैं।] ॥ २५४ ॥······ इस प्रकार उन देवियोंके द्वारा पूछे हुए कठिन कठिन प्रश्नोंको विशेष रूपसे जानती हुई वह गर्भवती मरुदेवी चिरकाल सुखपूर्वक निवास करती रही ॥ २५५ ॥ वह मरुदेवी स्वभावसे ही सन्तुष्ट रहती थी और जब उसे इस बातका परिज्ञान हो गया कि मैं अपने उदरमें ज्ञानमय तथा उत्कृष्ट ज्योतिस्वरूप तीर्थंकर पुत्रको धारण कर रही हूँ तब उसे और भी अधिक संतोष हुआ था ॥ २५६ ॥ वह मरुदेवी उस समय अपने गर्भके अन्तर्गत अतिशय देदीप्यमान तेजको धारण कर रही थी इसलिये सूर्यकी किरणोंको धारण करनेवाली पूर्व दिशाके समान अतिशय शोभाको प्राप्त हुई थी ॥ २५७ ॥ अन्य सब कान्तियोंको तिरस्कृत करनेवाली रत्नोकी धारारूपी विशाल दीपकसे जिसका पूर्ण प्रभाव जान लिया गया है ऐसी वह कमलनयनी मरुदेवी किसी

---

१ व्याजेन। २ 'आराद्दूरसमीपयोः'। ३ नताताधा द०। नखाताधा ब०। नभातादा ट०। भायाः भावः भाता तां दधातीति भाताधा। भातं दीप्तिः ताम् आदधातीति वा। ४ वशिना मुनीनाम् ईशः वशीशः सर्वज्ञः सः अस्यास्तीति वशीशा मरुदेवी तस्याः सम्बोधनम् वशीशे, वशिनो जिनस्य ईशा स्वामिनी तस्याः सम्बोधनं वशीशे। ५ सुष्ठु असुभिः प्राणैः अनस्तं सूते या सा स्वस्वनस्तसूः तस्याः सम्बोधनं स्वस्वनस्तसु। ६ देवीभिः। ७ दुष्करसज्ञानि। ८ सुखास्थिताम्। ९ सन्तोषः। १० तेजपिण्डरूपार्भकम्। ११ पूर्वदिक्। १२ शोभाम्। १३ अधःकृत अधोमुख।

*

मु	दे	स्तु	व	सु	धा	रा	ते
दे	व	ता	शी	स्त	ता	म्ब	रा
स्तु	ता	दे	शे	न	भा	ता	धा
व	शी	शे	स्व	स्व	न	स्त	सु

महासत्त्वेन तेनासौ गर्भस्थेन परां श्रियम् । बभार रत्नगर्भेव भूमिराकरगोचरा ॥२५९॥
स मातुरुदरस्थोऽपि नास्याः पीडामजीजनत् । दर्पणस्थोऽपि किं वह्निः दहेत्तं प्रतिबिम्बितः ॥२६०॥
त्रिवलीभङ्गुरं तस्याः तथैवास्थात्तनूदरम् । तथापि ववृधे गर्भः तेजसः प्राभवं हि तत् ॥२६१॥
नोदरे विकृतिः कापि स्तनौ न नीलचूचुकौ । न पाण्डुवदनं तस्या गर्भोऽप्यवृधदद्भुतम् ॥२६२॥
स्वामोदं[1] मुखमेतस्याः राजाघ्रायैव सोऽतृपत् । मदालिरिव पद्मिन्याः पद्ममस्पष्टकेसरम् ॥२६३॥
सोऽभाद्विशुद्धगर्भस्थः त्रिबोधविमलाशयः । स्फटिकागारमध्यस्थः प्रदीप इव निश्चलः ॥२६४॥
कुशेशयशयं[2] देवं सा दधानोदरेशयम्[3] । [4]कुशेशयशयेवासीत् [5]माननीया दिवौकसाम् ॥२६५॥
निगूढ च शची देवी सिषेवे किल साप्सराः । [6]मघोनाघविघाताय[7] [8]प्रहिता तां महासतीम् ॥२६६॥
सानसीन्न[9] परं कञ्चित्[10] नम्यते स्म स्वयं जनैः । चान्द्री कलेव रुन्द्रश्रीः देवीव च सरस्वती ॥२६७॥
बहुनात्र किमुक्तेन श्लाघ्या सैका जगत्त्रये । या स्रष्टुर्जगतां[11] स्रष्ट्री[12] बभूव भुवनाम्बिका ॥२६८॥

दीपक विशेषसे जानी हुई खजानेकी मध्यभूमिके समान सुशोभित हो रही थी ॥ २५८ ॥ जिसके भीतर अनेक रत्न भरे हुए हैं ऐसी रत्नोंकी खानिकी भूमि जिस प्रकार अतिशय शोभाको धारण करती है उसी प्रकार वह मरुदेवी भी गर्भमें स्थित महाबलशाली पुत्रसे अतिशय शोभा धारण कर रही थी ॥ २५९ ॥ वे भगवान् ऋषभदेव माताके उदरमें स्थित होकर भी उसे किसी प्रकारका कष्ट उत्पन्न नहीं करते थे सो ठीक ही है दर्पणमें प्रतिबिम्बित हुई अग्नि क्या कभी दर्पणको जला सकती है ? अर्थात् नहीं जला सकती ॥ २६० ॥ यद्यपि माता मरुदेवीका कृश उदर पहलेके समान ही त्रिवलियोंसे सुशोभित बना रहा तथापि गर्भ वृद्धिको प्राप्त होता गया सो यह भगवान्‌के तेजका प्रभाव ही था ॥ २६१ ॥ न तो माताके उदरमें कोई विकार हुआ था, न उसके स्तनोंके अग्रभाग ही काले हुए थे और न उसका मुख ही सफेद हुआ था फिर भी गर्भ बढ़ता जाता था यह एक आश्चर्यकी बात थी ॥ २६२ ॥ जिस प्रकार मदोन्मत्त भ्रमर कमलिनीके केशरको बिना छुए ही उसकी सुगन्ध मात्रसे सन्तुष्ट हो जाता है उसी प्रकार उस समय महाराज नाभिराज भी मरुदेवीके सुगन्धियुक्त मुखको सूँघकर ही सन्तुष्ट हो जाते थे ॥ २६३ ॥ मरुदेवीके निर्मल गर्भमें स्थित तथा मति, श्रुत और अवधि इन तीन ज्ञानोंसे विशुद्ध अन्तःकरणको धारण करनेवाले भगवान् वृषभदेव ऐसे सुशोभित होते थे जैसा कि स्फटिक मणिके बने हुए घरके बीचमें रखा हुआ निश्चल दीपक सुशोभित होता है ॥ २६४ ॥ अनेक देव-देवियां जिसका सत्कार कर रही हैं और जो अपने उदरमें नाभि-कमलके ऊपर भगवान् वृषभदेवको धारण कर रही है ऐसी वह मरुदेवी साक्षात् लक्ष्मीके समान शोभायमान हो रही थी ॥ २६५ ॥ अपने समस्त पापोंका नाश करनेके लिये इन्द्रके द्वारा भेजी हुई इन्द्राणी भी अप्सराओंके साथ साथ गुप्तरूपसे महासती मरुदेवीकी सेवा किया करती थी ॥ २६६ ॥ जिस प्रकार अतिशय शोभायमान चन्द्रमाकी कला और सरस्वती देवी किसीको नमस्कार नहीं करतीं किन्तु सब लोग उन्हें ही नमस्कार करते हैं इसी प्रकार वह मरुदेवी भी किसीको नमस्कार नहीं करती थी, किन्तु संसारके अन्य समस्त लोग स्वयं उसे ही नमस्कार करते थे ॥ २६७ ॥ इस विषयमें अधिक कहनेसे क्या प्रयोजन है ? इतना कहना ही बस है कि तीनों लोकोंमें वही एक प्रशंसनीय थी । वह जगत्‌के स्रष्टा अर्थात् भोगभूमिके बाद कर्मभूमिकी व्यवस्था करनेवाले श्रीवृषभदेवकी

---

१ शोभनगन्धम् । २ आदिब्रह्माणम् । ३ उदरे शेते इति उदरेशयस्तम् । जठरस्थमिति यावत् । ४ लक्ष्मीः । ५ पूज्या । ६ इन्द्रेण । ७ –विनाशाय म०, ल० । ८ प्रेषिता । ९ नमन्ति स्म । १० अन्य किमपि । ११ जनयितुः । १२ जनयित्री ।

दोधकवृत्तम्

सा [1]विभ्रमभावभिरामतराङ्गी [2]श्रीभिरुपासितमूर्त्तिरमूभिः ।
श्रीभवने भुवनैकललाम्नि[3] श्रीभृति भूभृति तन्वति सेवाम् ॥२६९॥

मालिनी

अतिरुचिरतराङ्गी कल्पवल्लीव साभूत्
स्मितकुसुममनूनं दर्शयन्ती फलाय ।
नृपतिरपि तदास्याः पार्श्ववर्त्ती रराजे
सुरतरुरिव तुङ्गो मङ्गलश्रीविभूषः[4] ॥२७०॥

ललिततरमथास्या वक्त्रपद्मं सुगन्धि
स्फुरितदशनरोचिर्मञ्जरीकेसराढ्यम् ।
[5]वचनमधुरसाशासंसजद्राजहंसं
भृशमनयत बोधं बालभानुस्समुद्यन् ॥२७१॥

मुहुरमृतमिवास्या वक्त्रपूर्णेन्दुरुद्यद्-
वचनमसृजदुच्चैर्लोकचेतोऽभिनन्दी ।
नृपतिरपि सतृष्णस्त[6]त्पिपासन्[7] स रेमे
स्वजनकुमुदषण्डैः[8] स्वं[9] विभक्तं यथास्वम् ॥२७२॥

जननी थी इसलिये कहना चाहिये कि वह समस्त लोककी जननी थी ॥ २६८ ॥ इस प्रकार जो स्वभावसे ही मनोहर अंगोंको धारण करनेवाली है, श्री ह्री आदि देवियाँ जिसकी उपासना करती हैं तथा अनेक प्रकारकी शोभा व लक्ष्मीको धारण करनेवाले महाराज भी स्वयं जिसकी सेवा करते हैं ऐसी वह मरुदेवी, तीनों लोकोंमें अत्यन्त सुन्दर श्रीभवनमें रहती हुई बहुत ही सुशोभित हो रही थी ॥ २६९ ॥ अत्यन्त सुन्दर अंगोंको धारण करनेवाली वह मरुदेवी मानो एक कल्पलता ही थी और मन्द हास्यरूपी पुष्पोंसे मानो लोगोंको दिखला रही थी कि अब शीघ्र ही फल लगनेवाला है । तथा इसके समीप ही बैठे हुए मङ्गलमय शोभा धारण करनेवाले महाराज नाभिराज भी एक ऊँचे कल्पवृक्षके समान शोभायमान होते थे ॥ २७० ॥ उस समय मरुदेवीका मुख एक कमलके समान जान पड़ता था क्योंकि वह कमलके समान ही अत्यन्त सुन्दर था, सुगन्धित था और प्रकाशमान दाँतोंकी किरणमंजरीरूप केशरसे सहित था तथा वचनरूपी परागके रसकी आशासे उसमें अत्यन्त आसक्त हुए महाराज नाभिराज ही पास बैठे हुए राजहंस पक्षी थे । इस प्रकार उसके मुखरूपी कमलको उदित (उत्पन्न) होते हुए बालकरूपी सूर्यने अत्यन्त हर्षको प्राप्त कराया था ॥ २७१ ॥ अथवा उस मरुदेवीका मुख पूर्ण चन्द्रमाके समान था क्योंकि वह भी पूर्ण चन्द्रमाके समान सब लोगोंके मनको उत्कृष्ट आनन्द देनेवाला था और चन्द्रमा जिस प्रकार अमृतकी सृष्टि करता है उसी प्रकार उसका मुख भी बार बार उत्कृष्ट वचनरूपी अमृतकी सृष्टि करता था । महाराज नाभिराज उसके वचनरूपी अमृतको पीनेमें बड़े सतृष्ण थे इसलिये वे अपने परिवाररूपी कुमुद-समूहके द्वारा विभक्त कर दिये हुए अपने भागका इच्छानुसार पान करते हुए रमण करते थे । भावार्थ—मरुदेवीकी आज्ञा पालन

---

१ साभिबभा– म० । सातिबभा– ल० । २ श्रीह्रीधृत्यादिदेवीभिः । ३ तिलके । ४ मङ्गलार्थ– । ५ मकरन्दरसवाञ्छा । ६ तद्वचनामृतम् । ७ पातुमिच्छन् । ८ –खण्डैः अ०, स०, म०, द०, ल० । ९ संविभक्त स० ।

शार्दूलविक्रीडितम्

इत्याविष्कृतमङ्गला भगवती[1] देवीभिराप्तादरं
दध्रेऽन्तः परमोदयं त्रिभुवनेऽप्याश्चर्य[2] भूतं महः[3] ।
राजैनं जिनभाविनं[4] सुतरविं पद्माकरस्यानुयन्[5]
साकाङ्क्षः [6]प्रतिपालयन् धृतिमधात् प्रातोदयं[7] भूयसीम् ॥२७३॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे
भगवत्स्वर्गावतरणवर्णनं नाम
द्वादशं पर्व ॥१२॥

करनेके लिये महाराज नाभिराज तथा उनका समस्त परिवार तैयार रहता था ॥ २७२ ॥ इस प्रकार जो प्रकट रूपसे अनेक मंगल धारण किये हुए है और अनेक देवियाँ आदरके साथ जिसकी सेवा करती हैं ऐसी मरुदेवी परम सुख देनेवाले और तीनों लोकोंमें आश्चर्य करनेवाले भगवान् ऋषभदेवरूपी तेजःपुञ्जको धारण कर रही थी और महाराज नाभिराज कमलोंसे सुशोभित तालाबके समान जिनेन्द्र होनेवाले पुत्ररूपी सूर्यकी प्रतीक्षा करते हुए बड़ी आकांक्षाके साथ परम सुख देनेवाले भारी धैर्यको धारण कर रहे थे ॥ २७३ ॥

इस प्रकार श्रीआर्ष नामसे प्रसिद्ध भगवज्जिनसेनाचार्यप्रणीत त्रिषष्टि-
लक्षणमहापुराणसंग्रहमें भगवान्‌के स्वर्गावतरणका वर्णन
करनेवाला बारहवाँ पर्व समाप्त हुआ ।

---

१ भाग्यवती । २ –ने साश्चर्य– ल०, म० । ३ तेजः । ४ भावी चासौ जिनश्च जिनभावी तम् । ५ पद्माकरमनुकुर्वन् । ६ प्रतीक्षमाणः । ७ प्रातोदया अ०, प०, स०, द०, ल० ।

त्रयोदशं पर्व

अथातो नवमासानाम् अत्यये सुषुवे विभुम् । देवी देवीभिरुक्ताभिः यथास्वं परिवारिता ॥१॥
प्राचीव[1] बन्धुमब्जानां सा लेभे[2] भास्वरं सुतम् । चैत्रे मास्यसिते[3] पक्षे नवम्यामुदये रवेः ॥२॥
विश्वे[4] ब्रह्ममहायोगे जगतामेकवल्लभम् । भासमानं[5] त्रिभिर्बोधैः शिशुमप्यशिशुं गुणैः ॥३॥
त्रिबोधकिरणोद्भासिबालार्कोऽसौ स्फुरद्युतिः । नाभिराजोदयाद्रीन्द्राद् उदितो विबभौ विभुः ॥४॥
दिशः [6]प्रसत्तिमासेदुः[7] आसीन्निर्मलमम्बरम् । गुणानामस्य वैमल्यम्[8] अनुकर्तुमिव प्रभोः ॥५॥
प्रजानां ववृधे हर्षः सुरा विस्मयमाश्रयन् । अम्लानिकुसुमान्युच्चैः मुमुचुः सुरभूरुहाः ॥६॥
[9]अनाहताः पृथुध्वाना दध्वनुर्दिविजानकाः । मृदुः सुगन्धिशिशिरो मरुन्मन्दं तदा ववौ ॥७॥
प्रचचाल मही तोषात् नृत्यन्तीव चलद्गिरिः । उद्वेलो जलधिर्नूनम् अगमत् प्रमदं परम् ॥८॥
ततोऽबुद्ध सुराधीशः सिंहासनविकम्पनात् । प्रयुक्तावधिरुद्भूतिं[10] जिनस्य विजितैनसः ॥९॥
ततो जन्माभिषेकाय मतिं चक्रे शतक्रतुः । तीर्थकृद्भाविभव्याब्जबन्धौ तस्मिन्नुदेयुषि ॥१०॥
तदासनानि देवानाम् अकस्मात्[11] प्रचकम्पिरे । देवानुच्चासनेभ्योऽधः पातयन्तीव संभ्रमात् ॥११॥

अथानन्तर, ऊपर कही हुई श्री ह्री आदि देवियां जिसकी सेवा करनेके लिये सदा समीपमें विद्यमान रहती हैं ऐसी माता मरुदेवीने नव महीने व्यतीत होनेपर भगवान् वृषभदेवको उत्पन्न किया ॥१॥ जिस प्रकार प्रातःकालके समय पूर्व दिशा कमलोंको विकसित करनेवाले प्रकाशमान सूर्यको प्राप्त होती है उसी प्रकार वह मायादेवी भी चैत्र कृष्ण नवमीके दिन सूर्योदयके समय उत्तराषाढ़ नक्षत्र और ब्रह्म नामक महायोगमें मति, श्रुत और अवधि इन तीन ज्ञानोंसे शोभायमान, बालक होनेपर भी गुणोंसे वृद्ध तथा तीनों लोकोंके एकमात्र स्वामी देदीप्यमान पुत्रको प्राप्त हुई थी ॥२-३॥ तीन ज्ञान रूपी किरणोंसे शोभायमान, अतिशय कान्तिका धारक और नाभिराजरूपी उदयाचलसे उदयको प्राप्त हुआ वह बालकरूपी सूर्य बहुत ही शोभायमान होता था ॥४॥ उस समय समस्त दिशाएँ स्वच्छताको प्राप्त हुई थीं और आकाश निर्मल हो गया था। ऐसा मालूम होता था मानो भगवान्के गुणोंकी निर्मलताका अनुकरण करनेके लिये ही दिशाएँ और आकाश स्वच्छताको प्राप्त हुए हों ॥५॥ उस समय प्रजाका हर्ष बढ़ रहा था, देव आश्चर्यको प्राप्त हो रहे थे और कल्पवृक्ष ऊँचेसे प्रफुल्लित फूल बरसा रहे थे ॥६॥ देवोंके दुन्दुभि बाजे बिना बजाये ही ऊँचा शब्द करते हुए बज रहे थे और कोमल शीतल तथा सुगन्धित वायु धीरे धीरे बह रहा था ॥७॥ उस समय पहाड़ोंको हिलाती हुई पृथिवी भी हिलने लगी थी मानो संतोषसे नृत्य ही कर रही हो और समुद्र भी लहरा रहा था मानो परम आनन्दको प्राप्त हुआ हो ॥८॥ तदनन्तर सिंहासन कम्पायमान होनेसे अवधिज्ञान जोड़कर इन्द्रने जान लिया कि समस्त पापोंको जीतनेवाले जिनेन्द्रदेवका जन्म हुआ है ॥९॥ आगामी कालमें उत्पन्न होनेवाले भव्य जीवरूपी कमलोंको विकसित करनेवाले श्री तीर्थंकररूपी सूर्यके उदित होते ही इन्द्रने उनका जन्माभिषेक करनेका विचार किया ॥१०॥ उस समय अकस्मात् सब देवोंके आसन कम्पित होने लगे थे और ऐसे मालूम होते थे मानो उन देवोंको

---

१ पूर्वदिक् । २ लब्धवती । ३ कृष्णे । ४ उत्तराषाढ़नक्षत्रे । ५ शोभमानम् । ६ प्रसन्नताम् । ७ गताः । ८ नैर्मल्यम् । ९ अताड्यमानाः । १० उत्पत्तिम् । ११ आकस्मिकात् ।

शिरांसि प्रचलन्मौलिमणीनि प्रणतिं दधुः । सुरासुरगुरोर्जन्म भावयन्तीव विस्मयात् ॥१२॥
घण्टाकण्ठीरवध्वानभेरीशङ्खाः प्रदध्वनुः । कल्पेशज्योतिषां वन्यभावनानां च वेश्मसु ॥१३॥
तेषामुच्छिन्नवेलानाम् अब्धीनामिव निःस्वनम् । श्रुत्वा बुबुधिरे जन्म विबुधा भुवनेशिनः ॥१४॥
ततः शक्राज्ञया देव पृतना[1] निर्ययुर्दिवः । तारतम्येन साध्वाना महाब्धेरिव वीचयः ॥१५॥
हस्त्यश्वरथगन्धर्वनर्त्तकीपत्तयो वृषाः । इत्यमूनि सुरेन्द्राणां महानीकानि निर्ययुः ॥१६॥
अथ सौधर्मकल्पेशो महैरावतदन्तिनम् । समारुह्य समं शच्या प्रतस्थे विबुधैर्वृतः ॥१७॥
ततः सामानिकास्त्रायस्त्रिंशाः[2] पारिषदामराः । आत्मरक्षैः समं लोकपालास्तं परिवव्रिरे ॥१८॥
दुन्दुभीनां महाध्वानैः सुराणां जयघोषणैः[3] । महानभूत्तदा ध्वानः सुरानीकेषु विस्फुरन् ॥१९॥
हसन्ति केचिन्नृत्यन्ति वल्गन्त्यास्फोटयन्त्यपि[4] । पुरो धावन्ति गायन्ति सुरास्तत्र प्रमोदिनः ॥२०॥
नभोऽङ्गणं तदा कृत्स्नम् आरुध्य त्रिदशाधिपाः । स्वैस्स्वैर्विमानैराजग्मुः वाहनैश्च [5]पृथग्विधैः ॥२१॥
तेषामापततां[6] यानविमानैराततं[7] नभः । त्रिषष्टिपटलेभ्योऽन्यत् स्वर्गान्तरमिवासृजत् ॥२२॥
नभःसरसि नाकीन्द्रदेहोद्योताच्छवारिणि । स्मेराण्यप्सरसां वक्त्राण्यातेनुः पङ्कजश्रियम् ॥२३॥

बड़े संभ्रमके साथ ऊंचे सिंहासनोंसे नीचे ही उतार रहे हों ॥११॥ जिनके मुकुटोंमें लगे हुए मणि कुछ कुछ हिल रहे हैं ऐसे देवोंके मस्तक स्वयमेव नम्रीभूत हो गये थे और ऐसे मालूम होते थे मानो बड़े आश्चर्यसे सुर असुर आदि सबके गुरु भगवान् जिनेन्द्रदेवके जन्मकी भावना ही कर रहे हों ॥१२॥ उस समय कल्पवासी, ज्योतिषी, व्यन्तर और भवनवासी देवोंके घरोंमें क्रमसे अपने आप ही घंटा, सिंहनाद, भेरी और शंखोंके शब्द होने लगे थे ॥१३॥ उठी हुई लहरोंसे शोभायमान समुद्रके समान उन बाजोंका गम्भीर शब्द सुनकर देवोंने जान लिया कि तीन लोकके स्वामी-तीर्थंकर भगवान्का जन्म हुआ है ॥१४॥ तदनन्तर महासागरकी लहरोंके समान शब्द करती हुईं देवोंकी सेनाएं इन्द्रकी आज्ञा पाकर अनुक्रमसे स्वर्गसे निकलीं ॥१५॥ हाथी, घोड़े, रथ, गन्धर्व, नृत्य करनेवाली, पियादे और बैल इस प्रकार इन्द्रकी ये सात बड़ी बड़ी सेनाएँ निकली ॥१६॥

तदनन्तर सौधर्म स्वर्गके इन्द्रने इन्द्राणी सहित बड़े भारी (एक लाख योजन विस्तृत) ऐरावत हाथीपर चढ़कर अनेक देवोंसे परिवृत हो प्रस्थान किया ॥ १७ ॥ तत्पश्चात् सामानिक, त्रायस्त्रिंश, पारिषद, आत्मरक्ष और लोकपाल जातिके देवोंने उस सौधर्म इन्द्रको चारों ओरसे घेर लिया अर्थात् उसके चारों ओर चलने लगे ॥ १८ ॥ उस समय दुन्दुभि बाजोंके गम्भीर शब्दोंसे तथा देवोंके जय जय शब्दके उच्चारणसे उस देवसेनामें बड़ा भारी कोलाहल हो रहा था ॥ १९ ॥ उस सेनामें आनन्दित हुए कितने ही देव हँस रहे थे, कितने ही नृत्य कर रहे थे, कितने ही उछल रहे थे, कितने ही विशाल शब्द कर रहे थे, कितने ही आगे दौड़ते थे, और कितने ही गाते थे ॥ २० ॥ वे सब देव-देवेन्द्र अपने अपने विमानों और पृथक् पृथक् वाहनोंपर चढ़कर समस्त आकाशरूपी आँगनको व्याप्तकर आ रहे थे ॥ २१ ॥ उन आते हुए देवोंके विमान और वाहनोंसे व्याप्त हुआ आकाश ऐसा मालूम होता था मानो तिरसठ पटलवाले स्वर्गसे भिन्न किसी दूसरे स्वर्गकी ही सृष्टि कर रहा हो ॥ २२ ॥ उस समय इन्द्रके शरीरकी कान्तिरूपी स्वच्छ जलसे भरे हुए आकाशरूपी सरोवरमें अप्सराओंके मन्द मन्द हँसते हुए मुख, कमलोंकी

---

१ अनीकिनी । २ -निकत्रायस्त्रिंशत्पारि- स०, म०, ल० । सामानिकास्त्रायस्त्रिंपारि -द०, प०, अ० । सामानिकत्रायत्रिंशपारि- ब० । ३ जयघोषकैः म०, ल० । ४ गर्जन्ति । ५ नाना-प्रकारैः । ६ आगच्छताम् । ७ व्याप्तम् ।

नभोऽम्बुधौ सुराधीशपृतनाचलवीचिके । मकरा इव संरेजुः उत्कराः सुरवारणाः ॥२४॥
क्रमादथ सुरानीकान्यम्बरादचिराद्भुवम् । अवतीर्य पुरीं प्रापुः अयोध्यां परमर्द्धिकाम्[1] ॥२५॥
तत्पुरं विष्वगावेष्ट्य तदास्थुः सुरसैनिकाः । राजाङ्गणञ्च संरुद्धम् अभूदिन्द्रैर्महोत्सवैः ॥२६॥
प्रसवागारमिन्द्राणी ततः प्राविशदुत्सवात् । तत्रापश्यत् कुमारेण सार्द्धं तां जिनमातरम् ॥२७॥
जिनमाता तदा शच्या दृष्टा सा सानुरागया । संध्ययेव हरित्प्राची[2] सङ्गता बालभानुना ॥२८॥
मुहुः प्रदक्षिणीकृत्य प्रणम्य च जगद्गुरुम् । जिनमातुः पुरः स्थित्वा श्लाघते[3] स्मेति तां शची ॥२९॥
त्वमम्ब भुवनाम्बासि कल्याणी त्वं सुमङ्गला । महादेवी त्वमेवाद्य त्वं सपुण्या यशस्विनी ॥३०॥
इत्यभिष्टुत्य गूढाङ्गी तां मायानिद्रयायुजत् । पुरो निधाय सा तस्या मायाशिशुमथापरम् ॥३१॥
जगद्गुरुं समादाय कराभ्यां सागमन्मुदम् । चूडामणिमिवोत्सर्पत्तेजसा व्याप्तविष्टपम्[4] ॥३२॥
तद्गात्रस्पर्शमासाद्य[5] सुदुर्लभमसौ तदा । मेने त्रिभुवनैश्वर्यं [6]स्वसात्कृतमिवाखिलम् ॥३३॥
मुहुस्तन्मुखमालोक्य स्पृष्ट्वाघ्राय च तद्वपुः । परां प्रीतिमसौ भेजे हर्षविस्फारितेक्षणा ॥३४॥
ततः कुमारमादाय व्रजन्ती सा बभौ भृशम् । द्यौरिवार्कमभिव्याप्तनभसं भासुरांशुभिः ॥३५॥

शोभा विस्तृत कर रहे थे ॥ २३ ॥ अथवा इन्द्रकी सेनारूपी चञ्चल लहरोंसे भरे हुए आकाशरूपी समुद्रमें ऊपरको सूँड़ किये हुए देवोंके हाथी मगरमच्छोंके समान सुशोभित हो रहे थे ॥ २४ ॥ अनन्तर वे देवोंकी सेनाएँ क्रम क्रमसे बहुत ही शीघ्र आकाशसे जमीनपर उतरकर उत्कृष्ट विभूतियोंसे शोभायमान अयोध्यापुरीमें जा पहुँची ॥ २५ ॥ देवोंके सैनिक चारों ओरसे अयोध्यापुरीको घेरकर स्थित हो गये और बड़े उत्सवके साथ आये हुए इन्द्रोंसे राजा नाभिराजका आँगन भर गया ॥ २६ ॥ तत्पश्चात् इन्द्राणीने बड़े ही उत्सवसे प्रसूतिगृहमें प्रवेश किया और वहाँ कुमारके साथ साथ जिनमाता मरुदेवीके दर्शन किये ॥२७॥ जिस प्रकार अनुराग (लाली) सहित संध्या बालसूर्यसे युक्त पूर्व दिशाको बड़े ही हर्षसे देखती है उसी प्रकार अनुराग (प्रेम) सहित इन्द्राणीने जिनबालकसे युक्त जिनमाताको बड़े ही प्रेमसे देखा था ॥२८॥ इन्द्राणीने वहाँ जाकर पहले कई बार प्रदक्षिणा दी फिर जगत्के गुरु जिनेन्द्रदेवको नमस्कार किया और फिर जिन माताके सामने खड़े होकर इस प्रकार स्तुति की ॥ २९ ॥ कि हे माता, तू तीनों लोकोंकी कल्याणकारिणी माता है, तू ही मंगल करनेवाली है, तू ही महादेवी है, तू ही पुण्यवती है और तू ही यशस्विनी है ॥ ३० ॥ जिसने अपने शरीरको गुप्त कर रखा है ऐसी इन्द्राणीने ऊपर लिखे अनुसार जिनमाताकी स्तुति कर उसे मायामयी नींदसे युक्त कर दिया। तदनन्तर उसके आगे मायामयी दूसरा बालक रखकर शरीरसे निकलते हुए तेजके द्वारा लोकको व्याप्त करनेवाले चूडामणि रत्नके समान जगद्गुरु जिनबालकको दोनों हाथोंसे उठाकर वह परम आनन्दको प्राप्त हुई ॥ ३१-३२ ॥ उस समय अत्यन्त दुर्लभ भगवान्के शरीरका स्पर्श पाकर इन्द्राणीने ऐसा माना था मानो मैंने तीनों लोकोंका समस्त ऐश्वर्य ही अपने आधीन कर लिया हो ॥ ३३ ॥ वह इन्द्राणी बार बार उनका मुख देखती थी, बार बार उनके शरीरका स्पर्श करती थी और बार बार उनके शरीरको सूँघती थी जिससे उसके नेत्र हर्षसे प्रफुल्लित हो गये थे और वह उत्कृष्ट प्रीतिको प्राप्त हुई थी ॥ ३४ ॥ तदनन्तर जिनबालकको लेकर जाती हुई वह इन्द्राणी ऐसी सुशोभित हो रही थी मानो अपनी देदीप्यमान किरणोंसे आकाशको व्याप्त करनेवाले सूर्यको

---

१ परमर्द्धिनीम् । २ दिक् । ३ स्तौति स्म । ४ भुवनम् । ५ प्राप्य । ६ स्वाधीनम् ।

तदा मङ्गलधारिण्यो दिक्कुमार्यः पुरो ययुः । त्रिजगन्मङ्गलस्यास्य समृद्धय इवोच्छिखाः[1] ॥३६॥
छत्रं ध्वजं सकलशं चामरं सुप्रतिष्ठकम् । भृङ्गारं दर्पणं तालम्[2] इत्याहुर्मङ्गलाष्टकम् ॥३७॥
स तदा मङ्गलानाञ्च मङ्गलत्वं परं वहन् । स्वदीप्त्या दीपिकालोकान्[3] अरुणत्[4] तरुणांशुमान् ॥३८॥
ततः करतले देवी देवराजस्य तं न्यधात् । बालार्कमौदये[5] सानौ प्राचीव प्रस्फुरन्मणौ ॥३९॥
गीर्वाणेन्द्रस्तमिन्द्राण्याः करादादाय सादरम् । व्यलोकयत स तद्रूपं सम्प्रीतिस्फारितेक्षणः ॥४०॥
त्वं देव जगतां ज्योतिः त्वं देव जगतां गुरुः । त्वं देव जगतां धाता त्वं देव जगतां पतिः ॥४१॥
त्वामामनन्ति[6] सुधियः केवलज्ञानभास्वतः[7] । उदयाद्रिं मुनीन्द्राणाम् अभिवन्द्यं महोन्नतिम् ॥४२॥
त्वया जगदिदं मिथ्याज्ञानान्धतमसावृतम् । प्रबोधं नेष्यते भव्यकमलाकरबन्धुना ॥४३॥
तुभ्यं नमोऽधिगुरवे नमस्तुभ्यं महाधिये । तुभ्यं नमोऽस्तु भव्याब्जबन्धवे गुणसिन्धवे ॥४४॥
त्वत्तः प्रबोधमिच्छन्तः प्रबुद्धभुवनत्रयात् । तव पादाम्बुजं देव मूर्ध्ना दध्मो धृतादरम् ॥४५॥
त्वयि प्रणयमाधत्ते मुक्तिलक्ष्मीः समुत्सुका । त्वयि सर्वे गुणाः स्फातिं[8] यान्त्यब्धौ मणयो यथा ॥४६॥

लेकर जाता हुआ आकाश ही सुशोभित हो रहा है ॥ ३५ ॥ उस समय तीनों लोकोंमें मंगल करनेवाले भगवान्के आगे आगे अष्ट मंगलद्रव्य धारण करनेवाली दिक्कुमारी देवियाँ चल रही थीं और ऐसी जान पड़ती थीं मानो इकट्ठी हुई भगवान्की उत्तम ऋद्धियाँ ही हों ॥३६॥ छत्र, ध्वजा, कलश, चमर, सुप्रतिष्ठक (मोंदरा-ठोना), झारी, दर्पण और ताड़का पखा ये आठ मगलद्रव्य कहलाते हैं ॥ ३७ ॥ उस समय मंगलोंमें भी मंगलपनेको प्राप्त करानेवाले और तरुण सूर्यके समान शोभायमान भगवान् अपनी दीप्तिसे दीपकोंके प्रकाशको रोक रहे थे । भावार्थ—भगवान्के शरीरकी दीप्तिके सामने दीपकोंका प्रकाश नहीं फैल रहा था ॥ ३८ ॥ तत्पश्चात् जिस प्रकार पूर्व दिशा प्रकाशमान मणियोंसे सुशोभित उदयाचलके शिखरपर बाल सूर्यको विराजमान कर देती है उसी प्रकार इन्द्राणीने जिनबालकको इन्द्रकी हथेलीपर विराजमान कर दिया ॥ ३९ ॥ इन्द्र आदर सहित इन्द्राणीके हाथसे भगवान्को लेकर हर्षसे नेत्रोंको प्रफुल्लित करता हुआ उनका सुंदर रूप देखने लगा ॥ ४० ॥ तथा नीचे लिखे अनुसार उनकी स्तुति करने लगा—हे देव, आप तीनों जगत्की ज्योति हैं; हे देव, आप तीनों जगत्के गुरु हैं; हे देव, आप तीनों जगत्के विधाता हैं और हे देव, आप तीनों जगत्के स्वामी हैं ॥४१॥ हे नाथ, विद्वान् लोग, केवलज्ञानरूपी सूर्यका उदय होनेके लिये आपको ही बड़े बड़े मुनियोंके द्वारा वन्दनीय और अतिशय उन्नत उदयाचल पर्वत मानते हैं ॥४२॥ हे नाथ, आप भव्य जीवरूपी कमलोंके समूहको विकसित करनेके लिये सूर्यके समान हैं । मिथ्या ज्ञानरूपी गाढ़ अन्धकारसे ढका हुआ यह संसार अब आपके द्वारा ही प्रबोधको प्राप्त होगा ॥४३॥ हे नाथ, आप गुरुओंके भी गुरु हैं इसलिये आपको नमस्कार हो, आप महा-बुद्धिमान् हैं इसलिये आपको नमस्कार हो, आप भव्य जीवरूपी कमलोंको विकसित करनेके लिये सूर्यके समान हैं और गुणोंके समुद्र हैं इसलिये आपको नमस्कार हो ॥४४॥ हे भगवन्, आपने तीनों लोकोंको जान लिया है इसलिये आपसे ज्ञान प्राप्त करनेकी इच्छा करते हुए हम लोग आपके चरणकमलोंको बड़े आदरसे अपने मस्तकपर धारण करते हैं ॥४५॥ हे नाथ, मुक्तिरूपी लक्ष्मी उत्कण्ठित होकर आपमें स्नेह रखती है और जिस प्रकार समुद्रमें

---

१ इवोच्छ्रिताः अ०, स०, द०, ल० । २ तालवृन्तकम् । ३ दीपप्रकाशान् । ४ छादयति स्म । ५ उदयाद्रिसम्बन्धिनि । ६ वदन्ति । ७ सूर्यस्य । ८ वृद्धिम् 'स्फायैङ् वृद्धौ' इति धातोः क्तिः । स्फीति प०, अ०, द०, स०, द० ।

स्तुत्वेति स तमारोप्य स्वमङ्कं सुरनायकः । हस्तमुच्चालयामास मेरुप्रस्थान[1]संभ्रमी ॥४७॥
जयेश नन्द वर्द्धस्व त्वमित्युच्चैर्गिरः सुराः । तदा कलकलं चक्रुः बधिरीकृतदिङ्मुखम् ॥४८॥
नभोऽङ्गणमथोत्पेतुः उच्चरज्जयघोषणाः । सुरचापानि तन्वन्तः प्रसरद्भूषणांशुभिः ॥४९॥
गन्धर्वारब्धसङ्गीता नेटुरप्सरसः पुरः । भ्रूपताका समुत्क्षिप्य नभोरङ्गे चलत्कुचाः ॥५०॥
इतोऽमुतः समाकीर्णं विमानैर्द्युसदां नभः । सरत्नैरुन्मिषन्नेत्रमिव[2] रेजे विनिर्मलम् ॥५१॥
सिताः पयोधरा नीलैः करीन्द्रैः सितकेतनैः । सबलाकैर्विनीलाभ्रैः सङ्गता इव रेजिरे ॥५२॥
महाविमानसंघट्टैः [3]क्षुण्णा जलधराः क्वचित् । [4]प्रणेशुर्महतां रोधात् नश्यन्त्येव जलात्मकाः[5] ॥५३॥
सुरेभकटदानाम्बुगन्धाकृष्टमधुव्रता । [6]वनाभोगान् जहुर्लोकः सत्यमेव नवप्रियः ॥५४॥
अङ्गभाभिः[7] सुरेन्द्राणां तेजोऽर्कस्य पराहतम्[8] । [9]विलिल्ये क्वाप्यविज्ञातं लज्जामिव परां गतम् ॥५५॥
दिवाकरकराश्लेष[10] विघट्य[11] सुरेशिनाम् । देहोद्योता[12] दिशो भेजुः भोग्या हि बलिनां स्त्रियः ॥५६॥

मणि बढ़ते रहते हैं उसी प्रकार आपमें अनेक गुण बढ़ते रहते हैं ॥४६॥ इस प्रकार देवोंके अधिपति इन्द्रने स्तुति कर भगवान्‌को अपनी गोदमें धारण किया और मेरु पर्वत पर चलनेकी शीघ्रतासे इशारा करनेके लिये अपना हाथ ऊँचा उठाया ॥ ४७ ॥ हे ईश ! आपकी जय हो, आप समृद्धिमान् हों और आप सदा बढ़ते रहें इस प्रकार जोर जोरसे कहते हुए देवोंने उस समय इतना अधिक कोलाहल किया था कि उससे समस्त दिशाएँ बहरी हो गई थीं ॥४८॥ तदनन्तर जय जय शब्दका उच्चारण करते हुए और अपने [illegible] फैलती हुई किरणोंसे इन्द्रधनुषको विस्तृत करते हुए देव लोग आकाशरूपी आंगनमें ऊपरकी ओर चलने लगे ॥४९॥ उस समय जिनके स्तन कुछ कुछ हिल रहे हैं ऐसी अप्सराएं अपनी भौंहरूपी पताकाएँ ऊपर उठाकर आकाशरूपी रंगभूमिमें सबके आगे नृत्य कर रही थीं और गन्धर्वदेव उनके साथ अपना संगीत प्रारम्भ कर रहे थे ॥५०॥ रत्न-खचित देवोंके विमानोंसे जहाँ तहाँ सभी ओर व्याप्त हुआ निर्मल आकाश ऐसा शोभायमान होता था मानो भगवान्‌के दर्शन करनेके लिये उसने अपने नेत्र ही खोल रखे हों ॥५१॥ उस समय सफेद बादल सफेद पताकाओं सहित काले हाथियोंसे मिलकर ऐसे शोभायमान हो रहे थे मानो बगुला पक्षियों सहित काले काले बादलोंसे मिल रहे हों ॥५२॥ कहीं कहीं पर अनेक मेघ देवोंके बड़े बड़े विमानोंकी टक्करसे चूर चूर होकर नष्ट हो गये थे सो ठीक ही है; क्योंकि जो जड़ (जल और मूर्ख) रूप होकर भी बड़ोंसे वैर रखते हैं वे नष्ट होते ही है ॥५३॥ देवोंके हाथियोंके गण्डस्थलसे झरनेवाले मदकी सुगन्धसे आकृष्ट हुए भौंरोंने वनके प्रदेशोंको छोड़ दिया था सो ठीक है क्योंकि यह कहावत सत्य है कि लोग नवप्रिय होते हैं— उन्हें नई नई वस्तु अच्छी लगती है ॥५४॥ उस समय इन्द्रोंके शरीरकी प्रभासे सूर्यका तेज पराहत हो गया था— फीका पड़ गया था इसलिये ऐसा जान पड़ता था मानो लज्जाको प्राप्त होकर चुपचाप कहींपर जा छिपा हो ॥५५॥ पहले सूर्य अपने किरणरूपी हाथोंके द्वारा दिशारूपी अंगनाओंका आलिंगन किया करता था, किन्तु उस समय इन्द्रोंके शरीरोंका उद्योत सूर्यके उस आलिंगनको छुड़ाकर स्वयं दिशारूपी अंगनाओंके समीप जा पहुंचा था, सो ठीक ही है स्त्रियाँ बलवान् पुरुषोंके ही भोग्य होती हैं। भावार्थ— इन्द्रोंके शरीरकी कान्ति सूर्यकी

---

१ गमन। 'प्रस्थानं गमनं गमः' इत्यमरः। २ विवृतचक्षुरिव। ३ मर्दिताः। ४ नष्टाः। ५ जडात्मकाः ल०। ६ वनभोगा— अ०। वनविस्तारान्। 'आभोगः परिपूर्णता' इत्यमरः। ७ अङ्गनाभिः। ८ पराभूतम्। ९ निलीनमभूत्। १० आश्लेषम् आलिङ्गनम्। ११ मोचयित्वा। १२ उद्योता दीप्तयः।

सुरेभरदनोद्भूतसरोम्बुजदलाश्रितम् । नृत्तमप्सरसां देवान् अकरोद् रसिकान् भृशम् ॥५७॥
शृण्वन्तः कलगीतानि किन्नराणां जिनेशिनः । गुणैर्विरचितान्यापुः अमराः कर्णयोः फलम् ॥५८॥
वपुर्भगवतो दिव्यं पश्यन्तोऽनिमिषेक्षणाः । नेत्रयोरनिमेषाप्तौ[1] फलं प्रापुस्तदामराः ॥५९॥
स्वाङ्कारोपं सितच्छत्रधृतिं चामरधूननम् । कुर्वन्तः स्वयमेवेन्द्राः [2]प्राहुरस्य स्म वैभवम् ॥६०॥
सौधर्माधिपतेरङ्कम् अध्यासीनमधीशिनम् । भेजे सितातपत्रेण तदैशानसुरेश्वरः ॥६१॥
सनत्कुमारमाहेन्द्रनायकौ धर्मनायकम् । चामरैस्तं व्यधुन्वातां [3]बहुक्षीराब्धिवीचिभिः ॥६२॥
दृष्ट्वा तदातनीं[4] भूतिं[5] कुदृष्टिमरुतो[6] परे । सन्मार्गरुचिमातेनुः [7]इन्द्रप्रामाण्यमास्थिताः ॥६३॥
कृतं सोपानमामेरोः इन्द्रनीलैर्व्यराजत । भक्त्या खमेव सोपानपरिणाम[8]मिवाश्रितम् ॥६४॥
ज्योतिःपटलमुल्लङ्घ्य प्रययुः सुरनायकाः । अधस्तारकितां[9] वीथिं मन्यमानाः कुमुद्वतीम्[10] ॥६५॥
ततः प्रापुः सुराधीशा गिरिराज तमुच्छ्रितम् । योजनानां सहस्राणि नवतिं च नवैव च ॥६६॥
[11]मकुटश्रीरिवाभाति चूलिका यस्य मूर्द्धनि । चूडारत्नश्रियं धत्ते [12]यस्यामृतु[13] विमानकम् ॥६७॥

कान्तिको फीका कर समस्त दिशाओंमें फैल गई थी ॥५६॥ ऐरावत हाथीके दाँतोंपर बने हुए सरोवरोंमें कमलदलोंपर जो अप्सराओंका नृत्य हो रहा था वह देवोंको भी अतिशय रसिक बना रहा था ॥५७॥ उस समय जिनेन्द्रदेवके गुणोंसे रचे हुए किन्नर देवोंके मधुर संगीत सुनकर देव लोग अपने कानोंका फल प्राप्त कर रहे थे—उन्हें सफल बना रहे थे ॥ ५८ ॥ उस समय टिमकार-रहित नेत्रोंसे भगवान्का दिव्य शरीर देखनेवाले देवोंने अपने नेत्रोंके टिमकाररहित होनेका फल प्राप्त किया था। भावार्थ—देवोंकी आँखोंके कभी पलक नहीं झपते। इसलिये देवोंने बिना पलक झपाये ही भगवान्के सुन्दर शरीरके दर्शन किये थे। देव भगवान्के सुन्दर शरीरको पलक झपाये बिना ही देख सके थे यही मानो उनके वैसे नेत्रोंका फल था—भगवान्का सुन्दर शरीर देखनेके लिये ही मानो विधाताने उनके नेत्रोंको पलकस्पन्द—टिमकार-रहित बनाया था ॥ ५९ ॥ जिनबालकको गोदमें लेना, उनपर सफेद छत्र धारण करना और चमर ढोलना आदि सभी कार्य स्वयं अपने हाथसे करते हुए इन्द्र लोग भगवान्के अलौकिक ऐश्वर्यको प्रकट कर रहे थे ॥ ६० ॥ उस समय भगवान्, सौधर्म इन्द्रकी गोदमें बैठे हुए थे, ऐशान इन्द्र सफेद छत्र लगाकर उनकी सेवा कर रहा था और सनत्कुमार तथा माहेन्द्र स्वर्गके इन्द्र उनकी दोनों ओर क्षीरसागरकी लहरोंके समान सफेद चमर ढोल रहे थे ॥ ६१–६२ ॥ उस समयकी विभूति देखकर कितने ही अन्य मिथ्यादृष्टि देव इन्द्रको प्रमाण मानकर समीचीन जैनमार्गमें श्रद्धा करने लगे थे ॥ ६३ ॥ मेरु पर्वत पर्यन्त नील मणियोंसे बनाई हुई सीढ़ियां ऐसी शोभायमान हो रही थीं मानो आकाश ही भक्तिसे सीढ़ी रूप पर्यायको प्राप्त हुआ हो ॥ ६४ ॥ क्रम क्रमसे वे इन्द्र ज्योतिष-पटलको उल्लंघन कर ऊपरकी ओर जाने लगे। उस समय वे नीचे ताराओं सहित आकाशको ऐसा मानते थे मानो कुमुदिनियों सहित सरोवर ही हो ॥ ६५ ॥ तत्पश्चात् वे इन्द्र निन्यानबे हजार योजन ऊंचे उस सुमेरु पर्वत पर जा पहुँचे ॥ ६६ ॥ जिसके मस्तक पर स्थित चूलिका मुकुटके समान सुशोभित होती है और

---

१ प्राप्तौ। २ ब्रुवन्ति स्म। ३ क्षीराब्धिवीचिसदृशैः। ४ तत्कालभवाम्। ५ सम्पदम्। ६ देवाः। ७ इन्द्रैर्विश्वासं गताः। ८ परिणमनम्। ९ सञ्जाततारकाम्। १० कुमुदानि प्रचुराणि यस्यां सन्तीति कुमुद्वती। ११ मुकुट– प०, अ०, द०, ल०। १२ चूलिकायाम्। १३ –मृजु– प०, अ०, स०, म०, ल०।

यो धत्ते स्वनितम्बेन भद्रशालवनं महत् । [1]परिधानमिवालीनं घनच्छायैर्महाद्रुमैः ॥६८॥
मेखलायामथाद्यायां [2]बिभर्त्ति नन्दनं वनम् । यः[3] कटीसूत्रदामेव[4] नानारत्नमयाङ्घ्रिपम् ॥६९॥
यश्च सौमनसोद्यानं बिभर्त्ति शुकसच्छवि । सपुष्पमुपसंव्यान[5]मिवोल्लसितपल्लवम् ॥७०॥
यस्यालङ्कुरुते कूट[6]पर्यन्तं पाण्डुकं वनम् । आहूतमधुपैः पुष्पैः दधानं शेखरश्रियम् ॥७१॥
यस्मिन् प्रतिवने[7] दिक्षु चैत्यवेश्मानि भान्त्यलम् । हसन्तीव द्युसद्मानि [8]प्रोन्मिषन्मणिदीप्तिभिः ॥७२॥
हिरण्मयः समुत्तुङ्गो धत्ते यो मौलिविभ्रमम् । जम्बूद्वीपमहीभर्त्तुः लवणाम्भोधिवाससः ॥७३॥
ज्योतिर्गणश्च सातत्यात्[9] यं पर्येति[10] महोदयम् । पुण्याभिषेकसंभारैः[11] पवित्रीकृतमर्हताम् ॥७४॥
आराधयन्ति यं नित्यं चारणाः पुण्यवाञ्छया । विद्याधराश्च मुदिता जिनेन्द्रमिव सून्नतम् ॥७५॥
देवोत्तरकुरून् यश्च स्वपादगिरिभिः[12] सदा । आवृत्य पाति निर्बाधं तद्धि माहात्म्यमुन्नतेः ॥७६॥
यस्य कन्दरभागेषु निवसन्ति सुरासुराः । साङ्गनाः स्वर्गमुत्सृज्य नाकशोभापहासिषु ॥७७॥
यः पाण्डुकवनोद्देशे शुचीः स्फटिकनिर्मिताः । शिला बिभर्त्ति तीर्थेशाम् अभिषेकक्रियोचिताः ॥७८॥

जिसके ऊपर सौधर्म स्वर्गका ऋजुविमान चूड़ामणिकी शोभा धारण करता है ॥ ६७ ॥ जो अपने नितम्ब भाग पर (मध्यभाग पर) घनी छायावाले बड़े बड़े वृक्षोंसे व्याप्त भद्रशाल नामक महावनको ऐसा धारण करता है मानो हरे रंगकी धोती ही धारण किये हो ॥६८॥ उससे आगे चलकर अपनी पहली मेखला पर जो अनेक रत्नमयी वृक्षोंसे सुशोभित नन्दन वनको ऐसा धारण कर रहा है मानो उसकी करधनी ही हो ॥ ६९ ॥ जो पुष्प और पल्लवोंसे शोभायमान हरे रंगके सौमनस वनको ऐसा धारण करता है मानो उसका ओढ़नेका दुपट्टा ही हो ॥ ७० ॥ अपनी सुगन्धिसे भौंरोंको बुलानेवाले फूलोंके द्वारा मुकुटकी शोभा धारण करता हुआ पाण्डुक वन जिसके शिखर पर्यन्तके भागको सदा अलंकृत करता रहता है ॥ ७१ ॥ इस प्रकार जिसके चारों वनोंकी प्रत्येक दिशामें एक एक जिनमन्दिर चमकते हुए मणियोंकी कान्तिसे ऐसे सुशोभित हो रहे है मानो स्वर्गके विमानोंकी हँसी ही कर रहे हों ॥ ७२ ॥ जो पर्वत सुवर्णमय है और बहुत ही ऊंचा है इसलिये जो लवणसमुद्ररूपी वस्त्र पहिने हुए जम्बूद्वीपरूपी महाराजके सुवर्णमय मुकुटका संदेह पैदा करता रहता है ॥ ७३ ॥ जो तीर्थंकर भगवान्‌के पवित्र अभिषेककी सामग्री धारण करनेसे सदा पवित्र रहता है और अतिशय ऊँचा अथवा समृद्धिशाली है इसीलिये मानो ज्योतिषी देवोंका समूह सदा जिसकी प्रदक्षिणा दिया करता है ॥७४॥ जो पर्वत जिनेन्द्रदेवके समान अत्यन्त उन्नत (श्रेष्ठ और ऊँचा) है इसीलिये अनेक चारण मुनि हर्षित होकर पुण्य प्राप्त करनेकी इच्छासे सदा जिसकी सेवा किया करते हैं ॥७५॥ जो देवकुरु उत्तर कुरु भोगभूमियोंको अपने समीपवर्ती पर्वतोंसे घेरकर सदा निर्बाध रूपसे उनकी रक्षा किया करता है सो ठीक ही है क्योंकि उत्कृष्टताका यही माहात्म्य है ॥ ७६ ॥ स्वर्गलोककी शोभाकी हँसी करनेवाली जिस पर्वतकी गुफाओंमें देव और धरणेन्द्र स्वर्ग छोड़कर अपनी स्त्रियोंके साथ निवास किया करते हैं ॥ ७७ ॥ जो पांडुकवनके स्थानोंमें स्फटिक मणिकी बनी हुई और तीर्थंकरोंके अभिषेक

---

१ अधोंशुकम् । 'परिधानान्यधोंशुके' इत्यभिधानात् । २ बिभृते अ०, स०, द०, म० । बिभ्रते ल० । ३ यत्कटी- अ०, स०, द० । ४ काञ्चीदाम । ५ उत्तरीयवसनम् । -संख्यान- ल० । ६ चूलिकापर्यन्तभूमिम् । ७ प्रतिवनं द०, स० । ८ दीप्यमान । ९ सततमेव सातत्यं तस्मात् । १० प्रदक्षिणीकरोति । ११ समूहैः । १२ गजदन्तपर्वतैः ।

यस्तुङ्गो विबुधाराध्यः सततर्तुसमाश्रयः[1] । सौधर्मेन्द्र इवाभाति संसेव्योऽप्सरसां[2] गणैः ॥७९॥
तमासाद्य सुराः प्रापुः प्रीतिमुन्नतिशालिनम् । रामणीयकसंभूतिं[3] स्वर्गस्याधिदेवताम्[4] ॥८०॥
ततः परीत्य तं प्रीत्या सुरराजः सुरैः समम् । गिरिराजं जिनेन्द्रार्कं मूर्द्धन्यस्य न्य[5]धान्मुदा ॥८१॥
तस्य प्रागुत्तराशायां[6] महती पाण्डुकाह्वया । शिलास्ति जिननाथानाम् अभिषेकं बिभर्त्ति या ॥८२॥
शुचिः सुरभिरत्यन्तरामणीया[7] मनोहरा । पृथिवीवाष्टमी भाति या युक्तपरिमण्डला[8] ॥८३॥
शतायता[9] तदर्द्धं च विस्तीर्णाष्टोच्छ्रिता[10] मता । जिनैर्योजनमानेन सा शिलार्द्धेन्दुसंस्थितिः[11] ॥८४॥
क्षीरोदवारिभिर्भूयः क्षालिता या सुरोत्तमैः । शुचित्वस्य परां[12] काष्ठां सबिभर्त्ति सदोज्ज्वला ॥८५॥
शुचित्वान्महनीयत्वात् पवित्रत्वाच्च[13] भाति या । धारणाच्च जिनेन्द्राणां जिनमातेव निर्मला ॥८६॥
यस्यां पुष्पोपहारश्रीः [14]व्यज्यते जातु नाञ्जसा । [15]सावर्ण्यादमरोन्मुक्त[16]व्यक्तमुक्ताफलच्छविः ॥८७॥

क्रियाके योग्य निर्मल पाण्डुक शिलाओंको धारण कर रहा है ॥ ७८ ॥ और जो मेरु पर्वत सौधर्मेन्द्रके समान शोभायमान होता है क्योंकि जिस प्रकार सौधर्मेन्द्र तुङ्ग अर्थात् श्रेष्ठ अथवा उदार है उसी प्रकार वह सुमेरु पर्वत भी तुङ्ग अर्थात् ऊंचा है, सौधर्मेन्द्रकी जिस प्रकार अनेक विबुध (देव) सेवा किया करते हैं उसी प्रकार मेरु पर्वतकी भी अनेक देव अथवा विद्वान् सेवा किया करते हैं, सौधर्मेन्द्र जिस प्रकार सत तर्तुसमाश्रय अर्थात् हमेशा ऋतु विमानमें रहनेवाला है उसी प्रकार सुमेरु पर्वत भी सत तर्तुसमाश्रय अर्थात् ऋतुविमानका आधार अथवा छहों ऋतुओंका आश्रय है और सौधर्मेन्द्र जिस प्रकार अनेक अप्सराओंके समूहसे सेवनीय है उसी प्रकार सुमेरु पर्वत भी अप्सराओं अथवा जलसे भरे हुए सरोवरोंसे शोभायमान है ॥७९॥ इस प्रकार जो ऊंचाईसे शोभायमान है, सुन्दरताकी खानि है और स्वर्गका मानो अधिष्ठाता देव ही है ऐसे उस सुमेरु पर्वतको पाकर देव लोग बहुत ही प्रसन्न हुए ॥ ८० ॥

तदनन्तर इन्द्रने बड़े प्रेमसे देवोंके साथ साथ उस गिरिराज सुमेरु पर्वतकी प्रदक्षिणा देकर उसके मस्तकपर हर्षपूर्वक श्रीजिनेन्द्ररूपी सूर्यको विराजमान किया ॥ ८१ ॥ उस मेरु पर्वतके पाण्डुक वनमें पूर्व और उत्तर दिशाके बीच अर्थात् ऐशान दिशामें एक बड़ी भारी पाण्डुक नामकी शिला है जो कि तीर्थंकर भगवान्के जन्माभिषेकको धारण करती है अर्थात् जिसपर तीर्थंकरोंका अभिषेक हुआ करता है ॥ ८२ ॥ वह शिला अत्यन्त पवित्र है, मनोज्ञ है, रमणीय है, मनोहर है, गोल है और अष्टमी पृथिवी-सिद्धि शिलाके समान शोभायमान है ॥८३॥ वह शिला सौ योजन लम्बी है, पचास योजन चौड़ी है, आठ योजन ऊँची है और अर्ध चन्द्रमाके समान आकारवाली है ऐसा जिनेन्द्रदेवने माना है—कहा है ॥ ८४ ॥ वह पाण्डुक शिला सदा निर्मल रहती है। उसपर इन्द्रोंने क्षीरसमुद्रके जलसे उसका कई बार प्रक्षालन किया है इसलिये वह पवित्रताकी चरम सीमाको धारण कर रही है ॥ ८५ ॥ निर्मलता, पूज्यता, पवित्रता और जिनेन्द्रदेवको धारण करनेकी अपेक्षा वह पाण्डुक शिला जिनेन्द्रदेवकी माताके समान शोभायमान होती है ॥ ८६ ॥ वह शिला देवोंके द्वारा ऊपरसे छोड़े हुए मुक्ताफलोंके समान उज्ज्वल कान्तिवाली है और देव लोग जो उसपर पुष्प चढ़ाते हैं वे सदृशताके कारण उसीमें छिप

---

१ सततं षड्ऋतुसमाश्रयः । २ जलभरितसरोवरसमूहैः । पक्षे स्वर्वेश्यासमूहैः । ३ उत्पत्तिम् । ४ —दैवतम् प०, म०, स०, द० । स्वर्गस्येवाधिदैवतम् ल० । ५ स्थापयति स्म । ६ ऐशान्यां दिशि । ७ —रमणीया ब०, प०, अ०, द०, स० । ८ योग्यपरिधिः । ९ शतयोजनदैर्घ्या । १० —ष्टोच्छ्रया स० । ११ सस्थानम् । [आकार इत्यर्थः] । १२ परमोत्कर्षम् । १३ पवित्रं करोतीति पवित्रा तस्य भावः । १४ प्रकटीक्रियते । १५ समानवर्णत्वात् । १६ —मुक्ताव्यक्तफलच्छविः ।

जिनानामभिषेकाय या धत्ते सिंहविष्टरम् । मेरोरिवोपरि परं परार्ध्यं मेरुमुच्चकैः ॥८८॥
तत्पर्यन्ते[1] च या धत्ते सुस्थिते दिव्यविष्टरे । [2]जिनाभिषेचने क्लृप्ते सौधर्मैशाननाथयोः ॥८९॥
नित्योपहाररुचिरा सुरैर्नित्यं कृतार्च्चना । नित्यमङ्गलसङ्गीतनृत्तवादित्रशोभिनी ॥९०॥
छत्रचामरभृङ्गारसुप्रतिष्ठकदर्पणम्[3] । कलशध्वजतालानि[4] मङ्गलानि बिभर्त्ति या ॥९१॥
यामला शीलमालेव मुनीनामभिसम्मता । जैनी तनुरिवात्यन्तभास्वरा सुरभिश्शुचिः ॥९२॥
स्वयं धौतापि[5] या धौता[6] शतशः सुरनायकैः । क्षीरार्णवाम्बुभिः पुण्यैः पुण्यस्येवाकरक्षितिः ॥९३॥
यस्याः पर्यन्तदेशेषु [7]रत्नालोकैर्वितन्यते । परितः सुरचापश्रीः अन्योऽन्यव्यतिषङ्गिभिः[8] ॥९४॥
तामावेष्ट्य सुरास्तस्थुः यथास्वं[9] दिक्ष्वनुक्रमात् । द्रष्टुकामा जिनस्यामूं जन्मकल्याणसम्पदम् ॥९५॥
दिक्पालाश्च यथायोग्यदिग्विदिग्भागसंश्रिताः[10] । तिष्ठन्ति स्म निकायैस्स्वैः जिनोत्सवदिदृक्षया ॥९६॥
गगनाङ्गणमारुध्य[11] व्याप्य[12] मेरोरधित्यकाम्[13] । निवेशः सुरसैन्यानाम् अभवत् पाण्डुके वने ॥९७॥
पाण्डुकं वनमारुद्धं समन्तात्सुरनायकैः । जहासेव दिवो लक्ष्मीं क्ष्मारुहां कुसुमोत्करैः ॥९८॥

जाते हैं—पृथक् रूपसे कभी भी प्रकट नहीं दिखते ॥ ८७ ॥ वह पाण्डुकशिला जिनेन्द्रदेवके अभिषेकके लिये सदा बहुमूल्य और श्रेष्ठ सिंहासन धारण किये रहती है जिससे ऐसा जान पड़ता है मानो मेरु पर्वतके ऊपर दूसरा मेरु पर्वत ही रखा हो ॥ ८८ ॥ वह शिला उस मुख्य सिंहासनके दोनों ओर रखे हुए दो सुन्दर आसनोंको और भी धारण किये हुए है। वे दोनों आसन जिनेन्द्रदेवका अभिषेक करनेके लिये सौधर्म और ऐशान इन्द्रके लिये निश्चित रहते हैं ॥ ८९ ॥ देव लोग सदा उस पाण्डुक शिलाकी पूजा करते हैं, वह देवों द्वारा चढ़ाई हुई सामग्रीसे निरन्तर मनोहर रहती है और नित्य ही मंगलमय संगीत, नृत्य, वादित्र आदिसे शोभायमान रहती है ॥ ९० ॥ वह शिला, छत्र, चमर, झारी, ठोना (मोंदरा), दर्पण, कलश, ध्वजा और ताड़का पंखा इन आठ मंगल द्रव्योंको धारण किये हुई है ॥९१॥ वह निर्मल पाण्डुक शिला शीलव्रतकी परम्पराके समान मुनियोंको बहुत ही इष्ट है और जिनेन्द्रदेवके शरीरके समान अत्यन्त देदीप्यमान, मनोज्ञ अथवा सुगन्धित और पवित्र है ॥९२॥ यद्यपि वह पाण्डुक शिला स्वयं धौत है अर्थात् श्वेतवर्ण अथवा उज्ज्वल है तथापि इन्द्रोंने क्षीरसागरके पवित्र जलसे उसका सैकड़ों बार प्रक्षालन किया है। वास्तवमें वह शिला पुण्य उत्पन्न करनेके लिये खानकी भूमिके समान है ॥ ९३ ॥ उस शिलाके समीपवर्ती प्रदेशोंमें चारों ओर परस्परमें मिले हुए रत्नोंके प्रकाशसे इन्द्रधनुषकी शोभाका विस्तार किया जाता है ॥ ९४ ॥ जिनेन्द्र देवके जन्म कल्याणककी विभूतिको देखनेके अभिलाषी देव लोग उस पाण्डुक शिलाको घेरकर सभी दिशाओंमें क्रम क्रमसे यथायोग्य रूपमें बैठ गये ॥ ९५ ॥ दिक्पाल जातिके देव भी अपने अपने समूह (परिवार) के साथ जिनेन्द्र भगवान्का उत्सव देखनेकी इच्छासे दिशा-विदिशामें जाकर यथायोग्य रूपसे बैठ गये ॥ ९६ ॥ देवोंकी सेना भी उस पाण्डुक वनमें आकाशरूपी आँगनको रोककर मेरु पर्वतके ऊपरी भागमें व्याप्त होकर जा ठहरी ॥ ९७ ॥ इस प्रकार चारो ओरसे देव और इन्द्रोंसे व्याप्त हुआ वह पाण्डुकवन ऐसा मालूम होता था मानो वृक्षोंके फूलोंके समूह स्वर्गकी शोभाकी हँसी ही उड़ा रहा हो ॥९८॥

---

१ तदुभयपार्श्वयोः । २ जिनाभिषेकाय । हेतौ 'कर्मणा' इति सूत्रात् । ३ –दर्पणात् द०, स० । ४ तालवृन्त । ५ शुभ्रा शुद्धा च । ६ क्षालिता । ७ रत्नोद्योतैः । ८ परस्परसंयुक्तैः । ९ यथास्थानम् । १० –माश्रिताः प०, द० । ११ –मारुध्य प० । १२ वाप्य स० । १३ ऊर्ध्वभूमिम् ।

स्वस्थानाच्चलितः स्वर्गः सत्यमुद्वासित[1]स्तदा । मेरुस्तु स्वर्गतां प्राप धृतनाकेशवैभवः ॥९९॥
ततोऽभिषेचनं भर्त्तुः कर्त्तुमिन्द्रः प्रचक्रमे । निवेश्याधिशिलं सैंहे विष्टरे प्राङ्मुखं प्रभुम् ॥१००॥
नभोऽशेषं तदापूर्य सुरदुन्दुभयोऽध्वनन् । समन्तात् सुरनारीभिः आरेभे नृत्यमूर्जितम् ॥१०१॥
महान् कालागुरूद्दाम[2]धूपधूमस्तदोदगात् । कलङ्क इव निर्धूतः पुण्यैः पुण्यजनाशयात् ॥१०२॥
विक्षिप्यन्ते स्म पुण्यार्घाः साक्षतोदकपुष्पकाः । शान्तिपुष्टिवपु[3]ष्कामैः विष्वक्पुण्यांशका इव ॥१०३॥
महामण्डपविन्यासः तत्र चक्रे सुरेश्वरैः । यत्र त्रिभुवनं कृत्स्नम् आस्ते स्माबाधितं मिथः ॥१०४॥
सुरानोकहसंभूता मालास्तत्रावलम्बिताः । रेजुर्भ्रमरसङ्गीतैः गातुकामा इवेशिनम् ॥१०५॥
अथ प्रथमकल्पेन्द्रः प्रभोः प्रथममज्जने । प्रचक्रे कलशोद्धारं कृतप्रस्तावनाविधिः ॥१०६॥
ऐशानेन्द्रोऽपि रुन्द्रश्रीः सान्द्रचन्दनचर्चितम् । [4]प्रोदास्थत कलशं पूर्णं कलशोद्धारमन्त्रवित् ॥१०७॥
शेषैरपि च कल्पेन्द्रैः सानन्दजयघोषणैः । परिचारकता[5] भेजे यथोक्तपरिचर्यया ॥१०८॥
इन्द्राणीप्रमुखा देव्यः साप्सरःपरिवारिकाः । बभूवुः परिचारिण्यो मङ्गलद्रव्यसम्पदा ॥१०९॥
शातकुम्भमयैः कुम्भैः अम्भः क्षीराम्बुधेः शुचि । सुराः श्रेणीकृतास्तोषाद् आनेतु प्रसृतास्ततः ॥११०॥

उस समय ऐसा जान पड़ता था कि स्वर्ग अवश्य ही अपने स्थानसे विचलित होकर खाली हो गया है और इन्द्रका समस्त वैभव धारण करनेसे सुमेरु पर्वत ही स्वर्गपनेको प्राप्त हो गया है ॥ ९९ ॥ तदनन्तर सौधर्म स्वर्गका इन्द्र भगवान्‌को पूर्व दिशाकी ओर मुँह करके पाण्डुक शिला पर रखे हुए सिंहासन पर विराजमान कर उनका अभिषेक करनेके लिये तत्पर हुआ ॥ १०० ॥ उस समय समस्त आकाशको व्याप्त कर देवोंके दुन्दुभि बज रहे थे और अप्सराओंने चारों ओर उत्कृष्ट नृत्य करना प्रारम्भ कर दिया था ॥ १०१ ॥ उसी समय कालागुरु नामक उत्कृष्ट धूपका धुआँ बड़े परिमाणमें निकलने लगा था और ऐसा मालूम होता था मानो भगवान्‌के जन्माभिषेकके उत्सवमें शामिल होनेसे उत्पन्न हुए पुण्यके द्वारा पुण्यात्मा जनोंके अंतःकरणसे हटाया गया कलंक ही हो ॥ १०२ ॥ उसी समय शान्ति, पुष्टि और शरीरकी कान्तिकी इच्छा करनेवाले देव चारो ओरसे अक्षत जल और पुष्प सहित पवित्र अर्घ्य चढ़ा रहे थे जो कि ऐसे मालूम होते थे मानो पुण्यके अंश ही हों ॥ १०३ ॥ उस समय वहीं पर इन्द्रोंने एक ऐसे बड़े भारी मण्डप की रचना की थी कि जिसमें तीनों लोकके समस्त प्राणी परस्पर बाधा न देते हुए बैठ सकते थे ॥ १०४ ॥ उस मण्डपमें कल्पवृक्षके फूलोंसे बनी हुई अनेक मालाएँ लटक रही थीं और उनपर बैठे हुए भ्रमर गा रहे थे । उन भ्रमरोंके संगीतसे वे मालाएँ ऐसी जान पड़ती थीं मानो भगवान्‌का यश ही गाना चाहती हों ॥ १०५ ॥

तदनन्तर प्रथम स्वर्गके इन्द्रने उस अवसरकी समस्त विधि करके भगवान्‌का प्रथम अभिषेक करनेके लिये प्रथम कलश उठाया ॥ १०६ ॥ और अतिशय शोभायुक्त तथा कलश उठानेके मंत्रको जाननेवाले दूसरे ऐशानेन्द्रने भी सघन चन्दनसे चर्चित, भरा हुआ दूसरा कलश उठाया ॥ १०७ ॥ आनन्द सहित जय जय शब्दका उच्चारण करते हुए शेष इन्द्र उन दोनों इन्द्रोंके कहे- अनुसार परिचर्या करते हुए परिचारक (सेवक) वृत्तिको प्राप्त हुए ॥ १०८ ॥ अपनी अपनी अप्सराओं तथा परिवारसे सहित इन्द्राणी आदि मुख्य मुख्य देवियाँ भी मङ्गलद्रव्य धारण कर परिचर्या करनेवाली हुई थीं ॥ १०९ ॥ तत्पश्चात् बहुतसे देव सुवर्णमय कलशोंसे क्षीरसागरका पवित्र जल लानेके लिये श्रेणीबद्ध होकर बड़े संतोषसे

---

१ शून्यीकृतः । २ –गरुद्दाम म०, ल० । ३ वर्चः तेज इत्यर्थः । ४ उद्धरणं कृतवान् । प्रोदास्थात् म०, ल० । ५ परिचारकतां प०, अ०, ल० ।

पूतं स्वायम्भुवं गात्रं स्प्रष्टुं क्षीराच्छशोणितम् । नान्यदस्ति जलं योग्यं क्षीराब्धिसलिलादृते ॥१११॥
मत्वेति नाकिभिर्नूनम् अनूनप्रमदोदयैः । पञ्चमस्यार्णवस्याम्भः स्नानीयमुपकल्पितम् ॥११२॥
अष्टयोजनगम्भीरैः मुखे योजनविस्तृतैः । प्रारेभे काञ्चनैः कुम्भैः जन्माभिषवणोत्सवः ॥११३॥
महामाना विरेजुस्ते सुराणामुद्धृताः करैः । कलशाः [1]कल्मषोन्मेषमोषिणो विघ्नकार्षिणः[2] ॥११४॥
प्रादुरासन्नभोभागे स्वर्णकुम्भाधृतार्णसः[3] । मुक्ताफलाञ्चितग्रीवाः चन्दनद्रवचर्चिताः ॥११५॥
तेषामन्योऽन्यहस्ताग्रसंक्रान्तैर्जलपूरितैः । कलशैर्व्यानशे व्योम हैमैः सान्ध्यैरिवाम्बुदैः ॥११६॥
[4]विनिर्ममे बहून् बाहून् [5]तानादित्सु[6]शताध्वरः । स तैः[7] साभरणैर्भेजे[8] भूषणाङ्ग इवाङ्घ्रिपः ॥११७॥
दोःसहस्रोद्धृतैः कुम्भैः रौक्मैर्मुक्ताफलाञ्चितैः । भेजे पुलोमजाजानिः[9] भाजनाङ्ग[10]द्रुमोपमाम् ॥११८॥
जयेति प्रथमां धारां सौधर्मेन्द्रो न्यपातयत् । तथा कलकलो भूयान् प्रचक्रे सुरकोटिभिः ॥११९॥
सैषा धारा जिनस्याधिमूर्द्धं रेजे पतन्त्यपाम् । हिमाद्रेश्शिरसीवोच्चैः [11]अच्छिन्नाम्बुद्युनिम्नगा ॥१२०॥
ततः कल्पेश्वरैस्सर्वैः समं[12] धारा निपातिताः । संध्याभ्रैरिव सौवर्णैः कलशैरम्बुसम्भृतैः ॥१२१॥

निःसारे खलु संसारे सुखलेशोऽपि दुर्लभः । दुःखमेव महत्तस्मिन् सुखं[11]काम्यति मन्दधीः ॥१७॥
नरकेषु यदेतेन दुःखमासेवितं महत् । तच्चेत्स्मर्येत कः कुर्याद् भोगेषु स्पृहयालुताम् ॥१८॥
नूनमार्तधियां भुक्ता भोगाः सर्वेऽपि देहिनाम् । दुःखरूपेण पच्यन्ते निरये निरयोदये[12] ॥१९॥
स्वप्नजं च सुखं नास्ति नरके दुःखभूयसि । दुःखं दुःखानुबन्ध्येव यतस्तत्र दिवानिशम् ॥२०॥
ततो विनिःसृतो जन्तुस्तैरश्चं दुःखमायतम्[13] । स्वसात्करोति[14] मन्दात्मा नानायोनिषु पर्यटन् ॥२१॥

चलता रहा । यद्यपि दूसरी देवी खड़ी कर देनेके बाद भी वही मनोहर स्थान था, वही मनोहर भूमि थी और वही नृत्यका परिक्रम था तथापि भगवान् वृषभदेवने उसी समय उसके स्वरूपका अन्तर जान लिया था ॥७–१०॥ तदनन्तर भोगोंसे विरक्त और अत्यन्त संवेग तथा वैराग्य भावनाको प्राप्त हुए भगवान्के चित्तमें इस प्रकार चिन्ता उत्पन्न हुई कि ॥११॥ बड़े आश्चर्य की बात है कि यह जगत् विनश्वर है, लक्ष्मी बिजलीरूपी लताके समान चंचल है, यौवन, शरीर, आरोग्य और ऐश्वर्य आदि सभी चलाचल हैं ॥१२॥ रूप, यौवन और सौभाग्यके मदसे उन्मत्त हुआ अज्ञ पुरुष इन सबमें स्थिर बुद्धि करता है परन्तु उनमें कौनसी वस्तु विनश्वर नहीं है ? अर्थात् सभी वस्तुएँ विनश्वर हैं ॥१३॥ यह रूपकी शोभा संध्या कालकी लालीके समान क्षण भरमें नष्ट हो जाती है और उज्ज्वल तारुण्य अवस्था पल्लवकी कान्तिके समान शीघ्र ही म्लान हो जाती है ॥१४॥ वनमें पैदा हुई लताओंके पुष्पोंके समान यह यौवन शीघ्र ही नष्ट हो जाने-वाला है, भोग संपदाएँ विषवेलके समान है और जीवन विनश्वर है ॥१५॥ यह आयुकी स्थिति घटीयन्त्रके जलकी धाराके समान शीघ्रताके साथ गलती जा रही है—कम होती जा रही है और यह शरीर अत्यन्त दुर्गन्धित तथा घृणा उत्पन्न करनेवाला है ॥१६॥ यह निश्चय है कि इस असार संसारमें सुखका लेश मात्र भी दुर्लभ है और दुःख बड़ा भारी है फिर भी आश्चर्य है कि मन्द बुद्धि पुरुष उसमें सुख की इच्छा करते हैं ॥१७॥ इस जीवने नरकोंमें जो महान् दुःख भोगे हैं यदि उनका स्मरण भी हो जावे तो फिर ऐसा कौन है, जो उन भोगोंकी इच्छा करे ॥१८॥ निरन्तर आर्तध्यान करनेवाले जीव जितने कुछ भोगोंका अनुभव करते हैं वे सब उन्हें अत्यन्त असाताके उदयसे भरे हुए नरकोंमें दुःखरूप होकर उदय आते हैं ॥१९॥ दुःखोंसे भरे हुए नरकोंमें कभी स्वप्नमें भी सुख प्राप्त नहीं होता क्योंकि वहाँ रात-दिन दुःख ही दुःख रहता है और ऐसा दुःख जो कि दुःखके कारण भूत असाता कर्मका बन्ध करनेवाला होता है ॥२०॥ उन नरकोंसे किसी तरह निकलकर यह मूर्ख जीव अनेक योनियोंमें परिभ्रमण

---

१ संयोजयति स्म । २ बहुरूपम् । ३ पदचारिः । ४ विरक्ति गतस्य । ५ विनाशि । ६–तडिद्वल्लरी- अ०, प०, द०, इ०, म०, स० । ७ पामरः । ८ त्वत्र द०, प० । तत्र ल० । ९ विनश्वरीम् द०, प० । १० प्रतिमोपरि सुगन्धजलस्रवणार्थं धृतजलधारावत् । ११ सुखमिच्छत्यात्मनः । सुखकाम्यति ब० । १२ अयोदयान्निष्क्रान्ते शुभकर्मोदयरहिते इत्यर्थः । १३ दीर्घं [illegible] । १४ स्वाधीनं करोति ।

पृथिव्यामप्सु वह्नौ च पवने सवनस्पतौ। बम्भ्रम्यते महादुःखमश्नुवानो बताज्ञकः ॥ २२ ॥
खननोत्तापनज्वालिज्वालाविध्यापनै[१]रपि। [२]घनाभिघातैश्छेदैश्च दुःखं तत्रैति दुस्तरम् ॥ २३ ॥
सूक्ष्मबादरपर्याप्त[३]तद्विपक्षात्मयोनिषु। पर्यटत्यसकृज्जीवो घटीयन्त्रस्थितिं दधत् ॥ २४ ॥
त्रसकायेष्वपि प्राणी बधबन्धोपरोधनैः। [४]दुःखासिकामवाप्नोति [५]सर्वावस्थानुयायिनीम् ॥ २५ ॥
जन्मदुःखं ततो दुःखं जरामृत्युस्ततोऽधिकम्। इति दुःखशतावर्ते जन्माब्धौ स निमग्नवान् ॥ २६ ॥
क्षणान्नश्यन् क्षणाज्जीर्यन् क्षणाज्जन्म समाप्नुवन्। जन्ममृत्युजरातङ्क-पङ्के मज्जति गौरिव ॥ २७ ॥
अनन्तं कालमित्यज्ञस्तिर्यक्त्वे दुःखमश्नुते। दुःखस्य हि परं धाम तिर्यक्त्वं मन्वते जिनाः ॥ २८ ॥
ततः कृच्छ्राद् विनिःसृत्य शिथिले दुष्कृते मनाक्। मनुष्यभावमाप्नोति कर्मसारथिचोदितः ॥२९॥
तत्रापि विविधं दुःखं शारीरं चैव मानसम्। प्राप्नोत्यनिच्छुरेवात्मा निरुद्धः कर्मशत्रुभिः ॥ ३० ॥
पराराधनदारिद्र्य-चिन्ता शोकादिसम्भवम्। दुःखं महन्मनुष्याणां प्रत्यक्ष[६]नरकायते ॥ ३१ ॥
शरीरशकटं दुःखदुर्भाण्डैः [७]परिपूरितम्। दिनैस्त्रिचतुरैरेव पर्यस्य[८]ति न संशयः ॥ ३२ ॥
[९]दिव्यभावे किलैतेषां सुखभावत्वं शरीरिणाम्। तत्रापि त्रिदिवात् पातः परं दुःखं दुरुत्तरम् ॥३३॥

करता हुआ तिर्यञ्च गतिके बड़े भारी दुःख भोगता है ॥२१॥ बड़े दुःखकी बात है कि यह अज्ञानी जीव पृथिवीकायिक, जलकायिक, अग्निकायिक, वायुकायिक और वनस्पतिकायिक जीवोंमें भारी दुःख भोगता हुआ निरन्तर भ्रमण करता रहता है ॥२२॥ यह जीव उन पृथिवी-कायिक आदि पर्यायोंमें खोदा जाना, जलती हुई अग्निमें तपाया जाना, बुझाया जाना, अनेक कठोर वस्तुओंसे टकरा जाना, तथा छेदा भेदा जाना आदिके कारण भारी दुःख पाता है ॥२३॥ यह जीव घटीयन्त्रकी स्थितिको धारण करता हुआ सूक्ष्म बादर पर्याप्तक तथा अपर्याप्तक अवस्थामें अनेक बार परिभ्रमण करता रहता है ॥२४॥ त्रस पर्यायमें भी यह प्राणी मारा जाना, बांधा जाना और रोका जाना आदिके द्वारा जीवनपर्यन्त अनेक दुःख प्राप्त करता रहता है ॥२५॥ सबसे प्रथम इसे जन्म अर्थात् पैदा होनेका दुःख उठाना पड़ता है, उसके अनन्तर बुढ़ापाका दुःख और फिर उससे भी अधिक मृत्युका दुःख भोगना पडता है, इस प्रकार सैकड़ों दुःख रूपी भँवरसे भरे हुए संसाररूपी समुद्रमे यह जीव सदा डूबा रहता है ॥२६॥ यह जीव क्षणभरमें नष्ट हो जाता है, क्षण भरमें जीर्ण (वृद्ध) हो जाता है और क्षण भरमे फिर जन्म धारण कर लेता है इस प्रकार जन्म-मरण, बुढापा और रोगरूपी कीचड़मे गायकी तरह सदा फँसा रहता है ॥२७॥ इस प्रकार यह अज्ञानी जीव तिर्यञ्च योनिमें अनन्त कालतक दुःख भोगता रहता है सो ठीक ही है क्योंकि जिनेन्द्रदेव भी यही मानते है कि तिर्यञ्च योनि दुःखोंका सबसे बड़ा स्थान है ॥२८॥ तदनन्तर अशुभ कर्मोंके कुछ कुछ मन्द होनेपर यह जीव उस तिर्यञ्च योनिसे बड़ी कठिनतासे बाहर निकलता है और कर्मरूपी सारथिसे प्रेरित होकर मनुष्य पर्यायको प्राप्त होता है ॥२९॥ वहाँपर भी यह जीव यद्यपि दुःखोंकी इच्छा नही करता है तथापि इसे कर्मरूपी शत्रुओंसे निरुद्ध होकर अनेक प्रकारके शारीरिक और मानसिक दुःख भोगने पड़ते है ॥३०॥ दूसरोंकी सेवा करना, दरिद्रता, चिन्ता और शोक आदिसे मनुष्योंको जो बड़े भारी दुःख प्राप्त होते हैं वे प्रत्यक्ष नरकके समान जान पड़ते है ॥३१॥ यथार्थमे मनुष्योंका यह शरीर एक गाड़ीके समान है जो कि दुःखरूपी खोटे बर्तनोंसे भरी है इसमें कुछ भी संशय नहीं है कि यह शरीररूपी गाड़ी तीन चार दिनमें ही उलट जावेगी—नष्ट हो जावेगी ॥३२॥ यद्यपि देवपर्यायमें जीवोंको

---

१ अग्निज्वालाप्रशमनैः। २ मेघताडनैः। ३ सूक्ष्मबादरापर्याप्तः। ४ दुःखस्थताम्। ५ बाल्याद्यवस्थाऽनुयायिनीम्। ६ प्रत्यक्षं न–द०। ७ भाण्डैरतिपूरितम्। ८ प्रणस्यति। ९ देवत्वे।

तत्रापीष्टवियोगोऽस्ति न्यूनास्तत्रापि केचन । ततो मानसमेतेषां दुःखं दुःखेन लङ्घ्यते ॥ ३४॥
इति संसारचक्रेऽस्मिन् विचित्रैः परिवर्तनैः । दुःखमाप्नोति दुष्कर्मपरिपाकाद् वराककः ॥ ३५ ॥
[1]नारीरूपमयं यन्त्रमिदमत्यन्तपेलवम्[2] । पश्यतामेव नः साक्षात् कथमेतदगात्लयम् ॥ ३६ ॥
रमणीयमिदं मत्वा स्त्रीरूपं बहिरुज्ज्वलम् । पतन्तस्तत्र नश्यन्ति पतङ्गा इव कामुकाः ॥ ३७ ॥
[3]कूटनाटकमेतत्तु प्रयुक्तममरेशिना । नूनमस्मत्प्रबोधाय स्मृतिमाधाय धीमता ॥ ३८ ॥
यथेदमेवमन्यच्च भोगांगं यत् किलांगिनाम् । [4]भङ्गुरं नियतापायं केवलं तत्प्रलम्भकम्[5] ॥ ३९ ॥
किं किलाभरणैर्भारैः किं मलैरनुलेपनैः । उन्मत्तचेष्टितैर्नृत्तैरलं गीतैश्च शोचितैः[6] ॥ ४० ॥
यद्यस्ति स्वगता शोभा किं किलालंकृतैः कृतम् । यदि नास्ति स्वतः शोभा भारैरेभिस्त[7]थापि किम्॥४१॥
तस्माद्धिगिदं रूपं धिक् संसारमसारकम् । [8]राज्यभोगं धिगस्त्वेनं धिगिमाः तडिच्चलाः श्रियः[9]॥४२॥
इति निर्विद्य[10] भोगेभ्यो विरक्तात्मा सनातनः । मुक्तावुद्योगमकरोत् [11]स्मात् काललब्धिमुपाश्रितः ॥४३॥
तदा [12]विशुद्धयस्तस्य हृदये पदमादधुः । मुक्तिलक्ष्म्येव [13]सन्दिष्टाः तत्सख्यः सम्मुखागताः ॥ ४४ ॥
तदास्य सर्वमप्येतत्[14] शून्यवत् प्रत्यभासत । मुक्त्यङ्गनासमासंगे परां चिन्तामुपेयुषः ॥ ४५ ॥

कुछ सुख प्राप्त होता है तथापि जब स्वर्गसे इसका पतन होता है तब इसे सबसे अधिक दुःख होता है ॥३३॥ उस देवपर्यायमें भी इष्टका वियोग होता है और कितने ही देव अल्पविभूति के धारक होते हैं जोकि अपनेसे अधिक विभूतिवालेको देखकर दुःखी होते रहते हैं इसलिये उनका मानसिक दुःख भी बड़े दुःखसे व्यतीत होता है ॥३४॥ इस प्रकार यह बेचारा दीन प्राणी इस संसार रूपी चक्रमें अपने खोटे कर्मोंके उदयसे अनेक परिवर्तन करता हुआ दुःख पाता रहता है ॥३५॥ देखो, यह अत्यन्त मनोहर स्त्रीरूपी यन्त्र (नृत्य करनेवाली नीलाञ्जना का शरीर) हमारे साक्षात् देखते ही देखते किस प्रकार नाशको प्राप्त हो गया ॥३६॥ बाहर से उज्ज्वल दिखनेवाले स्त्रीके रूपको अत्यन्त मनोहर मानकर कामीजन उसपर पड़ते हैं और पड़ते ही पतंगोंके समान नष्ट हो जाते हैं—अशुभ कर्मोंका बन्धकर हमेशाके लिये दुःखी हो जाते हैं ॥३७॥ इन्द्रने जो यह कपट नाटक किया है अर्थात् नीलाञ्जनाका नृत्य कराया है सो अवश्य ही उस बुद्धिमान्ने सोच-विचारकर केवल हमारे बोध करानेके लिये ही ऐसा किया है ॥३८॥ जिस प्रकार यह नीलांजनाका शरीर भंगुर था—विनाशशील था इसी प्रकार जीवोंके अन्य भोगोपभोगोंके पदार्थ भी भंगुर हैं, अवश्य नष्ट हो जानेवाले हैं और केवल धोखा देनेवाले हैं ॥३९॥ इसलिये भार रूप आभरणोंसे क्या प्रयोजन है, मैलके समान सुगन्धित चन्दनादिके लेपनसे क्या लाभ है, पागल पुरुषकी चेष्टाओंके समान यह नृत्य भी व्यर्थ है और शोकके समान ये गीत भी प्रयोजनरहित है ॥४०॥ यदि शरीरकी निजकी शोभा अच्छी है तो फिर अलंकारोंसे क्या करना है और यदि शरीरमें निजकी शोभा नहीं है तो फिर भारस्वरूप इन अलंकारोंसे क्या हो सकता है ?॥४१॥ इसलिये इस रूपको धिक्कार है, इस असार संसारको धिक्कार है, इस राज्य भोगको धिक्कार है और बिजलीके समान चञ्चल इस लक्ष्मीको भी धिक्कार है ॥४२॥ इस प्रकार जिनकी आत्मा विरक्त हो गई है ऐसे भगवान् वृषभदेव भोगोंसे विरक्त हुए और काललब्धिको पाकर शीघ्र ही मुक्तिके लिये उद्योग करने लगे ॥४३॥ उस समय भगवान्के हृदयमें विशुद्धियोंने अपना स्थान जमा लिया था और वे ऐसी मालूम होती थीं मानो मुक्ति-रूपी लक्ष्मीके द्वारा प्रेरित हुई उसकी सखियाँ ही सामने आकर उपस्थित हुई हों ॥४४॥ उस

---

१ नीलाञ्जनारूप । २ निस्सारम् । चञ्चलम् । ३ कपट । ४ विनश्वरम् । ५ वञ्चकम् । ६ शोकैः । ७ तर्हि । ८ राज्यं भोगं अ०, प०, इ०, स० । ९ विद्युदिव चञ्चलां लक्ष्मीम् । १० निर्वेदपरो भूत्वा । ११ उद्युक्तो बभूव । १२ विशुद्धिपरिणामाः । १३ प्रेषिताः । १४ जगत्स्थम् ।

सौधर्मेन्द्रस्ततोऽबोधि गुरोरन्तःसमीहितम्[1] । प्रयुक्तावधिरीशस्य बोधिर्जातेति तत्क्षणम् ॥ ४६ ॥
प्रभोः प्रबोधमाधातुं [2]ततो लौकान्तिकामराः । परिनिष्क्रमणेज्यायै ब्रह्मलोकादवातरन्[3] ॥ ४७ ॥
ते च सारस्वतादित्यौ वह्निश्चारुण एव च । गर्दतोयः सतुषितोऽव्याबाधोऽरिष्ट एव च ॥ ४८ ॥
इत्यष्टधा निकायाख्यां[4] दधाना विबुधोत्तमाः । प्राग्भवेऽभ्यस्तनिःशेषश्रुतार्थाः शुभभावनाः ॥ ४९ ॥
ब्रह्मलोकालयाः सौम्याः शुभलेश्या महर्द्धिकाः । तल्लोकान्तनिवासित्वाद् गता लौकान्तिकश्रुतिम् ॥५०॥
दिव्यहंसा विरेजुस्ते [5]शिवोरुपुलिनोत्सुकाः । परिनिष्क्रान्तिकल्याण[6]शरदागमशंसिनः ॥ ५१ ॥
सुमनोऽञ्जलयो मुक्ता बभुर्लौकान्तिकामरैः । विभोरुपासितुं पादौ स्वचित्तांशा इवार्पिताः ॥ ५२ ॥
तेऽभ्यर्च्य भगवत्पादौ प्रसूनैः सुरभूरुहाम् । ततः स्तुतिभिरर्थ्याभिः स्तोतुं प्रारेभिरे विभुम् ॥ ५३ ॥
मोहारिविजयोद्योगमधुना संविधित्सुना । भगवन् भव्यलोकस्य [7]बन्धुकृत्यं त्वयेहितम्[8] ॥ ५४ ॥
त्वं देव परमं ज्योतिस्त्वा[9]माहुः कारणं परम् । त्वमिदं विश्वमज्ञानप्रपातादुद्धरिष्यसि ॥ ५५ ॥
त्वयाद्य दर्शितं धर्मतीर्थमासाद्य [10]दुस्तरम् । भव्याः संसारभीमाब्धिमुत्तरिष्यन्ति[11] हेलया ॥ ५६ ॥
तव वागंशवो दीप्रा[12] द्योतयन्तोऽखिलं जगत् । भव्यपद्माकरे बोधमाधास्यन्ति[13] रवेरिव ॥ ५७ ॥

समय भगवान् मुक्तिरूपी अंगनाके समागमके लिये अत्यन्त चिन्ताको प्राप्त हो रहे थे इसलिये उन्हें यह सारा जगत् शून्य प्रतिभासित हो रहा था ॥४५॥ भगवान् वृषभदेवको बोध उत्पन्न हो गया है अर्थात् वे अब संसारसे विरक्त हो गये हैं ये जगद्गुरु भगवान्के अन्त.करणकी समस्त चेष्टाएँ इन्द्रने अपने अवधिज्ञानसे उसी समय जान ली थी ॥४६॥ उसी समय भगवान्को प्रबोध करानेके लिये और उनके तप कल्याणककी पूजा करनेके लिये लौकान्तिक देव ब्रह्मलोकसे उतरे ॥४७॥ वे लौकान्तिक देव सारस्वत, आदित्य, वह्नि, अरुण, गर्दतोय, तुषित, अव्याबाध और अरिष्ट इस तरह आठ प्रकारके हैं । वे सभी देवोंमें उत्तम होते हैं । वे पूर्वभवमें सम्पूर्ण श्रुतज्ञानका अभ्यास करते हैं । उनकी भावनाएँ शुभ रहती हैं । वे ब्रह्मलोक अर्थात् पांचवे स्वर्गमे रहते है, सदा शान्त रहते है, उनकी लेश्याएँ शुभ होती है, वे बड़ी बड़ी ऋद्धियोंको धारण करनेवाले होते हैं और ब्रह्मलोकके अन्तमें निवास करनेके कारण लौकान्तिक इस नामको प्राप्त हुए है ॥४८–५०॥ वे लौकान्तिक स्वर्गके हंसोंके समान जान पड़ते थे, क्योंकि वे मुक्तिरूपी नदीके तटपर निवास करनेके लिये उत्कण्ठित हो रहे थे और भगवान्के दीक्षाकल्याणकरूपी शरद् ऋतुके आगमनकी सूचना कर रहे थे ॥५१॥ उन लौकान्तिक देवोंने आकर जो पुष्पाञ्जलि छोड़ी थी वह ऐसी मालूम होती थी मानो उन्होंने भगवान्के चरणोंकी उपासना करनेके लिये अपने चित्तके अंश ही समर्पित किये हों ॥५२॥ उन देवोंने प्रथम ही कल्पवृक्षके फूलोंसे भगवान्के चरणोंकी पूजा की और फिर अर्थसे भरे हुए स्तोत्रोंसे भगवान्की स्तुति करना प्रारम्भ की ॥५३॥ हे भगवन्, इस समय जो आपने मोहरूपी शत्रुको जीतनेके उद्योगकी इच्छा की है उससे स्पष्ट सिद्ध है कि आपने भव्यजीवोंके साथ भाईपनेका कार्य करनेका विचार किया है अर्थात् भाईकी तरह भव्य जीवोंकी सहायता करनेका विचार किया है ॥५४॥ हे देव, आप परम ज्योति स्वरूप है, सब लोग आपको समस्त कार्योंका उत्तम कारण कहते हैं और हे देव, आप ही अज्ञान रूपी प्रपातसे संसारका उद्धार करेंगे ॥५५॥ हे देव, आज आपके द्वारा दिखलाये हुए धर्मरूपी तीर्थको पाकर भव्यजीव इस दुस्तर और भयानक संसार रूपी समुद्रसे लीला मात्रमे पार हो जावेंगे ॥५६॥ हे देव, जिस प्रकार सूर्यकी देदीप्यमान

---

१ अन्तरंगसमाधानम् । २ तदा म०, ल० । ३ अवतरन्ति स्म । ४ समुदायसख्याम् । ५ मोक्षपृथुसैकत । ६ शरदारम्भ–प०, अ०, इ०, द०, स० । ७ बन्धुत्वम् । ८ चेष्टितम् । ९ त्वमेव कारणं इ०, अ०, स० । १० दुस्तरात् ल०, म० । ११ भीमाब्धेरुत्ता–ल०, म० । १२ दीप्ता ल०, म० । १३ करिष्यन्ति ।

धातारमामनन्ति त्वां जेतारं कर्मविद्विषाम्। नेतारं धर्मतीर्थस्य त्रातारं च जगद्गुरुम् ॥ ५८॥
मोहपङ्के महत्यस्मिन् जगन्मग्नमशेषतः। धर्महस्तावलम्बेन त्वया [१]मङ्क्षूद्धरिष्यते ॥ ५९॥
त्वं स्वयम्भूः स्वयंबुद्ध-सन्मार्गो मुक्ति[२]पद्धतिम्। [३]यत्प्रबोधयिता[४]स्यस्मान् अकस्मात्[५]करुणार्द्रधीः ॥ ६०॥
त्वं बुद्धोऽसि स्वयंबुद्धः त्रिबोधामललोचनः। यद्वेत्सि[६] स्वत एवाद्य मोक्षस्य पदवीं त्रयीम्[७] ॥ ६१॥
स्वयंप्रबुद्धसन्मार्गस्त्वं न बोध्योऽस्मदादिभिः। किन्त्वास्माको[८] नियोगोऽयं मुखरीकुरुतेऽद्य नः ॥ ६२॥
जगत्प्रबोधनोद्योगे न त्वमन्यैर्नियुज्यसे। भुवनोद्योतने किन्नु केनाप्युत्थाप्यतेंऽशुमान् ॥ ६३॥
अथवा बोधितोऽप्यस्मान् बोधयस्यपुनर्भव। बोधितोऽपि यथा दीपो भुवनस्योपकारकः ॥ ६४॥
सद्योजातस्त्वमाद्येऽभूः कल्याणे [९]वामतामतः। प्राप्तो[१०]ऽनन्तरकल्याणे धत्से [११]सम्प्रत्यघोरताम्[१२] ॥ ६५॥
भुवनस्योपकाराय कुरूद्योगं [१३]त्वमीशितः। त्वां नवाब्दमिवासेव्य प्रीयन्तां भव्यचातकाः ॥ ६६॥

किरणें समस्त जगत्‌को प्रकाशित करती हुई कमलोंको प्रफुल्लित करती हैं उसी प्रकार आपके वचनरूपी देदीप्यमान किरणे भी समस्त संसारको प्रकाशित करती हुई भव्यजीवरूपी कमलों को प्रफुल्लित करेंगी ॥५७॥ हे देव, लोग, आपको जगत्‌का पालन करनेवाले ब्रह्मा मानते हैं, कर्मरूपी शत्रुओंको जीतनेवाले विजेता मानते हैं, धर्मरूपी तीर्थके नेता मानते हैं और सबकी रक्षा करनेवाले जगद्गुरु मानते हैं ॥५८॥ हे देव, यह समस्त जगत् मोहरूपी बड़ी भारी कीचड़ में फँसा हुआ है इसका आप धर्मरूपी हाथ का सहारा देकर शीघ्र ही उद्धार करेंगे ॥५९॥ हे देव, आप स्वयंभू हैं, आपने मोक्षमार्गको स्वयं जान लिया है और आप हम सबको मुक्तिके मार्गका उपदेश देंगे इससे सिद्ध होता है कि आपका हृदय बिना कारण ही करुणासे आर्द्र है ॥६०॥ हे भगवन्, आप स्वयं बुद्ध हैं, आप मति-श्रुत और अवधि ज्ञानरूपी तीन निर्मल नेत्रोंको धारण करनेवाले हैं तथा आपने सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र इन तीनोंकी एकता रूपी मोक्षमार्गको अपने आप ही जान लिया है इसलिये आप बुद्ध हैं ॥६१॥ हे देव, आपने सन्मार्गका स्वरूप स्वयं जान लिया है इसलिये हमारे जैसे देवोंके द्वारा आप प्रबोध करानेके योग्य नहीं हैं तथापि हम लोगोंका यह नियोग ही आज हम लोगोंको वाचालित कर रहा है ॥६२॥ हे नाथ, समस्त जगत्‌को प्रबोध करानेका उद्योग करनेके लिये आपको कोई अन्य प्रेरणा नहीं कर सकता सो ठीक ही है क्योंकि समस्त जगत्‌को प्रकाशित करनेके लिये क्या सूर्यको कोई अन्य उकसाता है ? अर्थात् नहीं। भावार्थ–जिस प्रकार सूर्य समस्त जगत्‌को प्रकाशित करनेके लिये स्वयं तत्पर रहता है उसी प्रकार समस्त जगत्‌को प्रबुद्ध करनेके लिये आप स्वयं तत्पर रहते हैं ॥६३॥ अथवा हे जन्म-मरण रहित जिनेन्द्र, आप हमारे द्वारा प्रबोधित होकर भी हम लोगोंको उसी प्रकार प्रबोधित करेंगे जिस प्रकार जलाया हुआ दीपक संसारका उपकारक होता है अर्थात् सबको प्रकाशित करता है ॥६४॥ हे भगवन्, आप प्रथम गर्भकल्याणकमें सद्योजात अर्थात् शीघ्र ही अवतार लेनेवाले कहलाये, द्वितीय–जन्मकल्याणकमे वामता अर्थात् सुन्दरताको प्राप्त हुए और अब उसके अनन्तर तृतीय-तपकल्याणकमें अघोरता अर्थात् सौम्यता को धारण कर रहे हैं ॥६५॥ हे स्वामिन्, आप संसारके उपकारके लिये उद्योग कीजिये, ये

---

१ सपदि। २ मोक्षमार्गम्। ३ यत् कारणात्। ४ बोधयिष्यन्ति। ५ कारणमन्तरेण यतः स्वयम्बुद्धसन्मार्गस्ततः। यत् यस्मात् कारणात् अस्मान् मुक्तिपद्धतिमकस्मात् प्रबोधयितासि तस्मात् करुणार्द्रधीः करुणायाः कार्यदर्शनात् उपचारात् करुणार्द्रधीरित्युच्यते। मुख्यतः मोहनीयकार्यभतायाः करुणाया अभावात्। ६ जानासि। ७ रत्नत्रयम् इत्यर्थः। ८ अस्मत्सम्बन्धी। किन्त्वस्माकं अ०, प०, इ०, स०। ९ मनोहरताम्। वामतां मत म०, ल०। १० प्राप्तेऽनन्तर–म०, ल०। ११ परिनिष्क्रमणकल्याणे। १२ सुखकारिताम्। १३ भूनाथः।

तव धर्मामृतं स्रष्टुम् एव कालः सनातनः । धर्मसृष्टिमतो देव विधातुं धातरर्हसि ॥ ६७ ॥
जय त्वमीश कर्मारीन् जय मोहमहासुरम् । परीषहभटान् दृप्तान् विजयस्व तपोबलात् ॥ ६८ ॥
उत्तिष्ठतां भवान् मुक्तौ भुक्तैर्भोगैरलन्तराम् । न स्वादन्तरमेषु स्याद् भूयो ऽप्यनुभवे ऽङ्गिनाम् ॥ ६९ ॥
इति लौकान्तिकैर्देवैः स्तुवानैरपनाथितः । परिनिष्क्रमणे बुद्धिमधाद् धाता द्रढीयसीम् ॥ ७० ॥
तावतैव नियोगेन कृतार्थास्ते दिवं ययुः । हंसा इव नभोवीथीं द्योतयन्तो ऽङ्गदीप्तिभिः ॥ ७१ ॥
तावच्च नाकिनो नैकविक्रियाः कम्पितासनाः । पुरो[1] ऽभूवन् पुरो[2]रस्य पुरोधाय पुरन्दरम् ॥ ७२ ॥
नभो ऽङ्गणमथारुध्य ते ऽयोध्यां परितः पुरीम् । तस्थुः [3]स्ववाहनानीका नाकिनाथा निकायशः ॥ ७३ ॥
ततो ऽस्य परिनिष्क्रान्तिमहाकल्याणसंविधौ । महाभिषेकमिन्द्राद्याश्चक्रुः क्षीरार्णवाम्बुभिः ॥ ७४ ॥
अभिषिच्य विभुं देवा भूषयांचक्रुरादृताः । दिव्यैर्विभूषणैर्वस्त्रैर्माल्यैश्च मलयोद्भवैः[4] ॥ ७५ ॥
ततो ऽभिषिच्य साम्राज्ये भरतं सूनुमग्रिमम् । भगवान् भारतं वर्षं [5]तत्सनाथं व्यधादिदम् ॥ ७६ ॥
यौवराज्ये च तं बाहुबलिनं समतिष्ठिपत् । तदा राजन्वतीत्यासीत् पृथ्वी ताभ्यामधिष्ठिता[6] ॥ ७७ ॥
परिनिष्क्रान्तिराज्यानुसंक्रान्तिद्वितयोत्सवे । तदा स्वर्लोकभूलोकावास्तां[7] प्रमदनिर्भरौ[8] ॥ ७८ ॥

भव्यजीव रूपी चातक नवीन मेघके समान आपकी सेवा कर संतुष्ट हों ॥६६॥ हे देव, अनादि प्रवाहसे चला आया यह काल अब आपके धर्मरूपी अमृत उत्पन्न करनेके योग्य हुआ है इसलिये हे विधाता, धर्मकी सृष्टि कीजिये—अपने सदुपदेशसे समीचीन धर्मका प्रचार कीजिये ॥६७॥ हे ईश, आप अपने तपोबलसे कर्मरूपी शत्रुओंको जीतिये, मोह रूपी महाअसुरको जीतिये और परीषह रूपी अहंकारी योद्धाओंको भी जीतिये ॥६८॥ हे देव, अब आप मोक्षके लिये उठिये—उद्योग कीजिये, अनेक बार भोगे हुए इन भोगोंको रहने दीजिये—छोड़िये क्योंकि जीवोंके बार बार भोगनेपर भी इन भोगोंके स्वादमे कुछ भी अन्तर नही आता—नूतनता नही आती ॥६९॥ इस प्रकार स्तुति करते हुए लौकान्तिक देवोंने तपश्चरण करनेके लिये जिनसे प्रार्थना की है ऐसे ब्रह्मा—भगवान् वृषभदेवने तपश्चरण करनेमे—दीक्षा धारण करनेमे अपनी दृढ़ बुद्धि लगाई ॥७०॥ वे लौकान्तिक देव अपने इतने ही नियोगसे कृतार्थ होकर हसोकी तरह शरीरकी कान्तिसे आकाशमार्गको प्रकाशित करते हुए स्वर्गको चले गये ॥७१॥ इतनेमें ही आसनोंके कम्पायमान होनेसे भगवान्के तप-कल्याणकका निश्चय कर देव लोग अपने अपने इन्द्रोंके साथ अनेक विक्रियाओंको धारण कर प्रकट होने लगे ॥७२॥

अथानन्तर-समस्त इन्द्र अपने वाहनों और अपने अपने निकायके देवोंके साथ आकाशरूपी आँगनको व्याप्त करते हुए आये और अयोध्यापुरीके चारों ओर आकाशको घेरकर अपने अपने निकायके अनुसार ठहर गये ॥७३॥ तदनन्तर इन्द्रादिक देवोंने भगवान्के निष्क्रमण अर्थात् तप.कल्याणक करनेके लिये उनका क्षीरसागरके जलसे महाभिषेक किया ॥७४॥ अभिषेक कर चुकनेके बाद देवोंने बड़े आदरके साथ दिव्य आभूपण,वस्त्र, मालाए और मलयागिरि चन्दन-से भगवान्का अलंकार किया ॥७५॥ तदनन्तर भगवान् वृषभदेवने साम्राज्य पदपर अपने बड़े पुत्र भरतका अभिषेक कर इस भारतवर्षको उनसे सनाथ किया ॥७६॥ और युवराज पदपर बाहुबलीको स्थापित किया। इस प्रकार उस समय यह पृथिवी उक्त दोनों भाइयोंसे अधिष्ठित होनेके कारण राजन्वती अर्थात् सुयोग्य राजासे सहित हुई थी ॥७७॥ उस समय भगवान् वृषभदेवका निष्क्रमणकल्याणक और भरतका राज्याभिषेक हो रहा था इन दोनों

---

१ पुरो ऽभवन् प० । २ पुरोगस्य अ०, प० । ३ सवाहनानीका प०, अ०, इ०, स०, द०, म०, ल० । ४ गन्धैः । ५ तेन भरतेन सस्वामिकम् । ६ आसिता । ७ भवेताम् । 'अस् भुवि' लङ् द्विवचनम् । ८ सन्तोषातिशयौ ।

भगवत्परिनिष्क्रान्तिकल्याणोत्सव एकतः । स्फीतर्द्धिरन्यतो यूनोः पृथ्वीराज्यार्पणक्षणः[1] ॥ ७९ ॥
बद्धकक्षस्तपोराज्ये सज्जो राजर्षिरेकतः । युवानावन्यतो राज्यलक्ष्म्युद्वाहे[2] कृतोद्यमौ ॥ ८० ॥
एकतः शिबिकायाननिर्माणं सुरशिल्पिनाम् । [3]वास्तुवेदिभिरारब्धः परार्ध्यो मण्डपोऽन्यतः ॥८१ ॥
शचीदेव्यैकतो रङ्गवल्ल्यादिरचना कृता । देव्याऽन्यतो यशस्वत्या सानन्दं ससुनन्दया ॥ ८२ ॥
एकतो मङ्गलद्रव्यधारिण्यो दिक्कुमारिकाः । अन्यतः कृतनेपथ्या वारमुख्या [4]वरश्रियः ॥ ८३ ॥
[5]सुरवृन्दारकैः प्रीतैर्भगवानेकतो वृतः । क्षत्रियाणां सहस्रेण कुमारावन्यतो वृतौ ॥ ८४ ॥
पुष्पाञ्जलिः सुरैर्मुक्तः स्तुवानैर्भर्तुरेकतः । अन्यतः [6]साशिषः शेषाः[7] क्षिप्ताः पौरैर्युवेशिनोः ॥ ८५ ॥
एकतोऽप्सरसां नृत्तमस्पृष्टधरणीतलम् । सलीलपदविन्यासमन्यतो वारयोषिताम् ॥८६ ॥
एकतः सुरतूर्याणां प्रध्वानो रुद्धदिङ्मुखः । नान्दीपटहनिर्घोषप्रविजृ[8]म्भितमन्यतः ॥ ८७ ॥
एकतः किन्नरारब्धकलमङ्गलनिःक्वणः । अन्यतोऽन्तःपुरस्त्रीणां मङ्गलोद्गीतिनि[9]स्वनः ॥ ८८ ॥
एकतः सुरकोटीनां जयकोलाहलध्वनिः । पुण्यपाठककोटीनां संपाठध्वनिरन्यतः ॥ ८९ ॥

प्रकारके उत्सवोंके समय स्वर्गलोक और पृथिवीलोक दोनों ही हर्षनिर्भर हो रहे थे ॥७८॥ उस समय एक ओर तो बड़े वैभवके साथ भगवान्के निष्क्रमणकल्याणकका उत्सव हो रहा था और दूसरी ओर भरत तथा बाहुबली इन दोनों राजकुमारोंके लिये पृथिवीका राज्य समर्पण करनेका उत्सव किया जा रहा था ॥७९॥ एक ओर तो राजर्षि-भगवान् वृषभदेव तपरूपी राज्यके लिये कमर बांधकर तैयार हुए थे और दूसरी ओर दोनों तरुण कुमार राज्यलक्ष्मीके साथ विवाह करनेके लिये उद्यम कर रहे थे । ८०॥ एक ओर तो देवोंके शिल्पी भगवान्को वनमें ले जानेके लिये पालकीका निर्माण कर रहे थे और दूसरी ओर वास्तुविद्या अर्थात् महल मण्डप आदि बनानेकी विधि जाननेवाले शिल्पी राजकुमारोंके अभिषेकके लिये बहुमूल्य मण्डप बना रहे थे ॥८१॥ एक ओर तो इन्द्राणी देवीने रंगावली आदिकी रचना की थी—रंगीन चौक पूरे थे और दूसरी ओर यशस्वती तथा सुनन्दा देवीने बड़े हर्षके साथ रंगावली आदिकी रचना की थी—तरह तरहके सुन्दर चौक पूरे थे ॥८२॥ एक ओर तो दिक्कुमारी देवियाँ मङ्गल द्रव्य धारण किये हुई थी और दूसरी ओर वस्त्राभूषण पहने हुई उत्तम वारांगनाएं मङ्गल द्रव्य लेकर खड़ी हुई थीं ॥८३॥ एक ओर भगवान् वृषभदेव अत्यन्त सन्तुष्ट हुए श्रेष्ठ देवोंसे घिरे हुए थे और दूसरी ओर दोनों राजकुमार हजारों क्षत्रिय-राजाओंसे घिरे हुए थे ॥८४॥ एक ओर स्वामी वृषभदेवके सामने स्तुति करते हुए देवलोग पुष्पाञ्जलि छोड़ रहे थे और दूसरी ओर पुरवासीजन दोनों राजकुमारोंके सामने आशीर्वादके शेषाक्षत फेंक रहे थे ॥८५॥ एक ओर पृथिवीतलको बिना छुए ही—अधर आकाशमे अप्सराओंका नृत्य हो रहा था और दूसरी ओर वारांगनाएं लीलापूर्वक पद-विन्यास करती हुई नृत्य कर रही थी ॥८६॥ एक ओर समस्त दिशाओंको व्याप्त करनेवाले देवोंके बाजोंके महान् शब्द हो रहे थे और दूसरी ओर नान्दी पटह आदि मांगलिक बाजोंके घोर शब्द सब ओर फैल रहे थे ॥८७॥ एक ओर किन्नर जातिके देवोंके द्वारा प्रारम्भ किये हुए मनोहर मंगल गीतोंके शब्द हो रहे थे और दूसरी ओर अन्तःपुरकी स्त्रियोंके मंगल गानोंकी मधुर ध्वनि हो रही थी ॥८८॥ एक ओर करोड़ों देवोंका जय जय ध्वनिका कोलाहल हो रहा था और दूसरी ओर पुण्यपाठ करनेवाले करोड़ों

---

१ राज्यसमर्पणोत्सवः । "कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ।" २ विवाहे । ३ गृहलक्षण । ४ बहुस्त्रियः म०, ल० । बहुश्रिय. ट० । श्रीदेवीसदृशा. । 'सुपः प्राग्बहुर्वेति' ईषदपरिसमाप्तौ बहुप्रत्ययः । ५ देवमुख्यैः । "वृन्दारकौ रूपिमुख्यौ एके मुख्यान्यकेवला ।" इत्यमरः । ६ आशीर्भिः सहिता । ७ शेषाः-क्षता । ८ प्रविजृम्भणम् । ९ निस्वनः ल० ।

इत्युच्चैरुत्सवद्वंसव्यग्रद्युजनभूजनम् । [1]परमानन्दसाद्भूतम् अभूत्तद्राजमन्दिरम् ॥ ९० ॥
वित्तीर्णराज्यभारस्य विभोरधियुवेश्वरम्[2] । परिनिष्क्रमणोद्योगस्तदा जज्ञे निराकुलः ॥ ९१ ॥
शेषेभ्योऽपि स्वसूनुभ्यः संविभज्य महीमिमाम् । विभुर्विश्राणयामास[3] निर्मुमुक्षुरसम्भ्रमी[4] ॥ ९२ ॥
सुरेन्द्रनिर्मितां दिव्यां शिबिकां स सुदर्शनाम् । सनाभीन्नाभिराजादीन् आपृच्छ्यारुक्षदक्षरः[5] ॥ ९३ ॥
सादरं च शचीनाथदत्तहस्तावलम्बनः । प्रतिज्ञामिव दीक्षायाम् आरूढः शिबिकां [6]विभुः ॥ ९४ ॥
दीक्षाङ्गनापरिष्वङ्ग[7]परिवर्धितकौतुकः । प्रशय्यां नु[8] समारूढः स धाता शिबिकाछलात् ॥ ९५ ॥
स्रग्वी मलयजालिप्तदीप्तमूर्तिरलंकृतः । स रेजे शिबिकारूढः तपोलक्ष्म्या वरोत्तमः ॥ ९६ ॥
परां विशुद्धिमारूढ प्राक् पश्चाच्छिबिकां विभुः । तदाकरोदिवाभ्यासं गुणश्रेण्यधिरोहणे ॥ ९७ ॥
पदानि सप्त तामूहुः शिबिकां प्रथमं नृपाः । ततो विद्याधरा निन्युः व्योम्नि सप्त पदान्तरम् ॥ ९८ ॥
[9]स्कन्धाधिरोपितां कृत्वा ततोऽमूमविलम्बितम्[10] । सुरासुराः खमुत्पेतुः आरूढप्रमदोदयाः ॥ ९९ ॥
[11]पर्याप्तमिदमेवास्य प्रभोर्माहात्म्यशंसनम् । यत्तदा त्रिदिवाधीशा जाता [12]युग्यकवाहिनः ॥ १०० ॥

मनुष्योंके पुण्यपाठका शब्द हो रहा था ॥८९॥ इस प्रकार दोनों ही बड़े बड़े उत्सवोंमें जहां देव और मनुष्य व्यग्र हो रहे हैं ऐसा वह राज-मन्दिर परम आनन्दसे व्याप्त हो रहा था—उसमें सब ओर हर्ष ही हर्ष दिखाई देता था ॥९०॥ भगवान्‌ने अपने राज्यका भार दोनों ही युवराजों-को समर्पित कर दिया था इसलिये उस समय उनका दीक्षा लेनेका उद्योग बिलकुल ही निराकुल हो गया था—उन्हें राज्यसम्बन्धी किसी प्रकारकी चिन्ता नहीं रही थी ॥९१॥ मोक्षकी इच्छा करनेवाले भगवान्‌ने संभ्रम—आकुलतासे रहित होकर अपने शेष पुत्रोंके लिये भी यह पृथिवी विभक्त कर बाँट दी थी ॥९२॥ तदनन्तर अक्षर—अविनाशी भगवान्, महाराज नाभिराज आदि परिवारके लोगोंसे पूछकर इन्द्रके द्वारा बनाई हुई सुन्दर सुदर्शन नामकी पालकीपर बैठे ॥९३॥ बड़े आदरके साथ इन्द्रने जिन्हें अपने हाथका सहारा दिया था ऐसे भगवान् वृषभ-देव दीक्षा लेनेकी प्रतिज्ञाके समान पालकीपर आरूढ हुए थे ॥९४॥ दीक्षारूपी अंगनाके आलिगन करनेका जिनका कौतुक बढ़ रहा है ऐसे भगवान् वृषभदेव उस पालकीपर आरूढ़ होते हुए ऐसे जान पड़ते थे मानो पालकीके छलसे दीक्षारूपी अंगनाकी श्रेष्ठ शय्यापर ही आरूढ़ हो रहे हों ॥९५॥ जो मालाए पहने हुए हैं, जिनका देदीप्यमान शरीर चन्दनके लेपसे लिप्त हो रहा है और जो अनेक प्रकारके वस्त्राभूषणोंसे अलंकृत हो रहे हैं ऐसे भगवान् वृषभ-देव पालकीपर आरूढ़ हुए ऐसे सुशोभित हो रहे थे मानो तपरूपी लक्ष्मीके उत्तम वर ही हों ॥९६॥ भगवान् वृषभदेव पहले तो परम विशुद्धतापर आरूढ़ हुए थे अर्थात् परिणामों की विशुद्धताको प्राप्त हुए थे और बादमें पालकीपर आरूढ़ हुए थे इसलिये वे उस समय ऐसे जान पडते थे मानो गुणस्थानोंकी श्रेणी चढनेका अभ्यास ही कर रहे हों ॥९७॥ भगवान्‌की उस पालकीको प्रथम ही राजा लोग सात पैंड तक ले चले और फिर विद्याधर लोग आकाशमें सात पैंड तक ले चले ॥९८॥ तदनन्तर वैमानिक और भवनत्रिक देवोंने अत्यन्त हर्षित होकर वह पालकी अपने कन्धोंपर रक्खी और शीघ्र ही उसे आकाशमें ले गये ॥९९॥ भगवान् वृषभ-देवके माहात्म्यकी प्रशंसा करना इतना ही पर्याप्त है कि उस समय देवोंके अधिपति इन्द्र भी

---

१ परमानन्दमयमित्यर्थः । २ युवेश्वरयोः । ३ ददौ । 'श्रण दाने' इति धातोः । ४ अनाकुलः स्थैर्यवान् दीक्षाग्रहणसम्भ्रमवान् भूत्वा प्राक्तनकार्यव्याकुलान्तःकरणो न भवतीत्यर्थः । ५ विनश्वरः । ६ प्रभुः अ०, प०, इ०, स०, द०, म०, ल० । ७ आलिगन । ८ इव । तु अ०, म० । ९ भुजशिर । १० आशु । ११ अलम् । १२ यानवाहकाः ।

तदा [1]किरवकरुः पुष्पवर्षमामोदि गुह्यकाः[2]। ववौ मन्दाकिनीसीकराहारः[3] शिशिरो मरुत् ॥ १०१ ॥
प्रस्थानमङ्गलान्युच्चैः संपेठुः[4] सुरबन्दिनः। तदा प्रयाणभेर्यश्च विष्वगास्फालिताः[5] सुरैः ॥ १०२ ॥
मोहारिविजयोद्योगसमयोऽयं जगद्गुरोः। इत्युच्चैर्घोषयामासुः तदा शक्राज्ञयाऽमराः ॥ १०३ ॥
जयकोलाहलं भर्तुः अग्रे हृष्टाः सुरासुराः। तदा चक्रुर्नभोऽशेषम् आरुध्य प्रमदोदयात् ॥ १०४ ॥
तदा मङ्गलसंगीतैः प्रकृतैर्जयघोषणैः। नभो महानकध्वानैः आरुद्धं [6]शब्दसाद्भूत् ॥ १०५ ॥
देहोद्योतस्तदेन्द्राणां नभः कृत्स्नमविद्युतत्। दुन्दुभीनां च निर्ह्रादी ध्वनिर्विश्वमदिध्वनत् ॥ १०६ ॥
सुरेन्द्रकरविक्षिप्तैः प्रचलद्भिरितोऽमुतः। तदा हंसायितं व्योम्नि चामराणां कदम्बकैः ॥ १०७ ॥
ध्वनत्सीषु नभो व्याप्य सुरेन्द्रानककोटिषु। कोटिशः सुरचेटानां[7] करकोणाभिताडनैः ॥ १०८ ॥
नटन्तीषु नभोरङ्गे सुरस्त्रीषु सविभ्रमम्। विचित्र[8]करणोपे[9]तच्छत्रबन्धादिलाघवैः ॥ १०९ ॥
गायन्तीषु सुकण्ठीषु किन्नरीषु कलस्वनम्। श्रवःसुखं च हृद्यं च परिनिः[10]क्रमणोत्सवम् ॥ ११० ॥
मङ्गलानि पठत्सूच्चैः सुरवं सुरबन्दिषु। तत्कालोचितमन्यच्च वचश्चेतोऽनुरञ्जनम् ॥ १११ ॥
[11]भूतेषूद्भूतहर्षेषु चित्रकेतनधारिषु[12]। नानालास्यैः प्रधावत्सु [13]ससंघर्षमितोऽमुतः ॥ ११२ ॥

उनकी पालकी ले जानेवाले हुए थे अर्थात् इन्द्र स्वयं उनकी पालकी ढो रहे थे ॥१००॥ उस समय यक्ष जातिके देव सुगन्धित फूलोंकी वर्षा कर रहे थे और गंगानदीके जलकणोंको धारण करनेवाला शीतल वायु बह रहा था ॥१०१॥ उस समय देवोंके बन्दीजन उच्च स्वरसे प्रस्थान समयके मंगल पाठ पढ़ रहे थे और देव लोग चारों ओर प्रस्थानसूचक भेरियां बजा रहे थे ॥१०२॥ उस समय इन्द्रकी आज्ञा पाकर समस्त देव जोर जोरसे यही घोषणा कर रहे थे कि जगद्गुरु भगवान् वृषभदेवका मोहरूपी शत्रुको जीतनेके उद्योग करनेका यही समय है ॥१०३॥ उस समय हर्षित हुए सुर असुर जातिके सभी देव आनन्दकी प्राप्तिसे समस्त आकाशको घेरकर भगवान्‌के आगे जय जय ऐसा कोलाहल कर रहे थे ॥१०४॥ मगलगीतो, बार-बार की गई जय-घोषणाओं और बड़े बड़े नगाड़ोंके शब्दोंसे सब ओर व्याप्त हुआ आकाश उस समय शब्दो के आधीन हो रहा था अर्थात् चारों ओर शब्द ही शब्द सुनाई पड़ते थे ॥१०५॥ उस समय इन्द्रोंके शरीरकी प्रभा समस्त आकाशको प्रकाशित कर रही थी और दुन्दुभियोका विपुल तथा मनोहर शब्द समस्त संसारको शब्दायमान कर रहा था ॥१०६॥ उस समय इन्द्रोंके हाथोंसे ढुलाये जानेके कारण इधर उधर फिरते हुए चमरोंके समूह आकाशमे ठीक हंसोंके समान जान पड़ते थे ॥१०७॥ जिस समय भगवान् पालकीपर आरूढ हुए थे उस समय करोड़ो देवकिंकरोंके हाथोंमे स्थित दण्डोंकी ताड़नासे इन्द्रोंके करोड़ों दुन्दुभि बाजे आकाशमे व्याप्त होकर बज रहे थे ॥१०८॥ आकाशरूपी आंगनमें अनेक देवागनाए विलास सहित नृत्य कर रही थी उनका नृत्य छत्रबन्ध आदिकी चतुराई तथा आश्चर्यकारी अनेक करणों—नृत्यभेदों से सहित था ॥१०९॥ मनोहर कठवाली किन्नर जातिकी देवियाँ अपने मधुर स्वरसे कानों को सुख देनेवाले मनोहर और मधुर तप कल्याणोत्सवका गान कर रही थीं—उस समयके गीत गा रही थी ॥११०॥ देवोंके बंदीजन उच्च स्वरसे किन्तु उत्तम शब्दोंसे मगल पाठ पढ़ रहे थे तथा उस समयके योग्य और सबके मनको अनुरक्त करनेवाले अन्य पाठोंको भी पढ़ रहे थे ॥१११॥ जिन्हे अत्यन्त हर्ष उत्पन्न हुआ है और जो चित्र-विचित्र—अनेक प्रकारकी पताकाएं

---

१ तदावचकरुः अ०, प०, द०, स०, म०, ल०। किरन्ति स्म। २ देवभेदाः। ३-राहरः इ०, स०। ४ प्रपेठुः अ०, प०, इ०, स०, म०, द०, ल०। ५ ताडिताः। ६ शब्दमयमभूदित्यर्थः। ७ किंकराणाम्। ८ करन्यास। ९ करणोपेतं द०, इ०। १० परिनिष्क्रमणोत्सवम् अ०। ११ व्यन्तरदेवेषु। १२-केतनहारिषु प०, द०, म०, स०। १३ सम्मर्दसहितं यथा भवति तथा। सुसंघर्ष-प०, म०, ल०।

शङ्खानाध्मातगण्डेषु [1]पिण्डीभूताङ्गयष्टिषु। सकाहलाभिलिम्पेषु पूरयत्स्वनुरागतः ॥ ११३ ॥
[2]अग्रेसरीषु लक्ष्मीषु[3] पङ्कजव्यग्रपाणिषु। समं समङ्गलार्घाभिर्दिक्कुमारीभिरादरात् ॥ ११४ ॥
इत्यमीषु विशेषेषु प्रभवत्सु यथायथम्। सम्प्रमोदमयं विश्वम् आतन्वन्नद्भुतोदयः ॥ ११५ ॥
परार्ध्यरत्ननिर्माणं दिव्यं यानमधिष्ठितः। रत्नक्षोणीप्रतिष्ठस्य श्रियं मेरोर्विडम्बयन् ॥ ११६ ॥
कण्ठाभरणभाभारपरिवेषोपरक्तया[4]। मुखार्क्कभासा न्यक्कुर्वन्[5] ज्योतिर्ज्योतिर्गणेशिनाम् ॥ ११७॥
उत्तमाङ्गधृतेनोच्चैः मौलिना[6] विमणित्विषा। धुन्वानोग्नीन्द्रमौलीनां त्विषामाविष्कृतार्चिषाम् ॥११८॥
किरीटोत्सङ्गसङ्गिन्या सुमनःशेखरस्रजा। मनःप्रसादमात्मीयं मूर्ध्नवोद्धृत्य दर्शयन् ॥ ११९ ॥
प्रसन्नया दृशोर्भासा प्रोल्लसन्त्या समन्ततः। दृग्विलासं सहस्राक्षे सान्न्यासि[7]कमिवार्पयन् ॥ १२० ॥
तिरस्कृताधरच्छायैर्दरोद्भिन्नैः स्मितांशुभिः। क्षालयन्निव निःशेषं रागशेषं स्वशुद्धिभिः ॥ १२१ ॥
हारेण हारिणा चारुवक्षःस्थलविलम्बिना। विडम्बयन्निवाद्रीन्द्रं प्रान्तपर्य[8]स्तनिर्झरम् ॥ १२२ ॥

लिये हुए हैं ऐसे भूत जातिके व्यन्तर देव भीड़में धक्का देते तथा अनेक प्रकारके नृत्य करते हुए इधर उधर दौड़ रहे थे ॥११२॥ देव लोग बड़े अनुरागसे अपने गालोंको फुलाकर और शरीरको पिडके समान संकुचितकर तुरही तथा शंख बजा रहे थे ॥११३॥ हाथोंमें कमल धारण किये हुई लक्ष्मी आदि देवियाँ आगे आगे जा रही थी और बड़े आदरसे मंगल द्रव्य तथा अर्घ लेकर दिक्कुमारी देवियाँ उनके साथ-साथ जा रही थी ॥११४॥ इस प्रकार जिस समय यथायोग्य रूपसे अनेक विशेषताएं हो रही थीं उस समय अद्भुत वैभवसे शोभायमान भगवान् वृषभदेव समस्त संसारको आनन्दित करते हुए अमूल्य रत्नोंसे बनी हुई दिव्य पालकीपर आरूढ़ होकर अयोध्यापुरीसे बाहर निकले। उस समय वे रत्नमयी पृथ्वीपर स्थित मेरु पर्वतकी शोभाको तिरस्कृत कर रहे थे। गलेमें पड़े हुए आभूषणोंकी कान्तिके समूहसे उनके मुखपर जो परिधिके आकारका लाल लाल प्रभामण्डल पड रहा था उससे उनका मुख सूर्यके समान मालूम होता था, उस मुखरूपी सूर्यकी प्रभासे वे उस समय ज्योतिषी देवोंके इन्द्र अर्थात् चन्द्रमाकी ज्योतिको भी तिरस्कृत कर रहे थे। जिससे मणियोंकी कान्ति निकल रही है ऐसे मस्तकपर धारण किये हुए ऊंचे मुकुटसे वे, जिनसे ज्वाला प्रकट हो रही है ऐसे अग्निकुमार देवोंके इन्द्रोंके मुकुटोंकी कान्तिको भी तिरस्कृत कर रहे थे। उनके मुकुटके मध्यमें जो फूलोंका सेहरा पड़ा हुआ था उसकी मालाओंके द्वारा मानो वे भगवान् अपने मनकी प्रसन्नताको ही मस्तक पर धारण कर लोगोंको दिखला रहे थे। उनके नेत्रोंकी जो स्वच्छ कान्ति चारों ओर फैल रही थी उससे वे ऐसे जान पड़ते थे मानो इन्द्रके लिये संन्यास धारण करनेके समय होनेवाला नेत्रोंका विलास ही अर्पित कर रहे हों अर्थात् इन्द्रको सिखला रहे हों कि सन्न्यास धारण करनेके समय नेत्रोंकी चेष्टाएं इतनी प्रशान्त हो जाती है। कुछ कुछ प्रकट होती हुई मुसकानकी किरणोंसे उनके ओठोंकी लाल लाल कान्ति भी छिप जाती थी जिससे वे ऐसे जान पड़ते थे मानो अपनी विशुद्धिके द्वारा बाकी बचे हुए सम्पूर्ण रागको ही धो रहे हों। उनके सुन्दर वक्षःस्थलपर जो मनोहर हार पड़ा हुआ था उससे वे भगवान् जिसके किनारेपर निर्भरना पड़ रहा है ऐसे सुमेरु पर्वतकी भी विडम्बना कर रहे थे। जिनमें कड़े बाजूबंद आदि आभूषण चमक रहे हैं ऐसी अपनी भुजाओंकी शोभासे वे नागेन्द्रके फणमे लगे हुए रत्नोंकी कान्तिके समूहकी भर्त्सना कर रहे थे। करधनीसे घिरे हुए जघनस्थलकी शोभासे भगवान् ऐसे मालूम होते थे मानो वेदिकासे घिरे हुए जम्बू द्वीपकी शोभा ही स्वीकृत कर रहे हों। ऊपरकी दोनों गांठोंतक देदीप्य-

१ संकोचीभूत। २ पुरोगामिनीषु। ३ श्रीह्रीधृत्यादिषु। ४ उपरञ्जितया। ५ अधःकुर्वन्। न्यत्कुर्वन् प०, म०, ल०। ६ मुकुटेन। ७ निक्षेपार्हम्। 'अमानित-निक्षेप' । ८ प्रवृत्त।

भुजयोः शोभया [1]दीप्रकटकाङ्गदभूषया । निर्भर्त्सयन् फणीन्द्राणां फणारत्नरुचां चयम् ॥ १२३ ॥
काञ्चीदामपरिक्षिप्तजघनस्थललीलया । स्वीकुर्वन् वेदिका रुद्धजम्बूद्वीपस्थलश्रियम् ॥ १२४ ॥
[2]क्रमोपधानपर्यन्त[3]लसत्पदनखांशुभिः । प्रसादांशैरिवाशेषं पुनानः प्रणतं जनम् ॥ १२५ ॥
न्य[4]क्कृतार्करुचा स्वाङ्गदीप्त्या व्याप्तककुम्मुखः[5] । स्वेनौजसाधरीकुर्वन् सर्वान् गीर्वाणनायकान् ॥ १२६ ॥
इति प्रत्यङ्गसङ्गिन्या नैःसङ्ग्योचितया श्रिया । [6]निर्वासयन्निवासङ्गं[7] चिर[8]कालोपलालितम् ॥ १२७ ॥
विधृतेन सितच्छत्रमण्डलेनामलत्विषा । विधुनेवोपरिस्थेन सेव्यमानः [9]क्लमच्छिदा ॥ १२८ ॥
प्रकीर्णकप्रतानेन [10]विधुतेनामरेश्वरैः । [11]जन्मोत्सवक्षणप्रीत्या क्षीरोदेनेव सेवितः ॥ १२९ ॥
इत्याविष्कृतमाहात्म्यः सुरेन्द्रैः परितो वृतः । पुरः पुराद् विनिष्क्रान्तः पौरैरित्यभिनन्दितः ॥ १३० ॥
व्रज सिद्ध्यै जगन्नाथ शिवः पन्थाः समस्तु ते । [12]निष्ठितार्थः पुनर्देव दृक्पथे नो[13] भवाचिरात् ॥ १३१ ॥
नाथानाथं जनं त्रातुं नान्यस्त्वमिव कर्मठः[14] । तस्मादस्मत्परित्राणे[15] प्रणिधेहि[16] मनः पुनः ॥ १३२ ॥
परानुग्रहकाराणि चेष्टितानि तव प्रभो । निर्व्यपेक्षं विहायास्मान् कोऽनुग्राह्यस्त्वयापरः ॥ १३३ ॥
इति श्लाघ्यं प्रसन्नं च [17]सानुतर्षं [18]सनाथनम् । कैश्चित् सञ्जल्पितं पौरैः आरात् प्रणतमूर्द्धभिः ॥१३४॥
अयं स भगवान् दूरं देवैरुत्क्षिप्य नीयते । न विद्मः कारणं [19]किन्नु क्वेडयमथवेदृशी ॥ १३५ ॥

मान होती हुई पैरोंकी किरणोंसे वे भगवान् ऐसे मालूम होते थे मानो नमस्कार करते हुए सम्पूर्ण लोगोंको अपनी प्रसन्नताके अंशोंसे पवित्र ही कर रहे हों । उस समय सूर्यकी कान्तिको भी तिरस्कृत करनेवाली अपने शरीरकी दीप्तिसे जिन्होंने सब दिशाएँ व्याप्त कर ली है ऐसे भगवान् वृषभदेव अपने ओजसे समस्त इन्द्रोंको नीचा दिखा रहे थे । इस प्रकार प्रत्येक अंग उपांगोंसे सम्बन्ध रखनेवाली वैराग्यके योग्य शोभासे वे ऐसे जान पड़ते थे मानो चिरकालसे पालन-पोषण की हुई परिग्रहकी आसक्तिको ही बाहर निकाल रहे हों । ऊपर लगे हुए निर्मल कान्तिवाले सफेद छत्रके मण्डलसे वे ऐसे शोभायमान हो रहे थे मानो क्लेशोंको दूर करनेवाला चन्द्रमा ही ऊपर आकर उनकी सेवा कर रहा हो । इन्द्रोंके द्वारा ढलाये हुए चमरोंके समूहसे भगवान् ऐसे शोभायमान हो रहे थे मानो जन्मकल्याणकके क्षणभरके प्रेमसे क्षीरसागर ही आकर उनकी सेवा कर रहा हो । इस प्रकार ऊपर लिखे अनुसार जिनका माहात्म्य प्रकट हो रहा है और अनेक इन्द्र जिन्हें चारों ओरसे घेरे हुए हैं ऐसे वे भगवान् वृषभदेव अयोध्यापुरीसे बाहर निकले । उस समय नगरनिवासी लोग उनकी इस प्रकार स्तुति कर रहे थे ॥११५–१३०॥ हे जगन्नाथ, आप कार्यकी सिद्धिके लिये जाइये, आपका मार्ग कल्याणमय हो और हे देव, आप अपना कार्य पूरा कर फिर भी शीघ्र ही हम लोगोंके दृष्टिगोचर होइए ॥१३१॥ हे नाथ, अनाथ पुरुषोंकी रक्षा करनेके लिये आपके समान और कोई भी समर्थ नही है इसलिये हम लोगोंकी रक्षा करनेमें आप अपना मन फिर भी लगाइये ॥१३२॥ हे प्रभो, आपकी समस्त चेष्टाएँ पुरुषों का उपकार करनेवाली होती हैं, आप बिना कारण ही हम लोगोंको छोड़कर अब और किसका उपकार करेंगे ? ॥१३३॥ इस प्रकार कितने ही नगरनिवासियोंने दूरसे ही मस्तक झुकाकर प्रशंसनीय, स्पष्ट अर्थको कहनेवाले और कामना सहित प्रार्थनाके वचन कहे थे ॥१३४॥ उस समय कितने ही नगरवासी परस्परमें ऐसा कह रहे थे कि देव लोग भगवान्‌को पालकी

---

१ दीप्त–द०, स०, इ०, ल०, म० । २ चरणकूर्पाससमीप । ३ पर्य्यन्तोल्लस–ल०, म०, द०, स०, इ० । ४ अधःकृत । ५ ककुब्मुखः म०, प०, ल० । ६ निष्कासयन् प्रेषयन्निव । ७ परिग्रहम् आसक्ति वा । ८ प्रेषणकाले आलिंगनपूर्वकं प्रेषयन्ति तावच्चिरकालोपलालितानाभरणाद्यासंगात्तत्पूर्वकं प्रेषयन्निव प्रत्यगसंगतैराभरणैर्भातीत्यर्थः । ९ ग्लानि । १० विधूतेना–म०, ल० । ११ जन्माभिषेकसमय । १२ निष्पन्नप्रयोजनः सन् । १३ अस्माकम् । १४ कर्मशूरः । १५ परिरक्षणे । १६ एकाग्रं कुरु । १७ वाञ्छासहितम् । सानुकर्षं अ०, स० । १८ प्रार्थनासहितम् । १९ किन्तु प०, अ०, म०, ल० ।

सप्तदशं पर्व

भवेदपि भवेदेतन्नीतो मेरुं पुराप्ययम् । प्रत्यानीतश्च नाकीन्द्रैर्जन्मोत्सवविधित्सया[१] ॥ १३६ ॥
स एवाद्यापि वृत्तान्तो जात्वस्मद्भाग्यतो भवेत् । ततो न काचनास्माकं व्यथेत्यन्ये मिथोऽब्रुवन् ॥१३७॥
किमेष भगवान् भानुः आस्थितः शिबिकामिमाम् । देदीप्यतेऽम्बरे भाभिः प्रतुदन्निव नो दृशः ॥१३८॥
धृतमौलिर्विभात्युच्चैः तप्तचामीकरच्छविः । विभुर्मध्ये सुरेन्द्राणां कुलाद्रीणामिवाद्रिराट् ॥ १३९ ॥
विभोर्मुखो[२]न्मुखीर्दृष्टीः दधानोऽद्भुतविक्रियः । [३]कः [४]स्विदाज्ञातमस्याज्ञाकरः सोऽयं पुरन्दरः ॥ १४० ॥
शिबिकावाहिनामेषाम् अङ्गभासो महौजसाम् । समन्तात् प्रोल्लसन्त्येताः तडितामिव रीतयः[५] ॥ १४१ ॥
महत्पुण्यमहो भर्तुः अवाङ्[६]मनसगोचरम् । पश्यतानिमिषानेतान् प्रप्रणम्रानितोऽमुतः ॥ १४२ ॥
इतो मधुरगम्भीरं ध्वनन्त्येते सुरानकाः । इतो मन्द्रं मृदङ्गानाम् उच्चैरुच्चरति ध्वनिः ॥ १४३ ॥
इतो नृत्यमितो गीतमितः संगी[७]तमङ्गलम् । इतश्चामरसङ्घात इतश्चामरसंहतिः ॥ १४४ ॥
सञ्चारी किमयं स्वर्गः [८]साप्सरास्सविमानकः । किं वापूर्वमिदं चित्रं लिखितं व्योम्नि केनचित् ॥ १४५ ॥
किमिन्द्रजालमेतत्स्याद् उतास्मन्मतिविभ्रमः । अदृष्टपूर्वमाश्चर्यम् इदमीदृग्न जातुचित् ॥ १४६ ॥
इति केचित्तदाश्चर्यं पश्यद्भिः प्राप्तविस्मयैः । स्वैरं सञ्जल्पितं पौरैः जल्पाकैः[९] सविकल्पकैः ॥ १४७ ॥

पर सवार कर कहीं दूर ले जा रहे हैं परन्तु हम लोग इसका कारण नहीं जानते अथवा भगवान् की यह कोई ऐसी ही क्रीडा होगी अथवा यह भी हो सकता है कि पहले इन्द्र लोग जन्मोत्सव करनेकी इच्छासे भगवान्को सुमेरु पर्वतपर ले गये थे और फिर वापिस ले आये थे। कदाचित् हम लोगोंके भाग्यसे आज फिर भी वही वृत्तान्त हो इसलिये हम लोगोंको कोई दुःखकी बात नहीं है ॥१३५-१३७॥ कितने ही लोग आश्चर्यके साथ कह रहे थे कि पालकीपर सवार हुए ये भगवान् क्या साक्षात् सूर्य हैं क्योंकि ये सूर्यकी तरह ही अपनी प्रभाके द्वारा हमारे नेत्रोंको चकाचौंध करते हुए आकाशमें देदीप्यमान हो रहे हैं ॥१३८॥ जिस प्रकार कुलाचलोंके बीच चूलिका सहित सुवर्णमय सुमेरु पर्वत शोभित होता है उसी प्रकार इन्द्रोंके बीच मुकुट धारण किये और तपाये हुए सुवर्णके समान कान्तिको धारण किये हुए भगवान् बहुत ही सुशोभित हो रहे हैं॥१३९॥ जो भगवान्के मुखके सामने अपनी दृष्टि लगाये हुए है और जिसकी विक्रियाएँ अनेक आश्चर्य उत्पन्न करनेवाली हैं ऐसा यह कौन है ? हाँ, मालूम हो गया, कि यह भगवान्का आज्ञाकारी सेवक इन्द्र है ॥१४०॥ इधर देखो, यह पालकी ले जानेवाले महातेजस्वी देवोंके शरीरकी प्रभा चारों ओर फैल रही है और ऐसी मालूम होती है मानो बिजलियोंका समूह ही हो ॥१४१॥ अहा, भगवान्का पुण्य बहुत ही बड़ा है वह न तो वचनसे ही कहा जा सकता है और न मनसे ही उसका विचार किया जा सकता है। इधर उधर भक्तिके भारसे झुके हुए—प्रणाम करते हुए इन देवोंको देखो ॥१४२॥ इधर ये देवोंके नगाड़े मधुर और गभीर शब्दोंसे बज रहे हैं और इधर यह मृदङ्गोंका गंभीर तथा जोरका शब्द हो रहा है ॥१४३॥ इधर नृत्य हो रहा है, इधर गीत गाये जा रहे हैं, इधर संगीत मंगल हो रहा है, इधर चमर ढुलाये जा रहे हैं और इधर देवोंका अपार समूह विद्यमान है ॥१४४॥ क्या यह चलता हुआ स्वर्ग है जो अप्सराओं और विमानोंसे सहित है अथवा आकाशमें यह किसीने अपूर्व चित्र लिखा है ॥१४५॥ क्या यह इन्द्रजाल है—जादूगरका खेल है अथवा हमारी बुद्धिका भ्रम है । यह आश्चर्य बिलकुल ही अदृष्टपूर्व है—ऐसा आश्चर्य हम लोगोंने पहले कभी नहीं देखा था ॥१४६॥ इस प्रकार अनेक विकल्प करनेवाले तथा बहुत बोलनेवाले नगर-निवासी लोग भगवान्के उस आश्चर्य—

---

१ विधातुमिच्छया। २ अभिमुखी। ३ किं स्विदा–स०, इ०, प०, अ०। ४ 'स्वित् प्रश्ने वितर्के च'। ५ मालाः। ६ अवाङ्मानस–इ०, ल०, म०। ७ वाद्य। ८ साप्सरः सविमानकः अ०, स०, ल०, म०। ९ वाचालैः।

यदा प्रभृति देवोयम् अवतीर्णो धरातलम् । तदा प्रभृति देवानां न [1]गत्यागतिविच्छिदा ॥ १४८ ॥
नृत्यं नीलाञ्जनाख्यायाः पश्यतः सुरयोषितः । उदपादि विभोर्भोगिवैराग्यमनिमित्तकम् ॥ १४९ ॥
तत्कालो[2]पनतैर्मान्यैः सुरैर्लौकान्तिकाह्वयैः । बोधितस्यास्य वैराग्ये दृढमासञ्जितं[3] मनः ॥ १५० ॥
विरक्तः कामभोगेषु स्वशरीरेऽपि निस्पृहः । [4]सवस्तुवाहनं राज्यं तृणवन्मन्यतेऽधुना ॥ १५१ ॥
मतङ्गज इव स्वैरविहारसुखलिप्सया । [5]प्रविविक्षुर्वनं देवः सुरैः प्रोत्साह्य नीयते ॥ १५२ ॥
स्वाधीनं सुखमस्त्येव वनेऽपि वसतः प्रभोः । प्रजानां [6]क्षेमधृत्यै च पुत्रौ राज्ये निवेशितौ ॥ १५३ ॥
[7]तदियं प्रस्तुता यात्रा भूयाद् भर्तुः सुखावहा । [8]दिष्टयायं वर्धतां लोको विषीदन्मा[9] स्म कश्चन ॥ १५४ ॥
सुचिरं जीवताद्देवो जयताद‌भिनन्दतात् । [10]प्रत्यावृत्तः पुनश्चास्मान् अक्षता[11]स्माभिरक्षतात् ॥ १५५ ॥
दीयतेऽद्य महादानं भरतेन महात्मना । विभोराज्ञां समासाद्य जगदाशाप्रपूरणम् ॥ १५६ ॥
वितीर्णेनामुना भूयाद्[12]धृतिश्चामीकरेण[13] वः[14] । दीयन्तेऽश्वाः स[15]हायोग्यैरितश्चामीकरेणवः[16] ॥१५७॥
इत्युन्मुग्धैः प्रबुद्धैश्च जनालापैः पृथग्विधैः । श्लाघ्यमानः शनैर्नाथः पुरोपान्तं व्यतीयिवान् ॥ १५८ ॥

(अतिशय) को देखकर विस्मयके साथ यथेच्छ बाते कर रहे थे ॥१४७॥ अनेक पुरुष कह रहे थे कि जबसे इन भगवान्ने पृथिवी तलपर अवतार लिया है तबसे यहाँ देवोंके आने-जानेमें अन्तर नहीं पड़ता--बराबर देवोंका आना-जाना बना रहता है ॥१४८॥ नीलाञ्जना नामकी देवाङ्गनाका नृत्य देखते देखते ही भगवान्को बिना किसी अन्य कारणके भोगोंसे वैराग्य उत्पन्न हो गया है ॥१४९॥ उसी समय आये हुए माननीय लौकान्तिक देवोंने भगवान्को सम्बोधित किया जिससे उनका मन वैराग्यमे और भी अधिक दृढ हो गया है ॥१५०॥ काम और भोगों से विरक्त हुए भगवान् अपने शरीरमें भी नि.स्पृह हो गये है अब वे महल सवारी तथा राज्य आदिको तृणके समान मान रहे है ॥१५१॥ जिस प्रकार अपनी इच्छानुसार विहार करने रूप सुखकी इच्छासे मत्त हाथी वनमें प्रवेश करता है उसी प्रकार भगवान् वृषभदेव भी स्वातन्त्र्य सुख प्राप्त करनेकी इच्छासे वनमें प्रवेश करना चाहते है और देव लोग प्रोत्साहित कर उन्हें ले जा रहे है ॥१५२॥ यदि भगवान् वनमे भी रहेगे तो भी सुख उनके स्वाधीन ही है और प्रजाके सुखके लिये उन्होंने अपने पुत्रोंको राज्यसिंहासनपर बैठा दिया है ॥१५३॥ इसलिये भगवान्की प्रारम्भ की हुई यह यात्रा उन्हे सुख देनेवाली हो तथा ये लोग भी अपने भाग्यसे वृद्धिको प्राप्त हों, कोई विषाद मत करो ॥१५४॥ अक्षतात्मा अर्थात् जिनका आत्मा कभी भी नष्ट होनेवाला नही है ऐसे भगवान् वृषभदेव चिर कालतक जीवित रहें, विजयको प्राप्त हों, समृद्धिमान् हों और फिर लौटकर हम लोगोंकी रक्षा करें ॥१५५॥ महात्मा भरत आज विभुकी आज्ञा लेकर जगत्की आशाएँ पूर्ण करनेवाला महादान दे रहे है ॥१५६॥ इधर भरतने जो यह सुवर्णका दान दिया है उससे तुम सबको सतोष हो, इधर पलानों सहित घोड़े दिये जा रहे है और इधर ये हाथी वितरण किये जा रहे है ॥१५७॥ इस प्रकार अजान और ज्ञानवान् सब ही अलग अलग प्रकारके वचनों द्वारा जिनकी स्तुति कर रहे हैं ऐसे भगवान् वृषभदेव ने धीरे धीरे नगरके बाहर समीपवर्त्ती प्रदेशको पार किया ॥१५८॥

---

१ गत्यागम--प०, अ०, इ०, द०, म०, स०, ल० । गमनागमनविच्छिद । २ आगतैः । ३ सयोजितम् । ४ सवास्तुवाहनं प०, म०, द०, ल० । 'न वस्तु वाहन' इत्यपि वचन क्वचित् । ५ प्रवेशमिच्छुः । ६ क्षेमवृत्त्यै अ०, प०, इ०, द०, स०, म०, ल० । ७ तत् कारणात् । ८ सन्तोषेण । ९ लङ्, मा स्म योगादाड्निषेधः । १० व्यावृत्य गत । ११-स्माधिरक्ष--म०, ल० । १२ भृतिश्चामी--प०, द० । वृत्तिश्चामी--अ०, इ०, स० । १३ सुवर्णेन । १४ युष्माकम् । १५ पल्ययनैः परिमाणैरित्यर्थः । सहयोगै--म०, ल० । १६ दन्तिनः ।

अथ सम्प्रस्थिते देवे देव्योऽमात्यैरधिष्ठिताः[1]। अनुप्रचेलुरीशानं शुचान्तर्बाष्पलोचनाः ॥ १५९ ॥
लता इव परिम्लानगात्रशोभा विभूषणाः[2]। काश्चित् स्खलत्पदन्यासम् अनुजग्मुर्जगत्पतिम् ॥ १६० ॥
शोकानिलहताः काश्चिद् वेप[3]मानाङ्गयष्टयः। निपेतुर्धरणीपृष्ठे [4]मूर्च्छामीलितलोचनाः ॥ १६१ ॥
क्व प्रस्थितोऽसि हा नाथ क्व गत्वास्मान् प्रतीक्षसे। कियद्दूरं च गन्तव्यम् इत्यन्या [5]मुमुहुर्मुहुः ॥ १६२॥
हृदि [6]वेपथुमुत्कम्पं स्तनयोर्म्लानतां तनौ। वाचि गद्गदतामक्ष्णोर्बाष्पं चान्याः शुचा दधुः ॥ १६३ ॥
अमङ्गलमलं[7] बाले रुदित्वेति निवारिता। काचिदन्तर्निरुद्धाश्रुः स्फुटन्तीव शुचाभवत् ॥ १६४ ॥
प्रस्थानमङ्गलं [8]भङ्क्तुम् अक्षमाः काप्युदश्रुदृक्। [9]शुचमन्तःप्रविष्टेव दृष्ट्वा दृक्पुत्रिकाछलात् ॥१६५॥
गतिसम्भ्रमविच्छिन्नहारव्याकीर्णमौक्तिकाः। स्थूलानश्रुलवान् काश्चि[10]च्छन्नं [11]तच्छद्मनामुचन् ॥ १६६ ॥
विस्रस्तकबरीभारविगलत्कुसुमस्रजः। स्रस्तस्तनांशुकाः [12]साश्राः काश्चिच्छोच्यां दशामधुः ॥ १६७ ॥
[13]उत्क्षिप्य शिबिकास्वन्या निक्षिप्ताः शोकविक्लवाः[14]। कथं कथमपि प्राणैर्न व्ययुज्यन्त सान्त्विताः[15]॥१६८॥
धीराः काश्चिदधीराक्ष्यो धीरिताः स्वामिसम्पदा। विभुमन्वीयुरव्यग्रा राजपत्न्यः [16]शुचिव्रताः ॥ १६९ ॥

अथानन्तर–भगवान्के प्रस्थान करनेपर यशस्वती आदि रानियाँ मन्त्रियों सहित भगवान्के पीछे पीछे चलने लगी, उस समय शोकसे उनके नेत्रोंमे आँसू भर रहे थे ॥१५९॥ लताओं के समान उनके शरीरकी शोभा म्लान हो गई थी, उन्होंने आभूषण भी उतारकर अलग कर दिये थे और कितनी ही डगमगाते पैर रखती हुई भगवान्के पीछे पीछे जा रही थी ॥१६०॥ कितनी ही स्त्रियाँ शोकरूपी अग्निसे जर्जरित हो रही थी, उनकी शरीरयष्टि कम्पित हो रही थी और नेत्र मूर्च्छासे निमीलित हो रहे थे इन सब कारणोसे वे जमीनपर गिर पड़ी थी ॥१६१॥ कितनी ही देवियाँ बार बार यह कहती हुई मूर्च्छित हो रही थी कि हा नाथ, आप कहां जा रहे है ? कहाँ जाकर हम लोगोंकी प्रतीक्षा करेगे और अब आपको कितनी दूर जाना है ॥१६२॥ वे देवियाँ शोकसे हृदयमे धड़कनको, स्तनोमे उत्कम्पको, शरीरमे म्लानताको, वचनोंमे गद्-गदताको और नेत्रोंमे आँसुओंको धारण कर रही थी ॥१६३॥ हे बाले, रोकर अमगल मत कर इस प्रकार निवारण किये जानेपर किसी स्त्रीने रोना तो बन्द कर दिया था परन्तु उसके आँसू नेत्रोंके भीतर ही रुक गये थे इसलिये वह ऐसी जान पड़ती थी मानो शोकसे फूट रही हो ॥१६४॥ कोई स्त्री प्रस्थानकालके मगलको भग करनेके लिये असमर्थ थी इसलिये उसने आँसुओंको नीचे गिरनेसे रोक लिया परन्तु ऐसा करनेसे उसके नेत्र आँसुओंसे भर गए थे जिससे वह ऐसी जान पड़ती थी मानो नेत्रोंकी पुत्तलिकाके छलसे शोकके भीतर ही प्रविष्ट हो गई हो ॥१६५॥ वेगसे चलनेके कारण कितनी ही स्त्रियोंके हार टूट गये थे और उनके मोती विखर गये थे, उन विखरे हुए मोतियोसे वे ऐसी मालूम होती थी मानो मोतियोंके छलसे आँसुओंकी बड़ी बडी बूदे ही छोड़ रही हों ॥१६६॥ कितनी ही स्त्रियोंके केशपाश खुलकर नीचेकी ओर लटकने लगे थे उनमे लगी हुई फूलोंकी मालाए नीचे गिरती जा रही थी, उनके स्तनोंपरके वस्त्र भी शिथिल हो गये थे और आँखोंसे आँसू बह रहे थे इस प्रकार वे शोचनीय अवस्थाको धारण कर रही थी ॥१६७॥ कितनी ही स्त्रियाँ शोकसे अत्यन्त विह्वल हो गई थी इसलिये लोगोंने उठाकर उन्हें पालकीमे रखा था तथा अनेक प्रकारसे.सान्त्वना दी थी, समझाया था। इसीलिये वे जिस किसी तरह प्राणोंसे वियुक्त नही हुई थी-जीवित बची थी॥१६८॥ धीर वीर किन्तु चंचल नेत्रोंवाली कितनी ही राजपत्नियाँ अपने स्वामीके विभवसे ही (देवों

---

१ अमात्यैराश्रिताः। २ विगतभूषणा.। ३ कम्पमान। ४ इषन्मीलित। ५ मूर्च्छां गतः। ६ कम्पनम्। ७ अलं रुदित्वा रोदनेनालम्। ८ नाशितुम्। ९ शुचमन्तःप्रविष्टेव दृष्टा त०। शुचामन्तःप्रविष्टेव दृष्टा द०, म०, ल०। १० गूढ यथा भवति तथा। ११ मौक्तिकव्याजेन। १२ अश्रुसहिताः। १३ उद्धृत्य। १४ विह्वला। १५ प्रियवचनै. सन्तोष नीता.। १६ पवित्र।

प्रस्थानमङ्गले [1]जातं [2]नाभिजातं प्ररोदनम् । नाथः शनैरनुव्राज्यो मातर्मा स्म शुचं गमः ॥ १७० ॥
त्वर्यतां [3]त्वर्यतां देवि शोकवेगोऽपधार्यताम्[4] । देवोऽयं नीयते देवैःदिष्टयास्मद्दृष्टिगोचरे ॥ १७१ ॥
इत्यन्तःपुरवृद्धाभिः मुहुराश्वासिता सती । यशस्वती सुनन्दा च प्रतस्थे पादचारिणी ॥ १७२ ॥
बहुनात्र किमुक्तेन [5]मुक्तसर्वपरिच्छदाः । देव्यो यथाश्रुतं[6] भर्त्तुरनुमार्गं प्रतस्थिरे ॥ १७३ ॥
मा भूद् व्याकुलता काचित् [7]भर्तुरित्यनुयायिभिः[8] । रुद्धः सर्वावरोध[9]स्त्री-सार्थः कस्मिंश्चिदन्तरे ॥१७४॥
ब्रुवाणैर्भर्त्तुराज्ञेति राज्ञीवर्गो महत्तरैः । संरुद्धः सरितामोघः[10] प्रवृद्धोऽपि यथार्णवैः ॥ १७५ ॥
निश्वस्य दीर्घमुष्णं च निन्दन् सौभाग्यमात्मनः । न्यवृतत् प्राप्तनैराश्यो नृपवल्लभिकाजनः ॥ १७६ ॥
महादेव्यौ तु [11]शुद्धान्तमुख्याभिः परिवारिते । भर्तुरिच्छानुवर्त्तिन्यावन्वयातां[12] सपर्यया ॥ १७७ ॥
मरुदेव्या समं नाभिराजो राजशतैर्वृतः । [13]अनूत्तस्थौ तदा द्रष्टुं विभोर्निष्क्रमणोत्सवम् ॥ १७८ ॥
समं पौरैरमात्यैश्च पार्थिवैश्च महान्वयैः । सानुजो भरताधीशो महद्ध्यां [14]गुरुमन्वयात् ॥ १७९ ॥
नातिदूरं खमुत्पत्य जनानां दृष्टिगोचरे । यथोक्तैर्मङ्गलारम्भैः प्रस्थानमकरोत् प्रभुः ॥ १८० ॥
नातिदूरे पुरस्यास्य नात्यासन्नेतिविस्तृतम् । सिद्धार्थकवनोद्देशमभिप्राया[15]ज्जगद्गुरुः ॥ १८१ ॥

द्वारा किये हुए सन्मानसे ही) सन्तुष्ट हो गई थीं इसलिये वे पतिव्रताएं बिना किसी आकुलता के भगवान्के पीछे पीछे जा रही थी ॥१६९॥ हे माता, यह भगवान्का प्रस्थानमंगल हो रहा है इसलिये अधिक रोना अच्छा नही, धीरे धीरे स्वामीके पीछे पीछे चलना चाहिये। शोक मत करो ॥१७०॥ हे देवि, शीघ्रता करो, शीघ्रता करो, शोकके वेगको रोको, यह देखो देव लोग भगवान्को लिये जा रहे हैं अभी हमारे पुण्योदयसे भगवान् हमारे दृष्टिगोचर हो रहे हैं—हम लोगोंको दिखाई दे रहे हैं ॥१७१॥ इस प्रकार अन्तःपुरकी वृद्ध स्त्रियोंके द्वारा समझाई गई यशस्वती और सुनन्दा देवी पैदल ही चल रही थी ॥१७२॥ इस विषयमें बहुत कहनेसे क्या लाभ है उन देवियोंने ज्यों ही भगवान्के जानेके समाचार सुने त्यों ही उन्होंने अपने छत्र चमर आदि सब परिकर छोड़ दिये थे और भगवान्के पीछे पीछे चलने लगी थी ॥१७३॥ भगवान् को किसी प्रकारकी व्याकुलता न हो यह विचार कर उनके साथ जानेवाले वृद्ध पुरुषोंने यह भगवान्की आज्ञा है, ऐसा कहकर किसी स्थानपर अन्त.पुरकी समस्त स्त्रियोंके समूहको रोक दिया और जिस प्रकार नदियोंका बढा हुआ प्रवाह समुद्रसे रुक जाता है उसी प्रकार वह रानियों का समूह भी वृद्ध पुरुषों (प्रतीहारों) से रुक गया था ॥१७४–१७५॥ इस प्रकार रानियों का समूह लम्बी और गरम सांस लेकर आगे जानेसे बिलकुल निराश होकर अपने सौभाग्य की निन्दा करता हुआ घरको वापिस लौट गया॥१७६॥ किन्तु स्वामीकी इच्छानुसार चलने वाली यशस्वती और सुनन्दा ये दोनों ही महादेवियाँ अन्त.पुरकी मुख्य-मुख्य स्त्रियोंसे परिवृत होकर पूजाकी सामग्री लेकर भगवान्के पीछे पीछे जा रही थी ॥१७७॥ उस समय महाराज नाभिराज भी मरुदेवी तथा सैकड़ों राजाओंसे परिवृत होकर भगवान्के तपकल्याणका उत्सव देखनेके लिये उनके पीछे पीछे जा रहे थे ॥१७८॥ सम्राट् भरत भी नगरनिवासी, मंत्री, उच्च वंशमें उत्पन्न हुए राजा और अपने छोटे भाइयोंके साथ-साथ बड़ी भारी विभूति लेकर भगवान् के पीछे पीछे चल रहे थे ॥१७९॥ भगवान्ने आकाशमें इतनी थोड़ी दूर जाकर कि जहांसे लोग उन्हें अच्छी तरहसे देख सकते थे, ऊपर कहे हुए मंगलारम्भके साथ प्रस्थान किया ॥१८०॥ इस प्रकार जगद्गुरु भगवान् वृषभदेव अत्यन्त विस्तृत सिद्धार्थक नामके वनमें जा पहुंचे वह

---

१ जाते अ०, प०, इ०, स०, द०, म०, ल० । २ अमंगलम् । ३ गम्यताम् । ४ वेगोऽवधीर्यताम् प०, म०, द०, इ०, ल० । धार्यताम् अ०, स० । ५ त्यक्तच्छत्रचामरादिपरिकराः । ६ यथाकर्णितं तथा । ७ भर्तुः सकाशात् । ८ सहगच्छद्भिः । ९ अन्वःपुरस्त्रीसमूह । १० प्रवाहः । ११ अन्तःपुरमुख्याभिः १२ अन्वगच्छताम् । १३ अन्वगच्छत् । १४-मन्वगात् अ०, प०, म०, ल० । १५ अन्वगच्छत् ।

ततः प्राप सुरेन्द्राणां पृतना व्याप्य रोदसी[1]। [2]वयोरुतैरिवाह्वानं कुर्वत्सिद्धार्थकं वनम् ॥ १८२ ॥
तत्रैकस्मिन् शिलापट्टे सुरैः प्रागुपकल्पिते। [3]प्रथीयसि शुचौ स्वस्मिन् परिणाम इवोन्नते ॥१८३ ॥
चन्द्रकान्तमये चन्द्रकान्तशो[4]भावहासिनि। पुञ्जीभूत इवैकत्र स्वस्मिन् यशसि निर्मले ॥ १८४ ॥
स्वभावभास्वरे रम्ये सुवृत्तपरिमण्डले। सिद्धक्षेत्र इव द्रष्टुं तां[5] भूतिं भुवमागते ॥ १८५ ॥
सुशीतलतरुच्छायानिरुद्धोष्णकरत्विषि। पर्यन्तशाखिशाखाग्रविगलत्कुसुमोत्करे ॥ १८६ ॥
श्रीखण्डद्रवदत्ताच्छच्छटामङ्गलसंमते। शचीस्व[6]हस्तविन्यस्तरत्नचूर्णोपहारके ॥ १८७ ॥
[7]विशङ्कटपटीक्लृप्तविचित्रपटमण्डपे। मन्दानिलचलच्चित्रकेतुमालाततांम्बरे ॥ १८८ ॥
समन्तादुच्च[8]रद्धूपधूमामोदितदिङ्मुखे। पर्यन्तनिहितानल्पमङ्गलद्रव्यसम्पदि ॥ १८९ ॥
इत्यनल्पगुणे तस्मिन् [9]शस्तवास्तुप्रतिष्ठिते। यानादवातरद्देवः सुरैः क्ष्मामवतारितात् ॥ १९० ॥
धृतजन्माभिषेकर्द्धिः या शिला पाण्डुकाह्वया। पश्यन्नेनं शिलापट्टं विभुस्तस्याः[10] समस्मरत् ॥१९१ ॥
तत्र क्षणमि[11]वासीनो यथास्वमनुशासनैः[12]। विभुः [13]सभाजयामास सभां सनृसुरासुराम् ॥ १९२ ॥

इति षण्मासनि[9]र्वर्त्स्यत्प्रतिमायोगमापुषः[10] । स कालः क्षणवद्भर्तुः अगमद्धैर्यशालिनः ॥ ९० ॥
अत्रान्तरे किलायातौ[11] कुमारौ सुकुमारकौ । सूनू कच्छमहाकच्छनृपयोर्निकटं गुरोः ॥ ९१ ॥
नमिश्च विनमिश्चेति प्रतीतौ भक्तिनिर्भरौ । भगवत्पादसंसेवां कर्तुकामौ युवेशिनौ ॥ ९२ ॥
भोगेषु सतृषावेतौ प्रसीदेति कृतानती । पदद्वयेऽस्य संलग्नौ भेजतुर्ध्यानविघ्नताम् ॥ ९३ ॥
त्वयेश पुत्रनप्तृभ्यः संविभक्तमभूदिदम् । साम्राज्यं विस्मृतावावाम् अतो[12] भोगान् प्रयच्छ नौ[13] ॥ ९४ ॥
इत्येवमनुबध्नन्तौ युक्तायुक्तानभिज्ञकौ । तौ तदा जलपुष्पार्घैः [14]उपासामासतुर्विभुम् ॥ ९५ ॥
ततः स्वासनकम्पेन [15]तदज्ञासीत्[16] फणीश्वरः । धरणेन्द्र इति ख्यातिम् उद्वहन् भावनामरः ॥ ९६ ॥

होते थे ॥८४॥ अहा, भगवान्‌के तपश्चरणकी शक्ति बड़ी ही आश्चर्यकारक थी कि वनके हाथी भी फूले हुए कमल लाकर उनके चरणोंमें चढ़ाते थे ॥८५॥ जिस समय वे हाथी फूले हुए कमलों द्वारा भगवान्‌की उपासना करते थे उस समय उनके सूड़के अग्रभागमें स्थित लाल कमल ऐसे सुशोभित होते थे मानो उनके पुष्कर अर्थात् सूडके अग्रभागकी शोभाको दूनी कर रहे हों ॥८६॥ भगवान्‌के शरीरसे फैलती हुई शान्तिकी किरणोंने कभी किसीके वश न होने-वाले सिह आदि पशुओंको भी हठात् वशमें कर लिया था ॥८७॥ यद्यपि त्रिलोकीनाथ भगवान् उपवास कर रहे थे—कुछ भी आहार नहीं लेते थे तथापि उन्हें भूखकी बाधा नही होती थी, सो ठीक ही है, क्योंकि सन्तोषरूप भावनाके उत्कर्षसे जो अनिच्छा उत्पन्न होती है वह हरएक प्रकारकी इच्छाओं (लम्पटता) को जीत लेती है ॥८८॥ उस समय भगवान्‌के ध्यानके प्रताप-से इन्द्रोंके आसन भी कम्पायमान हो गये थे । वास्तवमें यह भी एक बड़ा आश्चर्य है कि महा-पुरुषोंका धैर्य भी जगत्‌के कम्पनका कारण हो जाता है ॥८९॥ इस तरह छह महीनेमें समाप्त होनेवाले प्रतिमा योगको प्राप्त हुए और धैर्यसे शोभायमान रहनेवाले भगवान्‌का वह लम्बा समय भी क्षणभरके समान व्यतीत हो गया ॥९०॥ इसीके बीचमे महाराज कच्छ महाकच्छ के लड़के भगवान्‌के समीप आये थे । वे दोनों लड़के बहुत ही सुकुमार थे, दोनों ही तरुण थे, नमि तथा विनमि उनका नाम था और दोनों ही भक्तिसे निर्भर होकर भगवान्‌के चरणोंकी सेवा करना चाहते थे ॥९१–९२॥ वे दोनों ही भोगोपभोगविषयक तृष्णासे सहित थे इसलिये हे भगवन्, 'प्रसन्न होइये' इस प्रकार कहते हुए वे भगवान्‌को नमस्कार कर उनके चरणोंमें लिपट गये और उनके ध्यानमे विघ्न करने लगे ॥९३॥ हे स्वामिन्, आपने अपना यह साम्राज्य पुत्र तथा पौत्रोंके लिये बाँट दिया है । बाँटते समय हम दोनोंको भुला ही दिया इसलिये अब हमें भी कुछ भोग सामग्री दीजिये ॥९४॥ इस प्रकार वे भगवान्‌से बार बार आग्रह कर रहे थे, उन्हें उचित अनुचितका कुछ भी ज्ञान नहीं था और वे दोनों उस समय जल, पुष्प तथा अर्घ्य से भगवान्‌की उपासना कर रहे थे ॥९५॥ तदनन्तर धरणेन्द्र नामको धारण करनेवाले, भवन-वासियोंके अन्तर्गत नागकुमार देवोंके इन्द्रने अपना आसन कम्पायमान होनेसे नमि विनमिके

१ हस्ताग्राश्रितम् । २ द्विगुणीकुर्वत् । ३ आराधने । ४ अंशाः । ५ बलात्कारेण । ६ कांक्षाम् । ७ अनभिलाषिता । ८ ध्यानतः । ९ भविष्यत् । १० गतस्य । –मीयुषा प० । ११ आगतौ । १२ अस्मात् कारणात् । १३ आवयोः । १४ आराधनां चक्रतुः । १५ ध्यानविघ्नत्वम । १६ बुबुधे ।

ज्ञात्वा चावधिबोधेन तत्सर्वं संविधानकम् ।ससम्भ्रममथोत्थाय सोऽन्तिकं भर्तुरागमत् ॥ ९७ ॥
ससर्प यः समुद्भिद्य भुवः प्राप्तः स तत्क्षणात् । समैक्षिष्ट मुनिं दूरान्महामेरुमिवोन्नतम् ॥ ९८ ॥
समिद्धया तपोदीप्त्या ज्वलद्भासुरविग्रहम् । निवातनिश्चलं दीपमिव योगे समाहितम् ॥ ९९ ॥
कर्माहुतीर्महाध्यानहुताशे[1] दग्धुमुद्यतम् । सुयज्वानमिवा[2]हेयदयापत्नीपरिग्रहम् ॥ १०० ॥
महोदयमुदग्राङ्गं सुवंशं मुनिकुञ्जरम् । दद्धं तपोमहालानस्तम्भे सद्व्रतरज्जुभिः ॥ १०१ ॥
अकम्प्रस्थितिमुत्तुंगं महासत्त्वैरुपासितम् । महाद्रिमिव बिभ्राणं क्षमाभरसहं वपुः ॥ १०२ ॥
योगाग्त[3]र्निभृतात्मानमतिगम्भीरचेष्टितम् । [4]निवातस्तिमितस्याब्धेर्न्यक्कुर्वाणं गभीरताम् ॥ १०३ ॥

इस समस्त वृत्तान्तको जान लिया ॥९६॥ अवधि ज्ञानके द्वारा इस समस्त समाचारको जानकर वह धरणेन्द्र बड़े ही संभ्रमके साथ उठा और शीघ्र ही भगवान्‌के समीप आया ॥९७॥ वह उसी समय पूजाकी सामग्री लिये हुए, पृथिवीको भेदन कर भगवान्‌के समीप पहुँचा वहाँ उसने दूरसे ही मेरु पर्वतके समान ऊँचे मुनिराज वृषभदेवको देखा ॥९८॥ उस समय भगवान् ध्यानमें लवलीन थे और उनका देदीप्यमान शरीर अतिशय बढ़ी हुई तपकी दीप्तिसे प्रकाशमान हो रहा था इसलिये वे ऐसे मालूम होते थे मानो वायुरहित प्रदेशमें रखे हुए दीपक ही हों ॥९९॥ अथवा वे भगवान् किसी उत्तम यज्वा अर्थात् यज्ञ करनेवालेके समान शोभायमान हो रहे थे क्योंकि जिस प्रकार यज्ञ करनेवाला अग्निमे आहुतियाँ जलानेके लिये तत्पर रहता है उसी प्रकार भगवान् भी महाध्यानरूपी अग्निमे कर्मरूपी आहुतियाँ जलानेके लिये उद्यत थे और जिस प्रकार यज्ञ करनेवाला अपनी पत्नीसे सहित होता है उसी प्रकार भगवान् भी कभी नही छोड़ने योग्य दयारूपी पत्नीसे सहित थे ॥१००॥ अथवा वे मुनिराज एक कुजर अर्थात् हाथीके समान मालूम होते थे क्योकि जिस प्रकार हाथी महोदय अर्थात् भाग्यशाली होता है उसी प्रकार भगवान् भी महोदय अर्थात् बड़े भारी ऐश्वर्यसे सहित थे, हाथीका शरीर जिस प्रकार ऊँचा होता है उसी प्रकार भगवान्‌का शरीर भी ऊँचा था, हाथी जिस प्रकार सुवंश अर्थात् पीठकी उत्तम रीढ़से सहित होता है उसी प्रकार भगवान् भी सुवंश अर्थात् उत्तम कुलसे सहित थे और हाथी जिस प्रकार रस्सियो द्वारा खम्भेमे बँधा रहता है उसी प्रकार भगवान् भी उत्तम व्रतरूपी रस्सियों द्वारा तपरूपी बड़े भारी खम्भेमें बँधे हुए थे ॥१०१॥ वे भगवान् सुमेरु पर्वतके समान उत्तम शरीर धारण कर रहे थे क्योकि जिस प्रकार सुमेरु पर्वत अकम्पायमान रूपसे खड़ा है उसी प्रकार उनका शरीर भी अकम्पायमान रूपसे (निश्चल) खड़ा था, मेरु पर्वत जिस प्रकार ऊँचा होता है उसी प्रकार उनका शरीर भी ऊँचा था, सिह व्याघ्र आदि बड़े बड़े क्रूर जीव जिस प्रकार सुमेरु पर्वतकी उपासना करते हैं अर्थात् वहाँ रहते हैं उसी प्रकार बड़े बड़े क्रूर जीव शान्त होकर भगवान्‌के शरीरकी भी उपासना करते थे अर्थात् उनके समीप मे रहते थे, अथवा सुमेरु पर्वत जिस प्रकार इन्द्र आदि महासत्त्व अर्थात् महाप्राणियोंसे उपासित होता है उसी प्रकार भगवान्‌का शरीर भी इन्द्र आदि महासत्त्वोंसे उपासित था अथवा सुमेरु पर्वत जिस प्रकार महासत्त्व अर्थात् बड़ी भारी दृढ़तासे उपासित होता है उसी प्रकार भगवान् का शरीर भी महासत्त्व अर्थात् बड़ी भारी दृढ़ता (धीर वीरता) से उपासित था, और सुमेरु पर्वत जिस प्रकार क्षमा अर्थात् पृथिवीके भारको धारण करनेमें समर्थ होता है उसी प्रकार भगवान्‌का शरीर भी क्षमा अर्थात् शान्तिके भारको धारण करनेमें समर्थ था ॥१०२॥ उस समय भगवान्‌ने अपने अन्तःकरणको ध्यानके भीतर निश्चल कर लिया था तथा उनकी चेष्टाएँ अत्यन्त गम्भीर थीं इसलिये वे वायुके न चलनेसे निश्चल हुए समुद्रकी गम्भीरताको भी

१ अग्नौ । २ अत्याज्यदयास्त्रीस्वीकारम् । ३ अन्तर्लीन । ४ निर्वात–प० ।

परीषहमहावातैरक्षोभ्यमजलाशयम् । दोषयादोभिरस्पृष्टमपूर्वमिव वारिधिम् ॥ १०४ ॥
सादरं च समासाद्य पश्यन् भगवतो वपुः । विसिस्मिये तपोलक्ष्म्या 'परिरब्धमधीद्धया[2] ॥ १०५ ॥
परीत्य प्रणतो भक्त्या स्तुत्वा च स जगद्गुरुम् । कुमाराविति सोपायम् अवदत् संवृताकृतिः ॥ १०६ ॥
युवां युवानौ दृश्येथे सायुधौ विकृताकृती[3] । तपोवनं च पश्यामि प्रशान्तमिदमूर्जितम् ॥ १०७ ॥
क्वेदं तपोवनं शान्तं क्व युवां भीषणाकृती । प्रकाशतमसोरेष संगमो नन्वसंगतः ॥ १०८ ॥
अहो निन्द्यतरा भोगा यैरस्थानेऽपि योजयेत्[4] । प्रार्थनामर्थिनां का वा युक्तायुक्तविचारणा ॥ १०९ ॥
अवाञ्छथो युवां भोगान् देवोऽयं भोगनिःस्पृहः । [5]तद्वां शिलातलेऽम्भोजवाञ्छा [6]चित्रीयतेऽद्य नः ॥ ११० ॥
सस्पृहः स्वयमन्यांश्च सस्पृहानेव मन्यते । को नाम स्पृहयेद्धीमान् भोगान् [7]पर्यन्ततापिनः ॥ १११ ॥
[8]आपातमात्ररम्याणां भोगानां वशगः पुमान् । महानप्यर्थिता[9]दोषात् सद्यस्तृण[10]लघुर्भवेत् ॥ ११२ ॥
युवां चेद्भोगकाम्यन्तौ[11] व्रजतं भरतान्तिकम् । स हि साम्राज्यधौरेयो[12] वर्तते नृपपुङ्गवः ॥ ११३ ॥

तिरस्कृत कर रहे थे ॥१०३॥ अथवा भगवान् किसी अनोखे समुद्रके समान जान पड़ते थे क्योंकि उपलब्ध समुद्र तो वायुसे क्षुभित हो जाता है परन्तु वे परीषहरूपी महावायुसे कभी भी क्षुभित नहीं होते थे, उपलब्ध समुद्र तो जलाशय अर्थात् जल है आशयमे (मध्यमें) जिसके ऐसा होता है परन्तु भगवान् जडाशय अर्थात् जड (अविवेक युक्त) है आशय (अभिप्राय) जिनका ऐसे नही थे, उपलब्ध समुद्र तो अनेक मगर मच्छ आदि जल-जन्तुओंसे भरा रहता है परन्तु भगवान् दोषरूपी जल-जन्तुओंसे छुए भी नहीं गये थे ॥१०४॥ इस प्रकार भगवान् वृषभदेवके समीप वह धरणेन्द्र बड़े ही आदरके साथ पहुँचा और अतिशय बढ़ी हुई तपरूपी लक्ष्मीसे आलिङ्गित हुए भगवान्के शरीरको देखता हुआ आश्चर्य करने लगा ॥१०५॥ प्रथम ही उस धरणेन्द्रने जगद्गुरु भगवान् वृषभदेवकी प्रदक्षिणा दी, उन्हें प्रणाम किया, उनकी स्तुति की और फिर अपना वेश छिपाकर वह उन दोनों कुमारोंसे इस प्रकार सयुक्तिक वचन कहने लगा ॥१०६॥ हे तरुण पुरुषो, ये हथियार धारण किये हुए तुम दोनों मुझे विकृत आकार वाले दिखलाई दे रहे हो और इस उत्कृष्ट तपोवनको अत्यन्त शान्त देख रहा हूं ॥१०७॥ कहाँ तो यह शान्त तपोवन, और कहाँ भयंकर आकारवाले तुम दोनों ? प्रकाश और अन्धकारके समान तुम्हारा समागम क्या अनुचित नहीं है ? ॥१०८॥ अहो, यह भोग बड़े ही निन्दनीय हैं जोकि अयोग्य स्थानमें भी प्रार्थना कराते हैं अर्थात् जहाँ याचना नही करनी चाहिये वहाँ भी याचना कराते है सो ठीक ही है क्योंकि याचना करनेवालोंको योग्य अयोग्यका विचार ही कहाँ रहता है ? ॥१०९॥ यह भगवान् तो भोगोंसे निःस्पृह हैं और तुम दोनों उनसे भोगों की इच्छा कर रहे हो सो तुम्हारी यह शिलातलसे कमलकी इच्छा आज हम लोगोंको आश्चर्य युक्त कर रही है । भावार्थ–जिस प्रकार पत्थरकी शिलासे कमलोंकी इच्छा करना व्यर्थ है उसी प्रकार भोगोंकी इच्छासे रहित भगवान्से भोगोंकी इच्छा करना व्यर्थ है ॥११०॥ जो मनुष्य स्वयं भोगोंकी इच्छासे युक्त होता है वह दूसरोंको भी वैसा ही मानता है, अरे, ऐसा कौन बुद्धिमान् होगा जो अन्तमें सन्ताप देनेवाले इन भोगोंकी इच्छा करता हो ॥१११॥ प्रारम्भ मात्रमें ही मनोहर दिखाई देनेवाले भोगोंके वश हुआ पुरुष चाहे जितना बड़ा होनेपर भी याचना रूपी दोषसे शीघ्र ही तृणके समान लघु हो जाता है ॥११२॥ यदि तुम दोनों भोगोंको चाहते हो तो भरतके समीप जाओ क्योंकि इस समय वही साम्राज्यका भार धारण करनेवाला है और

---

१ आलिगितम् । २ अत्यर्थं प्रवृद्धया । ३ आकारान्तरेणाच्छादितनिजाकारः । ४ अर्थीत्यध्याहारः । ५ तत्कारणात् । वां युवयोः । ६ चित्रं करोति । ७ परिणमनकाल । ८ अनुभवमात्रम् । ९ याच्ञा । १० तृणवल्लघुः । ११ भोगमिच्छन्तौ । १२ धुरन्धरः ।

भगवांस्त्यक्तरागादिसङ्गो देहेऽपि निःस्पृहः । कुतो [1]वामधुना दद्याद् भोगान् भोगस्पृहावतोः ॥११४॥
ततोऽलमुपरुद्ध्यैनं[2] देवं मुक्त्यर्थमुद्यतम् । भुक्तिकामौ[3] युवां यातं[4] भरतं पर्युपासितुम् ॥ ११५॥
इति तद्वचनस्यान्ते कुमारौ प्रत्यबोधताम् । परकार्येषु वः कास्था[5] तूष्णीं यात महाधियः ॥ ११६॥
यदत्र युक्तमन्यद्वा[6] जानीमस्तद्द्वयं वयम् । अनभिज्ञा भवन्तो[7]ऽत्र साधयन्तु यथेहितम् ॥ ११७॥
वर्षीयांसो[8] यवीयांस[9] इति भेदो वयस्कृतः । न बोधवृद्धिर्वार्धक्ये न यून्यपचयो धियः ॥११८॥
वयसः परिणामेन[10] धियः प्रायेण मन्दिमा । कृतात्मनां[11] वयस्याद्ये ननु मेधा विवर्धते ॥ ११९॥
नवं वयो न दोषाय न गुणाय दशान्तरम्[12] । नवोऽपीन्दुर्जनाह्लादी दहत्यग्निर्जरन्नपि ॥१२०॥
अपृष्टः कार्यमाचष्टे यः स धृष्टतरो मतः । न [13]पिपृच्छिषिता यूयम् आवाभ्यां कार्यमीदृशम् ॥ १२१॥
अपृष्टकार्यनिर्देशैः[14] व्य[15]लीकानिष्टचाटुभिः[16] । छलयन्ति खला [17]लोकं न सद्वृत्ता भवद्विधाः ॥१२२॥
[18]नामृष्टभाषिणी जिह्वा चेष्टा नानिष्टकारिणी । नान्योपघातपरुषा स्मृतिः स्वप्नेऽपि धीमताम् ॥ १२३॥

वही श्रेष्ठ राजा है ॥११३॥ भगवान् तो राग द्वेष आदि अन्तरङ्ग परिग्रहका त्याग कर चुके हैं और अपने शरीरसे भी निःस्पृह हो रहे है, अब यह भोगोंकी इच्छा करनेवाले तुम दोनोंको भोग कैसे दे सकते है ? ॥११४॥ इसलिये, जो केवल मोक्ष जानेके लिये उद्योग कर रहे हैं ऐसे इन भगवान्के पास धरना देना व्यर्थ है । तुम दोनों भोगोंके इच्छुक हो अतः भरतकी उपासना करनेके लिये उसके पास जाओ ॥११५॥ इस प्रकार जब वह धरणेन्द्र कह चुका तब वे दोनों नमि विनमि कुमार उसे इस प्रकार उत्तर देने लगे कि दूसरेके कार्योमे आपकी यह क्या आस्था (आदर, बुद्धि) है ? आप महाबुद्धिमान् है अतः यहासे चुपचाप चले जाइये ॥११६॥ क्योंकि इस विषयमे जो योग्य अथवा अयोग्य है उन दोनोंको हम लोग जानते है परन्तु आप इस विषयमें अनभिज्ञ हैं इसलिये जहाँ आपको जाना है जाइए । ॥११७॥ ये वृद्ध है और ये तरुण हैं यह भेद तो मात्र अवस्थाका किया हुआ है । वृद्धावस्थामे न तो कुछ ज्ञानकी वृद्धि होती है और न तरुण अवस्थामें बुद्धिका कुछ ह्रास ही होता है । बल्कि देखा ऐसा जाता है कि अवस्थाके पकनेसे वृद्धावस्थामे प्रायः बुद्धिकी मन्दता हो जाती है और प्रथम अवस्थामे प्रायः पुण्यवान् पुरुषोंकी बुद्धि बढ़ती रहती है ॥११८-११९॥ न तो नवीन-तरुण अवस्था दोष उत्पन्न करनेवाली है और न वृद्ध अवस्था गुण उत्पन्न करनेवाली है क्योंकि चन्द्रमा नवीन होने पर भी मनुष्योंको आह्लादित करता है और अग्नि जीर्ण (बुझनेके सन्मुख) होनेपर भी जलाती ही है ॥१२०॥ जो मनुष्य बिना पूछे ही किसी कार्यको करता है वह बहुत धीठ समझा जाता है। हम दोनों ही इस प्रकारका कार्य आपसे पूछना नही चाहते फिर आप व्यर्थ ही बीचमे क्यों बोलते है ॥१२१॥ आप जैसे निन्द्य आचरणवाले दुष्ट पुरुष बिना पूछे कार्योंका निर्देश कर तथा अत्यन्त असत्य और अनिष्ट चापलूसीके वचन कहकर लोगोंको ठगा करते है ॥१२२॥ बुद्धिमान् पुरुषोंकी जिह्वा कभी स्वप्नमें भी अशुद्ध भाषण नही करती, उनकी चेष्टा कभी दूसरोंका अनिष्ट नही करती और न उनकी स्मृति ही दूसरोंका विनाश करनेके लिये कभी कठोर

---

१ युवयोः । २ उपरोधेनालम् । 'निषेधेऽलं खलु क्त्वा वेति वर्तते ।' निषेधे वर्तमानयोरलं खलु इत्येतयोरुपपदयोर्धातोः क्त्वा प्रत्ययो वा भवतीति वचनात् । यथाप्राप्तं च । अलङ्कृत्वा । खलुकृत्वा । अलं बाले रुदित्वा । अलं बाले रोदनेन । अलखलाविति किम् ? मा भावि नार्यो रुदितेन । निषेध इति किम् ? अलंकारं सिद्धं खलु । ३ भोगकामौ । ४ गच्छतम् । ५ यत्नः । ६ अयुक्तम् । ७ अस्मद्विषये । ८ वृद्धाः । ९ युवानः । १० परिपाकेन । ११ कृतः शास्त्रादिना निष्पन्न आत्मा बुद्धिर्येषां ते कृतात्मानस्तेषाम्, "आत्मा यत्नो धृतिः बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इत्यमरः । १२ वार्द्धक्यम् । १३ न प्रष्टुमिष्टाः । १४ उपदेशैः । १५ असत्य । १६ चाटुवादैः । १७ लोकानसद्वृत्ता प० । १८ अशुद्ध ।

विदिताखिलवेद्यानां[1] नोपदेशो भवादृशाम् । न्यायोऽस्मदादिभिः सन्तो यतो न्यायैकजीविकाः ॥१२४॥
शान्तो वयोऽनुरूपोऽयं वेषः सौम्येयमाकृतिः । वचः प्रसन्नमूर्जस्वि[2] व्याचष्टे वः प्रबुद्धताम् ॥ १२५ ॥
बहिःस्फुरत्किमप्यन्तर्गूढं तेजो जनातिगम् । महानुभावतां वक्ति वपुरप्राकृतं[3] च वः ॥ १२६ ॥
इत्यभिव्यक्तवैशिष्ट्या भवन्तो भद्रशीलकाः । कार्येऽस्मदीये मुह्यन्ति न विद्मः किन्नु कारणम् ॥ १२७ ॥
गुरुप्रसादनं श्लाघ्यमावाभ्यां फलमीप्सितम् । यूयं तत्प्रतिबन्धारः[4] परकार्येषु शीतलाः ॥१२८॥
परेषां वृद्धिमालोक्य नन्वसूयति[5] दुर्जनः । युष्मादृशां तु महतां सतां प्रत्युत [6]सा मुदे ॥ १२९ ॥
वनेऽपि वसतो भर्तुः प्रभुत्वं किं परिच्युतम् । पादमूले जगद्विश्वं यस्याद्यापि चराचरम् ॥१३०॥
कल्पानोकहमुत्सृज्य को नामान्यं महीरुहम् । सेवेत पटुधीरीप्सन् फलं [7]विपुलमूर्जितम्[8] ॥ १३१ ॥
महाब्धिमथवा हित्वा रत्नार्थी किमु संश्रयेत् । पल्वलं[9] शुष्कशैवालं शाल्यर्थी वा पलालकम्[10] ॥ १३२ ॥
भरतस्य गुरोश्चापि किमु नास्त्यन्तरं महत् । गोष्पदस्य समुद्रेण समकक्ष्यत्वमस्ति वा[11] ॥ १३३ ॥

होती है ॥१२३॥ जिन्होंने जानने योग्य सम्पूर्ण तत्त्वोंको जान लिया है ऐसे आप सरीखे बुद्धिमान् पुरुषोंके लिये हम बालकों द्वारा न्यायमार्गका उपदेश दिया जाना योग्य नही है क्योंकि जो सज्जन पुरुष होते है वे एक न्यायरूपी जीविकासे ही युक्त होते है अर्थात् वे न्यायरूप प्रवृत्ति से ही जीवित रहते है ॥१२४॥ आयुके अनुकूल धारण किया हुआ आपका यह वेष बहुत ही शान्त है, आपकी यह आकृति भी सौम्य है और आपके वचन भी प्रसादगुणसे सहित तथा तेजस्वी हैं और आपकी बुद्धिमत्ताको स्पष्ट कह रहे है ॥१२५॥ जो अन्य साधारण पुरुषोंमे नही पाया जाता और जो बाहर भी प्रकाशमान हो रहा है ऐसा आपका यह भीतर छिपा हुआ अनिर्वचनीय तेज तथा अद्भुत शरीर आपकी महानुभावताको कह रहा है । भावार्थ–आपके प्रकाशमान लोकोत्तर तेज तथा असाधारण दीप्तिमान् शरीरके देखनेसे मालम होता है कि आप कोई महापुरुष है ॥१२६॥ इस प्रकार जिनकी अनेक विशेषताएँ प्रकट हो रही है ऐसे आप कोई भद्रपरिणामी पुरुष है परन्तु फिर भी आप जो हमारे कार्यमे मोहको प्राप्त हो रहे है सो उसका क्या कारण है ? यह हम नहीं जानते ॥१२७॥ गुरु--भगवान् वृषभदेवको प्रसन्न करना सब जगह प्रशसा करने योग्य है और यही हम दोनोंका इच्छित फल है अर्थात् हम लोग भगवान् को ही प्रसन्न करना चाहते है परन्तु आप उसमे प्रतिबन्ध कर रहे है–विघ्न डाल रहे हैं इसलिये जान पड़ता है कि आप दूसरोंका कार्य करनेमे शीतल अर्थात् उद्योगरहित है–आप दूसरोंका भला नही होने देना चाहते ॥१२८॥ दूसरोंकी वृद्धि देखकर दुर्जन मनुष्य ही ईर्ष्या करते है आप जैसे सज्जन और महापुरुषोंको तो बल्कि दूसरोंकी वृद्धिसे आनन्द होना चाहिये ॥१२९॥ भगवान् वनमे निवास कर रहे है इससे क्या उनका प्रभुत्व नष्ट हो गया है ? देखो, भगवान्के चरणकमलोंके मूलमे आज भी यह चराचर विश्व विद्यमान है ॥१३०॥ आप जो हम लोगों को भरतके पास जानेकी सलाह दे रहे हैं सो भी ठीक नही है क्योकि ऐसा कौन बुद्धिमान् होगा जो बड़े बड़े बहुतसे फलोंकी इच्छा करता हुआ भी कल्प वृक्षको छोड़कर अन्य सामान्य वृक्ष की सेवा करेगा ॥१३१॥ अथवा रत्नोंकी चाह करनेवाला पुरुष महासमुद्रको छोड़कर, जिसमे शेवाल भी सूख गई है ऐसे किसी अल्प सरोवर (तलैया) की सेवा करेगा अथवा धानकी इच्छा करनेवाला पियालका आश्रय करेगा? ॥१३२॥ भरत और भगवान् वृषभदेवमें क्या बड़ा भारी

---

१ ज्ञातपदार्थानाम् । २ तेजस्वि । ३ असाधारणम् । ४ अस्मदभीष्टप्रतिनिरोधकाः । ५ ईर्ष्यां करोति । ६ प्रवृद्धिः । ७ भूयिष्ठम् । ८ उपर्युपरि प्रवर्द्धमानम् । ९ अल्पसरः । १० 'पलालोऽस्त्री स निष्कलः, । ११ किम् ।

स्वच्छाम्भःकलिता लोके किं न सन्ति जलाशयाः । चातकस्याग्रहः[1] कोऽपि यद्वाञ्छत्यम्बुदात्पयः ॥ १३४ ॥
तदुन्नतेरिदं वित्त[2] वृत्तं[3] यद्विपुलं फलम् । वाञ्छन्ति[4] परमोदारं स्थानमाश्रित्य मानिनः ॥ १३५ ॥
इत्यदीनतरां वाचं श्रुत्वाहीन्द्रः कुमारयोः । नितरां सोऽतुषच्चित्ते श्लाध्यं धैर्यं हि मानिनाम् ॥ १३६ ॥
अहो महेच्छता[5] यूनोः अहो गाम्भीर्यमेतयोः । अहो गुरौ परा भक्तिः अहो श्लाध्या स्पृहानयोः ॥ १३७ ॥
इति प्रीतस्तदात्मीयं दिव्यं रूपं प्रदर्शयन् । पुनरित्यवदत् प्रीतिलतायाः कुसुमं वचः ॥ १३८ ॥
युवां युवजरन्तौ [6]स्थस्तुष्टो वां[7] धीरचेष्टितैः । अहं हि धरणो नाम फणिनां पतिरग्रिमः ॥ १३९ ॥
मां वित्तं[8] किंकरं भर्तुः पातालस्वर्गवासिनम् । युवयोर्भोगभागित्वं विधातुं समुपागतम् ॥ १४० ॥
आदिष्टो[9]ऽस्म्यहमीशेन कुमारौ भाक्तिकाविमौ । भोगैरिष्टैर्नियुङ्क्ष्वेति[10] द्रुतं [11]तेनागतोऽस्म्यहम् ॥ १४१ ॥
[12]तदुत्तिष्ठतमापृच्छ्य[13] भगवन्तं जगत्सृजम्[14] । युवयोर्भोगमद्याहं दास्यामि गुरुदेशिताम् ॥ १४२ ॥
इत्यस्य वचनात् प्रीतौ कुमारौ तमवोचताम् । सत्यं गुरुः प्रसन्नो नौ[15] भोगान्दित्सति[16] वाञ्छितान् ॥ १४३ ॥
तद् ब्रूहि धरणाधीश यत्सत्यं मतमीशितुः । गुरोर्मताद्विना भोगा नावयोरभिसम्मताः ॥ १४४ ॥

अन्तर नहीं है ? क्या गोष्पदकी समुद्रके साथ बराबरी हो सकती है ?॥१३३॥ क्या लोकमे स्वच्छ जलसे भरे हुए अन्य जलाशय नही हैं जो चातक पक्षी हमेशा मेघसे ही जलकी याचना करता है । यह क्या उसका कोई अनिर्वचनीय हठ नही है॥१३४॥ इसलिये अभिमानी मनुष्य जो अत्यन्त उदार स्थानका आश्रय कर किसी बड़े भारी फलकी वाञ्छा करते है सो इसे आप उनकी उन्नतिका ही आचरण समझे ॥१३५॥ इस प्रकार वह धरणेन्द्र नमि विनमि दोनों कुमारोंके अदीनतर अर्थात् अभिमानसे भरे हुए वचन सुनकर मनमें बहुत ही सन्तुष्ट हुआ सो ठीक ही है क्योंकि अभिमानी पुरुषोंका धैर्य प्रशसा करने योग्य होता है ॥१३६॥ वह धरणेन्द्र मन ही मन विचार करने लगा कि अहा, इन दोनों तरुण कुमारोंकी महेच्छता (महाशयता) कितनी बड़ी है, इनकी गम्भीरता भी आश्चर्य करनेवाली है, भगवान् वृषभदेवमें इनकी श्रेष्ठ भक्ति भी आश्चर्यजनक है और इनकी स्पृहा भी प्रशंसा करने योग्य है । इस प्रकार प्रसन्न हुआ धरणेन्द्र अपना दिव्य रूप प्रकट करता हुआ उनसे प्रीतिरूपी लताके फूलोंके समान इस प्रकार वचन कहने लगा ॥१३७–१३८॥ तुम दोनों तरुण होकर भी वृद्धके समान हो, मैं तुम लोगोंकी धीर वीर चेष्टाओंसे बहुत ही सन्तुष्ट हुआ हूँ, मेरा नाम धरण है और मै नागकुमार जातिके देवोंका मुख्य इन्द्र हू ॥१३९॥ मुझे आप पाताल स्वर्गमें रहनेवाला भगवान्का किंकर समझे तथा मै यहां आप दोनोंको भोगोपभोगकी सामग्रीसे युक्त करनेके लिये ही आया हू ॥१४०॥ ये दोनों कुमार बड़े ही भक्त हैं इसलिये इन्हें इनकी इच्छानुसार भोगोंसे युक्त करो इस प्रकार भगवान्ने मुझे आज्ञा दी है और इसीलिये मै यहां शीघ्र आया हूँ ॥१४१॥ इसलिये जगत्की व्यवस्था करनेवाले भगवान्से पूछकर उठो आज मै तुम दोनोंके लिये भगवान्के द्वारा बतलाई हुई भोगसामग्री दूगा ॥१४२॥ इस प्रकार धरणेन्द्रके वचनोंसे वे कुमार बहुत ही प्रसन्न हुए और उससे कहने लगे कि सचमुच ही गुरुदेव हमपर प्रसन्न हुए हैं और हम लोगों को मन वाञ्छित भोग देना चाहते हैं ॥१४३॥ हे धरणेन्द्र, इस विषयमें भगवान्का जो सत्य मत हो वह हम लोगोंसे कहिये क्योंकि भगवान्के मत अर्थात् संमतिके बिना हमें भोगोपभोग

---

१ अम्बुदात् पयो वाञ्छति यः स कोऽप्याग्रहोऽस्ति । २ जानीत । ३ वर्तनम् । ४ वाञ्छन्तीति यत् । ५ महाशयता । 'महेच्छस्तु महाशयः' इत्यभिधानात् । ६ भवतः । ७ युवयोः । ८ जानीतम् । ९ आज्ञापितः । १० नियोजय । ११ कारणेन । १२ तत् कारणात् । १३ पृष्ट्वा । १४ जगत्कर्तारम् । १५ आवयोः । १६ दातुमिच्छति ।

इत्युक्तवन्तौ प्रत्याय्य[1] सोपायं फणिनां पतिः । भगवन्तं प्रणम्याशु युवानावनयत् समम् ॥ १४५ ॥
स ताभ्यां फणिनां भर्ता रेजे गगनमुत्पतन् । युतस्तापप्रकाशाभ्यामिव भास्वान् महोदयः ॥ १४६ ॥
बभौ फणिकुमाराभ्यामिव ताभ्यां समन्वितः । प्रश्रयप्रशमाभ्यां वा[2] युक्तो योगीव भोगिराट् ॥ १४७ ॥
स व्योममार्गमुत्पत्य विमानमधिरोप्य तौ । द्राक् प्राप विजयार्द्धाद्रिं भूदेव्या हसितोपमम् ॥ १४८ ॥
स्वपूर्वापरकोटिभ्यां विगाह्य लवणार्णवम् । मध्ये भारतवर्षस्य स्थितं तन्मानदण्डवत् ॥ १४९ ॥
विराजमानमुत्तुङ्गैर्नानारत्नांशुचित्रितैः । [3]मकुटैरिव कूटैः स्वैः स्वैरमारुद्धखांगणैः ॥ १५० ॥
निपतन्निर्झरारावैः आपूरितगुहामुखम् । व्याजुहूषुमिवात्यन्तं[5] विश्रान्त्यै सुरदम्पतीन् ॥ १५१ ॥
महद्भिरचलोदग्रै[6]: सञ्चरद्भिरितोऽमुतः । घनाघनैर्घनध्वानैः[7] विष्वगारुद्धमेखलम् ॥ १५२ ॥
स्फुरच्चामीकरप्रस्थैः दीप्तैरुष्णांशुरश्मिभिः । ज्वलद्दावानलाशंकां जनयन्तं नभोजुषाम् ॥ १५३ ॥
क्षरद्भिःशिखरोपान्ताद्[8]ध्यायताद् गुरुनिर्झरैः[9] । घनैर्जर्जरितैरारादारब्ध[10]बहुनिर्झरम् ॥ १५४ ॥
[11]नूनमामोदलोभेन प्रोत्फुल्ला वनवल्लरीः । विनीलैरंशुकैर्विष्वक् विदधानमलिच्छलात् ॥ १५५ ॥

की सामग्री इष्ट नही है ॥१४४॥ इस प्रकार कहते हुए कुमारोंको युक्तिपूर्वक विश्वास दिला कर धरणेन्द्र भगवान्को नमस्कार कर उन्हें शीघ्र ही अपने साथ ले गया ॥१४५॥ महान् ऐश्वर्यको धारण करनेवाला वह धरणेन्द्र उन दोनों कुमारोंके साथ आकाशमें जाता हुआ ऐसा शोभायमान हो रहा था मानो ताप और प्रकाशके साथ उदित होता हुआ सूर्य ही हो ॥१४६॥ अथवा जिस प्रकार विनय और प्रशम गुणसे युक्त हुआ कोई योगिराज सुशोभित होता है उसी प्रकार नागकुमारोंके समान उन दोनों कुमारोंसे युक्त हुआ वह धरणेन्द्र भी अतिशय सुशोभित हो रहा था ॥१४७॥ वह दोनों राजकुमारोको विमानमे बैठाकर तथा आकाश मार्गका उल्लंघन कर शीघ्र ही विजयार्ध पर्वतपर जा पहुचा, उस समय वह पर्वत पृथिवीरूपी देवीके हास्यकी उपमा धारण कर रहा था ॥१४८॥

वह विजयार्ध पर्वत अपने पूर्व और पश्चिमकी कोटियोंसे लवण समुद्रमे अवगाहन (प्रवेश) कर रहा था और भरत क्षेत्रके बीचमे इस प्रकार स्थित था मानो उसके नापनेका एक दण्ड ही हो ॥१४९॥ वह पर्वत ऊचे, अनेक प्रकारके रत्नोंकी किरणोंसे चित्र विचित्र और अपनी इच्छानुसार आकाशाङ्गणको घेरनेवाले अपने अनेक शिखरोंसे ऐसा जान पड़ता था मानो मुकुटोंसे ही सुशोभित हो रहा हो ॥१५०॥ पड़ते हुए निर्झरनोंके शब्दोंसे उसकी गुफाओंके मुख आपूरित हो रहे थे और उनमे ऐसा मालूम होता था मानो अतिशय विश्राम करनेके लिये देव देवियोंको बुला ही रहा हो ॥१५१॥ उसकी मेखला अर्थात् बीचका किनारा पर्वत के समान ऊचे, यहा वहा चलते हुए और गम्भीर गर्जना करते हुए बड़े बडे मेघो द्वारा चारों ओरसे ढका हुआ था ॥१५२॥ देदीप्यमान सुवर्णके बने हुए और सूर्यकी किरणोसे सुशोभित अपने किनारोंके द्वारा वह पर्वत देव और विद्याधरोंको जलते हुए दावानलकी शका कर रहा था ॥१५३॥ उस पर्वतकी शिखरोंके समीप भागसे जो लम्बी धारवाले बड़े बड़े झरने पड़ते थे उनसे मेघ जर्जरित हो जाते थे और उनसे उस पर्वतके समीप ही बहुतसे निर्झरने बनकर निकल रहे थे ॥१५४॥ उस पर्वतपर के वनोंमे अनेक लताए फूली हुई थी और उनपर भ्रमर बैठे हुए थे उनसे वह पर्वत ऐसा मालूम होता था मानो सुगन्धिके लोभसे वह उन वनलताओंको

---

१ विश्वासं नीत्वा । २ अथवा । ३ मुकुटै–अ०, प० । ४ व्याह्वातुमिच्छुम् । ५ नितान्तं प्रसन्नम् । ६ पर्वतवदुन्नतैः । ७ बहलनिस्वनैः । ८ आयतात् । विस्तीर्णादित्यर्थ । –द्व्यायतै–अ०, म०, ल० । ९ स्थूलजलप्रवाहैः । १० भिन्नैः । ११ इव ।

लताभवनविश्रान्तकिन्नरोद्गीतिनिःस्वनैः । सदा रम्यान् वनोद्देशान् दधानमधिमेखलम्[1] ॥ १५६ ॥
लतागृहान्त[2]राबद्धदोलारूढन[3]भश्चरीः । वनाधिदेवतावेश्या[4] वहन्तं वनवीथिषु ॥ १५७ ॥
सञ्चरत्खचरीवक्त्रपङ्कजैः [5]प्रतिबिम्बितैः । प्रोद्वहन्तं महानीलस्थलीः ऊ[6]ढाब्जिनी श्रियः ॥ १५८ ॥
विचरत्खचरीचारुचरणालक्तकारुणाः । कृतार्चा[7] इव रक्ताब्जैः दधतं स्फाटकीः स्थलीः ॥ १५९ ॥
विदूरलङ्घिनो धीरध्वनितानमलच्छवीन् । निर्झरानिव बिभ्राणं मृगेन्द्रानधिकन्दरम्[8] ॥ १६० ॥
[9]अध्युपत्यकमारूढप्रणयान् सुरदम्पतीन् । सम्भोगान्ते कृतातोद्य विनोदान् दधतं मिथः ॥ १६१ ॥
श्रेणीद्वयं वितत्य[10] स्वं[11] पक्षद्वयमिवायतम् । विद्याधराधिवसतीः[12] धारयन्तं पुरीः [13]पराः ॥ १६२ ॥
[14]अध्यधित्यकमाबद्धकेतनैरिव निर्झरान् । दधद्भिः शिखरैः खाग्रं लङ्घयन्तमिवोच्छ्रितैः ॥ १६३ ॥
अच्छिन्नधारमाच्छ[15]दान्निर्झरैः शिखरस्रुतैः । जगन्नाडीमिवोन्मातुं विधृतायतदण्डकम् ॥ १६४ ॥
चन्द्रकान्तोपलैश्चन्द्रकरामर्शादनुक्षपम्[16] । क्षरद्भिर्दावभीत्येव सिञ्चन्तं स्वतटद्रुमान् ॥ १६५ ॥

चारों ओरसे काले वस्त्रोंके द्वारा ढक ही रहा हो ॥१५५॥ वह पर्वत अपनी मेखलापर ऐसे प्रदेशोंको धारण कर रहा था जो कि लताभवनोंमे विश्राम करनेवाले किन्नर देवोंके मधुर गीतोंके शब्दोसे सदा सुन्दर रहते थे ॥१५६॥ उस पर्वतपर वनकी गलियोंमे लतागृहोंके भीतर पड़े हुए झूलोंपर झूलती हुई विद्याधरियां वनदेवताओंके समान मालूम होती थी ॥१५७॥ उस पर्वतपर जो इधर उधर घूमती हुई विद्याधरियोंके मुखरूपी कमलोंके प्रतिबिम्ब पड़ रहे थे उनसे वह ऐसा मालूम होता था मानो नील मणिकी जमीनमे जमी हुई कमलिनियोंकी शोभा ही धारण कर रहा हो ॥१५८॥ वह पर्वत स्फटिक मणिकी बनी हुई उन प्राकृतिक भूमियों को धारण कर रहा था जो कि इधर उधर टहलती हुई विद्याधरियोंके सुन्दर चरणोंमे लगे हुए महावरसे लाल वर्ण होनेके कारण ऐसी जान पड़ती थी मानो लाल कमलोंसे उनकी पूजा ही की गई हो ॥१५९॥ वह पर्वत अपनी गुफाओंमे निर्झरनोंके समान सिहोंको धारण कर रहा था क्योंकि वे सिह निर्झरनोंके समान ही विदूरलघी अर्थात् दूरतक लांघनेवाले, गम्भीर शब्दों से युक्त और निर्मल कान्तिके धारक थे ॥१६०॥ वह पर्वत अपनी उपत्यका अर्थात् समीप की भूमिपर सदा ऐसे देव-देवियोको धारण करता था जो परस्पर प्रेमसे युक्त थे और सम्भोग करनेके अनन्तर वीणा आदि बाजे बजाकर विनोद किया करते थे ॥१६१॥ उस पर्वतकी उत्तर और दक्षिण ऐसी दो श्रेणिया थी जो कि दो पंखोंके समान बहुत ही लम्बी थी और उन श्रेणियोमे विद्याधरोंके निवास करनेके योग्य अनेक उत्तम उत्तम नगरियां थी ॥१६२॥ उस पर्वतकी शिखरोंपर जो अनेक निर्झरने बह रहे थे उनसे वे शिखर ऐसे जान पड़ते थे मानो उनके ऊपरी भागपर पताकाएं ही फहरा रही हों और ऐसी ऐसी ऊंची शिखरोंसे वह पर्वत ऐसा मालूम होता था मानो आकाशके अग्रभागका उल्लंघन ही कर रहा हो ॥१६३॥ शिखरसे लेकर जमीन तक जिनकी ऐसी अखण्ड धारा पड़ रही है ऐसे निर्झरनोंसे वह पर्वत ऐसा जान पड़ता था मानो लोकनाड़ीको नापनेके लिये उसने एक लम्बा दण्ड ही धारण किया हो ॥१६४॥ चन्द्रमाकी किरणोंके स्पर्शसे जिनसे प्रत्येक रात्रिको पानीकी धारा बहने लगती है ऐसे चन्द्रकान्त मणियों के द्वारा वह पर्वत ऐसा जान पड़ता है मानो दावानलके डरसे अपने किनारेके वृक्षोंको ही सीच

---

१ श्रेण्याम् । २ मध्यरचितप्रेङ्खलाऽधिरूढ । ३ दोलारुढा नभ– अ०, प० । ४ सदृशाः । ५ प्रतिबिम्बकैः अ०, म०, ल०, स० । ६ धृत । ७ कृतोपहाराः । ८ कन्दरे तटे । ९ आसन्नभूमौ । उपत्यका अद्रेरासन्ना भूमिः । १० विस्तृत्य प्रसार्येत्यर्थः । ११ आत्मीयम् । १२ अधिवासः । १३ पुरीवराः ब० । १४ सानुमध्ये । १५ आ अवधेः । आ भूमिभागादित्यर्थः । १६ रात्रौ ।

शशिकान्तोपलैरिन्दुं तारकाः कुमुदोत्करैः । [1]उडूनि निर्झरच्छेदैः [2]न्यक्कृत्येवोच्चकैः स्थितम् ॥ १६६ ॥
सितैर्घनैस्तटीः शुभ्रः श्रयद्भिरनिलाहृतैः[3] । कृतोपचयमारुद्धवना[4]भोगैर्घनात्यये ॥ १६७ ॥
प्रोत्तुंगो मेरुरेकान्तान्न[5] मद्वत्स धृतायतिः[6] । इति तोषादिवोन्मुक्त[7]प्रहासं निर्झरारवैः ॥ १६८ ॥
सुविशुद्धोऽहमामूलाद् आशृंगं रजतोच्चयः[8] । शुद्धाः कुलाद्रयो नैवमितीवाविष्कृतोन्नतिम् ॥ १६९ ॥
खचरैः सह सम्बन्धाद् गंगासिन्धोरधः स्थितेः । जित्वेव [9]कुलकुक्षत्कीलान् बिभ्राणं विजयार्द्धताम्[10] ॥१७०॥
अचलस्थितिमुत्तुंग [11]शुद्धिभाजं जगद्गुरुम्[12] । जिनेन्द्रमिव नाकीन्द्रैः शश्वदाराध्यमादरात् ॥ १७१ ॥
[13]अक्षरत्वादभेद्यत्वाद् अलङ्घ्यत्वान्महोन्नतेः । गुरुत्वाच्च जगद्धातुः[14] आतन्वानमनुक्रियाम्[15] ॥ १७२ ॥

रहा हो ॥१६५॥ वह पर्वत चन्द्रकान्त मणियोंसे चन्द्रमाको, कुमुदोंके समूहसे ताराओंको और निर्झरनोंके छीटोंसे नक्षत्रोंको नीचा दिखाकर ही मानो बहुत ऊंचा स्थित था ॥१६६॥ शरद् ऋतुमें जब कभी वायुसे टकराये हुए सफेद बादल वन-प्रदेशोंको व्याप्तकर उसके सफेद किनारों पर आश्रय लेते थे तब उन बादलोंसे वह पर्वत ऐसा जान पड़ता था मानो कुछ बढ़ गया हो ॥१६७॥ उस पर्वतपर जो निर्झरनोंके शब्द हो रहे थे उनसे वह ऐसा मालूम होता था मानो सुमेरु पर्वत केवल ऊंचा ही है हमारे समान लम्बा नही है इसी सतोषसे मानो जोरका शब्द करता हुआ हँस रहा हो ॥१६८॥ मै बहुत ही शुद्ध हू और जड़से लेकर शिखर तक चांदी चादीका बना हुआ हू, अन्य कुलाचल मेरे समान शुद्ध नही है यह समझकर ही मानो उसने अपनी ऊंचाई प्रकट की थी ॥१६९॥ उस पर्वतका विद्याधरोंके साथ सदा संसर्ग रहता था और गंगा तथा सिन्धु नामकी दोनों नदियां उसके नीचे होकर बहती थी इन्ही कारणोंसे उसने अन्य कुलाचलोंको जीत लिया था तथा इसी कारणसे वह विजयार्ध इस सार्थक नामको धारण कर रहा था ॥ भावार्थ–अन्य कुलाचलोंपर विद्याधर नही रहते है और न उनके नीचे गंगा सिन्धु ही बहती है बल्कि हिमवत् नामक कुलाचलके ऊपर बहती है । इन्ही विशेषताओसे मानो उसने अन्य कुलाचलोंपर विजय प्राप्त कर ली थी और इस विजयके कारण ही उसका विजयार्ध विजय + आ + ऋद्धः) ऐसा सार्थक नाम पड़ा था ॥१७०॥ इन्द्र लोग निरन्तर उस पर्वत की जिनेन्द्रदेवके समान आराधना करते थे क्योंकि जिस प्रकार जिनेन्द्रदेव अचल स्थित है अर्थात् निश्चल मर्यादाको धारण करनेवाले हैं उसी प्रकार वह पर्वत भी अचल स्थित था अर्थात् सदा निश्चल रहनेवाला था, जिस प्रकार जिनेन्द्रदेव उत्तुङ्ग अर्थात् उत्तम है उसी प्रकार वह पर्वत भी उत्तुङ्ग अर्थात् ऊंचा था,जिनेन्द्रदेव जिस प्रकार शुद्धिभाक् है अर्थात् राग, द्वेष आदि कर्म विकारसे रहित होनेके कारण निर्मल है उसी प्रकार वह पर्वत भी शुद्धिभाक् था अर्थात् धूलि कंटक आदिसे रहित होनेके कारण स्वच्छ था और जिस प्रकार जिनेन्द्रदेव जगत्के गुरु है इसी प्रकार वह पर्वत भी जगत्मे श्रेष्ठ अथवा उसका गौरव स्वरूप था ॥१७१॥ अथवा वह पर्वत जगत्के विधातात्मा जिनेन्द्रदेवका अनुकरण कर रहा था क्योंकि जिस प्रकार, जिनेन्द्र-देव अक्षर अर्थात् विनाशरहित है उसी प्रकार वह पर्वत भी प्रलय आदिके न पड़नेसे विनाश रहित था, जिस प्रकार जिनेन्द्रदेव अभेद्य है उसी प्रकार वह पर्वत भी अभेद्य था अर्थात् वज्र आदि

---

१ नक्षत्राणि । २ अधःकृत्य । ३–रनिलाहतैः । ४ विस्तार । ५ सर्वथा । ६ धृतायामः । ७ कृतप्रहसनम् । ८ रजतपर्वतः । ९ कुलपर्वतान् । १० विजयेन ऋद्धः प्रवृद्धः विजयार्द्धः तस्य भावः ताम् । पृषोदरादिगणत्वात् । ११ नैर्मल्य । पक्षे विशुद्धपरिणाम । १२ जगति गुरुम्, पक्षे त्रिजगद्गुरुम् । १३ अनश्वरत्वात् । १४ जिनेश्वरस्य । १५ अनुकृतिम् ।

[1]दिग्जयप्रसवागारं दधानं [2]तद् गुहाद्वयम् । सुसंवृ[3]तं सुगुप्तं च गूढान्तर्गर्भनिर्गमम् ॥ १७३ ॥
कूटैर्नवभिरत्तुङ्गैर्भूदेव्या [4]मकुटोपमैः । विराजमानमानीलवनालीपरिधानकम्[5] ॥ १७४ ॥
[6]पृथुं पञ्चाशतं मूले तदर्धं च समुच्छ्रितम् । [7]तत्तुर्यमवगाढं[8] गां[9] दिव्ययोजनमानतः ॥ १७५ ॥
महीतलाद्दशोत्पत्य[10] त्रिंशद्योजनविस्तृतम् । ततोप्यूर्ध्वं दशोत्पत्य दशविस्तृतमग्रतः ॥ १७६ ॥
क्वचिदुन्नतमानिम्नं क्वचित् समतलं क्वचित् । [11]क्वचिदुच्चावचग्रावस्थपुटं दधतं तटम् ॥ १७७ ॥
क्वचिद् ब्रध्न[12]करोत्तप्तरत्नग्रावाग्रगोचरात् । अपसर्पत् कपिव्रातकृतकोलाहलाकुलम् ॥ १७८ ॥
क्वचित् कण्ठीरवारावत्रस्तानेकपयूथपम् । [13]कलकण्ठीकलालापवाचालितवनं क्वचित् ॥ १७९ ॥
क्वचिच्छिखिमुखो[14]द्गीर्णकेकारावविभीषितैः[15] । सर्पैः सत्रासमासृप्त[16]कान्तारान्त बिलान्तरम् ॥१८०॥

से उसका भेदन नही हो सकता था, जिनेन्द्रदेव जिस प्रकार अलंघ्य है अर्थात् उनके सिद्धान्तों का कोई खण्डन नही कर सकता उसी प्रकार वह पर्वत भी अलंघ्य अर्थात् लांघनेके अयोग्य था, जिनेन्द्रदेव जिस प्रकार महोन्नत अर्थात् अत्यन्त श्रेष्ठ है उसी प्रकार वह पर्वत भी महोन्नत अर्थात् अत्यन्त ऊंचा था और जिनेन्द्रदेव जिस प्रकार जगत्के गुरु है उसी प्रकार वह पर्वत भी गुरु अर्थात् श्रेष्ठ अथवा भारी था ॥१७२॥ वह विजयार्ध, चक्रवर्त्तीके दिग्विजय करनेके लिये प्रसूतिगृहके समान दो गुफाये धारण करता था क्योंकि जिस प्रकार प्रसूति गृह ढका हुआ और सुरक्षित होता है उसी प्रकार वे गुफाएं भी ढकी हुई और देवों द्वारा सुरक्षित थीं तथा जिस प्रकार प्रसूतिगृहके भीतरका मार्ग छिपा हुआ होता है उसी प्रकार उन गुफाओंके भीतर जानेका मार्ग भी छिपा हुआ था ॥१७३॥ वह पर्वत ऊचे ऊंचे नौ कूटोंसे शोभायमान था जो कि पृथिवी देवीके मुकुट के समान जान पडते थे और उसके चारों ओर जो हरे हरे वनोंकी पंक्तियां शोभायमान थी वे उस पर्वतके नील वस्त्रोंके समान मालूम होती थी॥१७४॥वह बड़े योजनके प्रमाण से मूल भागमे पचास योजन चौडा था, पच्चीस योजन ऊचा था और उससे चौथाई अर्थात् छह सौ पच्चीस योजन पृथ्वीके नीचे गडा हुआ था ॥१७५॥ पृथ्वी तलसे दश योजन ऊपर जाकर वह तीस योजन चौड़ा था और उससे भी दश योजन ऊपर जाकर अग्रभागमें सिर्फ दश योजन चौड़ा रह गया था ॥१७६॥ इसका किनारा कही ऊंचा था, कही नीचा था, कही सम था और कही ऊंचे नीचे पत्थरोंसे विषम था ॥१७७॥ कही कही उस पर्वतपर लगे हुए रत्नमयी पाषाण सूर्यकी किरणोंसे बहुत ही गरम हो गये थे इसलिये उसके आगेके प्रदेशसे वानरोंके समूह हट रहे थे जिससे वह पर्वत उन वानरों द्वारा किये हुए कोलाहलसे आकुल हो रहा था। ॥१७८॥ उस पर्वतपर कही तो सिहोके शब्दोंसे अनेक हाथियोंके झुण्ड भयभीत हो रहे थे और कही कोयलोंके मधुर शब्दोंसे वन वाचालित हो रहे थे ॥१७९॥ कही मयूरोंके मुखसे निकली हुई केका वाणीसे भयभीत हुए सर्प बड़े दुःखके साथ वनोंके भीतर अपने-अपने बिलोंमे घुस

---

१ [illegible] । २ प्रसिद्धम् । ३ सुप्रच्छन्नम् । ४ मुकुटो– अ०, प०, म०, ल० । ५ अधोऽशुकम् । ६ विष्कम्भमित्यर्थः । ७ तदुन्नतेश्चतुर्थांशभागम्, क्रोशाधिकषड्योजनमिति यावत् । ८ प्रविष्टम् । ९ पृथिवीम् । १० दशयोजनमुत्क्रम्य । ११ नानाप्रकारपाषाणैर्विषमोन्नतम् । १२ सूर्यकिरणसन्तप्तसूर्यकान्तशिलाग्रप्रदेशात् । १३ कोकिला । १४ मयूरमुखोद्भूत । १५ भीति नीतैः । १६ मासृष्ट-इति त० ब० पुस्तकयो पाठान्तरम् ।

चामीकरमय[1]प्रस्थच्छाया संश्रयिणीर्मृगीः । हिरण्मयीरिवारूढ[2]तच्छाया दधतं क्वचित् ॥ १८१ ॥
क्वचिद्विचित्ररत्नांशुरचितेन्द्रधनुर्लताम् । दधानमनिलोद्धूतां ततां कल्पलतामिव ॥ १८२ ॥
क्वचिच्च विचरद्दिव्यकामिनीनूपुरारवैः । रमणीयसरस्तीरं हंसीविरुतमूर्च्छितैः[3] ॥१८३॥
क्वचिद् [4]विचतुरक्रीडाम् आचरद्भिरनेकपः । सलिलान्दोलितालानैः आलोलितवनद्रुमम् ॥१८४॥
क्वचित् पुलिनसंसुप्तसारसीरुतमूर्च्छितैः[5] । कलहंसीकलक्वाणैः वाचालितसरोजलम् ॥१८५॥
श्वचित् क्रुद्धाहि[6]सूत्कारैः श्वसन्तमिव हेलया । क्वचिच्च चमरीयथैः हसन्तमिव निर्मलैः ॥१८६॥
गुहानिलैः क्वचिद्व्यक्तम् उच्छ्वसन्तमिवायतम्[7] । क्वचिच्च पवनाधूतैः घूर्णन्तमिव[8] पादपैः ।१८७॥
निभृतं[9] चिन्तयन्तीभिः इष्टकामुकसङ्गमम् । [10]विजने [11]खचरस्त्रीभिः मूकीभूतमिव क्वचित् ॥१८८॥
क्वचिच्च [12]चटुलोदञ्च[13]च्चञ्चरीककलस्वनैः । [14]किमप्यारब्धसङ्गीतमिव व्यायतमूर्च्छनम् ॥१८९॥
कदम्बामोदसंवादिसुरभिश्वसितैर्मुखैः । तरुणार्ककरस्पर्शाद् विबुधैरिव पङ्कजैः ॥१९०॥

रहे थे ॥१८०॥ कही उस पर्वतपर सुवर्णमय तटोंकी छायामे हरिणियाँ बैठी हुई थी उनपर उन सुवर्णमय तटोंकी कान्ति पड़ती थी जिससे वे हरिणियाँ सुवर्णकी बनी हुई सी जान पड़ती थी ॥१८१॥ कही चित्र-विचित्र रत्नोकी किरणोसे इन्द्रधनुषकी लता बन रही थी और वह ऐसी मालूम होती थी मानो वायुसे उड़कर चारों ओर फैली हुई कल्पलता ही हो ॥१८२॥ कही देवांगनाए विहार कर रही थी, उनके नूपुरोंके शब्द हसिनियोंके शब्दोसे मिलकर बुलंद हो रहे थे और उनसे तालाबोंके किनारे बड़े ही रमणीय जान पड़ते थे ॥१८३। कही लीला मात्रमें अपने खूटोंको उखाड़ देनेवाले बड़े बड़े हाथी चतुराईके साथ एक विशेष प्रकारकी क्रीड़ा कर रहे थे और उससे उस पर्वतपरके वनोंके वृक्ष खूब ही हिल रहे थे ॥१८४॥ कही किनारे पर सोती हुई सारसियोंके शब्दोंमें कलहसिनियों (बतख) के मनोहर शब्द मिल रहे थे और उनसे तालाबका जल शब्दायमान हो रहा था ॥१८५॥ कही कुपित हुए सर्प शू शू शब्द कर रहे थे जिनसे वह पर्वत ऐसा जान पड़ता था मानो क्रीडा करता हुआ श्वास ही ले रहा हो, और कही निर्मल सुरागायोंके झुण्ड फिर रहे थे जिनसे वह पर्वत ऐसा जान पड़ता था मानो हंस ही रहा हो ॥१८६॥ कही गुफासे निकलती हुई वायु के द्वारा वह पर्वत ऐसा जान पड़ता था मानो प्रकट रूपसे लम्बी सांस ही ले रहा हो और कही पवनसे हिलते हुए वृक्षोंसे ऐसा मालूम होता था मानो वह झूम ही रहा हो ॥१८७॥ कही उस पर्वतपर एकान्त स्थानमें बैठी हुई विद्याधरोंकी स्त्रियां अपने इष्टकामी लोगोंके समागमका खूब विचार कर रही थी जिससे वह पर्वत ऐसा जान पड़ता था मानो चुप ही हो रहा हो ॥१८८॥ और कही चञ्चलतापूर्वक उड़ते हुए भौरोंके मनोहर शब्द हो रहे थे और उनसे वह पर्वत ऐसा मालूम होता था मानो उसने जिसकी आवाज बहुत दूरतक फैल गई है ऐसे किसी अलौकिक सगीतका ही प्रारम्भ किया हो ॥१८९॥

उस पर्वतपरके वनोंमे अनेक तरुण विद्याधरियां अपने अपने तरुण विद्याधरोंके साथ विहार कर रही थी । उन विद्याधरियोंके मुख कदम्ब पुष्पकी सुगन्धिके समान सुगन्धित श्वाससे सहित थे और जिस प्रकार तरुण अर्थात् मध्याह्नके सूर्यकी किरणोंके स्पर्शसे कमल खिल जाते है

---

१ सानु । २ धृतचामीकरच्छायाः । ३ मिश्रितैः । ४ विशेषेण चतुर । ५ ध्वनिसम्मिश्रैः । ६ –फूत्कारैः प० । –शूत्कारैः म०, ल० । ७ दीर्घं यथा भवति तथा । ८ भ्रमन्तम् । ९ संवृतावयव यथा भवति तथा । १० एकान्तस्थाने । ११ खेचर– म०,ल० । १२ श्लाघ्य । १३ उद्गच्छत् । १४ ईषत् ।

नेत्रैर्मधुमदाताम्रैः इन्दीवरदलायतैः[1] । मदनस्येव जैत्रास्त्रैः [2]सालसापाङ्गवीक्षितैः ।।१६१।।
[3]अरालैरालिनीलाभैः केशैर्गतिविसंस्थुलैः[4] । विस्रस्तकबरीबन्धवि[5]गलत्पुष्पदामकैः ।।१६२।।
जितेन्दुकान्तिभिः कान्तैः कपोलैरलकाङ्कितैः[6] । मदनस्य [7]सुसम्मृष्टैः आलेख्य[8]फलकैरिव ।।१६३।।
अधरैः पक्वबिम्बाभैः स्मितांशुभिरनुद्रुतैः[9] । सिक्तैर्जलकणैर्द्वित्रैरिव[10] विद्रुमभङ्गकैः[11] ।।१६४।।
परिणाहिभिरुत्तुङ्गैः[12] सुवृत्तैस्तनमण्डलैः । स्रस्तांशुकस्फुटालक्ष्यलसन्नखपदाङ्कनैः[13] ।।१६५।।
[14]हरिचन्दनसम्मृष्टैः हारज्योत्स्नोपहारितैः । कुचनर्तनरङ्गाभैः प्रेक्षणी[15]यैरुरोगृहैः ।।१६६।।
नखोज्ज्वलैस्ताम्रतलैः सलीलान्दोलितैर्भुजैः । सपुष्पपल्लवोल्लासिलताविटप[16]कोमलैः ।।१६७।।
तनूदरैः कृशैर्मध्यैः त्रिवलीभङ्गशोभिभिः । नाभिवल्मीकनिस्स[17]र्पद्रोमालीकालभोगिभिः ।।१६८।।
लसद्दुकूलवसनैः विपुलैर्जघनस्थलैः । सकाञ्चीबन्धनैः कामनृपकारालयायितैः ।।१६९।।

उसी प्रकार अपने तरुण पुरुषरूपी सूर्यके हाथोंके स्पर्शसे खिले हुए थे—प्रफुल्लित थे। उनके नेत्र मद्यके नशासे कुछ कुछ लाल हो रहे थे वे नील कमलके दलके समान लम्बे थे, आलस्य के साथ कटाक्षावलोकन करते थे और ऐसे मालूम होते थे मानो कामदेवके विजयशील अस्त्र ही हों ।।१९०-१९१।। उनके केश भी कुटिल थे, भ्रमरोंके समान काले थे, चलने फिरनेके कारण अस्त-व्यस्त हो रहे थे और उनकी चोटीका बन्धन भी ढीला हो गया था जिससे उसपर लगी हुई फूलोंकी मालाएं गिरती चली जाती थी। उनके कपोल भी बहुत सुन्दर थे, चन्द्रमाकी कान्तिको जीतनेवाले थे और अलक अर्थात् आगेके सुन्दर काले केशोंसे चिह्नित थे इसलिये ऐसे जान पडते थे मानो अच्छी तरह साफ किये हुए कामदेवके लिखनेके •तख्ते ही हों। उनके अधरोष्ठ पके हुए बिम्बफलके समान थे और उनपर मन्द हास्यकी किरणे पड़ रही थी जिससे वे ऐसे सुशोभित होते थे मानो जलकी दो-तीन बूंदोंसे सीचे गये मूंगाके टुकड़े ही हों। उनके स्तनमण्डल विशाल ऊंचे और बहुत ही गोल थे, उनका वस्त्र नीचेकी ओर खिसक गया था इसलिये उनपर सुशोभित होनेवाले नखोंके चिह्न साफ-साफ दिखाई दे रहे थे। उनके वक्षःस्थलरूपी घर भी देखने योग्य—अतिशय सुन्दर थे क्योंकि वे सफेद चन्दनके लेपसे साफ किये गये थे, हाररूपी चांदनीके उपहारसे सुशोभित हो रहे थे और स्तनोंके नाचनेकी रंगभूमि के समान जान पड़ते थे। जिनके नख उज्ज्वल थे, हथेलियां लाल थीं, और जो लीलासहित इधर उधर हिलाई जा रही थी ऐसी उनकी भुजाएं ऐसी जान पड़ती थीं मानो फूल और नवीन कोपलोंसे शोभायमान किसी लताकी कोमल शाखाएं ही हों। उनका उदर बहुत कृश था, मध्य भाग पतला था और वह त्रिवलिरूपी तरंगोंसे सुशोभित हो रहा था। उनकी नाभिमें से जो रोमावली निकल रही थी वह ऐसी जान पड़ती थी मानो नाभिरूपी बामीसे रोमावली रूपी काला सर्प ही निकल रहा हो। उनका जघन स्थल भी बहुत बड़ा था, वह रेशमी वस्त्र से सुशोभित था और करधनीसे सहित था इसलिये ऐसा मालूम होता था मानो कामदेवरूपी राजाका कारागार ही हो। उन विद्याधरियोंके चरण लाल कमलके समान थे, वे डगमगाती

---

१ 'दलायितैः', इत्यपि क्वचित् पाठः। २ आलसेन सहित। ३ वक्रैः। ४ चलद्भिः। ५ श्लथ। ६ –रलकाञ्चितैः इत्यपि पाठः। ७ सम्मार्जितैः। ८ लेखितुं योग्य। ९ अनुगतैः। १० द्वौ वा त्रयो वा द्वित्राः तैः। ११ प्रवालखण्डकैः। १२ विशालवद्भिः। १३ नखरेखालक्ष्मैः। १४ श्रीखण्डद्रवसम्मार्जितैः, हरिचन्दनानुलिप्तैरित्यर्थः। १५ दर्शनीयैः। १६ शाखा। १७ निर्गच्छत्।

स्खलद्गतिवशादुच्चैः आरणन्मणिनूपुरैः । चरणैररुणाम्भोजैरिव व्यक्तालिझङ्कृतैः ॥२००॥
सलीलमन्थरैर्यातैः[1][2] जितहंसीपरिक्रमैः[3] । श्वसितैः सकुचोत्कम्पैः व्यञ्जितान्तर्गतक्लमैः[4][5] ॥२०१॥
समं युवभिरारूढनवयौवनकर्कशाः[6] । विचरन्तीर्वनान्तेषु दधानं खचरीः क्वचित् ॥२०२॥
अलकालीलसद्भृङ्गाः[7] तन्वीः कोमलविग्रहाः । लतानुकारिणीरूढस्मितपुष्पोद्गमश्रियः ॥२०३॥
प्रसूनरचिताकल्पावतंसीकृतपल्लवाः । कुसुमावचये[8] सक्ताः[9] सञ्चरन्तीरितस्ततः ॥२०४॥
वनलक्ष्मीरिव व्यक्तलक्षणा वनजेक्षणाः । धारयन्तमनूद्यानं[10] विद्याधरवधूः क्वचित् ॥२०५॥
तमित्यद्रीन्द्रमुद्भूतमाहात्म्यं भुवनातिगम् । जिनाधिपमिवासाद्य कुमारौ धृतिमापतुः[11] ॥२०६॥

हरिणीच्छन्दः

धुततटवनाभोगा भागीरथीतटवेदिका[12] परिसरसरोवीची[13] भेदादुपोढपयःकणाः[14] ।
वनकरिकटादाकृष्टालिव्रजा मरुतो गिरेः उपवनभुवो[15] यूनोरध्वश्रमं व्यपनिन्यिरे[16] ॥२०७॥

हुई चलती थी इसलिये उनके मणिमय नूपुरोंसे रुनझुन शब्द हो रहा था और जिससे ऐसा मालूम होता था मानो उनके चरणरूपी लाल कमल भ्रमरोंकी झकारसे झङ्कृत ही हो रहे हों। वे विद्याधरियां लीला सहित धीरे धीरे जा रही थी, उनकी चालने हंसिनियोंकी चालको भी जीत लिया था, चलते समय उनका श्वास भी चल रहा था जिससे उनके स्तन कम्पायमान हो रहे थे और उनके अन्तःकरणका खेद प्रकट हो रहा था। इस प्रकार प्राप्त हुए नव यौवनसे सुदृढ़ विद्याधरियां अपने तरुण प्रेमियोंके साथ उस पर्वतके वनोंमें कही कहीपर विहार कर रही थी ॥१९२–२०२॥ वह पर्वत अपने प्रत्येक वनमें कही-कही अकेली ही फिरती हुई विद्याधरियोंको धारण कर रहा था, वे विद्याधरियां ठीक लताके समान जान पड़ती थी क्योंकि जिस प्रकार लताओंपर भ्रमर सुशोभित होते है उसी प्रकार उनके मस्तकपर भी केशरूपी भ्रमर शोभायमान थे,लताएं जिस प्रकार पतली होती है उसी प्रकार वे भी पतली थी, लताएं जिस प्रकार कोमल होती है उसी प्रकार उनका शरीर भी कोमल था,और लताए जिस प्रकार पुष्पोंकी उत्पत्तिसे सुशोभित होती है उसी प्रकार वे भी मन्द हास्यरूपी पुष्पोत्पत्तिकी शोभा से सुशोभित हो रही थीं। उन्होंने फूलोंके आभूषण और पत्तोंके कर्णफूल बनाये थे तथा वे इधर उधर घूमती हुई फूल तोड़नेमें आसक्त हो रही थी। उनके नेत्र कमलोंके समान थे तथा और भी प्रकट हुए अनेक लक्षणोंसे वे वनलक्ष्मीके समान मालूम होती थी ॥२०३–२०५॥ इस प्रकार जिसका माहात्म्य प्रकट हो रहा है और जो तीनों लोकोंका अतिक्रमण करनेवाला है ऐसे जिनेन्द्रदेवके समान उस गिरिराजको पाकर वे नमि विनमि राजकुमार अतिशय सन्तोष को प्राप्त हुए ॥२०६॥ जिसने तटवर्ती वनोंके विस्तारको कम्पित किया है, जिसने गङ्गा नदीके तट सम्बन्धी वेदीके समीपवर्ती तालाबकी लहरोंको भेदन कर अनेक जलकी बूंदे धारण कर ली हैं और जिसने अपनी सुगन्धिके कारण वनके हाथियोंके गण्डस्थलसे भ्रमरोंके समूह अपनी ओर खीच लिये हैं ऐसे उस पर्वतके उपवनोंमें उत्पन्न हुए वायुने उन दोनों तरुण कुमारों

---

१ मन्दैः। २ गमनैः। ३ पदन्यासैः। ४ व्यक्तीकृत। व्यञ्जितान्तर्गतक्लमैः इत्यपि पाठः। ५ श्रमैः। ६ प्रकटीभूत। ७ 'ललद्' इत्यपि क्वचित्पाठः। चलद्। ८ कुसुमोपचये। ९ आसक्ताः। १० उद्यानमुद्यान प्रति। ११ सन्तोषम्। १२ गङ्गा। १३ पर्यन्तभूः परिसरः। १४ आश्रयणात्। १५ उपवने जाता.। १६ परिहृरन्ति स्म।

मालिनीच्छन्दः

मदकलकलकण्ठी डिण्डिमारावरम्या
मधुरविरुतभृङ्गीमङ्गलोद्गीतिहृद्याः ।
परिधृतकुसुमार्घास्सम्पतद्भिर्मरुद्भिः
फणिपतिमिव दूरात् प्रत्युदीयु[1]र्वनान्ताः ॥२०८॥
रजतगिरिमहीन्द्रो नातिदूरादुदारम्
प्रसवभवनमेकं विश्वविद्यानिधीनाम्[2] ।
जिनमिव भुवनान्तर्व्यापि[3]कीर्तिं प्रपश्यन्
प्रमदमवि[4]भरन्तः[5] सार्द्धमाभ्यां युवाभ्याम् ॥२०९॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे धरणेन्द्रविजयार्धोपगमनं नामाष्टादशं पर्व ॥१८॥

के मार्गका सब परिश्रम दूर कर दिया था ॥२०७॥ उस पर्वतके वन प्रदेशोंसे प्रचलित हुआ पवन दूरदूरसे ही धरणेन्द्रके समीप आ रहा था जिससे ऐसा जान पड़ता था मानो उस पर्वतके वनप्रदेश ही धरणेन्द्रके सन्मुख आ रहे हों, क्योंकि वे वनप्रदेश मदोन्मत्त सुन्दर कोयलोंके शब्दरूपी वादित्रोंकी ध्वनिसे शब्दायमान हो रहे थे, भ्रमरियोंके मधुर गुंजाररूपी मंगलगानोंसे मनोहर थे और पुष्परूपी अर्घ धारण कर रहे थे ॥२०८॥ इस प्रकार जो बहुत ही उदार अर्थात् ऊंचा है, जो समस्त विद्यारूपी खजानोंकी उत्पत्तिका मुख्य स्थान है और जिसकी कीर्ति समस्त लोकके भीतर व्याप्त हो रही है ऐसे, जिनेन्द्रदेवके समान सुशोभित उस विजयार्ध पर्वतको समीपसे देखता हुआ वह धरणेन्द्र उन दोनों राजकुमारोंके साथ-साथ अपने मनमें बहुत ही प्रसन्न हुआ ॥२०९॥

इस प्रकार भगवज्जिनसेनाचार्य प्रणीत त्रिषष्टिलक्षण महापुराण संग्रहके हिन्दी भाषानुवादमें धरणेन्द्रका विजयार्ध पर्वतपर जाना आदिका वर्णन करनेवाला अठारहवां पर्व पूर्ण हुआ ।

---

१ अभिमुखमाययुः । २ विद्याधराणाम् । ३ –र्व्याप्ति– ब० । ४ अधात् । ५ मनसि ।

एकोनविंशं पर्व

अथास्य मेखलामाद्याम् अवतीर्णः फणीश्वरः । तत्र व्योमचरेन्द्राणां लोकं [1]तावित्यदीदृशत्[2] ॥१॥
अयं गिरिरसंभूष्णुः[3] नूनमूर्ध्वं महत्तया । वितत्य[4] तिर्यगात्मानम् अवगाढो[5] महार्णवम् ॥२॥
श्रेण्यौ सदानपायिन्यौ भूभृतोऽस्य विराजतः । देव्याविव महाभोग[6]सम्पन्ने विधृतायती[7] ॥३॥
योजनानि दशोत्पत्य[8] गिरेरस्याधिमेखलम्[9] । विद्याधरनिवासोऽयं भाति स्वर्गैक[10]देशवत् ॥४॥
विद्याधरा विभान्त्यस्मिन् श्रेणीद्वयमधिष्ठिताः[11] । स्वर्गादिव समागत्य कृतवासाः सुधाशनाः[12] ॥५॥
विद्याधराधिवासोऽयं धत्तेऽस्मल्लोकविभ्रमम्[13] । निषेवितो महाभोगैः[14] फणीन्द्रैरिव खेचरैः ॥६॥
[15]पातालस्वर्गलोकस्य सत्यमद्य स्मराम्यहम् । नागकन्या इव प्रेक्ष्याः[16] पश्यन् खचरकन्यकाः ॥७॥
नात्र प्रतिभयं[17] तीव्रं स्वचक्रपरचक्रजम् । नेतयो[18] नैव रोगादिबाधाः सन्तीह जातुचित् ॥८॥

अथानन्तर वह धरणेन्द्र उस विजयार्ध पर्वतकी पहली मेखलापर उतरा और वहां उसने दोनों राजकुमारोंके लिये विद्याधरोंका वह लोक इस प्रकार कहते हुए दिखलाया ॥१॥ कि ऐसा मालूम होता है मानो यह पर्वत बहुत भारी होनेके कारण इससे अधिक ऊपर जानेके लिये समर्थ नही था इसीलिये इसने अपने आपको इधर उधर दोनों ओर फैलाकर समुद्रमे जाकर मिला दिया है ॥२॥ यह पर्वत एक राजाके समान सुशोभित है और कभी नष्ट न होनेवाली इसकी ये दोनों श्रेणियां महादेवियोंके समान सुशोभित हो रही है क्योकि जिस प्रकार महादेवियां महाभोग अर्थात् भोगोपभोगकी विपुल सामग्रीसे सहित होती है उसी प्रकार ये श्रेणियां भी महाभोग (महा आभोग) अर्थात् बड़े भारी विस्तारसे सहित हैं और जिस प्रकार महादेवियां आयति अर्थात् सुन्दर भविष्यको धारण करनेवाली होती हैं उसी प्रकार ये श्रेणियां भी आयति अर्थात् लम्बाईको धारण करनेवाली है ॥३॥ पृथिवीसे दश योजन ऊंचा चढ़कर इस पर्वतकी प्रथम मेखलापर यह विद्याधरोंका निवासस्थान है जो कि स्वर्गके एक खण्डके समान शोभायमान हो रहा है ॥४॥ इस पर्वतकी दोनों श्रेणियोंमे रहनेवाले विद्याधर ऐसे मालूम होते हैं मानो स्वर्गसे आकर देव लोग ही यहां निवास करने लगे हों ॥५॥ यह विद्याधरोंका स्थान हम लोगोंके निवासस्थानका सन्देह कर रहा है क्योंकि जिस प्रकार हम लोगों (धरणेन्द्रों) का स्थान महाभोग अर्थात् बडे बड़े फणोंको धारण करनेवाले नागेन्द्रोंके द्वारा सेवित होता है उसी प्रकार यह विद्याधरोंका स्थान भी महाभोग अर्थात् बड़े बड़े भोगोपभोगोंको धारण करनेवाले विद्याधरोंके द्वारा सेवित है ॥६॥ नागकन्याओंके समान सुन्दर इन विद्याधर कन्याओंको देखते हुए सचमुच ही आज मै पातालके स्वर्गलोकका अर्थात् भवनवासियोंके निवासस्थानका स्मरण कर रहा हूं ॥७॥ यहाँ न तो अपने राजाओंसे उत्पन्न हुआ तीव्र भय है और न शत्रु राजाओंसे उत्पन्न होनेवाला तीव्रभय है, अतिवृष्टि अनावृष्टि आदि ईतियां भी यहाँ नही होती है और न यहाँ रोग आदिसे उत्पन्न होनेवाली कभी कोई बाधा ही होती है ॥८॥

---

१ कुमारौ । २ दर्शयति स्म । ३ अनाद्यनिधनः । ४ विस्तृत्य । ५ प्रविष्टः । ६ परिपूर्णता पक्षे सुख । ७ धृतदैर्घ्ये, पक्षे धृतश्रियौ । ८ उत्क्रम्य । ९ श्रेण्याम् । १० स्वर्गैकखण्डवत् ल०, म० । ११ आश्रिताः । १२ सुधाशिन. इत्यपि पाठः । १३ विलासम् । १४ महासुखै, पक्षे महाफणैः । १५ भवनामरलोकस्य । १६ दर्शनीयाः । १७ भीति. । १८ अतिवृष्ट्यादयः ।

प्रारम्भे चापवर्गे[1] च तुर्यकालस्य[2] या स्थितिः। महाभारतवर्षेऽस्मिन् नात्रोत्कर्षाप[3]कर्षतः ॥९॥
परा [4]स्थितिर्नृणां [5]पूर्वकोटिवर्षशतान्तरे। उत्सेधहानिरासप्ता[6]रत्निः पञ्चधनुः शतात् ॥१०॥
कर्मभूमिनियोगो यः स सर्वोऽप्यत्र पुष्कलः[7]। विशेषस्तु महाविद्या ददत्येषा[8]मभीप्सितम् ॥११॥
महाप्रज्ञप्तिविद्याद्याः सिद्ध्यन्तीह खगेशिनाम्। विद्याः कामदुघायास्ताः फलिष्यन्तीप्सितं फलम् ॥१२॥
[9]कुलजात्याश्रिता[10] विद्यास्तपोविद्याश्च ता द्विधाः। कुलाम्नायागताः पूर्वा यत्नेनाराधिताः पराः ।१३।
तासामाराधनोपायः [11]सिद्धायतनसन्निधौ। अन्यत्र चाशुचौ देशे द्वीपाद्रिपुलिनादिके ॥१४॥
सम्पूज्य शुचिवेषेण विद्यादेवव्रताश्रितैः[12]। महोपवासैराराध्या नित्यार्चनपुरःसरैः ॥१५॥
सिद्ध्यन्ति विधिनानेन महाविद्या नभोजुषाम्। [13]पुरश्चरणनित्यार्चाजपहोमाद्यनुक्रमात् ॥१६॥
सिद्धविद्यैस्ततः सिद्धप्रतिमार्चनपूर्वकम्। विद्याफलानि भोग्यानि वियद्गमनचुञ्चुभिः[14] ॥१७॥

इस महाभरत क्षेत्रमें अवसर्पिणी काल सम्बन्धी चतुर्थ कालके प्रारम्भमें मनुष्योंकी जो स्थिति होती है वही यहाँके मनुष्योंकी उत्कृष्ट स्थिति होती है और उस चतुर्थ कालके अन्तमें जो स्थिति होती है वही यहांकी जघन्य स्थिति होती है। इसी प्रकार चतुर्थ कालके प्रारम्भमें जितनी शरीरकी ऊंचाई होती है उतनी ही यहांकी उत्कृष्ट ऊंचाई होती है और चतुर्थ कालके अन्तमे जितनी ऊंचाई होती है उतनी ही यहां जघन्य ऊंचाई होती है। इसी नियमसे यहांकी उत्कृष्ट आयु एक करोड़ वर्ष पूर्वकी और जघन्य सौ वर्षकी होती है तथा शरीरकी उत्कृष्ट ऊंचाई पाच सौ धनुष और जघन्य सात हाथकी होती है, भावार्थ–यहा पर आर्यखण्डकी तरह छह कालों का परिवर्तन नही होता किन्तु चतुर्थ कालके आदि अन्तके समान परिवर्तन होता है ॥९–१०॥ कर्म भूमिमें वर्षा सरदी गर्मी आदि ऋतुओंका परिवर्तन तथा असि मषि आदि छह कर्म रूप जितने नियोग होते हैं वे सब यहां पूर्णरूपसे होते है किन्तु यहां विशेषता इतनी है कि महाविद्याएं यहांके लोगोंको इनकी इच्छानुसार फल दिया करती है ॥११॥ यहां विद्याधरोंको जो महाप्रज्ञप्ति आदि विद्याएं सिद्ध होती है वे इन्हें कामधेनुके समान यथेष्ट फल देती रहती हैं ॥१२॥ वे विद्याएं दो प्रकारकी है एक तो ऐसी है जो कुल (पितृपक्ष) अथवा जाति (मातृपक्ष)के आश्रित है और दूसरी ऐसी है जो तपस्यासे सिद्ध की जाती है। इनमेंसे पहले प्रकारकी विद्याएं कुल परम्परासे ही प्राप्त हो जाती है और दूसरे प्रकारकी विद्याएं यत्नपूर्वक आराधना करनेसे प्राप्त होती है ॥१३॥ जो विद्याए आराधनासे प्राप्त होती है उनकी आराधना करने का उपाय यह है कि सिद्धायतनके समीपवर्ती अथवा द्वीप, पर्वत या नदीके किनारे आदि किसी अन्य पवित्र स्थानमें पवित्र वेष धारणकर ब्रह्मचर्य व्रतका पालन करते हुए विद्याकी अधिष्ठातृ देवताकी पूजा करे तथा नित्य पूजा पूर्वक महोपवास धारणकर उन विद्याओंकी आराधना करे। इस विधिसे तथा तपश्चरण नित्यपूजा जप और होम आदि अनुक्रमके करनेसे विद्याधरोंको वे महाविद्याएं सिद्ध हो जाती है ॥१४–१६॥ तदनन्तर जिन्हे विद्याएं सिद्ध हो गई हैं ऐसे आकाशगामी विद्याधर लोग पहले सिद्ध भगवान्की प्रतिमाकी पूजा करते है और

---

१ अवसाने। २ चतुर्थकालस्य। ३ उत्कृष्टजघन्यतः। ४ अवसानोत्कृष्टायुः। ५ क्रमेण पूर्वकोटिवर्षशतभेदौ। ६ अरत्निसप्तकपर्यन्तम्। ७ सम्पूर्ण.। ८ विद्याधराणाम्। ९ वंशादि। १० क्षत्रियादि। ११ सिद्धकूटचत्यालयसमीपे। १२ ब्रह्मचर्यव्रत। १३ पूर्वसेवा। १४ प्रतीतैः।

यथा विद्या फलान्येषां भोग्यानीह खगेशिनाम् । तथैव स्वैरसम्भोग्याः सस्यादिफलसम्पदः ॥१८॥
सस्यान्यकृष्टपच्यानि वाप्यः सोत्फुल्लपङ्कजाः[1] । ग्रामाः संसक्तसीमानः सारामाः सफलद्रुमाः॥१९॥
सरत्नसिकता नद्यो हंसाध्यासितसैकताः[2] । दीर्घिका पुष्करिण्याद्याः स्वच्छतोया जलाशयाः ॥२०॥
रमणीया वनोद्देशाः पुंस्कोकिलकलस्वनैः । लताः कुसुमिता गुञ्जद्भृङ्गीसङ्गीतसङ्गताः ॥२१॥
चन्द्रकान्तशिलानद्धसोपानाः सलतागृहाः । खचरीजनसम्भोग्याः सेव्याश्च कृतकाद्रयः ॥२२॥
रम्याः पुराकरग्रामसन्निवेशाश्च[3] विस्तृताः । सरित्सरोवरारामशालीक्षुवणमण्डनाः ॥२३॥
स्त्रीपुंस[4]सृष्टिरत्रत्या[5] रत्यनङ्गानुकारिणी । समग्रभोगसम्पत्या स्वर्भोगेष्वप्यनुत्सुका ॥२४॥
एवं प्राया[6] विशेषा ये नृणां सम्प्रीतिहेतवः । स्वर्गेऽप्यसुलभास्तेऽमी सन्त्येवात्र पदे पदे ॥२५॥
इति रम्यतरानेष[7] विशेषान्खचरोचितान् । धत्ते स्वमङ्कमारोप्य कौतुकादिव भूधरः ॥२६॥
श्रेण्योरथैनयोरुक्तशोभासम्पन्निधानयोः । पुराणां [8]सन्निवेशोऽयं लक्ष्यतेऽत्यन्तसुन्दरः ॥२७॥
पृथक्पृथगुभे श्रेण्यौ दशयोजनविस्तृते । [9]अनुपर्वतदीर्घत्वम् आयते चापयोनिधेः ॥२८॥
विष्कम्भादिकृतः श्रेण्योः न भेदोऽस्तीह कश्चन । आयामस्तूत्तरश्रेण्यां धत्ते साभ्यधिकां मितिम् ।२९।

फिर विद्याओंके फलका उपभोग करते हैं ॥१७॥ इस विजयार्ध गिरिपर ये विद्याधर लोग जिस प्रकार इन विद्याओंके फलोंका उपभोग करते हैं उसी प्रकार वे धान्य आदि फल सम्पदाओं का भी अपनी इच्छानुसार उपभोग करते हैं ॥१८॥ यहांपर धान्य बिना बोये ही उत्पन्न होते हैं, यहांकी बावड़ियां फूले हुए कमलोंसे सहित हैं, यहाके गावोंकी सीमाए एक दूसरेसे मिली हुई रहती है, उनमे बगीचे रहते है और वे सब फले हुए वृक्षोंसे सहित होते है ॥१९॥ यहांकी नदियां रत्नमयी बालूसे सहित हैं, वावड़ियों तथा पोखरियोके किनारे सदा हस बैठे रहते है, और जलाशय स्वच्छ जलसे भरे रहते है ॥२०॥ यहांके वनप्रदेश कोकिलोंकी मधुर कूजनसे मनोहर रहते है और फूली हुई लताए गुजार करती हुई भ्रमरियोंके सगीतसे सगत होती है॥२१॥ यहांपर ऐसे अनेक कृत्रिम पर्वत बने हुए है जो चन्द्रकान्त मणिकी बनी हुई सीढियोंसे युक्त है, लतागृहोंसे सहित है, विद्याधरियोंके सभोग करने योग्य है और सबके सेवन करने योग्य है ॥२२॥ यहांक पुर, खानें और गांवोंकी रचना बहुत ही सुन्दर है, वे बहुत ही बड़े हैं और नदी, तालाब, बगीचे, धानके खेत तथा ईखोंके वनोंसे सुशोभित रहते है ॥२३॥ यहाके स्त्री और पुरुषोकी सृष्टि रति और कामदेवका अनुकरण करनेवाली है तथा वह हरएक प्रकारके भोगोपभोगकी सम्पदासे भरपूर होनेके कारण स्वर्गके भोगोंमे भी अनुत्सुक रहती है ॥२४॥ इस प्रकार मनुष्यों की प्रसन्नताके कारण स्वरूप जो जो विशेष पदार्थ हैं वे सब भले ही स्वर्गमे दुर्लभ हों परन्तु यहां पद-पदपर विद्यमान रहते हैं ॥२५॥ इस प्रकार यह पर्वत विद्याधरोंके योग्य अतिशय मनोहर समस्त विशेष पदार्थोंको मानो कौतूहलसे ही अपनी गोदमे लेकर धारण कर रहा है ॥२६॥

जो ऊपर कही हुई शोभा और सम्पत्तिके निधान (खजाना) स्वरूप है ऐसी इन दोनों श्रेणियों पर यह नगरोंकी बहुत ही सुन्दर रचना दिखाई देती है ॥२७॥ ये दोनों श्रेणियां पृथक् पृथक् दश योजन चौड़ी हैं और पर्वतकी लम्बाईके समान समुद्र पर्यन्त लम्बी है ॥२८॥ इन दोनों श्रेणियोंमें चौड़ाई आदिका किया हुआ तो कुछ भी अन्तर नहीं है परन्तु उत्तर श्रेणीकी लम्बाई

---

तन्वन् गिरेरधिगुहा[8]मुखमट्टहासलक्ष्मीं शरच्छशिधरामलदेहकान्तिः ॥१७१॥

मन्दाक्रान्ता

रन्ध्रादद्रेरयमजगरः [9]सामिकर्षन् स्वमङ्गं
पुञ्जीभूतो गुरुरिव गिरेरान्त्रभारो[10] निकुञ्जे ।
रुद्धश्वासं वदनकुहरं [11]व्याददात्यापत[12]द्भिः
वन्यैः सत्त्वैः किल बिलधिया क्षुत्प्रतीकारमिच्छुः ॥१७२॥

पृथ्वी

अयं जलनिधेर्जलं स्पृशति सानुभिर्वारिधिः
तटानि शिशिरीकरोति गिरिभर्तुरस्यान्वहम् ।
मरुद्विधुतवीचिशीकरशतैरजस्रोत्थितैः
महानुपगतं[13] जनं शिशिरयत्य[14]नुष्णाशयः ॥१७३॥

की सन्ततिको ही धारण कर रहा हो ॥१६८॥अपनी-अपनी देवांगनाओंके साथ विहार करते हुए देवोको इस पर्वतकी रजतमयी शिखरोपर जो सतोष होता है वह उन्हे न तो स्वर्गमे मिलता है न हिमवान् पर्वतपर मिलता है और न सुमेरु पर्वतके किसी तटपर ही मिलता है ॥१६९॥

इधर देखो, जो जगली हाथियोके गण्डस्थलोंकी रगड़से लगे हुए मद-जलसे तर-बतर हो रहा है, ऐसे इस पहाड़परकी गोल चट्टानको यह सिह हाथी समझ रहा है इसीलिये यह उसे देखकर बार-बार उसपर प्रहार करता है और नाखूनोंसे समीपकी भूमिको खोदता है ॥१७०॥ इधर इस वनमें शरद्ऋतुके चन्द्रमाके समान निर्मल शरीरकी कान्तिको धारण करता हुआ तथा इस पर्वतके गुफा-रूपी मुखपर अट्टहास की शोभा बढ़ाता हुआ यह सिह धीरे-धीरे जागकर जमुहाई ले रहा है और पर्वतकी शिखरपर छलांग मारनेकी इच्छा कर रहा है ॥१७१॥ इधर यह लतागृहमें अजगर पड़ा हुआ है, यह पर्वतके बिलमेसे अपना आधा शरीर बाहर निकाल रहा है और ऐसा जान पड़ता है मानो एक जगह इकट्ठा हुआ पहाड़की अँतड़ियोंका बड़ा भारी समूह ही हो । इसने श्वास रोककर अपना मुहरूपी बिल खोल रखा है और उसे बिल समझ कर उसमें पड़ते हुए जगली जीवोके द्वारा यह अपनी क्षुधाका प्रतिकार करना चाहता है ॥१७२॥ यह पर्वत अपनी लम्बी फैली हुई शिखरोंसे समुद्रके जलका स्पर्श करता है और यह समुद्र वायुसे कम्पित होकर निरन्तर उठती हुई लहरोंकी अनेक छोटी-छोटी बूदोंसे प्रतिदिन इस गिरिराजके तटोंको शीतल करता रहता है सो ठीक ही है क्योंकि जिनका अन्तःकरण शीतल अर्थात् शान्त होता है ऐसे महापुरुष समीपमें आये हुए पुरुषको शीतल अर्थात् शान्त करते ही हैं ॥१७३॥

---

१ रजतमयेषु । २ स्वर्गालये । ३ स्थूलपाषाणम् । ४ कर्षणघर्षण । ५ आर्द्रित । ६ अभिताडयति । ७ शनैः । ८ गुहामुखे । ९ अर्द्धं निर्गमयन् । १० पुरीतत्समूहः । ११ विवृणोति । १२ आगच्छद्भिः । १३ आश्रितम् । १४ शैत्ययुक्तहृदयः ।

छन्दः (?)

गङ्गासिंधू हृदयमिवास्य स्फुटमद्रेः भित्वा यातां[1] रसिकतयामू[2] तटभागम् ।
स्पृष्ट्वा स्पृष्ट्वा पवनविधूतोर्मिकरैः स्वैः भेद्यं स्त्रीणां ननु महतामप्युरु चेतः ॥१७४॥
सानूनस्य द्रुतमुपयान्ती घनसारात्[3] सारासारा[4] जलदघटेयं समसारान्[5] ।
तारातारा[6] धरणिधरस्य स्वरसारा साराद्व्यक्ति मुहुरुपयाति स्तनितेन ॥१७५॥

मत्तमयूरम्

सारासारा[7] सारसमाला सरसीयं सारं कूजत्यत्र वनान्ते सुरकान्ते[8] ।
सारासारा[9] नीरदमाला नभसीयं तारं[10] मन्द्रं[11] निस्वनतीतः स्वनसारा[12] ॥१७६॥
श्रित्वास्याद्रेः सारमणीद्धं[13] तटभागं सारं[14] तारं[15] चारुतरागं[16] रमणीयम् ।
सम्भोगान्ते गायति कान्तं[17] रमयन्ती सा रंतारं[18] चारुतरागं[19] [20]रमणीयम् ॥१७७॥

पुष्पिताग्रा

इह खचरवधूनितम्बदेशे ललितलतालयसंश्रिताः सहेशाः[21] ।
प्रणयपरवशाः समिद्धदीप्तीः ह्रियमुपयान्ति विलोक्य सिद्धनार्यः[22] ॥१७८॥

ये गंगा और सिन्धु नदियां रसिक अर्थात् जलसहित और पक्षमें शृङ्गार रससे युक्त होनेके कारण इस पर्वतके हृदयके समान तटको विदीर्ण कर तथा वायुके द्वारा हिलती हुई तरङ्गोंरूपी अपने हाथोंसे बार-बार स्पर्श कर चली जा रही है सो ठीक ही है क्योंकि बड़े पुरुषोंका बड़ा भारी हृदय भी स्त्रियोंके द्वारा भेदन किया जा सकता है ॥१७४॥ जिसकी जल-वर्षा बहुत ही उत्कृष्ट है, जो मुक्ताफल अथवा नक्षत्रोंके समान अतिशय निर्मल है और जिसकी गरजना भी उत्कृष्ट है ऐसी यह मेघोंकी घटा, अधिक मजबूत तथा जिसके सब स्थिर अंश समान हैं ऐसे इस विजयार्ध पर्वतके शिखरोंके समीप यद्यपि बार-बार और शीघ्र-शीघ्र आती है तथापि गर्जनाके द्वारा ही प्रकट होती है। भावार्थ–इस विजयार्ध पर्वतके सफेद शिखरोंके समीप छाये हुए सफेद-सफेद बादल जबतक गरजते नही है तबतक दृष्टिगोचर नही होते ॥१७५॥ इधर देवोंसे मनोहर वनके मध्यभागमे तालाबके बीच इधर-उधर श्रेष्ठ गमन करनेवाली यह सारस पक्षियोंकी पंक्ति उच्च स्वरसे शब्द कर रही है और इधर आकाशमें जोरसे बरसती और शब्द करती हुई यह मेघोंकी माला उच्च और गभीर स्वरसे गरज रही है ॥१७६॥ रमण करनेके योग्य, श्रेष्ठ निर्मल और सुन्दर शरीरवाले अपने पतिको प्रसन्न करनेवाली कोई स्त्री सभोगके बाद इस पर्वतके श्रेष्ठमणियोंसे देदीप्यमान तटभागपर बैठकर जिसके अवान्तर अग अतिशय सुन्दर है, जो श्रेष्ठ है, ऊचे स्वरसे सहित है और बहुत मनोहर हैं ऐसा गाना गा रही है ॥१७७॥ इधर इस पर्वतके मध्यभागपर सुन्दर लतागृहोंमे बैठी हुई पतिसहित प्रेमके परवश और देदीप्यमान कान्तिकी धारक विद्याधरियोंको देखकर सिद्ध-

---

१ आगच्छताम् । –यातो प० । –याती म०, ल० । २ जलरूपतया रागितया च । ३ अधिकबलात् । ४ उत्कृष्टवेगवद्वर्षति । ५ समानस्थिरावयवान् । ६ तारा या आयामवती तारा । निर्मला तारा । तारा इति पक्षे अतिनिर्मलां स्वरसाराशब्देनोत्कृष्टा । ७ गमनागमनवती । ८ अमरैर्मनोहरे । ९ अधिकोत्कृष्टा वेगवद्वर्षवती वा । १० उच्च यथा भवति तथा । ११ गम्भीरम् । १२ निर्घोषोत्कृष्टा । १३ उत्कृष्टरत्नप्रवृद्धम् । १४ स्थिरम् । १५ गभीरं उज्ज्वलं वा । १६ कान्ततरवृक्षम् । १७ प्रियतमम् । १८ रमणशीलम् । १९ अभीतरागम् व्यक्तरागम् । २० स्त्री । २१ प्रियतमसहिताः । २२ देवभेदस्त्रियः ।

वसन्ततिलकम्

श्रीमानयं नृसुरखेचरचारणानां सेव्यो जगत्त्रयगुरुर्विधु[1]वीध्रकीर्तिः ।
तुङ्गः शुचिर्भरतसंश्रित[2]पादमूलः पायाद्युवां पुरुरिवानवमो[3] महीध्रः ॥१७९॥
इत्थं गिरः फणिपतौ सनयं[4] ब्रुवाणे तौ तं गिरीन्द्रमभिनन्द्य[5] कृता[6]वतारौ ।
प्राविक्षतां सममनेन[7] पुरं परार्द्ध्यम् उत्तुङ्गकेतुरथ नूपुरचक्रवालम् ॥१८०॥
तत्राधिरोप्य परिविष्टरमीशितारौ युष्माकमित्यभि[8]दधत्खचरान्समस्तान् ।
राज्याभिषेकमनयोः प्रचकार धीरो विद्याधरीकरधृतैः पृथुहेमकुम्भैः ॥१८१॥
भर्ता नमिर्भवतु सम्प्रति दक्षिणस्याः श्रेण्या दिवः शतमखोऽधिपतिर्यथैव ।
श्रेण्यां भवेद्विनमिरप्यवनम्यमानो विद्याधरैरवहितै[9]श्चिरमुत्तरस्याम् ॥१८२॥

जातिके देवोंकी स्त्रियां लज्जित हो रही हैं ॥१७८॥ यह विजयार्ध पर्वत भी वृषभ जिनेन्द्र के समान है क्योंकि जिस प्रकार वृषभजिनेन्द्र श्रीमान् अर्थात् अन्तरङ्ग और बहिरङ्ग लक्ष्मी से सहित हैं उसी प्रकार यह पर्वत भी श्रीमान् अर्थात् शोभासे सहित है जिस प्रकार वृषभ-जिनेन्द्र मनुष्य देव विद्याधर और चारण ऋद्धि-धारी मुनियोंके द्वारा सेवनीय हैं उसी प्रकार यह पर्वत भी उनके द्वारा सेवनीय है अर्थात् वे सभी इस पर्वतपर विहार करते हैं । वृषभजिनेन्द्र जिस प्रकार तीनों जगत्के गुरु हैं उसी प्रकार यह पर्वत भी तीनों जगत्में गुरु अर्थात् श्रेष्ठ है । जिस प्रकार वृषभजिनेन्द्र चन्द्रमाके समान उज्ज्वल कीर्तिके धारक हैं उसी प्रकार यह पर्वत भी चन्द्र-तुल्य उज्ज्वल कीर्तिका धारक है, वृषभजिनेन्द्र जिस प्रकार तुग अर्थात् उदार हैं उसी प्रकार यह पर्वत भी तुग अर्थात् ऊंचा है, वृषभजिनेन्द्र जिस प्रकार शुचि अर्थात् पवित्र हैं उसी प्रकार यह पर्वत भी शुचि अर्थात् शुक्ल है तथा जिस प्रकार वृषभजिनेन्द्रके पादमूल अर्थात् चरणकमल भरत चक्रवर्तीके द्वारा आश्रित हैं उसी प्रकार इस पर्वतके पादमूल अर्थात् नीचेके भाग भी दिग्विजयके समय गुफामें प्रवेश करनेके लिये भरत चक्रवर्तीके द्वारा आश्रित है अथवा इसके पादमूल भरत क्षेत्रमें स्थित है इस प्रकार भगवान् वृषभजिनेन्द्रके समान अतिशय उत्कृष्ट यह विजयार्ध पर्वत तुम दोनोंकी रक्षा करे ॥१७९॥

इस प्रकार युक्तिसहित धरणेन्द्रके वचन कहनेपर उन दोनों राजकुमारोंने भी उस गिरि-राजकी प्रशंसा की और फिर उस धरणेन्द्रके साथ-साथ नीचे उतरकर अतिशय-श्रेष्ठ और ऊंची-ऊंची ध्वजाओंसे सुशोभित रथनूपुर चक्रवाल नामके नगरमें प्रवेश किया ॥१८०॥ धरणेन्द्रने वहां दोनोंको सिहासनपर बैठाकर सब विद्याधरोंसे कहा कि ये तुम्हारे स्वामी हैं और फिर उस धीरवीर धरणेन्द्रने विद्याधरियोंके हाथोंसे उठाये हुए सुवर्णके बड़े-बड़े कलशोंसे इन दोनोंका राज्याभिषेक किया ॥१८१॥ राज्याभिषेकके बाद धरणेन्द्रने विद्याधरोंसे कहा कि जिस प्रकार इन्द्र स्वर्ग का अधिपति है उसी प्रकार यह नमि अब दक्षिण श्रेणीका अधिपति हो और अनेक सावधान विद्याधरोंके द्वारा नमस्कार किया गया यह विनमि चिरकाल तक

---

१ चन्द्रवन्निर्मल। २ भरतक्षेत्रे सश्रितप्रत्यन्तपर्वतमूलः । पक्षे भरतराजेन संसेवितपादमूलः । ३ अनवमु. न विद्यते अवमः अवमाननं यस्य स सुन्दर इत्यर्थः । ४ सहेतुकम् । ५ प्रशस्य । ६ विहितावतरणौ । ७ फणिराजेन । ८ ब्रुवत् । ९ सावधानैः ।

देवो जगद्गुरुरसौ वृषभोऽनुमत्य[1] श्रीमानिमौ प्रहितवान्[2] जगतां विधाता ।
[3]तेनानयोः खचरभूपतयोऽनुरागादाज्ञां वहन्तु शिरसेत्यवदत्फणीन्द्रः ॥१८३॥
तत्पुण्यतो[4] गुरुवियोगनिरूपणाच्च नागाधिभर्तुरुचितादनुशासनाच्च ।
ते तत्तथैव खचराः [5]प्रतिपेदिरे द्राक् कार्यं हि सिद्धयति महद्भिरधिष्ठितं[6] यत् ॥१८४॥
गान्धार[7]पन्नगपदोपपदे च विद्ये दत्वा फणा[8]वदधिपो विधिवत्स ताभ्याम् ।
धीरो विसर्ज्य नयविद्विनतौ कुमारौ स्वावासमेव च जगाम कृतेष्टकार्यः ॥१८५॥

मालिनी

अथ गतवति तस्मिन्नागराजेऽगराजे धृतिमधिकम्[10]धत्तां तौ युवानौ युवानौ[11] ।
मुहुरुपहृत[12]नानानूनभोगैर्नभोगैः मुकुलित[13]करमौलिव्यक्तमाराध्यमानौ ॥१८६॥
[14]नियतिमिव खगाद्रेर्मेखलां तामलङ्घ्यां [15]सुकृतिजननिवासावाप्तनाकानुकाराम् ।
जिनसमवसृतिं वा[16] विश्वलोकाभिनन्द्यां नमिविनमिकुमारावध्य[17]वात्तामुदात्ताम् ॥१८७॥

मन्दाक्रान्ता

विद्यासिद्धिं [18]विधिनियमितां मानयन्तौ नयन्तौ विद्यावृद्धैः सममभिमतामर्थ[19]सिद्धिं प्रसिद्धिम् ।
विद्याधीनान् षडृतुसुखदान्निर्विशन्तौ च भोगान् तौ तत्राद्रौ [20]स्थितिमभजतां खेचरैः संविभक्ताम् ॥

उत्तर-श्रेणीका अधिपति रहे। कर्मभूमिरूपी जगत्को उत्पन्न करनेवाले जगद्गुरु श्रीमान् भगवान् वृषभदेवने अपनी सम्मतिसे इन दोनोको यहां भेजा है इसलिये सब विद्याधर राजा प्रेमसे मस्तक झुकाकर इनकी आज्ञा धारण करें ॥१८२–८३॥ उन दोनोंके पुण्यसे तथा जगद्-गुरु भगवान् वृषभदेवकी आज्ञाके निरूपणसे और धरणेन्द्रके योग्य उपदेशसे उन विद्याधरों ने वह सब कार्य उसके कहे अनुसार ही स्वीकृत कर लिया था सो ठीक ही है क्योंकि महापुरुषों के द्वारा हाथमें लिया हुआ कार्य शीघ्र ही सिद्ध हो जाता है ॥१८४॥ इस प्रकार नयोंको जानने वाले धीरवीर धरणेन्द्रने उन दोनोंको गान्धारपदा और पन्नगपदा नामकी दो विद्याएं दीं और फिर अपना कार्य पूरा कर विनयसे झुके हुए दोनों राजकुमारोंको छोडकर अपने निवास-स्थान पर चला गया ॥१८५॥ तदनन्तर धरणेन्द्रके चले जानेपर नाना प्रकारके सम्पूर्ण भोगोपभोगों को बार-बार भेंट करते हुए विद्याधर लोग हाथ जोड़कर मस्तक नवाकर स्पष्ट रूपसे जिनकी सेवा करते हैं ऐसे वे दोनो कुमार उस पर्वतपर बहुत ही सन्तुष्ट हुए थे ॥१८६॥ जो अपने अपने भाग्यके समान अलघनीय है, पुण्यात्मा जीवोंका निवास होनेके कारण जो स्वर्गका अनुकरण करती है तथा जो जिनेन्द्र भगवान्के समवसरणके समान सब लोगोके द्वारा वन्दनीय है ऐसी उस विजयार्ध पर्वतकी मेखलापर वे दोनों राजकुमार सुखसे रहने लगे थे ॥१८७॥ जिन्होंने स्वयं विधिपूर्वक अनेक विद्याए सिद्ध की है और विद्यामें चढे-बढ़े पुरुषोंके साथ मिलकर अपने अभिलषित अर्थको सिद्ध किया है ऐसे वे दोनों ही कुमार विद्याओंके आधीन प्राप्त होने वाले तथा छहों ऋतुओंके सुख देनेवाले भोगोंका उपभोग करते हुए उस पर्वतपर विद्याधरों के द्वारा विभक्त की हुई स्थितिको प्राप्त हुए थे। भावार्थ–यद्यपि वे जन्मसे विद्याधर नहीं थे तथापि वहा जाकर उन्होंने स्वयं अनेक विद्याएं सिद्ध कर ली थी और दूसरे विद्यावृद्ध मनुष्यों

---

१ अनुमतिं कृत्वा। २ प्रेरितवान्। ३ तेन कारणेन। ४ त्वत्पुण्यतः त्वत्कुमारयोः सुकृतात्। ५ अनुमेदिरे। ६ आश्रितम्। ७ गान्धारविद्या पन्नगविद्या चेति द्वे विद्ये। ८ फणीश्वरः। ९ सन्तोषम्। १०–मधात्ता प०, अ०, द०, ल०, म०। ११ सम्पर्कं कुर्वाणौ। 'यु मिश्रणे'। १२ प्राप्त। १३ कुड्मलित, हस्तघटितमकुटं यथा भवति तथा। १४ विधिम्। १५ पुण्यवज्जन। पक्षे सुरजन। १६ इव। १७ अधिवसति स्म। १८ विधान। १९ प्रयोजनम्। २० मर्यादाम्।

आज्ञामूहुः खचरनरवाः[1] सन्नतैरुत्तमाङ्गैः यूनोः सेवामनुनयपरामेनयोराचरन्तः ।
क्वेमौ जातौ क्व च पदमिदं न्यक्कृताराति चक्रं खे खेन्द्राणां[2] घटयति नृणां पुण्यमेवात्मनीनम्[3] ॥१८९॥

मालिनी

नमिरनमयदुच्चैर्भोगसम्पत्प्रतीतान् गगनचरपुरीन्द्रान् दक्षिणश्रेणिभाजः ।
विनमिरपि विनम्रानातनोति स्म विश्वान् खचरपुरवरेशानुत्तरश्रेणिभाजः ॥१९०॥

शार्दूलविक्रीडितम्

तावित्थं प्रविभज्य राजतनयौ वैद्याधरीं[4] तां श्रियं
भुञ्जानौ विजयार्धपर्वततटे निष्कण्टकं तस्थतुः ।
पुण्यादित्यनयोर्विभूतिरभवल्लोकेशपादाश्रितोः[5]
पुण्यं तेन[6] कुरुध्वमभ्युदयदां लक्ष्मीं समाशंसवः[7] ॥१९१॥
नत्वा देवमिमं चराचरगुरुं त्रैलोक्यनाथार्चितं
भक्तौ तौ सुखमापतुः समुचितं विद्याधराधीश्वरौ ।
तस्मादादिगुरुं प्रणम्य शिरसा भक्त्यार्चयन्त्वङ्गिनो
वाञ्छन्तः सुखमक्षयं जिनगुणप्राप्तिं च नैश्रेयसीम् ॥१९२॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसङ्ग्रहे
नमिविनमिराज्यप्रतिष्ठापनं नामैकोनविंशतितमं पर्व ॥

के साथ मिलकर वे अपना अभिलषित कार्य सिद्ध कर लेते थे इसलिये विद्याधरोंके समान ही भोगोपभोग भोगते हुए रहते थे ॥१८८॥ इन दोनों कुमारोंको प्रसन्न करनेवाली सेवा करते हुए विद्याधर लोग अपना अपना मस्तक झुकाकर उन दोनोंकी आज्ञा धारण करते थे । गौतम स्वामी राजा श्रेणिकसे कहते हैं कि हे राजन्, ये नमि और विनमि कहां तो उत्पन्न हुए और कहां उन्हें समस्त शत्रुओं को तिरस्कृत करनेवाला यह विद्याधरोंके इन्द्रका पद मिला । यथार्थमें मनुष्यका पुण्य ही सुखदायी सामग्रीको मिलाता रहता है ॥१८९॥ नमि कुमार ने बड़ी-बड़ी भोगोपभोगकी सम्पदाओंको प्राप्त हुए दक्षिण श्रेणीपर रहनेवाले समस्त विद्याधर नगरियोंके राजाओंको वशमे किया था और विनमिने उत्तर-श्रेणीपर रहनेवाले समस्त विद्याधर नगरियोंके राजाओंको नम्रीभूत किया था ॥१९०॥

इस प्रकार वे दोनों ही राजकुमार विद्याधरोंकी उस लक्ष्मीको विभक्त कर विजयार्ध पर्वत के तटपर निष्कंटक रूपसे रहते थे । हे भव्यजीवो, देखो, भगवान् वृषभदेवके चरणों का आश्रय लेनेवाले इन दोनों कुमारोंको पुण्यसे ही उस प्रकारकी विभूति प्राप्त हुई थी इसलिये जो जीव स्वर्ग आदिकी लक्ष्मी प्राप्त करना चाहते है वे एक पुण्यका ही संचय करें ॥१९१॥ चर और अचर जगत्के गुरु तथा तीन लोकके अधिपतियों द्वारा पूजित भगवान् वृषभदेवको नमस्कार कर ही दोनों भक्त विद्याधरोंके अधीश्वर होकर उचित सुखको प्राप्त हुए थे इसलिये जो भव्य जीव मोक्षरूपी अविनाशी सुख और परम कल्याणरूप जिनेन्द्र भगवान्के गुण प्राप्त करना चाहते हैं वे आदिगुरु भगवान् वृषभदेवको मस्तक झुकाकर प्रणाम करें और उन्हींकी भक्तिपूर्वक पूजा करें ॥१९२॥

इस प्रकार भगवज्जिनसेनाचार्य प्रणीत त्रिषष्टिलक्षण श्री महापुराण संग्रहके हिन्दी भाषानुवादमें नमि विनमिकी राज्यप्राप्तिका वर्णन करनेवाला उन्नीसवां पर्व समाप्त हुआ ।

---

१ खचरतनयाः अ० । २ शून्ये खेटेन्द्राणाम् प०, द० । ३ आत्महितं वस्तु । ४ विद्याधरसम्बन्धिनीम् । ५ परमेश्वरचरणाश्रितयोः । ६ कारणेन । ७ इच्छावः ।

विंशं पर्व

प्रपूर्यन्ते स्म षण्मासाः तस्याथो योगधारिणः । गुरोर्मेरोरिवाचिन्त्यमाहात्म्यस्याचलस्थितेः ॥१॥
ततोऽस्य मतिरित्यासीद् [1]यतिचर्याप्रबोधने । कायास्थित्यर्थं निर्दोषविष्वाणान्वेषणं[2] प्रति ॥२॥
अहो भग्ना महावंशा बतामी नवसंयताः । सन्मार्गस्यापरिज्ञानात् सद्योऽमीभिः परीषहैः ॥३॥
मार्गप्रबोधनार्थञ्च मुक्तेश्च सुखसिद्धये । कायस्थित्यर्थमाहारं दर्शयामस्ततोऽधुना ॥४॥
न केवलमयं कायः कर्शनीयो[3] मुमुक्षुभिः । नाप्युत्कटरसैः पोष्यो मृष्टैरिष्टैश्च[4] वल्भनैः[5] ॥५॥
वशे यथा स्युरक्षाणि नोत[6] [7]धावन्त्यनूत्पथम्[8] । तथा प्रयतितव्यं स्याद् वृत्तिमाश्रित्य मध्यमाम् ॥६॥
दोषनिर्हरणायेष्टा उपवासाद्युपक्रमाः । प्राणसन्धारणायायम् आहारः सूत्रदर्शितः[9] ॥७॥
कायक्लेशो मतस्तावन्न संक्लेशोऽस्ति यावता । संक्लेशे ह्यसमाधानं मार्गात् प्रच्युतिरेव च ॥८॥
सिद्ध्यै संयमयात्रायाः[10] [11]तत्तनुस्थितिमिच्छुभिः । ग्राह्यो निर्दोष आहारो [12]रसासङ्गाद्विनर्षिभिः ॥९॥
भगवानिति निश्चिन्वन् योगं संहृत्य[13] धीरधीः । प्रचचाल महीं कृत्स्नां चालयन्निव विक्रमैः[14] ॥१०॥

अथानन्तर–जिनका माहात्म्य अचिन्त्य है और जो मेरु पर्वतके समान अचल स्थितिको धारण करनेवाले हैं ऐसे जगद्गुरु भगवान् वृषभदेवको योग धारण किये हुए जब छह माह पूर्ण हो गये ॥१॥ तब यतियोंकी चर्या अर्थात् आहार लेनेकी विधि बतलानेके उद्देश्यसे शरीरकी स्थितिके अर्थ निर्दोष आहार ढूंढनेके लिये उनकी इस प्रकार बुद्धि उत्पन्न हुई–वे ऐसा विचार करने लगे ॥२॥ कि बड़े दुःखकी बात है कि बड़े-बड़े वंशोंमें उत्पन्न हुए ये नवदीक्षित साधु समीचीन मार्गका परिज्ञान न होनेके कारण इन क्षुधा आदि परीषहोंसे शीघ्र ही भ्रष्ट हो गये ॥३॥ इसलिये अब मोक्षका मार्ग बतलानेके लिये और सुखपूर्वक मोक्षकी सिद्धिके लिये शरीरकी स्थिति अर्थ आहार लेनेकी विधि दिखलाता हूं ॥४॥ मोक्षाभिलाषी मुनियोंको यह शरीर न तो केवल कृश ही करना चाहिये और न रसीले तथा मधुर मनचाहे भोजनोंसे इसे पुष्ट ही करना चाहिये ॥५॥ किन्तु जिस प्रकार ये इन्द्रियां अपने वशमें रहें और कुमार्गकी ओर न दौड़ें उस प्रकार मध्यम वृत्तिका आश्रय लेकर प्रयत्न करना चाहिये ॥६॥ वात पित्त और कफ आदि दोष दूर करनेके लिये उपवास आदि करना चाहिये तथा प्राण धारण करनेके लिये आहार ग्रहण करना भी जैन-शास्त्रोंमें दिखलाया गया है ॥७॥ कायक्लेश उतना ही करना चाहिये जितनेसे संक्लेश न हो। क्योंकि संक्लेश हो जानेपर चित्त चंचल हो जाता है और मार्गसे भी च्युत होना पड़ता है ॥८॥ इसलिये संयमरूपी यात्राकी सिद्धिके लिये शरीरकी स्थिति चाहनेवाले मुनियोंको रसोंमें आसक्त न होकर निर्दोष आहार ग्रहण करना चाहिये ॥९॥ इस प्रकार निश्चय करनेवाले धीरवीर भगवान् वृषभदेव योग समाप्त कर अपने चरणनिक्षेपों (डगों) के द्वारा मानो समस्त पृथिवीको कंपायमान करते हुए विहार करने लगे ॥१०॥

---

१ यत्याचार। २ भोजनगवेषणम्। ३ कृशीकरणीयः। ४ मुखप्रियैः। ५ आहारैः। ६ उत अथवा। नो विधावन्त्यनूत्पथम् ल०, म०। ७ गच्छन्ति। ८ उन्मार्गं प्रति। ९ परमागमे प्रतिपादितः। १० प्रापणायाः। ११ तत् कारणात्। १२ स्वाद्वासक्तिमन्तरेण। १३ परिहृत्य। १४ पदन्यासैः।

तदा भट्टारके याति[1] महामेराविवोन्नते । धरणी पादविन्यासान् [2]प्रत्यैच्छदनुकम्पिनी[3] ॥११॥
धात्री पदभराक्रान्ता [4]संन्यमंक्ष्यदधस्तले । नाभविष्यत्प्रयत्नश्चेत्तपसीर्याश्रिते[5] विभोः ॥१२॥
ततः पुराकरग्रामान् [6]समडम्बान् सखर्वडान् । सखेटान् विजहारोच्चैः स श्रीमान् जङ्गमाद्रिवत् ।१३।
यतो यतः पदं धत्ते [7]मौनीं चर्यां[8] स्म संश्रितः । ततस्ततो जनाः प्रीताः प्रणमन्त्येत्य[9] सम्भ्रमात् ॥१४॥
प्रसीद देव किं कृत्यमिति केचिज्ज[10]गुर्गिरम् । [11]तूष्णीम्भावं व्रजन्तं च केचित्तमनुवव्रजुः[12] ॥१५॥
परे परार्घ्यरत्नानि समानीय पुरो[13] न्यधुः । इत्यूचुश्च प्रसीदैनाम् इज्यां प्रतिगृहाण नः ॥१६॥
वस्तुवाहनकोटीश्च विभोः केचिदढौकयन्[14] । भगवांस्तास्वनर्थित्वात्[15] तूष्णीकां[16] विजहार सः ॥१७॥
केचित् स्रग्वस्त्रगन्धादीन् आनयन्ति स्म सादरम् । भगवन् परिधत्स्वेति [17]पटल्यां सह भूषणैः ॥१८॥
केचित् कन्याः समानीय रूपयौवनशालिनीः । परिणाययितुं देवमुद्यता दिग्विमूढताम् ॥१९॥
केचिन्मज्जनसामग्र्या संश्रित्यो[18]पारुधन् विभुम् । परे भोजनसामग्रीं पुरस्कृत्योपतस्थिरे[19] ॥२०॥

जिस समय महामेरुके समान उन्नत भगवान् वृषभदेव विहार कर रहे थे उस समय कपायमान हुई यह पृथिवी उनके चरणकमलोंके निक्षेपको स्वीकृत कर रही थी ॥११॥ यदि उस समय भगवान् वृषभदेवने ईर्यासमितिसे युक्त तपश्चरण धारण करनेमें प्रयत्न न किया होता तो सचमुच ही यह पृथिवी उनके चरणोंके भारसे दब कर अधोलोकमें डूब गई होती । भावार्थ—भगवान् ईर्यासमितिसे गमन करनेके कारण पोले पोले पैर रखते थे इसलिये पृथ्वीपर उनका अधिक भार नही पडता था ॥१२॥ तदनन्तर चलते हुए पर्वतके समान उन्नत और शोभायमान भगवान् वृषभदेवने अनेक नगर, ग्राम, मटंब, खर्वट और खेटोंमें विहार किया था ॥१३॥ मुनियोंकी चर्याको धारण करनेवाले भगवान् जिस-जिस ओर कदम रखते थे अर्थात् जहां-जहां जाते थे वही-वही के लोग प्रसन्न होकर और बड़े सभ्रमके साथ आकर उन्हे प्रणाम करते। थे॥१४॥ उनमेंसे कितने ही लोग कहने लगते थे कि हे 'देव, प्रसन्न होइए और कहिये कि क्या, काम है' तथा कितने ही लोग चुपचाप जाते हुए भगवान्के पीछे-पीछे जाने लगते थे ॥१५। अन्य कितने ही लोग बहुमूल्य रत्न लाकर भगवान्के सामने रखते थे और कहते थे कि 'देव प्रसन्न होइए और हमारी इस पूजाको स्वीकृत कीजिये' ॥१६॥ कितने ही लोग करोडों पदार्थ और करोडों प्रकारकी सवारियां भगवानके समीप लाते थे परन्तु भगवान्को उन सबसे कुछ भी प्रयोजन नही था इसलिये वे चुपचाप आगे विहार कर जाते थे ॥१७॥ कितने ही लोग माला, वस्त्र, गन्ध और आभूषणोंके समूह आदरपूर्वक भगवान्के समीप लाते थे और कहते थे कि हे भगवन्, इन्हे धारण कीजिये ॥१८॥ कितने ही लोग रूप और यौवनसे शोभायमान कन्याओको लाकर भगवान्के साथ विवाह करानेके लिये तैयार हुए थे सो ऐसी मूर्खताको धिक्कार हो ॥१९॥ कितने ही लोग स्नान करनेकी सामग्री लाकर भगवान्को घेर लेते थे और कितने ही लोग भोजनकी सामग्री सामने रखकर प्रार्थना करते थे कि विभो, मैं स्नान

---

१ आगच्छति सति । २ स्वीकृतवती । पादविक्षेपसमये पाणितल प्रसार्य पादौ धृतवतीति भावः । ३ चलनवती, ध्वनौ कृपावती । ४ अधिकं निमज्जनमकरिष्यत् तर्हि पाताले निमज्जतीत्यर्थः । 'टुमस्जो शुद्धौ'। लृङ् । सत्यमङ्क्ष्य– द०, ल०, म० । ५ ईर्य्यासमित्याश्रिते । ६ समटम्बान् सखर्वटान् ल०, म०, द० । ७ मुनिसम्बन्धिनीम् । ८ वर्तनाम् । ९ आगत्य । १० ऊचुः । ११ तूष्णीमित्यर्थः । १२ सह गच्छन्ति स्म । १३ गुरोरग्रे न्यस्यन्ति स्म । १४ प्रापयामासुः । १५ अनभिलाषित्वात् । १६ स्वार्थे कप्रत्ययात्, तूष्णीमित्यर्थः । तूष्णीक द०, प०, स० । १७ पटल्या अ०, प० द०, ल०, म० । १८ प्रार्थयन्ति स्म । १९ पूजयामासुः ।

विभो भोजनमानीतं प्रसीदोपविशासने । समं मज्जनसामग्रया निर्विश स्नानभोजने ॥२१॥
एषोऽञ्जलिः कृतोऽस्माभिः प्रसीदानुगृहाण नः । इत्यके केऽध्यैषिषत्[1] मुग्धा विभुमज्ञाततत्क्रमाः ॥२२॥
केचित् पादानुपादाय तत्पांशुस्पर्शपावनैः । प्रणतैर्मस्तकैर्नाथम् [2]अनाथिषत भुक्तये ॥२३॥
इदं खाद्यमिदं स्वाद्यम् इदं भोज्यं[3] पृथग्विधम् । मुहुर्मुहुरिदं पेयं[4] हृद्यमाप्यायनं[5] तनोः ॥२४॥
तैरित्यद्‌ध्येष्यमाणोपि[6] [7]सम्भ्रान्तैरनभिज्ञकैः । [8]न कल्प्यमिति मन्वानाः तूष्णीमेवापससृिवान्[9] ॥२५॥
विभोर्निगूढचर्यस्य मतं[10] ज्ञातुमनीश्वराः[11] । केचित् कर्तव्यतामूढाः स्थिताश्चित्रेष्विवार्पिताः ॥२६॥
सपुत्रदारैरन्यैश्च [12]पदालग्नैरुदश्रुभिः । [13]क्षणविघ्निततच्चर्यो भूयोपि विजहार सः ॥२७॥
इत्यस्य परमां चर्यां चरतोऽज्ञातचर्यया । जगदाश्चर्यकारिण्या मासाः षडपरे ययुः ॥२८॥
ततः संवत्सरे पूर्णे पुरं [14]हास्तिनसाह्वयम् । कुरुजाङ्गलदेशस्य ललामे[15]वाससाद सः ॥२९॥
तस्य पाता[16] [17]तदासीच्च कुरुवंशशिखामणिः । सोमप्रभः प्रसन्नात्मा[18] सोमसौम्याननो नृपः ॥३०॥
तस्यानुजः कुमारोऽभूच्छ्रेयान् श्रेयान्गुणोदयैः । रूपेण मन्मथः कान्त्या शशी दीप्त्या[19] स भानुमान्॥३१॥

की सामग्रीके साथ-साथ भोजन लाया हूं, प्रसन्न होइए, इस आसनपर बैठिये और स्नान तथा भोजन कीजिये ॥२०–२१॥ चर्याकी विधिको नही जाननेवाले कितने ही मूर्ख लोग भगवान् से ऐसी प्रार्थना करते थे कि हे भगवन्, हम लोग दोनों हाथ जोड़ते है, प्रसन्न होइए और हमे अनुगृहीत कीजिये ॥२२॥ कितने ही लोग भगवान्के चरण-कमलोंको पाकर और उनकी धूलिके स्पर्शसे पवित्र हुए अपने मस्तक झुकाकर भोजन करनेके लिये उनसे बार-बार प्रार्थना करते थे ॥२३॥ और कहते थे कि हे भगवन्, यह खाद्य पदार्थ है, यह स्वाद्य-पदार्थ है, यह जुदा रखा हुआ भोज्य पदार्थ है, और यह शरीरको संतुष्ट करनेवाला, अतिशय मनोहर बार-बार पीने योग्य पेय पदार्थ है इस प्रकार सभ्रान्त हुए कितने ही अज्ञानी लोग भगवान्से बार-बार प्रार्थना करते थे परन्तु 'ऐसा करना उचित नही है' यही मानते हुए भगवान् चुपचाप वहां से आगे चले जाते थे ॥२४–२५॥ जिनकी चर्याकी विधि अतिशय गुप्त है ऐसे भगवान्के अभिप्रायको जाननेके लिये असमर्थ हुए कितने ही लोग क्या करना चाहिये, क्या नही करना चाहिये इस विषयमे मूढ होकर चित्रलिखितके समान निश्चल ही खडे रह जाते थे ॥२६॥ अन्य कितने ही लोग आंखोंसे आंसू डालते हुए अपने पुत्र तथा स्त्रियों सहित भगवान्के चरणोंमें आ लगते थे जिससे क्षणभरके लिये भगवान्की चर्यामे विघ्न पड़ जाता था परन्तु विघ्न दूर होते ही वे फिर भी आगे के लिये विहार कर जाते थे ॥२७॥ इस प्रकार जगत्को आश्चर्य करने वाली गूढ चर्यासे उत्कृष्ट चर्या धारण करनेवाले भगवान्के छह महीने और भी व्यतीत हो गये ॥२८॥ इस तरह एक वर्ष पूर्ण होनेपर भगवान् वृषभदेव कुरुजांगल देशके आभूषणके समान सुशोभित हस्तिनापुर नगरमे पहुंचे ॥२९॥ उस समय उस नगरके रक्षक राजा सोमप्रभ थे। राजा सोमप्रभ कुरुवशके शिखामणिके समान थे, उनका अन्त करण अतिशय प्रसन्न था और मुख चन्द्रमाके समान सौम्य था ॥३०॥ उनका एक छोटा भाई था जिसका नाम श्रेयान्सकुमार था। वह श्रेयान्सकुमार गुणोंकी वृद्धिसे श्रेष्ठ था, रूपसे कामदेवके समान था, कान्तिसे चन्द्रमा

---

१ सत्कारपूर्वकं प्रार्थितवन्तः। 'इष इच्छायाम् ण्यन्तात् लुङ्'। २ प्रार्थयामासु.। अनाधिषत इत्यपि क्वचित्। ३ भोक्तुं योग्यम्। ४ पातुं योग्यम्। ५ सन्तृप्तिकारकम्। ६ प्रार्थ्यमानः। ७ इतस्ततः परिभ्रमद्‌भि.। ८ न कृत्यम्। ९ अपसरति स्म। गतवानित्यर्थः। १० अभिप्रायम्। ११ असमर्थाः। १२ पादालग्नै–ल०, म०, अ०। पादलग्नै–प०, द०। १३ सा चासौ चर्या च तच्चर्या क्षण विघ्निता तच्चर्या यस्य। १४ हास्तिनमित्याह्वयेन सहितम्। १५ "ललाम च ललामं च भषावालधिवाजिषु।" तिलकमित्यर्थः। १६ पालकः। १७ तत्काले। १८ प्रसन्नबुद्धिः। १९ तेजसा।

धनदेवचरो योऽसौ अहमिन्द्रो दिवश्च्युतः । स श्रेयानित्यभूच्छ्रेयः[1] प्रजानां श्रेयसां निधिः ॥३२॥
सोऽदर्शद् भगवत्यस्यां पुरि सन्निधिमेष्यति[2] । शर्वर्याः पश्चिमे यामे स्वप्नानेतान् शुभावहान् ॥३३॥
सुमेरुमैक्षतोत्तुङ्गं हिरण्मयमहातनुम् । कल्पद्रुमञ्च शाखाग्रलम्बि भूषणभूषितम् ॥३४॥
सिंहं संहार[3] सन्ध्याभ[4]केसरोद्धु[5]रकन्धरम् । शृङ्गाग्रलग्नमृत्स्नञ्च वृषभं कूलमुद्रुजम्[6] ॥३५॥
सूर्येन्दू भुवनस्येव नयने प्रस्फुरद्द्युती । [7]सरस्वन्तमपि प्रोच्चैर्वीचिं [8]रत्नाचितार्णसम् ॥३६॥
अष्टमङ्गलधारीणि भूतरूपाणि[9] चाग्रतः[10] । सोऽपश्यद् भगवत्पाददर्शनैकफलानिमान् ॥३७॥
सप्रश्रयमथासाद्य प्रभाते प्रीतमानसः । सोमप्रभाय तान् स्वप्नान् यथावृष्टं न्यवेदयत् ॥३८॥
ततः पुरोधाः[11] कल्याणं फलं तेषामभाषत । प्रसरद्दशनज्योत्स्नाप्रधौतककुबन्तरः ॥३९॥
मेरुसन्दर्शनाद्देवो यो मेरुरिव सून्नतः । मेरौ प्राप्ताभिषेकः स गृहमेष्यति नः स्फुटम् ॥४०॥
तद्गुणोन्नतिमन्ये च स्वप्नाः संसूचयन्त्यमी । तस्यानुरूपविनयैः महान् पुण्योदयोऽद्य नः ॥४१॥
प्रशंसां जगति ख्यातिम् अनल्पां लाभसम्पदम् । प्राप्स्यामो नात्र सन्दिह्मः[12] कुमारश्चात्र[13]तत्त्ववित्[14]॥४२॥

के समान था और दीप्तिसे सूर्यके समान था ॥३१॥ जो पहले धनदेव था और फिर अहमिन्द्र हुआ था वह स्वर्गसे चय कर प्रजाका कल्याण करनेवाला और स्वय कल्याणोंका निधिस्वरूप श्रेयान्सकुमार हुआ था ॥३२॥ जब भगवान् इस हस्तिनापुर नगरके समीप आनेको हुए तब श्रेयान्सकुमारने रात्रिके पिछले पहरमे नीचे लिखे स्वप्न देखे ॥३३॥ प्रथम ही सुवर्णमय महा शरीरको धारण करनेवाला और अतिशय ऊचा सुमेरु पर्वत देखा, दूसरे स्वप्नमे शाखाओके अग्रभागपर लटकते हुए आभूषणोंसे सुशोभित कल्पवृक्ष देखा, तीसरे स्वप्नमे प्रलयकाल सम्बन्धी सध्याकालके मेघोंके समान पीली-पीली अयालसे जिसकी ग्रीवा ऊची हो रही है ऐसा सिंह देखा, चौथे स्वप्नमे जिसके सीगके अग्रभागपर मिट्टी लगी हुई है ऐसा किनारा उखाड़ता हुआ बैल देखा, पाचवे स्वप्नमे जिनकी कान्ति अतिशय देदीप्यमान हो रही है और जो जगत्के नेत्रोंके समान है ऐसे सूर्य और चन्द्रमा देखे, छठवे स्वप्नमे जिसका जल बहुत ऊची उठती हुई लहरों और रत्नोंसे सुशोभित हो रहा है ऐसा समुद्र देखा तथा सातवे स्वप्नमे अष्टमगल द्रव्य धारण कर सामने खड़ी हुई भूत जातिके व्यन्तर देवोकी मूर्तिया देखी। इस प्रकार भगवान्के चरणकमलोंका दर्शन ही जिनका मुख्य फल है ऐसे ये ऊपर लिखे हुए सात स्वप्न श्रेयान्स-कुमारने देखे ॥३४–३७॥ तदनन्तर जिसका चित्त अतिशय प्रसन्न हो रहा है ऐसे श्रेयान्स-कुमारने प्रातःकालके समय विनयसहित राजा सोमप्रभके पास जाकर उनसे रात्रिके समय देखे हुए वे सब स्वप्न ज्योंके त्यो कहे ॥३८॥ तदनन्तर जिसकी फैलती हुई दांतोंकी किरणोंसे सब दिशाए अतिशय स्वच्छ हो गई है ऐसे पुरोहितने उन स्वप्नोंका कल्याण करनेवाला फल कहा ॥३९॥ वह कहने लगा कि हे राजकुमार, स्वप्नमे मेरुपर्वतके देखनेसे यह प्रकट होता है कि जो मेरु पर्वतके समान अतिशय उन्नत (ऊंचा अथवा उदार) है और मेरु पर्वतपर जिसका अभिषेक हुआ है ऐसा कोई देव आज अवश्य ही अपने घर आवेगा ॥४०॥ और ये अन्य स्वप्न भी उन्हींके गुणोकी उन्नतिको सूचित करते है। आज उन भगवान्के योग्य की हुई विनयके द्वारा हम लोगोंके बडे भारी पुण्यका उदय होगा ॥४१॥ आज हम लोग जगत्मे बडी भारी प्रशंसा प्रसिद्धि और लाभसम्पदाको प्राप्त होंगे इस विषयमे कुछ भी सन्देह नही है और कुमार

---

१ आश्रयणीयः । २ समीपमागमिष्यति सति । ३ प्रलयकालः । ४ सन्ध्याभ्र–द०, ल०, म० । ५ उत्कट, भयकर । ६ तटं खनन्तम् । ७ समुद्रम् । 'सरस्वान् सागरोऽर्णवः' इत्यभिधानात् । ८ रत्नाकीर्णजलम् । ९ व्यन्तरदेवतारूपाणि । १० पुरः । ११ पुरोहितः । १२ सन्देहं न कुर्मः । १३ अस्मिन् विषये । १४ यथास्वरूपवेदी ।

इति तद्वचनात् प्रीतौ तौ तत्सङ्कथया स्थितौ। यावत्तावच्च योगीन्द्रः प्राविशद्धास्तिनं पुरम् ॥४३॥
तदा कोलाहलो भूयान् अभूत्तत्सन्दिदृक्षया। इतस्ततश्च मिलतां[1] पौराणां मुखनिःसृतः ॥४४॥
भगवानादिकर्तास्मान् प्रपालयितुमागतः। पश्यामोऽत्र द्रुतं गत्वा पूजयामश्च भक्तितः ॥४५॥
वनप्रदेशाद् भगवान् प्रत्यावृत्तः सनातनः। अनुगृहीतुमेवास्मानित्यूचुः केचनोचितम् ॥४६॥
केचित् परापर[2]ज्ञस्य सन्दर्शनसमुत्सुकाः। पौरास्त्यक्तान्यकर्तव्याः[3]सन्दधावुरितोऽमुतः ॥४७॥
अयं स भगवान् दूराल्लक्ष्यते[4]प्रांशुविग्रहः। गिरीन्द्र इव निष्टप्त[5]जात्यकाञ्चनसच्छविः ॥४८॥
श्रूयते यः श्रुतश्रुत्या[6] जगदेकपितामहः। स नः सनातनो दिष्टया यातः प्रत्यक्षसन्निधिम् ॥४९॥
दृष्टेऽस्मिन्[7] सफले नेत्रे श्रुतेऽस्मिन् सफले श्रुती। स्मृतेऽस्मिन् जन्तुरज्ञोपि व्रजत्यन्तःपवित्रताम् ॥५०॥
[8]सर्वसङ्गविनिर्मुक्तो [8]दीप्रप्रोत्तुङ्गविग्रहः। [9]घनरोधविनिर्मुक्तो भाति भास्वानिव प्रभुः ॥५१॥
इदमाश्चर्यमाश्चर्यं यदेष जगतां पतिः। विहरत्येवमेकाकी त्यक्तसर्वपरिच्छदः[10] ॥५२॥
अथवा श्रुतमस्माभिः[11]स्वाधीनसुखकाम्यया। करीव यूथपो[12] नाथो वनं प्रस्थित[13]वानिति ॥५३॥

श्रेयान्स भी स्वयं स्वप्नोंके रहस्यको जाननेवाले है ॥४२॥ इस प्रकार पुरोहितके वचनोंसे प्रसन्न हुए वे दोनों भाई स्वप्न अथवा भगवान्की कथा कहते हुए बैठे ही थे कि इतनेमे ही योगि राज भगवान् वृषभदेवने हस्तिनापुरमे प्रवेश किया ॥४३॥ उस समय भगवान्के दर्शनोकी इच्छासे जहां तहांसे आकर इकट्ठे हुए नगरनिवासी लोगोके मुखसे निकला हुआ बडा भारी कोलाहल हो रहा था ॥४४॥ कोई कह रहा था कि आदिकर्ता भगवान् वृषभदेव हम लोगो का पालन करनेके लिये यहा आये है; चलो, जल्दी चलकर उनके दर्शन करे और भक्तिपूर्वक उनकी पूजा करे ॥४५॥ कितने ही लोग ऐसे उचित वचन कह रहे थे कि सनातन भगवान् केवल हम लोगोंपर अनुग्रह करनेके लिये ही वन-प्रदेशसे वापिस लौटे है ॥४६॥ इस लोक और परलोकको जाननेवाले भगवान्के दर्शन करनेके लिये उत्कंठित हुए कितने ही नगरनिवासी जन अन्य सब काम छोड़कर इधरसे उधर दौड़ रहे थे ॥४७॥ कोई कह रहा था कि जिनका शरीर सुमेरु पर्वतके समान अतिशय ऊंचा है और जिनकी कान्ति तपाये हुए उत्तम सुवर्णके समान अतिशय देदीप्यमान है ऐसे ये भगवान् दूरसे ही दिखाई देते है ॥४८॥ ससारका कोई एक पितामह है ऐसा जो हम लोग केवल कानोसे सुनते थे आज वे ही सनातन पितामह भाग्यसे आज हम लोगोंके प्रत्यक्ष हो रहे है—हम उन्हें अपनी आखोसे भी देख रहे है ॥४९॥ इन भगवान् के दर्शन करनेसे नेत्र सफल हो जाते है, इनका नाम सुननेसे कान सफल हो जाते है और इनका स्मरण करनेसे अज्ञानी जीव भी अन्त.करणकी पवित्रताको प्राप्त हो जाते है ॥५०॥ जिन्होंने समस्त परिग्रहका त्याग कर दिया है और जिनका अतिशय ऊचा शरीर बहुत ही देदीप्यमान हो रहा है ऐसे ये भगवान् मेघोंके आवरणसे छूटे हुए सूर्यके समान अत्यन्त सुशोभित हो रहे है ॥५१॥ यह बड़ा भारी आश्चर्य है कि ये भगवान् तीन लोकके स्वामी होकर भी सब परिग्रह छोड़कर इस तरह अकेले ही विहार करते है ॥५२॥ अथवा जो हम लोगोंने पहले सुना था कि भगवान्ने स्वाधीन सुख प्राप्त करनेकी इच्छासे झुण्डकी रक्षा करनेवाले हाथीके समान वनके लिये प्रस्थान किया है सो वह इस समय सत्य मालूम होता है क्योंकि ये परमेश्वर भगवान्

---

१ 'मिल सघाते'। २ पूर्वापरवेदिनः। ३ वेगेन गच्छन्ति स्म। ४ उन्नतशरीरः। ५ उत्तम-सुवर्ण। ६ श्रवणपरम्परया। ७ परमेश्वरे। ८ दीप्त-ल०, म०। ९ बहुजनोपरोध, पक्षे मेघाच्छादन। १० परिकरः। ११ स्वायत्तसुखवाञ्छया। १२ यूथनाथः। १३ गतवान्।

[1]तत्सत्यमधुना स्वैरं मुक्तसङ्गो निरम्बरः । [2]अव्यथो विहरत्येवम् एककः[3] परमेश्वरः ॥५४॥
यथास्वं विहरन् देशान् अस्मद्भाग्याविहागतः । वन्द्यः पूज्योऽभि[4]गम्यश्चेत्येके श्लाघ्यं वचो जगुः ॥५५॥
चेटि बालकमादाय स्तन्यं पायय याम्यहम् । द्रष्टुं भगवतः पादाविति काचित्[5] स्म्यभाषत ॥५६॥
प्रसाधनमिदं तावद् आस्तां मे सहमज्जनम् । पूतैर्दृष्टिजलैर्भर्तुः स्नास्यामीत्यपरा जगुः ॥५७॥
भगवन्मुखबालार्कदर्शनान्नो मनोम्बुजम् । चिरं प्रबोधमायातु पश्यामोऽद्य जगद्गुरुम् ॥५८॥
खलु भुक्त्वा[6] लघू[7]त्तिष्ठ गृहाणार्घ[8]मिमं सखि । पूजयामो जगत्पूज्यं गत्वेत्यन्या जगौ गिरम् ॥५९॥
स्नानाशनादिसामग्रीम् अवमत्य[9] पुरोगताम् । गता एव तदा पौराः प्रभुं द्रष्टुं [10]पुरोगतम् ॥६०॥
गतानुगतिकाः केचित् केचिद् भक्तिमुपागताः । परे कौतुकसाद्भूता[11] भूतेशं द्रष्टुमुद्यताः ॥६१॥
इति नानाविधैर्जल्पैः सङ्कल्पैश्च हिरुक्कृतैः[12] । तमीक्षाञ्चक्रिरे[13] पौरा दूरात् त्रातारमानताः ॥६२॥
अहम्पूर्वमहम्पूर्वमित्युपेतैः[14] समन्ततः । तदा रुद्धमभूत् पौरैः पुरमाराजमन्दिरात्[15] ॥६३॥
स तु संवेगवैराग्यसिद्ध्यर्थं बद्धपरिच्छदः । जगत्कायस्वभावादितत्त्वानुद्ध्यान[16]मामनन्[17] ॥६४॥

समस्त परिग्रह और वस्त्र छोड़कर बिना किसी कष्टके इच्छानुसार अकेले ही विहार कर रहे है ॥५३–५४॥ ये भगवान् अपनी इच्छानुसार अनेक देशोंमे विहार करते हुए हमलोगोंके भाग्यसे ही यहा आये है इसलिये हमे इनकी वन्दना करनी चाहिये, पूजा करनी चाहिये और इनके सन्मुख जाना चाहिये इस प्रकार कितने ही लोग प्रशसनीय वचन कह रहे थे ॥५५॥ उस समय कोई स्त्री अपनी दासीसे कह रही थी कि हे दासी,तू बालकको लेकर दूध पिला, मै भगवान् के चरणोंका दर्शन करनेके लिये जाती हूँ ॥५६॥ अन्य कोई स्त्री कह रही थी कि यह स्नान की सामग्री और यह आभूषण पहननेकी सामग्री दूर रहे मैं तो भगवान् के दृष्टिरूपी पवित्र जलसे स्नान करूगी ॥५७॥ भगवान्‌के मुखरूपी बालसूर्यके दर्शनसे हमारा यह मनरूपी कमल चिरकाल तक विकासको प्राप्त रहे, चलो, आज जगद्‌गुरु भगवान् वृषभदेवके दर्शन करे ॥५८॥ अन्य कोई स्त्री कह रही थी कि हे सखि, भोजन करना बन्द कर, जल्दी उठ और यह अर्घ हाथ मे ले, चलकर जगत्पूज्य भगवान्‌की पूजा करें ॥५९॥ उस समय नगरनिवासी लोग सामने रखी हुई स्नान और भोजनकी सामग्रीको दूरकर आगे जानेवाले भगवान्‌के दर्शनके लिए जा रहे थे ॥६०॥ कितने ही लोग अन्य लोगोको जाते हुए देखकर उनकी देखादेखी भगवान् के दर्शन करनेके लिये उद्यत हुए थे। कितने ही भक्तिवश और कितने ही कौतुकके आधीन हो जिनेन्द्रदेवको देखनेके लिये तत्पर हुए थे ॥६१॥ इस प्रकार नगर-निवासी लोग परस्परमे अनेक प्रकारकी बातचीत और आदरसहित अनेक सकल्प विकल्प करते हुए जगत्‌की रक्षा करनेवाले भगवान्‌को दूरसे ही नमस्कार कर उनके दर्शन करने लगे ॥६२॥ 'मै पहले पहुचूं' 'मै पहले पहुंचूं' इस प्रकार विचार कर चारों ओर से आये हुए नगरनिवासी लोगोके द्वारा वह नगर उस समय राजमहल तक खूब भर गया था ॥६३॥ उस समय नगरमे यह सब हो रहा था परन्तु भगवान् सवेग और वैराग्यकी सिद्धिके लिये कमर बांधकर ससार और शरीर के स्वभावका चिन्तवन करते हुए प्राणीमात्र, गुणाधिक, दु.खी और अविनयी जीवोंपर क्रमसे

---

१ वनम् । प्रस्थितवानिति श्रुतम् । २ अबाधः । ३ एकाकी । ४ अभिमुख गन्तुं योग्यः । ५ काचिदभाषत प० । ६ भोजनेनालम् । ७ शीघ्रम् । ८ पूजाद्रव्यम् । ९ अवज्ञां कृत्वा । १० अग्रे स्थितमित्यर्थः । पुरोगताम् अग्रगामित्वम् । ११ आश्चर्याधीनाः । १२ पृथक्कृताः हिरुड् नानार्थवर्जने । कृतशुभभावनादिपरिकराः । हि सत्कृतैः प० । स्वहितात्कृतैः अ० । १३ ददृशुः । १४ सम्भूतैः । १५ राजभवनपर्यन्तम् । १६ अनुस्मरणम् । १७ अभ्यासं कुर्वन् ।

मैत्रीप्रमोदकारुण्यमाध्यस्थान्यनुभावयन् । [1]सत्त्वसृष्टिगुणोत्कृष्ट[2]क्लिष्टानिष्टानुशिष्टिषु[3] ॥६५॥
युगप्रमितमध्वानं पश्यन्नातिविलम्बितम् । नातिद्रुतञ्च विन्यस्यन् पदं गन्धेभलीलया ॥६६॥
तथाप्यस्मिञ्जनाकीर्णे शून्यारण्यकृतास्थया[4] । [5]निर्व्यग्रो भगवांश्चान्द्रीं[6] [7]चर्यामाश्रित्य पर्यटन् ॥६७॥
गेहं गेहं यथायोग्यं प्रविशन् राजमन्दिरम् । प्रवेष्टुकामो ह्यागमत् सोऽयं धर्मः सनातनः ॥६८॥
ततः सिद्धार्थनामैत्य द्रुतं दौवारपालकः । भगवत्सन्निधिं राज्ञे सानुजाय न्यवेदयत् ॥६९॥
अथ सोमप्रभो राजा श्रेयानपि युवा नृपः । सान्तःपुरौ ससेनान्यौ सामात्यावुदतिष्ठताम्[8] ॥७०॥
प्रत्युद्गम्य[9] ततो भक्त्या यावद्राजाङ्गणाद् बहिः । दूरादवनतौ भर्तुश्चरणौ तौ प्रणेमतुः ॥७१॥
सार्घ्यं[10] पाद्यं[11] [12]निवेद्याङ्घ्र्योः परीत्य च जगद्गुरुम् । तौ परं जग्मतुस्तोषं निधाविव गृहागते ॥७२॥
तौ देवदर्शनात् प्रीतौ गात्रे [13]पुलकमूहतुः । मलयानिलसंस्पर्शाद् भूरुहावङ्कुरं यथा ॥७३॥
भगवन्मुखसम्प्रेक्षाविकसन्मुखपङ्कजौ । विबुद्धकमलौ प्रातस्तनौ[14] पद्माकराविव ॥७४॥
प्रमोदनिर्भरौ भक्तिभरानमितमस्तकौ । प्रश्रयप्रशमौ मूर्ताविव तौ रेजतुस्तदा ॥७५॥

मैत्री, प्रमोद, कारुण्य और माध्यस्थ भावनाका विचार करते हुए चार हाथ प्रमाण मार्ग देखकर न बहुत धीरे और न बहुत शीघ्र मदोन्मत्त हाथी जैसी लीलापूर्वक पैर रखते हुए, और मनुष्यों से भरे हुए नगरको शून्य वनके समान जानते हुए निराकुल होकर चान्द्रीचर्याका आश्रय लेकर विहार कर रहे थे अर्थात् जिस प्रकार चन्द्रमा धनवान् और निर्धन–सभी लोगोंके घरपर अपनी चांदनी फैलाता है उसी प्रकार भगवान् भी रागद्वेषसे रहित होकर निर्धन और धनवान् सभी लोगोंके घर आहार लेनेके लिये जाते थे। इस प्रकार प्रत्येक घरमें यथायोग्य प्रवेश करते हुए भगवान् राजमन्दिरमें प्रवेश करनेके लिये उसके सन्मुख गये सो आचार्य कहते हैं कि राग-द्वेष रहित हो समतावृत्ति धारण करना ही सनातन-सर्वश्रेष्ठ प्राचीन धर्म है ॥६४–६८॥

तदनन्तर सिद्धार्थ नामके द्वारपालने शीघ्र ही जाकर अपने छोटे भाई श्रेयान्सकुमारके साथ बैठे हुए राजा सोमप्रभके लिये भगवान् के समीप आनेके समाचार कहे ॥६९॥ सुनते ही राजा सोमप्रभ और तरुण राजकुमार श्रेयान्स, दोनों ही, अन्तःपुर, सेनापति और मन्त्रियोंके साथ शीघ्र ही उठे ॥७०॥ उठकर वे दोनों भाई राजमहलके आंगन तक बाहिर आये और दोनोंने ही दूरसे नम्रीभूत होकर भक्तिपूर्वक भगवान्‌के चरणोंको नमस्कार किया ॥७१॥ उन्होंने भगवान्‌के चरणकमलोंमें अर्घ सहित जल समर्पित किया, अर्थात् जलसे पैर धोकर अर्घ चढाया, जगद्गुरु भगवान् वृषभदेवकी प्रदक्षिणा दी और यह सब कर वे दोनों ही इतने सन्तुष्ट हुए मानो उनके घर निधि ही आई हो ॥७२॥ जिस प्रकार मलयानिलके स्पर्शसे वृक्ष अपने शरीरपर अंकुर धारण करने लगते हैं उसी प्रकार भगवान्‌के दर्शनसे हर्षित हुए वे दोनों भाई अपने शरीरपर रोमांच धारण कर रहे थे ॥७३॥ भगवान्‌का मुख देखकर जिनके मुख कमल विकसित हो उठे हैं ऐसे वे दोनों भाई ऐसे जान पडते थे मानो जिनमें कमल फूल रहे हों ऐसे प्रातःकालके दो सरोवर ही हों ॥७४॥ उस समय वे दोनों हर्षसे भरे हुए थे और भक्तिके भारसे दोनोंके मस्तक नीचेकी ओर झुक रहे थे इसलिये ऐसे सुशोभित होते थे मानो

---

१ सत्त्ववर्गः । २ क्लेशित । ३ अशिक्षितेषु । ४ विहितबुद्ध्या । ५ निराकुलः । ६ चन्द्रसम्बन्धिनीम् चन्द्रवन्मन्दामित्यर्थः । ७ गतिम् । ८ उत्तिष्ठतः स्म । ९ सम्मुखं गत्वा । १० रत्नादिपदार्थम् । ११ पादाय वारि । 'पाद्यं पादाय वारिणि' इत्यभिधानात् । १२ समर्प्य । १३ रोमाञ्चम् । १४ प्रातःकाले सञ्जातौ ।

भगवच्चरणोपान्ते तौ तदा भजतुः श्रियम् । सौधर्मैशानकल्पेशौ विभुं द्रष्टुमिवागतौ ॥७६॥
पर्यन्तवर्तिनोर्मध्ये तयोर्भर्ता स्म राजते । महामेरुरिवोद्भूतो मध्ये निषधनीलयोः ॥७७॥
सम्प्रेक्ष्य भगवद्रूपं श्रेयाञ्जातिस्मरोऽभवत् । ततो[1] दाने मतिं चक्रे संस्कारैः प्राक्तनैर्युतः ॥७८॥
श्रीमती वज्रजङ्घादिवृत्तान्तं सर्वमेव तत् । तदा चारणयुग्माय दत्तं दानञ्च सोऽध्यगात्[2] ॥७९॥
[3]सतो गोचार[4]वेलेयं दानयोग्या मुनीशिनाम् । तेन[5] भर्त्रे ददे[6] दानमिति निश्चित्य पुण्यधीः ॥८०॥
श्रद्धादिगुणसम्पन्नः पुण्यैर्नवभिरन्वितः । [7]प्रादाद्भगवते दानं श्रेयान् दानादि[8]तीर्थकृत् ॥८१॥
श्रद्धा शक्तिश्च भक्तिश्च विज्ञानञ्चाप्यलुब्धता । क्षमा त्यागश्च सप्तैते प्रोक्ता दानपतेर्गुणाः ॥८२॥
श्रद्धास्तिक्य[9]मनास्तिक्ये प्रदाने स्यादनादरः । भवेच्छक्तिरनालस्यं भक्तिः स्यात्तद्गुणादरः[10] ॥८३॥
विज्ञानं स्यात् क्रमज्ञत्वं [11]देयासक्तिरलुब्धता । क्षमा तितिक्षा[12] ददतस्त्यागः सद्व्ययशीलता ॥८४॥
इति सप्तगुणोपेतो दाता स्यात् पात्रसम्पदि[13] । व्यपेतश्च निदानादेः दोषान्निश्रेयसोद्यतः ॥८५॥
प्रतिग्रहण[14]मत्युच्चैः स्थानेऽस्य[15] विनिवेशनम् । पादप्रधावन[16]ञ्चार्चा[17] नतिः शुद्धिश्च सा त्रयी[18] ॥८६॥

मूर्तिधारी विनय और शान्ति ही हों ॥७५॥ भगवान्के चरणोके समीप वे दोनों ऐसे सुशोभित हो रहे थे मानो भगवान्के दर्शन करनेके लिये आये हुए सौधर्म और ऐशान स्वर्गके इन्द्र ही हों ॥७६॥ दोनो ओर खड़े हुए सोमप्रभ और श्रेयान्सकुमारके बीचमे स्थित भगवान् वृषभदेव ऐसे सुशोभित हो रहे थे मानो निषध और नील पर्वतके बीचमे खड़ा हुआ सुमेरु पर्वत ही हो ॥७७॥

भगवान्का रूप देखकर श्रेयान्सकुमार को जातिस्मरण हो गया जिससे उसने अपने पूर्व पर्यायसम्बन्धी संस्कारोंसे भगवान्के लिये आहार देनेकी बुद्धि की ॥७८॥ उसे श्रीमती और वज्रजंघ आदिका वह समस्त वृत्तान्त याद हो गया तथा उसी भवमें उन्होने जो चारण ऋद्धिधारी दो मुनियोंके लिये आहार दिया था उसका भी उसे स्मरण हो गया ॥७९॥ यह मुनियों के लिये दान देने योग्य प्रातःकालका उत्तम समय है ऐसा निश्चय कर पवित्र बुद्धिवाले श्रेयान्सकुमारने भगवान्के लिये आहार दान दिया ॥८०॥ दानके आदि तीर्थकी प्रवृत्ति करनेवाले श्रेयान्सकुमारने श्रद्धा आदि सातों गुण सहित और पुण्यवर्धक नवधा भक्तियोंसे सहित होकर भगवान्के लिये दान दिया था ॥८१॥ श्रद्धा शक्ति भक्ति विज्ञान अक्षुब्धता क्षमा और त्याग ये दानपति अर्थात् दान देनेवालेके सात गुण कहलाते है ॥८२॥ श्रद्धा आस्तिक्य बुद्धिको कहते है, आस्तिक्य बुद्धि अर्थात् श्रद्धाके न होनेपर दान देनेमे अनादर हो सकता है । दान देने में आलस्य नही करना सो शक्ति नामका गुण है, पात्रके गुणोमे आदर करना सो भक्ति नामका गुण है ॥८३॥ दान देने आदिके क्रमका ज्ञान होना सो विज्ञान नामका गुण है, दान देनेकी शक्तिको अलुब्धता कहते हैं, सहनशीलता होना क्षमा गुण है और उत्तम द्रव्य दानमे देना सो त्याग है ॥८४॥ इस प्रकार जो दाता ऊपर कहे हुए सात गुणोंसे सहित और निदान आदि दोषों से रहित होकर पात्ररूपी सम्पदामे दान देता है वह मोक्ष प्राप्त करनेके लिये तत्पर होता है ॥८५॥ मुनिराजका पड़गाहन करना, उन्हें ऊंचे स्थानपर विराजमान करना, उनके चरण धोना, उनकी पूजा करना, उन्हें नमस्कार करना, अपने मन, वचन कामकी शुद्धि और आहार

---

१ जातिस्मरणतः । २ 'इक् स्मरणे' । 'गैत्योः इणिको लुङि गा भवति' इति गादेशः । अस्मरत् । ३ समीचीना । ४ अशनवेला । ५ कारणेन । ६ ददौ अ०, प० । ७ ददौ । ८ प्रथमदानतीर्थकृदित्यर्थः । ९ अस्ति पुण्यपापपरलोकादिकमिति बुद्धिर्यस्यासौ आस्तिकः तस्य भावः आस्तिक्यम् । १० पात्रगुणप्रीति । ११ देयवस्तुषु अनासक्तिः । देयशक्ति. प०, द० । १२ क्षान्ति. । १३ पात्रसमृद्धया सत्याम् । १४ स्थापनम् । १५ पात्रस्य । १६ प्रक्षालनम् । १७ अर्चनम् । १८ मनोवाक्कायसम्बन्धिनी ।

विशुद्धिश्चा[1]शनस्येति नवपुण्यानि दानिनाम् । स तानि कुशलो भेजे पूर्वसंस्कार[2]चोदितः ॥८७॥
इष्टश्चायं[3] विशिष्टश्चेत्यसौ[4] तुष्टिं परां श्रितः । ददे भगवते दानं प्रासुकाहारकल्पितम् ॥८८॥
सन्तोषो याचनापायो नैःसङ्गयं स्वप्रधानता[5] । इति मत्वा गुणान् पाणिपात्रेणाहारमिच्छते ॥८९॥
[6]तुष्टिर्विशिष्टपीठादिसम्प्राप्तावन्यथा द्विषः[7] । असंयमश्च सत्यैवमिति स्थित्वाशनैषिणे ॥९०॥
कायासुखतितिक्षार्थं[8] सुखासक्तेश्च हानये । धर्मप्रभावनार्थञ्च कायक्लेशमुपेयुषे[9] ॥९१॥
नैष्किञ्चन्यप्रधानं[10] यत् परं निर्वाणकारणम् । हिंसारक्षण[11]याञ्चादिदोषैरस्पृष्टमूर्जितम् ॥९२॥
[12]अशक्यं प्रार्थनीयत्वरहितं च [13]समीयुषे । जातरूपं यथाजातम् अविकारमविप्लवम् ॥९३॥
तैलादेर्याचनं तस्य लाभालाभद्वये सति । रागद्वेषद्वया[14]सङ्गः केशजप्राणिहिंसनम् ॥९४॥
इत्यादिदोषसद्भावाद् अस्नानव्रतधारिणे । हायनान[15]शनेऽप्यङ्गे पुष्टिं दीप्तिञ्च[16] बिभ्रते ॥९५॥
क्षुर[17]क्रियायां तद्योग्य[18]साधनार्जनरक्षणे । तदपाये च चिन्ता स्यात् केशोत्पाटमितीच्छते ॥९६॥
पञ्चभिः समिता[19]यास्मै त्रिभिर्गुप्ताय तायिने[20] । महाव्रताय महते निर्मोहाय निराशिषे[21] ॥९७॥

की विशुद्धि रखना इस प्रकार दान देनेवालेके यह नौ प्रकारका पुण्य अथवा नवधा भक्ति कहलाती है। अतिशय चतुर श्रेयान्सकुमारने पूर्वपर्यायके संस्कारोसे प्रेरित होकर वे सभी भक्तिया की थी ॥८६–८७॥ ये भगवान् अतिशय इष्ट तथा विशिष्ट पात्र है ऐसा विचार कर परम सन्तोषको प्राप्त हुए श्रेयान्सकुमारने भगवान्‌के लिये प्रासुक आहारका दान दिया था ॥८८॥ जो भगवान् संतोष रखना, याचनाका अभाव होना, परिग्रहका त्याग करना, और अपने आपकी प्रधानता रहना आदि अनेक गुणोका विचार कर पाणिपात्रसे ही अर्थात् अपने हाथोंसे ही आहार ग्रहण करते थे। उत्तम आसन मिलनेसे सतोष होगा, यदि उत्तम आसन नही मिला तो द्वेष होगा और ऐसी अवस्थामे असयम होगा ऐसा विचार कर जो भगवान् खड़े होकर ही भोजन करते थे। शरीर सम्बन्धी दुःख सहन करनेके लिये, सुखकी आसक्ति दूर करनेके लिये और धर्मकी प्रभावनाके लिये जो भगवान् कायक्लेशको प्राप्त होते थे। जिसमे अकिचनता की ही प्रधानता है, जो मोक्षका साक्षात् कारण है, हिसा, रक्षा और याचना आदि दोष जिसे छू भी नही सकते है, जो अत्यन्त बलवान् है, साधारण मनुष्य जिसे धारण नही कर सकते, जिसे कोई प्राप्त नही करना चाहता, और जो तत्कालमे उत्पन्न हुए बालकके समान निर्विकार तथा उपद्रव रहित है ऐसे नग्न-दिगम्बर रूपको जो भगवान् धारण करते थे। तैल आदिकी याचना करना, उसके लाभ और अलाभमे राग-द्वेषका उत्पन्न होना, और केशोंमें उत्पन्न होनेवाले जू आदि जीवोंकी हिसा होना इत्यादि अनेक दोषोंका विचार कर जो भगवान् अस्नान व्रतको धारण करते थे अर्थात् कभी स्नान नही करते थे ॥ एक वर्ष तक भोजन न करने पर भी जो शरीरमे पुष्टि और दीप्तिको धारण कर रहे थे ॥ यदि क्षुरा आदिसे बाल बनवाये जायगे तो उसके साधन क्षुरा आदि लेने पड़ेगे उनकी रक्षा करनी पडेगी और उनके खो जानेपर चिन्ता होगी ऐसा विचार कर जो भगवान् हाथसे ही केशलोंच करते थे। जो भगवान् पांचों इन्द्रियोंको वश कर लेनेसे शान्त थे, तीनों गुप्तियोसे सुरक्षित थे, सबकी रक्षा करने-

---

१ एषणाशुद्धिरित्यर्थः। २ पूर्वभवसस्कारप्रेरितः। ३ देवः। ४ श्रेयान्। ५ आत्मैव प्रधानत्वम्। ६ सन्तोष। ७ द्वेष.। ८ शरीरसुखसहनार्थम्। ९ गताय। १० नास्ति किञ्चन यस्यासावकिञ्चनः तस्य भावः तत् प्रधान यस्य तत्। ११ याञ्चा। १२ अन्यैरनुष्ठातुमशक्यम्। १३ प्राप्तवते। रहितं च समुपेयुषे प०, द०,। रहितं च समीयुषे इत्यपि क्वचित्। १४ सयोगः। १५ संवत्सरोपवासेऽपि। १६ तेजः। १७ मुण्डन। १८ शस्त्रादि। १९ शमिता ल०, म०। २० पालकाय। २१ इच्छारहिताय।

संयमक्रियया सर्वप्राणिभ्योऽभयदायिने । [1]सर्वीयज्ञानदानाय[2] सार्वाय प्रभविष्णवे[3] ॥९८॥
दातुराहारदानस्य महानिस्तार[4]कात्मने । त्रिजगत्सर्वभूतानां हितार्थं मार्गदेशिने ॥९९॥
श्रेयान् सोमप्रभेणामा लक्ष्मीमत्या[5] च सादरम् । रसमिक्षोरदात् प्रासु[6]मुत्तानीकृतपाणये ॥१००॥
पुण्ड्रेक्षुरसधारान्तां भगवत्पाणिपात्रके । स समावर्जयन् रेजे पुण्यधारामिवामलाम् ॥१०१॥
रत्नवृष्टिरथापप्तद् अम्बरादमरेशिनाम् । करैर्मुक्तामहादानफलस्येव परम्परा ॥१०२॥
तदापप्तद्दिवो देवकरैर्मुक्तालिसङ्कुला । वृष्टिः सुमनसां[7] दृष्टिमालेव त्रिदिवौकसाम् ॥१०३॥
नेदुः[8] सुरानका मन्द्रं वधिरीकृतविष्टपाः । सञ्चचार मरुच्छीतः सुरभिर्मान्द्यसुन्दरः ॥१०४॥
प्रोच्चचार महाध्वानो[9] देवानां प्रीतिमीयुषाम्[10] । अहो दानमहो पात्रम् अहो दातेति खाङ्गणे ॥१०५॥
कृतार्थतरमात्मान मेने तद् भ्रातृयुग्मकम् । कृतार्थोऽपि [11]विभुर्यस्माद्[12] अपुनात् स्वं[13] गृहाङ्गणम् ।१०६।
दानानुमोदनात्पुण्यं परोऽपि बहवोऽभजन् । यथासाद्य परं [14]रत्नं स्फटिकस्तद्रुचिं भजेत् ॥१०७॥
कारणं परिणामः स्याद् बन्धने पुण्यपापयोः । बाह्यं तु कारण प्राहुः आप्ताः कारणकारणम्[15] ॥१०८॥

वाले थे, महाव्रती थे, महान् थे, मोहरहित थे और इच्छा रहित थे । जो सयम रूप क्रियासे सब प्राणियोंके लिये अभय दान देनेवाले थे, सबका हित करनेवाले थे, सर्व हितकारी ज्ञान-दान देनेमे समर्थ थे ॥ जो आहार दान देनेवालेका शीघ्र ही समार-सागरसे पार करनेवाले थे, तीनों लोकोके समस्त जीवोका हित करनेके लिये मोक्षमार्गका उपदेश देनेवाले थे और जिन्होंने अपने दोनों हाथ उत्तान किये थे अर्थात् दोनों हाथोंको सीधा मिलाकर अजली (खोवा) वनाई थी ऐसे भगवान् वृषभदेवके लिये श्रेयान्सकुमारने राजा सोमप्रभ और रानी लक्ष्मीमतीके साथ साथ आदरपूर्वक ईखके प्रासुक रसका आहार दिया था ॥८९–१००॥ वह राजकुमार श्रेयान्स भगवान्के पाणिपात्रमे पुण्यधाराके समान उज्ज्वल पौडे और ईखके रसकी धारा छोड़ता हुआ बहुत अच्छा सुशोभित हो रहा था ॥१०१॥ तदनन्तर आकाशसे महादानके फलकी परम्परा के समान देवोंके हाथसे छोडी हुई रत्नोंकी वर्षा होने लगी ॥१०२॥ उसी समय देवोंके हाथों से छोड़ी हुई और भ्रमरोंके समूहसे व्याप्त फूलोकी वर्षा आकाशसे होने लगी वह फूलोकी वर्षा ऐसी सुशोभित हो रही थी मानो देवोंके नेत्रोकी माला ही हो ॥१०३॥ उसी समय समस्त लोकको वधिर करनेवाले देवोके नगाड़े गम्भीर शब्द करने लगे और मन्द मन्द गमन करने से सुन्दर शीतल तथा सुगन्धित वायु चलने लगा ॥१०४॥ उसी समय प्रीतिको प्राप्त हुए देवों का 'धन्य यह दान, धन्य यह पात्र, और धन्य यह दाता' इस प्रकार बडा भारी शब्द आकाश रूपी आगनमे हो रहा था ॥१०५॥ उस समय उन दोनों भाइयोने अपने आपको बहुत ही कृतकृत्य माना था क्योंकि कृतकृत्य हुए भगवान् वृषभदेवने स्वय उनके घरके आंगनको पवित्र किया था ॥१०६॥ उस दानकी अनुमोदना करनेसे और भी बहुतसे लोग परम पुण्यको प्राप्त हुए थे सो ठीक ही है क्योंकि स्फटिक मणि किसी अन्य उत्कृष्ट रत्नको पाकर उसकी कान्ति को प्राप्त होता ही है ॥१०७॥ यदि यहां कोई आशंका करे कि अनुमोदना करनेसे पुण्यकी प्राप्ति किस प्रकार होती है तो उसका समाधान यह है कि पुण्य और पापके बन्ध होनेमे केवल जीवके परिणाम ही कारण है बाह्य कारणोंको तो जिनेन्द्र देवने केवल कारणका कारण अर्थात्

---

१ सर्वजनहितोपदेशकाय । २ दानस्य ल०, द० । ३ समर्थाय । ४ ससारसमुद्रतारकः । ५ सोमप्रभभार्यया । ६ प्रासुकम् । ७ पुष्पाणाम् । ८ ध्वनन्ति स्म । ९ महान् ध्वानो द० ल० । १० प्राप्तवताम् । ११ तीर्थङ्करः । १२ कारणात् । १३ अस्मदीयम् । १४ अन्यम् । १५ कारणस्य कारणम् । परिणामस्य कारणं वस्तु ।

परिणामः प्रधानाङ्गं यतः पुण्यस्य साधने। मतं [1]ततोनुमन्तॄणाम्[2] आविष्टस्तत्फलोदयः[3] ॥१०९॥
कृत्वा तनुस्थितिं धीमान् योगीन्द्रो जातु कौतुकौ। प्रणतावभिनन्द्यैतौ[4] भ्रातरौ प्रस्थितो[5] वनम् ॥११०॥
भगवन्तमनुव्रज्य[6] व्रजन्तं किञ्चिदन्तरम्। स श्रेयान् कुरुशार्दूलो[7] न्यवृतन्निभृतं पुनः ॥१११॥
निर्व्यपेक्षं व्रजन्तं तं भगवन्तं वनान्तरम्। परावर्त्य मुखं किञ्चिद् [8]वीक्षमाणावनुक्षणम् ॥११२॥
तदुन्मुखीं दृशं चेतोवृत्तिं च तमनूत्थिताम्। यावदृग्गोचरस्तावन्निवर्तयितुमक्षमौ ॥११३॥
सङ्कथां तद्गतामेव प्रस्तुवानौ[9] मुहुर्मुहुः। स्तुवानौ तद्गुणान् भूयो मन्वानौ स्वां[10] कृतार्थताम् ॥११४॥
भगवत्पादसंस्पर्शपूतां क्ष्मां व्यक्तलक्षणैः। तत्पदैरङ्कितां प्रीत्या [11]निध्यायन्तौ कृतानती ॥११५॥
सुभ्राता[12] कुरुनाथोऽयं कृतार्थः सुकृती[13] कृती[14]। यस्यायमीदृशो भ्राता जातो जातमहोदयः ॥११६॥
श्रेयानयं बहुश्रेयान् प्रज्ञा यस्येयमीदृशी। पौरैरित्युन्मुखैराराात् कीर्त्यमानगुणोत्करौ ॥११७॥
शूर्पोन्मेयानि[15] रत्नानि महावीथीष्वितस्ततः। सञ्चिन्वानान् यथाकामम् आनन्दन्तौ [16]पृथग्जनान् ॥११८॥
[17]उच्चावचसुरोन्मुक्तरत्नग्रावततान्तरम्[18]। [19]क्रान्त्वा नृपाङ्गणं कृच्छ्राज्जनैराशासितौ[20] मुहुः ॥११९॥

शुभ अशुभ परिणामोंका कारण कहा है। जब कि पुण्यके साधन करनेमें जीवोंके शुभ परिणाम ही प्रधान कारण माने जाते है तब शुभ कार्यकी अनुमोदना करनेवाले जीवोको भी उस शुभ फलकी प्राप्ति अवश्य होती है ॥१०८–१०९॥ इस प्रकार महाबुद्धिमान् योगिराज भगवान् वृषभदेव शरीरकी स्थितिके अर्थ आहार-ग्रहण कर और जिन्हे एक प्रकारका कौतुक उत्पन्न हुआ है तथा जो अतिशय नम्रीभूत है ऐसे उन दोनों भाइयोको हर्षित कर पुन वनकी ओर प्रस्थान कर गये ॥११०॥ कुरुवंशियोंमें सिंहके समान पराक्रमी वह राजा सोमप्रभ और श्रेयान्स कुछ दूरतक वनको जाते हुए भगवान् के पीछे पीछे गये और फिर रुक रुक कर वापिस लौट आये। ॥१११॥ वे दोनों ही भाई अपना मुख फिराकर निरपेक्ष रूपसे वनको जाते हुए भगवान्को क्षण क्षणमे देखते जाते थे ॥११२॥ जब तक वे भगवान् आंखो से दिखाई देते रहे तब तक वे दोनो भाई भगवान्की ओर लगी हुई अपनी दृष्टिको और उन्ही के पीछे गई हुई अपनी चित्तवृत्तिको लौटानेके लिये समर्थ नही हो सके थे ॥११३॥ जो बार-बार भगवान्की ही कथा कह रहे थे, बारबार उन्हीके गुणोंकी स्तुति कर रहे थे, अपने आपको कृतकृत्य मान रहे थे, जो भगवान्के चरणोके स्पर्शसे पवित्र हुई तथा अनेक लक्षणोंसे सुशोभित और उन्हींके चरणोंसे चिह्नित भूमिको नमस्कार करते हुए बडे प्रेममे देख रहे थे। जिसके यह ऐसा महान् पुण्य उपार्जन करनेवाला भाई हुआ है ऐसा यह कुरुवंशियोका स्वामी राजा सोमप्रभ ही उत्तम भाईसे सहित है, कृतकृत्य है, पुण्यात्मा है और कुशल है तथा जिसकी ऐसी उत्तम बुद्धि है ऐसा यह श्रेयान्सकुमार अनेक कल्याणोंसे सहित है इस प्रकार सामने जाकर पुरवासीजन जिनके गुणोंके समूहका वर्णन कर रहे थे। बडी बडी गलियोमे जहां तहा बिखरे हुए सूर्यके समान तेजस्वी रत्नोंको इकट्ठे करनेवाले साधारण जनसमूहको जो आनन्दित कर रहे थे। देवोंके द्वारा वर्षाये हुए रत्नरूपी पाषाणोंसे जिसका मध्यभाग ऊंचा-नीचा

---

१ कारणात्। २ अनुमतिं कृतवताम्। ३ तत्ज्ञानफलम्। ४ सन्तोष नीत्वा। –नन्द्यैनौ प०, द०। ५ गतौ। ६ अनुगम्य। ७ कुरुवंशश्रेष्ठः। सोमप्रभ इत्यर्थः। ८ किञ्चिदीक्षमाणा- ल०। ९ प्रकृतं कुर्वाणौ। १० स्वकृतार्थताम् ल०, म०। ११ विलोकयन्तौ। विध्यायन्तौ ल०, अ०। १२ शोभनो भ्राता यस्य। १३ पुण्यवान्। १४ कुशलः। १५ प्रस्फोटनप्रमेयानि। 'प्रस्फोटनं शूर्पमस्त्री' इत्यभिधानात्। १६ साधारणजनान्। १७ नानाप्रकार। १८ विस्तृतावकाशम्। १९ अतिक्रम्य। २० प्रशंसिताविरयर्थः।

पुरं परार्ध्यशोभाभिः गतमन्यामिवाकृतिम् । प्राविक्षतां धृतानन्दं[1] प्रेक्ष्यमाणौ[2] कुरुध्वजौ[3] ॥१२०॥
तपोवनमथो भेजे भगवान् कृतपारणः । जगज्जनतया सम्यग् अभिष्टुतमहोदयः ॥१२१॥
अहो "श्रेय इति[4] श्रेयः 'तच्छ्रेयश्चेत्यभूत्तदा । श्रेयो[7] यशोमयं विश्वं सद्दानं हि यशःप्रदम् ॥१२२॥
तदादि[8] तदुपज्ञं[9] तद्दानं जगति पप्रथे । ततो विस्मयमासेदुः भरताद्या नरेश्वराः ॥१२३॥
कथं भर्तुरभिप्रायो विदितोऽनेन मौनिनः । कलयन्निति[10] चित्तेन भरतेशो [11]विसिष्मिये ॥१२४॥
सुराश्च विस्मयन्ते स्म ते सम्भूय समागताः । प्रतीताः कुरुराजं तं पूजयामासुरादरात् ॥१२५॥
ततो भरतराजेन श्रेयानप्रच्छि[12] सादरम् । महादानपते ब्रूहि कथं ज्ञातमिदं त्वया ॥१२६॥
अदृष्टपूर्वं लोकेऽस्मिन् दानं कोऽर्हति[13] वेदितुम् । भगवानिव पूज्योऽसि कुरुराज त्वमद्य नः ॥१२७॥
त्वं दानतीर्थकृच्छ्रेयान् त्वं महापुण्यभागसि । ततस्त्वामिति पृच्छामि यत्सत्यं कथयाद्य मे ॥१२८॥
इत्यसौ तेन सम्पृष्टः श्रेयान् प्रत्यब्रवीदिदम् । दशनांशुकलापेन ज्योत्स्नां तन्वन्निवान्तरे[14] ॥१२९॥
रुजाहरमिवासाद्य सामयः[15] परमौषम् । पिपासितो[16] वा स्वच्छाम्बुकलितं[17] सोत्पलं सरः ॥१३०॥

हो गया है ऐसे राजागणको बड़ी कठिनाईसे उल्लंघन कर भीतर पहुचे हुए अनेक लोग बार-बार जिनकी प्रशसा कर रहे हों और जिन्हे नगर-निवासी जन बड़े आनन्दसे देख रहे थे ऐसे उन दोनों कुरुवशी भाइयोने उत्कृष्ट सजावटसे अन्य आकृतिको प्राप्त हुएके समान सुशोभित होनेवाले नगरमें प्रवेश किया ॥११४–१२०॥

तत्राज्ञेत्यागमः सूक्ष्मविषयः प्रणिगद्यते । [4]दृश्यानुमेयवर्ज्ये हि श्रद्धेयांशे [5]गतिः श्रुतेः[6] ॥१३५॥
श्रुतिः सूनृतमाज्ञाप्तवचो वेदाङ्गमागमः । आम्नायश्चेति पर्यायैः सोऽधिगम्यो मनीषिभिः ॥१३६॥
अनादिनिधनं सूक्ष्मं सद्भू[7]तार्थप्रकाशनम् । पुरुषार्थोपदेशित्वाद् यद्भूतहितमूर्जितम् ॥१३७॥
अजय्यममितं [8]तीर्थ्यैः अनालीढमहोदयम् । महानुभावमर्थावि[9]गाढं गम्भीरशास[10]नम् ॥१३८॥
परं प्रवचनं [11]सूक्तमाप्तोपज्ञमनन्यथा[12] । मन्यमानो मुनिर्ध्यायेद् भावानाज्ञावि[13]भावितान् ॥१३९॥
जैनीं प्रमाणयन्नाज्ञां योगी योगविदां वरः । ध्यायेद्धर्मास्तिकायादीन् भावान् सूक्ष्मान् यथागमम् ॥१४०॥
आज्ञाविचय एष स्याद् अपायविचयः पुनः । ताप[14]त्रयादिजन्माब्धिगतापायविचिन्तनम् ॥१४१॥

शुक्ल ध्यानके भेदसे दो प्रकारका होता है ॥१३२॥ उन दोनोंमेंसे जो ध्यान धर्मसे सहित होता है वह धर्म्य ध्यान कहलाता है। उत्पाद, व्यय और ध्रौव्य इन तीनों सहित जो वस्तुका यथार्थ स्वरूप है वही धर्म कहलाता है । भावार्थ–वस्तुके स्वभावको धर्म कहते हैं और जिस ध्यान में वस्तुके स्वभावका चिन्तवन किया जाता है उसे धर्म्यध्यान कहते हैं ॥१३३॥ आगम की परम्पराको जाननेवाले ऋषियोंने उस धर्म्य ध्यानके आज्ञाविचय, अपायविचय, संस्थान विचय और विपाकविचय इस प्रकार चार भेद माने हैं ॥१३४॥ उनमेंसे अत्यन्त सूक्ष्म पदार्थ को विषय करनेवाला जो आगम है उसे आज्ञा कहते हैं क्योंकि प्रत्यक्ष और अनुमानके विषयसे रहित केवल श्रद्धान करने योग्य पदार्थमें एक आगम की ही गति होती है । भावार्थ–ससार-में कितने ही पदार्थ ऐसे हैं जो न तो प्रत्यक्षसे जाने जा सकते हैं और न अनुमानसे ही । ऐसे सूक्ष्म, अन्तरित और दूरवर्ती पदार्थोंका ज्ञान सिर्फ आगमके द्वारा ही होता है अर्थात् आप्त प्रणीत आगममे ऐसा लिखा है इसलिये ही वे माने जाते हैं ॥१३५॥ श्रुति, सूनृत, आज्ञा, आप्त वचन, वेदाङ्ग, आगम और आम्नाय इन पर्यायवाचक शब्दोसे बुद्धिमान् पुरुष उस आगम को जानते हैं ॥१३६॥ जो आदि और अन्तसे रहित है, सूक्ष्म है, यथार्थ अर्थको प्रकाशित करने वाला है, जो मोक्षरूप पुरुषार्थका उपदेशक होनेके कारण ससारके समस्त जीवोंका हित करने-वाला है, युक्तियोंसे प्रबल है, जो किसी के द्वारा जीता नही जा सकता, जो अपरिमित हे, परवादी लोग जिसके माहात्म्यको छू भी नही सकते है, जो अत्यन्त प्रभावशाली है, जीव अजीव आदि पदार्थोंसे भरा हुआ है, जिसका शासन अतिशय गंभीर है, जो परम उत्कृष्ट है, सूक्ष्म है और आप्तके द्वारा कहा हुआ है ऐसे प्रवचन अर्थात् आगमको सत्यार्थ रूप मानता हुआ मुनि आगम-में कहे हुए पदार्थोंका ध्यान करे ॥१३७–१३९॥ योगके जाननेवालोंमें श्रेष्ठ योगी जिनेन्द्र भगवान्‌की आज्ञाको प्रमाण मानता हुआ धर्मास्तिकाय आदि सूक्ष्म पदार्थोंका आगममें कहे अनुसार ध्यान करे ॥१४०॥ इस प्रकारके ध्यान करनेको आज्ञाविचय नामका धर्म्यध्यान कहते हैं। अब आगे अपायविचय नाम के धर्म्य ध्यानका वर्णन किया जाता है। तीन प्रकारके संताप आदिसे भरे हुए संसाररूपी समुद्रमें जो प्राणी पड़े हुए हैं उनके अपायका चिन्तवन करना सो अपायविचय नामका धर्म्यध्यान है। भावार्थ–यह संसाररूपी समुद्र मानसिक,

---

१ ध्यानद्वयं । २ उत्पादव्ययध्रौव्यस्वरूम् । ३ परमागमवेदिभिः । ४ प्रत्यक्षानुमानरहिते । ५ अवगमनम् । ६ आगमस्य । ७ सत्यस्वरूप । ८ परवादिभिः । ९ तलस्पर्शरहितम् । १० आज्ञा । ११ सूक्ष्म– प०, ल०, म०, द०, इ० । १२ विपरीताभावेन । १३ आगमेन ज्ञातान् । १४ जाति-जरामरणरूप, अथवा रागद्वेषमोहरूप, अथवा आधिदैविकं दैवमधिकृत्य प्रवृत्तम्, आधिभौतिकं भूतग्रह-मधिकृत्य प्रवृत्तम्, आध्यात्मिकरूपम् आत्मानमधिकृत्य प्रवृत्तम् ।

तदपा[1]यप्रतीकारचि[2]न्त्रोपायानुचिन्तनम् । अत्रैवान्तर्गतं ध्ये[3]यम् अनुप्रेक्षादिलक्षणम् ॥१४२॥
शुभाशुभविभक्तानां कर्मणां परिपाकतः[4] । भवावर्तस्य वैचित्र्यम् अभि[5]सन्दधतो मुनेः ॥१४३॥
विपाकविचयं धर्म्यम् आमनन्ति कृता[6]गमाः । विपाकश्च द्विधाम्नातः कर्मणामाप्तसू[7]क्तिषु ॥१४४॥
यथाकालमुपायाच्च फलप[8]क्तिर्वनस्पतेः । यथा तथैव कर्मापि फलं दत्ते शुभाशुभम् ॥१४५॥
मूलोत्तरप्रकृत्यादिबन्धस[9]त्त्वाद्युपाश्रयः । कर्मणामुदयश्चित्रः प्राप्य द्रव्या[10]दिसन्निधिम् ॥१४६॥
[11]यतश्च तद्विपा[12]कज्ञः तदपा[13]याय चेष्टते । [14]ततो ध्येयमिदं ध्यानं मुक्त्युपायो मुमुक्षुभिः ॥१४७॥
संस्थानविचयं प्राहुः लोकाकारानुचिन्तनम् । तदन्तर्भूतजीवादितत्त्वान् [15]वीक्षणलक्षि[16]तम् ॥१४८॥
द्वीपाब्धिवलयानद्रीन् सरितश्च सरांसि च । विमानभवनव्यन्तरावासनरकक्षितीः ॥१४९॥
त्रिजगत्सन्निवेशेन सममेतान्यथागमम् । भावान् मुनिरनुध्यायेत् संस्थानविच[17]योपगः ॥१५०॥
जीवभेदांश्च तत्र[18]स्थान् ध्यायेन्मुक्तेतरात्मकान् । ज्ञत्वकर्तृत्वभोक्तृत्वद्रष्टृत्वादींश्च [19]तद्गुणान् ॥१५१॥

वाचनिक, कायिक अथवा जन्म-जरा-मरणसे होनेवाले, तीन प्रकारके संतापोंसे भरा हुआ है। इसमें पड़े हुए जीव निरन्तर दुःख भोगते रहते हैं। उनके दुःखका बार-बार चिन्तवन करना सो अपायविचय नामका धर्म्यध्यान है ॥१४१॥ अथवा उन अपायों (दुःखों) के दूर करनेकी चिन्तासे उन्हें दूर करनेवाले अनेक उपायोंका चिन्तवन करना भी अपायविचय कहलाता है। बारह अनुप्रेक्षा तथा दश धर्म आदिका चिन्तवन करना इसी अपायविचय नामके धर्म्य ध्यानमें शामिल समझना चाहिये ॥१४२॥ शुभ और अशुभ भेदोंमें विभक्त हुए कर्मोंके उदय-से संसाररूपी आवर्तकी विचित्रताका चिन्तवन करनेवाले मुनिके जो ध्यान होता है उसे आगमके जाननेवाले गणधरादि देव विपाकविचय नामका धर्म्यध्यान मानते हैं। जैन शास्त्रोंमें कर्मोंका उदय दो प्रकारका माना गया है। जिस प्रकार किसी वृक्षके फल एक तो समय पाकर अपने आप पक जाते हैं और दूसरे किन्हीं कृत्रिम उपायोंसे पकाये जाते हैं उसी प्रकार कर्म भी अपने शुभ अथवा अशुभ फल देते हैं अर्थात् एक तो स्थिति पूर्ण होनेपर स्वयं फल देते हैं और दूसरे तपश्चरण आदिके द्वारा स्थिति पूर्ण होनेसे पहले ही अपना फल देने लगते हैं ॥१४३–१४५॥ मूल और उत्तर प्रकृतियोंके बन्ध तथा सत्ता आदिका आश्रय लेकर द्रव्य क्षेत्र काल भावके निमित्तसे कर्मोंका उदय अनेक प्रकारका होता है ॥१४६॥ क्योंकि कर्मोंके विपाक (उदय) को जाननेवाला मुनि उन्हें नष्ट करनेके लिये प्रयत्न करता है इसलिये मोक्षाभिलाषी मुनियोंको मोक्षके उपायभूत इस विपाकविचय नामके धर्म्य ध्यानका अवश्य ही चिन्तवन करना चाहिये ॥१४७॥ लोकके आकारका बार-बार चिन्तवन करना तथा लोकके अन्तर्गत रहने-वाले जीव अजीव आदि तत्त्वोंका विचार करना सो संस्थान विचय नामका धर्म्य ध्यान है॥१४८॥ संस्थानविचय धर्म्य ध्यानको प्राप्त हुआ मुनि तीनों लोकोंकी रचनाके साथ-साथ द्वीप, समुद्र, पर्वत, नदी, सरोवर, विमानवासी, भवनवासी तथा व्यन्तरोंके रहनेके स्थान और नरकोंकी भूमियाँ आदि पदार्थोंका भी शास्त्रानुसार चिन्तवन करे ॥१४९–५०॥ इसके सिवाय उस लोकमें रहनेवाले संसारी और मुक्त ऐसे दो प्रकार वाले जीवोंके भेदोंका जानना, कर्ता-

---

१ तापत्रयाद्यपायप्रतीकार। २ चिन्तो– ल०, म०, इ०, अ०, प०, स०। ३ ज्ञेयम्। ४ संजातस्य इति शेषः। ५ ध्यायत.। अपि ल०, म०। ६ सम्पूर्णागमाः। ७ परमागमेषु। ८ पाकः। ९ सत्ताद्युपा– इ०। १० द्रव्यक्षेत्रकालभाव–। ११ यस्मात् कारणात्। १२ कर्मणा-मुदयवित् पुमान्। १३ कर्मापायाय। १४ ततः कारणात्। १५ विचार–। १६ –लक्षणम् ल०, म०, इ०, अ०, स०। १७ संस्थानविचयज्ञः। १८ तत्र त्रिजगति भवान्। १९ जीवगुणान्। यद्गुणान् ल०।

तेषां स्वकृतकर्मानुभावोत्थमतिदुस्तरम् । भवाब्धिं व्यसनावर्तं दोषयादः[1]कुलाकुलम् ॥१५२॥
सज्ज्ञाननावा सन्तार्यम् अतार्यं ग्रन्थिकात्मभिः[2] । अपारमतिगम्भीरं ध्यायेदध्यात्मविद् यतिः ॥१५३॥
किमत्र बहुनोक्तेन सर्वोऽप्यागमविस्तरः । [3]नयभङ्गशताकीर्णो ध्येयोऽध्यात्मविशुद्धये ॥१५४॥
[4]तदप्रमत्ततालम्बं स्थितिमान्तर्मुहूर्तिकीम् । दधानमप्रमत्तेषु परां[5] कोटिमधिष्ठितम् ॥१५५॥
सद्दृष्टिषु यथाम्नायं शेषेष्वपि[6] कृतस्थिति । प्रकृष्टशुद्धिमल्लेश्यात्रयोपोद्बल[7]बृंहितम् ॥१५६॥
क्षायोपशमिकं भावं स्वसात्कृत्य विजृम्भितम् । महोदर्कं [8]महाप्रज्ञैः महर्षिभिरुपासितम् ॥१५७॥
[9]वस्तुधर्मानुयायित्वात् प्राप्तान्वर्थनिरुक्तिकम् । धर्म्यं ध्यानमनुध्येयं यथोक्तध्येयविस्तरम् ॥१५८॥
प्रसन्नचित्तता धर्मसंवेगः शुभयोगता[10] । सुश्रुतत्वं समाधानम् [11]आज्ञाधिगमजा रुचिः ॥१५९॥
भवन्त्येतानि लिङ्गानि धर्म्यस्यान्तर्गतानि वै । सानुप्रेक्षाश्च पूर्वोक्ता विविधाः शुभभावनाः ॥१६०॥

पना, भोक्तापना और दर्शन आदि जीवोके गुणोका भी ध्यान करे ॥१५१॥ अध्यात्मको जाननेवाला मुनि इस ससाररूपी समुद्रका भी ध्यान करे जो कि जीवोके स्वय किये हुए कर्मो के माहात्म्यसे उत्पन्न हुआ है, अत्यन्त दुस्तर है, व्यसनरूपी भवरोसे भरा हुआ है, दोषरूपी जल-जन्तुओसे व्याप्त है, सम्यग्ज्ञानरूपी नावसे तैरनेके योग्य है, परिग्रही साधु जिसे कभी नही तैर सकते, जिसका पार नही है और जो अतिशय गम्भीर है ॥१५२–१५३॥ अथवा इस विषय में अधिक कहनेसे क्या लाभ है ? नयोंके सैकडों भगोसे भरा हुआ जो कुछ आगमका विस्तार है वह सब अन्तरात्माकी शुद्धिके लिये ध्यान करने योग्य है ॥१५४॥ यह धर्म्य ध्यान अप्रमत्त अवस्थाका आलबन कर अन्तर्मुहूर्त तक स्थित रहता है और प्रमादरहित (सप्तम गुण स्थान-वर्ती) जीवोमे ही अतिशय उत्कृष्टताको प्राप्त होता है ॥१५५॥ इसके सिवाय अतिशय शुद्धि को धारण करनेवाला और पीत, पद्म तथा शुक्ल ऐसी तीन शुभ लेश्याओके बलसे वृद्धिको प्राप्त हुआ यह धर्म्य ध्यान शास्त्रानुसार सम्यग्दर्शनसे सहित चौथे गुणस्थानमे तथा शेषके पांचवे और छठवे गुणस्थानमे भी होता है । भावार्थ–इन गुणस्थानोंमे धर्म्य ध्यान हीनाधिक भावसे रहता है। धर्म्यध्यान धारण करनेके लिये कमसे कम सम्यग्दृष्टि अवश्य होना चाहिये क्योंकि सम्यग्दर्शनके बिना पदार्थोके यथार्थ स्वरूपका श्रद्धान और निर्णय नही होता । मन्दकषायी मिथ्यादृष्टि जीवोके जो ध्यान होता है उसे शुभ भावना कहते है ॥१५६॥ यह धर्म्य ध्यान क्षायोपशमिक भावोको स्वाधीन कर बढता है । इसका फल भी बहुत उत्तम होता है और अतिशय बुद्धिमान् महर्षि लोग भी इसे धारण करते है ॥१५७॥ वस्तुओंके धर्मका अनुयायी होनेके कारण जिसे धर्म्य ध्यान ऐसा सार्थक नाम प्राप्त हुआ है और जिसमे ध्यान करने योग्य पदार्थोका ऊपर विस्तारसे वर्णन किया जा चुका है ऐसे इस धर्म्यध्यानका बार बार चिन्तवन करना चाहिये ॥१५८॥ प्रसन्नचित्त रहना, धर्मसे प्रेम करना, शुभ योग रखना, उत्तम शास्त्रोंका अभ्यास करना, चित्त स्थिर रखना और आज्ञा (शास्त्रका कथन) तथा स्वकीय ज्ञानसे एक प्रकारकी विशेष रुचि (प्रीति अथवा श्रद्धा) उत्पन्न होना ये धर्मध्यान के बाह्य चिह्न है और अनुप्रेक्षाए तथा पहले कही हुई अनेक प्रकारकी शुभ भावनाए उसके

---

१ जलजन्तुसमूहः । २ परिग्रहवद्भिः । ३ नयभेद– । ४ धर्म्यध्यानम् । ५ परमप्रकर्षम् । ६ असंयतदेशसयतप्रमत्तेषु । ७ सहायविजृम्भितम् । ८ महाप्राज्ञैः– ल०, म०, द०, इ०, प० । ९ वस्तुयथास्वरूप । १० शुभपरिणाम । ११ आज्ञा नान्यथावादिनो जिना इति श्रद्धानम् । अधिगमः प्रवचनपरिज्ञानम् ताभ्या जाता रुचि ।

बाह्यञ्च लिङ्गमङ्गानां सन्निवेशः[1] पुरोदितः । प्रसन्नवक्त्रता सौम्या दृष्टिश्चेत्यादि लक्ष्यताम् ॥१६१॥
फलं ध्यानवरस्यास्य विपुला निर्जरैनसाम् । शुभकर्मोदयोद्भूतं सुखञ्च विबुधेशिनाम् ॥१६२॥
स्वर्गापवर्गसम्प्राप्तिं[2] फलमस्य प्रचक्षते[3] । साक्षात्स्वर्गपरिप्राप्तिः पारम्पर्यात् परम्पदम् ॥१६३॥
ध्यानेऽप्युपरते[4] धीमान् अभीक्ष्णं[5] भावयेन्मुनिः । सानुप्रेक्षाः शुभोदर्का भवाभावाय भावनाः॥१६४॥
इत्युक्तलक्षणं धर्म्यं मगधाधीश, निश्चिनु । शुक्लध्यानमितो वक्ष्ये साक्षान्मुक्त्य[6]ङ्गमङ्गिनाम् ॥१६५॥
कषायमलविश्लेषात् शुक्लशब्दाभिधेयताम् । [7]उपेयिवदिदं ध्यानं सान्तर्भेदं[8] निबोध मे[9] ॥१६६॥
शुक्लं परमशुक्लञ्चेत्याम्नाये[10] तद्द्विधोदितम् । छद्मस्थस्वामिकं पूर्वं परं[11] केवलिनां मतम् ॥१६७॥
द्वेधाद्यं[12] स्यात् पृथक्त्वादि[13] वीचारान्तवितर्कणम् । [14]तथैकत्वाद्यवीचारपदान्तञ्च वितर्कणम् ॥१६८॥
इत्याद्यस्य भिदे[15] स्याताम् अन्वर्थां [16]श्रुतिमाश्रिते । तदर्थव्यक्तये चैतत् तन्नामद्वयनिर्वचः ॥१६९॥
पृथक्त्वेन वितर्कस्य वीचारो यत्र तद्विदुः । सवितर्कं सवीचारं पृथक्त्वादिपदाह्वयम् ॥१७०॥

अन्तरङ्ग चिह्न हैं ॥१५९–१६०॥ पहले कहा हुआ अङ्गोंका सन्निवेश होना अर्थात् पहले जिन पर्यङ्क आदि आसनोंका वर्णन कर चुके है उन आसनोंको धारण करना, मुखकी प्रसन्नता होना और दृष्टिका सौम्य होना आदि सब भी धर्म्यध्यान के बाह्य चिह्न समझना चाहिये ॥१६१॥ अशुभ कर्मोंकी अधिक निर्जरा होना और शुभ कर्मोके उदयसे उत्पन्न हुआ इन्द्र आदि का सुख प्राप्त होना यह सब इस उत्तम धर्म्य ध्यानका फल है ॥१६२॥ अथवा स्वर्ग और मोक्षकी प्राप्ति होना इस धर्म्य ध्यानका फल कहा जाता है। इस धर्म्य ध्यानसे स्वर्गकी प्राप्ति तो साक्षात् होती है परन्तु परम पद अर्थात् मोक्षकी प्राप्ति परम्परासे होती है ॥१६३॥ ध्यान छूट जानेपर भी बुद्धिमान् मुनिको चाहिये कि वह संसारका अभाव करनेके लिये अनुप्रेक्षाओं सहित शुभ फल देनेवाली उत्तम उत्तम भावनाओंका चिन्तवन करे ॥१६४॥ गौतम स्वामी राजा श्रेणिकसे कहते हैं कि मगधाधीश, इस प्रकार जिसका लक्षण कहा जा चुका है ऐसे इस धर्म्यध्यानका तू निश्चय कर–उसपर विश्वास ला ! अब आगे शुक्ल ध्यानका निरूपण करूंगा जो कि जीवोंके मोक्ष प्राप्त होनेका साक्षात् कारण है ॥१६५॥ कषायरूपी मलके नष्ट होने से जो शुक्ल ऐसे नामको प्राप्त हुआ है ऐसे इस शुक्ल ध्यानका अवान्तर भेदोंसे सहित वर्णन करता हूँ सो तू उसे मुझसे अच्छी तरह समझ ले ॥१६६॥ वह शुक्ल ध्यान शुक्ल और परम शुक्लके भेदसे आगममे दो प्रकारका कहा गया है, उनमेसे पहला शुक्ल ध्यान तो छद्मस्थ मुनियों-के होता है और दूसरा परम शुक्ल ध्यान केवली भगवान् (अरहन्तदेव) के होता है ॥१६७॥ पहले शुक्ल ध्यानके दो भेद है, एक पृथक्त्ववितर्कवीचार और दूसरा एकत्ववितर्कवीचार ॥१६८॥ इस प्रकार पहले शुक्ल ध्यानके जो ये दो भेद है, वे सार्थक नाम वाले है। इनका अर्थ स्पष्ट करनेके लिये दोनों नामोंकी निरुक्ति (व्युत्पत्ति-शब्दार्थ) इस प्रकार समझना चाहिये ॥१६९॥ जिस ध्यानमे वितर्क अर्थात् शास्त्रके पदोंका पृथक् पृथक् रूपसे वीचार अर्थात् संक्रमण होता रहे उसे पृथक्त्ववितर्कवीचार नामका शुक्ल ध्यान कहते हैं। भावार्थ– जिसमें अर्थ व्यंजन और योगोंका पृथक् पृथक् संक्रमण होता रहे अर्थात् अर्थको छोड़कर व्यंजन (शब्द) का और व्यंजनको छोड़कर अर्थका चिन्तवन होने लगे अथवा इसी प्रकार मन, वचन और काय इन तीनों योगोंका परिवर्तन होता रहे उसे पृथक्त्ववितर्कवीचार कहते

---

१ पल्यङ्कादि। २ सम्प्राप्तिः इ०। ३ प्रचक्ष्यते इ०। ४ सम्पूर्णे सति। ५ मुहुर्मुहुः। ६ मोक्षकारणम्। ७ प्राप्तम्। ८ मध्ये भेदम्। ९ निबोध जानीहि, मे मम सम्बन्धि ध्यानम्। निबोधये इति पाठे ज्ञापयामि। १० परमागमे। ११ शुक्लम्। १२ शुक्लम्। १३ पृथक्त्ववितर्कवीचारम्। १४ एकत्ववितर्कावीचारम्। १५ भेदौ। १६ संज्ञाम्।

एकत्वेन वितर्कस्य स्यादत्राविचरिष्णुता[1] । सवितर्कमवीचारम् एकत्वादिपदाभिधाम् ॥१७१॥
पृथक्त्वं विद्धि नानात्वं वितर्कः श्रुतमुच्यते । अर्थव्यञ्जन[2]योगानां [3]वीचारः सङ्क्रमो मतः ॥१७२॥
अर्थादर्थान्तरं गच्छन् व्यञ्जनाद्[4] व्यञ्जनान्तरम् । योगाद्योगान्तरं गच्छन् ध्यायतीदं वशी मुनिः ॥१७३॥
[5]त्रियोगः [6]पूर्वविद् यस्माद् ध्यायत्येन[7]न्मुनीश्वरः । सवितर्कं सवीचारमतः स्याच्छुक्लमादिमम् ॥१७४॥
ध्येयमस्य श्रुतस्कन्धवार्धेर्वागर्थविस्तरः । फलं स्यान्मोहनीयस्य प्रक्षयः प्रशमोपि वा ॥१७५॥
इदमत्र तु तात्पर्यं श्रुतस्कन्धमहार्णवात् । अर्थमेकं समादाय ध्यायन्नर्थान्तरं व्रजेत् ॥१७६॥
शब्दाच्छब्दान्तरं [8]यायाद् योगं योगान्तरादपि । सवीचारमिदं तस्मात् सवितर्कञ्च लक्ष्यते ॥१७७॥
[9]वागर्थरत्नसम्पूर्णं नय[10]भङ्गतरङ्गकम् । प्रसृत[11]ध्यानगम्भीरं [12]पदवाक्यमहाजलम् ॥१७८॥
[13]उत्पादादित्रयोद्वेलं सप्तभङ्गीबृहद्ध्वनिम् । पूर्वपक्षवशायातमतयादः[14]कुलाकुलम् ॥१७९॥

है ॥१७०॥ जिस ध्यानमे वितर्कके एकरूप होनेके कारण वीचार नही होता अर्थात् जिसमे अर्थ व्यंजन और योगोंका सक्रमण नही होता उसे एकत्ववितर्कवीचार नामका शुक्ल ध्यान कहते है ॥१७१॥ अनेक प्रकारताको पृथक्त्व समझो, श्रुत अर्थात् शास्त्रको वितर्क कहते हैं और अर्थ व्यजन तथा योगोंका सक्रमण (परिवर्तन) वीचार माना गया है ॥१७२॥ इन्द्रियोंको वश करनेवाला मुनि, एक अर्थसे दूसरे अर्थको, एक शब्दसे दूसरे शब्दको और एक योगसे दूसरे योगको प्राप्त होता हुआ इस पहले पृथक्त्ववितर्कवीचार नामके शुक्ल ध्यानका चिन्तवन करता है ॥१७३॥ क्योकि मन वचन काय इन तीनों योगोंको धारण करनेवाले और चौदह पूर्वोके जाननेवाले मुनिराज ही इस पहले शुक्ल ध्यानका चिन्तवन करते है इसलिये ही यह पहला शुक्ल ध्यान सवितर्क और सवीचार कहा जाता है ॥१७४॥ श्रुतस्कन्धरूपी समुद्रके शब्द और अर्थोका जितना विस्तार है वह सब इस प्रथम शुक्ल ध्यानका ध्येय अर्थात् ध्यान करने योग्य विषय हैं और मोहनीय कर्मका क्षय अथवा उपशम होना इसका फल है । भावार्थ—यह शुक्ल ध्यान उपशम श्रेणी और क्षपक श्रेणी दोनों प्रकारकी श्रेणियोमे होता है । उपशमश्रेणी वाला मुनि इस ध्यानके प्रभावसे मोहनीय कर्मका उपशम करता है और क्षपक श्रेणीमें आरूढ हुआ मुनि इस ध्यानके प्रतापसे मोहनीय कर्मका क्षय करता है इसलिये सामान्य रूपसे उपशम और क्षय दोनों ही इस ध्यानके फल कहे गये है ॥१७५॥ यहा ऐसा तात्पर्य समझना चाहिये कि ध्यान करनेवाला मुनि श्रुतस्कन्धरूपी महासमुद्रसे कोई एक पदार्थ लेकर उसका ध्यान करता हुआ किसी दूसरे पदार्थको प्राप्त हो जाता है अर्थात् पहले ग्रहण किये हुए पदार्थको छोडकर दूसरे पदार्थका ध्यान करने लगता है । एक शब्दसे दूसरे शब्दको प्राप्त हो जाता है और इसी प्रकार एक योगसे दूसरे योगको प्राप्त हो जाता है इसीलिये इस ध्यानको सवीचार और सवितर्क कहते है ॥१७६–१७७॥ जो शब्द और अर्थरूपी रत्नोसे भरा हुआ है, जिसमे अनेक नयभंगरूपी तरंगें उठ रही है, जो विस्तृत ध्यानसे गभीर है, जो पद और वाक्यरूपी अगाध जलसे सहित है, जो उत्पाद व्यय और ध्रौव्य के द्वारा उद्वेल (ज्वार-भाटाओसे सहित) हो रहा है, स्यात् अस्ति, स्यात् नास्ति, आदि सप्त भंग ही जिसके विशाल शब्द (गर्जना) है, जो पूर्वपक्ष

---

१ अविचारशीलता । २ व्यक्ति । ३ मनोवाक्कायकर्म । ४ शब्दाच्छब्दान्तरम् । ५ मनोवाक्कायकर्मवान् । ६ पूर्वश्रुतवेदी । ७ शुक्लध्यानम् । –त्येतन्मुनीश्वराः द० । ८ गच्छेत् । ९ शब्द । १० नयविकल्प । ११ ऋषिगणमुखप्रसृतशब्देन गम्भीरम् । प्रसृतध्यान– ल०, म० । १२ 'वर्णसमुदाय. पदम्' । 'पदकदम्बक वाक्यम्' । १३ उत्पादव्ययध्रौव्यत्रय– । १४ बौद्धादिमत जलचरसमूह ।

कृता[1]वतारमुद्बोधयानपात्रैर्महर्धिभिः । गणाधीशमहा[2]सार्थवाहैश्चारित्रकेतनैः ॥१८०॥
[3]नयोपनयसम्पातमहावातविघूर्णितम् । रत्नत्रयमयैर्द्वी[4]पैः अवगाढमनेकधा ॥१८१॥
श्रुतस्कन्धमहासिन्धुम् अवगाह्य महामुनिः । ध्यायेत् पृथक्त्वसत्तर्कवीचारं ध्यानमग्रिमम्[5] ॥१८२॥
प्रशान्तक्षीणमोहेषु श्रेण्योः शेषगुणेषु[6] च । यथाम्नायमिदं ध्यानम् आमनन्ति मनीषिणः ॥१८३॥
द्वितीयमाद्यवज्ज्ञेयं विशेषस्त्वेकयोगिनः[7] । प्रक्षीणमोहनीयस्य [8]पूर्वज्ञस्यामितद्युतेः[9] ॥१८४॥
सवितर्कमवीचारम् एकत्वं[10] ध्यानमर्जितम् । ध्यायत्यस्तकषायोऽसौ घातिकर्माणि शातयन्[11] ॥१८५॥
फलमस्य भवेद् घातित्रितयप्रक्षयोद्भवम् । कैवल्यं प्रमिताशेषपदार्थं ज्योतिरक्षणम् ॥१८६॥
ततः पूर्वविदामाद्ये शुक्ले श्रेण्योर्यथायथम् । विज्ञेये त्र्येकयोगानां[12] [13]यथोक्तफलयोगिनी ॥१८७॥

करनेके लिये आये हुए अनेक परमतरूपी जलजन्तुओंसे भरा हुआ है, बड़ी-बडी सिद्धियोंके धारण करनेवाले गणधरदेवरूपी मुख्य व्यापारियोंने चारित्ररूपी पताकाओंसे सुशोभित सम्यग्ज्ञानरूपी जहाजोंके द्वारा जिसमें अवतरण किया है, जो नय और उपनयोंके वर्णनरूप महावायुसे क्षोभित हो रहा है और जो रत्नत्रयरूपी अनेक प्रकारके द्वीपोंसे भरा हुआ है, ऐसे श्रुतस्कन्धरूपी महासागरमें अवगाहन कर महामुनि पृथक्त्ववितर्कवीचार नामके पहले शुक्ल-ध्यानका चिन्तवन करे। भावार्थ–ग्यारह अंग और चौदह पूर्वके जाननेवाले मुनिराज ही प्रथम शुक्लध्यानको धारण कर सकते हैं ॥१७८–१८२॥ यह ध्यान प्रशान्तमोह अर्थात् ग्यारहवें गुणस्थान, क्षीणमोह अर्थात् बारहवें गुणस्थान और उपशमक तथा क्षपक इन दोनों प्रकारकी श्रेणियोंके शेष आठवें, नौवें तथा दसवें गुणस्थानमें भी हीनाधिक रूपसे होता है ऐसा बुद्धिमान् महर्षि लोग मानते हैं ॥१८३॥

दूसरा एकत्ववितर्क नामका शुक्लध्यान भी पहले शुक्लध्यानके समान ही जानना चाहिये किन्तु विशेषता इतनी है कि जिसका मोहनीय कर्म नष्ट हो गया हो, जो पूर्वोका जानने-वाला हो, जिसका आत्मतेज अपरिमित हो और जो तीन योगोंमेंसे किसी एक योगका धारण करनेवाला हो ऐसे महामुनिका ही यह दूसरा शुक्लध्यान होता है ॥१८४॥ जिसकी कषाय नष्ट हो चुकी है और जो घातिया कर्मोको नष्ट कर रहा है ऐसा मुनि सवितर्क अर्थात् श्रुतज्ञान सहित और अवीचार अर्थात् अर्थ व्यंजन तथा योगोंके संक्रमणसे रहित दूसरे एकत्ववितर्क नामके बलिष्ठ शुक्लध्यानका चिन्तवन करता है ॥१८५॥ ज्ञानावरण, दर्शनावरण और अन्तराय इन तीन घातिया कर्मोके क्षयसे उत्पन्न होनेवाला तथा समस्त पदार्थोको जानने वाला अविनाशीक ज्योतिःस्वरूप केवल ज्ञानका उत्पन्न होना ही इस शुक्ल ध्यानका फल है ॥१८६॥ इस प्रकार ऊपर कहे अनुसार फलको देनेवाले पहलेके दोनो शुक्ल ध्यान ग्यारह अङ्ग तथा चौदह पूर्वके जाननेवाले और तीन तथा तीनमेंसे किसी एक योगका अवलम्बन करनेवाले मुनियोंके दोनों प्रकारकी श्रेणियोंमें यथायोग्य रूपसे होते हैं। भावार्थ–पहला शुक्ल ध्यान उपशम अथवा क्षपक दोनों ही श्रेणियोमें होता है परन्तु दूसरा शुक्ल ध्यान क्षीण-मोह नामक बारहवें गुणस्थानमें ही होता है। पहला शुक्ल ध्यान तीनो योगोंको धारण करने वालेके होता है परन्तु दूसरा शुक्लध्यान एक योगको धारण करनेवालेके ही होता है, भले ही

१ अवतरणम्। २ महासार्थवाहो बृहच्छ्रेष्ठी एषा महासार्थवाहास्तैः। ३ नयद्रव्यार्थिकपर्या-पार्थिक। उपनय नैगमादि। सम्पात सम्प्राप्ति। ४ बडवाग्निनिवासकुण्डैः। ५ प्रथमम्। ६ अपूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्परायेषु। ७ मनोवाक्कायेष्वेकतमयोगतः। ८ पूर्वश्रुतवेदिनः। ९ उपमारहिततेजस.। १० –मेकत्वध्यान– अ०, प०, स०, इ०, ल०, म०। ११ निपातयन्। १२ त्रियोगानामेकयोगानाम। पसामित्यर्थः। १३ पर्वोक्तफलस्य योगो ययोस्ते।

[1]स्नातकः कर्मवैकल्यात् कैवल्यं पदमापिवान् । स्वामी परमशुक्लस्य द्विधा भेदमुपेयुषः ॥१८८॥
स हि योगनिरोधार्थम् उद्यतः केवली जिनः । समुद्घातविधिं पूर्वम् आविः कुर्यान्निसर्गतः ॥१८९॥
दण्डमुच्चैः कवाटञ्च प्रतरं लोकपूरणम् । चतुर्भिः समयैः कुर्वंल्लोकमापूर्य तिष्ठति ॥१९०॥
तदा सर्वगतः सार्वः सर्ववित् पूरको भवेत् । [2]तदन्ते रे[3]चकावस्थाम् अधितिष्ठन्महीयते ॥१९१॥
जगदापूर्य विश्वज्ञः समयात् प्रतरं श्रितः । ततः कवा[4]टदण्डञ्च क्रमेणैवोपसंहरन् ॥१९२॥
तत्राघातिस्थितेर्भागान् असङ्ख्येयान्निहन्त्यसौ । अनुभागस्य चानन्तान् भागानशुभकर्मणाम् ॥१९३॥
पुनरन्तर्मुहूर्त्तेन निरुन्धन् योगमास्रवम् । कृत्वा वाङ्मन[5]से सूक्ष्मे [6]काययोगव्यपाश्रयात् ॥१९४॥
सूक्ष्मीकृत्य पुनः काययोगञ्च तदु[7]पाश्रयम् । ध्यायेत् सूक्ष्मक्रियं ध्यानं [8]प्रतिपातपराङ्मुखम् ॥१९५॥
ततो निरुद्धयोगः [9]सन्नयोगी विगतास्रवः । समुच्छिन्नक्रियं ध्यानम् अनिवर्ति[10] तदा भजेत् ॥१९६॥
अन्तर्मुहूर्तमातन्वन् तद्ध्यानमतिनिर्मलम् । विधु[11]ताशेषकर्मांशो जिनो नि[12]र्वात्यनन्तरम् ॥१९७॥

वह एक योग तीन योगोंमेसे कोई भी हो ॥१८७॥ घातिया कर्मोके नष्ट होनेसे जो उत्कृष्ट केवलज्ञानको प्राप्त हुआ है ऐसा स्नातक मुनि ही दोनों प्रकारके परम शुक्ल ध्यानोका स्वामी होता है। भावार्थ–परम शुक्लध्यान केवली भगवान्के ही होता है ॥१८८॥ वे केवलज्ञानी जिनेन्द्रदेव जब योगोका निरोध करनेके लिये तत्पर होते है तव वे उसके पहले स्वभाव से ही समुद्‌घात की विधि प्रकट करते है ॥१८९॥ पहले समयमे उनके आत्माके प्रदेश चौदह राजू ऊँचे दण्डके आकार होते है, दूसरे समयमे किवाडके आकार होते है, तीसरे समयमे प्रतर रूप होते है और चौथे समयमे समस्त लोकमे भर जाते है इस प्रकार वे चार समयमे समस्त लोकाकाशको व्याप्त कर स्थित होते है ॥१९०॥ उस समय समस्त लोकमे व्याप्त हुए, सबका हित करनेवाले और सब पदार्थोंको जाननेवाले वे केवली जिनेन्द्र पूरक कहलाते है उसके बाद वे रेचक अवस्थाको प्राप्त होते है अर्थात् आत्माके प्रदेशोंका सकोच करते है और यह सब करते हुए वे अतिशय पूज्य गिने जाते है ॥१९१॥ वे सर्वज्ञ भगवान् समस्त लोकको पूर्ण कर उसके एक एक समय बाद ही प्रतर अवस्थाको और फिर क्रमसे एक-एक समय बाद सकोच करते हुए कपाट तथा दण्ड अवस्थाको प्राप्त होकर स्वशरीरमे प्रविष्ट हो जाते है ॥१९२॥ उस समय वे केवली भगवान् अघातिया कर्मोकी स्थितिके असख्यात भागोको नष्ट कर देते है और इसी प्रकार अशुभ कर्मोके अनुभाग अर्थात् फल देनकी शक्तिके भी अनन्त भाग नष्ट कर देते है ॥१९३॥ तदनन्तर अन्तर्मुहूर्तमे योगरूपी आस्रवका निरोध करते हुए काय योग के आश्रयसे वचनयोग और मनोयोगको सूक्ष्म करते है और फिर काययोगको भी सूक्ष्मकर उसके आश्रयसे होनेवाले सूक्ष्म क्रियापाति नामक तीसरे शुक्लध्यानका चिन्तवन करते हैं ॥१९४–१९५॥ तदनन्तर जिनके समस्त योगोंका बिलकुल ही निरोध हो गया है ऐसे वे योगिराज हरप्रकारके आस्रवोंसे रहित होकर समुच्छिन्नक्रियानिवर्ति नामके चौथे शुक्लध्यानको प्राप्त होते है ॥१९६॥ जिनेन्द्र भगवान् उस अतिशय निर्मल चाथे शुक्लध्यानको अन्तर्मुहूर्ततक धारण करते है और फिर समस्त कर्मोके अशोंको नष्ट कर निर्वाण अवस्थाको प्राप्त

१ सम्पूर्णज्ञानी । २ लोकपूरणानन्तरे । ३ उपसहारावस्थाम् । ४ कवाट दण्डञ्च प०, द०, ल०, म०, इ०, स० । कपाटदण्डञ्च अ० । ५ वाक् च मनश्च वाङमनसे ते । (चिन्त्योऽय प्रयोगः) वाङमनसी ल०, म० । ६ बादरकाययोगाश्रयात् । तमाश्रित्य इत्यर्थः । ७ वाङमनससूक्ष्मीकरणे आश्रयभूतं बादरकाययोगमित्यर्थः । ८ स्वकालपर्य्यन्तविनाशरहितम् । ९ –योग· योगी स विगतास्रवः ल०, म० । १० नाशरहितम् । ११ विधूता ल०, म० । १२ मुक्तो भवति ।

त्रयोदशास्य प्रक्षीणाः कर्मांशाश्चरमे[1] क्षणे । द्वासप्ततिरुपान्ते[2] स्युः अयोगपरमेष्ठिनः ॥१९८॥
निर्लेपो निष्कलः शुद्धो निर्व्याबाधो निरामयः । सूक्ष्मोऽव्यक्तस्तथाव्यक्तो मुक्तो लोकान्तमावसन् ॥१९९॥
[3]ऊर्ध्वव्रज्यास्वभावत्वात् सम[4]येनैव नीरजाः । लोकान्तं प्राप्य शुद्धात्मा सिद्धश्चूडामणीयते ॥२००॥
तत्र कर्ममलापायात् शुद्धिरात्यन्तिकी मता । शरीरापायतोऽनन्तं भवेत् सुखमतीन्द्रियम् ॥२०१॥
निष्कर्मा विधुताशेषसांसारिकसुखासुखः । चरमाङ्गात् किमप्यूनपरिमाणस्तदाकृतिः[5] ॥२०२॥
अमूर्तोऽप्ययमन्त्या[6]ङ्गसमाकारोपलक्षणात् । मूषागर्भनिरुद्धस्य स्थितिं व्योम्नः [7]परामृशन् ॥२०३॥
शारीरमानसाशेषदुःखबन्धनवर्जितः । [8]निर्द्वन्द्वो निष्क्रियः शुद्धो गुणैरष्टाभिरन्वितः ॥२०४॥
अभेद्यसंहतिर्लोकशिखरैकशिखामणिः । ज्योतिर्मयः परिप्राप्तस्वात्मा[9] सिद्धः [10]सुखायते ॥२०५॥
कृतार्था निष्ठिताः सिद्धाः[11] कृतकृत्या निरामयाः । सूक्ष्मा निरञ्जनाश्चेति पर्यायाः सि[12]द्धिमापुषाम्[13] ॥
तेषामतीन्द्रियं सौख्यं दुःखप्रक्षयलक्षणम् । तदेव हि परं प्राहुः सुखमानन्त्यवेदिनः[14] ॥२०७॥

हो जाते है ॥१९७॥ इन अयोगी परमष्ठीके चौदहवें गुणस्थानके उपान्त्य समयमे बहत्तर और अन्तिम समयमे तेरह कर्म . . . नाश होता है ॥१९८॥ वे जिनेन्द्रदेव चौदहवे गुणस्थानके अनन्तर लेपरहित, शरीररहित, शुद्ध, अव्याबाध, रोगरहित, सूक्ष्म, अव्यक्त, व्यक्त और मुक्त होते हुए लोकके अन्तभागमे निवास करते हैं ॥१९९॥ कर्मरूपी रजसे रहित होनेके कारण जिनकी आत्मा अतिशय शुद्ध हो गई है ऐसे वे सिद्ध भगवान् ऊर्ध्वगमन स्वभाव होनेके कारण एक समयमे ही लोकके अन्तभागको प्राप्त हो जाते है और वहांपर चूड़ामणि रत्नके समान सुशोभित होने लगते है ॥२००॥ जो हर प्रकारके कर्मोसे रहित है, जिन्होंने संसार सम्बन्धी सुख और दु.ख नष्ट कर दिये है, जिनके आत्मप्रदेशोंका आकार अन्तिम शरीरके तुल्य है और परिमाण अन्तिम शरीरसे कुछ कम है, जो अमूर्तिक होनेपर भी अन्तिम शरीरका आकार होनेके कारण उपचारसे सॉचेके भीतर रुके हुए आकाशकी उपमा को प्राप्त हो रहे है, जो शरीर और मनसम्बन्धी समस्त दु खरूपी बन्धनोंसे रहित है, द्वन्द्व-रहित हैं, क्रियारहित है, शुद्ध है, सम्यक्त्व आदि आठ गुणोंसे सहित है, जिनके आत्मप्रदेशोंका समुदाय भेदन करने योग्य नही है, जो लोककी शिखरपर मुख्य शिरोमणिके समान सुशोभित हैं, जो ज्योतिस्वरूप है, और जिन्होंने अपने शुद्ध आत्मतत्त्वको प्राप्त कर लिया है ऐसे वे सिद्ध भगवान् अनन्त कालतक सुखी रहते है ॥२०१–२०५॥ कृतार्थ, निष्ठित, सिद्ध, कृत-कृत्य, निरामय, सूक्ष्म और निरञ्जन ये सब मुक्तिको प्राप्त होनेवाले जीवोंके पर्यायवाचक शब्द है ॥२०६॥ उन सिद्धोंके समस्त दु.खोंके क्षयसे होनेवाला अतीन्द्रिय सुख होता है और

---

१ चरमक्षणे ट० । सातासातयोरन्यतमम् १, मनुष्यगति १, पञ्चेन्द्रियनामकर्म १, सुभग १, त्रस १, बादर १, पर्याप्तक १, आदेय १, यशस्कीर्ति १, तीर्थकरत्व १, मनुष्यायु १, उच्चैर्गोत्र १, मनुष्यानुपूर्व्य १, इति त्रयोदश कर्मांशाः प्रक्षीणा बभूवु । २ द्विचरणसमये शरीरपञ्चकबन्धनपञ्चक-संघातपञ्चकसंस्थानषट्क सहननषट्क अङ्गोपाङ्गत्रय वर्णपञ्चक गन्धद्वय रसपञ्चक स्पर्शाष्टक-स्थिरास्थिरशुभाशुभ सुस्वर दुस्वरदेवगतिदेवगत्यानुपूर्वीप्रशस्तविहायोगति अप्रशस्तविहायोगति दुर्भग-निर्माण अयशस्कीर्ति अनादेय प्रत्येक प्रत्येकापर्याप्ता [illegible] परघातोच्छ्वासा सत्त्वरूपवेदनी-यनीचैर्गोत्राणि इति द्वासप्ततिकर्मांशा नष्टा बभूवुः । ३ ऊर्ध्वगतिस्वभावत्वात् । ४ एकसमयेन । ५ चरमाङ्गाकृतिः । ६ चरमाङ्गसमाकारग्राहकात् । ७ अनुकुर्वन् । ८ नि.परिग्रहः । ९ स्वस्व-रूपः । १० सुखमनुभवति, सुखरूपेण परिणमत इत्यर्थ । ११ निष्पन्ना. । १२ स्वात्मोपलब्धिम् । सिद्धिमीयुषाम् प०, ल०, म०, द०, इ०, स० । शुद्धिमीयुषाम् अ० । १३ प्राप्तवताम् । १४ केवलज्ञानिनः ।

क्षुदादिवेदनाभावान्नैषां विषयकामिता[1] । किमु सेवेत भैषज्यं स्वस्थावस्थः सुधीः पुमान् ॥२०८॥
न तत्सुखं परद्रव्यसम्बन्धादुपजायते । नित्यमव्ययमक्षय्यम् आत्मोत्थं हि परं शिवम्[2] ॥२०९॥
[3]स्वास्थ्यं चेत्सुखमेतेषाम् अदोऽस्त्यानन्त्यमाश्रितम् । [4]ततोऽन्यच्चेत् सुखं नाम न किञ्चिद् भुवनोदरे २१
सकलक्लेशनिर्मुक्तो निर्मोहो निरुपद्रवः । केनासौ बाध्यते सूक्ष्मः तदस्यात्यन्तिकं सुखम् ॥२११॥
इदं ध्यानफलं प्राहुः आनन्त्यमृषिपुङ्गवाः । तदर्थं हि तपस्यन्ति मुनयो वातवल्कलाः[5] ॥२१२॥
यद्वद्वाताहताः सद्यो विलीयन्ते घनाघनाः । तद्वत्कर्मघना यान्ति लयं ध्यानानिलाहताः ॥२१३॥
सर्वाङ्गीणं विषं यद्वन्मन्त्रशक्त्या प्रकृष्यते[6] । तद्वत्कर्मविषं कृत्स्नं ध्यानशक्त्यापसार्यते ॥२१४॥
ध्यानस्यैव तपोयोगाः शेषाः परिकरा मताः । ध्यानाभ्यासे ततो यत्नः शश्वत्कार्यो मुमुक्षुभिः ॥२१५॥
इति ध्यानविधिं श्रुत्वा तुतोष मगधाधिपः । तदा [7]विबुद्धमस्यासीत्तमोऽपायान्म[8]नोऽम्बुजम् ॥२१६॥

यथार्थमें केवली भगवान् उस अतीन्द्रिय सुखको ही उत्कृष्ट सुख बतलाते हैं ॥२०७॥ क्षुधा आदि वेदनाओंका अभाव होनेसे उनके विषयोंकी इच्छा नहीं होती सो ठीक ही है क्योंकि ऐसा कौन बुद्धिमान् पुरुष होगा जो स्वस्थ होनेपर भी औषधियोंका सेवन करता हो ॥२०८॥ जो सुख परपदार्थोंके सम्बन्धसे होता है वह सुख नहीं है, किन्तु जो शुद्ध आत्मासे उत्पन्न होता है, नित्य है, अविनाशी है और क्षयरहित है वही वास्तवमें उत्तम सुख है ॥२०९॥ यदि स्वास्थ्य (समस्त इच्छाओंका अपनी आत्मामें ही समावेश रहना–इच्छाजन्य आकुलताका अभाव होना) ही सुख कहलाता है तो वह अनन्त सुख सिद्ध भगवान्के रहता ही है और यदि स्वास्थ्य के सिवाय किसी अन्य वस्तुका नाम सुख है तो वह सुख लोकके भीतर कुछ भी नहीं है ॥ भावार्थ–विषयोंकी इच्छा अर्थात् आकुलताका न होना ही सुख कहलाता है सो ऐसा सुख सिद्ध परमेष्ठीके सदा विद्यमान रहता है। इसके सिवाय यदि किसी अन्य वस्तुका नाम सुख माना जाये तो वह सुख नामका पदार्थ लोकमें किसी जगह भी नहीं है ऐसा समझना चाहिये ॥२१०॥ वे सिद्ध भगवान् समस्त क्लेशोंसे रहित हैं, मोहरहित हैं, उपद्रवरहित हैं और सूक्ष्म हैं इसलिये वे किसके द्वारा बाधित हो सकते हैं–उन्हें कौन बाधा पहुंचा सकता हैं अर्थात् कोई नहीं। इसीलिये उनका सुख अन्त रहित कहा जाता है ॥२११॥ ऋषियोंमें श्रेष्ठ गणधरादि देव इस अनन्त सुखको ही ध्यानका फल कहते हैं और उसी सुखके लिये ही मुनि लोग दिगम्बर होकर तपश्चरण करते हैं ॥२१२॥ जिस प्रकार वायुसे टकराये हुए मेघ शीघ्र ही विलीन हो जाते हैं उसी प्रकार ध्यानरूपी वायुसे टकराये हुए कर्मरूपी मेघ शीघ्र ही विलीन हो जाते हैं–नष्ट हो जाते हैं। भावार्थ–उत्तम ध्यानसे ही कर्मोंका क्षय होता है ॥२१३॥ जिस प्रकार मन्त्रकी शक्तिसे समस्त शरीरमें व्याप्त हुआ विष खींच लिया जाता है उसी प्रकार ध्यानकी शक्तिसे समस्त कर्मरूपी विष दूर हटा दिया जाता है ॥२१४॥ बाकीके ग्यारह तप एक ध्यानके ही परिकर–सहायक माने गये हैं इसलिये मोक्षाभिलाषी जीवोंको निरन्तर ध्यानका अभ्यास करनेमें ही प्रयत्न करना चाहिये ॥२१५॥ इस प्रकार ध्यानकी विधि सुनकर मगधेश्वर राजा श्रेणिक बहुत ही सन्तुष्ट हुए, और उस समय अज्ञानरूपी अन्धकारके नष्ट हो जानेसे उनका मनरूपी कमल भी प्रफुल्लित हो उठा था ॥२१६॥

---

१ विषयैषिता। २ सुखम्। ३ स्वस्वरूपावस्थायित्वम्। ४ सुखत। ५ दिगम्बराः। वान्तवल्कलाः ल०, इ०। ६ निरस्यते। ७ विकसितम्। ८ अज्ञान।

ततस्तमृषयो भक्त्या गौतमं कृतवन्दनाः । पप्रच्छुरिति योगीन्द्रं योगद्वैधानि[1] कानिचित् ॥२१७॥
भगवन् यो[2]गशास्त्रस्य तत्त्वं[3] त्वत्तः श्रुतं मुहुः । इदानीं बोद्धुमिच्छामस्त[4]द्दिगन्तरशोधनम् ॥२१८॥
[5]तदस्य ध्यानशास्त्रस्य यास्ता विप्रतिपत्तयः[6] । निराकुरुष्व ता देव भास्वानिव तमस्ततीः ॥२१९॥
ऋद्धिप्राप्तेर्ऋषिस्त्वं हि[7] त्वं हि प्रत्यक्षविन्मुनिः । अनगारोऽस्य सङ्गत्वाद् यतिः श्रेणीद्वयोन्मुखः ॥२२०॥
ततो भागवतादीनां[8] योगानामभिभूतये[9] । ब्रूहि नो योगबीजानि[10] हेत्वाज्ञाभ्यां[11] यथाश्रुतम् ॥२२१॥
इति तद्वचनं श्रुत्वा भगवान् स्माह गौतमः । यत्पृष्टं योगतत्त्वं वः[12] कथयिष्यामि तत्स्फुटम् ॥२२२॥
षड्भेद[13]योगवादी यः[14] सोऽनुयोज्यः[15] समाहितैः । योगः कः किं समाधानं[16]प्राणायामश्च कीदृशः ॥२२३॥
का धारणा किमाध्यानं किं ध्येयं कीदृशी स्मृतिः । किं फलं कानि बीजानि प्रत्याहारोऽस्य[17] कीदृशः ॥
कायवाङ्मनसां कर्म योगो योगविदां मतः । स[18] शुभाशुभभेदेन भिन्नो द्वैविध्यमश्नुते ॥२२५॥
यत्सम्यक्परिणामेषु चित्तस्या[19]धानमञ्जसा । स समाधिरिति ज्ञेयः स्मृतिर्वा परमेष्ठिनाम् ॥२२६॥
प्राणायामो भवेद् योगनिग्रहः शुभभावनः । धारणा श्रुतनिर्दिष्टबीजानामवधारणम् ॥२२७॥

तदनन्तर भक्तिपूर्वक वन्दना करनेवाले ऋषियोंने योगिराज गौतम गणधरसे नीचे लिखे अनुसार और भी कुछ ध्यानके भेद पूछे ॥२१७॥ कि हे भगवन्, हम लोगोने आपसे योगशास्त्रका रहस्य अनेक बार सुना है, अब इस समय आपसे अन्य प्रकारके ध्यानोंका निराकरण जानना चाहते है ॥२१८॥ हे देव, जिस प्रकार सूर्य अन्धकारके समूहको नष्ट कर देता है उसी प्रकार आप भी इस ध्यानशास्त्रके विषयमे जो कुछ भी विप्रतिपत्तियाँ (बाधाएं) है उन सबको नष्ट कर दीजिये ॥२१९॥ हे स्वामिन्, अनेक ऋद्धिया प्राप्त होनेसे आप ऋषि कहलाते है, आप अनेक पदार्थोको प्रत्यक्ष जाननेवाले मुनि है, परिग्रहरहित होनेके कारण आप अनगार कहलाते है और दोनों श्रेणियोंके सन्मुख है इसलिये यति कहलाते है ॥२२०॥ इसलिये भागवत आदिमे कहे हुए योगोंका पराभव (निराकरण) करनेके लिये युक्ति और शास्त्रके अनुसार आपने जैसा सुना है वैसा ही हम लोगोके लिये योग (ध्यान)के समस्त बीजों (कारणों अथवा बीजाक्षरो) का निरूपण कीजिये ॥२२१॥ इस प्रकार उन ऋषियोंके ये वाक्य सुनकर भगवान् गौतम स्वामी कहने लगे कि आप लोगोंने जो योगशास्त्रका तत्त्व अथवा रहस्य पूछा है उसे मै स्पष्ट रूपसे कहूँगा ॥२२२॥

जो छह प्रकारसे योगोंका निरूपण करता है ऐसे योगवादीसे विद्वान् पुरुषोंको पूछना चाहिये कि योग क्या है ? समाधान क्या है ? प्राणायाम कैसा है ? धारणा क्या है, आध्यान (चिन्तवन) क्या है ? ध्येय क्या है ? स्मृति कैसी है ? ध्यानका फल क्या है ? ध्यानके बीज क्या है ? और इसका प्रत्याहार कैसा है ॥२२३–२२४॥ योगके जाननेवाले विद्वान् काय, वचन और मनकी क्रियाको योग मानते है, वह योग शुभ और अशुभके भेदसे दो भेदोंको प्राप्त होता है ॥२२५॥ उत्तम परिणामोंमें जो चित्तका स्थिर रखना है वही यथार्थमें समाधि या समाधान कहलाता है अथवा पञ्च परमेष्ठियोंके स्मरणको भी समाधि कहते हैं ॥२२६॥ मन वचन और काय इन तीनों योगोंका निग्रह करना तथा शुभभावना रखना प्राणायाम कहलाता है और शास्त्रोंमें बतलाये हुए बीजाक्षरोंका अवधारण करना धारणा

---

१ ध्यानभेदान् । २ ध्यान । ३ स्वरूपम् । ४ योगमार्गान्तरनिराकरणम् । ५ तत् कारणात् । ६ प्रतिकूला । ७ हि पादपूरणे । ८ वैष्णवादीनाम् । ९ ध्यानानाम् । १० ध्याननिमित्तानि । ११ युक्त्यागमपरमागमाभ्याम् । १२ च ल०, म०, अ० । १३ संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवाय, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति षड्प्रकारयोगान् वदतीति । १४ योग. । १५ प्रष्टव्यः । १६ समाधिः । १७ योगस्य । योगादेर्वक्ष्यमाणलक्षणलक्षितत्वात् तन्न तव सम्भवतीति स्वमत प्रतिष्ठापयितुमाह । १८ योगः । १९ धारणा ।

आध्यानं स्यादनुध्यानम् अनित्यत्वादिचिन्तनैः । ध्येयं स्यात् परमं [1]तत्त्वम् [2]अवाङ्मनसगोचरम् ॥२२८॥
स्मृतिर्जीवादितत्त्वानां याथात्म्यानुस्मृतिः स्मृता । गुणानुस्मरणं वा स्यात् सिद्धार्हत्परमेष्ठिनाम् ॥२२९॥
फलं यथोक्तं[3] बीजानि वक्ष्यमाणान्यनुक्रमात् । प्रत्याहारस्तु [4]तस्योपसंहृतौ [5]चित्तनिर्वृतिः ॥२३०॥
[6]अकारादिहकारान्तरेफमध्यान्तबिन्दुकम् । ध्यायन् परमिदं बीजं मुक्त्यर्थी नावसीदति[7] ॥२३१॥
षडक्षरात्मकं बीजमिवार्हद्भ्यो नमोऽस्त्विति । ध्यात्वा मुमुक्षुराहन्त्यम् अनन्तगुणमृच्छति ॥२३२॥
नमः सिद्धेभ्य इत्येतद्दृशार्धस्त[8]वनाक्षरम् । जपञ्जप्येषु भव्यात्मा स्वेष्टान् कामानवाप्स्यति ॥२३३॥
अष्टाक्षरं परं बीजं नमोऽर्हत्परमेष्ठिने । इतीदमनुसंस्मृत्य पुनर्दुःखं न पश्यति ॥२३४॥
यत्षोडशाक्षरं[9] बीजं सर्वबीजपदान्वितम् । तत्त्ववित्तदनुध्यायन् ध्रुवमेष [10]मुमुक्षते ॥२३५॥
[11]पञ्चब्रह्ममयैर्मन्त्रैः [12]सकलीकृत्यनिष्कलम्[13] । परं तत्त्वमनुध्यायन् योगी स्याद् ब्रह्म[14]तत्त्ववित् ॥२३६॥
योगिनः परमानन्दो योऽस्य स्याच्चित्त[15]निर्वृतेः । स एवैश्वर्य[16]पर्यन्तो योगजाः किमुतर्द्धयः[17] ॥२३७॥

कहलाती है ॥२२७॥ अनित्यत्व आदि भावनाओका बार-बार चिन्तवन करना आध्यान कहलाता है तथा मन और वचनके अगोचर जो अतिशय उत्कृष्ट शुद्ध आत्मतत्त्व है वह ध्येय कहलाता है ॥२२८॥ जीव आदि तत्त्वोंके यथार्थ स्वरूपका स्मरण करना स्मृति कहलाती है अथवा सिद्ध और अर्हन्त परमेष्ठीके गुणोंका स्मरण करना भी स्मृति कहलाती है ॥२२९॥ ध्यानका फल ऊपर कहा जा चुका है, बीजाक्षर आगे कहे जावेगे और मनकी प्रवृत्तिका सकोच कर लेनेपर जो मानसिक सन्तोष प्राप्त होता है उसे प्रत्याहार कहते है ॥२३०॥ जिसके आदि में अकार है अन्तमे हकार है मध्यमे रेफ है और अन्तमे विन्दु है ऐसे अर्ह इस उत्कृष्ट बीजाक्षरका ध्यान करता हुआ मुमुक्षु पुरुष कभी भी दुखी नही होता ॥२३१॥ अथवा 'अर्हद्भ्यो नम' अर्थात् 'अर्हन्तोके लिये नमस्कार हो' इस प्रकार छह अक्षरवाला जो बीजाक्षर है उसका ध्यान कर मोक्षाभिलाषी मुनि अनन्त गुणयुक्त अर्हन्त अवस्थाको प्राप्त होता है ॥२३२॥ अथवा जप करने योग्य पदार्थोमेसे 'नम. सिद्धेभ्य.' अर्थात् सिद्धोंके लिये नमस्कार हो इस प्रकार सिद्धोके स्तवन स्वरूप पाँच अक्षरोंका जो भव्य जीव जप करता है वह अपने इच्छित-पदार्थोको प्राप्त होता है अर्थात् उसके सब मनोरथ पूर्ण होते है ॥२३३॥ अथवा 'नमोर्हत्परमेष्ठिने' अर्थात् 'अरहन्त परमेष्ठीके लिये नमस्कार हो' यह जो आठ अक्षरवाला परमबीजाक्षर है उसका चिन्तवन करके भी यह जीव फिर दुखोंको नही देखता है अर्थात् मुक्त हो जाता है ॥२३४॥ तथा 'अर्हत्सिद्धाचार्योपाध्यायसर्वसाधुभ्यो नम.' अर्थात् अरहन्त सिद्ध आचार्य उपाध्याय और सर्व साधु इन पाँचो परमेष्ठियोके लिये नमस्कार हो, इस प्रकार सब बीज पदोंसे सहित जो सोलह अक्षरवाला बीजाक्षर है उसका ध्यान करनेवाला तत्त्वज्ञानी मुनि अवश्य ही मोक्षको प्राप्त होता है ॥२३५॥ अरहन्त, सिद्ध आचार्य, उपाध्याय और सर्वसाधु इस प्रकार पचब्रह्मस्वरूप मन्त्रोके द्वारा जो योगिराज शरीर रहित परमतत्त्व परमात्माको शरीरसहित कल्पना कर उसका बार-बार ध्यान करता है वही ब्रह्मतत्त्वको जाननेवाला कहलाता है ॥२३६॥ ध्यान करने वाले योगीके चित्तके सतुष्ट होनेसे जो परम आनन्द होता है वही सबसे अधिक ऐश्वर्य है फिर योगसे होनेवाली अनेक ऋद्धियोंका तो कहना ही क्या है ? भावार्थ–ध्यानके प्रभावसे हृदयमे जो अलौकिक आनन्द प्राप्त होता है वही ध्यान

---

१ आत्मतत्त्वम् । २ अवाङ्मानस ल०, म० । ३ धर्म्यध्यानादौ प्रोक्तम् । ४ योगस्य । ५ चित्तप्रसाद, प्रसन्नता । ६ अकारादि इत्यनेन वाक्येन अर्हम् इति बीजपद ज्ञातव्यम् । ७ सक्लिष्टो न भवति । ८ पञ्चाक्षरबीजम् । ९ 'अर्हन्तसिद्धआइरियउवज्झायसाहू' इति । १० मोक्तुमिच्छति । ११ पचपरमेष्ठिस्वरूपैः । १२ सशरीरीकृत्य । १३ अशरीरम् । आत्मानम् । १४ परब्रह्मस्वरूपवेदी । १५ चित्तप्रसादाद् । १६ ऐश्वर्यपरमावधि. । १७ अत्यल्पा इत्यर्थ. ।

अणिमादिगुणैर्युक्तम् ऐश्वर्यं परमोदयम् । भुक्त्वेहैव पुनर्मुक्त्वा[1] मुनिर्निर्वाति[2] योगवित् ॥२३८॥
बीजान्येतान्यजानानो [3]नाममात्रेण मन्त्रवित् । मिथ्याभिमानोपहतो बध्यते कर्मबन्धनैः ॥२३९॥
नित्यो वा स्यादनित्यो वा जीवो योगाभि[4]मानिनाम् । [5]नित्यश्चेदवि[6]कार्यत्वान्न ध्येयध्यानसङ्गतिः ॥२४०॥
[7]सुखासुखानुभवनस्मरणेच्छाद्यसम्भवात् । प्रागेवास्य[8] न दिध्यासा[9] दूरात्तत्त्वानुचिन्तनम् ॥२४१॥
तन्नि[10]वृत्तौ कुतो ध्यानं [11]कुतस्त्यो वा फलोदयः । बन्धमोक्षाद्यधिष्ठाना[12]प्रक्रियाप्यफला ततः[13] ॥२४२॥
क्षणिकानां च चित्तानां सन्ततौ कानुभा[14]वना । ध्यानस्य स्वानुभूतार्थस्मृतिरेवात्र[15] दुर्घटा ॥२४३॥
[16]सन्तानान्तरवत्तस्मा[17]न्न दिध्यासादिसम्भवः । न[18] ध्यानं न च निर्मोक्षो[19] नाप्य[20]स्याष्टाङ्गभावना[21] २४४

का सबसे उत्कृष्ट फल है और अनेक ऋद्धियोंकी प्राप्ति होना गौण फल है ॥२३७॥ योगको जाननेवाला मुनि अणिमा आदि गुणोंसे युक्त तथा उत्कृष्ट उदयसे सुशोभित इन्द्र आदिके ऐश्वर्यका इसी ससारमे उपभोग करता है और बादमें कर्मबन्धनसे छूटकर निर्वाण स्थानको प्राप्त होता है ॥२३८॥ इन ऊपर कहे हुए बीजोंको न जानकर जो नाम मात्रसे ही मन्त्रवित् (मत्रोंको जाननेवाला) कहलाता है और झूठे अभिमानसे दग्ध होता है वह सदा कर्मरूपी बंधनोंसे बँधता रहता है ॥२३९॥ अब यहाँसे अन्य मतावलम्बी लोगोंके द्वारा माने गये योग का निराकरण करते हैं—योगका अभिमान करनेवाले अर्थात् मिथ्या योगको भी यथार्थ योग माननेवालोंके मतमे जीव पदार्थ नित्य है ? अथवा अनित्य ? यदि नित्य है तो वह अविकार्य अर्थात् विकार (परिणमन) से रहित होगा और ऐसी अवस्थामे उसके ध्येयके ध्यानरूपसे परिणमन नही हो सकेगा । इसके सिवाय नित्य जीवके सुख-दु.खका अनुभव स्मरण और इच्छा आदि परिणमनोंका होना भी असभव है इसलिये जब इस जीवके सर्वप्रथम ध्यानकी इच्छा ही नही हो सकती तब तत्त्वोंका चिन्तन तो दूर ही रहा । और तत्त्व-चिन्तनके बिना ध्यान कैसे हो सकता है ? ध्यानके बिना फलकी प्राप्ति कैसे हो सकती है ? और उसके बिना बन्ध तथा मोक्षके कारण भूत समस्त क्रियाकलाप भी निष्फल हो जाते है ॥२४०–२४३॥ यदि जीवको अनित्य माना जावे तो क्षण-क्षणमे नवीन उत्पन्न होनेवाली चितोकी सन्ततिमें ध्यानकी भावना ही नही हो सकेगी क्योंकि इस क्षणिक वृत्तिमे अपने द्वारा अनुभव किये हुए पदार्थोंका स्मरण होना अशक्य है । भावार्थ—यदि जीवको सर्वथा अनित्य माना जावे तो ध्यानकी भावना ही नही हो सकती क्योंकि ध्यान करनेवाला जीव क्षण क्षणमें नष्ट होता रहता है । यदि यह कहो कि जीव अनित्य है किन्तु वह नष्ट होते समय अपनी सन्तान छोड़ जाता है इसलिये कोई बाधा नही आती परन्तु यह कहना भी ठीक नही है, क्योंकि जब जीवका निरन्वय नाश हो जाता है तब यह उसकी सन्तान है, ऐसा व्यवहार नही हो सकता और किसी तरह उसकी सन्तान है ऐसा व्यवहार मान भी लिया जावे तो 'सब क्षणिक है' इस

१ कर्ममलैर्मुक्त्वा । २ मुक्तो भवति । ३ नाममात्राणि द० । ४ अयोगे योगबुद्धिः योगाभिमानः तद्वता योगानाम् । ५ सर्वथा नित्यः । ६ अपरिणामित्वात् । ध्येयध्यानसयोगाभावमेव प्रतिपादयति । ७ सुखदु:खानुभवनमनुभूतार्थे स्मृतिरिति वचनात्, स्मरणमपि सुखाभिलाषिप्रभृतिकम्, नित्यस्यासंभवात् । ८ सर्वथानित्यजीवतत्त्वस्य । ९ ध्यातुमिच्छा । १० तत्त्वानुचिन्तनाभावे । ११ कुत आगत: । १२ शुभाशुभकर्मविवरणम् । १३ कारणात् । १४ सामर्थ्यम् । १५ क्षणिकरूपचित्ते । १६ देवदत्तचित्तसन्तानं प्रति यज्ञदत्तचित्तसन्तानवत् । १७ कारणात् । १८ दिध्यासाद्यभावात् ध्यानमपि न सम्भवति । १९ ज्ञानाभावात् मोक्षोऽपि न सम्भवति । २० मोक्षस्य । २१ सम्यक्त्वसंज्ञा, संज्ञिवाक्कायकर्मान्तिव्यायामस्मृतिरूपाणामष्टाङ्गानां भावनापि न सम्भवति । चार्वाकमते ध्यानं न सगच्छत इत्याह ।

[1]तलपुद्गलवादेऽपि देह[2]पुद्गलतत्त्वयोः । [3]तत्त्वान्यत्वाद्यवक्तव्यसङ्करादध्यातुरस्थितेः[4] ॥२४५॥
दिध्यासापूर्विका ध्यानप्रवृत्तिर्नात्र[5]युज्यते । न चासतः[6] खपुष्पस्य काचिद् गन्धादिकल्पना ॥२४६॥
वि[7]ज्ञप्तिमात्रवादे च[8] ज्ञप्तेर्नास्त्येव गोचरः[9] । ततो निर्विषया ज्ञप्तिः क्वात्मानं[10] बिभृयात् कथम् ।२४७।

नियममें जीवकी सन्तानोंका समुदाय भी क्षणिक ही होगा इसलिये उस दशामें भी ध्यान सिद्ध नही हो सकता । इसके सिवाय ध्यान उस पदार्थका किया जाता है जिसका पहले कभी अनुभव प्राप्त किया हो, परन्तु क्षणिक पक्षमें अनुभव करनेवाला जीव और अनुभूत पदार्थ दोनों ही नष्ट हो जाते हैं अतः पुन. स्मरण कौन करेगा और किसका करेगा इन सब आपत्तियोंको लक्ष्य कर ही आचार्य महाराजने कहा है कि क्षणिकैकान्त पक्षमें ध्यानकी भावना ही नही हो सकती ।

जिस प्रकार एक पुरुषके द्वारा अनुभव किये हुए पदार्थका स्मरण दूसरे पुरुषको नही हो सकता क्योंकि वह उससे सर्वथा भिन्न है इसी प्रकार अनुभव करनेवाले मूलभूत जीवके नष्ट हो जानेपर उसके द्वारा अनुभव किये हुए पदार्थका स्मरण उनकी सन्तान प्रति सन्तानको नही हो सकता क्योंकि मूल पदार्थका निरन्वय नाश माननेपर सन्तान प्रति सन्तानके साथ उसका कुछ भी सम्बन्ध नही रह जाता । अनुभूत पदार्थके स्मरणके बिना ध्यान करनेकी इच्छाका होना असंभव है, ध्यानकी इच्छाके बिना ध्यान नही हो सकता, और ध्यानके बिना उसके फलस्वरूप मोक्षकी प्राप्ति भी नही हो सकती । तथा सम्यक्‌दृष्टि, सम्यक्‌सकल्प, सम्यक्‌वचन, सम्यक्‌कर्मान्त, सम्यक्‌आजीव, सम्यक्‌व्यायाम, सम्यक् स्मृति और सम्यक्‌समाधि इन आठ अंगोंकी भावना भी नहीं हो सकती । इसलिये जीवको अनित्य माननेसे भी ध्यान–(योग) की सिद्धि नही हो सकती ॥२४३-२४४॥ इसी प्रकार पुद्गलवाद आत्माको पुद्गलरूप माननेवाले वात्सीपुत्रियोंके मतमें देह और पुद्गल तत्त्वके भेद-अभेद और अवक्तव्य पक्षोंमे ध्याताकी सिद्धि नही हो पाती । अत. ध्यानकी इच्छापूर्वक ध्यानप्रवृत्ति नही बन सकती । सर्वथा असत् आकाशपुष्पमे गन्ध आदिकी कल्पना नही हो सकती । तात्पर्य यह कि पुद्गलरूप आत्मा यदि देहसे भिन्न है तो पृथक् आत्म-तत्त्व सिद्ध हो जाता है । यदि अभिन्न है तो देहात्मवादके दूषण आते है । यदि अवक्तव्य है तो उसके किसी रूपका निर्णय नहीं हो सकता और उसे 'अवक्तव्य' इस शब्दसे भी नही कह सकेंगे । ऐसी दशामें ध्यानकी इच्छा प्रवृत्ति आदि नहीं बन सकते । इसी प्रकार विज्ञानाद्वैतवादियोके मतमे भी ध्यानकी सिद्धि नही हो सकती क्योंकि उनका सिद्धान्त है कि संसारमें विज्ञानको छोडकर अन्य कुछ भी नही है । परन्तु उनके इस सिद्धान्तमें विज्ञानका कुछ भी विषय शेष नही रहता। इसलिये विषयके अभावमे विज्ञान स्वस्वरूपको कहाँ धारण कर सकेगा ? भावार्थ–विज्ञान उसीको कहते है जो किसी ज्ञेय (पदार्थ)को जाने परन्तु विज्ञानाद्वैतवादी विज्ञानको छोड़कर और किसी पदार्थकी सत्ता स्वीकृत नही करते इसलिये

---

१ जीवभूतचतुष्टयवादे भूतचतुष्टयसमष्टिरेव नान्यो जीव इति वादे । तथा अ०, प०, ल०, म०, द०, इ०, स० । तथेति पाठान्तरमिति 'त' पुस्तकस्यापि टिप्पण्या लिखितम् । २ देहि ब० । ३ एक-त्वनानात्ववस्तुत्वप्रमेयत्वादीनामवक्तव्यप्रतिज्ञाया. । ४ अभावात् । ५ भूतचतुष्टयवादे । ६ अविद्य-मानस्य गगनारविन्दस्य । अय ध्यातुरस्थिते· दृष्टान्तः । ७ विज्ञानाद्वैतवादिनो ध्यानं न संगच्छत इत्याह । ८ –वादेऽपि द० । ९ विषयः । १० स्वम् । ज्ञानमित्यर्थ. ।

[1]तदभावे च न ध्यानं न ध्येयं[2] मोक्ष एव वा । प्रदीपार्कहुता[3]शादौ सत्यर्थे चार्थभासनम् ॥२४८॥
[4]नैरात्म्यवादपक्षेऽपि किन्तु केन प्रमीयते । कच्छपा[5]ङ्गरुहैस्त[6]त् स्यात् खपुष्पापीड[7]बन्धनम् ॥२४९॥
ध्येयतत्त्वेऽपि नेतव्या विक[8]ल्पद्वययोजना । अनाधे[9]याप्रहेयातिशये स्यात्स्नौ[10] न किञ्चन[11] ॥२५०॥
मुक्तात्मनोऽपि चैत[12]न्यविरहाल्लक्षण[13]क्षतेः । न ध्येयं कापिलानां स्यान्निर्गु णत्वा[14]च्च खा[15]ब्जवत् ॥२५१॥

ज्ञेय (जानने योग्य)–पदार्थोंके बिना निर्विषय विज्ञान स्वरूप लाभ नही कर सकता अर्थात् विज्ञानका अभाव हो जाता है ॥२४५-२४७॥ और विज्ञानका अभाव होनेपर न ध्यान, न ध्येय, और न मोक्ष कुछ भी सिद्ध नही हो सकता क्योंकि दीपक सूर्य अग्नि आदि प्रकाशक और घट पट आदि प्रकाश्य (प्रकाशित होने योग्य) पदार्थोंके रहते हुए ही पदार्थोंका प्रकाशन हो सकता है अन्य प्रकारसे नही । भावार्थ–जिस प्रकार प्रकाशक और प्रकाश्य दोनों प्रकारके पदार्थोंका सद्भाव होनेपर ही वस्तु तत्त्वका प्रकाश हो पाता है उसी प्रकार विज्ञान और विज्ञेय दोनों प्रकारके पदार्थोंका सद्भाव होनेपर ही ध्यान ध्येय और मोक्ष आदि वस्तुओंकी सत्ता सिद्ध हो सकती है परन्तु विज्ञानाद्वैतवादी केवल प्रकाशक अर्थात् विज्ञानको ही मानते है प्रकाश्य अर्थात् विज्ञेय-पदार्थोंको नही मानते और युक्तिपूर्वक विचार करनेपर उनके उस विज्ञानकी भी सिद्धि नही हो पाती ऐसी दशामे ध्यानकी सिद्धि तो दूर ही रही ॥२४८॥ इसी प्रकार जो आत्माको नही मानते ऐसे शून्यवादी बौद्धोंके मतमें भी ध्यान सिद्ध नही हो सकता क्योंकि जब सब कुछ शून्यरूप ही है तब कौन किसको जानेगा–कौन किसका ध्यान करेगा, उनके इस मतमें ध्यानकी कल्पना करना कछुएके बालोंसे आकाशके फूलोंका सेहरा बाँधनेके समान है । भावार्थ–शून्यवादी लोग न तो ध्यान करनेवाले आत्माको मानते है और न ध्यान करने योग्य पदार्थको ही मानते है ऐसी दशामे उनके यहाँ ध्यानकी कल्पना ठीक उसी प्रकार असंभव है जिस प्रकार कि कछुएके बालोंके द्वारा आकाशके फूलोंका सेहरा बांधा जाना ॥२४९॥ इसके सिवाय शून्यवादियोंके मतमें ध्येयतत्त्वकी भी सिद्धि नहीं हो सकती क्योंकि ध्येयतत्त्वमें दो प्रकारके विकल्प होते है एक ग्रहण करने योग्य और दूसरा त्याग करने योग्य । जब शून्यवादी मूलभूत किसी पदार्थको ही नही मानते तब उसमें हेय और उपादेयका विकल्प किस प्रकार किया जा सकता है ? अर्थात् नही किया जा सकता ॥२५०॥ सांख्य मुक्तात्माका स्वरूप चैतन्यरहित मानते है परन्तु उनकी इस मान्यतामें चैतन्यरूप लक्षणका अभाव होनेसे आत्मारूप लक्ष्यकी भी सिद्धि नही हो पाती । जिस प्रकार रूपत्व और सुगन्धि आदि गुणोंका अभाव होनेसे आकाशकमलकी सिद्धि नही हो सकती ठीक उसी प्रकार चैतन्यरूप विशेष गुणोंका अभाव होनेसे [illegible] भी सिद्धि

१ ज्ञानाभावे । २ नाध्यानम् इत्यपि पाठ । अध्यान ध्यानाभावे सति । ३ अग्नि । आदि-शब्देन रत्नादि । शून्यवादे ध्यान नास्तीत्यर्थ । ४ शून्यवाद । ५ कूर्मशरीररोमभि. । ६ नैरात्म्यम् । ७ शेखर । सर्वं शून्यमिति वदतो ध्यानावलम्बन किञ्चिदपि नास्तीति भाव । ८ आदेय प्रहेयमिति योजना नेतव्या प्रष्टव्या इति भाव. । ९ अनादेयमप्रहेयमिति शून्यवादिना परिहारो दत्तः । एतस्मिन्नन्तरे कापिलः स्वमत प्रतिष्ठापयितुकाम आह । एव चेत् अनादेयाप्रहेयातिशये अनादेयाप्रत्युक्तातिशये । १० अपरिणामिनि नित्ये वस्तुनि । ध्यान संभवति इत्युक्ते सति सिद्धान्ती समाचष्टे । ११ किञ्चिदपि ध्येयध्यानादिकं न स्यात् तदेव आह । १२ चैतन्यविरहात् न केवलं ससारिणो बुद्धयवसितमर्थ पुरुषश्चेतेत् । इत्यर्थस्याभावात् मुक्तात्मनोऽपीति । १३ ध्यानविषयीभवच्चैतन्यात्मकलक्षणस्य क्षयात् । १४ चेतयत इति चेतना इत्यस्य गुणाभावाच्च । १५ यथा गगनारविन्द सौरभादिगुणाभावात् स्वयमपि न दृश्यते तद्वत् ।

[1]सुषुप्तसदृशो मुक्तः स्यादित्येवं ब्रुवा[2]णकः । [3]सुषुप्सत्येष मूढात्मा ध्येयतत्त्वविचारणे ॥२५२॥
शेषेष्वपि [4]प्रवादेषु न ध्यानध्येयनिर्णयः । एकान्तदोषदुष्टत्वाद् द्वैता[5]द्वैतादिवादिनाम् ॥२५३॥
नित्यानित्यात्मकं जीवतत्त्वमभ्युपगच्छ[6]ताम् । ध्यानं स्याद्वादिनामेव घटते नान्यवादिनाम् ॥२५४॥
विरुद्ध[7]धर्मयोरेकं वस्तु नाधारतां व्रजेत् । इति चेन्नार्पणा[8]भेदाद् अविरोधप्रसिद्धितः ॥२५५॥
नित्यो [9]द्रव्यार्पणाद्[10] आत्मा न पर्यायविवा[11]र्पणात् । अनित्यः पर्ययोत्पादविनाशैर्द्रव्यतो न तु ॥२५६॥
देवदत्तः पिता च स्यात् पुत्रश्चैवार्पणावशात् । [12]विपक्षेतरयोर्योगः स्याद् वस्तुन्युभयात्मनि[13] ॥२५७॥
जिनप्रवचनाभ्यासप्रसरद्बोधसम्पदाम् । युक्तं स्याद्वादिनां ध्यानं नान्येषां दुर्दृशामिदम् ॥२५८॥
जिनो मोहारिविजयाद् आप्तः स्याद्वीतधीमलः । वाचस्पतिरसौ वाग्भिः सन्मार्गप्रतिबोधनात् ॥२५९॥

नही हो सकती, और ऐसी दशामे वह मुक्तात्मा ध्येय भी नहीं कहला सकता तथा ध्येयके बिना ध्यान भी सिद्ध नहीं हो सकता ॥२५१॥ जो सांख्यमतावलम्बी ऐसा कहते हैं कि मुक्त जीव गाढ निद्रामे सोये हुए पुरुषके समान अचेत रहता है, मालूम होता है कि वे ध्येय तत्त्वका विचार करते समय स्वयं सोना चाहते है अर्थात् अज्ञानी बने रहना चाहते हैं इस तरह साख्यमतमें ध्यानकी सिद्धि नही हो सकती ॥२५२॥ इसी प्रकार द्वैतवादी तथा अद्वैत-वादी लोगोंके जो मत शेष रह गये हैं वे सभी एकान्तरूपी दोषसे दूषित है इसलिये उन सभीमें ध्यान और ध्येयका कुछ भी निर्णय नही हो सकता है ॥२५३॥ इसलिये जीवतत्त्वको नित्य और अनित्य दोनों ही रूपसे माननेवाले स्याद्वादी लोगोंके मतमे ही ध्यानकी सिद्धि हो सकती है अन्य एकान्तवादी लोगोके मतमें नही हो सकती ॥२५४॥ कदाचित् यहां कोई कहे कि एक ही वस्तु दो विरुद्ध धर्मोंका आधार नही हो सकती अर्थात् एक ही जीव नित्य और अनित्य नही हो सकता तो उसका यह कहना ठीक नही है क्योकि विवक्षाके भेदसे वैसा कहनेमे कोई विरोध नही आता। यदि एक ही विवक्षासे दोनों विरुद्ध धर्म कहे जाते तो अवश्य ही विरोध आता परन्तु यहाँ अनेक विवक्षाओंसे अनेक धर्म कहे जाते हैं इसलिये कोई विरोध नही मालूम होता। जीवतत्त्व द्रव्यकी विवक्षासे नित्य है न कि पर्यायके भेदोंकी विवक्षासे भी। इसी प्रकार वही जीवतत्त्व पर्यायोंके उत्पाद और विनाशकी अपेक्षा अनित्य है न कि द्रव्यकी अपेक्षासे भी। जिस प्रकार एक ही देवदत्त विवक्षाके वशसे पिता और पुत्र दोनों ही रूप होता है उसी प्रकार एक ही वस्तु विवक्षाके वशसे नित्य तथा अनित्य दोनों रूप ही होती है। देवदत्त अपने पुत्रकी अपेक्षा पिता है और अपने पिताकी अपेक्षा पुत्र है इसी प्रकार ससारकी प्रत्येक वस्तु द्रव्यकी अपेक्षा नित्य है और पर्यायकी अपेक्षा अनित्य है इससे सिद्ध होता है कि वस्तुमें दोनों विरुद्ध धर्म पाये जाते हैं परन्तु उनका समावेश विवक्षा और अविवक्षाके वशसे ही होता है ॥२५५-२५७॥ इसलिये जैनशास्त्रोंके अभ्याससे जिनकी ज्ञानरूपी सम्पदा सभी ओर फैल रही है ऐसे स्याद्वादी लोगोंके मतमें ही ध्यानकी सिद्धि हो सकती है अन्य मिथ्यादृष्टियोंके मतमें नहीं ॥२५८॥ भगवान् अरहत देवने मोहरूपी शत्रु-पर विजय प्राप्त कर ली है इसलिये वे जिन कहलाते हैं उनकी बुद्धिका समस्त मल नष्ट हो गया है इसलिये वे आप्त कहलाते है और उन्होंने अपने वचनों द्वारा सर्वश्रेष्ठ मोक्ष-

---

१ भृशं निद्रावशगतसदृशः। २ कुत्सितं ब्रुवाण· साख्य·। ३ स्वपितुमिच्छति। ४ परमतेषु। ५ सर्वथाऽभेदवादिनामादिशब्दादनुक्तानामपि शून्यवादिनाम्। ६ अनुमन्त्रिणाम्। ७ शीतोष्णवत् नित्यानित्यरूपयोरिति। ८ 'सिंहो माणवक.' इत्यर्पणाभेदात्। ९ द्रव्यनिरूपणात्। १० द्रव्यार्पणा-च्चात्मा द०, ल०, म०। ११ भेद। १२ नित्यानित्ययोः। १३ नित्यानित्यात्मनि।

स्यादर्हन्नरिघातादिगुणैरपरगोचरैः[1] । बुद्धस्त्रैलोक्यविश्वार्थबोधनाद्विश्व[2]भुद्विभुः ॥२६०॥
स विष्णुश्च[3] विजिष्णुश्च शङ्करोऽप्यभयङ्करः । शिवः सनातनः सिद्धो ज्योतिः परममक्षरम्[4] ॥२६१॥
इत्यन्वर्थानि नामानि यस्य लोकेशिनः प्रभोः । विदुषां हृदयेष्वाप्तबुद्धिं कर्तुमलंतराम्[5] ॥२६२॥
यस्य रूपमधिज्योति[6]रनम्बरविभूषणम् । [7]शास्ति कामज्वरापायम् अकटाक्षनिरीक्षणम् ॥२६३॥
निरायुधत्वान्निर्धूतभयकोपमकोपनात् । अरक्तनयनं सौम्यं सदा प्रहसितायितम्[8] ॥२६४॥
रागाद्यशेषदोषाणां निर्जयादतिमानुषम्[9] । मुखाब्जं यस्य [10]शास्तृत्वम् अनुशास्ति सुमेधसः ॥२६५॥
स एवाप्तो जगद्व्याप्तज्ञानवैराग्यवैभवः । तदुपज्ञमतो[11] ध्यानं श्रेयं[12] श्रेयोऽर्थिनामिदम् ॥२६६॥

मालिनीछन्दः

इति गदति[13] गणेन्द्रे ध्यानतत्त्वं[14] महर्द्धौ
मुनिसदसि मुनीन्द्राः [15]प्रातुषन्भक्तिभाजः ।

मार्गका उपदेश दिया है इसलिये वे वाचस्पति कहलाते हैं ॥२५९॥ अन्य किसीमे नही पाये जानेवाले. रागद्वेष आदि कर्मशत्रुओंको घात करना आदि गुणोंके कारण वे अर्हत् अथवा अरिहन्त कहलाते हैं । तीन लोकके समस्त पदार्थोको जाननेके कारण वे बुद्ध कहलाते है और वे समस्त जीवोंकी रक्षा करनेवाले है इसलिये विभु कहलाते है ॥२६०॥ इसी प्रकार वे समस्त संसारमे व्याप्त होनेसे 'विष्णु', कर्मरूपी शत्रुओंको जीतनेसे 'विजिष्णु', शान्ति करनेसे 'शकर', सब जीवोंको अभय देनेसे 'अभयकर', आनन्दरूप होनेसे 'शिव', आदि अन्त-रहित होनेके कारण 'सनातन', कृतकृत्य होनेके कारण 'सिद्ध', केवलज्ञानरूप होनेसे 'ज्योति', अनन्तचतुष्टयरूप लक्ष्मीसे सहित होनेके कारण 'परम' और अविनाशी होनेसे 'अक्षर' कहलाते है ॥२६१॥ इस प्रकार जिस त्रैलोक्यनाथ प्रभुके अनेक सार्थक नाम हैं वही अरहंतदेव विद्वानोके हृदयमे आप्तबुद्धि करनेके लिये समर्थ है अर्थात् विद्वान् पुरुष उन्हे ही आप्त मान सकते है ॥२६२॥ जिनका रूप वस्त्र और आभूषणोंसे रहित होने पर भी अतिशय प्रकाशमान है और जिनका कटाक्षरहित देखना कामरूपी ज्वर-के अभावको सूचित करता है ॥ २६३ ॥ शस्त्ररहित होनेके कारण जो भय और क्रोधसे रहित है तथा क्रोधका अभाव होनेसे जिसके नेत्र लाल नही है, जो सदा सौम्य और मन्द मुसकानसे पूर्ण रहता है, राग आदि समस्त दोषोंके जीत लेनेसे जो समस्त अन्य पुरुषोंके मुखोंसे बढ़कर है ऐसा जिनका मुखकमल ही विद्वानोंके लिये उत्तम शासकपनाका उपदेश देता है अर्थात् विद्वान् लोग जिनका मुख कमल देखकर ही जिन्हें उत्तम शासक समझ लेते है ॥ २६४-२६५ ॥ इसके सिवाय जिनके ज्ञान और वराग्यका वैभव समस्त जगत्में फैला हुआ है ऐसे अरहंतदेव ही आप्त है । यह ध्यानका स्वरूप उन्हीके द्वारा कहा हुआ हे इसलिये कल्याण चाहनेवालोंके लिये कल्याणस्वरूप है ॥ २६६ ॥

इस प्रकार बड़ी बड़ी ऋद्धियोंको धारण करने वाले गौतम गणधरने जब मुनियोंकी सभामे ध्यानतत्त्वका निरूपण किया तब भक्तिको धारण करनेवाले वे मुनिराज बहुत ही

---

१ अन्येषामविषयैः । २ विश्वं बोधयतीति । ३ वेवेष्टि इति, ज्ञानरूपेण लोकालोकं वेवेष्टि इति विष्णुरित्यर्थः । ४ अविनश्वरम् । ५ अतिशयेन समर्थानि । ६ अधिकं ज्योतिस्तेजो यस्य तत् । ७ उपदिशति । ८ प्रहसितासितम् ब० । ९ मानुषमतीतम्, दिव्यमित्यर्थः । १० शिक्षकत्वम् । ११ सर्वज्ञेन प्रथममुपक्रान्तम् । १२ श्रेयणीयम् । १३ वदति सति । १४ स्वरूपम् । १५ तुष्टवन्तः ।

घनपुलकितमूर्हुगात्रमाविर्मुखाब्जम्
[1]दिनकरकरयोगादाकरा[2] वाम्बुजानाम् ॥२६७॥
स्तुतिमुखरमुखास्ते योगिनो योगिमुख्यम्
[3]क्षणमिव जिनसेना[4]धीश्वरं तं प्रणुत्य ।
[5]प्रणिदधुरथ चेतः श्रोतुमार्हन्त्यलक्ष्मीम्
समधिगतसमग्रज्ञानधाम्नः[6] स्वधाम्नः[7] ॥२६८॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसङ्ग्रहे
ध्यानतत्त्वानुवर्णनं नाम
एकविंशं पर्व ।

सन्तुष्ट हुए। उनके शरीर हर्षसे रोमाञ्चित हो उठे और जिस प्रकार सूर्यकी किरणोंके सम्पर्कसे कमलोंका समूह प्रफुल्लित हो जाता है उसी प्रकार हर्षसे उनके मुखकमल भी प्रफुल्लित हो गये थे ॥ २६७ ॥ अथानन्तर-स्तुति करनेसे जिनके मुख वाचालित हो रहे हैं ऐसे उन सभी योगियोंने योगियोंमें मुख्य और जिनसेनाधीश्वर अर्थात् जिनेन्द्र भगवान् की चार संघरूपी सेनाके अथवा आचार्य जिनसेनके स्वामी गौतमगणधरकी थोड़ी देर तक स्तुति कर, जिन्हें समस्त ज्ञानका तेज प्राप्त हुआ है और जो अपने आत्मस्वरूपमें ही स्थिर हैं ऐसे भगवान् वृषभदेवकी आर्हन्त्य लक्ष्मीको सुननेके लिये चित्त स्थिर किया ॥ २६८ ॥

इस प्रकार भगवज्जिनसेनाचार्य प्रणीत त्रिषष्टिलक्षण महापुराण सग्रहके हिन्दी भाषानुवादमें ध्यानतत्त्वका वर्णन करनेवाला इक्कीसवां पर्व समाप्त हुआ।

---

१ किरणसंयोगात् । २ वा इव । ३ क्षणपर्यन्तमित्यर्थः । ४ जिनसेनाचार्यस्वामिनम्, अथवा जिनस्य सेना जिनसेना समवसरणस्थभव्यसन्ततिस्तस्या अधीश्वरस्तम् । ५ अवधानयुक्तमकार्षुः । ६ ज्ञानतेजसः । ७ स्वात्मैव धाम स्थान यस्य तस्य स्वस्वरूपादवस्थितस्येत्यर्थः ।

द्वाविंशं पर्व

अथ घातिजये जिष्णोरनुष्णीकृतविष्टपे । त्रिलोक्यामभवत् क्षोभः कैवल्योत्पत्तिवात्यया[1] ॥१॥
तदा प्रक्षुभिताम्भोधि[2]वेलाध्वानानुकारिणी । घण्टा मुखरयामास[3] जगत्कल्पामरेशिनाम् ॥२॥
ज्योतिर्लोके महान्सिंहप्रणादोऽभूत् समुत्थितः । येनाशु विमदी[4]भावम् अवापन्सुरवारणाः ॥३॥
दध्वान[5] ध्वनदम्भोद[6]ध्वनितानि तिरोदधन्[7] । वैयन्तरेषु[8] गेहेषु महानानकनिःस्वनः ॥४॥
शङ्खः [9]शं खचरैः[10] सार्द्धं यूयमेत जिघृक्षवः[11] । इतीव घोषयन्नुच्चैः फणीन्द्रभवनेऽध्वनत्[12] ॥५॥
विष्टराण्यमरेशानाम् अशनैः[13] प्रचकम्पिरे । अक्षमाणीव तद्गर्वं सोढुं जिनजयोत्सवे ॥६॥
[14]पुष्करैः स्वैरथोत्क्षिप्त[15]पुष्करार्घाः सुरद्विपाः । ननृतुः पर्वतोदग्रा महाहिभिरिवाद्रयः ॥७॥
पुष्पाञ्जलिमिवातेनुः समन्तात् सुरभूरुहाः । चलच्छाखाकरैर्दीर्घैर्विगलत्कुसुमोत्करैः ॥८॥
दिशः प्रसत्तिमासेदुः बभ्राजे व्यभ्रमम्बरम् । विरजीकृतभूलोकः शिशिरो मरुदाववौ ॥९॥

अथानन्तर—जब जिनेन्द्र भगवान्‌ने घातिया कर्मों पर विजय प्राप्त की तब समस्त ससार का संताप नष्ट हो गया—सारे संसारमें शान्ति छा गई और केवलज्ञानकी उत्पत्तिरूप वायु के समूहसे तीनों लोकोमे क्षोभ उत्पन्न हो गया ॥ १ ॥ उस समय क्षोभको प्राप्त हुए समुद्रकी लहरोंके शब्दका अनुकरण करता हुआ कल्पवासी देवोंका घण्टा समस्त संसारको वाचालित कर रहा था ॥ २ ॥ ज्योतिषी देवोंके लोकमे बड़ा भारी सिहनाद हो रहा था जिससे देवताओंके हाथी भी मदरहित अवस्थाको प्राप्त हो गये थे ॥ ३ ॥ व्यन्तर देवोंके घरोंमें नगाड़ोके ऐसे जोरदार शब्द हो रहे थे जो कि गरजते हुए मेघोंके शब्दोंको भी तिरस्कृत कर रहे थे ॥ ४ ॥ 'भो भवनवासी देवो, तुम भी आकाशमे चलनेवाले कल्पवासी देवोंके साथ-साथ भगवान्‌के दर्शनसे उत्पन्न हुए सुख अथवा शान्तिको ग्रहण करनेके लिये आओ' इस प्रकार जोर जोरसे घोषणा करता हुआ शंख भवनवासी देवोके भवनों में अपने आप शब्द करने लगा था ॥ ५ ॥ उसी समय समस्त इन्द्रोंके आसन भी शीघ्र ही कम्पायमान हो गये थे मानो जिनेन्द्रदेवको घातिया कर्मोके जीत लेनेसे जो गर्व हुआ था उसे वे सहन करनेके लिये असमर्थ हो कर ही कम्पायमान होने लगे थे ॥ ६ ॥ जिन्होंने अपनी अपनी सूड़ोंके अग्रभागोंसे पकडकर कमलरूपी अर्घ ऊपरको उठाये है और जो पर्वतोंके समान ऊचे हैं ऐसे देवोंके हाथी नृत्य कर रहे थे तथा वे ऐसे मालूम होते थे मानो बड़े बड़े सर्पोसहित पर्वत ही नृत्य कर रहे हों ॥ ७ ॥ अपनी लम्बी लम्बी शाखाओंरूपी हाथोंसे चारो ओर फूल वरषाते हुए कल्पवृक्ष ऐसे सुशोभित हो रहे थे मानो भगवान्‌के लिये पुष्पांजलि ही सर्मपित कर रहे हों ॥ ८ ॥ समस्त दिशाएं प्रसन्नताको प्राप्त हो रही थी, आकाश मेघोंसे रहित होकर सुशोभित हो रहा था और जिसने पृथ्वीलोकको धूलिरहित

---

१ वायुसमूहेन । 'पाशादेश्च यः' इति सूत्रात् समूहार्थे यप्रत्ययः । २ –म्भोधेर्वेला अ०, ल०, म० । ३ वाचालं चकार । ४ मदरहितत्वम् । ५ ध्वनति स्म । ६ मेघरवाणि ७ आच्छादयन् । ८ व्यन्तरसम्बन्धिषु । ९ सुखम् । १० खेचरैः त०, म० । शाखचरैः ट० । शाखचरैः कल्पवासिभिः । भो भवनवासिनः, यूयम् एत आगच्छत । ११ गृहीतुमिच्छवः । १२ ध्वनति स्म । १३ शीघ्रम् । १४ हस्ताग्रैः । १५ उद्धृतशतपत्रपूजाद्रव्याः ।

इति प्रमोदमातन्वन् अकस्माद् भुवनोदरे । केवलज्ञानपूर्णेन्दुः जगदब्धिमवीवृधत्[1] ॥१०॥
चिह्नैरमीभिरह्लाय[2] सुरेन्द्रोऽबोधि सावधिः । वैभवं[3] भुवनव्यापि[4] वै भव[5]ध्वंसिवैभवम् ॥११॥
अथोत्थायासनादाशु प्रमोदं परमुद्वहन् । तद्भूरादिव नम्रोऽभून्नतमूर्धा शचीपतिः ॥१२॥
किमेतदिति पृच्छन्तीं [6]पौलोमीमतिसम्भ्रमात् । हरिः प्रबोधयामास विभोः कैवल्यसम्भवम् ॥१३॥
प्रयाणपटहेषूच्चैः प्रध्वनत्सु शताध्वरः । भर्तुः कैवल्यपूजायै [7]निश्चक्राम सुरैर्वृतः ॥१४॥
ततो बलाहकाकारं[8] विमानं कामगा[9]ह्वयम् । चक्रे बलाहको[10] देवो जम्बूद्वीपप्रमा[11]न्वितम् ॥१५॥
मुक्तालम्बनसंशोभि [12]तदाभाद्रत्ननिर्मितम् । तोषात्प्रहासमातन्वदिव किङ्कि[13]णिकास्वनैः ॥१६॥
शारदाभ्रमिवाद[14]भ्रं श्वेतिताखिलदिङ्मुखम् । नागदत्ताभियोग्ये[15]शो [16]नागमैरावतं व्यधात् ॥१७॥
ततस्तद्विक्रियारब्धम् आरूढो दिव्यवाहनम् । हरिवाहः[17] सहेशानः प्रतस्थे सपुलोमजः[18] ॥१८॥
इन्द्रसामानिकत्रायस्त्रिंशपारिषदामराः । सात्मरक्षजगत्पालाः सानीकाः सप्रकीर्णकाः ॥१९॥

कर दिया है ऐसी ठडी ठडी हवा चल रही थी ॥ ९ ॥ इस प्रकार ससारके भीतर अकस्मात् आनन्दको विस्तृत करता हुआ केवलज्ञानरूपी पूर्ण चन्द्रमा संसाररूपी समुद्रको बढा रहा था अर्थात् आनन्दित कर रहा था ॥१० ॥ अवधिज्ञानी इन्द्रने इन सब चिह्नोंसे संसारमे व्याप्त हुए और संसारको नष्ट करनेवाले, भगवान् वृषभदेवके केवलज्ञानरूपी वैभवको शीघ्र ही जान लिया था। ॥ ११ ॥ तदनन्तर परम आनन्द को धारण करता हुआ इन्द्र शीघ्र ही आसनसे उठा और उस आनन्दके भारसे ही मानो नतमस्तक हो कर उसने भगवान्के लिये नमस्कार किया था ॥ १२ ॥ 'यह क्या ह' इस प्रकार बड़े आश्चर्यसे पूछती हुई इन्द्राणीके लिये भी इन्द्रने भगवान्के केवलज्ञानकी उत्पत्ति का समाचार बतलाया था ॥ १३ ॥ अथानन्तर जब प्रस्थानकालकी सूचना देनेवाले नगाड़े जोर जोरसे शब्द कर रहे थे तब इन्द्र अनेक देवोंसे परिवृत होकर भगवान्के केवलज्ञानकी पूजा करनेके लिये निकला ॥ १४ ॥ उसी समय बलाहकदेवने एक कामग नामका विमान बनाया जिसका आकार बलाहक अर्थात् मेघके समान था और जो जम्बूद्वीपके प्रमाण था ॥ १५ ॥ वह विमान रत्नोंका बना हुआ था और मोतियोकी लटकती हुई मालाओंसे सुशोभित हो रहा था तथा उस पर जो किंकिणियोके शब्द हो रहे थे उनसे वह ऐसा जान पड़ता था मानो सतोषसे हँस ही रहा हो ॥ १६ ॥ जो आभियोग्य जातिके देवोंमें मुख्य था ऐसे नागदत्त नामके देवने विक्रिया ऋद्धिसे एक ऐरावत हाथी बनाया। वह हाथी शरद्‌ऋतुके बादलोंके समान सफेद था, बहुत बड़ा था और उसने अपनी सफेदीसे समस्त दिशाओंको सफेद कर दिया था ॥ १७ ॥ तदनन्तर सौधर्मेन्द्रने अपनी इन्द्राणी और ऐशान इन्द्रके साथ-साथ विक्रिया ऋद्धिसे बने हुए उस दिव्यवाहनपर आरूढ होकर प्रस्थान किया ॥ १८ ॥ सबसे आगे किल्विषिक जातिके देव जोर जोरसे सुन्दर नगाड़ोंके शब्द करते जाते थे और उनके पीछे इन्द्र, सामाजिक, त्रायस्त्रिंश, पारिषद, आत्मरक्ष, लोकपाल, अनीक और

---

१ वर्धयति स्म। २ सपदि। ३ विगतो भव· विभव विभवे भव वैभवम्। ससारच्युतौ जातमिति यावत्। ४ स्फुटम्। ५ पुरुपरमेश्वरवैभवम्। ६ शचीम्। ७ निर्गच्छति स्म। ८ मेघाकारम्। ९ कामकाह्वयम् ल०, म०, इ०। कामुकाह्वयम् द०। १० बलाहकनामा। ११ प्रमाणान्वितम्। १२ तदभावात् ल०, म०, द०, इ०, अ०, ब०, स०। १३ क्षुद्रघण्टिका। १४ पृथुलम्। १५ वाहनदेवमुख्यः। १६ गजम्। १७ इन्द्र.। १८ इन्द्राणीसहितः।

पुरः किल्विषिकेषूच्चैरातन्वत्स्वानकस्वनान् । स्वैरं स्वैर्वाहनैः शक्रं व्रजन्तमनुवव्रजुः ॥२०॥
अप्सरस्सु नटन्तीषु गन्धर्वातोद्यवादनैः । [1]किन्नरेषु च गायत्सु चचाल सुरवाहिनी ॥२१॥
इन्द्रादीनामथैतेषां लक्ष्म किञ्चिदनू[2]द्यते । [3]इन्दनादणिमाद्यष्टगुणैः इन्द्रो ह्यनन्यजैः ॥२२॥
आज्ञैश्वर्याद्विनान्यैस्तु गुणैरिन्द्रेण सम्मिताः[4] । सामानिका भवेयुस्ते शक्रेणापि गुरूकृताः ॥२३॥
पितृमातृगुरुप्रख्याः सम्मतास्ते सुरेशिनाम् । लभन्ते सममिन्द्रैश्च [5]सत्कारं मान्यतोचितम् ॥२४॥
त्रायस्त्रिंशास्त्रयस्त्रिंशदेव देवाः प्रकीर्तिताः । पुरोधोमन्त्र्यमात्यानां सदृशास्ते दिवौशि[6]नाम् ॥२५॥
भवाः परिषदीत्यासन् सुराः पारिषदाह्वयाः । ते [7]पीठमर्दसदृशाः सुरेन्द्रैरुप[8]लालिताः ॥२६॥
आत्मरक्षाः शिरोर[9]क्षसमानाः प्रोद्यता[10]सयः । विभवायैव [11]पर्यन्ते पर्यटन्त्यमरेशिनाम् ॥२७॥
लोकपालास्तु लोकान्तपालका दुर्गपाल[12]वत् । पदात्यादीन्यनीकानि दण्डक[13]ल्पानि सप्त वै ॥२८॥
पौरजानपदप्रख्याः[14] सुरा ज्ञेया प्रकीर्णकाः । भवेयुराभियोग्याख्या दासकर्मकरोपमाः ॥२९॥
मताः किल्बि[15]षमस्त्येषामिति किल्बिषिकामराः । बाह्याः[16] प्रजा इव स्वर्गे स्वल्पपुण्योदितर्द्धयः ॥३०॥

प्रकीर्णक जातिके देव अपनी अपनी सवारियों पर आरूढ़ हो इच्छानुसार जाते हुए सौधर्मेन्द्रके पीछेपीछे जा रहे थे ॥१९-२०॥ उस समय अप्सराएं नृत्य कर रही थी, गन्धर्व देव बाजे बजा रहे थे और किन्नरी जातिकी देवियाँ गीत गा रही थी, इस प्रकार वह देवोंकी सेना बड़े वैभवके साथ जा रही थी ॥२१॥ अब यहाँपर इन्द्र आदि देवोंके कुछ लक्षण लिखे जाते है—अन्य देवोंमे न पाये जानेवाले अणिमा महिमा आदि गुणोंसे जो परम ऐश्वर्यको प्राप्त हों उन्हें इन्द्र कहते है ॥२२॥ जो आज्ञा और ऐश्वर्यके बिना अन्य सब गुणोंसे इन्द्रके समान हों और इन्द्र भी जिन्हे बड़ा मानता हो वे सामानिकदेव कहलाते है ॥२३॥ ये सामानिक जातिके देव इन्द्रोंके पिता माता और गुरुके तुल्य होते है तथा ये अपनी मान्यताके अनुसार इन्द्रोंके समान ही सत्कार प्राप्त करते है ॥२४॥ इन्द्रोंके पुरोहित मंत्री और अमात्यों (सदा साथमे रहनेवाले मत्री) के समान जो देव होते है वे त्रायस्त्रिश कहलाते है । ये देव एक एक इन्द्रकी सभामे गिनतीके तैतीस तैतीस ही होते है ॥२५॥ जो इन्द्रकी सभामे उपस्थित रहते है उन्हें पारिषद कहते है। ये पारिषद जातिके देव इन्द्रोंके पीठमर्द अर्थात् मित्रोंके तुल्य होते है और इन्द्र उनपर अतिशय प्रेम रखता है ॥२६॥ जो देव अग रक्षकके समान तलवार ऊँची उठाकर इन्द्रके चारों ओर घूमते रहते है उन्हें आत्मरक्ष कहते हैं। यद्यपि इन्द्रको कुछ भय नही रहता तथापि ये देव इन्द्रका वैभव दिखलानेके लिये ही उसके पास ही पास घूमा करते है ॥२७॥ जो दुर्गरक्षकके समान स्वर्गलोककी रक्षा करते है उन्हे लोकपाल कहते है और सेनाके समान पियादे आदि जो सात प्रकारके देव है उन्हें अनीक कहते है (हाथी, घोड़े, रथ, पियादे, बैल, गन्धर्व और नृत्य करनेवाली देवियाँ यह सात प्रकारकी देवोंकी सेना है) ॥२८॥ नगर तथा देशोंमे रहनेवाले लोगोके समान जो देव है उन्हें प्रकीर्णक जानना चाहिये और जो नौकर चाकरोंके समान हैं वे आभियोग्य कहलाते हैं ॥२९॥ जिनके किल्विष अर्थात् पापकर्मका उदय हो उन्हें किल्विषिक देव कहते हैं। ये देव अन्त्यजोंकी तरह अन्य देवोंसे बाहर रहते है । उनके जो कुछ थोड़ा सा पुण्यका उदय होता

---

१ किन्नरीषु ल०, म० । २ अनुवक्ष्यते। ३ परमैश्वर्यात् । ४ समानीकृता । ५ इतरसुरैः कृतसत्कारम् । ६ नाकेशिनाम्। ७ उपनायकभेदसन्धानकारिपुरुषसदृश इत्यर्थः । ८ –रतिलालिताः ल०, म० । ९ अङ्गरक्षसदृशा । अथवा सेवकसमानाः। १० प्रोद्यतखड्गाः। ११ पर्यन्तात् । १२ सीमान्तर्वर्तिदुर्गपालसदृशा इत्यर्थः । १३ सेनासदृशानि । १४ समाना. । १५ पापम् । १६ चाण्डालादिबाह्यप्रजावत् ।

एकैकस्मिन्निकाये[1] स्युः दश भेदाः सुरास्त्विमे[2] । व्यन्तरा ज्योतिषस्त्राय[3]स्त्रिंशलोकपवर्जिताः ॥३१॥
[4]इन्द्रस्तम्बेरमः कीदृगिति चेत् सोऽनुवर्ण्यते । तुङ्गवंशो महावर्ष्मा सुवृत्तोन्नतमस्तकः ॥३२॥
बह्वाननो बहुरदो [5]बहुदोर्विपुलासनः[6] । लक्षणैर्व्यञ्ज[7]नैर्युक्तः [8]सात्त्विको [9]जवनो बली[10] ॥३३॥
कामगः[11] कामरूपी च शूरः सद्वृत्तकन्धरः । [12]समसम्बन्धनो धुर्यो[13] मधुस्निग्धरदेक्षणः[14] ॥३४॥
[15]तिर्यग्लोलायतस्थूलसमवृत्तर्जुसत्करः । स्निग्धाताम्रपृथुस्रोतो[16] दीर्घाङ्गुलिसपुष्करः[17] ॥३५॥
वृत्तगात्रापरः[18] स्थेयान्[19] दीर्घमेह[20]नबालधिः । व्यूढोरस्को[21] महाध्वानकर्णः[22] सत्कर्णपल्लवः ॥३६॥
अर्धेन्दुनिभसुश्लिष्टविद्रुमाभनखोत्करः । [23]सच्छायस्ताम्रतालवास्यः शैलोदग्रो महाकटः[24] ॥३७॥
वराहजघनः [25]श्रीमान् दीर्घोष्ठो दुन्दुभिस्वनः । सुगन्धिदीर्घनिःश्वासः सोऽमितायुः[26] कृशोदरः[27] ॥३८॥

है उसीके अनुरूप उनके थोड़ी सी ऋद्धियाँ होती है ॥३०॥ इस प्रकार प्रत्यक निकायमे ये ऊपर कहे हुए दश दश प्रकारके देव होते है परन्तु व्यन्तर और ज्योतिपीदेव त्रायस्त्रिश तथा लोकपालभेदसे रहित होते है ॥३१॥ अव इन्द्रके ऐरावत हाथीका भी वर्णन करते है–उसका वंश अर्थात् पीठपरकी हड्डी बहुत ऊँची थी, उसका शरीर बहुत बड़ा था, मस्तक अतिशय गोल और ऊँचा था। उसके अनेक मुख थे, अनेक दाँत थे, अनेक सू डे थी, उसका आसन बहुत बड़ा था, वह अनेक लक्षण और व्यजनोंसे सहित था, शक्तिशाली था, शीघ्र गमन करनेवाला था, बलवान् था, वह इच्छानुमार चाहे जहाँ गमन कर सकता था, इच्छानुसार चाहे जैसा रूप बना सकता था, अतिशय शूरवीर था। उसके कन्धे अतिशय गोल थे, वह सम अर्थात् समचतुरस्र सस्थानका धारी था, उसके शरीरके बन्धन उत्तम थे, वह धुरन्धर था, उसके दाँत और नेत्र मनोहर तथा चिकने थे। उसकी उत्तम सूड नीचेकी ओर तिरछी लटकती हुई चंचल, लम्बी, मोटी तथा अनुक्रमसे पतली होती हुई गोल और सीधी थी, पुष्कर अर्थात् सूडका अग्रभाग चिकना और लाल था उसमे बडे बड़े छेद थे और बडी बडी अंगुलियोंके समान चिह्न थे। उसके शरीरका पिछला हिस्सा गोल था, वह हाथी अतिशय गभीर और स्थिर था, उसकी पूछ और लिग दोनों ही बड़े थे, उसका वक्ष स्थल बहुत ही चौडा और मजबूत था, उसके कान बडा भारी शब्द कर रहे थे, उसके कानरूपी पल्लव बहुत ही मनोहर थे। उसके नखोंका समूह अर्ध चन्द्रमाके आकारका था, अगुलियोंमे खूब जडा हुआ था और मूगाके समान कुछ कुछ लाल वर्णका था, उसकी कान्ति उत्तम थी। उसका मुख और तालु दोनो ही लाल थे, वह पर्वतके समान ऊंचा था, उसके गण्डस्थल भी बहुत बडे थे। उसके जघन सुअरके समान थे, वह अतिशय लक्ष्मीमान् था, उसके ओंठ बड़े बडे थे, उसका शब्द दुन्दुभीके शब्दके समान था, उच्छ्वास सुगन्धित तथा दीर्घ था, उसकी आयु अपरिमित

१ चतुर्निकायेषु एकैकस्मिन्निकाये। २ सुरा इमे ल०, म०, इ०, अ०। ३ त्रायस्त्रिंशै. लोकपालैश्च रहिता। ४ 'ऐन्द्र' इति पाठान्तरम्। ऐन्द्र इन्द्रसम्बन्धी। ५ बहुकर। ६ पृथुस्कन्धप्रदेशः। 'आसन. स्कन्धदेशः स्याद्' इत्यभिधानात्। ७ सूक्ष्मशुभचिह्नैः। ८ आत्मशक्तिकः। ९ वेगी। 'तरस्वित् त्वरितो वेगी प्रजवी जवनो जवः' इत्यभिधानात्। १० कायबलवान्। ११ स्वेच्छानुगामी। १२ समानदेहबन्धनः। सम' सम्बन्धनो ल०, म०। १३ धुरन्धरः। १४ क्षौद्रवन्मसृण। १५ तिर्यग्लोकायत–अ०, इ०। तिर्यग्दोलायित–ब०। १६ अरुणविपुलकरान्तराः। 'प्रवाहेन्द्रियगजकरान्तरेषु स्रोतः' इत्यभिधानात्। –पृथुस्रोताः इ०। १७ आयताङ्गुलिद्वययतकराग्रः। स्निग्ध चिक्कणम् आताम्रं पृथु स्रोतो यस्य तत् दीर्घाङ्गुलि समं पुष्करं शुण्डाग्र दीर्घाङ्गुलिसपुष्करम्, स्निग्धाताम्रपृथुस्रोतः दीर्घाङ्गुलिसपुष्करं यस्य स. इति 'द' टीकायाम्। १८ वर्तुलापरकाय। १९ स्थिरतरः। २० मेढ्र। २१ विशालवक्षःस्थलः। २२ महाध्वनियुतश्रवण.। अतएव सत्कर्णपल्लवः। २३ प्रशस्तवर्णः। २४ कपालः। २५ शोभावान्। २६ दीर्घायुष्यः। २७ कृतादरः।

[1]अन्वर्थवेदी कल्याणः[2] कल्याणप्रकृतिः[3] शुभः[4] । अयोनिजः सुजातश्च[5] सप्तधा[6]सुप्रतिष्ठितः ॥३९॥
मदनिर्झरसंसिक्तकर्णचामरलम्बिनीः । मदस्रुतीरिवाबिभ्रद् भ्रमराः षट्पदावलीः ॥४०॥
मुखैर्बहुभिराकीर्णो गजराजः स्म राजते । सेव्यमान इवायातैर्भक्त्या विश्वैरनेकपैः ॥४१॥
[दशभिः कुलकम्]

अशोकपल्लवाताम्रतालुच्छायाछलेन यः । वहन्मुहुरिवारुच्या[7] पल्लवान् कबलीकृतान् ॥४२॥
मृदङ्गमन्द्रनिर्घोषैः कर्णतालाभिताडनैः । [8]सालिवीणारुतैर्हृद्यैः प्रारब्धातोद्यविभ्रमः ॥४३॥
करं सुदीर्घनिःश्वासं [9]मदवेणीञ्च यो वहन् । सनिर्झरस्य सशयोः[10] बिभर्ति स्म गिरेः श्रियम् ॥४४॥
दन्तालग्नैर्मृणालैर्यो राजते स्मायतैभृशम् । [11]प्ररोहैरिव दन्तानां शशाङ्कशकलामलैः ॥४५॥
पद्माकर इव श्रीमान् दधानः पुष्करश्रियम् । कल्पद्रुम इव [12]प्रांशुः [13]दानार्थिभिरुपासितः ॥४६॥

थी और उसका सभी कोई आदर करता था। वह सार्थक शब्दार्थका जाननेवाला था, स्वयं मङ्गलरूप था, उसका स्वभाव भी मङ्गलरूप था, वह शुभ था, बिना योनिके उत्पन्न हुआ था, उसकी जाति उत्तम थी अथवा उसका जन्म सबसे उत्तम था, वह पराक्रम, तेज, बल, शूरता, शक्ति, संहनन और वेग इन सात प्रकारकी प्रतिष्ठाओंसे सहित था। वह अपने कानोंके समीप बैठी हुई उन भ्रमरोंकी पङ्क्तियोंको धारण कर रहा था जो कि गण्डस्थलोंसे निकलते हुए मदरूपी जलके निर्झरनोंसे भीग गई थी और ऐसी जान पड़ती थी मानो मद की दूसरी धाराएं ही हों। इस प्रकार अनेक मुखोंसे व्याप्त हुआ वह गजराज ऐसा सुशोभित हो रहा था मानो भक्तिपूर्वक आये हुए संसारके समस्त हाथी ही उसकी सेवा कर रहे हों ॥ ३२-४१ ॥ उस हाथीका तालु अशोकवृक्षके पल्लवके समान अतिशय लाल था। इसलिये वह ऐसा जान पड़ता था मानों लाल लाल तालुकी छायाके बहानेसे खाये हुए पल्लवोंको अच्छे न लगनेके कारण बार बार उगल ही रहा हो ॥४२॥ उस हाथीके कर्णरूपी तालों की ताड़नासे मृदङ्गके समान गम्भीर शब्द हो रहा था और वहीं पर जो भ्रमर बैठे हुए थे वे वीणाके समान शब्द कर रहे थे, उन दोनोंसे वह हाथी ऐसा जान पड़ता था मानों उसने बाजा बजाना ही प्रारंभ किया हो ॥ ४३ ॥ वह हाथी, जिससे बड़ी लम्बी श्वास निकल रही है ऐसी शुण्ड तथा मदजलकी धाराको धारण कर रहा था और उन दोनोंसे ऐसा सुशोभित हो रहा था मानो निर्झरने और सर्पसे सहित किसी पर्वतकी ही शोभा धारण कर रहा हो ॥ ४४ ॥ इसके दांतोंमें जो मृणाल लगे हुए थे उनसे वह ऐसा अच्छा जान पड़ता था मानो चन्द्रमाके टुकड़ोंके समान उज्ज्वल दातोंके अकुरोंसे ही सुशोभित हो रहा हो ॥ ४५ ॥ वह शोभायमान हाथी एक सरोवरके समान मालूम होता था क्योंकि जिस प्रकार सरोवर पुष्कर अर्थात् कमलोंकी शोभा धारण करता है उसी प्रकार वह हाथी भी पुष्कर अर्थात् सूंड़के अग्रभागकी शोभा धारण कर रहा था, अथवा वह हाथी एक ऊँचे कल्पवृक्षके समान जान पड़ता था क्योंकि जिस प्रकार कल्पवृक्ष दान अर्थात् अभिलषित वस्तुओंकी इच्छा करनेवाले मनुष्योंके द्वारा उपासित होता है उसी प्रकार वह हाथी भी दान अर्थात्

---

१ अनुगतसाक्षरवेदी। २ मङ्गलमूर्तिः। ३ स्वभावः। ४ श्रेयोवान्। ५ शोभनजातिः। 'जातस्तु कुलजे बुधे।' ६ सप्तविधमदाविष्टः। ७ -रिवारुच्यान् द०, म०। -रिवारुच्यम् ल०, म०। ८ अलिवीणारवसहितैः। ९ मदधाराम्। १० अजगरसहितस्य। ११ शिफाभिः। १२ उन्नतः। १३ पक्षे भ्रमरैः।

रेजे सहेम[1]कक्ष्योऽसौ हेमवल्लीवृताद्रिवत् । नक्षत्रमालयाक्षिप्त[2]शरदम्बरविभ्रमः ॥४७॥
[षड्भिः कुलकम्]

[3]ग्रैवेयमालया कण्ठं स वाचालितमुद्वहन् । पक्षिमालावृतस्याद्रिनितम्बस्य श्रियं दधौ ॥४८॥
घण्टाद्वयेन रेजेऽसौ सौवर्णेन निनादिना । सुराणामवबोधाय जिना[4]र्चामिव घोषयन् ॥४९॥
जम्बूद्वीपविशालोरुकायश्रीः स सरोवरान् । कुलाद्रीनिव बभ्रेऽसौ रदानायामशालिनः ॥५०॥
श्वेतिम्ना[5] वपुषः श्वेतद्वीपलक्ष्मीमुवाह सः । चलत्कैलासशैलाभः प्रक्षरन्मदनिर्भरः ॥५१॥
इति व्यावर्णितारोह[6]परिणाह[7]वपुर्गुणम् । गजानीकेश्वरश्चक्रे महैरावतदन्तिनम् ॥५२॥
तमैरावणमारूढः सहस्राक्षोऽद्युतत्तराम् । पद्माकर इवोत्फुल्लपङ्कजो गिरिमस्तके ॥५३॥
द्वात्रिंशद्वदनान्यस्य प्रत्यास्यञ्च रदाष्टकम् । [8]सरः प्रतिरदं तस्मिन् [9]अब्जिन्येका सरः प्रति ॥५४॥
द्वात्रिंशत्प्रसवास्तस्यां[10] तावत्प्रमितपत्रकाः । तेष्वायतेषु देवानां नर्तक्यस्तत्प्रमाः पृथक् ॥५५॥
नृत्यन्ति सलयं स्मेरवक्त्राब्जा ललितभ्रुवः । पश्चा[11]च्चित्तद्रुमेषूच्चैर्न्यस्यन्त्यः[12] प्रमदाङ्कुरान् ॥५६॥

मदजलके अभिलाषी भ्रमरोंके द्वारा उपासित (सेवित) हो रहा था ॥४६॥ उसके वक्षः-स्थलपर सोनेकी सांकल पडी हुई थी जिससे वह ऐसा जान पड़ता था मानो सुवर्णमयी लताओंसे ढका हुआ पर्वत ही हो और गलेमें नक्षत्रमाला नामकी माला पड़ी हुई थी जिससे वह अश्विनी आदि नक्षत्रोंकी मालासे सुशोभित शरद्ऋतुके आकाशकी शोभाको तिरस्कृत कर रहा था ॥४७॥ जो गलेमे पड़ी हुई मालासे शब्दायमान हो रहा है ऐसे कण्ठको धारण करता हुआ वह हाथी पक्षियोंकी पङ्क्तिसे घिरे हुए किसी पर्वतके नितम्ब भाग (मध्य भाग) की शोभा धारण कर रहा था ॥४८॥ वह हाथी शब्द करते हुए सुवर्णमयी दो घटाओंसे ऐसा जान पड़ता था मानो देवोंको बतलानेके लिये जिनेन्द्रदेवकी पूजाकी घोषणा ही कर रहा हो ॥४९॥ उस हाथीका शरीर जम्बूद्वीपके समान विशाल और स्थूल था तथा वह कुलाचलोंके समान लम्बे और सरोवरोंसे सुशोभित दांतोंको धारण कर रहा था इसलिये वह ठीक जम्बूद्वीपके समान जान पड़ता था ॥५०॥ वह हाथी अपने शरीरकी सफेदीसे श्वेत द्वीपकी शोभा धारण कर रहा था और झरते हुए मदजलके निर्झरनोंसे चलते फिरते कैलास पर्वतके समान सुशोभित हो रहा था ॥५१॥ इस प्रकार हाथियोंकी सेनाके अधिपति देवने जिसके विस्तार आदिका वर्णन ऊपर किया जा चुका है ऐसा बड़ा भारी ऐरावत हाथी बनाया ॥५२॥ जिस प्रकार किसी पर्वतके शिखरपर फूले हुए कमलोंसे युक्त सरोवर सुशोभित होता है उसी प्रकार उस ऐरावत हाथीपर आरूढ़ हुआ इन्द्र भी अतिशय सुशोभित हो रहा था ॥५३॥ उस ऐरावत हाथीके बत्तीस मुख थे, प्रत्येक मुखमें आठ आठ दांत थे, एक एक दातपर एक एक सरोवर था, एक एक सरोवरमे एक एक कमलिनी थी, एक एक कमलिनीमें बत्तीस बत्तीस कमल थे, एक एक कमलमे बत्तीस बत्तीस दल थे और उन लम्बे लम्बे प्रत्येक दलोंपर, जिनके मुखरूपी कमल मन्द हास्यसे सुशोभित हैं जिनकी भौहें अतिशय सुन्दर हैं और जो दर्शकोंके चित्तरूपी वृक्षोंमे आनन्दरूपी अंकुर उत्पन्न करा रही हे ऐसी बत्तीस बत्तीस अप्सराएं लयसहित नृत्य

---

१ हेममयवरत्रासहितः । २ परिवेष्टित । ३ कण्ठभूषा । ४ जिनपूजाम् । ५ अतिशुभ्रत्वेन । ६ उत्सेधविशाल । ७ चतुर्गुणम् द०, प०, अ०, स०, म०, ल० । 'इ०' पुस्तकेऽपि पार्श्वे 'चतुर्गुणम्' इति पाठान्तरं लिखितम् । ८ एकैकसरोवरः । ९ सरसि । १० अब्जिन्याम् । ११ प्रेक्षकानां मनोवृक्षेषु । १२ प्रक्षिपन्त्यः । कुर्वन्त्य इति यावत् ।

तासां सहास्य[1]शृङ्गाररसभावलयान्वितम् । पश्यन्तः कैशिकी[2]प्रायं नृत्तं पिप्रियिरे सुराः ॥५७॥
प्रयाणे सुरराजस्य नेटुरप्सरसः पुरः । रक्तकण्ठाश्च किन्नर्यो [3]जगुर्जिनपतेर्जयम् ॥५८॥
ततो द्वात्रिंश[4]दिन्द्राणां पृतना बहुकेतनाः । प्रस[5]स्रुर्विलसच्छत्रचामराः प्रततामराः[6] ॥५९॥
अप्सरःकुङ्कुमारक्तकुचचक्राह्वयुग्मके । तद्वक्त्रपङ्कजच्छन्ने लसत्तन्नयनोत्पले ॥६०॥
नभःसरसि हारांशुच्छन्नवारिणि हारिणि । चलन्तश्चामरापीडा[7] हंसायन्ते स्म नाकिनाम् ॥६१॥
इन्द्रनीलमयाहार्य[8]रुचिभिः क्वचिदाततम् । स्वामाभां[9] बिभरामास धौता[10]सिनिभमम्बरम् ॥६२॥
पद्मरागरुचा व्याप्तं क्वचिद्व्योमतलं बभौ[11] । सान्ध्यं रागमिवाबिभ्रद् अनुरञ्जितदिङ्मुखम् ॥६३॥
क्वचिन्मरकतच्छायासमाक्रान्तमभान्नभः । स शैवलमिवाम्भोधेर्जलं पर्यन्तसंश्रितम् ॥६४॥
देवाभरणमु[12]क्तौघशबलं सहविद्रुमम्[13] । भेजे पयोमुचां वर्त्म विनीलं जलधेः श्रियम् ॥६५॥
तन्व्यः सुरुचिराकारा लसदंशुकभूषणाः । तदामरस्त्रियो रेजुः कल्पवल्ल्य इवाम्बरे ॥६६॥

कर रही थी ॥५४–५६॥ जो हास्य और शृङ्गाररससे भरा हुआ था, जो भाव आर लयसे सहित था तथा जिसमे कैशिकी नामक वृत्तिका ही अधिकतर प्रयोग हो रहा था ऐसे अप्सराओके उस नृत्यको देखते हुए देवलोग बड़े ही प्रसन्न हो रहे थे ॥५७॥ उस प्रयाणके समय इन्द्रके आगे अनेक अप्सराए नृत्य कर रही थी और जिनके कण्ठ अनेक राग रागिनियोसे भरे हुए हैं ऐसी किन्नरी देविया जिनेन्द्रदेवके विजयगीत गा रही थी ॥५८॥ तदनन्तर जिनमे अनेक पताकाए फहरा रही थी, जिनमे छत्र और चमर सुशोभित हो रहे थे, और जिनमे चारो ओर देव ही देव फैले हुए थे ऐसी बत्तीस इन्द्रोंकी सेनाएं फैल गईं ॥५९॥

जिसमे अप्सराओंके केशरसे रँगे हुए स्तनरूपी चक्रवाक पक्षियोंके जोड़े निवास कर रहे है, जो अप्सराओंके मुखरूपी कमलोसे ढका हुआ है, जिसमे अप्सराओके नेत्ररूपी नीले कमल सुशोभित हो रहे हैं और जिसमे उन्ही अप्सराओके हारोकी किरणरूप ही स्वच्छ जल भरा हुआ है ऐसे आकाशरूपी सुन्दर सरोवरमे देवोके ऊपर जो चमरोके समूह ढीले जा रहे थे वे ठीक हसोके समान जान पड़ते थे ॥६०-६१॥ स्वच्छ की हुई तलवारके समान सुशोभित आकाश कही कही पर इन्द्रनीलमणिके बने हुए आभूषणोंकी कान्तिसे व्याप्त होकर अपनी निराली ही कान्ति धारण कर रहा था ॥६२॥ वही आकाश कही पर पद्मराग मणियोंकी कान्तिसे व्याप्त हो रहा था जिससे ऐसा सुशोभित हो रहा था मानो समस्त दिशाओंको अनुरजित करनेवाली संध्याकालकी लालिमा ही धारण कर रहा हो ॥६३॥ कही पर मरकतमणिकी छायासे व्याप्त हुआ आकाश ऐसा सुशोभित हो रहा था मानो शैवालसे सहित और किनारे पर स्थित समुद्रका जल ही हो ॥६४॥ देवोंके आभूषणोंमे लगे मोतियोंके समूहसे चित्रविचित्र तथा मूंगाओंसे व्याप्त हुआ वह नीला आकाश समुद्रकी शोभाको धारण कर रहा था ॥६५॥ जो शरीरसे पतली है, जिनका आकार सुन्दर है और जिनके वस्त्र तथा आभूषण अतिशय देदीप्यमान हो रहे है ऐसी देवांगनाएं उस समय

---

१ हास्यसहित । २ लज्जासहितशृङगारविशेषादिकम् । ३ गायन्ति स्म । ४ कल्पेन्द्रा द्वादश, भवनेन्द्रा दश, व्यन्तरेन्द्रा अष्ट, ज्योतिष्केन्द्रौ द्वाविति द्वात्रिंशदिन्द्राणाम् । ५ प्रतस्थिरे । ६ विस्तृत-सुराः । ७ समूहा. । ८ आभरणकान्तिभि. । ९ निजकान्तिम् । १० उत्तेजितखड्गसङ्काशम् । ११ अभात् । १२ मौक्तिकनिकरेण नानावर्णम् । १३ प्रबालसहितम् ।

स्मेरवक्त्राम्बुजा रेजुः नयनोत्पलराजिताः । सरस्य इव लावण्यरसापूर्णाः सुराङ्गनाः ॥६७॥
तासां स्मेराणि वक्त्राणि पद्मबुद्ध्यानुधावताम् । रेजे मधुलिहां माला धनुर्ज्येव मनोभुवः ॥६८॥
हाराश्रितस्तनोपान्ता रेजुरप्सरसस्तदा । दधाना इव निर्मोकसमच्छायं स्तनांशुकम् ॥६९॥
सुरानकमहाध्वानः[1] पूजावे[2]लां परां दधत् । प्रचरद्देवकल्लोलो बभौ देवागमाम्बुधिः ॥७०॥
ज्योतिर्मय इवैतस्मिन् जाते सृष्ट्यन्तरे भृशम् । ज्योतिर्गणा ह्रियेवासन् विच्छायत्वादलक्षिताः ॥७१॥
तदा दिव्याङ्गनारूपैः हयहस्त्यादिवाहनैः । उच्चा[3]वचैर्नभोवर्त्म भेजे चित्रपटश्रियम् ॥७२॥
देवाङ्ग[4]द्युतिविद्युद्भिः तदाभरणरोहितैः[5] । सुरेभनीलजीमूतैः व्योमाधात्प्रावृषः श्रियम् ॥७३॥
इत्यापत[6]त्सु देवेषु समं यानविमानकैः । सजा[7]निषु तदा स्वर्गश्चिराद्वा[8]सितो [9]बत ॥७४॥
समारुद्ध्य नभोऽशेषमित्यायातैः सुरासुरैः । जगत्प्रादुर्भवद्दिव्यस्वर्गान्तरमिवारुचत् ॥७५॥
सुरैर्दूरादथालोकि विभोरास्थानमण्डलम् । सुरशिल्पिभिरारब्धपरार्ध्यरचनाशतम् ॥७६॥

आकाशमे ठीक कल्पलताओंके समान सुशोभित हो रही थीं ॥ ६६ ॥ उन देवांगनाओंके कुछ-कुछ हंसते हुए मुख कमलोंके समान थे, नेत्र नील कमलके समान सुशोभित थे और स्वय लावण्यरूपी जलसे भरी हुई थी इसलिये वे ठीक सरोवरोंके समान शोभायमान हो रही थी ॥६७॥ कमल समझकर उन देवांगनाओंके मुखोंकी ओर दौड़ती हुई भ्रमरोंकी माला कामदेवके धनुषकी डोरीके समान सुशोभित हो रही थी ॥६८॥ जिनके स्तनोंके समीप भागमे हार पडे हुए है ऐसी वे देवांगनाए उस समय ऐसी सुशोभित हो रही थी मानो साँपकी कांचलीके समान कान्तिवाली चोली ही धारण कर रही हों ॥६९॥ उस समय वह देवोका आगमन एक समुद्रके समान जान पड़ता था क्योंकि समुद्र जिस प्रकार अपनी गरजनामे वेला अर्थात् ज्वारभाटाको धारण करता है उसी प्रकार वह देवोंका आगमन भी देवोके नगाड़ोंके बडे भारी शब्दोंसे पूजा बेला अर्थात् भगवान्‌की पूजाके समयको धारण कर रहा था, और समुद्रमें जिस प्रकार लहरे उठा करती है उसी प्रकार उस देवोके आगमनमे इधर इधर चलते हुए देवरूपी लहरें उठ रही थी ॥७०॥ जिस समय वह प्रकाशमान देवोंकी सेना नीचेकी ओर आ रही थी उस समय ऐसा जान पडता था मानो ज्योतिषी देवोंकी एक दूसरी ही सृष्टि उत्पन्न हुई हो और इसलिये ही ज्योतिषी देवोंके समूह लज्जासे कान्ति-रहित होकर अदृश्य हो गये हों ॥७१॥ उस समय देवांगनाओंके रूपों और ऊचे-नीचे हाथी घोड़े आदिकी सवारियोंसे वह आकाश एक चित्रपटकी शोभा धारण कर रहा था ॥७२॥ अथवा उस समय यह आकाश देवोंके शरीरकी कान्तिरूपी बिजली, देवोके आभूषणरूपी इन्द्रधनुष और देवोंके हाथीरूपी काले बादलोसे वर्षाऋतुकी शोभा धारण कर रहा था ॥७३॥ इस प्रकार जब सब देव अपनी अपनी देवियों सहित सवारियों और विमानोंके साथ साथ आ रहे थे तब स्वर्गलोक बहुत देर तक शून्य हो गया था ॥७४॥ इस प्रकार उस समय समस्त आकाशको घेरकर आये हुए सुर और असुरोंसे यह जगत् ऐसा सुशोभित हो रहा था मानो उत्पन्न होता हुआ कोई दूसरा दिव्य स्वर्ग ही हो ॥७५॥

अथानन्तर जिसमे देवरूपी कारीगरोंने सैकड़ों प्रकारकी उत्तम उत्तम

---

१ –ध्वानै. अ०, स०, ल०, इ०, द०, प० । २ कालम् । ३ नानाप्रकारैः । ४ सुरकायकान्ति । ५ ऋजुसुरचापैः । 'इद्रायुध शक्रधनुस्तदेव ऋजुरोहितम्' इत्यभिधानात् । ६ आगच्छत्सु । ७ स्त्रीसहितेषु । ८ शून्यीकृत. । ९ –सितोऽभवत् अ०, प०, ल०, इ०, द० ।

द्विषड्योजनविस्तारम् अभू[1]दास्थानमीशितुः। हरिनीलमहारत्नघटितं विलसत्तलम् ॥७७॥
सुरेन्द्रनीलनिर्माणं समवृत्तं तदा बभौ। त्रिजगच्छ्रीमुखालोकमङ्गलादर्शविभ्रमम् ॥७८॥
आस्थानमण्डलस्यास्य विन्यासं कोऽनुवर्णयेत्। सुत्रामा सूत्र[2]धारोऽभून्निर्माणे यस्य [3]कर्मठः ॥७९॥
तथाप्यनू[4]द्यते किञ्चिद् अस्य शोभास[5]मुच्चयः। श्रुतेन[6] येन सम्प्रीतिं भजेद्भव्यात्मनां मनः ॥८०॥
तस्य[7]पर्यन्तभूभागम् अलञ्चक्रे स्फुरद्द्युतिः। धूलीसालपरिक्षेपो[8] रत्नपांसुभिराचितः ॥८१॥
धनुरैन्द्रमिवोद्भासिवलयाकृतिमुद्वहत्। सिषेवे तां महीं विष्वग्धूलीसालापदेशतः[9] ॥८२॥
कटीसूत्रश्रियं तन्वन्धूलीसालपरिच्छदः[10]। परीयाय[11] जिनास्थानभूमिं तां वलयाकृतिः ॥८३॥
क्वचिदञ्जनपुञ्जाभः क्वचिच्चामीकरच्छविः। क्वचिद्विद्रुमसच्छायः [12]सोऽद्युतद् रत्नपांसुभिः ॥८४॥
क्वचिच्छुक[13]च्छदच्छायैः मणिपांसुभिरुच्छिखैः। स रेजे [14]नलिनीबालपलाशैरिव सन्ततः[15] ॥८५॥
चन्द्रकान्तशिलाचूर्णैः क्वचिज्ज्योत्स्ना श्रियं दधत्। जनानामकरोच्चित्रम् अनुरक्ततरं[16] मनः ॥८६॥

रचनाएं की हैं ऐसा भगवान् वृषभदेवका समवसरण देवोंने दूरसे ही देखा ॥७६॥ जो बारह योजन विस्तारवाला है और जिसका तलभाग अतिशय देदीप्यमान हो रहा है ऐसा इन्द्रनील मणियोंसे बना हुआ वह भगवान्का समवसरण बहुत ही सुशोभित हो रहा था ॥७७॥ इन्द्रनील मणियोंसे बना और चारों ओरसे गोलाकार वह समवसरण ऐसा जान पड़ता था मानो तीन जगत्की लक्ष्मीके मुख देखनेके लिये मंगलरूप एक दर्पण ही हो ॥७८॥ जिस समवसरणके बनानेमे सब कामोमे समर्थ इन्द्र स्वय सूत्रधार था ऐसे उस समवसरणकी वास्तविक रचनाका कौन वर्णन कर सकता है ? अर्थात् कोई नही, फिर भी उसकी शोभाके समूहका कुछ थोड़ा सा वर्णन करता हूँ क्योकि उसके सुननेसे भव्य जीवोंका मन प्रसन्नताको प्राप्त होता है ॥७९-८०॥ उस समवसरणके बाहरी भागमे रत्नोंकी धूलीसे बना हुआ एक धूलीसाल नामका घेरा था जिसकी कान्ति अतिशय देदीप्यमान थी और जो अपने समीपके भूभागको अलकृत कर रहा था ॥८१॥ वह धूलीसाल ऐसा अच्छा जान पड़ता था मानो अतिशय देदीप्यमान और वलय (चूड़ी)का आकार धारण करता हुआ इन्द्रधनुष ही धूलीसालके बहानेसे उस समवसरण भूमिकी सेवा कर रहा हो ॥८२॥ कटिसूत्रकी शोभाको धारण करता हुआ और वलयके आकारका वह धूलीसालका घेरा जिनेन्द्रदेवके उस समवसरणको चारों ओरसे घेरे हुए था ॥८३॥ अनेक प्रकारके रत्नोकी धूलीसे बना हुआ वह धूलीसाल कही तो अजनके समूहके समान काला काला सुशोभित हो रहा था, कही सुवर्णके समान पीला पीला लग रहा था और कही मूगाकी कान्तिके समान लाल-लाल भासमान हो रहा था ॥८४॥ जिसकी किरणें ऊपरकी ओर उठ रही है ऐसे, तोतेके पखोके समान हरित वर्णकी मणियोंकी धूलीसे कही कही व्याप्त हुआ वह धूलीसाल ऐसा अच्छा सुशोभित हो रहा था मानो कमलिनीके छोटे छोटे नये पत्तोंसे ही व्याप्त हो रहा हो ॥८५॥ वह कही कही पर चन्द्रकान्तमणिके चूर्णसे बना हुआ था और चांदनीकी शोभा धारण कर रहा था फिर भी लोगोंके चित्तको अनुरक्त अर्थात् लाल लाल कर रहा था यह भारी आश्चर्यकी बात

---

१ -मभादास्थान म०, ल०। २ शिल्पाचार्य। ३ कर्मशूरः। ४ अनुवक्ष्यते। ५ शोभासग्रहः। ६ आकर्णनेन। ७ समवसरणस्थलस्य। ८ वलयः। ९ व्याजात्। १० परिकरः। ११ परिवेष्टयति स्म। १२ धूलिशाल। १३ कीरपक्ष। १४ कमलकोमलपत्रैः। १५ सम्यग्विस्तृत.। १६ तीव्रानुरागसहितम्, ध्वनावरुणिमाक्रान्तम्।

स्फुरन्मरकताम्भोजरागा[१]लोकैः कलम्बितैः[२] । क्वचिदिन्द्रधनुर्लेखां खाङ्गणे गणयन्निव[३] ॥८७॥
क्वचित्पयोजरागेन्द्रनीलालोकैः[४] परिष्कृतः[५] । [६]परागसात्कृतैर्भर्त्रा[७] कामक्रोधांशकैरिव ॥८८॥
क्वचित्क्व चित्तजन्मासौ लीनो जाल्मो[८] विलोक्यताम् । निर्दाह्योऽस्माभिरित्युच्चैः ध्यानार्चिष्मानिवोत्थितः ८९
विभाव्यते स्मयः[९] प्रोच्चैः ज्वलन् [१०]रौक्मैं रजश्चयैः । यश्चोच्चावचरत्नांशुजालैर्जटिलयन्नभः ॥९०॥
चतसृष्वपि दिक्ष्वस्य हेमस्तम्भाग्रलम्बिताः । तोरणा [११]मकरास्योढरत्नमाला विरेजिरे ॥९१॥
ततोऽन्तरन्तरं[१२] किञ्चिद् गत्वा हाटकनिर्मिताः । रेजुर्मध्येषु वीथीनां मानस्तम्भाः समुच्छ्रिताः ॥९२॥
चतुर्गोपुरसम्बद्धसालत्रितयवेष्टिताम् । जगतीं जगतीनाथस्नपनाम्बुपवित्रिताम् ॥९३॥
हैमषोडशसोपानां स्वमध्यार्पितपीठिकाम् । [१३]न्यस्तपुष्पोपहारार्चाम् अर्च्यां[१४] नृसुरदानवैः ॥९४॥
अधिष्ठिता विरेजुस्ते मानस्तम्भा नभोलिहः । ये दूराद्वीक्षिता मानं स्तम्भयन्त्याशु दुर्दृशाम्[१५] ॥९५॥
नभःस्पृशो महामाना[१६] घण्टाभिः परिवारिताः । सचामरध्वजा रेजुः स्तम्भास्ते दिग्गजायिताः ॥९६॥

थी (परिहार पक्षमे–अनुरागसे युक्त कर रहा था) ॥८६॥ कहीपर परस्परमे मिली हुई मरकतमणि और पद्मरागमणिकी किरणोंसे वह ऐसा जान पड़ता था मानो आकाशरूपी आगनमे इन्द्रधनुषकी शोभा ही वढा रहा हो ॥८७॥ कहीपर पद्मरागमणि और इन्द्रनील-मणिके प्रकाशसे व्याप्त हुआ वह धूलीसाल ऐसा जान पडता था मानो भगवान्के द्वारा चूर्ण किये गये काम और क्रोधके अशोसे ही बना हो ॥८८॥ कही कहीपर सुवर्णकी धूलीके समूहसे देदीप्यमान होता हुआ वह धूलिसाल ऐसा अच्छा जान पड़त था मानो 'वह धूर्त कामदेव कहाँ छिपा है उसे देखो, वह हमारे द्वारा जलाये जानेके योग्य है' ऐसा विचारकर ऊँची उठी हुई अग्निका समूह हो। इसके सिवाय वह छोटे-वड़े रत्नोंकी किरणावलीसे आकाशको भी व्याप्त कर रहा था ॥ ९-९०॥ इस धूलीसालके बाहर चारों दिशाओमे सुवर्णमय खभोके अग्रभागपर अवलम्बित चार तोरणद्वार सुशोभित हो रहे थे, उन तोरणोमे मत्स्यके आकार बनाये गये थे और उनपर रत्नोंकी मालाएँ लटक रही थी ॥९१॥ उस धूलीसालके भीतर कुछ दूर जाकर गलियोंके वीचोबीचमे सुवर्णके बने हुए और अतिशय ऊँचे मानस्तम्भ सुशोभित हो रहे थे। भावार्थ–चारों दिशाओंमे एक एक मानस्तम्भ था ॥९२॥ जिस जगती पर मानस्तम्भ थे वह जगती चार चार गोपुरद्वारोंसे युक्त तीन कोटोंसे घिरी हुई थी, उसके बीचमे एक पीठिका थी। वह पीठिका तीनों लोकोंके स्वामी जिनेन्द्रदेवके अभिषेकके जलसे पवित्र थी, उसपर चढनेके लिये सुवर्णकी सोलह सीढिया बनी हुई थी, मनुप्य देव दानव आदि सभी उसकी पूजा करते थे और उसपर सदा पूजाके अर्थ पुप्पोका उपहार रक्खा रहता था, ऐसी उस पीठिकापर आकाशको स्पर्श करते हुए वे मानस्तम्भ सुशोभित हो रहे थे जो दूरसे दिखाई देते ही मिथ्यादृष्टि जीवोंका अभिमान वहुत शीघ्र नष्ट कर देते थे ॥९३–९५॥ वे मानस्तम्भ आकाशका स्पर्श कर रहे थे, महाप्रमाणके धारक थे, घंटाओंसे घिरे हुए थे, और चमर तथा ध्वजाओंसे सहित थे इसलिये ठीक दिग्गजोंके समान

---

१ पद्मरागकान्तिभि.। २ मिश्रितैः। ३ 'गुणयन्निव' इति पाठान्तरम्। द्विगुणीकुर्वन्निव। वर्धयन्निवेत्यर्थः। ४ किरणै.। ५ अलङ्कृत.। ६ चूर्णीकृतै.। ७ सर्वज्ञेन। ८ नीच·। 'विवर्ण. पामरो नीचः प्राकृतश्च पृथग्जन.। विहीनो पशवो जाल्म क्षुल्लकश्चेतरश्च सः।' इत्यभिधानात्। अथवा 'असमीक्ष्यकारी।' 'जाल्मोऽसमीक्ष्यकारी स्यात्' इत्यभिधानात्। तथा हि– 'चिरप्रव्रजित. स्थविरः श्रुतपारग.। तपस्वीति यतो नास्ति गणनाविषमायुधे' इत्युक्त-वत्वात् असमीक्ष्यकारीति वचन व्यक्त भवति। ९ गर्वः। १० सौवर्णै। ११ मकरमुखधृतः, मकरालङ्कारकीर्तिमुखधृत इत्यर्थ। १२ अभ्यन्तरे। १३ रचित। १४ पूजाम्। १५ मिथ्या-दृष्टीनाम्। १६ महाप्रमाणाः।

दिक्चतुष्टयमाश्रित्य रेजे स्तम्भचतुष्टयम् । [1]तत्तद्व्या[2]जादिवोद्भूतं जिनानन्तचतुष्टयम् ॥९७॥
हिरण्मयीर्जिनेन्द्रार्च्याः तेषां [3]बुध्नप्रतिष्ठिताः । देवेन्द्राः पूजयन्ति स्म क्षीरोदाम्भोभिषेचनैः ॥९८॥
नित्यातोद्य[4]महावाद्यैर्नित्यसङ्गीतमङ्गलैः । नृत्तैर्नित्यप्रवृत्तैश्च मानस्तम्भाः स्म भान्त्यमी ॥९९॥
पीठिका जगतीमध्ये तन्मध्ये च त्रिमेखलम् । पीठं तन्मूर्ध्निसद्[5]बुध्ना मानस्तम्भा प्रतिष्ठिताः ॥१००॥
हिरण्मयाङ्गाः प्रोत्तुङ्गाः मूर्ध्निच्छत्रत्रयाङ्किताः । सुरेन्द्रनिर्मितत्वाच्च प्राप्तेन्द्र[6]ध्वजरूढिकाः ॥१०१॥
मानस्तम्भान्महामान[7]योगात्त्रैलोक्यमाननात्[8] । अन्वर्थसञ्ज्ञया तज्ज्ञैर्मानस्तम्भाः प्रकीर्तिताः ॥१०२॥
स्तम्भपर्यन्तभूभागम् अलञ्चक्रुः सहोत्पलाः । प्रसन्नसलिला वाप्यो भव्यानामिव शुद्धयः[9] ॥१०३॥
वाप्यस्ता रेजिरे फुल्लकमलोत्पलसम्पदः । भक्त्या जैनीं श्रियं द्रष्टुं भुवेवोद्घाटिता[10] दृशः ॥१०४॥
निलीनालिकुलै रेजुः उत्पलैस्ता[11] विकस्वरैः[12] । महोत्पलैश्च[13] संछन्नाः [14]साञ्जनैरिव लोचनैः ॥१०५॥
दिशं प्रति चतस्रस्ता स्रस्ताः[15] काञ्चीरिवाकुलाः । दधति स्म शकुन्तानां सन्ततीः स्वतटाश्रिताः ॥१०६॥

सुशोभित हो रहे थे क्योंकि दिग्गज भी आकाशका स्पर्श करनेवाले, महाप्रमाणके धारक, घटाओंसे युक्त तथा चमर और ध्वजाओंसे सहित होते है ॥९६॥ चार मानस्तम्भ चार दिशाओंमें सुशोभित हो रहे थे और ऐसे जान पडते थे मानो उन मानस्तम्भोंके छलसे भगवान्के अनन्तचतुष्टय ही प्रकट हुए हों ॥९७॥ उन मानस्तम्भोंके मूल भागमे जिनेन्द्र भगवान्की सुवर्णमय प्रतिमाए विराजमान थी जिनकी इन्द्रलोग क्षीरसागरके जलसे अभिषेक करते हुए पूजा करते थे ॥९८॥ वे मानस्तम्भ निरन्तर बजते हुए बड़े बड़े बाजोंसे निरन्तर होनेवाले मङ्गलमय गानों और निरन्तर प्रवृत्त होनेवाले नृत्योंसे सदा सुशोभित रहते थे ॥९९॥ ऊपर जगतीके बीचमे जिस पीठिकाका वर्णन किया जा चुका है उसके मध्यभागमे तीन कटनीदार एक पीठ था । उस पीठके अग्रभागपर ही वे मानस्तम्भ प्रतिष्ठित थे, उनका मूल भाग बहुत ही सुन्दर था, वे सुवर्णके बने हुए थे, बहुत ऊंचे थे, उनके मस्तकपर तीन छत्र फिर रहे थे, इन्द्रके द्वारा बनाये जानेके कारण उनका दूसरा नाम इन्द्रध्वज भी रूढ़ हो गया था । उनके देखनेसे मिथ्यादृष्टि जीवोंका सब मान नष्ट हो जाता था, उनका परिमाण बहुत ऊंचा था और तीन लोकके जीव उनका सन्मान करते थे इसलिये विद्वान् लोग उन्हे सार्थक नामसे मानस्तम्भ कहते थे ॥१००–१०२॥ जो अनेक प्रकारके कमलोंसे सहित थी, जिनमें स्वच्छ जल भरा हुआ था और जो भव्य जीवोंकी विशुद्धताके समान जान पडती थी ऐसी बावड़िया उन मानस्तम्भोंके समीपवर्ती भूभागको अलकृत कर रही थी ॥१०३॥ जो फूले हुए सफेद और नीले कमलरूपी सपदासे सहित थी ऐसी वे बावड़ियां इस प्रकार सुशोभित हो रही थी मानो भक्तिपूर्वक जिनेन्द्रदेवकी लक्ष्मीको देखनेके लिये पृथ्वीने अपने नेत्र ही उघाडे हो ॥१०४॥ जिनपर भ्रमरोका समूह बैठा हुआ है ऐसे फूले हुए नीले और सफेद कमलोंसे ढॅकी हुई वे बावड़िया ऐसी सुशोभित हो रही थी मानो अंजन सहित काले और सफेद नेत्रोंसे ही ढंक रही हों ॥१०५॥ वे बावड़िया एक एक दिशामें चार चार थी और उनके किनारेपर पक्षियोंकी शब्द करती हुई पङ्क्तियां बैठी हुई थीं जिनसे वे ऐसी जान पड़ती थी मानो उन्होंने शब्द करती हुई ढीली करधनी

---

१ मानस्तम्भचतुष्टयम् । २ मानस्तम्भव्याजात् । ३ मूल । बुध्न प्रतिष्ठिताः ल०, म० । ४ ताडचमान । ५ सन्मूला । ६ इन्द्रध्वजसञ्ज्ञयाप्राप्त प्रसिद्धयः । ७ महाप्रमाणयोगात । ८ पूजात् । ९ विशुद्धिपरिणामा । १० उन्मीलिता । ११ वाप्यः । १२ विकसनशीलै । १३ सिताम्भोजै । १४ सकज्जलै. । १५ श्लथा ।

बभुस्ता मणिसोपानाः स्फटिकोच्चतटीभुवः । भुवः[1] प्रसृतलावण्यरसाः [2]कुल्या इव श्रुताः[3] ॥१०७॥
द्विरेफगुञ्जनैर्मञ्जु गायन्त्यो वार्हतो गुणान् । नृत्यन्त इव जैनेशजयतोषान्महोर्मिभिः ॥१०८॥
कुर्वन्त्यो [4]वा जिनस्तोत्रं चक्रवाकविकूजितैः । सन्तोषं दर्शयन्त्यो वा प्रसन्नोदकधारणात् ॥१०९॥
नन्दोत्तरादिनामानः[5] सरस्यस्तास्तटश्रितैः । पादप्रक्षा[6]लनाकुण्डैः बभुः सप्रसवा[7] इव ॥११०॥
स्तोकान्तरं ततोऽतीत्य तां महीमम्बुजैश्चिता । परिवव्रेऽन्तरा[8] वीथीं वीथीञ्च जलखातिका ॥१११॥
स्वच्छाम्बुसम्भृता रेजे सा खाता[9] पावनी[10] नृणाम् । [11]सुरापगेव तद्रूपा[12] विभुं सेवितुमाश्रिता ॥११२॥
सङ्क्रा[13]न्ताशेषतार[14]र्क्षप्रतिबिम्बाम्बरश्रियम् । याधात्स्फटिकसन्द्रा[15]वशुचिभिः सलिलैर्भृशा ॥११३॥
सा स्म रत्नतटैर्धत्ते पक्षिमालां कलस्वनाम् । तरङ्गकरसन्धाया रसनामिव [16]सद्रुचिम् ॥११४॥
यादोदोर्घट्टनोद्धूतैः तरङ्गैः पवनाहतैः । प्रनृत्यन्तीव सा रेजे तोषाज्जिनजयोत्सवे ॥११५॥

ही धारण की हो ॥१०६॥ उन बावड़ियोंमें मणियोंकी सीढियां लगी हुई थी, उनके किनारे की ऊंची उठी हुई जमीन स्फटिक मणिकी बनी हुई थी और उनमें पृथिवीसे निकलता हुआ लावण्यरूपी जल भरा हुआ था, इस प्रकार वे प्रसिद्ध बावड़ियां कृत्रिम नदीके समान सुशोभित हो रही थी ॥१०७॥ वे बावडियां भ्रमरोकी गुंजारसे ऐसी जान पडती थी मानो अच्छी तरहसे अरहन्त भगवान्के गुण ही गा रही हों, उठती हुई बड़ी बड़ी लहरोंसे ऐसी जान पड़ती थी मानो जिनेन्द्र भगवान्की विजयसे सन्तुष्ट होकर नृत्य ही कर रही हों, चकवा-चकवियोंके शब्दोंसे ऐसी जान पडती थी मानो जिनेन्द्रदेवका स्तवन ही कर रही हों, स्वच्छ जल धारण करनेसे ऐसी जान पड़ती थी मानो सतोष ही प्रकट कर रही हों, और किनारे पर बने हुए पाव धोनेके कुण्डोंसे ऐसी जान पडती थी मानो अपने अपने पुत्रोंसे सहित ही हों, इस प्रकार नन्दोत्तरा आदि नामोंको धारण करनेवाली वे बावड़ियां बहुत ही अधिक सुशोभित हो रही थीं ॥१०८-११०॥ उन बावड़ियोंसे थोड़ी ही दूर आगे जानेपर प्रत्येक वीथी (गली)को छोड़कर जलसे भरी हुई एक परिखा थी जो कि कमलोंसे व्याप्त थी और समवसरणकी भूमिको चारों ओरसे घेरे हुए थी ॥१११॥ स्वच्छ जलसे भरी हुई और मनुष्योंको पवित्र करनवाली वह परिखा ऐसी सुशोभित हो रही थी मानो परिखाका रूप धरकर आकाशगंगा ही भगवान्की सेवा करनेके लिये आई हो ॥११२॥ वह परिखा स्फटिक मणिके निष्यन्दके समान स्वच्छ जलसे भरी हुई थी और उसमे समस्त तारा तथा नक्षत्रोंका प्रतिविम्ब पड़ रहा था, इसलिये वह आकाशकी शोभा धारण कर रही थी ॥११३॥ वह परिखा अपने रत्नमयी किनारोंपर मधुर शब्द करती हुई पक्षियोंकी माला धारण कर रही थी जिससे ऐसी जान पड़ती थी मानो लहरोंरूपी हाथोंसे पकड़ने योग्य, उत्तम कान्तिवाली करधनी ही धारण कर रही हो ॥११४॥ जलचर जीवोंकी भुजाओंके संघट्टनसे उठी हुई और वायु द्वारा ताड़ित हुई लहरोंसे वह परिखा ऐसी सुशोभित

---

१ भूतलात् । २ कृत्रिमा सरित् । ३ प्रसिद्धा । स्रुता द० । ४ इव । ५ नन्दोत्तरा नन्दा नन्दवती नन्दघोषा इति चतस्रो वाप्यः पूर्वमानस्तम्भस्य पूर्वादिदिक्षु प्रदक्षिणक्रमेण स्युः । विजया वैजयन्ती जयन्त्यपराजिता इति चतस्रः दक्षिणमानस्तम्भस्य पूर्वादिदिक्षु तथा स्यु. । शोका सुप्रतिबुद्धा कुमुदा पुण्डरीका इति चतस्रः पश्चिममानस्तम्भस्य पूर्वादिदिक्षु प्रदक्षिणक्रमेण स्यु । हृदयानन्दा महानन्दा सुप्रबुद्धा प्रभंकरीति चतस्रः उत्तरमानस्तम्भस्य पूर्वादिदिक्षु स्युः । ६ एकैकां वापीं प्रति पादप्रक्षालनार्थकुण्डद्वयम् । ७ सपुत्राः । ८ वीथिवीथ्योर्मध्ये, मार्गद्वयमध्ये इत्यर्थः । 'हाधिक्समयानिकषा' इत्यादि सूत्रेण द्वितीया । ९ खातिका । १० पवित्रीकुर्वती । ११ आकाशगगा । १२ खातिकारूपा । १३ सलग्न । १४ तारकानक्षत्र । १५ द्रवम् । १६ सद्रुचम् ल०, म० ।

वी[1]च्यन्तर्वलितोद्वृत्तशफरीकुलसङ्कुला । सा प्रायोऽभ्यस्यमानेव नाकस्त्रीनेत्रविभ्रमान् ॥११६॥
नूनं सुराङ्गनानेत्रविलासैस्ताः पराजिताः । [2]शफर्यो वीचिमालासु ह्रियेवान्त[3]र्दधुर्मुहुः ॥११७॥
तदभ्य[4]न्तरभूभागं पर्यष्क[5]तलतावनम् । वल्लीगुल्मद्रुमोद्भूतसर्वर्तुकु[6]सुमाचितम् ॥११८॥
पुष्पवल्ल्यो व्यराजन्त यत्र पुष्पस्मितोज्ज्वलाः । स्मितलीलां द्युनारीणां नाटयन्त्य इव स्फुटम् ॥११९॥
भ्रमरैर्मञ्जुगुञ्जद्भिः आवृतान्ता[7] विरेजिरे । यत्रानिलपटच्छन्नविग्रहा इव वीरुधः ॥१२०॥
अशोकलतिका यत्र दधुराताम्रपल्लवान् । स्पर्धमाना इवाताम्रैः अप्सरःकरपल्लवैः ॥१२१॥
यत्र मन्दानिलोद्धूत[8]किञ्जल्का[9]स्तरमम्बरम् । धत्ते स्म पटवासा[10]भां पिञ्जरीकृतदिङ्मुखाम् ॥१२२॥
प्रतिप्रसवमासीनमञ्जुगुञ्जन्मधुव्रतम् । विडम्बयदिवाभाति [11]यत्सहस्राक्षविभ्रमम् ॥१२३॥
सुमनोमञ्जरीपुञ्जात् किञ्जल्कं सान्द्रमाहरन् । यत्र गन्धवहो मन्दं वाति स्मान्दोलयँल्लताः ॥१२४॥
यत्र क्रीडाद्रयो रम्याः सशय्याश्च लतालयाः । धृतये स्म सुरस्त्रीणां कल्प[12]न्ते शिशिरानिलाः ॥१२५॥

हो रही थी मानो जिनेन्द्र भगवान्‌के विजयोत्सवमे सतोषसे नृत्य ही कर रही हो ॥११५॥ लहरोंके भीतर घूमते घूमते जब कभी ऊपर प्रकट होनेवाली मछलियोंके समूहसे भरी हुई वह परिखा ऐसी जान पड़ती थी मानो देवागनाओंके नेत्रोके विलासों (कटाक्षों)का अभ्यास ही कर रही हो ॥११६॥ जो मछलियां उस परिखाकी लहरोंके बीचमें बार बार डूब रही थी वे ऐसी जान पडती थी मानो देवांगनाओंके नेत्रोंके विलासोंसे पराजित होकर ही लज्जावश लहरोंमे छिप रही थी ॥११७॥ उस परिखाके भीतरी भूभागको एक लतावन घेरे हुए था, वह लतावन लताओं, छोटी-छोटी झाड़ियों और वृक्षोमे उत्पन्न हुए सब ऋतुओंके फूलोंसे सुशोभित हो रहा था ॥११८॥ उस लतावनमें पुष्परूपी हास्यसे उज्ज्वल अनेक पुष्पलताए सुशोभित हो रही थी जो कि स्पष्टरूपसे ऐसी जान पड़ती थी मानो देवांगनाओंके मन्द हास्यका अनुकरण ही कर रही हों ॥११९॥ मनोहर गुंजार करते हुए भ्रमरोंसे जिनका अन्त भाग ढका हुआ है ऐसी उस वनकी लताएं इस भांति सुशोभित हो रही थीं मानो उन्होंने अपना शरीर नील वस्त्रसे ही ढक लिया हो ॥१२०॥ उस लतावनकी अशोक लताएं लाल लाल नये पत्ते धारण कर रही थी । और उनसे वे ऐसी जान पड़ती थीं मानो अप्सराओंके लाल लाल हाथरूपी पल्लवोंके साथ स्पर्द्धा ही कर रही हों ॥१२१॥ मन्द-मन्द वायुके द्वारा उड़ी हुई केशरसे व्याप्त हुआ और जिसने समस्त दिशाएँ पीली-पीली कर दी ह ऐसा वहांका आकाश सुगन्धित चूर्ण (अथवा चंदोवे)की शोभा धारण कर रहा था ॥१२२॥ उस लतावनमे प्रत्येक फूलपर मधुर शब्द करते हुए भ्रमर बैठे हुए थे जिनसे वह ऐसा जान पडता था मानो हजार नेत्रोंको धारण करनेवाले इन्द्रके विलासकी विडम्बना ही कर रहा हो ॥१२३॥ फूलोंकी मंजरियोंके समहसे सघन परागको ग्रहण करता हुआ और लताओंको हिलाता हुआ वायु उस लतावनमे धीरे धीरे बह रहा था ॥१२४॥ उस लतावनमे बने हुए मनोहर क्रीड़ा पर्वत, शय्यायोंसे सुशोभित लतागृह और ठडी ठडी हवा देवांगनाओंको

---

१ वीचिमध्ये वक्रेण वलितोद्वात । २ मत्स्या. । ३ तिरोभूताः । ४ खातिकाभ्यन्तर । ५ अलङ्करोति स्म । ६ कुसुमाञ्चितम् ल०, म० । ७ पर्यन्त । ८ –द्धूतैः किञ्जल्कैस्ततमम्बरम् द०, प०, अ०, स० । ९ केशरव्याप्तम् । १० शोभाम् । ११ लतावनम् । १२ समर्था भवन्ति ।

वल्लीः कुसुमिता यत्र स्पृशन्ति स्म मधुव्रताः । रज[1]स्वला अपि प्रायः क्व शौचं मधु[2]पायिनाम् ॥१२६॥
लताभवनमध्यस्था हिमा[3]नीस्पर्शशीतलाः । चन्द्रकान्तशिला यत्र विश्र[4]मायामरेशिनाम् ॥१२७॥
ततोऽध्वानमतीत्यान्तः कियन्तमपि तां महीम्[5] । प्रकारः प्रथमो वव्रे निषधाभो हिरण्मयः ॥१२८॥
रुरुचेऽसौ महान् सालः क्षितिं तां परितः स्थितः । यथासौ चक्रवा[6]लाद्रिः नृलोकाध्युषितां भुवम् ॥१२९॥
नूनं सालनिभि[7]नैत्य सुरचापपरः[8]शतम् । तामलङ्कुरुते स्म क्ष्मां पिञ्जरीकृतखाङ्गणम् ॥१३०॥
यस्योपरितले लग्ना सुव्यक्ता मौक्तिकावली । तारातततिरियं किंस्विदित्याशङ्कास्पदं नृणाम् ॥१३१॥
क्वचिद्विद्रुमसङ्घातः पद्मरागांशुरञ्जितः । यस्मिन् सान्ध्यघनच्छायम् आविष्कर्तुमलं तराम् ॥१३२॥
क्वचिन्नवघ[9]नच्छायः क्वचिच्छाड्[10]वलसच्छविः । क्वचिच्च सुरगो[11]पाभो विद्युदापिञ्जरः क्वचित् ॥१३३॥
क्वचिद्विचित्ररत्नांशुरचितेन्द्रशरासनः । घनकालस्य वैदग्धीं स सालोलं व्यडम्बयत् ॥१३४॥

बहुत ही संतोष पहुँचाती थी ॥१२५॥ उस वनमें अनेक कुसुमित अर्थात् फूली हुई और रजस्वला अर्थात् परागसे भरी हुई लताओका मधुव्रत अर्थात् भ्रमर स्पर्श कर रहे थे सो ठीक ही है क्योंकि मधुपायी अर्थात् मद्य पीनेवालोंके पवित्रता कहां हो सकती है। भावार्थ– जिस प्रकार मधु (मदिरा) पान करनेवाले पुरुषोके पवित्र और अपवित्रका कुछ भी विचार नही रहता, वे रजोधर्मसे युक्त ऋतुमती स्त्रीका भी स्पर्श करने लगते है, इसी प्रकार मधु (पुष्परस) का पान करनेवाले उन भ्रमरोंके भी पवित्र अपवित्रका कुछ भी विचार नही था, क्योंकि वे ऊपर कही हुई कुसुमित और रजस्वला लतारूपी स्त्रियोंका स्पर्श कर रहे थे। यथार्थमें कुसुमित और रजस्वला लताए अपवित्र नही होती यहा कविने श्लेष और समासोक्ति अलंकारकी प्रधानतासे ही ऐसा वर्णन किया है ॥१२६॥ उस वनके लतागृहोंके बीचमे पड़ी हुई बर्फके समान शीतल स्पर्शवाली चन्द्रकान्त मणिकी शिलायें इन्द्रोंके विश्रामके लिये हुआ करती थीं ॥१२७॥ उस लतावनके भीतरकी ओर कुछ मार्ग उल्लंघन कर निषध पर्वतके आकारका सुवर्णमय पहला कोट था जो कि उस समवसरण भूमिको चारों ओर से घेरे हुए था ॥१२८॥ उस समवसरणभूमिके चारों ओर स्थित रहनेवाला वह कोट ऐसा सुशोभित हो रहा था मानो मनुष्यलोककी भूमिके चारों ओर स्थित हुआ मानुषोत्तर पर्वत ही हो ॥१२९॥ उस कोटको देखकर ऐसा मालूम होता था मानो आकाश-रूपी आगनको चित्र विचित्र करनेवाला सैकड़ों इन्द्रधनुषोका समूह ही कोटके बहानेसे आकर उस समवसरणभूमिको अलंकृत कर रहा हो ॥१३०॥ उस कोटके ऊपरी भाग पर स्पष्ट दिखाई देते हुए जो मोतियोंके समूह जडे हुए थे वे 'क्या यह ताराओंका समूह है, इस प्रकार लोगोंकी शंकाके स्थान हो रहे थे ॥१३१॥ उस कोटमे कही कही जो मूगाओंके समूह लगे हुए थे वे पद्मराग मणियोंकी किरणोंसे और भी अधिक लाल हो गए थे और संध्याकालके बादलोंकी शोभा प्रकट करनेके लिए समर्थ हो रहे थे ॥१३२॥ वह कोट कही तो नवीन मेघके समान काला था, कही घासके समान हरा था, कही इन्द्रगोपके समान लाल लाल था, कहीं बिजलीके समान पीला पीलाथा और कही अनेक प्रकारके रत्नोंकी किरणों से इन्द्रधनुषकी शोभा उत्पन्न कर रहा था। इस प्रकार वह वर्षाकालकी शोभाकी विडम्बना

---

१ परागवती। ध्वनौ ऋतुमती। २ मधुपानाम्। ध्वनौ मद्यपायिनाम्। ३ हिमसंहतिः। ४ विश्रामाया अ०, ल०, म०, ल०। ५ वल्लीवनभूमिम्। ६ मानुषोत्तरपर्वतः। ७ व्याजेन। ८ बहुशतम्। ९ प्रावृड्मेघ। १० हरित। ११ इन्द्रगोपकान्तिः। इन्द्रगोप इति प्रावृट्कालभवत्रसविशेषः।

क्वचिद् द्विपहरिव्याघ्ररूपैर्मिथुनवर्त्तिभिः[1]। निचितः क्वचिदुद्देशे[2] शुकैर्हंसैश्च बर्हिणैः ॥१३५॥
विचित्ररत्ननिर्माणैः मनुष्यमिथुनैः क्वचित् । क्वचिच्च कल्पवल्लीभिः बहिरन्तश्च चित्रितः ॥१३६॥
हसन्निवोन्मिषद्रत्नमयूखनिवहैः क्वचित् । क्वचित्सिंहरवान् कुर्वन्निवोत्सर्पत्प्रतिध्वनिः ॥१३७॥
[3]दीप्राकारः स्फुरद्रत्नरुचिरा[4] रुद्धखाङ्गणः । निषधाद्रिप्रतिस्पर्धी स सालो व्यरुचत्तराम् ॥१३८॥
महान्ति गोपुराण्यस्य विबभुर्दिक्चतुष्टये । [5]राजतानि खगेन्द्राद्रेः[6] शृङ्गाणीव स्पृशन्ति खम् ॥१३९॥
ज्योत्स्नं[7]मन्यानि तान्युच्चैः त्रिभूमानि[8] चकासिरे । प्रहासमिव तन्वन्ति निर्जित्य त्रिजगच्छ्रियम् ॥१४०॥
पद्मरागमयैरुच्चैः शिखरैर्व्योमलङ्घिभिः । दिशः पल्लवयन्तीव प्रसरैः शोणरोचिषाम् ॥१४१॥
जगद्गुरोर्गुणानत्र[9] गायन्ति सुरगायनाः । केचिच्छृण्वन्ति नृत्यन्ति केचि[10]दाविर्भवत्स्मिताः ॥१४२॥
शतमष्टोत्तरं तेषु मङ्गलद्रव्यसम्पदः । भृङ्गारकलशाब्दाद्याः प्रत्येकं गोपुरेष्वभान् ॥१४३॥
रत्नाभरणभाभारपरिपिञ्जरिताम्बराः । प्रत्येकं तोरणास्तेषु शतसङ्ख्या बभासिरे ॥१४४॥
स्वभावभास्वरे भर्तुः देहे स्वानवकाशताम् । मत्वेवाभरणान्यास्थुः उद्बद्धान्यनुतोरणम् ॥१४५॥

कर रहा था ॥१३३-१३४॥ वह कोट कही तो युगल रूपसे बने हुए हाथी-घोडे और व्याघ्रोंके आकारसे व्याप्त हो रहा था, कही तोते, हस और मयूरोंके जोड़ोसे उद्भासित हो रहा था कही अनेक प्रकारके रत्नोंसे बने हुए मनुष्य और स्त्रियोंके जोड़ोंसे सुशोभित हो रहा था, कही भीतर और बाहरकी ओर बनी हुई कल्पलताओंसे चित्रित हो रहा था, कही पर चमकते हुए रत्नोकी किरणोंसे हँसता हुआ सा जान पड़ता था और कही पर फैलती हुई प्रतिध्वनिसे सिहनाद करता हुआ सा जान पड़ता था ॥१३५-१३७॥ जिसका आकार बहुत ही देदीप्यमान है, जिसने अपने चमकीले रत्नोंकी किरणोसे आकाशरूपी आंगनको घेर लिया है और जो निषध कुलाचलके साथ ईर्ष्या करनेवाला है ऐसा वह कोट बहुत ही अधिक शोभायमान हो रहा था ॥१३८॥ उस कोटके चारो दिशाओंमे चांदीके बने हुए चार बड़े बड़े गोपुरद्वार सुशोभित हो रहे थे जो कि विजयार्ध पर्वतकी शिखरोंके समान आकाशका स्पर्श कर रहे थे ॥१३९॥ चाँदनीके समूहके समान निर्मल, ऊचे और तीन तीन खण्डवाले वे गोपुर-द्वार ऐसे सुशोभित हो रहे थे मानो तीनों लोकोंकी शोभाको जीतकर हंस ही रही हों ॥१४०॥ वे गोपुरद्वार पद्मराग मणिके बने हुए और आकाशको उल्लंघन करनेवाले शिखरोंसे सहित थे तथा अपनी फैलती हुई लाल-लाल किरणोंके समूहसे ऐसे जान पड़ते थे मानो दिशाओंको नये नये कोमल पत्तोंसे युक्त ही कर रहे हों ॥१४१॥ इन गोपुर-दरवाजोंपर कितने ही गानेवाले देव जगद्गुरु भगवान् वृषभदेवके गुण गा रहे थे, कितने ही उन्हें सुन रहे थे और कितने ही मन्द-मन्द मुसकाते हुए नृत्य कर रहे थे ॥१४२॥ उन गोपुर-दरवाजोंमेसे प्रत्येक दरवाजेपर भृंगार-कलश और दर्पण आदि एक सौ आठ मंगलद्रव्यरूपी संपदाएँ सुशोभित हो रही थीं ॥१४३॥ तथा प्रत्येक दरवाजेपर रत्नमय आभूषणोंकी कान्तिके भारसे आकाशको अनेक वर्णका करनेवाले सौ सौ तोरण शोभायमान हो रहे थे ॥१४४॥ उन प्रत्येक तोरणोंमें जो आभूषण बँधे हुए थे वे ऐसे जान पड़ते थे मानो स्वभावसे ही सुन्दर भगवान्के शरीरमें अपने

१ –वर्तिभिः प०, द०। २ प्रदेशे। ३ दीप्ताकारः ल०। ४ रुचिसंरुद्ध–अ०। ५ रजतमयानि। ६ विजयार्द्धगिरेः। ७ ज्योत्स्नाशब्दात् परान्मन्यतेर्धातो. 'कर्तुश्च' इति खप्रत्ययः, पुनः 'खित्यनव्ययस्य' इति यम्, ह्रस्वः। अनव्ययस्याजन्तस्य खिदन्त उत्तरपदे ह्रस्वादेशो भवति। 'दिवादेः श्यः इति श्यः। ८ त्रिभूमिकानि। त्रितलानि इत्यर्थः। ९ गोपुरेषु। १० केचित् स्माविभवतस्मिताः द०, इ०, प०, ल०, म०।

निधयो नवशङ्खाद्याः[1] तद्द्वारोपान्तसेविनः । शशंसुः प्राभवं[2] जैनं भुवनत्रितयातिगम् ॥१४६॥
त्रिजगत्प्रभुणा नूनं विमोहेनावधीरिताः[3] । बहिर्द्वारं स्थिता दूरान्निधयस्तं सिषेविरे ॥१४७॥
तेषा[4]मन्तर्महावीथ्या उभयोर्भागयोरभूत् । नाट्यशालाद्वयं दिक्षु प्रत्येकं चतसृष्वपि ॥१४८॥
तिसृभिर्भूमिभिर्नाट्यमण्डपौ तौ विरेजतुः । विमुक्तेस्त्र्या[5]त्मकं मार्गं नृ[6]णां वक्तुमिवोद्यतौ ॥१४९॥
हिरण्मयमहास्तम्भौ शुम्भत्स्फटिकभित्तिकौ । तौ रत्नशिखराक्रान्तनभोभागौ विरेजतुः ॥१५०॥
नाट्यमण्डपरङ्गेषु नृत्यन्ति स्मामरस्त्रियः । शत[7]ह्रदा इवामग्नमूर्तयः स्वप्रभाह्रदे ॥१५१॥
गायन्ति जिनराजस्य विजयं ताः स्म सस्मि[8]ताः । [9]तमेवाभिनयन्त्योऽमूः चिक्षिपुः पौष्पमञ्जलिम् ॥१५२॥
समं वीणानिनादेन मृदङ्गध्वनिरुच्चरन् । व्यतनोत्प्रावृडारम्भशङ्कां तत्र शिखण्डिनाम् ॥१५३॥
शरदभ्रनिभे तस्मिन् द्वितये नाट्यशालयोः । विद्युद्विलासमातेनुः नृत्यन्त्यः सुरयोषितः ॥१५४॥
किन्नराणां कलक्वाणैः सोद्गानैरुपवीणितैः[10] । तत्रासक्तिं परां भेजुः प्रेक्षिणां चित्तवृत्तयः ॥१५५॥
ततो धूपघटौ द्वौ द्वौ वीथीनामुभयोर्दिशोः । धूपधूमैर्व्यरुन्धातां प्रसरद्भिर्नभोऽङ्गणम् ॥१५६॥

लिये अवकाश न देखकर उन तोरणोंमें ही आकर बँध गये हों ॥१४५॥ उन गोपुरद्वारोंके समीप प्रदेशोंमें जो शंख आदि नौ निधियां रक्खी हुई थी वे जिनेन्द्र भगवान्‌के तीनों लोकोंको उल्लंघन करनेवाले भारी प्रभावको सूचित कर रही थी ॥१४६॥ अथवा दरवाजेके बाहर रक्खी हुई वे निधियां ऐसी मालूम होती थी मानो मोहरहित, तीनों लोकोंके स्वामी भगवान् जिनेन्द्रदेवने उनका तिरस्कार कर दिया था इसलिये दरवाजेके बाहर स्थित होकर दूरसे ही उनकी सेवा कर रही हों ॥१४७॥ उन गोपुरदरवाजोंके भीतर जो बड़ा भारी रास्ता था उसके दोनों ओर दो नाट्यशालाएँ थीं, इस प्रकार चारों दिशाओंके प्रत्येक गोपुर-द्वारमें दो-दो नाट्यशालाएँ थी ॥१४८॥ वे दोनों ही नाट्यशालाएँ तीन-तीन खण्डकी थी और उनसे ऐसी जान पड़ती थी मानो लोगोंके लिये सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्रके भेदसे तीन भेदवाला मोक्षका मार्ग ही बतलानेके लिये तैयार खड़ी हों ॥१४९॥ जिनके बड़े-बड़े खम्भे सुवर्णके बने हुए है, जिनकी दीवाले देदीप्यमान स्फटिक मणिकी बनी हुई है और जिन्होंने अपने रत्नोंके बने हुए शिखरोंसे आकाशके प्रदेशको व्याप्त कर लिया है ऐसी वे दोनों नाट्यशालाएँ बहुत ही अधिक सुशोभित हो रही थीं ॥१५०॥ उन नाट्यशाओंकी रङ्गभूमिमें ऐसी अनेक देवांगनाएँ नृत्य कर रही थी, जिनके शरीर अपनी कान्तिरूपी सरोवरमे डूबे हुए थे और जिससे वे बिजलीके समान सुशोभित हो रही थी ॥१५१॥ उन नाट्यशालाओंमें इकट्ठी हुई वे देवांगनाएं जिनेन्द्रदेवकी विजयके गीत गा रही थी और उसी विजयका अभिनय करती हुई पुष्पाञ्जलि छोड़ रही थीं ॥१५२॥ उन नाट्यशालाओंमें वीणाकी आवाजके साथ साथ जो मृदंगकी आवाज उठ रही थी वह मयूरोंको वर्षाऋतुके प्रारम्भ होनेकी शंका उत्पन्न कर रही थी ॥१५३॥ वे दोनों ही नाट्यशालाएं शरद्ऋतुके बादलोंके समान सफेद थी इसलिये उनमें नृत्य करती हुई वे देवांगनाएं ठीक बिजलीकी शोभा फैला रही थी ॥१५४॥ उन नाट्यशालाओंमें किन्नर जातिके देव उत्तम सगीतके साथ साथ मधुर शब्दोंवाली वीणा बजा रहे थे जिससे देखनेवालोंकी चित्तवृत्तियां उनमें अतिशय आसक्तिको प्राप्त हो रही थीं ॥१५५॥ उन नाट्यशालाओंसे कुछ आगे चलकर गलियोंके दोनों ओर दो-दो धूपघट रक्खे हुए थे जोकि फैलते हुए धूपके धुएंसे आकाशरूपी आंगनको

---

१ कालमहाकालपाण्डुमाणवशङ्खनैसर्पपद्मपिङ्गलनानारत्नाश्चेति । २ प्रभुत्वम् । ३ अवज्ञीकृताः । ४ गोपुराणाम् । ५ त्रैरूप्यम्, रत्नत्रयमिति यावत् । ६ नृणा द०, ल०, म०, प०, अ० । ७ विद्युताः । ८ संगताः । ९ विजयमेव । १० वीणया उपगीतैः ।

तद्धूपधूमसंरुद्धं नभो वीक्ष्य नभोजुषः। प्रावृट्पयोधराशङ्काम् अकालेपि व्यतानिषुः ॥१५७॥
दिशः सुरभयन्धूपो मन्दानिलवशोत्थितः। स रेजे पृथिवीदेव्या मुखामोद इवोच्छ्वसन् ॥१५८॥
तदामोदं समाघ्राय श्रेणयो मधुलिहिनाम्। दिशां मुखेषु वितता वितेनुरलकश्रियम् ॥१५९॥
इतो धूपघटामोदम् इतश्च सुरयोषिताम्। सुगन्धिमुखनिःश्वासमलिनो जघ्रुराकुलाः ॥१६०॥
मन्द्रध्वानैर्मृदङ्गानां स्तनयित्नुविडम्बिभिः। पतन्त्या पुष्पवृष्ट्या च सदात्रासीद् घनागमः ॥१६१॥
तत्र वीथ्यन्तरेष्वासंश्चतस्रो वनवीथयः। नन्दनाद्या वनश्रेण्यो विभुं द्रष्टुमिवागताः ॥१६२॥
अशोकसप्तपर्णाह्वचम्पकाम्रमहीरुहाम्। वनानि तान्यधुस्तोषादिवोच्चैः कुसुमस्मितम् ॥१६३॥
वनानि तरुभिश्चित्रैः फलपुष्पोपशोभिभिः। जिनस्यार्घ्यमिवोत्क्षिप्य तस्थुस्तानि जगद्गुरोः ॥१६४॥
वनेषु तरवस्तेषु रेजिरे पवनाहतैः। शाखाकरैर्मुहुर्नृत्यं तन्वाना इव सम्मदात् ॥१६५॥
सच्छायाः सफलास्तुङ्गा जननिर्वृतिहेतवः। सुराजान इवा भूवंस्ते द्रुमाः सुखशीतलाः ॥१६६॥
पुष्पामोदसमाहूतैः मिलितैरलिनां कुलैः। गायन्त इव गुञ्जद्भिः जिनं रेजुर्वनद्रुमाः ॥१६७॥

व्याप्त कर रहे थे ॥१५६॥ उन धूपघटोंके धुएंसे भरे हुए आकाशको देखकर आकाशमें चलनेवाले देव अथवा विद्याधर असमयमें ही वर्षाऋतुके मेघोंकी आशंका करने लगे थे ॥१५७॥ मन्द मन्द वायुके वशसे उडा हुआ और दिशाओंको सुगन्धित करता हुआ वह धूप ऐसा सुशोभित हो रहा था मानो उच्छ्वास लेनेसे प्रकट हुई पृथिवी देवीके मुखकी सुगन्धि ही हो ॥१५८॥ उस धूपकी सुगन्धिको सूघकर सब ओर फैली हुई भ्रमरोंकी पङ्क्तियां दिशारूपी स्त्रियोंके मुखपर फैले हुए केशोंकी शोभा बढ़ा रहे थे ॥१५९॥ एक ओर उन धूपघटोंसे सुगन्धि निकल रही थी और दूसरी ओर देवांगनाओंके मुखसे सुगन्धित निश्वास निकल रहा था। सो व्याकुल हुए भ्रमर दोनोंको ही सूघ रहे थे ॥१६०॥ वहांपर मेघोंकी गर्जनाको जीतनेवाले मृदगोंके शब्दोंसे तथा पड़ती हुई पुष्पवृष्टिसे सदा वर्षाकाल विद्यमान रहता था ॥१६१॥ धूपघटोंसे कुछ आगे चलकर मुख्य गलियोंके बगलमें चार चार वनकी वीथियां थी जोकि ऐसी जान पड़ती थी मानो नन्दन आदि वनोंकी श्रेणियां ही भगवान्के दर्शन करनेके लिये आई हों ॥१६२॥ वे चारो वन अशोक, सप्तपर्ण, चम्पक और आमके वृक्षोंके थे, उन सबपर फूल खिले हुए थे जिससे वे ऐसे जान पड़ते थे मानो सँतोषसे हँस ही रहे हों ॥१६३॥ फल और फूलोंसे सुशोभित अनेक प्रकारके वृक्षोंसे वे वन ऐसे जान पडते थे मानो जगद्गुरु जिनेन्द्रदेवके लिये अर्घ लेकर ही खड़े हों ॥१६४॥ उन वनोंमें जो वृक्ष थे वे पवनसे हिलती हुई शाखाओंसे ऐसे सुशोभित हो रहे थे मानो हर्षसे हाथ हिला-हिलाकर बार-बार नृत्य ही कर रहे हों ॥१६५॥ अथवा वे वृक्ष उत्तम छायासे सहित थे, अनेक फलोंसे युक्त थे, तुग अर्थात् ऊंचे थे, मनुष्योंके संतोषके कारण थे, सुख देनेवाले और शीतल थे इसलिये किन्ही उत्तम राजाओंके समान जान पड़ते थे क्योंकि उत्तम राजा भी उत्तम छाया अर्थात् आश्रयसे सहित होते हैं, अनेक फलोंसे युक्त होते हैं, तुंग अर्थात् उदारहृदय होते हैं, मनुष्योंके सुखके कारण होते हैं और सुख देनेवाले तथा शान्त होते है ॥१६६॥ फूलोंकी सुगन्धिसे बुलाये हुए और इसीलिये आकर इकट्ठे हुए तथा मधुर गुंजार करते हुए भ्रमरोंके समूहसे वे वृक्ष ऐसे सुशो-

---

१ निर्गच्छन्। २ आघ्रायन्ति स्म। ३ मेघ। ४ सुराजपक्षे कान्तिसहिताः। ५ पुष्पफलसहिताः। ६ उन्नताः, इतरजनेभ्योऽधिका इत्यर्थः। ७ द्रुमपक्षे सुखः शीतलः शीतगुणो येषा ते सुखशीतलाः। सुराजपक्षे सुखेन शीतलाः शीतीभूता इत्यर्थः।

क्वचिद्विरलमुन्मुक्तकुसुमास्ते महीरुहाः। पुष्पोपहारमातेनुरिव भक्त्या जगद्गुरोः ॥१६८॥
क्वचिद्विरुवतां[1] ध्वानैः अलिनां मदमञ्जुभिः[2]। मदनं तर्जयन्तीव वनान्यासन् समन्ततः ॥१६९॥
पुंस्कोकिलकलक्वाणैः आह्वयन्तीव सेवितुम्। जिनेन्द्रममराधीशान् वनानि विबभुस्तराम् ॥१७०॥
पुष्परेणुभिराकीर्णा वनस्याधस्तले मही। सुवर्णरजसास्तीर्णतलेवासीन्मनोहरा[3] ॥१७१॥
इत्यमूनि वनान्यासन् अतिरम्याणि पादपैः। यत्र पुष्पमयी वृष्टिः नर्तुपर्यायमैक्षत[4] ॥१७२॥
न रात्रिर्न दिवा तत्र[5] तरुभिर्भास्वरैर्भृशम्। तरुशैत्यादिवाबिभ्यन्[6]संजहार करान् रविः ॥१७३॥
अन्तर्वणं[7] क्वचिद्वाप्यः त्रिकोणचतुरस्रिकाः। [8]स्नातोत्तीर्णामरस्त्रीणां स्तनकुङ्कुमपिञ्जराः ॥१७४॥
पुष्करिण्यः[9] क्वचिच्चासन् क्वचिच्च कृतकाद्रयः। क्वचिद्रम्याणि हर्म्याणि क्वचिदाक्रीडमण्डपाः ॥१७५॥
क्वचित्प्रेक्षागृहाण्यासन् चि[10]त्रशालाः क्वचित्क्वचित्। एकशाला द्विशालाद्या महाप्रासादपङ्क्तयः ॥१७६॥
क्वचिच्च शाद्व[11]ला भूमिः इन्द्रगोपैस्तता क्वचित्। सरांस्यतिमनोज्ञानि सरितश्च ससैकताः ॥१७७॥

भित हो रहे थे मानो जिनेन्द्रदेवका गुणगान ही कर रहे हों ॥१६७॥ कही कही विरलरूपसे वे वृक्ष ऊपरसे फूल छोड़ रहे थे जिनसे ऐसे मालूम होते थे मानो जगद्गुरु भगवान्‌के लिये भक्तिपूर्वक फूलोंकी भेट ही कर रहे हो ॥१६८॥ कही कहीपर मधुर शब्द करते हुए भ्रमरोंके मद मनोहर शब्दोंसे वे वन ऐसे जान पडते थे मानो चारों ओरसे कामदेवकी तर्जना ही कर रहे हों ॥१६९॥ उन वनोमे कोयलोंके जो मधुर शब्द हो रहे थे उनसे वे वन ऐसे अच्छे सुशोभित हो रहे थे मानो जिनेन्द्र भगवान्‌की सेवा करनेके लिये इन्द्रोंको ही बुला रहे हों ॥१७०॥ उन वनोंमे वृक्षोके नीचेकी पृथ्वी फूलोंके परागसे ढकी हुई थी जिससे वह ऐसी मनोहर जान पडती थी मानो उसका तलभाग सुवर्णकी धूलिसे ही ढक रहा हो ॥१७१॥ इस प्रकार वे वन वृक्षोंसे बहुत ही रमणीय जान पड़ते थे, वहापर होनेवाली फूलोकी वर्षा ऋतुओंके परिवर्तनको कभी नही देखती थी अर्थात् वहा सदा ही सब ऋतुओके फूल फूले रहते थे ॥१७२॥ उन वनोंके वृक्ष इतने अधिक प्रकाशमान थे कि उनसे वहा न तो रातका ही व्यवहार होता था और न दिनका ही। वहाँ सूर्यकी किरणोंका प्रवेश नही हो पाता था जिससे ऐसा जान पड़ता था मानो वहाके वृक्षोंकी शीतलतासे डरकर ही सूर्यने अपने कर अर्थात् किरणों (पक्षमें हाथों) का संकोच कर लिया हो ॥१७३॥ उन वनोंके भीतर कही पर तिखूंटी और कहीं पर चौखूटी बावड़ियां थी तथा वे बावडिया स्नान कर बाहर निकली हुई देवांगनाओंके स्तनोंपर लगी हुई केशरके घुल जानेसे पीली पीली हो रही थी ॥१७४॥ उन वनोंमें कहीं कमलोंसे युक्त छोटे छोटे तालाब थे, कही कृत्रिम पर्वत बने हुए थे और कही मनोहर महल बने हुए थे और कही पर क्रीड़ा-मडप बने हुए थे ॥१७५॥ कही सुन्दर वस्तुओंके देखने के घर (अजायबघर) बने हुए थे, कही चित्रशालाए बनी हुई थी, और कही एक खण्डकी तथा कही दो तीन आदि खण्डोकी बड़े बडे महलोंकी पक्तिया बनी हुई थी ॥१७६॥ कही हरी हरी घाससे युक्त भूमि थी, कही इन्द्रगोप नामके कीड़ोंसे व्याप्त पृथ्वी थी, कहीं अतिशय मनोज्ञ तालाब थे और कही उत्तम बालूके किनारोंसे सुशोभित नदिया

---

१ ध्वनताम्। २ मनोहरैः। ३ आच्छादित। ४ ऋतूना परिक्रमवृत्तिम्। ५ वने। ६ आ समन्तात् त्रस्यन्। भयपूर्विका निवृत्ति कुर्वन् वा। ७ वनमध्ये। ८ स्नात्वा निर्गत। स्नानोत्तीर्णा ल०, द०, इ०। ९ दीर्घिका। १० चित्रोपलक्षित-। ११ हरिता.।

हारिमेदु[1]रमुन्निद्रकुसुमं [2]सश्रि कामदम् । सुकलत्रमिवासीत्तत् सेव्यं वनचतुष्टयम् ॥१७८॥
अपास्तातपसम्बंधं विक[3]सत्पल्लवाञ्चितम् । पयो[4]धरस्पृगाभासि तत्स्त्रीणामुत्तरीयवत् ॥१७९॥
बभासे वनमाशोकं शोकापनुदमङ्गिनाम् । रागं वमदिवात्मीयमारक्तैः पुष्पपल्लवैः ॥१८०॥
पर्णानि सप्त बिभ्राणं वनं साप्त[5]च्छदं बभौ । सप्तस्था[6]नानि वा[7] भर्तुः दर्शयत्प्रति[8]पर्व यत् ॥१८१॥
चाम्पकं वनमत्राभात् सुमनोभरभूषणम् । वनं दीपाङ्गवृक्षाणां विभुं भक्तु[9]मिवागताम् ॥१८२॥
[10]कम्रमाम्रवनं रेजे कलकण्ठीकलस्वनैः । स्तुवानमिव भक्त्यैनम् ईशानं[11] पुण्यशास[12]नम् ॥१८३॥
अशोकवनमध्येऽभूद् अशोकानोकहो महान् । हैमं[13] त्रिमेखलं पीठं समुत्तुङ्गमधिष्ठितः ॥१८४॥
चतुर्गोपुरसम्बद्धत्रिसालपरिवेष्टितः । छत्रचामरभृङ्गारकलशाद्यैरुपस्कृतः ॥१८५॥
जम्बूद्वीपस्थलीमध्ये भाति जम्बूद्रुमो यथा । तथा वनस्थलीमध्ये स बभौ चैत्यपादपः ॥१८६॥

बह रही थीं ॥१७७॥ वे चारों ही वन उत्तम स्त्रियोंके समान सेवन करने योग्य थे क्योंकि वे वन भी उत्तम स्त्रियोंके समान ही मनोहर थे, मेदुर अर्थात् अतिशय चिकने थे, उन्निद्रकुसुम अर्थात् फूले हुए फूलोंसे सहित (पक्षमें ऋतुधर्मसे सहित) थे, सश्री अर्थात् शोभासे सहित थे, और कामद अर्थात् इच्छित पदार्थोंके (पक्षमे कामके) देनेवाले थे ॥१७८॥ अथवा वे वन स्त्रियोंके उत्तरीय (ओढ़नेकी चूनरी) वस्त्रके समान सुशोभित हो रहे थे क्योंकि जिस प्रकार स्त्रियोंका उत्तरीय वस्त्र आतपकी बाधाको नष्ट कर देता है उसी प्रकार उन वनोंने भी आतपकी बाधाको नष्ट कर दिया था, स्त्रियोंका उत्तरीय वस्त्र जिस प्रकार उत्तम पल्लव आर्थात् अंचलसे सुशोभित होता है उसी प्रकार वे वन भी पल्लव अर्थात् नवीन कोमल पत्तोंसे सुशोभित हो रहे और स्त्रियोंका उत्तरीय वस्त्र जिस प्रकार पयोधर अर्थात् स्तनोंका स्पर्श करता है उसी प्रकार वे वन भी ऊंचे होनेक कारण पयोधर अर्थात् मेघोंका स्पर्श कर रहे थे ॥१७९॥ उन चारों वनोंमेसे पहला अशोक वन जो कि प्राणियोंके शोक-को नष्ट करनेवाला था, लाल रंगके फूल और नवीन पत्तोंसे ऐसा सुशोभित हो रहा था मानो अपना अनुराग (प्रेम)का ही वमन कर रहा हो ॥१८०॥ प्रत्येक गांठ पर सात सात पत्तों को धारण करनेवाले सप्तच्छद वृक्षोंका दूसरा वन भी सुशोभित हो रहा था जो कि ऐसा जान पड़ता था मानो वृक्षोंके प्रत्येक पर्व पर भगवान्के सज्जातित्व सद्गृहस्थत्व पारिव्राज्य आदि सात परम स्थानोंको ही दिखा रहा हो ॥१८१॥ फूलोंके भारसे सुशोभित तीसरा चम्पक वृक्षोंका वन भी सुशोभित हो रहा था और वह ऐसा जान पड़ता था मानो भगवान् की सेवा करनेके लिये दीपांग जातिके कल्पवृक्षोंका वन ही आया हो ॥१८२॥ तथा कोयलोंके मधुर शब्दोंसे मनोहर चौथा आमके वृक्षोंका वन भी ऐसा सुशोभित हो रहा था मानो पवित्र उपदेश देनेवाले भगवान्की भक्तिसे स्तुति ही कर रहा हो ॥१८३॥ अशोक वनके मध्य भागमें एक बड़ा भारी अशोकका वृक्ष था जो कि सुवर्णकी बनी हुई तीन कटनीदार ऊची पीठिका पर स्थित था ॥१८४॥ वह वृक्ष, जिनमें चार चार गोपुरद्वार बने हुए हैं ऐसे तीन कोटोंसे घिरा हुआ था तथा उसके समीपमें ही छत्र, चमर, भृङ्गार और कलश आदि मंगलद्रव्य रक्खे हुए थे ॥१८५॥ जिस प्रकार जम्बूद्वीपकी मध्यभूमिमें जम्बू वृक्ष सुशोभित होता है उसी प्रकार उस अशोकवनकी मध्यभूमिमें वह अशोक नामका

---

१ स्निग्धम् । २ शोभासहितम् । ३ पक्षे वस्त्रपर्यन्ताञ्चितम् । ४ मेघ, पक्षे कुच । ५ सप्तच्छदसम्बन्धि । ६ सज्जातिः सद्गृहस्थत्वं पारिव्राज्यं सुरेन्द्रता। साम्राज्य परमार्हंत्य निर्वाण चेति पञ्चधा ॥" इति सप्त परमस्थानानि । ७ इव । ८ प्रतिग्रन्थि । ९ भजनाय । १० मनोहरम् । ११ प्रभुम् । १२ पवित्राज्ञम् । १३ सौवर्णम् ।

शाखाग्रव्याप्तविश्वाशः[1] स रेजेऽशोकपादपः । अशोकमयमेवेदं जगत्कर्तुमिवोद्यतः ॥१८७॥
सुरभीकृतविश्वाशैः कुसुमैः स्थगिताम्बरः । सिद्धाध्वानमिवारुन्धन्[2] रेजेऽसौ चैत्यपादपः ॥१८८॥
गारुडोपलनिर्माणैः[3] पत्रैश्चित्रैश्चितोऽभितः । पद्मरागमयैः पुष्पस्तबकैः परितो वृतः ॥१८९॥
हिरण्मयमहोदग्रशाखो वज्रेद्धबुध्नकः[4] । कलालिकुलझङ्कारैः तर्जयन्निव मन्मथम् ॥१९०॥
सुरासुरनरेन्द्रान्तरक्षेभालानविग्रहः[5] । स्वप्रभापरिवेषेण द्योतिताखिलदिङ्मुखः ॥१९१॥
रणदालम्बिघण्टाभिः[6] बधिरीकृतविश्वभूः[7] । भूर्भुवःस्वर्जयं[8] भर्तुः प्रतोषादिव घोषयन् ॥१९२॥
ध्वजांशुकपरामृष्टनिर्मेघघनपद्धतिः[9][10] । जगज्जनाङ्गसंलग्नमार्गः परिमृजन्निव[11] ॥१९३॥
मूर्ध्ना छत्रत्रयं बिभ्रन्मुक्तालम्बनभूषितम् । विभोस्त्रिभुवनैश्वर्यं विना वाचेव दर्शयन् ॥१९४॥
भेजिरे बुध्नभागेऽस्य[12] प्रतिमा दिक्चतुष्टये । जिनेश्वराणामिन्द्राद्यैः समवाप्ताभिषेचनाः ॥१९५॥
गन्धस्रग्धूपदीपाद्यैः फलैरपि सहाक्षतैः । तत्र नित्यार्चनं देवा जिनार्चानां[13] वितेनिरे ॥१९६॥

चैत्यवृक्ष सुशोभित हो रहा था ॥१८६॥ जिसने अपनी शाखाओंके अग्रभागसे समस्त दिशाओंको व्याप्त कर रक्खा है ऐसा वह अशोक वृक्ष ऐसा शोभायमान हो रहा था मानो समस्त संसारको अशोकमय अर्थात् शोकरहित करनेके लिए ही उद्यत हुआ हो ॥१८७॥ समस्त दिशाओंको सुगन्धित करनेवाले फूलोंसे जिसने आकाशको व्याप्त कर लिया है ऐसा वह चैत्यवृक्ष ऐसा सुशोभित हो रहा था मानो सिद्ध-विद्याधरोंके मार्गको ही रोक रहा हो ॥१८८॥ वह वृक्ष नील मणियोंके बने हुए अनेक प्रकारके पत्तोंसे व्याप्त हो रहा था और पद्मराग मणियोंके बने हुए फूलोंके गुच्छोंसे घिरा हुआ था ॥१८९॥ सुवर्णकी बनी हुई उसकी बहुत ऊंची ऊंची शाखाएं थीं, उसका देदीप्यमान भाग वज्रका बना हुआ था, तथा उस पर बैठे हुए भ्रमरोंके समूह जो मनोहर झंकार कर रहे थे उनसे वह ऐसा जान पड़ता था मानो कामदेवकी तर्जना ही कर रहा हो ॥१९०॥ वह चैत्यवृक्ष सुर, असुर और नरेन्द्र आदिके मनरूपी हाथियोंके बांधनेके लिए खम्भेके समान था तथा उसने अपने प्रभामण्डलसे समस्त दिशाओंको प्रकाशित कर रक्खा था ॥१९१॥ उस-पर जो शब्द करते हुए घंटे लटक रहे थे उनसे उसने समस्त दिशाएं बहिरी कर दी थीं और उनसे वह ऐसा जान पड़ता था कि भगवान्ने अधोलोक मध्यलोक और स्वर्गलोकमें जो विजय प्राप्त की है सन्तोषसे मानो वह उसकी घोषणा ही कर रहा हो ॥१९२॥ वह वृक्ष ऊपर लगी हुई ध्वजाओंके वस्त्रोंसे पोंछ पोंछकर आकाशको मेघरहित कर रहा था और उनसे ऐसा जान पडता था मानो संसारी जीवोंकी देहमें लगे हुए पापोंको ही पोंछ रहा हो ॥१९३॥ वह वृक्ष मोतियोंकी झालरसे सुशोभित तीन छत्रोंको अपने सिर-पर धारण कर रहा था और उनसे ऐसा जान पडता था मानो भगवान्के तीनों लोकों-के ऐश्वर्यको बिना वचनोंके ही दिखला रहा हो ॥१९४॥ उस चैत्यवृक्षके मूलभागमें चारों दिशाओंमें जिनेन्द्रदेवकी चार प्रतिमाएं थीं जिनका इन्द्र स्वयं अभिषेक करते थे ॥१९५॥ देव लोग वहांपर विराजमान उन जिनप्रतिमाओंकी गन्ध, पुष्पोंकी माला,

---

१ निखिलदिक् । २ देवपथ मेघपथमित्यर्थ. । "पिशाचो गुह्यको सिद्धो भूतोऽमी देवयोनयः ।" ३ मरकतरत्न । ४ दीप्तमूलः ५ मनइन्द्रियगजबन्धनस्तम्भमूर्तिः । ६ ध्वनत् । ७ निखिलभूमिः । ८ भूलोकनागलोकस्वर्गलोकजयम् । ९ समार्जित– । १० मेघमार्गः । ११ सम्मार्जयन् । १२ मूलप्रदेशे । १३ जिनप्रतिमानाम् ।

क्षीरोदोदकधौताङ्गीः अमलास्ता हिरण्मयीः । प्रणिपत्यार्हतामर्चाः प्रानर्चुर्नृसुरासुराः ॥१९७॥
स्तुवन्ति स्तुतिभिः केचिद् अर्ध्याभिः[2] प्रणमन्ति च । स्मृत्वावधार्य[3] गायन्ति केचित्स्म सुरसत्तमाः॥१९८॥
यथाशोकस्तथान्येऽपि विज्ञेयाश्चैत्यभूरुहाः । वने स्वे स्वे सजातीया जिनबिम्बेद्धबुध्नकाः ॥१९९॥
अशोकः सप्तपर्णश्च चम्पकश्चूत एव च । चत्वारोऽमी वनेष्वासन् प्रोत्तुङ्गाश्चैत्यपादपाः ॥२००॥
चैत्याधिष्ठितबुध्नत्वाद् ऊढत[4]न्नामरूढयः । शाखिनोऽमी विभान्ति स्म सुरेन्द्रैः प्राप्तपूजनाः ॥२०१॥
[5]फलैरलङ्कृता दीप्राः स्वपादा[6]क्रान्तभूतलाः । पार्थिवाः[7] सत्यमेवैते पार्थिवाः[8] पत्रस[9]म्भृताः ॥२०२॥
प्रव्यञ्जितानुरागाः स्वैः पल्लवैः कुसुमोत्करैः । प्रसादं दर्शयन्तोऽन्तर्विभुं भेजुरिमे द्रुमाः ॥२०३॥
तरूणामेव [10]तावच्चेद् ईदृशो विभवोदयः । किमस्ति वाच्यमीशस्य विभवेऽन्नीदृशात्मनः ॥२०४॥

धूप, दीप, फल और अक्षत आदिसे निरन्तर पूजा किया करते थे ॥१९६॥ क्षीरसागरके जलसे जिनके अंगोंका प्रक्षाल हुआ है और जो अतिशय निर्मल है ऐसी सुवर्णमयी अरहंतकी उन प्रतिमाओंको नमस्कार कर मनुष्य, सुर और असुर सभी उनकी पूजा करते थे ॥१९७॥ कितने ही उत्तम देव अर्थसे भरी हुई स्तुतियोंसे उन प्रतिमाओंकी स्तुति करते थे, कितने ही उन्हें नमस्कार करते थे और कितने ही उनके गुणोंका स्मरण कर तथा चिन्तवन कर गान करते थे ॥१९८॥ जिस प्रकार अशोकवनमें अशोक नामका चैत्यवृक्ष है उसी प्रकार अन्य तीन वनोंमें भी अपनी अपनी जातिका एक एक चैत्यवृक्ष था और उन सभीके मूलभाग जिनेन्द्र भगवान्की प्रतिमाओंसे देदीप्यमान थे ॥१९९॥ इस प्रकार ऊपर कहे हुए चारों वनोंमें क्रमसे अशोक, सप्तपर्ण, चम्पक और आम्र नामके चार बहुत ही ऊंचे चैत्यवृक्ष थे ॥२००॥ मूलभागमें जिनेन्द्र भगवान्की प्रतिमा विराजमान होनेसे जो 'चैत्यवृक्ष' इस सार्थक नामको धारण कर रहे हैं और इन्द्र जिनकी पूजा किया करते हैं ऐसे वे चैत्यवृक्ष बहुत ही अधिक सुशोभित हो रहे थे ॥२०१॥ पार्थिव अर्थात् पृथिवीसे उत्पन्न हुए वे वृक्ष सचमुच ही पार्थिव अर्थात् पृथिवीके स्वामी-राजाके समान जान पड़ते थे क्योंकि जिस प्रकार राजा अनेक फलोंसे अलंकृत होते हैं उसी प्रकार वे वृक्ष भी अनेक फलोंसे अलंकृत थे, राजा जिस प्रकार तेजस्वी होते हैं उसी प्रकार वे वृक्ष भी तेजस्वी (देदीप्यमान) थे, राजा जिस प्रकार अपने पाद अर्थात् पैरोंसे समस्त पृथिवीको आक्रान्त किया करते हैं (समस्त पृथिवीमें अपना यातायात रखते हैं) उसी प्रकार वे वृक्ष भी अपने पाद अर्थात् जड़ भागसे समस्त पृथिवीको आक्रान्त कर रहे थे (समस्त पृथिवीमें उनकी जड़ें फैली हुई थीं) और राजा जिस प्रकार पत्र अर्थात् सवारियोंसे भरपूर रहते हैं उसी प्रकार वे वृक्ष भी पत्र अर्थात् पत्तोंसे भरपूर थे ॥२०२॥ वे वृक्ष अपने पल्लव अर्थात् लाल लाल नई कोंपलोंसे ऐसे जान पड़ते थे मानो अन्तरंगका अनुराग (प्रेम) ही प्रकट कर रहे हों और फूलोंके समूहसे ऐसे सुशोभित हो रहे थे मानो हृदयकी प्रसन्नता ही दिखला रहे हों इस प्रकार वे वृक्ष भगवान्की सेवा कर रहे थे ॥२०३॥ जब कि उन वृक्षोंका ही ऐसा बड़ा भारी माहात्म्य था तब उपमारहित भगवान् वृषभदेवके केवलज्ञानरूपी विभवके विषयमें

---

१ अर्चयन्ति स्म । २ अर्थादनपेताभिः । ३ –बधाय ट० । ४ चैत्यवृक्षनामप्रसिद्धयः । ५ पक्षे इष्टफलैः । ६ स्वपादैराक्रान्तं भूतलं यैस्ते, पक्षे स्वपादेष्वाक्रान्तं भूतलं येषां ते । ७ पृथिव्या ईशाः पार्थिवाः पृथ्वीमया वा । ८ पृथिव्यां भवाः पार्थिवाः, वृक्षा इत्यर्थः । ९ पक्षे वाहनसम्भृताः । 'पत्रं वाहनपर्वयोः' इत्यभिधानात् । १० तावांश्चे–द०, ल०, अ०, स० ।

ततो वनानां पर्यन्ते बभूव वनवेदिका । चतुर्भिर्गोपुरैस्तुङ्गैः आरुद्धगगनाङ्गणा ॥२०५॥
काञ्चीयष्टिर्वनस्येव सा बभौ वनवेदिका । चामीकरमयै रत्नैः खचिताङ्गी समन्ततः ॥२०६॥
सा बभौ वेदिकोदग्रा सचर्या[1] समया वनम्[2] । भव्यधीरिव संश्रित्य सचर्या समयावनम् ॥२०७॥
सुगुप्ताङ्गी[3] सतीवासौ रुचिरा सूत्रपा[4] वनम् । परीयाय[5] श्रुतं जैनं सद्धीर्वा सूत्रपावनम्[6] ॥२०८॥
घण्टाजालानि लम्बानि [7]मुक्तालम्बनकानि च । पुष्पस्रजश्च संरेजुः अमुष्यां गोपुरं प्रति ॥२०९॥
राजतानि[8] बभुस्तस्या गोपुराण्यष्टमङ्गलैः । सङ्गीतातोद्यनृत्तैश्च रत्नाभरणतोरणैः ॥२१०॥
ततः परमलञ्चक्रुः विविधा ध्वजपङ्क्तयः । महीं वीथ्यन्तरालस्थां हेमस्तम्भाग्रलम्बिताः ॥२११॥
सुस्थास्ते मणिपीठेषु ध्वजस्तम्भाः स्फुरद्रुचः । विरेजुर्जगतां मान्याः सुराजान इवोन्नताः ॥२१२॥

कहना ही क्या है—वह तो सर्वथा अनुपम ही था ॥२०४॥ उन वनोंके अन्तमें चारों ओर एक एक वनवेदी थी जो कि ऊंचे ऊंचे चार गोपुरद्वारोंसे आकाशरूपी आंगनको रोक रही थी॥२०५॥ वह सुवर्णमयी वनवेदिका सब ओरसे रत्नोंसे जड़ी हुई थी जिससे ऐसी जान पड़ती थी मानो उस वनकी करधनी ही हो ॥२०६॥ अथवा वह वनवेदिका भव्य जीवोंकी बुद्धिके समान सुशोभित हो रही थी क्योंकि जिस प्रकार भव्य जीवोंकी बुद्धि उदग्र अर्थात् उत्कृष्ट होती है उसी प्रकार वह वनवेदिका भी उदग्र अर्थात् बहुत ऊंची थी, भव्य जीवोंकी बुद्धि जिस प्रकार सचर्या अर्थात् उत्तम चारित्रसे सहित होती है उसी प्रकार वह वनवेदिका भी सचर्या अर्थात् रक्षासे सहित थी और भव्य जीवोंकी बुद्धि जिस प्रकार समयावनं (समय + अवनं संश्रित्य) अर्थात् आगमरक्षाका आश्रय कर प्रवृत्त रहती है उसी प्रकार वह वनवेदिका भी समया वनं (वनं समया संश्रित्य) अर्थात् वनके समीप भागका आश्रय कर प्रवृत्त हो रही थी ॥२०७॥ अथवा वह वनवेदिका सुगुप्तांगी अर्थात् सुरक्षित थी, सती अर्थात् समीचीन थी, रुचिरा अर्थात् देदीप्यमान थी, सूत्रपा अर्थात् सूत्र (डोरा)की रक्षा करनेवाली थी—सूतके नापमें बनी हुई थी— कही ऊंची-नीची नहीं थी, और वनको चारों ओरसे घेरे हुए थी इसलिये किसी सत्पुरुषकी बुद्धिके समान जान पड़ती थी क्योंकि सत्पुरुषकी बुद्धि भी सुगुप्तांगी अर्थात् सुरक्षित होती है—पापाचारोंसे अपने शरीरको सुरक्षित रखती है, सती अर्थात् शंका आदि दोषोंसे रहित होती है, रुचिरा अर्थात् श्रद्धागुण प्रदान करनेवाली होती है, सूत्रपा अर्थात् आगमकी रक्षा करनेवाली होती है और सूत्रपावनं अर्थात् सूत्रोंसे पवित्र जैनशास्त्रको घेरे रहती है—उन्हींके अनुकूल प्रवृत्ति करती है ॥२०८॥ उस वेदिकाके प्रत्येक गोपुर-द्वारमे घंटाओंके समूह लटक रहे थे, मोतियोंकी झालर तथा फूलोंकी मालाएं सुशोभित हो रही थीं ॥२०९॥ उस वेदिकाके चांदीके बने हुए चारों गोपुर-द्वार अष्टमंगलद्रव्य, संगीत, बाजोंका बजना, नृत्य तथा रत्नमय आभरणोंसे युक्त तोरणोंसे बहुत ही सुशोभित हो रहे थे ॥२१०॥ उन वेदिकाओंसे आगे सुवर्णमय खंभोंके अग्रभागपर लगी हुई अनेक प्रकारकी ध्वजाओंकी पंक्तियां महावीथीके मध्यकी भूमिको अलंकृत कर रही थीं ॥२११॥ वे ध्वजाओंके खंभे मणिमयी पीठिकाओंपर स्थिर थे, देदीप्यमान कान्तिसे युक्त थे, जगत्मान्य थे और अतिशय ऊंचे थे इसलिये किन्हीं उत्तम राजाओंके समान सुशोभित हो रहे थे क्योंकि उत्तम राजा भी

---

१ सवप्रा । २ वनस्य समीपम् । 'हाधिक्समया' इत्यादि सूत्रेण द्वितीया । सचर्या सचारित्रा । समयावनं सिद्धान्तरक्षणम् । 'समया शपथाचारकालसिद्धान्तसंविदः ।' इत्यभिधानात् । ३ सुरक्षिताङ्गी । ४ सूत्रं रक्षन्ति । सूत्रपातस्य आपातत्वात्, निम्नोन्नतत्वादिदोषरहित इत्यर्थः । पक्षे सूत्रमागमं पालयन्ति, आगमप्रतिपादितचारित्रं पालयन्तीत्यर्थः । ५ परिवव्रे । ६ सूत्रेण पवित्रीकरणक्षमम् । ७ मौक्तिकदामानि । ८ रजतमयानि ।

अष्टाशीत्यङ्गुलान्येषां रुन्द्रत्वं परिकीर्तितम् । पञ्चविंशतिकोदण्डान्यमीषामन्तरं विदुः ॥२१३॥
सिद्धार्थचैत्य[1]वृक्षाश्च प्राकारवनवेदिकाः । स्तूपाः सतोरणा मानस्तम्भाः स्तम्भाश्च कैतवाः[2] ॥२१४॥
प्रोक्तास्तीर्थकृदुत्सेधाद् उत्सेधेन द्विषड्गुणाः[3] । दैर्घ्यानुरूपमेतेषां रौन्द्रयमाहुर्मनीषिणः ॥२१५॥
वनानां स्वगृहाणाञ्च पर्वतानां तथैव च । भवेदुन्नतिरेषैव वर्णितागमकोविदैः ॥२१६॥
भवेयुर्गिरयो रुन्द्राः स्वोत्सेधादष्टसङ्गुणम् । स्तूपानां रौन्द्रयमुच्छ्रा[4]यात् सातिरेकं[5] विदो[6] विदुः ॥२१७॥
उशन्ति वेदिकादीनां स्वोत्सेधस्य चतुर्थकम् । [7]पार्थवं परमज्ञानमहाकूपारपारगाः ॥२१८॥
स्रग्वस्त्रसहसानाब्ज[8]हंसवीन[9]मृगेशिनाम् । वृषभेभेन्द्रचक्राणां ध्वजाः स्युर्दशभेदकाः ॥२१९॥
अष्टोत्तरशतं ज्ञेयाः प्रत्येकं पालिकेतनाः[10] । एकैकस्यां दिशि प्रोच्चाः तरङ्गास्तोयधेरिव ॥२२०॥
पवनान्दोलितस्तेषां केतूनामंशुकोत्करः । [11]व्याजुहूषुरिवाभासीद्[12] जिनेज्यायै नरामरान् ॥२२१॥
स्रग्ध्वजेषु स्रजो दिव्याः सौमनस्यो[13] ललम्बिरे । भव्यानां सौमनस्याय[14] कल्पितास्त्रिदिवाधिपैः ॥२२२॥
श्लक्ष्णांशुकध्वजा रेजुः पवनान्दोलितोत्थिताः । व्योमाम्बुधेरिवोद्भूताः तरङ्गास्तुङ्गमूर्तयः ॥२२३॥
बर्हिध्वजेषु बर्हालिं[15] लीलयोत्क्षिप्य बर्हिणः । रेजुर्ग्रस्तांशुकाः सर्पबुद्ध्येव ग्रस्तकृत्तयः[16] ॥२२४॥

मणिमय आसनोंपर स्थित होते हैं—बैठते हैं, देदीप्यमान कान्तिसे युक्त होते हैं, जगत्मान्य होते हैं—संसारके लोग उनका सत्कार करते हैं और अतिशय उन्नत अर्थात् उदारहृदय होते हैं ॥२१२॥ उन खभोंकी चौड़ाई अट्ठासी अंगुल कही गई है और उनका अन्तर पच्चीस पच्चीस धनुष प्रमाण जानना चाहिये ॥२१३॥ सिद्धार्थवृक्ष, चैत्यवृक्ष, कोट, वनवेदिका, स्तूप, तोरण सहित मानस्तम्भ और ध्वजाओंके खभे ये सब तीर्थङ्करोंके शरीरकी ऊंचाईसे बारह गुने ऊंचे होते हैं और विद्वानोंने इनकी चौडाई आदि इनकी लम्बाईके अनुरूप बतलाई है ॥२१४-२१५॥ इसी प्रकार आगमके जाननेवाले विद्वानोंने वन, वनके मकान और पर्वतोंकी भी यही ऊंचाई बतलाई है अर्थात् ये सब भी तीर्थङ्करके शरीरसे बारह गुने ऊंचे होते हैं ॥२१६॥ पर्वत अपनी ऊंचाईसे आठ गुने चौड़े होते हैं और स्तूपोंका व्यास विद्वानोंने अपनी ऊंचाईसे कुछ अधिक बतलाया है ॥२१७॥ परमज्ञानरूपी समुद्रके पारगामी गणधर देवोंने वनदेवियोंकी चौड़ाई उनकी ऊंचाईसे चौथाई बतलाई है ॥२१८॥ ध्वजाओंमें माला, वस्त्र, मयूर, कमल, हंस, गरुड़, सिंह, बैल, हाथी और चक्रके चिह्न थे इसलिये उनके दश भेद हो गये थे ॥२१९॥ एक-एक दिशामें एक-एक प्रकारकी ध्वजाएं एक सौ आठ एक सौ आठ थीं, वे ध्वजाएं बहुत ही ऊंची थीं और समुद्रकी लहरोंके समान जान पडती थीं ॥२२०॥ वायुसे हिलता हुआ उन ध्वजाओंके वस्त्रोंका समुदाय ऐसा सुशोभित हो रहा था मानो जिनेन्द्र भगवान्‌की पूजा करनेके लिये मनुष्य और देवोंको बुलाना ही चाहता हो ॥२२१॥ मालाओंके चिह्नवाली ध्वजाओंपर फूलोंकी बनी हुई दिव्यमालाएं लटक रही थीं और वे ऐसी जान पडती थीं मानो भव्य-जीवोंका सौमनस्य अर्थात् सरल परिणाम दिखलानेके लिये ही इन्द्रोंने उन्हें बनाया हो ॥२२२॥ वस्त्रोंके चिह्नवाली ध्वजाएं महीन और सफेद वस्त्रोंकी बनी हुई थीं तथा वे वायुसे हिल-हिलकर उड़ रही थीं जिससे ऐसी सुशोभित हो रही थी मानो आकाशरूपी समुद्रकी उठती हुई बड़ी ऊंची लहरें ही हों ॥२२३॥ मयूरोंके चिह्नवाली ध्वजाओंमें जो मयूर बने हुए थे वे लीलापूर्वक अपनी पूंछ फैलाये हुए थे और सांपकी बुद्धिसे वस्त्रोंको निगल रहे थे जिससे ऐसे सुशोभित हो रहे थे मानो

---

१ सिद्धार्थवृक्षा वक्ष्यन्ते चैत्यवृक्षा उक्ता । २ केतुसम्बन्धिनः । ३ द्वादशगुणा इत्यर्थः । ४ –मुच्छ्रितेर्व्यासं सातिरेकं इ०, अ० । ५ साधिकम् । ६ सम्यग्ज्ञानिनः । ७ पृथुत्वम् । ८ मयूर । ९ गरुड । १० श्रेणिध्वजाः । ११ व्याहृवानमिच्छुः । १२ बभौ । १३ सुमनोभिः कुसुमैः कृताः । १४ सुमनस्कृताय । १५ पिच्छसमूहम् । १६ ग्रस्तनिर्मोकाः ।

पद्मध्वजेषु पद्मानि सहस्रदलसंस्तरैः[1] । नभःसरसि फुल्लानि सरोजानीव रेजिरे ॥२२५॥
अधः प्रतिमया[2] तानि सङ्क्रान्तानि महीतले । भ्रमरान्मोहयन्ति स्म पद्मबुद्धयानु[3]पातिनः ॥२२६॥
तेषां[4] तदातनीं[5] शोभां दृष्ट्वा नान्यत्र भाविनीम् । कञ्जान्युत्सृज्य कात्स्न्येन लक्ष्मीस्तेषु पदं दधे॥२२७॥
हंसध्वजेष्व[6]भुर्हंसाश्चञ्च्वा[7] ग्रसितवाससः । निजां [8]प्रस्तारयन्तो या द्रव्यलेश्यां तदात्मना ॥२२८॥
गरुत्मद्ध्वजदण्डाग्राण्यध्यासीना विनायकाः[9] । रेजुः स्वैः पक्षविक्षेपैः लिलङ्घयिषवो नु[10] खम् ॥२२९॥
बभुर्नीलमणिक्ष्मास्था गरुडाः [11]प्रतिमागताः । समाक्रष्टुमिवाहीन्द्रान् प्रविशन्तो रसातलम् ॥२३०॥
मृगेन्द्रकेतनाग्रेषु मृगेन्द्राः क्रमदित्सया[12] । कृतयत्ना विरेजुस्ते जेतुं वा[13] सुरसामजान् ॥२३१॥
स्थूलमुक्ताफलान्येषां मुखलम्बीनि रेजिरे । गजेन्द्रकुम्भसम्भेदात् सञ्चितानि यशांसि वा ॥२३२॥
[14]उक्षाः शृङ्गाग्रसंसक्तलम्बमानध्वजांशुकाः । रेजुर्विपक्षजित्येव[15] संलब्धजयकेतनाः ॥२३३॥
उत्पुष्करैः करैरूढ[16]ध्वजा रेजुर्गजाधिपाः । गिरीन्द्रा इव कूटाग्रनिपतत्पृथुनिर्झराः ॥२३४॥

सांपकी काचली ही निगल रहे हो ॥२२४॥ कमलोके चिह्नवाली ध्वजाओंमे जो कमल बने हुए थे वे अपने एक हजार दलोंके विस्तारसे ऐसे शोभायमान हो रहे थे मानो आकाशरूपी सरोवरमे कमल ही फूल रहे हों ॥२२५॥ रत्नमयी पृथ्वीपर उन ध्वजाओंमे बने हुए कमलोके जो प्रतिविम्ब पड़ रहे थे वे कमल समझकर उनपर पड़ते हुए भ्रमरोको भ्रम उत्पन्न करते थे ॥२२६॥ उन कमलोंकी दूसरी जगह नही पाई जानेवाली उस समयकी शोभा देखकर लक्ष्मीने अन्य समस्त कमलोको छोड़ दिया था और उन्हीमे अपने रहनेका स्थान बनाया था । भावार्थ– वे कमल बहुत ही सुन्दर थे इसलिये ऐसे जान पड़ते थे मानो लक्ष्मी अन्य सब कमलोंको छोड़कर उन्हीमे रहने लगी हो ॥२२७॥ हसोंकी चिह्नवाली ध्वजाओंमे जो हसोंके चिह्न बने हुए थे वे अपने चोंचसे वस्त्रको ग्रस रहे थे और ऐसे शोभायमान हो रहे थे मानो उसके बहाने अपनी द्रव्यलेश्याका ही प्रसार कर रहे हों ॥२२८॥ जिन ध्वजाओंमे गरुड़ोके चिह्न बने हुए थे उनके दण्डोंके अग्रभागपर बैठे हुए गरुड़ अपने पखोके विक्षेपसे ऐसे सुशोभित हो रहे थे मानो आकाशको ही उल्लंघन करना चाहते हों ॥२२९॥ नीलमणिमयी पृथ्वीमे उन गरुड़ोके जो प्रतिविम्ब पड़ रहे थे उनसे वे ऐसे शोभायमान हो रहे थे मानो नागेन्द्रोंको खीचनेके लिये पाताललोकमे ही प्रवेश कर रहे हो ॥२३०॥ सिहोके चिह्नवाली ध्वजाओके अग्रभागपर जो सिह बने हुए थे वे छलाग भरनेकी इच्छासे ऐसे सुशोभित हो रहे थे मानो देवोंके हाथियोंको जीतनेके लिये ही प्रयत्न कर रहे है ॥२३१॥ उन सिहोंके मुखोपर जो बड़े बड़े मोती लटक रहे थे वे ऐसे जान पड़ते थे मानो बड़े बड़े हाथियोके मस्तक विदारण करनेसे इकट्ठे हुए यश ही लटक रहे हों ॥२३२॥ बैलोंकी चिह्नवाली ध्वजाओमे, जिनके सीगोंके अग्रभागमे ध्वजाओंके वस्त्र लटक रहे है ऐसे बैल बने हुए थे और वे ऐसे शोभायमान हो रहे थे मानो शत्रुओंको जीत लेनेसे उन्हें विजयपताका ही प्राप्त हुई हो ॥२३३॥ हाथीकी चिह्नवाली ध्वजाओंपर जो हाथी बने हुए थे वे अपनी ऊँची उठी हुई सूडोसे पताकाएँ धारण कर रहे थे और उनसे ऐसे सुशोभित हो रहे थे मानो जिनके शिखरके

---

१ समूहैः । २ प्रतिविम्बेन । ३ अनुगच्छत. । ४ पद्मध्वजानाम् । ५ तत्कालभवाम् ६ बभुः । ७ त्रोट्या । ८ प्रसारयन्तो ल० । ९ वीना नायकाः गरुडा इत्यर्थः । १० इव । ११ प्रतिबिम्बेनागताः । १२ पादविक्षेपेच्छया । १३ इव । १४ वृषाः प०, अ०, ल०, द०, इ० १५ जयेन । १६ धृत ।

चक्रध्वजा सहस्रारैः चक्रैरुत्सर्पदंशुभिः । बभुर्भानुमता[1] सार्द्धं स्पर्धां कर्तुमिवोद्यताः ॥२३५॥
नभः परिमृजन्तो वा श्लिष्यन्तो वा दिगङ्गनाः । भुवमास्फालयन्तो वा स्फूर्जन्ति स्म महाध्वजाः॥२३६॥
इत्यमी केतवो मोहनिर्जयोपार्जिता बभुः । विभोस्त्रिभुवनेशित्वं शंसन्तोऽनन्यगोचरम् ॥२३७॥
दिश्येकस्यां ध्वजाः सर्वे सहस्रं स्यादशीतियुक् । चतसृष्वथ[2] ते दिक्षु शून्य[3]द्वित्रिकसागराः ॥२३८॥
ततोऽनन्तरमेवान्तर्भागे सालो महानभूत् । श्रीमानर्जुननिर्माणो द्वितीयोऽप्यद्वितीयकः ॥२३९॥
पूर्ववद्गोपुराण्यस्य राजतानि रराजिरे । हासलक्ष्मीर्भुवो नूनं पुञ्जीभूता तदात्मना ॥२४०॥
तेष्वाभर[4]णविन्यस्ततोरणेषु परा द्युतिः । तेने निधिभिरुद्भूतैः कुबेरैश्वर्यहासिनी ॥२४१॥
शेषो विधिरशेषोऽपि सालेनाद्येन वर्णितः । पौनरुक्त्यभयान्ना[5]तस्तत्प्रपञ्चो निदर्शितः ॥२४२॥
अत्रापि पूर्ववद्वेद्यं द्वितयं नाट्यशालयोः । तद्वद्धूपघटीद्वन्द्वं महावीथ्युभयान्तयोः ॥२४३॥
ततो वीथ्यन्तरेष्वस्यां कक्ष्या[6]यां कल्पभूरुहाम् । नानारत्नप्रभोत्सर्पैः वनमासीत् प्रभास्वरम् ॥२४४॥
कल्पद्रुमाः समुत्तुङ्गाः सच्छायाः फलशालिनः । नानास्रग्वस्त्रभूषाढ्या राजायन्ते स्म सम्पदा ॥२४५॥

अग्रभागसे बड़े बड़े निभरने पड़े रहे हैं ऐसे बड़े पर्वत ही हों ॥२३४॥ और चक्रोंके चिह्नवाली ध्वजाओंमें जो चक्र बने हुए थे उनमें हजार हजार आरियां थी तथा उनकी किरणें ऊपरकी ओर उठ रही थी, उन चक्रोंसे वे ध्वजाएं ऐसी सुशोभित हो रही थी, मानो सूर्यके साथ स्पर्द्धा करनेके लिये ही तैयार हुई हो ॥२३५॥ इस प्रकार वे महाध्वजाएँ ऐसी फहरा रही थीं मानो आकाशको साफ ही कर रही हों, अथवा दिशारूपी स्त्रियोंको आलिंगन ही कर रही हों अथवा पृथिवीका आस्फालन ही कर रही हों ॥२३६॥ इस प्रकार मोहनीय कर्मको जीत लेनेसे प्राप्त हुई वे ध्वजाएं अन्य दूसरी जगह नहीं पाये जानेवाले भगवान्के तीनों लोकोंके स्वामित्वको प्रकट करती हुई बहुत ही सुशोभित हो रही थी ॥२३७॥ एक एक दिशामे वे सब ध्वजाए एक हजार अस्सी थी और चारो दिशाओंमें चार हजार तीन सौ बीस थी ॥२३८॥

उन ध्वजाओंके अनन्तर ही भीतरके भागमें चांदीका बना हुआ एक बडा भारी कोट था, जो कि बहुत ही सुशोभित था और अद्वितीय अनुपम होनेपर भी द्वितीय था अर्थात् दूसरा कोट था ॥२३९॥ पहले कोटके समान इसके भी चांदीके बने हुए चार गोपुरद्वार थे और वे ऐसे सुशोभित हो रहे थे मानो वे गोपुरद्वारोंके बहानेसे इकट्ठी हुई पृथिवीरूपी देवीके हास्यकी शोभा ही हों ॥२४०॥ जिनमें अनेक आभरण सहित तोरण लगे हुए है ऐसे उन गोपुरद्वारोंमें जो विधियां रक्खी हुई थी वे कुबेरके ऐश्वर्यकी भी हसी उड़ानेवाली बड़ी भारी कान्तिको फैला रही थी ॥२४१॥ उस कोटकी और सब विधि पहले कोटके वर्णनके साथ ही कही जा चुकी है पुनरुक्ति दोषके कारण यहां फिरसे उसका विस्तारके साथ वर्णन नहीं किया जा रहा है ॥२४२॥ पहलेके समान यहां भी प्रत्येक महावीथीके दोनों ओर दो नाट्यशालाएं थीं और दो धूपघट रक्खे हुए थे ॥२४३॥ इस कक्षामें विशेषता इतनी है कि धूपघटोंके बाद गलियोंके बीचके अन्तरालमें कल्पवृक्षोंका वन था, जो कि अनेक प्रकारके रत्नोंकी कान्तिके फैलनेसे देदीप्यमान हो रहा था ॥२४४॥ उस वनके वे कल्पवृक्ष बहुत ही ऊंचे थे, उत्तम छायावाले थे, फलोंसे सुशोभित थे और अनेक प्रकारकी माला, वस्त्र तथा आभूषणोंसे सहित थे इसलिये अपनी शोभासे राजाओंके समान जान पड़ते

---

१ सूर्येण । २ ध्वजाः । ३ विंशत्युत्तरत्रिशताधिकचतुःसहस्राणि । ४ आभरणानां विन्यस्तं विन्यासो येषा तोरणाना तानि आभरणविन्यस्ततोरणानि येषा गोपुराणां तानि तथोक्तानि तेषु । ५ –न्नात्र प०, द०, ल० । ६ कोष्ठे ।

देवोदक्कुरवो नूनम् आगताः सेवितुं जिनम् । दशप्रभेदैः स्वैः कल्पतरुभिः श्रेणि[1]सात्कृतैः ॥२४६॥
फलान्याभरणान्येषाम् अंशुकानि च पल्लवाः । स्रजः शाखाग्रलम्बिन्यो महाप्रारोहयष्टयः ॥२४७॥
तेषामधःस्थलच्छायाम् अध्यासीनाः सुरोरगाः । स्वावासेषु धृतिं हित्वा चिरं तत्रैव रेमिरे ॥२४८॥
ज्योतिष्का ज्योतिरङ्गेषु दीपाङ्गेषु च कल्पजाः । भावनेन्द्राः स्रगङ्गेषु यथायोग्यां धृतिं दधुः ॥२४९॥
स्रग्वि साभरणं भास्वदंशुकं पल्लवा[2]धरम् । ज्वल[3]द्दीपं वनं कान्तं वधूव[4]रमिवारुचत् ॥२५०॥
[5]अन्तर्वणमथाभूवन्निह सिद्धार्थपादपाः । सिद्धार्थाधिष्ठिता[6]धीद्धबुध्ना ब्रध्ना[7] इवोद्रुचः ॥२५१॥
चैत्यद्रुमेषु पूर्वोक्ता वर्णनात्रापि योज्यताम् । किन्तु कल्पद्रुमा एते सङ्कल्पितफलप्रदाः ॥२५२॥

थे क्योंकि राजा भी बहुत ऊंचे अर्थात् अतिशय श्रेष्ठ अथवा उदार होते है, उत्तम छाया अर्थात् कान्तिसे युक्त होते हे, अनेक प्रकारकी वस्तुओंकी प्राप्तिरूपी फलोंसे सुशोभित होते है और तरह तरहकी माला, वस्त्र तथा आभूषणोंसे युक्त होते है ॥२४५॥ उन कल्पवृक्षोंको देखकर ऐसा मालूम होता था मानो अपने दश प्रकारके कल्पवृक्षोंकी पक्तियोसे युक्त हुए देवकुरु और उत्तरकुरु ही भगवान्की सेवा करनेके लिये आये हो ॥२४६॥ उन कल्पवृक्षोंके फल आभूषणोंके समान जान पडते थे, नवीन कोमल पत्ते वस्त्रोंके समान मालूम होने थे और शाखाओं के अग्रभागपर लटकती हुई मालाए बड़ी-बड़ी जटाओंके समान सुशोभित हो रही थी ॥२४७॥ उन वृक्षोंके नीचे छायातलमें बैठे हुए देव और धरणेन्द्र अपने-अपने भवनोमे प्रेम छोडकर वहीपर चिरकाल तक क्रीड़ा करते रहते थे ॥२४८॥ ज्योतिष्कदेव ज्योतिरग जातिके कल्पवृक्षोंमें, कल्पवासी देव दीपांग जातिके कल्पवृक्षोंमे और भवनवासियोंके इन्द्र मालांग जातिके कल्पवृक्षोंमे यथायोग्य प्रीति धारण करते थे। भावार्थ—जिस देवको जो वृक्ष अच्छा लगता था वे उसीके नीचे क्रीड़ा करते थे ॥२४९॥ वह कल्पवृक्षोंका वन वधूवरके समान सुशोभित हो रहा था क्योंकि जिस प्रकार वधूवर मालाओंसे सहित होते हे उसी प्रकार वह वन भी मालाओंसे सहित था, वधूवर जिस प्रकार आभूषणोंसे युक्त होते हे उसी प्रकार वह वन भी आभूषणोंसे युक्त था, जिस प्रकार वधूवर सुन्दर वस्त्र पहिने रहते हे उसी प्रकार उस वनमें सुन्दर वस्त्र टगे हुए थे, जिस प्रकार वरवधूके अधर (ओठ) पल्लवके समान लाल होते है उसी प्रकार उस वनके पल्लव (नये पत्ते) लाल थे। वरवधूके आस-पास जिस प्रकार दीपक जला करते हे उसी प्रकार उस वनमे भी दीपक जल रहे थे, और वरवधू जिस प्रकार अतिशय सुन्दर होते हैं उसी प्रकार वह वन भी अतिशय सुन्दर था। भावार्थ—उस वनमें कही मालांग जातिके वृक्षों पर मालाएं लटक रही थीं, कहीं भूषणांग जातिके वृक्षों पर भूषण लटक रहे थे, कहीं वस्त्रांग जातिके वृक्षों पर सुन्दर सुन्दर वस्त्र टंगे हुए थे, कही उन वृक्षोंमें नये-नये, लाल-लाल पत्ते लग रहे थे, और कही दीपांग जातिके वृक्षों पर अनेक दीपक जल रहे थे ॥२५०॥ उन कल्पवृक्षोंके मध्यभागमें सिद्धार्थ वृक्ष थे, सिद्ध भगवान्की प्रतिमाओं से अधिष्ठित होनेके कारण उन वृक्षोंके मूल भाग बहुत ही देदीप्यमान हो रहे थे और उन सबसे वे वृक्ष सूर्यके समान प्रकाशमान हो रहे थे ॥२५१॥ पहले चैत्यवृक्षोंमें जिस शोभाका वर्णन किया गया है वह सब इन सिद्धार्थवृक्षोंमें भी लगा लेना चाहिये किन्तु विशेषता

---

१ पङ्क्तीकृतैः । २ पल्लवानि आ समन्तात् धरतीति, पक्षे पल्लवमिवाधर यस्य तत् । ३ ज्वलद्दीपाङ्गम् । ४ वधूश्च वरश्च वधूवरम् । ५ वनमध्ये । ६ अधिकदीप्र । ७ आदित्याः ।

क्वचिद्वाप्यः क्वचिन्नद्यः क्वचित् सैकतमण्डलम् । क्वचित्सभागृहादीनि बभुरत्र वनान्तरे ॥२५३॥
वनवीथीमिमामन्तर्वव्रेऽसौ वनवेदिका । कल[१]धौतमयी तुङ्गचतुर्गोपुरसङ्गता ॥२५४॥
तत्र तोरणमाङ्ग[२]ल्यसम्पदः पूर्ववर्णिताः । गोपुराणि च पूर्वोक्तमानोन्मानान्यमुत्र च ॥२५५॥
प्रतोलीं[३] तामयोल्लङ्घ्य परतः [४]परिवीथ्यभूत्[५] । प्रासादपङ्क्तिर्विविधा निर्मिता सुरशिल्पिभिः ॥२५६॥
हिरण्मयमहास्तम्भा वज्राधिष्ठानबन्धनाः । चन्द्रकान्तशिलाकान्तभित्तयो रत्नचित्रिताः ॥२५७॥
सहर्म्या द्वितलाः[६] केचित् केचिच्च त्रिचतुस्तलाः । चन्द्रशालायुजः[७] केचिद्वलभिच्छन्दशोभिनः ॥२५८॥
प्रासादास्ते स्म राजन्ते स्वप्रभामग्नमूर्तयः । नभोलिहानाः कूटाग्रैः ज्योत्स्नयेव विनिर्मिताः ॥२५९॥
[८]कूटागारसभागेहप्रेक्षाशालाः[९] क्वचिद्विभुः । सशय्याः [१०]सासनास्तुङ्गसोपानाः श्वेतिताम्बराः[११] ।२६०।
तेषु देवाः सगन्धर्वाः सिद्धा[१२] विद्याधराः सदा । पन्नगाः किन्नरैः सार्द्धम् अरमन्त कृतादराः ॥२६१॥
केचिद् गानेषु वादित्रवादने[१३] केचिदुद्यताः । सङ्गीतनृत्यगोष्ठीभिः विभुमाराधयन्नमी ॥२६२॥

इतनी ही है कि ये कल्पवृक्ष अभिलषित फलके देनेवाले थे ॥२५२॥ उन कल्पवृक्षोंके वनोंमें कही बावड़ियां, कही नदिया, कही बालूके ढेर और कही सभागृह आदि सुशोभित हो रहे थे ॥२५३॥ उन कल्पवृक्षोंकी वनवीथीको भीतरकी ओर चारों तरफसे वनवेदिका घेरे हुए थी, वह वनवेदिका सुवर्णकी बनी हुई थी, और चार गोपुरद्वारोसे सहित थी ॥२५४॥ उन गोपुरद्वारोंमें तोरण और मगलद्रव्यरूप सपदाओंका वर्णन पहिले ही किया जा चुका है तथा उनकी लम्बाई चौड़ाई आदि भी पहलेके समान ही जानना चाहिये ॥२५५॥ उन गोपुरद्वारोंके आगे भीतरकी ओर बड़ा लम्बा-चौड़ा रास्ता था और उसके दोनों ओर देवरूप कारीगरोंके द्वारा बनाई हुई अनेक प्रकारके मकानोंकी पक्तियां था ॥२५६॥ जिनके बड़े बड़े खभे सुवर्णके बने हुए हैं, जिनके अधिष्ठान-बन्धन अर्थात् नीव वज्रमयी है, जिनकी सुन्दर दीवाले चन्द्रकान्तमणियोंकी बनी हुई है और जो अनेक प्रकारके रत्नोसे चित्र-विचित्र हो रहे हैं ऐसे वे सुन्दर मकान कितने ही दो खण्डके थे, कितने ही तीन खण्डके और कितने ही चार खण्डके थे, कितने ही चन्द्रशालाओं (मकानोंके ऊपरी भाग) से सहित थे तथा कितने ही अट्टालिका आदिसे सुशोभित थे ॥२५७–२५८॥ जो अपनी ही प्रभामे डूबे हुए है ऐसे वे मकान अपनी शिखरोंके अग्र भागसे आकाशका स्पर्श करते हुए ऐसे सुशोभित हो रहे थे मानो चांदनीसे ही बने हों ॥२५९॥ कही पर कूटागार (अनेक शिखरोंवाले अथवा झुला देनेवाले मकान), कहीपर सभागृह और कहीपर प्रेक्षागृह (नाट्यशाला अथवा अजायबघर) सुशोभित हो रहे थे, उन कूटागार आदिमे शय्याए बिछी हुई थी, आसन रखे हुए थे, ऊची ऊची सीढियां लगी हुई थी और उन सबने अपनी कान्तिसे आकाशको सफेद-सफेद कर दिया था ॥२६०॥ उन मकानोंमे देव, गन्धर्व, सिद्ध (एक प्रकारके देव), विद्याधर, नागकुमार और किन्नर जातिके देव बड़े आदरके साथ सदा क्रीड़ा किया करते थे ॥२६१॥ उन देवोंमें कितने ही देव तो गानेमे उद्यत थे और कितने ही बाजा बजानेमें तत्पर थे इस प्रकार वे देव सगीत और

---

१ सुवर्ण । २ मङ्गल । ३ गोपुरम् । ४ विथ्याः परित. । ५ वीथ्यभात् ल० । ६ द्विभूमिकाः । ७ शिरोगृह । 'चन्द्रशाला शिरोगृहम्' इत्यभिधानात् । ८ बहुशिखरयुक्तगृहम् । ९ नाट्यशाला । १० सपीठाः । ११ धवलिताकाशाः । १२ देवभेदाः । १३ वाद्यताडने ।

वीथीनां मध्यभागेऽत्र स्तूपा नव समुच्छ्रयुः । पद्मरागमयोत्तुङ्गवपुषः खाग्रलङ्घिनः ॥२६३॥
जनानुरागास्ताद्रूप्यम्[1] आपन्ना इव ते बभुः । सिद्धार्हत्प्रतिबिम्बौघैः अभितश्चित्रमूर्तयः ॥२६४॥
स्वोन्नत्या गगनाभोगं[2] रुन्धानाः स्म विभान्त्यमी । स्तूपा विद्याधराराध्याः प्राप्तेज्या मेरवो यथा ॥२६५॥
स्तूपाः समुच्छ्रिता रेजुः आराध्याः सिद्धचारणैः[3] । ताद्रूप्यमिव बिभ्राणाः नवकेवललब्धयः ॥२६६॥
स्तूपानामन्तरेष्वेषां रत्नतोरणमालिकाः । बभुरिन्द्र[4]धनुर्मय्य इव चित्रितखाङ्गणाः ॥२६७॥
सच्छत्राः सपताकाश्च सर्वमङ्गलसम्भृताः । राजान इव रेजुस्ते स्तूपाः कृतजनोत्सवाः ॥२६८॥
तत्राभिषिच्य जैनेन्द्रीः अर्चाः कीर्तितपूजिताः[5] । ततः प्रदक्षिणीकृत्य भव्या मुदमयासिषुः[6] ॥२६९॥
स्तूपहर्म्यावलीरुद्धां भुवमुल्लङ्घ्य तां ततः । नभःस्फटिकसालोऽभू[7]ज्जातं खमिव तन्मयम्[8] ॥२७०॥
विशुद्धपरिणामत्वाज्जिनपर्यन्तसेवनात् । भव्यात्मेव बभौ सालस्तुङ्गसद्वृत्ततान्वितः ॥२७१॥

नृत्य आदिकी गोष्ठियों द्वारा भगवान्‌की आराधना कर रहे थे ॥२६२॥ महावीथियोंके मध्यभागमे नौ नौ स्तूप खड़े हुए थे, जोकि पद्मरागमणियोंके बने हुए बहुत ऊंचे थे और अपने अग्रभागसे आकाशका उल्लंघन कर रहे थे ॥२६३॥ सिद्ध और अर्हन्त भगवान्‌की प्रतिमाओंके समूहसे वे स्तूप चारों ओरसे चित्र-विचित्र हो रहे थे और ऐसे सुशोभित हो रहे थे मानो मनुष्योंका अनुराग ही स्तूपोंके आकारको प्राप्त हो गया हो ॥२६४॥ वे स्तूप ठीक मेरुपर्वतके समान सुशोभित हो रहे थे क्योंकि जिस प्रकार मेरुपर्वत अपनी ऊंचाईसे आकाशको घेरे हुए है उसी प्रकार वे स्तूप भी अपनी ऊचाईसे आकाशको घेरे हुए थे, जिस प्रकार मेरुपर्वत विद्याधरोंके द्वारा आराधना करने योग्य है उसी प्रकार वे स्तूप भी विद्याधरोंके द्वारा आराधना करने योग्य थे और जिस प्रकार सुमेरुपर्वत पूजाको प्राप्त है उसी प्रकार वे स्तूप भी पूजाको प्राप्त थे ॥२६५॥ सिद्ध तथा चारण मुनियोंके द्वारा आराधना करने योग्य वे अतिशय ऊचे स्तूप ऐसे सुशोभित हो रहे थे मानो स्तूपोंका आकार धारण करती हुई भगवान्‌की नौ केवललब्धियां ही हों ॥२६६॥ उन स्तूपोंके बीचमें आकाशरूपी आंगनको चित्र-विचित्र करनेवाले रत्नोंके अनेक बन्दनवार बंधे हुए थे जोकि ऐसे सुशोभित हो रहे थे मानो इन्द्रधनुषके ही बंधे हुए हों ॥२६७॥ उन स्तूपोंपर छत्र लगे हुए थे, पताकाएं फहरा रही थीं, मंगलद्रव्य रक्खे हुए थे और इन सब कारणोंसे वे लोगोंको बहुत ही आनन्द उत्पन्न कर रहे थे इसलिये ठीक राजाओंके समान सुशोभित हो रहे थे क्योंकि राजा लोग भी छत्र पताका और सब प्रकारके मंगलोंसे सहित होते हैं तथा लोगोंको आनन्द उत्पन्न करते रहते हैं ॥२६८॥ उन स्तूपोंपर जो जिनेन्द्र भगवान्‌की प्रतिमाएं विराजमान थीं भव्यलोग उनका अभिषेक कर उनकी स्तुति और पूजा करते थे तथा प्रदक्षिणा देकर बहुत ही हर्षको प्राप्त होते थे ॥२६९॥

उन स्तूपों और मकानोंकी पक्तियोंसे घिरी हुई पृथ्वीको उल्लघन कर उसके कुछ आगे आकाशके समान स्वच्छ स्फटिकमणिका बना हुआ कोट था जोकि ऐसा सुशोभित हो रहा था मानो आकाश ही उस कोटरूप हो गया हो ॥२७०॥ अथवा विशुद्ध परिणाम (परिणमन) होनेसे और जिनेन्द्र भगवान्‌के समीप ही सेवा करनेसे वह कोट भव्यजीवके समान सुशोभित हो रहा था क्योंकि भव्यजीव भी विशुद्ध परिणामों (भावों) का धारक होता है और जिनेन्द्र भगवान्‌के समीप रहकर ही उनकी सेवा करता है। इसके सिवाय वह कोट भव्य जीवके समान ही तुङ्ग अर्थात् ऊंचा (पक्षमें श्रेष्ठ) और सद्वृत्त अर्थात्

१ स्तूपस्वरूपवत्त्वम् । २ विस्तारम् । ३ चारणमुनिभिः, देवभेदैश्च । ४ इन्द्रधनुर्भिर्निवृत्ता । ५ कीर्तिताश्च पूजिताश्च । ६ प्राप्तवन्तः । ७–सालोऽभाज्जातं ल० । ८ सालमयम् ।

खगेन्द्रैरुपसेव्यत्वात् तुङ्गत्वादचलत्वतः । रूप्याद्रिरिव ताद्रूप्यम् आपन्नः [1]पर्यगाद् विभुम् ॥२७२॥
दिक्षु सालोत्तमस्यास्य गोपुराण्युदशिश्रियन् । पद्मरागमयान्युच्चैः भव्यरागमयानि वा[2] ॥२७३॥
ज्ञेयाः पूर्ववदत्रापि मङ्गलद्रव्यसम्पदः । द्वारोपान्ते च निधयो ज्वलद्गम्भीरमूर्तयः ॥२७४॥
सतालमङ्गलच्छत्रचामरध्वजदर्पणाः । सुप्रतिष्ठकभृङ्गारकलशाः प्रतिगोपुरम् ॥२७५॥
गदाविपाणयस्तेषु गोपुरेष्वभवन् सुराः । क्रमात् सालत्रये द्वाःस्था[3] भौम[4]भावनकल्पजाः ॥२७६॥
ततः खस्फाटिकात् सालाद् आपीठान्तं समायताः । भित्तयः षोडशाभूवन् महावीथ्यन्तराश्रिताः ॥२७७॥
नभःस्फटिकनिर्माणाः प्रसरन्निर्मलत्विषः । आद्यपीठतटालग्ना ज्योत्स्नायन्ते स्म भित्तयः ॥२७८॥
शुचयो दर्शिताशेषवस्तुबिम्बा महोदयाः । भित्तयस्ता जगद्भर्तुः अधिविद्या[5] इवाबभुः ॥२७९॥
तासामुपरि विस्तीर्णो रत्नस्तम्भैः समुद्धृतः । वियत्स्फटिकनिर्माणः सश्रीः श्रीमण्डपोऽभवत् ॥२८०॥
सत्यं श्रीमण्डपः सोऽयं यत्रासौ परमेश्वरः । नृसुरासुरसान्निध्ये स्वीचक्रे त्रिजगच्छ्रियम् ॥२८१॥

सुगोल (पक्षमे सदाचारी) था ॥२७१॥ अथवा वह कोट बड़े बड़े विद्याधरोंके द्वारा सेवनीय था, ऊचा था, और अचल था इसलिए ऐसा जान पडता था मानो विजयार्ध पर्वत ही कोट-का रूप धारण कर भगवान्‌की प्रदक्षिणा दे रहा हो ॥२७२॥ उस उत्तम कोटकी चारों दिशाओंमें चार ऊंचे गोपुर-द्वार थे जो पद्मराग मणिके बने हुए थे, और ऐसे मालूम पड़ते थे मानो भव्य जीवोंके अनुरागसे ही बने हों ॥२७३॥ जिस प्रकार पहले कोटोंके गोपुरद्वारों पर मंगलद्रव्यरूपी संपदाएं रक्खी हुई थी उसी प्रकार इन ... भी मंगलद्रव्यरूपी संपदाएं जानना चाहिये । और पहलेकी तरह ही इन गोपुरद्वारोंके समीपमें भी देदीप्यमान तथा गंभीर आकारवाली निधियां रक्खी हुई थी ॥२७४॥ प्रत्येक गोपुरद्वारपर पंखा, छत्र, चामर, ध्वजा, दर्पण, सुप्रतिष्ठक (ठौना), भृङ्गार और कलश ये आठ आठ मङ्गल द्रव्य रक्खे हुए थे ॥२७५॥ तीनों कोटोंके गोपुरद्वारोंपर क्रमसे गदा आदि हाथमें लिये हुए व्यन्तर भवनवासी और कल्पवासी देव द्वारपाल थे । भावार्थ—पहले कोटके दरवाजों पर व्यन्तरदेव पहरा देते थे, दूसरे कोटके दरवाजोंपर भवनवासी पहरा देते थे और तीसर कोटके दरवाजोंपर कल्पवासी देव पहरा दे रहे थे । ये सभी देव अपने अपने हाथों में गदा आदि हथियारोंको लिए हुए थे ॥२७६॥ तदनन्तर उस आकाशके समान स्वच्छ स्फटिक मणिके कोटसे लेकर पीठपर्यन्त लम्बी और महावीथियों (बड़े बड़े रास्तों) के अन्तरालमें आश्रित सोलह दीवालें थी । भावार्थ—चारों दिशाओंकी चारों महावीथियोंके अगल बगल दोनों ओर आठ दीवालें थी और दो दो के हिसाबसे चारों विदिशाओंमें भी आठ दीवालें थीं इस प्रकार सब मिलाकर सोलह दीवालें थीं । ये दीवालें स्फटिक कोटसे लेकर पीठ पर्यन्त लम्बी थीं और बारह सभाओंका विभाग कर रहीं थीं ॥२७७॥ जो आकाशस्फटिकसे बनी हुई, जिनकी निर्मल कान्ति चारों ओर फैल रही है और जो प्रथम पीठके किनारेतक लगी हुई हैं ऐसी वे दीवालें चाँदनीके समान आचरण कर रहीं थीं ॥२७८॥ वे दीवालें अतिशय पवित्र थीं समस्त वस्तुओंके प्रतिबिम्ब दिखला रहीं थीं और बड़े भारी ऐश्वर्यके सहित थी इसलिए ऐसी सुशोभित हो रही थीं मानो जगत्‌के भर्ता भगवान् वृषभदेवकी श्रेष्ठ विद्याएं हों ॥२७९॥ उन दीवालोंके ऊपर रत्नमय खंभोंसे खड़ा हुआ और आकाशस्फटिकमणिका बना हुआ बहुत बड़ा भारी शोभायुक्त श्रीमंडप बना हुआ था ॥२८०॥ वह श्रीमंडप वास्तवमें श्रीमंडप था क्योंकि वहांपर परमेश्वर भगवान् वृषभदेवने मनुष्य, देव और धरणेन्द्रोंके समीप तीनों लोकोंकी

---

१ प्रदक्षिणामकरोत् । २ इव । ३ द्वारपालकाः । ४ भौम—व्यन्तर । भावन—भवनवासी । ५ज्ञानातिशयाः ।

यो बभावम्बरस्यान्त[1]र्बिम्बितान्या[2]म्बरोपमः । त्रिजगज्जनतास्थानसङ्ग्रहावाप्तवैभवः[3] ॥२८२॥
यस्योपरितले मुक्ता गुह्यकैः[4] कुसुमोत्कराः । विदधुस्तारकाशङ्काम् अधोभाजां नृणां हृदि ॥२८३॥
यत्र मत्तार[5]वद्भृङ्गसंसूच्याः कुसुमस्रजः । न म्लानिमीयुर्जैनाङ्घ्रिच्छायाशैत्याश्रयादिव ॥२८४॥
नीलोत्पलोपहारेषु निलीना भ्रमरावलिः । विरुतै[6]रगमद् व्यक्तिं यत्र साम्या[7]दलक्षिता ॥२८५॥
योजनप्रमिते[8] यस्मिन् सम्ममुर्नृसुरासुराः । स्थिताः सुखमसम्बाधम् अहो माहात्म्यमीशितुः ॥२८६॥
यस्मिन् शुचिम[9]णिप्रान्तम् उपेता[10] हंससन्ततिः । गुण[11]सादृश्ययोगेऽपि व्यज्यते[12] स्म विकूजितैः ॥२८७॥
यद्भित्तयः स्वसङ्क्रान्तजगत्त्रितयबिम्बिकाः । चित्रिता इव संरेजुर्जगच्छ्रीदर्पणश्रियः[13] ॥२८८॥
[14]यदुत्सर्पत्प्रभाजालजलस्नपितमूर्तयः । तीर्थावगाहनं[15] चक्रुरिव देवाः सदानवाः ॥२८९॥

श्री (लक्ष्मी) स्वीकृत की थी ॥२८१॥ तीनों लोकोंके समस्त जीवोंको स्थान दे सकनेके कारण जिसे बड़ा भारी वैभव प्राप्त हुआ है ऐसा वह श्रीमंडप आकाशके अन्तभागमें एसा सुशोभित हो रहा था मानो प्रतिबिम्बित हुआ दूसरा आकाश ही हो। भावार्थ– उस श्रीमडपका ऐसा अतिशय था कि उसमें एक साथ तीनों लोकोंके समस्त जीवोंको स्थान मिल सकता था, और वह अतिशय ऊंचा तथा स्वच्छ था ॥२८२॥ उस श्रीमंडपके ऊपर यक्षदेवोंके द्वारा छोड़े हुए फूलोंके समह नीचे बैठे हुए मनुष्योंके हृदयमें ताराओंकी शका कर रहे थे ॥२८३॥ उस श्रीमंडपमें मदोन्मत्त शब्द करते हुए भ्रमरोंके द्वारा सूचित होनेवाली फूलोंकी मालाए मानो जिनेन्द्रदेवके चरण-कमलोंकी छायाकी शीतलताके आश्रयसे ही कभी म्लानताको प्राप्त नहीं होती थी–कभी नहीं मुरझाती थी। भावार्थ–उस श्रीमंडपमें स्फटिकमणिकी दीवालोंपर जो सफेद फूलोंकी मालाए लटक रहीं थी वे रङ्गकी समानताके कारण अलगसे पहिचानमें नहीं आती थी परन्तु उनपर शब्द करते हुए जो काले काले मदोन्मत्त भ्रमर बैठे हुए थे उनसे ही उनकी पहिचान होती थी। वे मालाएं सदा हरी भरी रहती थीं–कभी मुरझाती नहीं थीं जिससे ऐसा जान पड़ता था मानो भगवान्‌के चरण कमलोंकी शीतल छायाका आश्रय पाकर ही नही मुरझाती हों ॥२८४॥ उस श्रीमण्डपमें नील कमलोंके उपहारोंपर बैठी हुई भ्रमरोंकी पक्ति रङ्गकी सदृशताके कारण अलगसे दिखाई नहीं देती थी केवल गुंजारशब्दोंसे प्रकट हो रही थी ॥२८५॥ अहा, जिनेन्द्र भगवान्‌का यह कैसा अद्भुत माहात्म्य था कि केवल एक योजन लम्बे चौड़े उस श्रीमण्डपमें समस्त मनुष्य, सुर और असुर एक दूसरेको बाधा न देते हुए सुखसे बैठ सकते थे ॥२८६॥ उस श्रीमण्डपमें स्वच्छ मणियोंके समीप आया हुआ हंसोंका समूह यद्यपि उन मणियोंके समान रंगवाला ही था–उन्हींके प्रकाशमे छिप गया था तथापि वह अपने मधुर शब्दोंसे प्रकट हो रहा था ॥२८७॥ जिनकी शोभा जगत्‌की लक्ष्मीके दर्पणके समान है ऐसी श्रीमण्डपकी उन दीवालोंमें तीनों लोकोंके समस्त पदार्थोंके प्रतिबिम्ब पड़ रहे थे और उन प्रतिबिम्बोंसे वे दीवालें ऐसी सुशोभित हो रही थीं मानो उनमें अनेक प्रकारके चित्र ही खींचे गये हों ॥२८८॥ उस श्रीमण्डपकी फैलती हुई कान्तिके समुदायरूपी जलसे जिनके शरीर नहलाये जा रहे हैं ऐसे देव और दानव ऐसे जान पड़ते थे मानो किसी तीर्थमें स्नान ही कर रहे हों ॥२८९॥

---

१ –स्यान्ते ल०, द०, इ०। २ अपरव्योमसदृशः। ३ विभुत्वम्। ४ देवैः। ५ ध्वनत्। ६ रवैः। ७ वर्णसादृश्यात्। ८ पीठसहितैकयोजनप्रमाणे। ९ स्फटिकरत्नप्रान्तम्। १० प्राप्ताः। ११ शुभ्रगुणसाम्य। १२ प्रकटीक्रियते स्म। १३ मुकुरशोभा। १४ लक्ष्मीमण्डप। १५ मज्जनम।

तद्वृक्षेत्र[1]मध्यस्था प्रथमा पीठिका बभौ । वैडूर्यरत्ननिर्माणा कुलाद्रिशिखरायिता ॥२९०॥
तत्र षोडशसोपानमार्गाः स्युः षोडशान्तराः[2] । महादिक्षु सभाकोष्ठप्रवेशेषु च विस्तृताः ॥२९१॥
तां पीठिकामलञ्चक्रुः अष्टमङ्गलसम्पदः । धर्मचक्राणि चोढानि प्रांशु[3]भिर्यक्षमूर्धभिः ॥२९२॥
सहस्राराणि तान्युद्यद्रत्नरश्मीनि रेजिरे । भानुबिम्बानिवोद्यन्ति पीठिकोदयपर्वतात् ॥२९३॥
द्वितीयमभवत् पीठं तस्योपरि हिरण्मयम् । दिवाकरकरस्पर्धिवपुरुद्योतिताम्बरम् ॥२९४॥
तस्योपरितले रेजुर्दिक्ष्वष्टासु महाध्वजाः । लोकपाला इवोत्तुङ्गाः सुरेशामभिसम्मताः ॥२९५॥
चक्रेभवृषभाम्भोजवस्त्रसिंहगरुत्मताम् । मूलस्य च ध्वजा रेजुः सिद्धाष्टगुणनिर्मलाः ॥२९६॥
नूनं पापपरागस्य सम्मार्जनमिव ध्वजाः । कुर्वन्ति स्म मरुद्धूतस्फुरदंशुकजृम्भि[4]तैः ॥२९७॥
तस्योपरि स्फुरद्रत्नरोचिर्ध्वस्ततमस्तति । तृतीयमभवत् पीठं सर्वरत्नमयं पृथु ॥२९८॥
त्रिमेखलमदः पीठं परार्ध्यमणिनिर्मितम् । बभौ मेरुरिवोपास्त्यै भर्तुस्ताद्रूप्यमाश्रितः ॥२९९॥
स चक्रश्चक्रवर्तीव सध्वजः सुरदन्तिवत् । भर्ममूर्तिर्महामेरुरिव पीठाद्रिरुद्बभौ ॥३००॥
पुष्पप्रकरमाघ्रातु निलीना यत्र षट्पदाः । हेमच्छायासमाक्रान्ताः [5]सौवर्णा इव रेजिरे ॥३०१॥

उसी श्रीमण्डपसे घिरे क्षेत्रके मध्यभागमे स्थित पहली पीठिका सुशोभित हो रही थी, वह पीठिका वैडूर्य मणिकी बनी हुई थी और ऐसी जान पड़ती थी मानो कुलाचलकी शिखर ही हो ॥२९०॥ उस पीठिकापर सोलह जगह अन्तर देकर सोलह जगह ही बड़ी-बड़ी सीढ़ियां बनी हुई थी । चार जगह तो चार महादिशाओं अर्थात् पूर्व, पश्चिम, उत्तर और दक्षिणमे चार महा-वीथियोंके सामने थीं और बारह जगह सभाके कोठोंके प्रत्येक प्रवेशद्वारपर थी ॥२९१॥ उस पीठिकाको अष्ट मगलद्रव्यरूपी सम्पदाएं और यक्षोंके ऊंचे ऊंचे मस्तकोंपर रक्खे हुए धर्मचक्र अलंकृत कर रहे थे ॥२९२॥ जिनमें लगे हुए रत्नोंकी किरणें ऊपरकी ओर उठ रही है ऐसे हजार हजार आराओंवाले वे धर्मचक्र ऐसे सुशोभित हो रहे थे मानो पीठिकारूपी उदयाचलसे उदय होते हुए सूर्यके बिम्ब ही हों ॥२९३॥ उस प्रथम पीठिकापर सुवर्णका बना हुआ दूसरा पीठ था, जो सूर्यकी किरणोंके साथ स्पर्धा कर रहा था और आकाशको प्रकाशमान बना रहा था ॥२९४॥ उस दूसरे पीठके ऊपर आठ दिशाओंमें आठ बड़ी-बड़ी ध्वजाए सुशोभित हो रही थी, जो बहुत ऊची थी और ऐसी जान पड़ती थी मानो इन्द्रोंको स्वीकृत आठ लोकपाल ही हों ॥२९५॥ चक्र, हाथी, बैल, कमल, वस्त्र, सिह, गरुड़ और मालाके चिह्नसे सहित तथा सिद्ध भगवान्के आठ गुणोंके समान निर्मल वे ध्वजाएं बहुत अधिक सुशोभित हो रही थी ॥२९६॥ वायुसे हिलते हुए देदीप्यमान वस्त्रोंकी फटकारसे वे ध्वजाएं ऐसी जान पड़ती थीं मानो पापरूपी धूलिका संमार्जन ही कर रही हों अर्थात् पापरूपी धूलिको झाड़ ही रही हों ॥२९७॥ उस दूसरे पीठपर तीसरा पीठ था जो कि सब प्रकारके रत्नोंसे बना हुआ था, बड़ा भारी था और चमकते हुए रत्नोंकी किरणोंसे अंधकारके समूहको नष्ट कर रहा था ॥२९८॥ वह पीठ तीन कटनियोंसे युक्त था तथा श्रेष्ठ रत्नोंसे बना हुआ था इसलिये ऐसा सुशोभित हो रहा था मानो उस पीठका रूप धरकर सुमेरु पर्वत ही भगवान्की उपासना करनेके लिये आया हो ॥२९९॥ वह पीठरूपी पर्वत चक्र सहित था इसलिये चक्रवर्तीके समान जान पड़ता था, ध्वजा सहित था इसलिये ऐरावत हाथीके समान मालूम होता था और सुवर्णका बना हुआ था इसलिये महामेरुके समान सुशोभित हो रहा था ॥३००॥ पुष्पोंके समूहको सूघनेके लिये जो भ्रमर उस पीठपर बैठे हुए थे उनपर सुवर्णकी छाया पड़ रही

१ तल्लक्ष्मीमण्डपावरुद्धक्षेत्रमध्ये स्थिता । २ षोडशस्तराः ल०, ट० । षोडशच्छदाः । ३ उन्नतैः । ४ जृम्भणैः । ५ सुवर्णमयाः ।

अधरीकृतनिःशेषभवनं भासुरद्युति । जिनस्येव वपुर्भाति यत् स्म देवासुरार्चितम् ॥३०२॥
ज्योति[1]र्गणपरीतत्वात् सर्वोत्तर[2]तयापि तत् । न्यक्[3]चकार श्रियं मेरोर्धारणाच्च जगद्गुरोः ॥३०३॥
ईदृक्त्रिमेखलं पीठम् अस्योपरि जिनाधिपः । त्रिलोकशिखरे सिद्धपरमेष्ठीव निर्बभौ ॥३०४॥
नभः[4]स्फटिकसालस्य मध्यं योजनसम्मितम् । वनत्रय[5]स्य रुन्द्रत्वं ध्व[6]जरुद्धावनेरपि ॥३०५॥
प्रत्येकं योजनं ज्ञेयं धूली[7]सालाच्च खातिका । गत्वा योजनमेकं स्याज्जिनदेशितविस्तृतिः ॥३०६॥
नभःस्फटिकसालात्तु स्यादाराद्[8] वनवेदिका । योजनार्धं तृतीयाच्च सालात् पीठं तदर्धगम्[9] ॥३०७॥
क्रोशार्धं[10]पीठमूर्ध्नः[11] स्याद् विष्कम्भो[12] [13]मेखलेऽपरे । प्रत्येकं धनुषां रुन्द्रे स्यातामर्धाष्टमं[14] शतम् ॥३०८॥
क्रोशं रुन्द्रा महावीथ्यो भित्तयः स्वोच्छ्रितेर्मिताः । रौन्द्रयेणाष्टमभागेन [15]प्राङ्निर्णीता तदुच्छ्रितिः[16]३०९

थी जिससे वे ऐसे सुशोभित हो रहे थे मानो सुवर्णके ही बने हों ॥३०१॥ जिसने समस्त लोकको नीचा कर दिया है, जिसकी कान्ति अतिशय देदीप्यमान है और जो देव तथा धरणेन्द्रोंके द्वारा पूजित है ऐसा वह पीठ जिनेन्द्र भगवान्‌के शरीरके समान सुशोभित हो रहा था क्योंकि जिनेन्द्र भगवान्‌के शरीरने भी समस्त लोकोंको नीचा कर दिया था, उसकी कान्ति भी अतिशय देदीप्यमान थी, और वह भी देव तथा धरणेन्द्रोंके द्वारा पूजित था ॥३०२॥ अथवा वह पीठ सुमेरु पर्वतकी शोभा धारण कर रहा था क्योंकि जिस प्रकार सुमेरु पर्वत ज्योतिर्गण अर्थात् ज्योतिषी देवोंके समूहसे घिरा हुआ है उसी प्रकार वह पीठ भी ज्योतिर्गण अर्थात् किरणोंके समूहसे घिरा हुआ था, जिस प्रकार सुमेरुपर्वत सर्वोत्तर अर्थात् सब क्षेत्रोंसे उत्तर दिशामें है उसी प्रकार वह पीठ भी सर्वोत्तर अर्थात् सबसे उत्कृष्ट था, और जिस प्रकार सुमेरु पर्वत (जन्माभिषेकके समय) जगद्गुरु जिनेन्द्र भगवान्‌को धारण करता है उसी प्रकार वह पीठ भी (समवसरण भूमिमें) जिनेन्द्र भगवान्‌को धारण कर रहा था ॥३०३॥ इस प्रकार तीन कटनीदार वह पीठ था, उसके ऊपर विराजमान हुए जिनेन्द्र भगवान् ऐसे सुशोभित हो रहे थे जैसे कि तीन लोकको शिखरपर विराजमान हुए सिद्ध परमेष्ठी सुशोभित होते हैं ॥३०४॥ आकाशके समान स्वच्छ स्फटिक मणियोंसे बने हुए तीसरे कोटके भीतरका विस्तार एक योजन प्रमाण था, इसी प्रकार तीनों वन (लतावन अशोक आदिके वन, और कल्पवृक्ष वन) तथा ध्वजाओंसे रुकी हुई भूमिका विस्तार भी एक एक योजन प्रमाण था और परिखा भी धूलीसालसे एक योजन चल कर थी, यह सब विस्तार जिनेन्द्रदेवका कहा हुआ है ॥३०५–३०६॥ आकाशस्फटिक मणियोंसे बने हुए कोटसे कल्पवृक्षोंके वनकी वेदिका आधा योजन दूर थी और उसी सालसे प्रथमपीठ पाव योजन दूरी पर था ॥३०७॥ पहले पीठके मस्तकका विस्तार आधे कोशका था, इसी प्रकार दूसरे और तीसरे पीठकी मेखलाएं भी प्रत्येक साढ़ेसात सौ धनुष चौड़ी थी ॥३०८॥ महावीथियों अर्थात् गोपुरद्वारोंके सामनेके बड़े बड़े रास्ते एक एक कोश चौड़े थे और सोलह दीवालें अपनी ऊंचाई से आठवें भाग चौड़ी

---

१ तेजोराशि, पक्षे ज्योतिष्कसमूहः । २ सर्वोत्कृष्टतया, पक्षे सर्वोत्तरदिक्स्थतया । ३ अधःकरोति स्म । ४ आकाशस्फटिकसालवलयाभ्यन्तरवर्तिप्रदेशः । पीठसहित. सर्वोऽप्येकयोजनमित्यर्थ. । ५ वल्लीवनाशोकाद्युपवनकल्पवृक्षवनमिति वनत्रयस्य । ६ ध्वजभूमेरपि प्रत्येकमेकयोजनप्रमारुन्द्र स्यात् । ७ धूलिसालादारभ्य खातिकापर्यन्तमेकयोजनमित्यर्थः । ८ पश्चाद्भागे । पुनराकाशस्फटिकशालादन्तः । ९ तद्योजनस्यार्द्धंक्रोशं गत्वा प्रथमपीठं भवतीति भावः । १० दण्डसहस्रम् । ११ तृतीयपीठस्य । १२ विशालः । १३ प्रथमद्वितीयमेखले । १४ पञ्चाशदधिकसप्तशतम्, चापप्रमितरुन्द्रे स्याताम् । १५ सिद्धार्थचैत्यवृक्षादिना निश्चिता । १६ तद्भित्तीनामुन्नतिः ।

अष्टदण्डोच्छ्रिता ज्ञेया जगती[1] पीठमादिमम् । द्वितीयञ्च तदर्धेन[2] मितोच्छ्रायं विदुर्बुधाः ॥३१०॥
तावदुच्छ्रितमन्त्यञ्च पीठं सिंहासनोन्नतिः । धनुरेकमिहाम्नातं धर्मचक्रस्य चोच्छ्रितिः ॥३११॥
इत्युक्तेन विभागेन जिनस्यास्थायिका स्थिता । तन्मध्ये तदव[3]स्थानम् इतः[4] शृणुत मन्मुखात् ॥३१२॥

शार्दूलविक्रीडितम्

इत्युच्चैर्गणनायके निगदति व्यक्तं जिनास्थायिकां
प्रव्यक्तैर्मधुरैर्वचोभिरुचितैस्तत्त्वार्थसम्बोधिभिः ।
[5]बुद्धान्तःकरणो विकासि वदनं बभ्रे नृपः श्रेणिकः
प्रीतः प्रातरिवाब्जिनीवनचयः प्रोन्मीलितं पङ्कजम् ॥३१३॥
[6]सभ्याः [7]सभ्यतमामसभ्य[8]कुमतध्वान्तच्छिदं भारतीं
श्रुत्वा तामपवाङ्मलां[9] गणभृतः श्रीगौतमस्वामिनः ।
सार्द्धं योगिभिरागमन्[10] जिनपतौ प्रीतिं स्फुरल्लोचनाः
प्रोत्फुल्लाः कमलाकरा इव रवेरासाद्य दीप्तिश्रियम् ॥३१४॥

मालिनीच्छन्दः

स जयति जिननाथो यस्य कैवल्यपूजां
[11]विततनिषुरुदग्रामद्भुतश्रीर्महेन्द्रः ।

थीं । उन दीवालोंकी ऊंचाईका वर्णन पहले कर चुके है– तीर्थंकरोंके शरीरकी ऊंचाईसे बारहगुनी ॥३०९॥ प्रथम पीठरूप जगती आठ धनुष ऊंची जाननी चाहिये और विद्वान् लोग द्वितीय पीठको उससे आधा अर्थात् चार धनुष ऊंचा जानते है ॥३१०॥ इसी प्रकार तीसरा पीठ भी चार धनुष ऊंचा था, तथा सिंहासन और धर्मचक्रकी ऊंचाई एक धनुष मानी गई है ॥३११॥ इस प्रकार ऊपर कहे अनुसार जिनेन्द्र भगवान्‌की समवसरण सभा बनी हुई थी अब उसके बीचमें जो जिनेन्द्र भगवान्‌के विराजमान होनेका स्थान अर्थात् गन्ध-कुटी बनी हुई थी उसका वर्णन भी मेरे मुखसे सुनो ॥३१२॥

इस प्रकार जब गणनायक गौतम स्वामीने अतिशय स्पष्ट, मधुर, योग्य और तत्त्वार्थके स्वरूपका बोध करानेवाले वचनोंसे जिनेन्द्र भगवान्‌की समवसरण-सभाका वर्णन किया तब जिस प्रकार प्रातःकालके समय कमलिनियोंका समूह प्रफुल्लित कमलोंको धारण करता है उसी प्रकार जिसका अन्तःकरण प्रबोधको प्राप्त हुआ है ऐसे श्रेणिक राजाने अपने प्रफुल्लित मुखको धारण किया था अर्थात् गौतम स्वामीके वचन सुनकर राजा श्रेणिकका मुखरूपी कमल हर्षसे प्रफुल्लित हो गया था ॥२१३॥ मिथ्यादृष्टियोंके मिथ्या-मतरूपी अन्धकारको नष्ट करनेवाली, अतिशय योग्य और वचनसम्बन्धी दोषोंसे रहित गणधर गौतम स्वामीकी उस वाणीको सुनकर सभामें बैठे हुए सब लोग मुनियोंके साथ साथ जिनेन्द्र भगवान्‌में परम प्रीतिको प्राप्त हुए थे, उस समय उन सभी सभासदोंके नेत्र हर्षसे प्रफुल्लित हो रहे थे जिससे वे ऐसे जान पड़ते थे मानो सूर्यकी किरणरूपी लक्ष्मीका आश्रय पाकर फूले हुए कमलोंके समूह ही हों ॥३१४॥ जिनके केवलज्ञानकी उत्तम पूजा करनेका अभिलाषी तथा अद्भुत विभूतिको धारण करनेवाला इन्द्र चारों

---

१ प्रथमपीठरूपा जगती । २ चतुर्दण्डेन । ३ जिनस्यावस्थानम् । ४ इतः परम् । ५ प्रबुद्ध । ६ सभायोग्याः । ७ प्रशस्ततमाम् । ८ असतां मिथ्यादृशा कुमत । ९ अपगतवचनदोषाम् । १० आ समन्तात् प्राप्तवन्तः । ११ विततनितुमिच्छुः ।

सममभरनिकायैरेत्य दूरात् प्रणम्रः
समवसरणभूमिं पिप्रिये प्रेक्षमाणः ॥३१५॥
किमयममरसर्गः[1] किं नु [2]जैनानुभावः
किमुत नियतिरेषा किं [3]स्विदैन्द्रः प्रभावः ।
इति विततवितर्कैः कौतुकाद् वीक्ष्यमाणा
जयति सुरसमाजैर्भर्तुरास्थानभूमिः ॥३१६॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसङ्ग्रहे
भगवत्समवसरणवर्णनं नाम
द्वाविंशं पर्व

निकायोंके देवोंके साथ आकर दूरसे ही नम्रीभूत हुआ था और समवसरण भूमिको देखता हुआ अतिशय प्रसन्न हुआ था ऐसे श्री जिनेन्द्रदेव सदा जयवन्त रहें ॥३१५॥ क्या यह देवलोककी नई सृष्टि है ? अथवा यह जिनेन्द्र भगवान्का प्रभाव है, अथवा ऐसा नियोग ही है, अथवा यह इन्द्रका ही प्रभाव है इस प्रकार अनेक तर्क-वितर्क करते हुए देवोंके समूह जिसे बड़े कौतुकके साथ देखते थे ऐसी वह भगवान्की समवसरणभूमि सदा जयवन्त रहे ॥३१६॥

इस प्रकार भगवज्जिनसेनाचार्यप्रणीत त्रिषष्टिलक्षण
महापुराणके भाषानुवादमें समवसरणका वर्णन
करनेवाला बाईसवां पर्व समाप्त हुआ ।

---

१ सृष्टिः । २ जैनोऽनुभाव. प०, अ०, द०, इ० । अनुभावः सामर्थ्यम् । ३ उत् ।

त्रयोविंशं पर्व

अथ त्रिमेखलस्यास्य मूर्ध्नि पीठस्य विस्तृते । स्फुरन्मणिविभाजालरचितामरकार्मुके ॥१॥
सुरेन्द्रकरविक्षिप्तपुष्पप्रकरशोभिनि । हस[1]तीव घनापायस्फु[2]टत्तारकमम्बरम् ॥२॥
चलच्चामरसङ्घातप्रतिबिम्बनिभा[3]गतैः । हंसैरिव सरोबुद्धया सेव्यमान[4]तटे पृथौ ॥३॥
मार्तण्डमण्डलच्छायाप्रस्पर्धिनि महर्द्धिके । स्वर्धुनीफेननीकाशैः स्फटिकैर्घटिते क्वचित् ॥४॥
पद्मरागसमुत्सर्पन्मयूखैः क्वचिदा[5]स्तृते । जिनपादतलच्छायाशोणि[6]म्नेवानुरञ्जिते ॥५॥
शुचौ स्निग्धे मृदुस्पर्शे जिनाङ्घ्रिस्पर्शपावने । पर्यन्तरचितानेकमङ्गलद्रव्यसम्पदि ॥६॥
तत्र गन्धकुटीं पृ[7]थ्वीं तुङ्गशालोपशोभिनीम् । रैराड्[8]निवेशयामास स्वर्विमानातिशायिनीम् ॥७॥
त्रिमेखलाङ्किते पीठे सैषा गन्धकुटी बभौ । नन्दनादि[9]वनश्रेणीत्रयाद्[10]वोपरि चूलिका ॥८॥
यथा सर्वार्थसिद्धिर्वा स्थिता त्रिदिवमूर्धनि । तथा गन्धकुटी दीप्रा[11] पीठस्याधि[12]तलं बभौ ॥९॥
नानारत्नप्रभोत्सर्पैर्यत्कूटैस्ततमम्बरम् । सचित्रमिव भाति स्म सेन्द्रचापमिवाथवा ॥१०॥

अथानन्तर—जो देदीप्यमान मणियोंकी कान्तिके समूहसे अनेक इन्द्रधनुषोंकी रचना कर रहा है, जो स्वयं इन्द्रके हाथोंसे फैलाये हुए पुष्पोंके समूहसे सुशोभित हो रहा था और उससे जो ऐसा जान पड़ता है मानो मेघोंके नष्ट हो जानेसे जिसमें तारागण चमक रहे हैं ऐसे शरद् ऋतुके आकाशकी ओर हँस ही रहा हो; जिसपर ढुरते हुए चमरोंके समूहसे प्रतिबिम्ब पड़ रहे थे और उनसे जो ऐसा जान पड़ता था मानो उसे सरोवर समझकर हंस ही उसके बड़े भारी तलभागकी सेवा कर रहे हों; जो अपनी कान्तिसे सूर्यमंडलके साथ स्पर्द्धा कर रहा था; बड़ी-बड़ी ऋद्धियोंसे युक्त था, और कही कहीपर आकाशगंगाके फेनके समान स्फटिक मणियोंसे जड़ा हुआ था; जो कही कहीपर पद्मरागकी फैलती हुई किरणोंसे व्याप्त हो रहा था और उससे ऐसा जान पड़ता था मानो जिनेन्द्र भगवान्के चरणतलकी लाल-लाल कान्तिसे ही अनुरक्त हो रहा हो; जो अतिशय पवित्र था, चिकना था, कोमल स्पर्शसे सहित था, जिनेन्द्र भगवान्के चरणोंके स्पर्शसे पवित्र था और जिसके समीपमें अनेक मंगलद्रव्यरूपी सम्पदाएं रक्खी हुई थीं ऐसे उस तीन कटनीदार तीसरे पीठके विस्तृत मस्तक अर्थात् अग्रभागपर कुबेरने गन्धकुटी बनाई। वह गन्धकुटी बहुत ही विस्तृत थी, ऊंचे कोटसे शोभायमान थी और अपनी शोभासे स्वर्गके विमानोंका भी उल्लंघन कर रही थी ॥१—७॥ तीन कटनियोंसे चिह्नित पीठपर वह गंधकुटी ऐसी सुशोभित हो रही था मानो नन्दनवन, सौमनस वन और पाण्डुक वन इन तीन वनोंके ऊपर सुमेरु पर्वतकी चूलिका ही सुशोभित हो रही हो ॥८॥ अथवा जिस प्रकार स्वर्गलोकके ऊपर स्थित हुई सर्वार्थसिद्धि सुशोभित होती है उसी प्रकार उस पीठके ऊपर स्थित हुई वह अतिशय देदीप्यमान गंधकुटी सुशोभित हो रही थी ॥९॥ अनेक प्रकारके रत्नोंकी कान्तिको फैलानेवाले उस गन्धकुटीके शिखरोंसे व्याप्त हुआ आकाश ऐसा जान पड़ता था मानो अनेक चित्रोंसे सहित ही हो रहा हो अथवा इन्द्रधनुषोंसे युक्त ही

---

१ हसतीति हसन् तस्मिन् । २ —स्फुरत्तारक —ल०, म० । ३ व्याजादागतैः । ४ —तले ल०, इ०, द०, स०, म०, अ०, प० । ५ आतते । ६ अरुणत्वेन । ७ पीवराम् । ८ धनदः । ९ नन्दनसौमनसपाण्डुकवनश्रेणित्रयात् । १० इव । ११ दीप्ता प०, द०, ल० । १२ उपरि तले ।

योत्तुङ्गैः शिखरैर्बद्धजयकेतनकोटिभिः । भुजशाखाः प्रसार्येव नभोगानाजुहूषत[1] ॥११॥
त्रिभिस्तलैरुपेताया भुवनत्रितयश्रियः । प्रतिमेव बभौ व्योम[2]सरोमध्येऽम्बुबिम्बिता ॥१२॥
स्थूलैर्मुक्तामयै[3]र्जालैः लम्बमानैः समन्ततः । महाब्धिभिरिवानीतैः योपायनशतैरभात् ॥१३॥
हैमैर्जालैः क्वचित् स्थूलैः आयतैर्या विदिद्युते । कल्पाङ्घ्रिपोद्भवैः [4]र्दीप्रैः प्ररोहै[5]रिव लम्बितैः ॥१४॥
रत्नाभरणमालाभिः लम्बिताभिरितोऽमुतः । या बभौ स्वर्गलक्ष्म्येव प्रहि[6]तोपायनर्द्धिभिः ॥१५॥
स्रग्भिराकृष्टगन्धान्धमाद्यन्मधुपकोटिभिः । जिनेन्द्रमिव [7]तुष्टूषुः अभाद् या मुखरीकृता ॥१६॥
स्तुवत्सुरेन्द्रसंदृ[8]ब्धगद्यपद्यस्तवस्वनैः । सरस्वतीव भाति स्म या विभुं स्तोतुमुद्यता ॥१७॥
रत्नालोकैर्विसर्पद्भिः या वृत्ताङ्गी व्यराजत । जिनेन्द्राङ्गप्रभालक्ष्म्या घटितेव महाद्युतिः ॥१८॥
या प्रोत्सर्पद्भिराहूतमदालिकुलसङ्कुलैः । धूपैर्दिशामिवायामं प्रमि[9]त्सुस्ततधूमकैः ॥१९॥
गन्धैर्गन्धमयीवासीत् सृष्टिः पुष्पमयीव च । पुष्पैर्धूपमयीवाभाद् धूपैर्या दिग्विसर्पिभिः ॥२०॥
सुगन्धिधूपनिःश्वासा सुमनोमालभारिणी । नानाभरणदीप्ताङ्गी या वधूरिव दिद्युते ॥२१॥

हो रहा हो ॥१०॥ जिनपर करोड़ो विजयपताकाए बधी हुई है ऐसे ऊचे शिखरोसे वह गधकुटी ऐसी जान पड़ती थी मानो अपने हाथोंको फैलाकर देव और विद्याधरों को ही बुला रही हो ॥११॥ तीनों पीठो सहित वह गधकुटी ऐसी जान पड़ती थी मानो आकाशरूपी सरोवरके मध्यभागमे जलमे प्रतिविम्बित हुई तीनों लोकोंकी लक्ष्मीकी प्रतिमा ही हो ॥१२॥ चारों ओर लटकते हुए बड़े बड़े मोतियोंकी झालरसे वह गंधकुटी ऐसी सुशोभित हो रही थी मानो बड़े बडे समुद्रोने उसे मोतियोंके सैकड़ों उपहार ही समर्पित किये हों ॥१३॥ कही कही पर वह गन्धकुटी सुवर्णकी बनी हुई मोटी और लम्बी जालीसे ऐसी सुशोभित हो रही थी मानो कल्पवृक्षोंसे उत्पन्न होनेवाले लटकते हुए देदीप्यमान अंकुरोंसे ही सुशोभित हो रही हो ॥१४॥ जो स्वर्ग की लक्ष्मीके द्वारा भेजे हुए उपहारोंके समान जान पड़ती थी ऐसी चारों ओर लटकती हुई रत्नमय आभरणोंकी मालासे वह गन्धकुटी बहुत ही अधिक शोभायमान हो रही थी ॥१५॥ वह गन्धकुटी पुष्पमालाओंसे खिचकर आये हुए गन्धसे अन्धे करोड़ों मदोन्मत्त भ्रमरोंसे शब्दायमान हो रही थी और ऐसी जान पड़ती थी मानो जिनेन्द्र भगवान्की स्तुति ही करना चाहती हो ॥१६॥ स्तुति करते हुए इन्द्रके द्वारा रचे हुए गद्य-पद्यरूप स्तोत्रोंके शब्दोंसे शब्दायमान हुई वह गंधकुटी ऐसी जान पड़ती थी मानो भगवान्का स्तवन करनेके लिये उद्यत हुई सरस्वती हो ॥१७॥ चारों ओर फैलते हुए रत्नोंके प्रकाशसे जिसके समस्त अग ढके हुए है ऐसी वह देदीप्यमान गन्धकुटी ऐसी सुशोभित हो रही थी मानो जिनेन्द्र भगवान्के शरीरकी लक्ष्मीसे ही बनी हो ॥१८॥ जो अपनी सुगन्धिसे बुलाये हुए मदोन्मत्त भ्रमरोंके समूहसे व्याप्त हो रहा है और जिसका धुआं चारों ओर फैल रहा है ऐसी सुगन्धित धूपसे वह गन्धकुटी ऐसी जान पड़ती थी मानो दिशाओंकी लम्बाई ही नापना चाहती हो ॥१९॥ सब दिशाओंमे फैलती हुई सुगन्धिसे वह गधकुटी ऐसी जान पड़ती थी मानो सुगन्धिसे ही बनी हो, सब दिशाओंमें फैले हुए फूलोंसे ऐसी मालूम होती थी मानो फूलोंसे ही बनी हो और सब दिशाओंमें फैलते हुए धूपसे ऐसी प्रतिभासित हो रही थी मानो धूपसे ही बनी हो ॥२०॥ अथवा वह गन्धकुटी स्त्रीके समान सुशोभित हो रही थी क्योंकि जिस प्रकार स्त्रीका नि श्वास सुगन्धित होता है उसी प्रकार उस गन्धकुटीमें जो धूपसे सुगन्धित वायु बह रहा था वही उसके

---

१ आह्वयति स्म । २ आकाशसरोवरजलमध्ये । ३ दामभिरित्यर्थः । ४ दीप्तै. ल०, प०, द० । ५ शिफाभिः । ६ प्रेषित । ७ स्तोतुमिच्छुः । ८ रचित । ९ प्रमातुमिच्छुः ।

धूपगन्धैर्जिनेन्द्राङ्गसौगन्ध्यबहलीकृतैः । सुरभीकृतविश्वार्थ्यां[1] याधाद् गन्धकुटीश्रुतिम्[2] ॥२२॥
गन्धानामिव या सूतिर्भासां[3] [4]येवाधिदेवता । शोभानां [5]प्रसवक्ष्मेव या लक्ष्मीमधिकां दधे ॥२३॥
धनुषां षट्शतीमेषा[6] विस्तीर्णा तावदायता । विष्कम्भात्[7] साधिकोच्छ्राया मानोन्मानप्रमान्विता ॥२४॥

विद्युन्मालावृत्तम्

[8]तस्या मध्ये सैहं पीठं नानारत्नव्राताकीर्णम् । मेरोः शृङ्गं न्यक्कुर्वाणं[9] चक्रे शक्रादे[10]शाद् वित्तेट्[11] ॥२५॥
भानुह्लेपि[12] श्रीमद्धैमं तुङ्गं भक्त्या जिष्णुं[13] भक्तुम्[14]। मेरुः शृङ्गं [15]स्वं वा[16] निन्ये पीठव्याजाद्दी[17]प्रभासा

समानिकावृत्तम्

यत्प्रसर्पदंशुदष्टदिङमुखं महर्द्धिभासि । चारुरत्नसारमूर्ति भासते स्म नेत्रहारि ॥२७॥
पृथुप्रदीप्तदेहकं स्फुरत्प्रभाप्रतानकम् । परार्ध्यरत्नभासुरं सुराद्रिहासि[18] यद् बभौ ॥२८॥

सुगन्धित निःश्वासके समान था । स्त्री जिस प्रकार फूलोंकी माला धारण करती है उसी प्रकार वह गन्धकुटी भी जगह जगह मालाए धारण कर रही थी, और स्त्रीके अग जिस प्रकार नाना आभरणोसे देदीप्यमान होते है उसी प्रकार उस गन्धकुटीके अग (प्रदेश) भी नाना आभरणोसे देदीप्यमान हो रहे थे ॥२१॥ भगवान्‌के शरीरकी सुगन्धिसे बढ़ी हुई धूपकी सुगन्धिसे उसने समस्त दिशाए सुगन्धित कर दी थी इसलिये ही वह गन्धकुटी इस सार्थक नामको धारण कर रही थी ॥२२॥ अथवा वह गन्धकुटी ऐसी शोभा धारण कर रही थी मानो सुगन्धिको उत्पन्न करनेवाली ही हो, कान्तिकी अधिदेवता अर्थात् स्वामिनी ही हो और शोभाओंको उत्पन्न करनेवाली भूमि ही हो ॥२३॥ वह गन्धकुटी छह सौ धनुष चौडी थी, उतनी ही लम्बी थी और चौडाईसे कुछ अधिक ऊची थी इस प्रकार वह मान और उन्मानके प्रमाणसे सहित थी ॥२४॥ उस गन्धकुटीके मध्यमें धनपतिने एक सिहासन बनाया था जो कि अनेक प्रकारके रत्नोंके समूहसे जड़ा हुआ था और मेरु पर्वतके शिखरको तिरस्कृत कर रहा था ॥२५॥ वह सिहासन सुवर्णका बना हुआ था, ऊचा था, अतिशय शोभायुक्त था और अपनी कान्तिसे सूर्यको भी लज्जित कर रहा था तथा ऐसा जान पड़ता था मानो जिनेन्द्र भगवान्‌की सेवा करनेके लिये सिहासनके बहानेसे सुमेरु पर्वत ही अपने कान्तिसे देदीप्यमान शिखरको ले आया हो ॥२६॥ जिससे निकलती हुई किरणोंसे समस्त दिशाएं व्याप्त हो रही थी, जो बड़े भारी ऐश्वर्यसे प्रकाशमान हो रहा था जिसका आकार लगे हुए सुन्दर रत्नोंसे अतिशय श्रेष्ठ और जो नेत्रोंको हरण करनेवाला था ऐसा वह सिहासन बहुत ही शोभायमान हो रहा था ॥२७॥ जिसका आकार बहुत बडा और देदीप्यमान था, जिससे कान्तिका समूह निकल रहा था, जो श्रेष्ठ रत्नोंसे प्रकाशमान था और जो अपनी शोभासे मेरु पर्वतकी भी हसी करता था ऐसा वह सिहासन बहुत अधिक सुशोभित हो रहा था ॥२८॥

---

१ विश्वाशा ल०, म० । विश्व जगत् । अर्थ्याम् अर्थादनपेताम् । २ सज्ञाम् । ३ कान्तीनाम् । ४ गन्धकुटी । ५ उत्पत्ति । ६ सैषा ल०, म० । ७ विष्कम्भा किञ्चिदधिकोत्सेधा । ८ गन्धकुट्याः । ९ अधःकुर्वाणम् । १० शासनात् । ११ धनदः । १२ भानुं ह्लेपयति लज्जयति । १३ सर्वज्ञम् । १४ भजनाय । १५ आत्मीयम् । १६ इव । १७ दीप्तं ल०, म० । १८ सुराद्रि हसतीत्येवं शीलम् ।

अनुष्टुप्

विष्टरं तदलञ्चक्रे भगवानादितीर्थकृत् । चतुर्भिरङ्गुलैः स्वेन महिम्ना स्पृष्टतत्तलः ॥२९॥
तत्रासीनं तमिन्द्राद्याः परिचेरु[1]र्महेज्यया । पुष्पवृष्टिं प्रवर्षन्तो नभोमार्गाद् घना इव ॥३०॥
अपप्तत्कौसुमी वृष्टिः प्रोर्णुवाना[2] नभोऽङ्गणम् । दृष्टिमालेव मत्तालिमाला वाचालिता नृणाम् ॥३१॥
द्विषड्यो[3]जनभूभागम आमुक्ता[4] सुरवारिदैः । पुष्पवृष्टिः पतन्ती सा व्यधाच्चित्रं रजस्ततम्[5] ॥३२॥

चित्रपदावृत्तम्

वृष्टिरसौ कुसुमानां तुष्टिकरी प्रमदानाम्[6] । दृष्टिततीरनुकृत्य स्रष्टुरपप्तदुपान्ते ॥३३॥
षट्पदवृन्दविकीर्णैः पुष्परजोभिरुपेता । वृष्टिरमर्त्यविसृष्टा सौमन[7]सी रुरुचेऽसौ ॥३४॥
शीतलैर्वारिभिर्गाङ्गैराद्रिता कौसुमी वृष्टिः । षड्भेदैराकुलापप्तत् पत्युरग्रे ततामोदा ॥३५॥

भुजगशशिभृतावृत्तम्

मरकतहरितैः पत्रैर्मणिमयकुसुमैश्चित्रैः । मरुदुपविधुताः शाखाश्चिरमधृत महाशोकः ॥३६॥
मदकलविरुतैर्भृङ्गैरपि परपुष्टविहङ्गैः । स्तुतिमिव भर्तुरशोको मुखरितदिक्कुरुते स्म ॥३७॥

प्रथम तीर्थंकर भगवान् वृषभदेव उस सिंहासनको अलंकृत कर रहे थे । वे भगवान् अपने माहात्म्यसे उस सिंहासनके तलसे चार अंगुल ऊंचे अधर विराजमान थे उन्होंने उस सिंहासनके तलभागको छुआ ही नहीं था ॥२९॥ उसी सिंहासनपर विराजमान हुए भगवान्‌की इन्द्र आदि देव बड़ी बड़ी पूजाओं द्वारा परिचर्या कर रहे थे और मेघोंकी तरह आकाशसे पुष्पोंकी वर्षा कर रहे थे ॥३०॥ मदोन्मत्त भ्रमरोंके समूहसे शब्दायमान तथा आकाशरूपी आंगनको व्याप्त करती हुई पुष्पोंकी वर्षा ऐसी पड़ रही थी मानो मनुष्योंके नेत्रोंकी माला ही हो ॥३१॥ देवरूपी बादलोंद्वारा छोड़ी जाकर पड़ती हुई पुष्पोंकी वर्षाने बारह योजन तकके भूभागको पराग (धूलि)से व्याप्त कर दिया था यह एक भारी आश्चर्यकी बात थी । भावार्थ—यहां पहले विरोध मालूम होता है क्योंकि वर्षासे तो धूलि शान्त होती है न कि बढ़ती है परन्तु जब इस बातपर ध्यान दिया जाता है कि वह पुष्पोंकी वर्षा थी और उसने भूभागको पराग अर्थात् पुष्पोंके भीतर रहनेवाले केशरके छोटे-छोटे कणोंसे व्याप्त कर दिया था तब वह विरोध दूर हो जाता है यह विरोधाभास अलंकार कहलाता है ॥३२॥ स्त्रियोंको संतुष्ट करनेवाली वह फूलोंकी वर्षा भगवान्‌के समीपमें पड़ रही थी और ऐसी जान पड़ती थी मानो स्त्रियोंके नेत्रोंकी संतति ही भगवान्‌के समीप पड़ रही हो ॥३३॥ भ्रमरोंके समूहोंके द्वारा फैलाये हुए फूलोंके परागसे सहित तथा देवोंके द्वारा बरसाई वह पुष्पोंकी वर्षा बहुत ही अधिक शोभायमान हो रही थी ॥३४॥ जो गंगा नदीके शीतल जलसे भीगी हुई है, जो अनेक भ्रमरोंसे व्याप्त है और जिसकी सुगन्धि चारों ओर फैली हुई है ऐसी वह पुष्पोंकी वर्षा भगवान्‌के आगे पड़ रही थी ॥३५॥

भगवान्‌के समीप ही एक अशोक वृक्ष था जो कि मरकतमणिके बने हुए हरे-हरे पत्ते और रत्नमय चित्र-विचित्र फूलोंसे सहित था तथा मन्द-मन्द वायुसे हिलती हुई शाखाओंको धारण कर रहा था ॥३६॥ वह अशोकवृक्ष मदसे मधुर शब्द करते हुए भ्रमरों और कोयलोंसे समस्त दिशाओंको शब्दायमान कर रहा था जिससे ऐसा जान पड़ता था मानो

---

१ परिचर्यां चक्रिरे । सेवा चक्रुरित्यर्थः । २ आच्छादयन्ती । ३ द्वादशयोजनप्रमितभूभागं व्याप्य । ४ आ समन्तान्मुक्ता । ५ विस्तृतम् । ६ स्त्रीणाम् । ७ सुमनसा कुसुमानां सम्बन्धिनी ।

रुक्मवतीवृत्तम्

व्यायतशाखादोश्चलनैः स्वैः नृत्तमथासौ कर्तुमिवाग्रे ।
पुष्पसमूहैरञ्जलिमिद्धं भर्तुरकार्षीद् व्यक्तमशोकः ॥३८॥

पणववृत्तम्

रेजेऽशोकतरुरसौ रुन्धन्मार्गं व्योमचर[1]महेशानाम् ।
तन्वन्योजनविस्तृताः शाखा धुन्वन् शोकमयमदो ध्वान्तम् ॥३९॥

उपस्थितावृत्तम्

सर्वा हरितो[2] विटपैस्ततैः सम्मार्ष्टुमिवोद्यतधीरसौ ।
व्याप[3]द्विकचैः कुसुमोत्करैः पुष्पोपहृ[4]तिं विदधद्द्रुमः ॥४०॥

मयूरसारिणीवृत्तम्

वज्रमू[5]लबद्धरत्न[6]बुध्नं सज्जपा[7]भरत्नचित्रसूनम् ।
मत्तकोकिलालिसेव्यमेनं चक्रुरग्र्यमङ्घ्रिपं सुरेशाः ॥४१॥

छन्द (?)

छत्रं धवलं रुचिमत्कान्त्या चा[8]न्द्रीमजयद्रुचिरां लक्ष्मीम् ।
त्रेधा रुरुचे शशभृन्नूनं सेवां विदधज्जगतां पत्युः ॥४२॥
छत्राकारं दधदिव चान्द्रं बिम्बं शुभ्रं छत्रत्रितयमदो बाभा[9]सत् ।
मुक्ताजालैः किरणसमूहैर्वा स्वैश्चक्रे सुत्रामवचनतो रैराट्[10] ॥४३॥

भगवान्‌की स्तुति ही कर रहा हो ॥३७॥ वह अशोक वृक्ष अपनी लम्बी-लम्बी शाखारूपी भुजाओंके चलानेसे ऐसा जान पड़ता था मानो भगवान्‌के आगे नृत्य ही कर रहा हो और पुष्पोंके समूहोंसे ऐसा जान पड़ता था मानो भगवान्‌के आगे देदीप्यमान पुष्पाञ्जलि ही प्रकट कर रहा हो ॥३८॥ आकाशमें चलनेवाले देव और विद्याधरोंके स्वामियोंका मार्ग रोकता हुआ अपनी एक योजन विस्तारवाली शाखाओंको फैलाता हुआ और शोकरूपी अन्धकारको नष्ट करता हुआ वह अशोकवृक्ष बहुत ही अधिक शोभायमान हो रहा था ॥३९॥ फूले हुए पुष्पोंके समूहसे भगवान्‌के लिये पुष्पोंका उपहार समर्पण करता हुआ वह वृक्ष अपनी फैली हुई शाखाओंसे समस्त दिशाओंको व्याप्त कर रहा था और उससे ऐसा जान पड़ता था मानो उन फैली हुई शाखाओंसे दिशाओंको साफ करनेके लिये ही तैयार हुआ हो ॥४०॥ जिसकी जड़ वज्रकी बनी हुई थी, जिसका मूल भाग रत्नोंसे देदीप्यमान था, जिसके अनेक प्रकारके पुष्प जपापुष्पकी कान्तिके समान पद्मराग मणियोंके बने हुए थे और जो मदोन्मत्त कोयल तथा भ्रमरोंसे सेवित था ऐसे उस वृक्षको इन्द्रने सब वृक्षोंमें मुख्य बनाया था ॥४१॥ भगवान्‌के ऊपर जो देदीप्यमान सफेद छत्र लगा हुआ था उसने चन्द्रमाकी लक्ष्मीको जीत लिया था और वह ऐसा सुशोभित हो रहा था मानो तीनों लोकोंके स्वामी भगवान् वृषभदेवकी सेवा करनेके लिये तीन रूप धारण कर चन्द्रमा ही आया हो ॥४२॥ वे तीनों सफेद छत्र ऐसे सुशोभित हो रहे थे मानो छत्रका आकार धारण करनेवाले चन्द्रमाके विम्ब ही हों, उनमें जो मोतियोंके समूह लगे हुए थे वे किरणोंके समान जान पड़ते थे। इस प्रकार उस छत्र त्रितयको कुबेरने इन्द्रकी आज्ञासे बनाया था

---

१ गगनचरमहाप्रभूणाम्। २ दिशः। ३ व्याप्नोति स्म। ४ उपहारम्। ५ अङ्घ्रि। ६ मूलोपरिभागम्। ७ प्रशस्तजपाकुसुमसमानरत्नमयविचित्रप्रसूनम्। ८ चन्द्रसम्बन्धिनीम्। ९ भृश विराजमानम्। १० कुबेरः।

इन्द्रवज्रावृत्तम्

रत्नैरनेकैः खचितं परार्ध्यैः उद्यद्दिनेशश्रियमाहसद्भिः ।
छत्रत्रयं तद्रुरुचेऽतिशौध्रं[1] चन्द्रार्कसम्पर्कविनिर्मितं वा ॥४४॥
सन्मौक्तिकं[2] वार्धिजलायमानं सश्रीकमिन्दुद्युतिहारि हारि ।
छत्रत्रयं तल्लसदिन्द्रवज्रं[3] दधौ परां कान्तिमुपेत्य नाथम् ॥४५॥

वंशस्थवृत्तम्

किमेष हासस्तनुते जगच्छ्रियाः किमु प्रभोरुल्लसितो यशोगणः ।
उत स्मयो[4] धर्मनृपस्य निर्मलो जगत्त्रयानन्दकरो नु चन्द्रमाः ॥४६॥
इति प्रतर्क जनतामनस्ववो वितन्वदिद्धा[5]तपवारणत्रयम् ।
बभौ विभोर्मोहविनिर्जयार्जितं यशोमयं बिम्बमिव त्रिधास्थितम् ॥४७॥

उपेन्द्रवज्रावृत्तम्

पयःपयोधेरिव वीचिमाला प्रकीर्णकानां[6] समितिः समन्तात् ।
जिनेन्द्रपर्यन्तनिषेविपक्षकरोत्करैराविरभद् विधूता ॥४८॥

उपजातिवृत्तम्

पीयूषशल्कैरिव[7] निर्मिताङ्गी चान्द्रै[8]रिवांशैर्घटिताऽमलश्रीः ।
जिनाङ्घ्रिपर्यन्तमुपेत्य [9]भेजे प्रकीर्णकाली गिरिनिर्झराभाम्[10] ॥४९॥

॥४३॥ वह छत्रत्रय उदय होते हुए सूर्यकी शोभाकी हँसी उड़ानेवाले अनेक उत्तम-उत्तम रत्नोंसे जड़ा हुआ था तथा अतिशय निर्मल था इसलिये ऐसा जान पड़ता था मानो चन्द्रमा और सूर्यके सम्पर्क (मेल) से ही बना हो ॥४४॥ जिसमे अनेक उत्तम मोती लगे हुए थे, जो समुद्रके जलके समान जान पड़ता था, बहुत ही सुशोभित था, चन्द्रमाकी कान्तिको हरण करनेवाला था, मनोहर था और जिसमे इन्द्रनील मणि भी देदीप्यमान हो रहे थे ऐसा वह छत्रत्रय भगवान्के समीप आकर उत्कृष्ट कान्तिको धारण कर रहा था ॥४५॥ क्या यह जगत्‌रूपी लक्ष्मीका हास फैल रहा है ? अथवा भगवान्का शोभायमान यशरूपी गुण है ? अथवा धर्मरूपी राजाका मन्द हास्य है ? अथवा तीनों लोकोंमे आनन्द करनेवाला कलङ्करहित चन्द्रमा है, इस प्रकार लोगोंके मनमे तर्क-वितर्क उत्पन्न करता हुआ वह देदीप्यमान छत्रत्रय ऐसा सुशोभित हो रहा था मानो मोहरूपी शत्रुको जीत लेनेसे इकट्ठा हुआ तथा तीन रूप धारण कर ठहरा हुआ भगवान्के यशका मण्डल ही हो ॥४६–४७॥ जिनेन्द्र भगवान्के समीपमे सेवा करनेवाले यक्षोंके हाथोंके समूहोंसे जो चारों ओर चमरोंके समूह ढुराये जा रहे थे वे ऐसे जान पड़ते थे मानो क्षीरसागरके जलके समूह ही हों ॥४८॥ अत्यन्त निर्मल लक्ष्मीको धारण करनेवाला वह चमरोंका समूह ऐसा जान पड़ता था मानो अमृतके टुकड़ोंसे ही बना हो अथवा चन्द्रमाके अंशों ही रचा गया हो तथा वही चमरोंके समूह भगवान्के चरणकमलोंके समीप पहुँचकर ऐसे सुशोभित हो रहे थे मानो

---

१ नितरा धवलम् । २ प्रशस्तमौक्तिकत्वादिति हेतुगर्भितमिदम् । ३ विलसदिन्द्रनीलमाणिक्यवज्रो यस्य । ४ हासः । ५ दीप्त । ६ चामराणाम् । ७ खण्डैः । ८ चन्द्रसम्बन्धिभिः । ९ भूजे द० । १० –निर्झराभा द०, ल०, इ० ।

जिनेन्द्रमासेवितुमागतेयं दिवापगा स्यादिति तर्क्यमाणा ।
पङ्क्तिर्विरेजे शुचिचामराणां यक्षैः सलीलं परिवीजितानाम् ॥५०॥
जैनी किमङ्गद्युतिरुद्व्रवन्ती[1] किमिन्दुभासां[2] ततिरापतन्ती[3] ।
इति स्म शङ्कां तनुते पतन्ती सा चामराली शरदिन्दुशुभ्रा ॥५१॥
सुधामलाङ्गी रुचिरा विरेजे सा चामराणां ततिरुल्लसन्ती ।
क्षीरोदफेनावलिरुच्चलन्ती मरुद्विधूतेव [4]समिद्धकान्तिः ॥५२॥
लक्ष्मीं परामाप परा पतन्ती शशाङ्कपीयूषसमानकान्तिः ।
सिषेविषुस्तं[5] जिनमाव्रजन्ती[6] पयोधिवेलेव सुचामराली ॥५३॥

उपेन्द्रवज्रावृत्तम्

पतन्ति हंसाः किमु मेघमार्गात् किमुत्पतन्तीश्वरतो यशांसि ।
विशङ्क्यमानानि सुरैरितीशः[7] पेतुः समन्तात् सितचामराणि ॥५४॥

उपजातिः

यक्षैरुदक्षिप्यत चामराली दक्षैः सलीलं कमलायताक्षैः ।
न्यक्षेपि भर्तु[8]र्वितता वलक्षा[9] तरङ्गमालेव मरुद्भिरब्धेः ॥५५॥
जिनेन्द्रभक्त्या सुरनिम्नगेव तद्व्या[10]जमेत्याम्बरतः पतन्ती ।
सा निर्बभौ चामरपङ्क्तिरुच्चैः ज्योत्स्नेव भव्योरुकुमुद्वतीनाम् ॥५६॥

किसी पर्वतसे झरते हुए निर्झर ही हो ॥४९॥ यक्षोंके द्वारा लीलापूर्वक चारो ओर ढुराये जानेवाले निर्मल चमरोंकी वह पङ्क्ति बडी ही सुशोभित हो रही थी और लोग उसे देखकर ऐसी तर्क किया करते थे मानो यह आकाशगंगा ही भगवान्‌की सेवाके लिये आई हो ॥५०॥ शरद्‌ऋतुके चन्द्रमाके समान सफेद वह पड़ती हुई चमरोंकी पक्ति ऐसी आशंका उत्पन्न कर रही थी कि क्या यह भगवान्‌के शरीरकी कान्ति ही ऊपरको जा रही है अथवा चन्द्रमाकी किरणोंका समूह ही नीचेकी ओर पड़ रहा है ॥५१॥ अमृतके समान निर्मल शरीरको धारण करनेवाली और अतिशय देदीप्यमान वह ढुरती हुई चमरोंकी पंक्ति ऐसी सुशोभित हो रही थी मानो वायुसे कम्पित तथा देदीप्यमान कान्तिको धारण करनेवाली हिलती हुई और समुद्रके फेनकी पङ्क्ति ही हो ॥५२॥ चन्द्रमा और अमृतके समान कान्तिवाली ऊपरसे पड़ती हुई वह उत्तम चमरोंकी पक्ति बड़ी उत्कृष्ट शोभाको प्राप्त हो रही थी और ऐसी जान पड़ती थी मानो जिनेन्द्र भगवान्‌की सेवा करनेकी इच्छासे आती हुई क्षीर-समुद्रकी वेला ही हो ॥५३॥ क्या ये आकाशसे हस उतर रहे है अथवा भगवान्‌का यश ही ऊपरको जा रहा है इस प्रकार देवोंके द्वारा शका किये जानेवाले वे सफेद चमर भगवान्‌के चारों ओर ढुराये जा रहे थे ॥५४॥

जिस प्रकार वायु समुद्रके आगे अनेक लहरोंके समूह उठाता रहता है उसी प्रकार कमलके समान दीर्घ नेत्रोंको धारण करनेवाले चतुर यक्ष भगवान्‌के आगे लीलापूर्वक विस्तृत और सफेद चमरोंके समूह उठा रहे थे अर्थात् ऊपरकी ओर ढोर रहे थे ॥५५॥ अथवा वह ऊंची चमरोंकी पंक्ति ऐसी अच्छी सुशोभित हो रही थी मानो उन चमरोंका बहाना प्राप्त कर जिनेन्द्र भगवान्‌की भक्तिवश आकाशगंगा ही आकाशसे उतर रही हो अथवा भव्य जीवरूपी कुमुदिनियोंको विकसित करनेके लिये चाँदनी ही नीचेकी ओर आ रही हो ॥५६॥

---

१ उद्गच्छन्ती । २ मयूखानाम् । ३ आ समन्तात् पतन्ती । ४ समृद्ध । ५ सेवितुमिच्छुः । ६ आगच्छन्ती । ७ प्रभोः । ८ प्रभोरुपरि । ९ धवला । 'वलक्षो धवलोऽर्जुनः' इत्यभिधानात् । १० चामरव्याज ।

इत्यात्ततोषैः स्फुरदक्षयक्षैः प्रवीज्यमानानि शशाङ्कभांसि ।
रेजुर्जगन्नाथगुणोत्करैर्वा स्पर्धां वितन्वन्त्यधिचामराणि ॥५७॥
लसत्सुधाराशिविनिर्मलानि तान्यप्रमेयद्युतिकान्तिभाञ्जि ।
विभोर्जगत्प्राभवमद्वितीयं शशंसुरुच्चैश्चमरीरुहाणि ॥५८॥
लक्ष्मीसमालिङ्गितवक्षसोऽस्य श्रीवृक्षचिह्नं दधतो जिनेशः ।
प्रकीर्णकानाममितद्युतीनां धीन्द्राश्चतुःषष्टिमुदाहरन्ति ॥५९॥
जिनेश्वराणामिति चामराणि प्रकीर्तितानीह सनातनानाम् ।
अर्धार्धमानानि भवन्ति तानि चक्रेश्वराद् यावदसौ सुराजा ॥६०॥

तोटकवृत्तम्

सुरदुन्दुभयो मधुरध्वनयो निनदन्ति तदा स्म नभोविवरे ।
जलदागमशङ्किभिरुन्मदिभिः शिखिभिः परिवीक्षितपद्धतयः ॥६१॥
पणवस्तुणवैः कलमन्द्ररुतैः सहकाहलशङ्खमहापटहैः ।
ध्वनिरुत्ससृजे ककुभां विवरं मुखरं विदधत्पिदधच्च नभः ॥६२॥
घनकोणहताः सुरपाणविकैः कुपिता इव ते द्युसदां पटहाः ।
ध्वनिमुत्ससृजुः किमहो वठराः परिताडयथेति विसृष्टगिरः ॥६३॥

इस प्रकार जिन्हे अतिशय संतोष प्राप्त हो रहा है और जिनके नेत्र प्रकाशमान हो रहे हैं ऐसे यक्षोके द्वारा ढुराये जानेवाले वे चन्द्रमाके समान उज्ज्वल कान्तिके धारक चमर ऐसे सुशोभित हो रहे थे मानो भगवान्के गुणसमूहोके साथ स्पर्धा ही कर रहे हो ॥५७॥ शोभायमान अमृतकी राशिके समान निर्मल और अपरिमित तेज तथा कान्तिको धारण करनेवाले वे चमर भगवान् वृषभदेवके अद्वितीय जगत्के प्रभुत्वको सूचित कर रहे थे ॥५८॥ जिनका वक्षःस्थल लक्ष्मीसे आलिंगित है और जो श्रीवृक्षका चिह्न धारण करते है ऐसे श्रीजिनेन्द्रदेवके अपरिमित तेजको धारण करनेवाले उन चमरोकी सख्या विद्वान् लोग चौसठ बतलाते है ॥५९॥ इस प्रकार सनातन भगवान् जिनेन्द्रदेवके चौसठ चमर कहे गये है और वे ही चमर चक्रवर्तीसे लेकर राजा पर्यन्त आधे आधे होते है अर्थात् चक्रवर्तीके बत्तीस, अर्धचक्रीके सोलह, मण्डलेश्वरके आठ, अर्धमण्डलेश्वरके चार, महाराजके दो और राजाके एक चमर होता है ॥६०॥ इसी प्रकार उस समय वर्षाऋतुकी शका करते हुए मदोन्मत्त मयूर जिनका मार्ग बडे प्रेमसे देख रहे थे ऐसे देवोके दुन्दुभी मधुर शब्द करते हुए आकाशमे बज रहे थे ॥६१॥ जिनका शब्द अत्यन्त मधुर और गम्भीर था ऐसे पणव, तुणव, काहल, शख और नगाड़े आदि बाजे समस्त दिशाओके मध्यभागको शब्दायमान करते हुए तथा आकाशको आच्छादित करते हुए शब्द कर रहे थे ॥६२॥ देवरूप शिल्पियोके द्वारा मजबूत दण्डोंसे ताड़ित हुए वे देवोंके नगाड़े जो शब्द कर रहे थे उनसे वे एसे जान पड़ते थे मानो कुपित होकर स्पष्ट शब्दोंमे यही कह रहे हों कि अरे दुष्टो,

---

१ स्फुरितेन्द्रिय । २ शशाङ्कस्य भा इव भा येषा ते । ३ अधिकचामराणि । ४ जिनेश्वरस्य । ५ गणधरादय । विज्ञा· ल०, इ०, म० । ६ ब्रुवन्ति । ७ चक्रेश्वरादारभ्य असौ सुराजा यावत् अय श्रेणिको यावत् श्रेणिकपर्यन्तमर्धार्धाणि भवन्तीत्यर्थ । ८ पणववादनशीलै. । ९ त्यक्तवन्त । १० स्थूला. । ११ ताडनं कुरुथ ।

ध्वनिरम्बुमुचां किमयं स्फुरति क्षुभितोऽब्धिरुतस्फुरदूर्मिरवः ।
कृततर्कमिति प्रसरन् जयतात् सुरतूर्यरवो जिनभर्तुरसौ ॥६४॥
प्रभया परितो जिनदेहभुवा[1] जगती सकला [2]समवादिसृतेः ।
[3]रुरुचे [4]ससुरासुरमर्त्यजना किमिवाद्भुतमीदृशि धाम्नि विभोः ॥६५॥
तरुणार्करुचिं नु[5] तिरोदधति सुरकोटिमहांसि[6] नु निर्धुनती ।
जगदेकमहोद[7]यमासृजति प्रथते स्म तदा जिनदेहरुचिः ॥६६॥
जिनदेहरुचावमृताब्धिशुचौ सुरदानवमर्त्यजना ददृशुः ।
स्वभवान्तरसप्तकमात्तमुदो जगतो [8]बहु मङ्गलदर्पणके ॥६७॥
विधुमाशु विलोक्य नु विश्वसृजो गतमातपवारणतां त्रितयीम् ।
रविरिद्धवपुः[9] स पुराणकविं समशिश्रियदङ्गविभानिभतः[10] ॥६८॥

तुमलोग जोर जोरसे क्यों मार रहे हो ॥६३॥ क्या यह मेघोंकी गर्जना है ? अथवा जिसमें उठती हुई लहरें शब्द कर रही है ऐसा समुद्र ही क्षोभको प्राप्त हुआ है ? इस प्रकार तर्क-वितर्क कर चारों ओर फैलता हुआ भगवान्के देवदुन्दुभियोंका शब्द सदा जयवंत रहे ॥६४॥ सुर-असुर और मनुष्योंसे भरी हुई वह समवसरणकी समस्त भूमि जिनेन्द्रभगवान्के शरीरसे उत्पन्न हुई तथा चारो ओर फैली हुई प्रभा अर्थात् भामण्डलसे बहुत ही सुशोभित हो रही थी सो ठीक ही है क्योंकि भगवान्के ऐसे तेजमे आश्चर्य ही क्या है ॥६५॥ उस समय वह जिनेन्द्रभगवान्के शरीरकी प्रभा मध्याह्नके सूर्यकी प्रभाको तिरोहित करती हुई–अपने प्रकाशमें उसका प्रकाश छिपाती हुई, करोड़ों देवोंके तेजको दूर हटाती हुई, और लोकमें भगवान्का बड़ा भारी ऐश्वर्य प्रकट करती हुई चारो ओर फैल रही थी ॥६६॥ अमृतके समुद्रके समान निर्मल और जगत्को अनेक मगल करनेवाले दर्पणके समान, भगवान्के शरीरकी उस प्रभा (प्रभामंडल) में सुर-असुर और मनुष्य लोग प्रसन्न होकर अपने सात-सात भव देखते थे ॥६७॥ 'चन्द्रमा शीघ्र ही भगवान्के छत्रत्रयकी अवस्थाको प्राप्त हो गया है' यह देखकर ही मानो अतिशय देदीप्यमान सूर्य भगवान्के शरीरकी प्रभाके छलसे पुराण कवि भगवान् वृषभदेवकी सेवा करने लगा था। भावार्थ–भगवान्का छत्रत्रय

---

१ जिनदेहजनितया । २ समवसरणस्य । स्मरणस्तोत्रे समवसरणभूमीनामेकादेशाना विस्तारो यथाक्रमं स्वस्वचतुर्विंशाशोदयश्चतुषु द्वितादितोर्ध्वम् । चादर्धम् योजनस्यादर्धे चादर्धस्यादर्धे द्वयोः पृथक्पृथक् तत्कोशत्र्यष्टमभाग ६००० अन्ये तत्कोशद्वयष्टमभाग ४००० सालवेद्ध्यादय. यथाक्रम मूलरन्ध्रा १/६ । १/६ । १/३ । १/३ । १/३ । १/३ । १/६ । १/१२ । १/१२ तत्त्रिद्व्यष्टमभागौ द्वयोस्तथान्ये वनिप्रभास्वादा। स्वशब्देनात्र वृषभादितीर्थकराणां समवसरणभूमयो भण्यन्ते । तच्चतुर्विंशतिभागे। ह्रासादिचैतन्य-भूमिकः। भातिकयोः वल्लीवनादिषु चतुर्षु चतुर्विंशभाग एव द्विगुणं तदर्धं भवनभूमिविस्तारः। भवनभूमिविस्तारादर्धं गणभूमिविस्तारः। तत्त्रिद्व्यष्टमभागौ द्वयोस्तथान्ये। गणभूमिविस्तार अष्ट-मभागो द्वयोः पीठयोः प्रत्येकं विस्तारः। गणभूमिद्वयष्टमभागः। अन्त्यपीठादर्धपर्यन्तं विस्तारः। आदितीर्थंकरापेक्षया एकादशभूमीनां विस्ताराः क्रमेण लिख्यन्ते। योजनं ३ खा– शिव– १ उप– १ ध्वज– १ कल्प– १ भवनभू ३ गुण ४ पीठदण्डाः। ३ रुरुधे रुरुचे इति 'प' पुस्तके द्विविधः पाठः। ४ सुरासुरमर्त्यजनै सहिता.। ५ नु वितर्के। ६ तेजासि। ७ महोमय ट०। अद्वितीयतेजोमयम्। ८ मङ्गलदर्पणसदृशे। ९ दीप्त–। १० देहप्रभाव्याजात्।

दोधकवृत्तम्

दिव्यमहाध्वनिरस्य मुखाब्जान्मेघरवानु[1]कृतिर्निरगच्छत् ।
भव्यमनोगतमोहतमोघ्न[2]न् अद्युतदेष यथैव तमोरिः ॥६९॥
[3]एकतयोऽपि च सर्वनृभाषाः सोन्तरनेष्ट[4] बहूश्च कुभाषाः ।
अप्रति[5]पत्तिमपास्य च तत्त्वं बोधयति स्म जिनस्य महिम्ना ॥७०॥
एकतयोपि तथैव जलौघश्चित्ररसो भवति द्रुमभेदात् ।
पात्रविशेषवशाच्च तथाय सर्वविदो ध्वनिराप बहुत्वम् ॥७१॥
एकतयोपि यथा स्फटिकाश्मा [6]यद्यदुपाहितमस्य[7] विभासम्[8] ।
स्वच्छतया स्वयमप्यनुधत्ते वि[9]श्वबुधोपि तथा ध्वनिरुच्चैः ॥७२॥
देवकृतो[10] ध्वनिरि[11]त्यसदेतद् देवगुणस्य तथा[12] विहृतिः स्यात् ।
साक्षर एव च वर्णसमूहान्नैव विनार्थगतिर्जगति स्यात् ॥७३॥

शालिनीवृत्तम्

इत्थम्भूतां [13]देवराड्विश्वभर्तुर्भक्त्या देवैः कारयामास भूतिम् ।
दिव्यास्थानीं[14] [15]देवराजोपसेव्याम् [16]अध्यास्तैनां श्रीपतिर्विश्वदृश्वा ॥७४॥

चन्द्रमाके समान था और प्रभामण्डल सूर्यके समान था ॥६८॥ भगवान्के मुखरूपी कमलसे बादलोंकी गर्जनाका अनुकरण करनेवाली अतिशययुक्त महादिव्यध्वनि निकल रही थी और वह भव्यजीवोंके मनमें स्थित मोहरूपी अंधकारको नष्ट करती हुई सूर्यके समान सुशोभित हो रही थी ॥६९॥ यद्यपि वह दिव्यध्वनि एक प्रकारकी थी तथापि भगवान्के माहात्म्यसे समस्त मनुष्योंकी भाषाओं और अनेक कुभाषाओंको अपने अन्तर्भूत कर रही थी अर्थात् सर्वभाषारूप परिणमन कर रही थी और लोगोंका अज्ञान दूर कर उन्हें तत्त्वोंका बोध करा रही थी ॥७०॥ जिस प्रकार एक ही प्रकारका जलका प्रवाह वृक्षोंके भेदसे अनेक रसवाला हो जाता है उसी प्रकार सर्वज्ञदेवकी वह दिव्यध्वनि भी पात्रोंके भेदसे अनेक प्रकारकी हो जाती थी ॥७१॥ अथवा जिस प्रकार स्फटिक मणि एक ही प्रकारका होता है तथापि उसके पास जो जो रंगदार पदार्थ रख दिये जाते हैं वह अपनी स्वच्छतासे अपने आप उन उन पदार्थोंके रंगोंको धारण कर लेता है उसी प्रकार सर्वज्ञ भगवान्की उत्कृष्ट दिव्यध्वनि भी यद्यपि एक प्रकारकी होती है तथापि श्रोताओंके भेदसे वह अनेक रूप धारण कर लेती है ॥७२॥ कोई कोई लोग ऐसा कहते हैं कि वह दिव्यध्वनि देवोंके द्वारा की जाती है परन्तु उनका वह कहना मिथ्या है क्योंकि वैसा माननेपर भगवान्के गुणका घात हो जावेगा अर्थात् वह भगवान्का गुण नहीं कहलावेगा, देवकृत होनेसे देवोंका कहलावेगा। इसके सिवाय वह दिव्यध्वनि अक्षर-रूप ही है क्योंकि अक्षरोंके समूहके बिना लोकमें अर्थका परिज्ञान नहीं होता ॥७३॥

इस प्रकार तीनों लोकोंके स्वामी भगवान् वृषभदेवकी ऐसी विभूति इन्द्रने भक्तिपूर्वक देवोंसे कराई थी, और अनन्तचतुष्टयरूप लक्ष्मीके अधिपति सर्वज्ञदेव इन्द्रोंके द्वारा सेवनीय

---

१ अनुकारी। २ हन्तीति घ्नन्। ३ एकप्रकारः। ४ अन्तर्नयति स्म। ५ अज्ञानम्। ६ समीपमागतम्। ७ उपाहितद्रव्यस्य। ८ कान्तिम्। ९ विश्वज्ञानिन.। १० सर्वज्ञकृतः। ११ असत्यम्। १२ तथा सति। १३ इन्द्र.। १४ समवसृतिम्। १५ इन्द्रसेवनीयाम्। १६ अधितिष्ठति स्म।

वातोर्मिवृत्तम्

देवः साक्षात्सकलं वस्तुतत्त्वं विद्वान् विद्वज्जनतावन्दिताङ्घ्रिः ।
हैमं पीठं हरिभिर्व्यात्त[1]वक्त्रैः ऊढं भेजे जगतां बोधनाय ॥७५॥

भ्रमरविलसितम्

दृष्ट्वा देवाः समवसृतिमहीं चक्रुर्भक्त्या [2]परिगतिमुचिताम् ।
त्रिः[3]सम्भ्रान्ताः प्रमुदितमनसो देवं द्रष्टुं विविशुरथ सभाम् ॥७६॥

रथोद्धतावृत्तम्

व्योममार्गपरिरोधिकेतनैः सम्मिमा[4]र्जिषुमिवाखिलं नभः ।
धूलिसालवलयेन वेष्टितां सन्त[5]तामरधनुर्वृतामिव ॥७७॥
स्तम्भशब्द[6]परमानवाग्मितान् या स्म धारयति खाग्रलङ्घिनः ।
स्वर्गलोकमिव सेवितुं विभुं व्याजु[7]हूषुरमलाग्रकेतुभिः ॥७८॥

स्वागतावृत्तम्

स्वच्छवारिशिशिराः सरसीश्च या[8]बिभर्विकसितोत्पलनेत्राः ।
द्रष्टुमीशमसुरा[9]न्तकमुच्चैर्नेत्रपङ्क्तिमिव सङ्घटयन्ती ॥७९॥
खातिकां जलविहङ्गविरावैः उन्नतैश्च विततोर्भिकरौघैः ।
या दधे जिनमुपासितुमिन्द्रान् आजुहूषुरिव निर्मलतोयाम् ॥८०॥

उस समवसरण भूमिमे विराजमान हुए थे ॥७४॥ जो समस्त पदार्थोंको प्रत्यक्ष जानते हैं और अनेक विद्वान् लोग जिनके चरणोंकी वन्दना करते हैं ऐसे वे भगवान् वृषभदेव जगत्के जीवोंको उपदेश देनेके लिये मुँह फाड़े हुए सिंहोंके द्वारा धारण किये हुए सुवर्णमय सिंहासन पर अधिरूढ़ हुए थे ॥७५॥ इस प्रकार समवसरण भूमिको देखकर देव लोग बहुत ही प्रसन्न-चित्त हुए, उन्होंने भक्तिपूर्वक तीन बार चारों ओर फिरकर उचित रीतिसे प्रदक्षिणाएं दी और फिर भगवान्के दर्शन करनेके लिये उस सभाके भीतर प्रवेश किया ॥७६॥ जोकि आकाशमार्गको उल्लंघन करनेवाली पताकाओंसे ऐसी जान पड़ती थी मानो समस्त आकाशको झाड़कर साफ ही करना चाहती हो और धूलिसालके घेरेसे घिरी होनेके कारण ऐसी सुशोभित हो रही थी मानो निरन्तर इन्द्रधनुषसे ही घिरी रहती हो ॥७७॥ वह सभा आकाशके अग्रभागको भी उल्लंघन करनेवाले चार मानस्तम्भोंको धारण कर रही थी तथा उन मानस्तम्भोंपर लगी हुई निर्मल पताकाओंसे ऐसी जान पड़ती थी मानो भगवान्की सेवा करनेके लिये स्वर्गलोकको ही बुलाना चाहती हो ॥७८॥ वह सभा स्वच्छ तथा शीतल जलसे भरी हुई तथा नेत्रोंके समान प्रफुल्लित कमलोंसे युक्त अनेक सरोवरियोंको धारण किये हुए थी और उनसे वह ऐसी जान पड़ती थी मानो जन्म जरा मरणरूपी असुरोंका अन्त करने वाले भगवान् वृषभदेवका दर्शन करनेके लिये नेत्रोंकी पंक्तियां ही धारण कर रही हो ॥७९॥ वह समवसरण भूमि निर्मल जलसे भरी हुई जलपक्षियोंके शब्दोंसे शब्दायमान तथा ऊंची उठती हुई बड़ी बड़ी लहरोंके समूहसे युक्त परिखाको धारण कर रही थी और उससे ऐसी जान पड़ती थी मानो लहरोंके समूहरूपी हाथ ऊंचा उठाकर जलपक्षियोंके

---

१ विस्तृत । २ परिचर्याम् । ३ त्रिः प्रदक्षिण कृतवन्तः । ४ सम्मार्ष्टुमिच्छुम् । ५ विस्तृताम् । ६ मानस्तम्भानित्यर्थः । ७ आह्वातुमिच्छुः । ८ बिभर्ति स्म । ९ असून् प्राणान् रात्यादत्त इत्यसुरः यमः तस्यान्तकस्तम् ।

वृत्तावृत्तम्

बहुविधव[1]नलतिकाकान्तं मदमधुकरविरुतातोद्यम् ।
वनमुपवहति च वल्लीनां स्मितमिव कुसुमचितं या स्म ॥८१॥

सैन्निकावृत्तम्

सालमाद्यमुच्चगोपुरोद्गमं सम्बिभर्ति भासुर स्म हैमनम्[2] ।
[3]हैमनार्कसौम्यदीप्तिमुन्नतिं भर्तुरक्षरैर्विनैव या प्रदर्शिका ॥८२॥

छन्दः (?)

शरद्घनसमश्रियौ नर्तकी तडिद्विलसिते नृतेः[4] शालिके ।
दधाति रुचिरे स्म [5]योपासितुं जिनेन्द्रमिव [6]भक्तिसम्भाविता ॥८३॥

वंशस्थवृत्तम्

[7]घटीद्वन्द्वमुपात्तधूपकं[8] बभार या द्विस्तनयुग्मसन्नि[9]भम् ।
जिनस्य नृत्यं श्रुतदेवता स्वयं तथा स्थितेव[10] त्रिजगच्छ्रिया समम् ॥८४॥

इन्द्रवंशावृत्तम्

रम्यं वनं भृङ्गसमूहसेवितं बभ्रे चतुः[11]सङ्ख्यमुपात्तकान्तिकम् ।
[12]वासो विनीलं परिधाय[13] तन्निभा[14]द् वरेण्य[15]माराधयितुं स्थितेव या ॥८५॥

शब्दोके बहाने भगवान्‌की सेवा करनेके लिये इन्द्रोको ही बुलाना चाहती हो ॥८०॥ वह भूमि अनेक प्रकारकी नवीन लताओंसे सुशोभित, मदोन्मत्त भ्रमरोंके मधुर शब्दरूपी बाजोसे सहित तथा फूलोंसे व्याप्त लताओंके वन धारण कर रही थी और उनसे ऐसी जान पडती थी मानो मन्द मन्द हँस ही रही हो ॥८१॥ वह भूमि . ऊंचे ऊंचे गोपुरद्वारोसे सहित देदीप्यमान सुवर्णमय पहले कोटको धारण कर रही थी और उससे ऐसी जान पडती थी मानो भगवान् वृषभदेवकी हेमन्तऋतुके सूर्यके समान अतिशय सौम्य दीप्ति और उन्नतिको अक्षरो के बिना ही दिखला रही हो ॥८२॥ वह समवसरणभूमि प्रत्येक महावीथीके दोनों ओर शरद्ऋतुके बादलोंके समान स्वच्छ और नृत्य करनेवाली देवांगनाओरूपी बिजलियोसे सुशोभित दो दो मनोहर नृत्यशालाए धारण कर रही थी और उनसे ऐसी जान पड़ती थी मानो भक्तिपूर्वक जिनेन्द्रभगवान्‌की उपासना करनेके लिये ही उन्हे धारण कर रही हो ॥८३॥ वह भूमि नाटचशालाओंके आगे दो दो धूपघट धारण कर रही थी और उनसे ऐसी जान पड़ती थी मानो जिनेन्द्र भगवान्‌की सेवाके लिये तीनों लोकोंकी लक्ष्मीके साथ साथ सरस्वती देवी ही वहाँ बैंठी हों और वे घट उन्हीके स्तनयुगल हों ॥८४॥ वह भूमि भ्रमरोंके समूहसे सेवित और उत्तम कान्तिको धारण करनेवाले चार सुन्दर वन भी धारण कर रही थी और उनसे ऐसी जान पड़ती थी मानो उन वनोंके बहानेसे नील वस्त्र पहिनकर भगवान्

---

१ नवललिका ल० । २ हेमनिर्मितम् । ३ हेमन्तजातार्करम्य । ४ नृत्यस्य । ५ समवसृतिः । ६ भक्तिसंस्कृता । ७ धूपघटीयुगलम् । चतुर्थमिति । ८ धूमकम्, इत्यपि पाठः, ९ स्तनयुग्मद्वयसमानम् । १० समवसृत्याकारेण स्थितेव । ११ अशोकसप्तच्छदकल्पवृक्षचूतमिति । १२ वस्त्रम् । १३ परिधानं विधाय । १४ वनव्याजात् । १५ सर्वज्ञम् ।

पुटवृत्तम्

उपवनसरसीनां [1]बालपद्मैर्युवतिमुखशोभामाहसन्ती ।
अधृत च वनवेदीं रत्नदीप्रां युवतिरिव कटीस्थां मेखलां या ॥८६॥

जलोद्धतगतवृत्तम्

ध्वजाम्बरतताम्बरैः [2]परिगता यका[3] ध्वजनिवेश[4]नैर्दशतयैः[5] ।
जिनस्य महिमानमारचयितुं नभोङ्गणमिवाम्[6]जत्यतिबभौ ॥८७॥
खमिव सतारं कुसुमाढ्यं या वनमतिरम्यं सुरभूजानाम् ।
सह वनवेद्या परतः सालाद् व्यरुचबिबोढ्वा सुकृतारामम् ॥८८॥
अधृत च यस्मात्परतो दीप्रं स्फुरदुरुरत्नं [7]भवनाभोगम् ।
मणिमयदेहान्नव च स्तूपान् [8]भुवनविजित्यायिव बद्धेच्छा ॥८९॥
स्फटिकमयं या रुचिरं सालं प्रवितनमूर्तिः [9]खमणिसुभित्तीः ।
[10]उपरितलञ्च त्रिजगद्ग्राहि व्यधृत परार्ध्यं सदनं लक्ष्म्याः ॥९०॥

भुजङ्गप्रयातवृत्तम्

समं [11]देववर्यैः परार्ध्योरुशोभां प्रपश्यंस्तथैनां महीं विस्मिताक्षः ।
प्रविष्टो महेन्द्रः प्रणष्टप्रमोहं जिनं द्रष्टुकामो महत्या विभूत्या ॥९१॥

की आराधना करनेके लिये ही खडी हो ॥८५॥ जिस प्रकार कोई तरुणस्त्री अपने कटि भाग पर करधनी धारण करती है उसी प्रकार उपवनकी सरोवरियोंमें फूले हुए छोटे छोटे कमलोंसे स्वर्गरूपी स्त्रीके मुखकी शोभाकी ओर हंसती हुई वह समवसरण भूमि रत्नोंसे देदीप्यमान वनवेदिकाको धारण कर रही थी ॥८६॥ध्वजाओंके वस्त्रोंसे आकाशको व्याप्त करनेवाली दश प्रकारकी ध्वजाओंसे सहित वह भूमि ऐसी अच्छी सुशोभित हो रही थी मानो जिनेन्द्र भगवान्की महिमा रचनेके लिये आकाशरूपी आँगनको साफ ही कर रही हो ॥८७॥ ध्वजाओंकी भूमिके बाद द्वितीयकोटके चारों ओर वनवेदिका सहित कल्पवृक्षोका अत्यन्त मनोहर वन था, वह फूलोंसे सहित था इसलिये ऐसा जान पड़ता था मानो ताराओं से सहित आकाश ही हो । इस प्रकार पुण्यके बगीचेके समान उस वनको धारणकर वह समवसरणभूमि बहुत ही सुशोभित हो रही थी ॥८८॥ उस वनके आगे वह भूमि, जिसमें अनेक प्रकारके चमकते हुए बड़े बडे रत्न लगे हुए हैं ऐसे देदीप्यमान मकानोंको तथा मणियों से बने हुए नौ नौ स्तूपोंको धारण कर रही थी और उससे वह ऐसी जान पड़ती थी मानो जगत्को जीतनेके लिये ही उसने इच्छा की हो ॥८९॥ उसके आगे वह भूमि स्फटिक मणिके बने हुए सुन्दर कोटको, अतिशय विस्तारवाली आकाशस्फटिकमणिकी बनी हुई दीवालों को और उन दीवालोंके ऊपर बने हुए, तथा तीनों लोकोंके लिये अवकाश देने वाले अतिशय श्रेष्ठ श्रीमण्डपको धारण कर रही थी। ऐसी समवसरण सभाके भीतर इन्द्रने प्रवेश किया था* ॥९०॥ इस प्रकार अतिशय उत्कृष्ट शोभाको धारण करनेवाली उस समवसरण भूमिको देखकर जिसके नेत्र विस्मयको प्राप्त हुए हैं ऐसा वह सौधर्म स्वर्गका इन्द्र मोहनीय कर्मको

---

१ ईषद्विकचकमलपद्मैः । २ परिवृता । ३ या । ४ रचनाभिः । ध्वजस्थानैर्वा । ५ दशप्रकारैः । ६ सम्मार्जनं कुर्वति । ७ भवनभूमिविस्तारम् । प्रासादविस्तारमित्यर्थः । ८ भुवनविजयाय । ९ आकाशस्फटिक । १० स्फटिकमित्युपरिमभागे लक्ष्म्याः सदनं लक्ष्मीमण्डपमित्यर्थः । ११ ईशानादीन्द्रैः । महर्द्धिकदेवैश्च ।

* इन सब श्लोकों का क्रिया सम्बन्ध पिछले छिहत्तरवें श्लोकसे है।

अथापश्यदुच्चैर्ज्वलत्पीठमूर्ध्नि स्थितं देवदेवं चतुर्वक्त्रशोभम् ।
सुरेन्द्रैर्नरेन्द्रैर्मुनीन्द्रैश्च वन्द्यं [1]जगत्सृष्टिसंहारयोर्हेतुमाद्यम् ॥९२॥
शरच्चन्द्रबिम्बप्रतिस्पर्धि वक्त्रं शरज्ज्योत्स्नयेव स्वकान्यातिकान्तम् ।
नवोत्फुल्लनीलाब्जसंशोभिनेत्रं सरः साब्जनीलोत्पलं व्याहसन्तम् ॥९३॥
ज्वलद्भासुराङ्गं स्फुरद्भानुबिम्बप्रतिद्वन्द्वि[2]देहप्रभाब्धौ निमग्नम् ।
समुत्तुङ्गकायं सुराराधनीयं महामेरुकल्पं सुचामीकराभम् ॥९४॥
विशालोरुवक्षःस्थलस्थात्मलक्ष्म्या [3]जगद्भर्तुभूयं विनोक्त्या ब्रुवाणम् ।
निराहार्य[4]वेषं निरस्तोरुभूषं निरक्षावबोधं[5] निरुद्[6]धात्मरोधम् ॥९५॥
सहस्रांशुदीप्रप्रभा[7]मध्यभाजं चलच्चामरौघैः सुरैर्वीज्यमानम् ।
ध्वनद्दुन्दुभिध्वानर्निर्घोषरम्यं[8] चलद्वीचिवेलं पयोधिं यथैव ॥९६॥
सुरोन्मुक्तपुष्पैस्ततप्रान्तदेशं महाशोकवृक्षाश्रितोत्तुङ्गमूर्तिम् ।
स्वकल्पद्रुमोद्यानमुक्तप्रसूनस्तताान्तं सुराद्रिं रुचा ह्रेपयन्तम् ॥९७॥

नष्ट करनेवाले जिनेन्द्रभगवान्‌के दर्शनोकी इच्छासे बड़ी भारी विभूतिपूर्वक उत्तम उत्तम देवोंके साथ-साथ भीतर प्रविष्ट हुआ ॥९१॥

अथानन्तर–जो ऊची और देदीप्यमान पीठिकाके ऊपर विराजमान थे, देवोंके भी देव थे, चारों ओर दीखनेवाले चार मुखोकी शोभासे सहित थे, सुरेन्द्र नरेन्द्र और मुनीन्द्रोंके द्वारा वन्दनीय थे, *जगत्‌की सृष्टि और संहारके मुख्य कारण थे। जिनका मुख शरद्‌ऋतुके चन्द्रमाके साथ स्पर्धा कर रहा था, जो शरद् ऋतुकी चांदनीके समान अपनी कान्तिसे अतिशय शोभायमान थे, जिनके नेत्र नवीन फूले हुए नील कमलोंके समान सुशोभित थे और उनके कारण जो सफेद तथा नील-कमलोसे सहित सरोवरकी हँसी करते हुएसे जान पडते थे। जिनका शरीर अतिशय प्रकाशमान और देदीप्यमान था, जो चमकते हुए सूर्यमण्डलके साथ स्पर्धा करनेवाली अपने शरीरकी प्रभारूपी समुद्रमे निमग्न हो रहे थे, जिनका शरीर अतिशय ऊँचा था, जो देवोंके द्वारा आराधना करने योग्य थे, सुवर्ण जैसी उज्ज्वल कान्तिके धारण करने वाले थे और इसीलिये जो महामेरुके समान जान पडते थे। जो अपने विशाल वक्ष स्थलपर स्थित रहनेवाली अनन्तचतुष्टयरूपी आत्मलक्ष्मीसे शब्दोंके बिना ही तीनो लोकोंके स्वामित्वको प्रकट कर रहे थे, जो कवलाहारसे रहित थे, जिन्होंने सब आभूषण दूर कर दिये थे, जो इन्द्रिय ज्ञानसे रहित थे, जिन्होंने ज्ञानावरण आदि कर्मोको नष्ट कर दिया था। जो सूर्यके समान देदीप्यमान रहनेवाली प्रभाके मध्यमें विराजमान थे, देवलोग जिनपर अनेक चमरोंके समूह ढुरा रहे थे, बजते हुए दुन्दुभिबाजोंके शब्दोसे जो अतिशय मनोहर थे और इसीलिये जो शब्द करती हुई अनेक लहरों से युक्त समुद्रकी बेला (तट) के समान जान पड़ते थे। जिनके समीपका प्रदेश देवोंके द्वारा वर्षाये हुए फूलोंसे व्याप्त हो रहा था, जिनका ऊँचा शरीर बड़े भारी अशोकवृक्षके आश्रित था–उसके नीचे स्थित था और इसीलिये जो जिसका समीप प्रदेश अपने कल्पवृक्षोंके उपवनों द्वारा छोड़े हुए फूलोंसे व्याप्त हो रहा है ऐसे सुमेरुपर्वतको अपनी कान्तिके द्वारा लज्जित कर रहे थे। और जो चमकते हुए

---

१ वर्णाश्रमादिकारणदण्डनीत्यादिविध्योः। २ प्रतिस्पर्द्धि। ३ जगत्पतित्वम्। ४ वस्त्रादि-रहिताकारम्। जातरूपधरमित्यर्थः। ५ अतीन्द्रियज्ञानम्। ६ निरस्तज्ञानावरणादिकम्। ७ प्रभा-मण्डल। ८ दिव्यध्वनि।

* मोक्षमार्गरूपी सृष्टिको उत्पन्न करनेवाले और पापरूपी सृष्टिको सहार करनेवाले थे।

प्रविस्तारिशुभ्रातपत्रत्रयेण स्फुरन्मौक्तिकेनाधृत[1]द्युस्थितेन ।
स्वमाहात्म्यमैश्वर्यमुद्यद्यशश्च स्फुटीकर्तुमीशं तमीशानमाद्यम् ॥९८॥
प्रदृश्याथ दूरान्नतस्वोत्तमाङ्गाः सुरेन्द्राः प्रणेमुर्महीस्पृष्टजानु ।
किरीटाग्रभाजां स्रजां मालिकाभिर्जिनेन्द्राङ्घ्रियुग्मं स्फुटं प्रार्चयन्तः ॥९९॥
तदार्हत्प्रणामे समुत्फुल्लनेत्राः सुरेन्द्राः विरेजुः शुचिस्मेरवक्त्राः ।
समं वा[2] सरोभिः सपद्मोत्पलैः स्वैः कुलक्ष्माधरेन्द्राः सुराद्रिं भजन्तः ॥१००॥
शची चाप्सरोशेषदेवीसमेता जिनाङ्घ्र्योः प्रणामं चकारार्चयन्ती ।
स्ववक्त्रोरुपद्मैः स्वनेत्रोत्पलैश्च [3]प्रसन्नैश्च [4]भावप्रसूनैरनूनैः ॥१०१॥
जिनस्याङ्घ्रिपद्मौ नखांशुप्रतानैः सुरानास्पृशन्तौ समेत्याधिमू[5]र्धम् ।
स्रजाम्लानमूर्त्या स्वशेषां[6] पवित्रां [7]शिरस्यार्पिपेता[8]मिवानुग्रहीतुम् ॥१०२॥
जिनेन्द्राङ्घ्रिभासा पवित्रीकृतं ते [9]स्वमूहुः सुरेन्द्राः प्रणम्यातिभक्त्या ।
नखांशुप्रतानाम्बुलब्धाभिषेकं समुत्तुङ्गमत्युत्तमं चोत्तमाङ्गम् ॥१०३॥

मोतियोंसे सुशोभित आकाशमें स्थित अपने विस्तृत तथा धवल छत्रत्रयसे ऐसे जान पड़ते थे मानो अपना माहात्म्य ऐश्वर्य और फैलते हुए उत्कृष्ट यशको ही प्रकट कर रहे हों ऐसे प्रथम तीर्थंकर भगवान् वृषभदेवके उस सौधर्मेन्द्रने दर्शन किये ॥९२–९८॥ दर्शनकर दूरसे ही जिन्होंने अपने मस्तक नम्रीभूत कर लिये हैं ऐसे इन्द्रोंने जमीनपर घुटने टेककर उन्हें प्रणाम किया, प्रणाम करते समय वे इन्द्र ऐसे जान पड़ते थे मानो अपने मुकुटोंके अग्रभागमें लगी हुई मालाओंके समूहसे जिनेन्द्र भगवान्के दोनों चरणोंकी पूजा ही कर रहे हों ॥९९॥ उन अरहन्त भगवान्को प्रणाम करते समय जिनके नेत्र हर्षसे प्रफुल्लित हो गये और मुख सफेद मन्द हास्यसे युक्त हो रहे थे इसलिये ऐसा जान पड़ता था मानो जिनमें सफेद और नील कमल खिले हुए हैं ऐसे अपने सरोवरोंके साथ साथ कुलाचलपर्वत सुमेरुपर्वतकी ही सेवा कर रहे हों ॥१००॥ उसी समय अप्सराओं तथा समस्त देवियोंसे सहित इन्द्राणीने भी भगवान्के चरणोंको प्रणाम किया था, प्रणाम करते समय वह इन्द्राणी ऐसी जान पड़ती थी मानो अपने प्रफुल्लित हुए मुखरूपी कमलोंसे, नेत्ररूपी नील कमलोंसे और विशुद्ध भावरूपी बहुत भारी पुष्पोंसे भगवान्की पूजा ही कर रही हो ॥१०१॥ जिनेन्द्र भगवान्के दोनों ही चरणकमल अपने नखोंकी किरणोंके समूहसे देवोंके मस्तकपर आकर उन्हें स्पर्श कर रहे थे और उससे वे ऐसे जान पड़ते थे मानो कभी म्लान न होनेवाली मालाके बहानेसे अनुग्रह करनेके लिये उन देवोंके मस्तकोंपर शेषाक्षत ही अर्पण कर रहे हों ॥१०२॥ वे इन्द्र लोग, अतिशय भक्तिपूर्वक प्रणाम करते समय जो जिनेन्द्रभगवान्के चरणोंकी प्रभासे पवित्र किये गये हैं तथा उन्हींके नखोंकी किरणसमूहरूपी जलसे जिन्हें अभिषेक प्राप्त हुआ है ऐसे अपने उन्नत और अत्यन्त उत्तम मस्तकोंको धारण कर रहे थे । भावार्थ– प्रणाम करते समय इन्द्रोंके मस्तकपर जो भगवान्के चरणोंकी प्रभा पड़ रही थी उससे वे उन्हें अतिशय पवित्र मानते थे, और जो नखोंकी कान्ति पड़ रही थी उससे उन्हें ऐसा समझते थे मानो उनका जलसे अभिषेक ही किया गया हो इस प्रकार वे अपने उत्तमांग अर्थात् मस्तकको वास्तवमें उत्तमांग अर्थात् उत्तम अंग मानकर ही धारण कर रहे थे ॥१०३॥

---

१ अन्यैरसन्धार्यमाणसदाकाशस्थितेन । २ इव । ३ प्रशान्तस्वभाव– अ० । ४ परिणामकुसुमैः । ५ मस्तके । ६ निजसिद्धशेषाम् । ७ शिरःस्वार्पिपेताम् इ० । शिरःस्वार्पिषाताम् ल०, द० । ८ अर्पितवन्तौ । ९ आत्मीयम् ।

नखांशूत्करव्याजमव्याजशोभं पुलोमात्मजा साप्सरा भक्तिनम्रा ।
स्तनोपान्तलग्नं [1]समहेंऽशुके तत्प्रहासायमानं लसन्मुक्तिलक्ष्म्याः ॥१०४॥
प्रणामक्षणे ते सुरेन्द्रा विरेजुः स्वदेवीसमेता ज्वलद्भूषणाङ्गाः ।
महाकल्पवृक्षाः समं कल्पवल्ली[2]समित्येव भक्त्या जिनं सेवमानाः ॥१०५॥
अथोत्थाय तुष्टया सुरेन्द्राः स्वहस्तैर्जिनस्याङ्घ्रिपूजां प्रचक्रुः प्रतीताः ।
[3]सगन्धैः समाल्यैः सधूपैः सदीपैः सदिव्याक्षतैः [4]प्राज्यपीयूषपिण्डैः ॥१०६॥
पुरोरङ्गवल्ल्या तते[5] भूमिभागे सुरेन्द्रोपनीता बभौ सा सपर्या[6] ।
शुचिद्रव्यसम्पत्समस्तेव भर्तुः पदोपास्तिमिच्छुः[7] श्रिता तच्छलेन[8] ॥१०७॥
शची रत्नचूर्णैर्बलिं[9] भर्तुरग्रे तता[10]नोन्मयूख[11]प्ररोहैर्विचित्राम् ।
मृदुस्निग्धचित्रै[12]रनेकप्रकारैः सुरेन्द्रायुधानामिव श्लक्ष्णचूर्णैः ॥१०८॥
ततो नीरधारां शुचिं स्वानुकारां लसद्रत्नभृङ्गारनालस्रुतां ताम् ।
निजां स्वान्तवृत्तिप्रसन्नामिवाच्छां जिनोपाङ्घ्रि[13]सम्पातयामास भक्त्या ॥१०९॥
स्वरु[14]द्भूतगन्धैः सुगन्धीकृताशैर्भ्रमद्भृङ्गमालाकृतारावहृद्यैः ।
जिनाङ्घ्री स्मरन्ती विभोः पादपीठं समानु[15]र्च भक्त्या तदा शक्रपत्नी ॥११०॥

इन्द्राणी भी जिस समय अप्सराओंके साथ भक्तिपूर्वक नमस्कार कर रही थी उस समय देदीप्यमान मुक्तिरूपी लक्ष्मीके उत्तम हास्यके समान आचरण करनेवाला और स्वभावसे ही सुन्दर भगवान्‌के नखोंकी किरणोका समूह उसके स्तनोंके समीप भागमे पड़ रहा था और उससे वह ऐसी जान पड़ती थी मानो सुन्दर वस्त्र ही धारण कर रही हो ॥१०४॥ अपनी अपनी देवियोंसे सहित तथा देदीप्यमान आभूषणोंसे सुशोभित थे वे इन्द्र प्रणाम करते ऐसे जान पड़ते थे मानो कल्पलताओंके साथ बड़े बड़े कल्पवृक्ष ही भगवान्‌की सेवा कर रहे हों ॥१०५॥

अथानन्तर इन्द्रोंने बड़े संतोषके साथ खड़े होकर श्रद्धायुक्त हो अपने ही हाथोंसे गन्ध, पुष्पमाला, धूप, दीप, सुन्दर अक्षत और उत्कृष्ट अमृतके पिण्डों द्वारा भगवान्‌के चरण-कमलोंकी पूजा की ॥१०६॥ रंगावलीसे व्याप्त हुई भगवान्‌के आगेकी भूमिपर इन्द्रोंके द्वारा लाई वह पूजाकी सामग्री ऐसी सुशोभित हो रही थी मानो उसके छलसे संसारकी समस्त द्रव्यरूपी संपदाए भगवान्‌के चरणोंकी उपासनाकी इच्छासे ही वहां आई हों ॥१०७॥ इन्द्राणीने भगवान्‌के आगे कोमल चिकने और सूक्ष्म अनेक प्रकारके रत्नोंके चूर्णसे मण्डल बनाया था, वह मण्डल ऊपरकी ओर उठती हुई किरणोंके अंकुरोंसे चित्र-विचित्र हो रहा था और ऐसा जान पड़ता था मानो इन्द्रधनुषके कोमल चूर्णसे ही बना हो ॥१०८॥ तदनन्तर इन्द्राणीने भक्तिपूर्वक भगवान्‌के चरणोंके समीपमे देदीप्यमान रत्नोके भृगारकी नालसे निकलती हुई पवित्र जलधारा छोड़ी । वह जलधारा इन्द्राणीके समान ही पवित्र थी और उसीकी मनोवृत्तिके समान प्रसन्न तथा स्वच्छ थी ॥१०९॥ उसी समय इन्द्राणीने जिनेन्द्रभगवान्‌के चरणोंका स्मरण करते हुए भक्तिपूर्वक जिसने समस्त दिशाएं सुगन्धित कर दी थी, तथा जो फिरते हुए भ्रमरोंकी पंक्तियों द्वारा किये हुए शब्दोसे बहुत ही मनोहर जान पडती थी ऐसी स्वर्गलोकमें उत्पन्न हुई सुगन्धसे भगवान्‌के पादपीठ

१ वहति स्म । २ कल्पलतासमूहेन । ३ सुगन्धैः ल० । ४ भूरि । ५ विस्तृते । ६ पूजा । ७ पादपूजाम् । ८ इन्द्रकृतपूजाव्याजेन । ९ रङ्गवलिम् । १० विस्तारितवती । ११ किरणाङ्कुरैः । १२ सूक्ष्मैः अ०, प०, ल०, द०, इ० । १३ अङ्घ्रिसमीपे । १४ स्वर्गजात । १५ अर्चयति स्म ।

व्यधान्मौक्तिकौघैर्विभोस्तण्डुलेज्यां[1] स्वचित्तप्रसादैरिव स्वच्छभाभिः ।
तथाम्लानमन्दारमालाशतैश्च प्रभोः पादपूजामकार्षीत् प्रहर्षात् ॥१११॥
ततो रत्नदीपैर्जिनाङ्गद्युतीनां प्रसर्पेण मन्दीकृतात्मप्रकाशैः ।
जिनार्कं शची प्रार्चिचद्भक्ति[2]निघ्ना न भक्ता हि युक्तं विदन्त्यप्ययुक्तम् ॥११२॥
ददौ[3] धूपमिद्धञ्च पीयूषपिण्डं महास्थाल[4]संस्थं ज्वलद्दीपदीपम् ।
सतारं[5] शशाङ्कं समाश्लिष्टराहुं जिनाङ्घ्य्रब्जयोर्वा समीपं प्रपन्नम्[6] ॥११३॥
फलैरप्यनल्पैस्ततामोदहृद्यैर्ध्वनद्भृङ्गयूथैरुपासेव्यमानैः ।
जिनं गातुकामैरिवातिप्रमोदात् फलायार्चयामास सुत्रामजाया ॥११४॥
इतीत्थं स्वभक्त्या सुरैरर्चितेऽर्हन् किमेभिस्तु कृत्यं कृतार्थस्य भर्तुः ।
विरागो न तुष्यत्यपि द्वेष्टि[7] वासौ फलैश्च स्वभक्तानहो योयु[8]जीति ॥११५॥
अथोच्चैः सुरेशा गिरामीशितारं जिनं स्तोतुकामाः प्रहृष्टान्तरङ्गाः ।
वचस्सून[9]मालामिमां चित्रवर्णां समुच्चिक्षिपुर्भक्तिहस्तैरिति स्वैः ॥११६॥

(सिंहासन)की पूजा की थी ॥११०॥ इसी प्रकार अपने चित्तकी प्रसन्नताके समान स्वच्छ कान्तिको धारण करनेवाले मोतियोंके समूहोंसे भगवान्की अक्षतोंसे होनेवाली पूजा की तथा कभी नही मुरझानेवाली कल्पवृक्षके फूलोकी सैकड़ों मालाओंसे बड़े हर्षके साथ भगवान्के चरणोंकी पूजा की ॥१११॥ तदनन्तर भक्तिके वशीभूत हुई इन्द्राणीने जिनेन्द्र भगवान्के शरीरकी कान्तिके प्रसारसे जिनका निजी प्रकाश मन्द पड़ गया है ऐसे रत्नमय दीपकोसे जिनेन्द्ररूपी सूर्यकी पूजा की थी सो ठीक ही है क्योकि भक्तपुरुष योग्य अथवा अयोग्य कुछ भी नही समझते ॥ भावार्थ– यह कार्य करना योग्य है अथवा अयोग्य, इस बातका विचार भक्तिके सामने नही रहता । यही कारण था कि इन्द्राणीने जिनेन्द्ररूपी सूर्यकी पूजा दीपको द्वारा की थी ॥११२॥ तदनन्तर इन्द्राणीने धूप तथा जलते हुए दीपकोंसे देदीप्यमान और बड़े भारी थालमे रक्खा हुआ, सुशोभित अमृतका पिण्ड भगवान्के लिये समर्पित किया, वह थालमें रक्खा हुआ धूप तथा दीपकोंसे सुशोभित अमृतका पिण्ड ऐसा जान पडता था मानो ताराओंसे सहित और राहुसे आलिंगित चन्द्रमा ही जिनेन्द्रभगवान्के चरणकमलोंके समीप आया हो ॥११३॥ तदनन्तर जो चारों ओर फैली हुई सुगन्धिसे बहुत ही मनोहर थे और जो शब्द करते हुए भ्रमरोंके समूहोंसे सेवनीय होनेके कारण ऐसे जान पडते थे मानो भगवान्का यश ही गा रहे हो ऐसे अनेक फलोके द्वारा इन्द्राणीने बड़े भारी हर्षसे भगवान्की पूजा की थी ॥११४॥ इसी प्रकार देवोंने भी भक्तिपूर्वक अर्हन्त भगवान्की पूजा की थी परन्तु कृतकृत्य भगवान्को इन सबसे क्या प्रयोजन था ? वे यद्यपि वीतराग थे न किसीसे संतुष्ट होते थे और न किसीसे द्वेष ही करते थे तथापि अपने भक्तोंको इष्टफलोंसे युक्त कर ही देते थे यह एक आश्चर्यकी बात थी ॥११५॥

अथानन्तर–जिन्हें समस्त विद्याओंके स्वामी जिनेन्द्रभगवान्की स्तुति करनेकी इच्छा हुई ऐसे वे बड़े-बड़े इन्द्र प्रसन्न चित्त होकर अपने भक्तिरूपी हाथोंसे चित्र-विचित्र वर्णोवाली इस वचनरूपी पुष्पोंकी मालाको अर्पित करने लगे–नीचे लिखे अनुसार भगवान्की

---

१ अक्षतपुञ्जपूजाम् । २ भक्त्यधीना । ३ ददे द०, इ० । ४ महाभाजनस्थम् । ५ तारकासहितम् । ६ प्राप्तम् । ७ द्वेष करोति । ८ भृश युनक्ति । ९ वाक्प्रसूनमालाम् ।

प्रमिताक्षरावृत्तम्

जिननाथसंस्तवकृतौ भवतो वयमुद्यताः स्म गुणरत्ननिधेः ।
विधि[1]योऽपि मन्दवचसोऽपि ननु त्वयि भक्तिरेव फलतीष्टफलम् ॥११७॥
मति[2]शक्तिसारकृतवाग्विभवस्त्वयि भक्तिमेव वयमातनुमः ।
अमृताम्बुधेर्जलमलं न पुमान्निखिलं प्रपातुमिति किं न पिबेत् ॥११८॥
क्व वयं जडाः क्व च गुणाम्बुनिधिस्तव देव पार[3]रहितः परमः ।
इति जान[4]तोऽपि जिन सम्प्रति न[5]स्त्वयि भक्तिरेव मुखरीकुरुते ॥११९॥
गणभृद्भिरप्यगणितानणून्स्तव सद्गुणान्वयमभीष्टुमहे ।
किल चित्रमेतदथवा प्रभुतां तव संश्रितः किमिव नेशिशिषुः[6] ॥१२०॥

द्रुतविलम्बितवृत्तम्

तदियमीडिडि[7]षन्विदधाति नस्त्वयि निरूढतरा जिननिश्चला ।
प्रसृतभक्तिरपारगुणोदया स्तुतिपथेऽद्य ततो वयमुद्यता ॥१२१॥
त्वमसि विश्वदृगीश्वर विश्वसृट् त्वमसि विश्वगुणाम्बुधिरक्षयः ।
त्वमसि देव जगद्धितशासनः स्तुतिमतोऽनुगृहाण जिनेश नः ॥१२२॥

स्तुति करने लगे ॥११६॥ कि हे जिननाथ, यह निश्चय है कि आपके विषयमे की हुई भक्ति ही इष्ट फल देती है इसीलिये हम लोग बुद्धिहीन तथा मन्दवचन होकर भी गुणरूपी रत्नोके खजाने स्वरूप आपकी स्तुति करनेके लिये उद्यत हो रहे हैं ॥११७॥ हे भगवन्, जिन्हें बुद्धिकी सामर्थ्यसे कुछ वचनोंका वैभव प्राप्त हुआ है ऐसे हम लोग केवल आपकी भक्ति ही कर रहे है सो ठीक ही है क्योंकि जो पुरुष अमृतके समुद्रका सम्पूर्ण जल पीनेके लिये समर्थ नही है वह क्या अपनी सामर्थ्यके अनुसार थोड़ा भी नही पीवे ? अर्थात् अवश्य पीवे ॥११८॥ हे देव, कहां तो जड़ बुद्धि हमलोग, और कहां आपका पाररहित बड़ा भारी गुणरूपी समुद्र । हे जिनेन्द्र, यद्यपि इस बातको हम लोग भी जानते है तथापि इस समय आपकी भक्ति ही हम लोगोंको वाचालित कर रही है ॥११९॥ हे देव, यह आश्चर्यकी बात है कि आपके जो बड़े-बड़े उत्तम गुण गणधरोंके द्वारा भी नही गिने जा सके है उनकी हम स्तुति कर रहे हैं अथवा इसमें कुछ भी आश्चर्य नही है क्योकि जो मनुष्य आपकी प्रभुताको प्राप्त हुआ है वह क्या करनेके लिये समर्थ नही है ? अर्थात् सब कुछ करनेमें समर्थ है ॥१२०॥ इसलिये हे जिनेन्द्र, आपके विषयमें उत्पन्न हुई अतिशय निगूढ़, निश्चल और अपुरिमित गुणोंका उदय करनेवाली विशाल भक्ति ही हम लोगोंकी स्तुति करनेके लिये इच्छुक कर रही है और इसीलिये हम लोग आज आपकी स्तुति करनेके लिये उद्यत हुए है ॥१२१॥ हे ईश्वर, आप समस्त संसारके जाननेवाले है, कर्मभूमिरूप संसारकी रचना करनेवाले है, समस्त गुणोंके समुद्र हैं, अविनाशी हैं, और हे देव, आपका उपदेश जगत्के समस्त जीवोंका हित करनेवाला है, इसीलिये हे जिनेन्द्र, आप हम सबकी स्तुतिको स्वीकृत

---

१ विगतमतयः । २ मतिशक्त्यनुसार । ३ अन्तरहित. । ४ जानन्तीति जानन्तः तान् । ५ अस्मान् । ६ भृशं समर्था अभूवन् । ७ ईडितुमिच्छन् ।

तव जिनार्क विभान्ति गुणांशवः सकलकर्मकलङ्कविनिःसृताः ।
घनवियोगविनिर्मलमूर्तयो दिनमणेरिव भासुरभानवः[1] ॥१२३॥
गुणमणींस्त्वमनन्ततयान्वितान् जिन समुद्वहसेऽतिविनिर्मलान् ।
जलधिरात्मगभीरजलाश्रितानिव मणीनमलाननणुत्विषः ॥१२४॥
त्वमिनसंसृतिवल्लरिकामिमाम् प्रतिततामुरुदुःखफलप्रदाम् ।
जननमृत्युजराकुसुमाचितां [2]शमकरैर्भगवन्नुदपीपटः[3] ॥१२५॥

तामरसवृत्तम्

जिनवरमोहमहापृतनेशान् प्रबलतरां[4]श्चतुरस्तु कषायान् ।
निशिततपोमयतीव्रमहासि [5]प्रहृतिभिराशुतरामजयस्त्वम् ॥१२६॥
मनसिजशत्रुमजय्यमलक्ष्यं विरतिमयी [6]शितहेतितिस्ते ।
समरभरे विनिपातयति स्म त्वमसि ततो भुवनैकगरिष्ठः[7] ॥१२७॥
जितमदनस्य तवेश महत्त्वं वपुरिदमेव हि शास्ति मनोज्ञम् ।
न विकृतिभाग्न कटाक्षनिरीक्षा [8]परमविकारमनाभरणोद्धम्[9] ॥१२८॥
[10]प्रविकुरुते हृदि यस्य मनोजः स विकुरुते स्फुटरागपरागः[11] ।
विकृतिरनङ्गजितस्तव नाभूद् विभवभवान्भुवनैकगुरुस्तत्[12] ॥१२९॥

कीजिये ॥१२२॥ हे जिनेन्द्ररूपी सूर्य, जिस प्रकार बादलोंके हट जानेसे अतिशय निर्मल सूर्यकी देदीप्यमान किरणें सुशोभित होती है उसी प्रकार समस्त कर्मरूपी कलंकके हट जानेसे प्रकट हुई आपकी गुणरूपी किरणें अतिशय सुशोभित हो रही है ॥१२३॥ हे जिनेन्द्र, जिस प्रकार समुद्र अपने गहरे जलमें रहनेवाले निर्मल और विशाल कान्तिके धारक मणियोंको धारण करता है उसी प्रकार आप अतिशय निर्मल अनन्तगुणरूपी मणियोंको धारण कर रहे हैं ॥१२४॥ हे स्वामिन्, जो अत्यन्त विस्तृत है, बड़े-बड़े दुःखरूपी फलोंको देनेवाली है, और जन्म-मृत्यु तथा बुढ़ापारूपी फूलोंसे व्याप्त है ऐसी इस संसाररूपी लताको हे भगवन्, आपने अपने शान्त परिणामरूपी हाथोंसे उखाड़कर फेंक दिया है ॥१२५॥ हे जिनवर, आपने मोहकी बड़ी भारी सेनाके सेनापति तथा अतिशय शूरवीर चार कषायोंको तीव्र तपश्चरणरूपी पैनी और बड़ी तलवारके प्रहारोंसे बहुत शीघ्र जीत लिया है ॥१२६॥ हे भगवन्, जो किसीके द्वारा जीता न जा सके और जो दिखाई भी न पड़े ऐसे कामदेवरूपी शत्रुको आपके चारित्ररूपी तीक्ष्ण हथियारोंके समूहने युद्धमे मार गिराया है इसलिये तीनों लोकोंमें आप ही सबसे श्रेष्ठ गुरु हैं ॥१२७॥ हे ईश्वर, जो न कभी विकार भावको प्राप्त होता है, न किसीको कटाक्षोंसे देखता है, जो विकाररहित है और आभरणोंके बिना ही सुशोभित रहता है ऐसा यह आपका सुन्दर शरीर ही कामदेवको जीतनेवाले आपके माहात्म्यको प्रकट कर रहा है ॥१२८॥ हे संसार-रहित जिनेन्द्र, कामदेव जिसके हृदयमें प्रवेश करता है वह प्रकट हुए रागरूपी परागसे युक्त होकर अनेक प्रकारकी विकारयुक्त चेष्टाएं करने लगता है परन्तु कामदेवको जीतनेवाले आपके कुछ भी विकार नही पाया जाता है इसलिये आप तीनों लोकोंके मुख्य गुरु हैं ॥१२९॥

---

१ किरणाः । २ उपशमहस्तैः । पक्षे सूर्यकिरणैः । ३ उत्पाटयसि स्म । विनाशयसि स्मेत्यर्थः । ४ चतुष्कम् । ५ प्रभृतिभि–ल०, द० । असितोमरादिभिः । ६ निशितायुधः । ७ अतिशयेन गुरुः । ८ न विकारकारि । ९ प्रशस्तम् । १० विकार करोति । ११ रागधूलिः । १२ कारणात् ।

स किल विनृत्यति गायति वल्गत्यपलापति[1] प्रहसत्यपि मूढः ।
मदनवशो जितमन्मथ ते तु प्रशमसुखं वपुरेव निराह[2] ॥१३०॥

नवमालिनीवृत्तम्

विरहितमानमत्सर तवेदं वपुरपराग[3]मस्तकलिपङ्कम् ।
तव भुवनेश्वरत्वमपरागं प्रकटयति स्फुटं [4]निकृतिहीनम् ॥१३१॥
तव [5]वपुरामिलत्सकलशोभासमुदयमस्तवस्त्रमपि रम्यम् ।
अतिरुचिरस्य रत्नमणिराशेः अपवरणं[6] किमिष्टमुरुदीप्तेः ॥१३२॥
[7]स्विदिरहितं विहीनमलदोषं सुरभितरं सुलक्ष्मघटितं ते ।
[8]क्षतजवियुक्तमस्ततिमिरौघं व्यपगतधातु वज्रघन[9]सन्धि ॥१३३॥
समचतुरस्रमप्रमितवीर्यं प्रियहितवाग्निमेषपरिहीनम् ।
वपुरिदमच्छदिव्यमणिदीप्रं त्वमसि ततोऽधि[10]देवपदभागी ॥१३४॥
इदमतिमानुषं तव शरीरं सकलविकारमोहमदहीनम् ।
प्रकटयतीश ते भुवनलङ्घि [11]प्रभुतम वैभवं कनककान्ति ॥१३५॥

प्रमुदितवदनावृत्तम्

स्पृशति नहि भवन्तमागश्च[12] यः किमु [13]दिनपमभिद्रवेत्तामसम्[14] ।
वितिमिर[15] सभवान्[16] जगत्साधने[17] ज्वलदुरुमहसा प्रदीपायते ॥१३६॥

हे कामदेवको जीतनेवाले जिनेन्द्र, जो मूर्ख पुरुष कामदेवके वश हुआ करता है वह नाचता है, गाता है, इधर-उधर घूमता है, सत्य बातको छिपाता है और जोर जोरसे हंसता है परन्तु आपका शरीर इन सब विकारोंसे रहित है इसलिये यह शरीर ही आपके शान्तिसुखको प्रकट कर रहा है ॥१३०॥ हे मान और मात्सर्य भावसे रहित भगवन्, कर्मरूपी धूलिसे रहित, कलहरूपी पंकको नष्ट करनेवाला, रागरहित और छलरहित आपका वह शरीर 'आप तीनों लोकोंके स्वामी हैं' इस बातको स्पष्ट रूपसे प्रकट कर रहा है ॥१३१॥ हे नाथ, जिसमें समस्त शोभाओंका समुदाय मिल रहा है ऐसा यह आपका शरीर वस्त्र रहित होने पर भी अत्यन्त सुन्दर है सो ठीक ही है क्योंकि विशाल कान्तिको धारण करनेवाले अतिशय देदीप्यमान रत्न मणियोंकी राशिको वस्त्र आदिसे ढक देना क्या किसीको अच्छा लगता है ? अर्थात् नहीं लगता ॥१३२॥ हे भगवन्, आपका यह शरीर पसीनासे रहित है, मल-रूपी दोषोंसे रहित है, अत्यन्त सुगन्धित है, उत्तम लक्षणोंसे सहित है, रक्तरहित है, अन्धकारके समूहको नष्ट करनेवाला है, धातुरहित है, बज्रमयी मजबूत सन्धियोसे युक्त है, समचतुरस्रसंस्थानवाला है, अपरिमित शक्तिका धारक है, प्रिय और हितकारी वचनोंसे सहित है, निमेषरहित है, और स्वच्छ दिव्य मणियोंके समान देदीप्यमान है इसलिये आप देवाधिदेव पदको प्राप्त हुए हैं ॥१३३-१३४॥ हे स्वामिन्, समस्त विकार, मोह और मदसे रहित तथा सुवर्णके समान कान्तिवाला आपका यह लोकोत्तर शरीर संसारको उल्लंघन करनेवाली आपकी अद्वितीय प्रभुताके वैभवको प्रकट कर रहा है ॥१३५॥ हे अन्धकारसे रहित जिनेन्द्र, पापोंका समूह कभी आपको छूता भी नहीं है सो ठीक ही है क्योंकि क्या

---

१ अपलाप करोति । २ नितरामाह । ३ न विद्यते परागो धूलिर्यत्र अपगतरजसमित्यर्थ । ४ कपट । ५ आयुजत् । ६ आच्छादनम् । ७ स्वेद । ८ रुधिररहितम् । ९ निविड । १० अधिक । ११ अतिशयप्रभो । १२ अघसमूहः । १३ 'तपनमभि' इति वा पाठ इति 'त' पुस्तके टिप्पण्यां लिखितम् । १४ गच्छेत् । १५ भो विगताज्ञानान्धकार । १६ पूज्य । १७ जगत्संसिद्धौ । 'जगत्सदने' अ०, प०, छन्दोभङ्गा दशुद्धः पाठः । जगत्सद्मनि इ० ।

जलधरमालावृत्तम्

रैधारा ते द्युसम[1]वतारेऽपप्त[2]त्राकेशानां [3]पदविमशेषां रुध्वा ।
स्वर्गादारात् कनकमयीं वा सृष्टिं तन्वानासौ भुवनकुटीरस्यान्तः ॥१३७॥
रैधारैरावतकरदीर्घा रेजे रे[4] जतार[5] भजत जना इत्येवम् ।
मूर्तीभूता तव जिनलक्ष्मीर्लोके सम्बोधं वा सपदि समातन्वाना ॥१३८॥
त्वत्सम्भूतौ सुरकरमुक्ता व्योम्नि[6] पौष्पी वृष्टिः सुरभितरा संरेजे ।
मत्तालीनां कलरुतमातन्वाना नाकस्त्रीणां नयनततिर्वा यान्ती ॥१३९॥
मेरोः शृङ्गे समजनि दुग्धाम्भोधेः स्वच्छाम्भोभिः कनकघटैर्गम्भीरैः ।
माहात्म्यं ते जगति वितन्वन्भावि[7] स्वर्धौरे[8]यैगु[8]रुरभिषेकः पूतः ॥१४०॥
त्वां निष्क्रान्तौ मणिमययानारूढं वोढुं सज्जा[9] वयमिति नैतच्चित्रम् ।
आनिर्वाणान्नियतममी गीर्वाणाः किं[10] कुर्वाणा ननु जिन कल्याणे ते ॥१४१॥
त्वं धातासि त्रिभुवनभर्ताद्यत्वे[11] कैवल्यार्के स्फुटमुदितेऽस्मिन्दीप्रे[12] ।
तस्माद्देवं जन[13]नजरातङ्कारिं त्वां न[14]न्नमो गुणनिधिमग्र्यं लोके ॥१४२॥

अन्धकारका समूह भी कभी सूर्यके सन्मुख जा सकता है ? अर्थात् नहीं जा सकता । हे नाथ, आप इस जगत्‌रूपी घरमें अपने देदीप्यमान विशाल तेजसे प्रदीपके समान आचरण करते हैं ॥१३६॥ हे भगवन्, आपके स्वर्गसे अवतार लेनेके समय (गर्भकल्याणकके समय) रत्नोंकी धारा समस्त आकाशको रोकती हुई स्वर्गलोकसे शीघ्र ही इस जगत्‌रूपी कुटीके भीतर पड रही थी और वह ऐसी जान पड़ती थी मानो समस्त सृष्टिको सुवर्णमय ही कर रही हो ॥१३७॥ हे जिनेन्द्र, ऐरावत हाथीकी सूंड़के समान लम्बायमान वह रत्नोंकी धारा ऐसी सुशोभित हो रही थी मानो आपकी लक्ष्मी ही मूर्ति धारण कर लोकमें शीघ्र ही ऐसा संबोध फैला रही हो कि अरे मनुष्यो, कर्मरूपी शत्रुओंको जीतनेवाले इन जिनेन्द्र भगवान्‌की सेवा करो ॥१३८॥ हे भगवन्, आपके जन्मके समय आकाशसे देवोंके हाथोंसे छोड़ी गई अत्यन्त सुगन्धित और मदोन्मत्त भ्रमरोंकी मधुर गुञ्जारको चारो ओर फैलाती हुई जो फूलोंकी वृष्टि हुई थी वह ऐसी सुशोभित हो रही थी मानो देवांगनाओंके नेत्रोंकी पंक्ति ही आ रही हो ॥१३९॥ हे स्वामिन्, इन्द्रोंने मेरुपर्वतके शिखरपर क्षीरसागरके स्वच्छ जलसे भरे हुए सुवर्णमय गंभीर (गहरे) घड़ोंसे जगत्‌में आपका माहात्म्य फैलानेवाला आपका बड़ा भारी पवित्र अभिषेक किया था ॥१४०॥ हे जिन, तपकल्याणकके समय मणिमयी पालकी पर आरूढ़ हुए आपको ले जानेके लिये हम लोग तत्पर हुए थे इसमें कुछ भी आश्चर्य नहीं है क्योंकि निर्वाण पर्यन्त आपके सभी कल्याणकोंमें ये देव लोग किंकरोंके समान उपस्थित रहते हैं ॥१४१॥ हे भगवन्, इस देदीप्यमान केवलज्ञानरूपी सूर्यका उदय होनेपर यह स्पष्ट प्रकट हो गया है कि आप ही धाता अर्थात् मोक्षमार्गकी सृष्टि करनेवाले हैं और आप ही तीनों लोकके स्वामी हैं । इसके सिवाय आप जन्मजरारूपी रोगोंका अन्त करनेवाले हैं, गुणों के खजाने हैं और लोकमें सबसे श्रेष्ठ हैं इसलिये हे देव, आपको हम लोग बार बार नमस्कार

---

१ स्वर्गावतरणे । २ पतति स्म । ३ खाङ्गणम् । ४ अहो । ५ जयशीलम् । ६ व्योम्न. ल० । ७ स्वामिन् ल०, द०, इ० । ८ स्वर्लोकमुख्यैः । ९ सन्नद्धाः । १० किङ्कराः । ११ इदानीम् । १२ दीप्ते ल० । १३ जननजरान्तकातीतं द०, इ० । १४ भृशं पुनःपुनर्वा नमामः ।

प्रहर्षिणीवृत्तम्

त्वं मित्रं त्वमसि गुरुस्त्वमेव भर्ता त्वं स्रष्टा भुवनपितामहस्त्वमेव ।
त्वां ध्यायन्नमृतिसुखं प्रयाति जन्तुस्त्रायस्व त्रिजगदिदं त्वमद्य पातात्[1] ॥१४३॥

रुचिरावृत्तम्

परं पदं परमसुखोदयास्पदं विवित्स[2]वश्चिरमिह योगिनोऽक्षरम् ।
त्वयोदितं जिन परमागमाक्षरं विचिन्वते[3] भवविलयाय सद्धियः ॥१४४॥
त्वयोदिते पथि जिन ये वितन्वतेः परां धृतिं[4] प्रमदपरम्परायुजः ।
त एव[5] संसृतिलतिकां प्रतायिनीं[6] दहन्त्यलं स्मृतिदहनार्चिषा भृशम् ॥१४५॥

मत्तमयूरवृत्तम्

वातोद्धूताः क्षीरपयोधेरिव वीचीरुत्प्रेक्ष्या[7]मूश्चामरपङ्क्तीर्भवदीयाः ।
पीयू[8]षांशोर्दीप्तिसमे[9]तीरिव शुभ्रा मोमुच्यन्ते संसृतिभाजो भवबन्धात् ॥१४६॥
सैहं पीठं स्वां [10]द्युतिमिद्धामतिभानु[11] तन्वानं तद्भाति विभोस्ते पृथु तुङ्गम् ।
मेरोः शृङ्गं वा मणिनद्धं[12] सुरसेव्यं [13]न्यक्कुर्वाणं लोकमशेषं स्वमहिम्ना ॥१४७॥

मञ्जुभाषिणीवृत्तम्

महितोदयस्य शिवमार्गदेशिनः सुरशिल्पिनिर्मितमदोऽर्हतस्तव ।
[14]प्रथते सितातपनिवारणत्रयं शरदिन्दुबिम्बमिव कान्तिमत्तया ॥१४८॥

करते है ॥१४२॥ हे नाथ, इस ससारमे आप ही मित्र है, आप ही गुरु है, आप ही स्वामी है, आप ही स्रष्टा है और आप ही जगत्के पितामह है । आपका ध्यान करनेवाला जीव अवश्य ही मृत्युरहित सुख अर्थात् मोक्षसुखको प्राप्त होता है इसलिये हे भगवन्, आज आप इन तीनों लोकोंको नष्ट होनेसे बचाइये—इन्हे ऐसा मार्ग बतलाइये जिससे ये जन्म मरणके दुखोसे बच कर मोक्षका अनन्त सुख प्राप्त कर सकें ॥१४३॥ हे जिनेन्द्र, परम सुखकी प्राप्तिके स्थान तथा अविनाशी उत्कृष्ट पद (मोक्ष) को जाननेकी इच्छा करने वाले उत्तम बुद्धिमान् योगी संसारका नाश करनेके लिये आपके द्वारा कहे हुए परमागमके अक्षरोंका चिंतवन करते है ॥१४४॥ हे जिनराज, जो मनुष्य आपके द्वारा बतलाये हुए मार्गमें परम संतोष धारण करते है अथवा आनन्दकी परम्परासे युक्त होते है वे ही इस अतिशय विस्तृत संसाररूपी लताको आपके ध्यानरूपी अग्निकी ज्वालासे बिल्कुल जला पाते है ॥१४५॥ हे भगवन्, वायुसे उठी हुई क्षीरसमुद्रकी लहरोंके समान अथवा चन्द्रमाकी किरणोंके समूहके समान सुशोभित होनेवाली आपकी इन सफेद चमरोंकी पक्तियोंको देखकर संसारी जीव अवश्य ही ससाररूपी बंधनसे मुक्त हो जाते है ॥१४६॥ हे विभो, सूर्यको भी तिरस्कृत करनेवाली और अतिशय देदीप्यमान अपनी कान्तिको चारो ओर फैलाता हुआ, अत्यन्त ऊंचा, मणियोंसे जड़ा हुआ, देवोंके द्वारा सेवनीय और अपनी महिमासे समस्त लोकोंको नीचा करता हुआ यह आपका सिहासन मेरुपर्वतकी शिखरके समान शोभायमान हो रहा है ॥१४७॥ जिनका ऐश्वर्य अतिशय उत्कृष्ट है और जो मोक्ष-मार्गका उपदेश देनेवाले हैं ऐसे आप अरहन्त देवका यह देवरूप कारीगरोंके द्वारा बनाया

---

१ ससाराब्धौ पतनात् । २ वेत्तुमिच्छव । ३ विचारयन्ति । ४ सन्तोषम् । ५ ते भव्या एव । ६ विस्तृताम् । ७ दृष्ट्वा । ८ चन्द्रस्य । ९ दीप्तिसन्तति । १० निजकान्तिम् । ११ अतिक्रान्तभानुम् । १२ मणिबद्धम् । १३ अधःकुर्वाणम् । १४ प्रकटीकरोति ।

छन्दः (?)

वृक्षोऽशोको मरकतरुचिरस्कन्धो भाति श्रीमानयमतिरुचिराः शाखाः।
बाहूकृत्य स्फुटमिव नटितं[1] तन्वन्वातोद्धूतः कलरुतमधुकृन्मालः[2] ॥१४९॥
पुष्पाकीर्णो नृसुरमुनिवरैः कान्तो मन्दं मन्दं मृदुतरपवना[3]धूतः।
सच्छायोऽयं विहत[4]नृशुगशोकोऽगो भाति श्रीमांस्त्वमिव हि जगतां श्रेयः[5] ॥१५०॥

असम्बाधावृत्तम्

व्याप्ताकाशां वृष्टि[6]मलिकुलरुतोद्गीतां पौष्पीं देवास्त्वां प्रतिभुवनगृहस्याग्रात्।
मुञ्चन्त्येते दुन्दुभिमधुररवैः सार्द्धं प्रावृड्जीमूतान् [7]स्तनितमुखरिताञ्जित्वा ॥१५१॥

अपराजितावृत्तम्

त्वदमरपटहैर्विशङ्क्य घनागमं पटुजलदघटानिरुद्धनभोङ्गणम्।
विरचितरुचिमत्कलापसुमन्थरा[8] मदकलमधुना रुवन्ति[9] [10]शिखाबलाः ॥१५२॥

गया छत्रत्रय अपनी कान्तिसे शरद्ऋतुके चन्द्रमण्डलके समान सुशोभित हो रहा है ॥१४८॥ हे भगवन्, जिसका स्कन्ध मरकतमणियोंसे अतिशय देदीप्यमान हो रहा है और जिसपर मधुर शब्द करते हुए भ्रमरोंके समूह बैठे हैं ऐसा यह शोभायमान तथा वायुसे हिलता हुआ आपका अशोकवृक्ष ऐसा सुशोभित हो रहा है मानो अपनी अत्यन्त देदीप्यमान शाखाओंको भुजा बनाकर उनके द्वारा स्पष्ट नृत्य ही कर रहा हो ॥१४९॥ अथवा अत्यन्त सुकोमल वायुसे धीरे धीरे हिलता हुआ यह अशोकवृक्ष आपके ही समान सुशोभित हो रहा है क्योंकि जिस प्रकार आप देवोंके द्वारा बरसाये हुए पुष्पोंसे आकीर्ण अर्थात् व्याप्त है उसी प्रकार यह अशोक वृक्ष भी पुष्पोसे आकीर्ण है, जिस प्रकार मनुष्य देव और बड़े बड़े मुनिराज आपको चाहते हैं–आपकी प्रशंसा करते हैं उसी प्रकार मनुष्य देव और बड़े बड़े मुनिराज इस अशोकवृक्षको भी चाहते हैं, जिस प्रकार पवनकुमार देव मन्द मन्द वायु चलाकर आपकी सेवा करते हैं उसी प्रकार इस वृक्षकी भी सेवा करते हैं– यह मन्द मन्द वायुसे हिल रहा है, जिस प्रकार आप सच्छाय अर्थात् उत्तम कान्तिके धारक है उसी प्रकार यह वृक्ष भी सच्छाय अर्थात् छांहरीका धारक है–इसकी छाया बहुत ही उत्तम है, जिस प्रकार आप मनुष्य तथा देवोंका शोक नष्ट करते है उसी प्रकार यह वृक्ष भी मनुष्य तथा देवोंका शोक नष्ट करता है और जिस प्रकार आप तीनो लोकोके श्रेय अर्थात् कल्याणरूप है उसी प्रकार यह वृक्ष भी तीनों लोकोंमें श्रेय अर्थात् मगल रूप है ॥१५०॥ हे भगवन्, ये देवलोग, वर्षाकालके मेघोंकी गरजनाके शब्दोंको जीतनेवाले दुन्दुभि बाजोंके मधुर शब्दोंके साथ साथ जिसने समस्त आकाशको व्याप्त कर लिया है और जो भ्रमरोंकी मधुर गुंजारसे गाती हुई सी जान पड़ती है ऐसी फूलोंकी वर्षा आपके सामने लोकरूपी घरके अग्रभागसे छोड़ रहे हैं ॥१५१॥ हे भगवन्, आपके देव-दुन्दुभियोंके कारण बड़े-बड़े मेघोंकी घटाओंसे आकाशरूपी आगनको रोकनेवाली वर्षाऋतुकी शंका कर ये मयूर इस समय अपनी सुन्दर पूंछ फैलाकर मन्द-मन्द

---

१ नटनम्। २ भ्रमरपक्तिः। ३ पवनोद्धूतः ल०, इ०। ४ नृशुक् नरशोकः। विहित-नृसुराशोको ल०, इ०, अ०, स०। ५ श्रयणीयः। ६ मलिकल ल०, अ०। ७ मेघरववाचालितान्। ८ बर्हमन्दगमनाः। ९ ध्वनन्ति। १० मयूराः।

प्रहरणकलिकावृत्तम्

तव जिन ततदेहरुचिशरवणे[1] चमररुहततिः सितविहगरुचिम्[2] ।
इयमनुतनुते[3] रुचिरतरतनुर्मणिमुकुटसमिद्धरुचिसुरधुता ॥१५३॥

वसन्ततिलकावृत्तम्

त्वद्दिव्यवागियमशेषपदार्थगर्भा भाषान्तराणि सकलानि निदर्शयन्ती ।
तत्त्वावबोधमचिरात् कुरुते बुधानां स्याद्वादनीति[4]विहतान्धमतान्धकारा ॥१५४॥
प्रक्षालयत्यखिलमेव मनोमलं नस्त्वद्भारतीमयमिदं शुचिपुण्यमम्बु ।
तीर्थं तदेव हि विनेयजनाजवञ्ज[5]वावारसन्तरणवर्त्म भवत्प्रणीतम् ॥१५५॥
त्वं सर्वगः सकलवस्तुगतावबोधस्त्वं सर्ववित्प्रमितविश्वपदार्थसार्थः ।
त्वं सर्वजिद्विदितमन्मथमोहशत्रुस्त्वं सर्वदृङ्निखिलभावविशेषदर्शी ॥१५६॥
त्वं तीर्थकृत्सकलपापमलापहारिसद्धर्मतीर्थविमलीकरणैकनिष्ठः ।
त्वं मन्त्रकृन्निखिलपापविषापहारिपुण्यश्रुति[7]प्रवरमन्त्रविधानचुञ्चुः[8] ॥१५७॥
त्वामामनन्ति मुनयः पुरुषं पुराणं त्वां प्राहुरच्युतमृषीश्वरमक्षयर्द्धिम् ।
तस्माद्भवान्तक भवन्तमचिन्त्ययोगं योगीश्वरं जगदुपास्य[9]मुपास्महे[10] स्म ॥१५८॥

गमन करते हुए मदसे मनोहर शब्द कर रहे हैं ॥१५२॥ हे जिनेन्द्र, मणिमय मुकुटोंकी देदीप्यमान कान्तिको धारण करनेवाले देवोंके द्वारा ढोरी हुई तथा अतिशय सुन्दर आकार-वाली यह आपके चमरोंकी पंक्ति आपके शरीरकी कान्तिरूपी सरोवरमे सफेद पक्षियों (हंसों) की शोभा बढा रही है ॥१५३॥ हे भगवन्, जिसमें संसारके समस्त पदार्थ भरे हुए हैं, जो समस्त भाषाओंका निदर्शन करती है अर्थात् जो अतिशय विशेषके कारण समस्त भाषाओं-रूप परिणमन करती है और जिसने स्याद्वादरूपी नीतिसे अन्यमतरूपी अन्धकारको नष्ट कर दिया है ऐसी आपकी यह दिव्यध्वनि विद्वान् लोगोंको शीघ्र ही तत्त्वोंका ज्ञान करा देती है ॥१५४॥ हे भगवन्, आपकी वाणीरूपी यह पवित्र पुण्य जल हम लोगोंके मनके समस्त मलको धो रहा है, वास्तवमे यही तीर्थ है और यही आपके द्वारा कहा हुआ धर्मरूपी तीर्थ भव्यजनोंको संसाररूपी समुद्रसे पार होनेका मार्ग है ॥१५५॥ हे भगवन्, आपका ज्ञान संसारकी समस्त वस्तुओं तक पहुँचा है—समस्त वस्तुओंको जानता है इसलिये आप सर्वग अर्थात् व्यापक हैं, आपने संसारके समस्त पदार्थोंके समूह जान लिये हैं इसलिये आप सर्वज्ञ हैं आपने काम और मोहरूपी शत्रुको जीत लिया है इसलिये आप सर्वजित् अर्थात् सबको जीतनेवाले हैं और आप ससारके समस्त पदार्थोंको विशेषरूपसे देखते हैं इसलिये आप सर्वदृक् अर्थात् सबको देखनेवाले हैं ॥१५६॥ हे भगवन्, आप समस्त पापरूपी मलको नष्ट करनेवाले समीचीन धर्मरूपी तीर्थके द्वारा जीवोंको निर्मल करनेके लिये सदा तत्पर रहते हैं इसलिये आप तीर्थङ्कर हैं और आप समस्त पापरूपी विषको अपहरण करनेवाले पवित्र शास्त्ररूपी उत्तम मन्त्रके बनानेमे चतुर हैं इसलिये आप मन्त्रकृत् हैं ॥१५७॥ हे भगवन्, मुनि लोग आपको ही पुराण पुरुष अर्थात् श्रेष्ठ पुरुष (पक्षमें ब्रह्मा) मानते हैं, आपको ही ऋषियोंके ईश्वर और अक्षय ऋद्धिको धारण करनेवाले अच्युत अर्थात् अविनाशी (पक्षमें विष्णु) कहते हैं तथा आपको ही अचिन्त्य योगको धारण करनेवाले, और समस्त

१ सरसि । २ हस । ३ अनुकरोति । ४ नय । ५ संसारसमुद्रोत्तरण । ६ सकल-पदार्थप्राप्तज्ञानत्वात् उपर्यप्येव योज्यम् । ७ आगम । ८ प्रतीत. (समर्थ.) । ९ जगदाराध्यम् । १० आराधयामः स्म ।

तुभ्यं नमः सकलघातिमलव्यपायसम्भूतकेवलमयामललोचनाय ।
तुभ्यं नमो दुरितबन्धनशृङ्खलानां छेत्रे[1] भवार्गलभिदे[2] जिनकुञ्जराय ॥१५९॥
तुभ्यं नमस्त्रिभुवनैकपितामहाय तुभ्यं नमः परमनिर्वृतिकारणाय ।
तुभ्यं नमोऽधिगुरवे[3] गुरवे गुणौघैस्तुभ्यं नमो विदितविश्वजगत्त्रयाय ॥१६०॥
इत्युच्चकैः स्तुतिमुदारगुणानुरागादस्माभिरीश रचितां त्वयि चित्रवर्णाम् ।
देव प्रसीद परमेश्वर भक्तिपूतां पादार्पितां स्रजमिवानुगृहाण चार्वीम् ॥१६१॥
त्वामीड्[4]महे जिन भवन्त नुस्मरामस्त्वां कुड्मलीकृतकरा वयमानमामः ।
त्वत्संस्तुतावुपचितं यदिहाद्य पुण्यं तेनास्तु भक्तिरमला त्वयि नः प्रसन्ना ॥१६२॥
इत्थ सुरासुरनरोरगयक्षसिद्धगन्धर्वचारण[5]गणैस्सममिद्धबोधाः ।
द्वात्रिंशदिन्द्रवृषभा[6] वृषभाय तस्मै चक्रुर्नमः स्तुतिशतैर्नतमौलयस्ते ॥१६३॥
स्तुत्वेति तं जिनमजं जगदेकबन्धुं भक्त्या नतोरुमुकुटैरमरैः सहेन्द्राः ।
धर्मप्रिया [7]जिनपतिं परितो यथास्वम् आस्थानभूमिमभजन्जिनसम्मुखास्याः ॥१६४॥

जगत्के उपासना करने योग्य योगीश्वर अर्थात् मुनियोंके अधिपति (पक्षमें महेश) कहते हैं इसलिये हे संसारका अन्त करनेवाले जिनेन्द्र, ब्रह्मा विष्णु और महेशरूप आपकी हम लोग भी उपासना करते हैं ॥१५८॥ हे नाथ, समस्त घातियाकर्मरूपी मलके नष्ट हो जानेसे जिनके केवलज्ञानरूपी निर्मल नेत्र उत्पन्न हुआ है ऐसे आपके लिये नमस्कार हो। जो पापबन्धरूपी साकलको छेदनेवाले हैं, संसाररूपी अर्गलको भेदनेवाले हैं और कर्मरूपी शत्रुओंको जीतनेवाले जिनोमें हाथीके समान श्रेष्ठ हैं ऐसे आपके लिये नमस्कार हो ॥१५९॥ हे भगवन्, आप तीनों लोकोंके एक पितामह हैं. इसलिये आपको नमस्कार हो, आप परम निर्वृति अर्थात् मोक्ष अथवा सुखके कारण हैं इसलिये आपको नमस्कार हो, आप गुरुओंके भी गुरु हैं तथा गुणोंके समूहसे भी गुरु अर्थात् श्रेष्ठ हैं इसलिये आपको नमस्कार हो, इसके सिवाय आपने समस्त तीनों लोकोंको जान लिया है इसलिये भी आपको नमस्कार हो ॥१६०॥ हे ईश, आपके उदार गुणोंमें अनुराग होनेसे हमलोगोंने आपकी यह अनेक वर्णों (अक्षरों अथवा रंगों) वाली उत्तम स्तुति की है इसलिये हे देव, हे परमेश्वर, हम सबपर प्रसन्न होइये और भक्तिसे पवित्र तथा चरणोंमें अर्पित की हुई सुन्दर मालाके समान इसे स्वीकार कीजिये ॥१६१॥ हे जिनेन्द्र, आपकी स्तुति कर हमलोग आपका बार बार स्मरण करते हैं, और हाथ जोड़कर आपको नमस्कार करते हैं। हे भगवन्, आपकी स्तुति करनेसे आज यहाँ हम लोगोंको जो कुछ पुण्यका संचय हुआ है उससे हम लोगोंकी आपमें निर्मल और प्रसन्नरूप भक्ति हो ॥१६२॥ इस प्रकार जिनका ज्ञान अतिशय प्रकाशमान हो रहा है ऐसे मुख्य मुख्य बत्तीस इन्द्रोंने, (भवनवासी १०, व्यन्तर ८, ज्योतिषी २ और कल्पवासी १२) सुर, असुर, मनुष्य, नागेन्द्र, यक्ष, सिद्ध, गन्धर्व और चारणोंके समूहके साथ साथ सैकड़ों स्तुतियों द्वारा मस्तक झुकाते हुए उन भगवान् वृषभदेवके लिये नमस्कार किया ॥१६३॥ इस प्रकार धर्मसे प्रेम रखनेवाले इन्द्र लोग, अपने बड़े बड़े मुकुटोंको नम्रीभूत करनेवाले देवोंके साथ साथ फिर कभी उत्पन्न नहीं होनेवाले और जगत्के एकमात्र बन्धु जिनेन्द्रदेवकी

---

१ छेदकाय। २ भेदकाय। ३ अधिकगुरवे। ४ '–मीड्य हे' इति 'ल' पुस्तकगतो पाठोऽशुद्धः। ५ स्तुतिपाठक। ६ इन्द्रश्रेष्ठा.। ७ जिनपतेः समन्तात्।

देहे जिनस्य जयिनः[1] कनकावदाते रेजुस्तदा भृशममी सुरदृष्टिपाताः ।
[2]कल्पाङ्घ्रिपाङ्ग इव मत्तमधुव्रतानाम् ओघाः प्रसूनमधुपानपिपासितानाम् ॥१६५॥

इन्दुवदनावृत्तम्

कुञ्जरकराभभुजमिन्दुसमवक्त्रं कुञ्चितमितस्थितशिरोरुहकलापम् ।
मन्दरतटाभपृथुवक्षसमधीशं तं जिनमवेक्ष्य दिविजाः प्रमदमीयुः ॥१६६॥

शशिकला, मणिगणकिरणो वा वृत्तम्

विकसितसरसिजदलनिभनयनं करिकरसुरुचिरभुजयुगममलम् ।
जिनवपुरतिशयरुचियुतममरा निददृशुरतिधृति[3]विमुकुलनयनाः ॥१६७॥
विधुरुचिहरचमररुहपरिगतं मनसिजशरशतनिपतनविजयि ।
जिनवरवपुरवधुतसकलमलं नि[4]पपुरमृतमिव शुचि सुरमधुपाः ॥१६८॥
कमलदलविलसदनि[5]मिषनयनं प्रहसित[6]निभमुखमतिशयसुरभि ।
सुरनरपरिवृढनयनसुखकरं व्यरुचदधिकरुचि जिनवृषभवपुः ॥१६९॥
जिनमुखशतदलमनिमिषनयनभ्रमरमतिसुरभि विधुतविधुरुचि ।
मनसिजहिमहतिविरहितमतिरुक्[7] पपुरविदितधृति[8] सुरयुवतिवृशः ॥१७०॥

स्तुति कर समवसरण भूमिमें जिनेन्द्र भगवान्‌की ओर मुख कर उन्हींके चारों ओर यथा-योग्यरूपसे बैठ गये ॥१६४॥

उस समय घातियाकर्मरूपी शत्रुओंको जीतनेवाले जिनेन्द्रभगवान्‌के सुवर्णके समान उज्ज्वल शरीरपर जो देवोंके नेत्रोंके प्रतिबिम्ब पड़ रहे थे वे ऐसे अच्छे सुशोभित हो रहे थे मानो कल्पवृक्षके अवयवोंपर पुष्पोंका रस पीनेकी इच्छा करनेवाले मदोन्मत्त भ्रमरोंके समूह ही हों ॥१६५॥ जिनकी भुजाएं हाथीकी सूंड़के समान है, जिनका मुख चन्द्रमाके समान है, जिनके केशोंका समूह टेढ़ा और परिमित (वृद्धिसे रहित) है और जिनका वक्षःस्थल मेरुपर्वतके तटके समान है ऐसे देवाधि-देव जिनेन्द्रभगवान्‌को देखकर वे देव बहुत ही हर्षित हुए थे ॥१६६॥ जिसके नेत्र फूले हुए कमलके दलके समान है, जिनकी दोनों भुजाए हाथीकी सूडके समान है, जो निर्मल है, और जो अत्यन्त कान्तिसे युक्त है ऐसे जिनेन्द्रभगवान्‌के शरीरको वे देव लोग बड़े भारी सतोषसे नेत्रोंको उघाड़-उघाड़कर देख रहे थे ॥१६७॥ जो चन्द्रमाकी कान्तिको हरण करनेवाले चमरोंसे घिरा हुआ है, जो कामदेवके सैकड़ों वाणोंके निपातको जीतनेवाला है, जिसने समस्त मल नष्ट कर दिये है और जो अतिशय पवित्र है ऐसे जिनेन्द्रदेवके शरीरको देव-रूपी भ्रमर अमृतके समान पान करते थे ॥१६८॥ जिसके टिमकाररहित नेत्र कमलदलके समान सुशोभित हो रहे थे, जिसका मुख हंसते हुएके समान जान पड़ता था, जो अतिशय सुगन्धिसे युक्त था, देव और मनुष्योंके स्वामियोके नेत्रोंको सुख करनेवाला था, और अधिक कान्तिसे सहित था ऐसा भगवान् वृषभदेवका वह शरीर बहुत ही अधिक सुशोभित हो रहा था ॥१६९॥ जिसपर टिमकाररहित नेत्र ही भ्रमर बैठे हुए हैं, जो अत्यन्त सुगन्धित है जिसने चन्द्रमाकी कान्तिको तिरस्कृत कर दिया है, जो कामदेवरूपी हिमके आघातसे रहित है और जो अतिशय कान्तिमान् है ऐसे भगवान्‌के मुखरूपी कमलको देवांगनाओंके नेत्र

---

१ जयशीलस्य । २ कल्पवृक्षशरीरे यथा । ३ सन्तोषविकसित । ४ पान चक्रुः, पीतवन्तः । ५ निमिषरहित । ६ हसन्सदृश । ७ अधिकान्ति । ८ जिनमुखदर्शनात् पूर्वमेव विकसन्त्यः पानाय इत्यभिप्रायः । अविज्ञातसन्तोष यथा ।

विजितकमलदलविलसदसदृशदृशं सुरयुवतिनयनमधुकरततवपुषम् ।
वृषभमजरमजममरपतिसुमहितं नमत परम[1]मतममितरुचिमृषिपतिम् ।।१७१।।

मालिनीवृत्तम्

सरसिजनिभवक्त्रं पद्मकिञ्जल्कगौरं[2] कमलदलविशालव्यायतास्पन्दिनेत्रम् ।
सरसिरुहसमानामोदमच्छायमच्छस्फटिकमणिविभासि श्रीजिनस्याङ्गमीडे ।।१७२।।
नयनयुगमताम्रं वक्ति कोपव्यपायं भ्रुकुटिरहितमास्यं शान्ततां[3] यस्य शास्ति ।
मदनजयमपाङ्गालोकनापायसौम्यं प्रकटयति यदङ्गं तं जिनं नन्न[4]मीमि ।।१७३।।

ऋषभगजविलसितवृत्तम्

गात्रमनङ्गभङ्गकृदतिसुरभिरुचिरं नेत्रमताम्रमत्यमलतररुचिविसरम् ।
वक्त्रमदष्टसद्दशन[5]वसनमिव हसद्यस्य विभाति तं जिनमवनमत[6] सुधियः ।।१७४।।
सौम्यवक्त्रममलकमलदलनिभदृशं हेमपुञ्जसदृशवपुषमृषभमृषिपम् ।
रक्तपद्मरुचिभृदमलमृदुपदयुगं सन्न[7]तोस्मि परमपुरुषमपरुष[8]गिरम् ।।१७५।।

असन्तुष्टरूपसे पान कर रहे थे। भावार्थ—भगवान्‌का मुखकमल इतना अधिक सुन्दर था कि देवांगनाएं उसे देखते हुए संतुष्ट ही न हो पाती थी ।।१७०।। जिनके अनुपम नेत्र कमल दलको जीतते हुए सुशोभित हो रहे है, जिनका शरीर देवांगनाओके नेत्ररूपी भ्रमरसे व्याप्त हो रहा है, जो जरारहित है, जन्मरहित है, इन्द्रोके द्वारा पूजित है, अतिशय इष्ट है अथवा जिनका मत अतिशय उत्कृष्ट है, जिनकी कान्ति अपार है और जो ऋषियोंके स्वामी है ऐसे भगवान् वृषभदेवको हे भव्य जीवो, तुम सब नमस्कार करो ।।१७१।। मै श्रीजिनेन्द्रभगवान्‌के उस शरीरकी स्तुति करता हू जिसका कि मुख कमलके समान है, जो कमलकी केशरके समान पीतवर्ण है, जिसके टिमकाररहित नेत्र कमलदलके समान विशाल और लम्बे है, जिसकी सुगन्धि कमलके समान थी, जिसकी छाया नही पड़ती और जो स्वच्छ स्फटिकमणिके समान सुशोभित हो रहा था ।।१७२।। जिनके ललाईरहित दोनों नेत्र जिनके क्रोधका अभाव बतला रहे है, भौहोकी टिढ़ाईसे रहित जिनका मुख जिनकी शान्तताको सूचित कर रहा है और कटाक्षावलोकनका अभाव होनेसे सौम्य अवस्थाको प्राप्त हुआ जिनका शरीर जिनके कामदेवकी विजयको प्रकट कर रहा है ऐसे उन जिनेन्द्र भगवान्‌को मै बार-बार नमस्कार करता हूं ।।१७३।। हे बुद्धिमान् पुरुषो, जिनका शरीर कामदेवको नष्ट करनेवाला अतिशय सुगन्धित और सुन्दर है, जिनके नेत्र ललाईरहित तथा अत्यन्त निर्मल कान्तिके समूहसे सहित है, और जिनका मुख ओंठोंको डसता हुआ नही है तथा हंसता हुआ सा सुशोभित हो रहा है ऐसे उन वृषभ जिनेन्द्रको नमस्कार करो ।।१७४।। जिनका मुख सौम्य है, नेत्र निर्मल कमलदलके समान है, शरीर सुवर्णके पुंजके समान है, जो ऋषियोंके स्वामी है, जिनके निर्मल और कोमल चरणोके युगल लाल कमलकी कान्ति धारण करते है, जो परम पुरुष है और जिनकी वाणी अत्यन्त

---

१ उत्कृष्टशासनम् । २ पीतवर्ण । ३ शास्तृता ट० । शिक्षकत्वम् । ४ भृशं नमामि । ५ प्रशस्ताधरम् । ६ नमस्कार कुरुत । ७ सम्यक् प्रणतोऽस्मि । ८ कोमलवाचम् ।

वाणिनीवृत्तम्

स जयति यस्य पादयुगलं जयत्पङ्कजं विलसति पद्मगर्भे[1]मधिशय्य सल्लक्षणम् ।
मनसिजरागमर्दनसहं[2] जगत्प्रीणनं सुरपतिमौलिशेखरगलद्रजःपिञ्जरम् ॥१७६॥

हरिणीवृत्तम्

जयति वृषभो यस्योत्तुङ्गं विभाति महासनं हरिपरिधृतं रत्नानद्धं परिस्फुरदंशुकम्[3] ।
अधरितजगन्मेरोर्लीलां विडम्बयदुच्चकैर्नतसुरतिरीटाग्र[4]ग्रावद्युतीरिव तर्जयत् ॥१७७॥

शिखरिणीवृत्तम्

समग्रां [5]वैदग्धीं सकलश[6]शभृन्मण्डलगतां सितच्छत्रं भाति त्रिभुवनगुरोर्यस्य विहसत् ।
जयत्येष श्रीमान् वृषभजिनराण्णिर्जितरिपुर्नमद्देवेन्द्रोद्यन्मुकुटमणिघृष्टा[7]ङ्घ्रिकमलः ॥१७८॥

पृथ्वीवृत्तम्

जयत्यमरनायकैरसकृदर्चिताङ्घ्रिद्वयः सुरोत्करकराधुतैश्चमरजोत्करैर्वीजितः ।
गिरीन्द्रशिखरे गिरीन्द्र इव योऽभिषिक्तः सुरैः पयोब्धिशुचिवारिभिः शशिकराङ्कुरस्पर्धिभिः ॥१७९॥

वंशपत्रपतितवृत्तम्

यस्य समुज्ज्वला गुणगणा इव रुचिरतरा भान्त्यभितो मयूखनिवहा गुणसलिलनिधेः ।
विश्व[8]जनीनचारुचरितः सकलजगदिनः[9] सोऽवतु[10] भव्यपङ्कजरविर्वृषभजिनविभुः ॥१८०॥

कोमल है ऐसे श्री वृषभ जिनेन्द्रको मै अच्छी तरह नमस्कार करता हू ॥१७५॥ जिनके चरण युगल कमलोंको जीतनेवाले है उत्तम उत्तम लक्षणोसे सहित है कामसम्बन्धी राग को नष्ट करने में समर्थ है, जगत्को सतोष देनेवाले है, इन्द्रके मुकुटके अग्रभागसे गिरती हुई मालाके परागसे पीले पीले हो रहे है और कमलके मध्यमे विराजमान कर सुशोभित हो रहे है ऐसे भगवान् वृषभदेव सदा जयवन्त हो ॥१७६॥ जो बहुत ऊँचा है, सिहोके द्वारा धारण किया हुआ है, रत्नोंसे जडा हुआ है, चारो ओर चमकती हुई किरणोसे सहित है, संसारको नीचा दिखला रहा है, मेरुपर्वतकी शोभाकी खूब विडम्बना कर रहा है और जो नमस्कार करते हुए देवोंके मुकुटके अग्रभागमें लगे हुए रत्नोकी कान्तिकी तर्जना करता सा जान पडता है ऐसा जिनका बड़ा भारी सिहासन सुशोभित हो रहा है वे भगवान् वृषभदेव सदा जयवन्त रहे ॥१७७॥ तीनों लोकोंके गुरु ऐसे जिन भगवान्का सफेद छत्र पूर्ण चन्द्रमण्डल सम्बन्धी समस्त शोभाको हँसता हुआ सुशोभित हो रहा है जिन्होंने घातियाकर्मरूपी शत्रुओंको जीत लिया है जिनके चरणकमल नमस्कार करते हुए इन्द्रोंके देदीप्यमान मुकुटोंमे लगे हुए मणियोंसे घर्षित हो रहे है और जो अन्तरङ्ग तथा बहिरंग लक्ष्मीसे सहित है ऐसे श्री ऋषभ जिनेन्द्र सदा जयवन्त रहे ॥१७८॥ इन्द्रोने जिनके चरण-युगलकी पूजा अनेक बार की थी, जिनपर देवोंके समूहने अपने हाथसे हिलाये हुए अनेक चमरोंके समूह ढुराये थे और देवोने मेरु पर्वतपर दूसरे मेरुपर्वतके समान स्थित हुए जिनका, चन्द्रमाकी किरणोंके अंकुरोंके साथ स्पर्धा करनेवाले क्षीरसागरके पवित्र जलसे अभिषेक किया था वे श्री ऋषभ जिनेन्द्र सदा जयवन्त रहे ॥१७९॥ गुणोंके समुद्रस्वरूप जिन भगवान्के उज्ज्वल और अतिशय देदीप्यमान किरणोंके समूह गुणोके समूहके समान चारों ओर सुशोभित हो रहे है, जिनका सुन्दर चरित्र समस्त जीवोका हित करनेवाला है, जो सकल

---

१ कमलमध्ये स्थित्वेत्यर्थ.। २ समर्थम् । ३ किरणम् । ४ –किरीटा अ०, स० । ५ सौन्दर्यम् । ६ सम्पूर्णचन्द्रबिम्ब । ७ घर्षित । ८ सकलजनहित । ९ जगत्पतिः । १० रक्षतु ।

मन्दाक्रान्तावृत्तम्

यस्याशोकश्चलकिसलयश्चित्रपत्रप्रसूनो भाति श्रीमान् मरकतमयस्कन्धबन्धोज्ज्वलाङ्गः ।
सान्द्रच्छायः सकलजनताशोकविच्छेदनेच्छुः सोऽयं श्रीशो जयति वृषभो भव्यपद्माकरार्कः ॥१८१॥

कुसुमितलतावेल्लितावृत्तम्

जीयाज्जैनेन्द्रः सुरुचिरतनुः श्रीरशोकाङ्घ्रिपो यो वातोद्धूतैः स्वैः प्रचलविटपै[1]र्नित्यपुष्पोपहारम् ।
तन्वन्व्याप्ताशः परभृतरुतातोद्यसङ्गीतहृद्यो नृत्यच्छाखाग्रैर्जिनमिव भजन्भाति भक्त्येव भव्यः ॥१८२॥

मन्दाक्रान्तावृत्तम्

यस्यां पुष्पप्रततिममराः पातयन्ति द्युमूर्ध्नः प्रीता नेत्रप्रततिमिव तां लोलमत्तालिजुष्टाम् ।
वातोद्धूतैर्ध्वजविततिभिर्व्योमसम्मार्जती वा भाति श्रेयः समवसृतिभूः साचिरं नस्तनोतु ॥१८३॥

शार्दूलविक्रीडितम्

यस्मिन्नग्नरुचिर्विभाति नितरां रत्नप्रभाभास्वरे[2]
भास्वान्सालवरो जयत्यमलिनो धूलीमयोसौ विभोः ।
स्तम्भाः कल्पतरुप्रभा[3]भरुचयो मानाधिकाश्चोद्ध्वजाः[4]
जीयासुर्जिनभर्तुरस्य गगनप्रोल्लङ्घिनो भास्वराः ॥१८४॥

जगत्के स्वामी हैं और जो भव्य जीवरूपी कमलोंको विकसित करनेके लिये सूर्यके समान हैं ऐसे श्री वृषभ जिनेन्द्र देव हम सबकी रक्षा करें॥१८०॥ जिसके पल्लव हिल रहे हैं, जिसके पत्ते और फूल अनेक वर्णके हैं, जो उत्तम शोभासे सहित है, जिसका स्कन्ध मरकत मणियोंसे बना हुआ है, जिसका शरीर अत्यन्त उज्ज्वल है, जिसकी छाया बहुत ही सघन है, और समस्त लोगोंका शोक नष्ट करनेकी जिसकी इच्छा है ऐसा जिनका अशोक वृक्ष सुशोभित हो रहा है और जो भव्य जीवरूपी कमलोंके समूहको विकसित करनेके लिये सूर्यके समान हैं ऐसे वे बहिरंग और अन्तरंग लक्ष्मीके अधिपति श्री वृषभ जिनेन्द्र सदा जयवन्त रहें ॥१८१॥ जिसका शरीर अतिशय सुन्दर है, जो वायुसे हिलती हुई अपनी चंचल शाखाओंसे सदा फूलोंके उपहार फैलाता रहता है, जिसने समस्त दिशाएं व्याप्त कर ली हैं, जो कोयलोंके मधुर शब्दरूपी गाने बजानेसे मनोहर है और जो नृत्य करती हुई शाखाओंके अग्रभागसे भक्तिपूर्वक जिनेन्द्र भगवान्की सेवा करते हुए भव्यके समान सुशोभित हो रहा है ऐसा वह श्री जिनेन्द्रदेवका शोभायुक्त अशोक वृक्ष सदा जयवन्त रहे ॥१८२॥ जिस समवसरणकी भूमिमें देव लोग प्रसन्न होकर अपने नेत्रोंकी पंक्तिके समान चंचल और उन्मत्त भ्रमरोंसे सेवित फूलोंकी पंक्ति आकाशके अग्रभागसे छोड़ते हैं अर्थात् पुष्पवर्षा करते हैं और जो वायुसे हिलती हुई अपनी ध्वजाओंकी पक्तिसे आकाशको साफ करती हुई सी सुशोभित होती है ऐसी वह समवसरणभूमि चिरकाल तक हम सबके कल्याणको विस्तृत करे ॥१८३॥ रत्नोंकी प्रभासे देदीप्यमान रहनेवाले जिस धूलीसालमें सूर्य निमग्नकिरण होकर अत्यन्त शोभायमान होता है ऐसा वह भगवान्का निर्मल धूलीसाल सदा जयवन्त रहे तथा जो कल्पवृक्षसे भी अधिक कान्तिवाले हैं जिनपर ऊंची ध्वजाएं फहरा रही हैं, जो आकाशको उल्लंघन कर रही है, और जो अतिशय देदीप्यमान हैं ऐसे जिनेन्द्रदेवके

---

१ शाखाभिः । २ –भासुरो द०, ल०, प० । –भासुरे इ०, अ०, प० । ३ कल्पवृक्षप्रभा-सदृशतेजसः । ४ ऊर्ध्वगतध्वजाः ।

वाप्यो रत्नतटाः प्रसन्नसलिला नीलोत्पलैरातता
गन्धान्धभ्रमरारवैर्मुखरिता भान्ति स्म यास्ताः स्तुमः ।
ताञ्चापि [1]स्फुटपुष्पहास[2]रुचिरां प्रोद्यत्प्रवालाङ्कुरां
वल्लीनां वनवीथिकां तमपि च प्राकारमाद्यं विभोः ॥१८५॥
प्रोद्यद्विद्रुमसन्निभैः किसलयैरारञ्जयद् यद्दिशो
भात्युच्चैः पवनाहतैश्च विटपैर्यन्नर्तितुं वोद्यतम् ।
रक्ताशोक[3]वनादिकं वनमदश्चैत्यद्रुमैरङ्कितं
वन्देऽहं समवा[4]दिकां सृतिमिमां जैनीं [5]चतुष्काश्रिताम् ॥१८६॥
रक्ताशोकवनं वनञ्च रुचिमत्सप्तच्छदानामदः
चूतानामपि नन्दनं पर[6]तरं यच्चम्पकानां वनम् ।
तच्चैत्यद्रुममण्डितं भगवतो वन्दामहे वन्दितं
देवेन्द्रैर्विनयानतेन शिरसा श्रीजैनबिम्बाङ्कितम् ॥१८७॥

छन्दः (?)

प्राकारात्परतो विभाति रुचिरा हरिवृषगरुडैः श्रीमन्माल्यगजाम्बरैश्च शिखिभिः प्रकटितमहिमा ।
हंसैश्चाप्युपलक्षिता प्रविलसद्ध्वजवसनततिः यातामप्यमरार्चितामभिनुमः पवनविलुलिताम् ॥१८८॥

ये मानस्तम्भ भी सदा जयवन्त रहें ॥१८४॥ जिनके किनारे रत्नोंके बने हुए हैं, जिनमें स्वच्छ जल भरा हुआ है, जो नील कमलोंसे व्याप्त हैं, और जो सुगन्धिसे अंधे भ्रमरोंके शब्दोंसे शब्दायमान होती हुई सुशोभित हो रही हैं मैं उन बावड़ियोंकी स्तुति करता हूं, तथा जो फूले हुए पुष्परूपी हाससे सुन्दर है और जिसमें पल्लवोंके अंकुर उठ रहे हैं ऐसे लतावनकी भी स्तुति करता हूं। और इसी प्रकार भगवान्‌के उस प्रसिद्ध प्रथम कोटकी भी स्तुति करता हू ॥१८५॥ जो देदीप्यमान मूंगाके समान अपने पल्लवोंसे समस्त दिशाओंको लाल लाल कर रहे हैं, जो वायुसे हिलती हुई अपनी ऊँची शाखाओंसे नृत्य करनेके लिये तत्पर हुएके समान जान पड़ते हैं, जो चैत्यवृक्षोंसे सहित हैं, जो जिनेन्द्र भगवान्‌की समवसरणभूमिमें प्राप्त हुए हैं और जिनकी संख्या चार है ऐसे उन रक्त अशोक आदिके वनोंकी भी मैं वन्दना करता हूँ ॥१८६॥ जो चैत्यवृक्षोंसे मण्डित हैं, जिनमें श्री जिनेन्द्र भगवान्‌की प्रतिमाएँ विराजमान हैं, और इन्द्र भी विनयके कारण झुके हुए अपने मस्तकोंसे जिनकी वन्दना करते हैं ऐसे, भगवान्‌के लाल अशोक वृक्षोंका वन, यह देदीप्यमान सप्तपर्णवृक्षोंका वन, वह आम्रवृक्षोंका वन और वह अतिशय श्रेष्ठ चम्पक वृक्षोंका वन, इन चारों वनोंकी हम वन्दना करते हैं ॥१८७॥ जो अतिशय सुन्दर हैं, जो सिंह, बैल, गरुड़, शोभायमान माला, हाथी, वस्त्र, मयूर और हंसोंके चिह्नोंसे सहित हैं, जिनका माहात्म्य प्रकट हो रहा है, जो देवताओंके द्वारा भी पूजित हैं और जो वायुसे हिल रही हैं ऐसी जो कोटके आगे देदीप्यमान ध्वजाओंके वस्त्रोंकी पंक्तियाँ सुशोभित

---

१ विकसित । २ विकास । ३ अशोकसप्तच्छदादिचतुर्वनम् । ४ समवसृतिम् । ५ चतुष्ट्वाश्रिताम् ट० । वनचतुष्टयेन तोषं कृत्वा श्रिताम् । ६ उत्कृष्टतरम् ।

सुवदनावृत्तम्

यद्दूराद्व्योममार्गं कलुषयति दिशां प्रान्तं स्थगयति प्रोत्सर्पद्धूपधूमैः सुरभयति जगद्विश्वं द्रुततरम् ।
तन्नः सद्धूपकुम्भद्वयमुरुमनसः प्रीतिं घटयतु श्रीमत्तन्नाटयशालाद्वयमपि रुचिरं सालत्रयगतम् ॥१८६॥

छन्दः (?)

पुष्पपल्लवोज्ज्वलेषु कल्पपादपोरुकाननेषु हारिषु श्रीमदिन्द्रवन्दिताः स्वबुध्नसुस्थितेद्धसिद्धबिम्बकाः द्रुमाः ।
सन्ति तानपि प्रणौम्यमूं नमामि च स्मरामि च प्रसन्नधीः स्तूपपंक्तिमप्यमूं समग्ररत्नविग्रहां जिनेन्द्रबिम्बिनीम् १९०

स्रग्धरा

वीथीं कल्पद्रुमाणां सवनपरिवृतिं तामतीत्य स्थिता या
शुभ्रा प्रासादपंक्तिः स्फटिकमणिमयः सालवर्यस्तृतीयः ।
भर्तुः श्रीमण्डपश्च त्रिभुवनजनतासंश्रयात्तप्रभावः
पीठं चोद्यत्त्रिभू[१]मं श्रियमनु[२]तनुताद् गन्धकुट्याश्रितं नः ॥ १९१ ॥
मानस्तम्भाः सरांसि प्रविमलजलसत्खातिका पुष्पवाटी
प्राकारो नाट्यशाला द्वितयमुपवनं वेदिकान्तर्ध्वजाध्वा ।
सालः कल्पद्रुमाणां सपरिवृतवनं स्तूपहर्म्यावली च
प्राकारः स्फाटिकोन्तर्नृसुरमुनिसभा पीठिकाग्रे स्वयम्भूः ॥ १९२ ॥

होती है उन्हें भी मैं नमस्कार करता हूं ॥१८८॥ जो फैलते हुए धूपके धुएंसे आकाश-मार्गको मलिन कर रहे हैं जो दिशाओंके समीप भागको आच्छादित कर रहे हैं और जो समस्त जगत्को बहुत शीघ्र ही सुगन्धित कर रहे हैं ऐसे प्रत्येक दिशाके दो दो विशाल तथा उत्तम धूप-घट हमारे मनमें प्रीति उत्पन्न करे, इसी प्रकार तीनों कोटों सम्बन्धी, शोभा-सम्पन्न दो दो मनोहर नाटचशालाएं भी हमारे मनमे प्रीति उत्पन्न करें ॥१८९॥ फूल और पल्लवोंसे देदीप्यमान और अतिशय मनोहर कल्पवृक्षोंके बड़े बड़े वनोंमे लक्ष्मी-धारी इन्द्रोंके द्वारा वन्दनीय तथा जिनके मूलभागमे सिद्ध भगवान्की देदीप्यमान प्रति-माएं विराजमान हैं ऐसे जो सिद्धार्थ वृक्ष हैं मैं प्रसन्नचित्त होकर उन सभीकी स्तुति करता हूं, उन सभीको नमस्कार करता हूं और उन सभीका स्मरण करता हूं, इसके सिवाय जिनका समस्त शरीर रत्नोंका बना हुआ है और जो जिनेन्द्र भगवान्की प्रतिमाओं से सहित है ऐसे स्तूपोंकी पंक्तिका भी मैं प्रसन्नचित्त होकर स्तवन, नमन तथा स्मरण करता हूं ॥१९०॥ वनकी वेदीसे घिरी हुई कल्पवृक्षोंके वनोंकी पंक्तिके आगे जो सफेद मकानो की पंक्ति है उसके आगे स्फटिक मणिका बना हुआ जो तीसरा उत्तम कोट है, उसके आगे तीनों लोकोंके समस्त जीवोंको आश्रय देनेका प्रभाव रखनेवाला जो भगवान्का श्रीमडप है और उसके आगे जो गन्धकुटीसे आश्रित तीन कटनीदार ऊंचा पीठ है वह सब हम लोगोंकी लक्ष्मीको विस्तृत करे ॥१९१॥ संक्षेपमें समवसरणकी रचना इस प्रकार है— सब से पहिले (धूलिसालके बाद) चारों दिशाओंमे चार मानस्तम्भ हैं, मानस्तम्भोंके चारों ओर सरोवर है, फिर निर्मल जलसे भरी हुई परिखा है, फिर पुष्पवाटिका (लतावन) है, उसके आगे पहला कोट है, उसके आगे दोनों ओर दो दो नाट्यशालाएं है, उसके आगे

---

१ त्रिभूमिकम् । त्रिमेखलमित्यर्थः । २ करोतु ।

देवोऽर्हन्प्राङ्मुखो वा निय[1]तिमनुसर[2]न्नुत्तराशामुखो वा
यामध्यास्ते स्म पुण्यां समवसृतिमहीं तां परीत्याध्यवा[3]त्सुः ।
प्रादक्षिण्येन धीन्द्रा[4] द्युयु[5]वतिगणिनी नृस्त्रियस्त्रिश्च[6] देव्यो
देवाः सेन्द्राश्च मर्त्याः पशव इति गणा द्वादशामी क्रमेण ॥१९३॥

योगीन्द्रा रुन्द्रबोधा विबुधयुवतयः सार्यका राजपत्न्यो
ज्योतिर्वन्येशकन्या[7] भवनजवनिता भावना व्यन्तराश्च ।
ज्योतिष्काः कल्पनाथा नरवरवृषभास्तिर्यगौघैः सहामी
कोष्ठेषूक्तेष्वतिष्ठन् जिनपतिमभितो भक्तिभारावनम्राः ॥१९४॥

प्रादुःष्य[8]द्वाङ्मयूखैर्विघटिततिमिरो धूतसंसाररात्रि-
स्तत्सन्ध्या[9]सन्धिकल्पां मुहुरपघटयन् [10]क्षीणमोहीमवस्थाम् ।
सज्ज्ञानोदग्रसादि[11]प्रतिनियत[12]नयोद्वेगसप्ति[13]प्रयुक्त-
स्याद्वादस्यन्दनस्थो भृशमथ रुरुचे भव्यबन्धुर्जिनार्कः ॥१९५॥

दूसरा अशोक आदिका वन है, उसके आगे वेदिका है, तदनन्तर ध्वजाओंकी पंक्तियां हैं, फिर दूसरा कोट है, उसके आगे वेदिका सहित कल्पवृक्षोंका वन है, उसके बाद स्तूप और स्तूपोंके बाद मकानों की पंक्तियां है, फिर स्फटिकमणिमय तीसरा कोट है, उसके भीतर मनुष्य देव और मुनियोंकी बारह सभाए है तदनन्तर पीठिका है और पीठिकाके अग्रभाग पर स्वयभू भगवान् अरहतदेव विराजमान है ॥१९२॥ अरहंतदेव स्वभावसे ही पूर्व अथवा उत्तर दिशाकी ओर मुख कर जिस समवसरणभूमिमे विराजमान होते है उसके चारों ओर प्रदक्षिणारूपसे क्रमपूर्वक १ बुद्धिके ईश्वर गणधर आदि मुनिजन, २ कल्पवासिनी देवियां ३ आर्यिकाएं–मनुष्योंकी स्त्रिया, ४ भवनवासिनी देवियाँ, ५ व्यन्तरणी देवियां, ६ भवनवासिनी देवियाँ, ७ भवनवासी देव, ८ व्यन्तर देव, ९ ज्योतिष्क देव, १० कल्पवासी देव, ११ मनुष्य और १२ पशु इन बारह गणोके बैठने योग्य बारह सभाए होती है ॥१९३॥ उनमेसे पहले कोठेमे अतिशय ज्ञानके धारक गणधर आदि मुनिराज, दूसरेमे कल्पवासी देवोंकी देवांगनाए, तीसरेमे आर्यिका सहित राजाओंकी स्त्रियाँ तथा साधारण मनुष्योंकी स्त्रियाँ, चौथेमे ज्योतिष देवोंकी देवागनाए, पाचवेमे व्यन्तर देवोंकी देवागनाएं, छठवेमे भवनवासी देवोंकी देवागनाए, सातवेमे भवनवासी देव, आठवेमे व्यन्तरदेव नवेमे ज्योतिषी देव, दसवेमे कल्पवासी देव, ग्यारहवेमे चक्रवर्ती आदि श्रेष्ठ मनुष्य और बारहवेमे पशु बैठते है । ये सब ऊपर कहे हुए कोठोमे भक्तिभारसे नम्रीभूत होकर जिनेन्द्र भगवान्के चारों ओर बैठा करते है ॥१९४॥

तदनन्तर–जिन्होंने प्रकट होते हुए वचनरूपी किरणोंसे अन्धकारको नष्ट कर दिया है, ससाररूपी रात्रिको दूर हटा दिया है और उस रात्रिकी सध्या सन्धिके समान क्षीण मोह नामक बारहवे गुणस्थानकी अवस्थाको भी दूर कर दिया है जो सम्यग्ज्ञानरूपी उत्तम

---

१ स्वभावं । २ अनुगच्छन् । ३ अधिवास कुर्वन्ति स्म । ४ गणधरादिमुनय. । ५ कल्पवासिस्त्री । ६ भवनत्रयदेव्यः । ७ ज्योतिष्कव्यन्तरदेव्य । ८ प्रकटीभवतस्याद्वादवाक्किरणै । ९ तद्रात्रेः सन्ध्यायाः सन्धि. सम्बन्धस्तेन कल्पा सदृशाम्, प्रात कालसन्ध्यामित्यर्थः । १० क्षीणमोहसम्बन्धिनीम् । क्षीणमोहाम् इ० । ११ सारथि । १२ प्रतिनियमित । १३ वेगवत्तुरग ।

इत्युच्चैः सङ्गृहीतां समवसृतिमहीं धर्मचक्राधिभर्तु-
र्भव्यात्मा संस्मरेद्यः स्तुतिमुखरमुखो भक्तिनम्रेण मूर्ध्ना ।
जैनीं लक्ष्मीमचिन्त्यां सकलगुणमयीं प्राश्नुतेऽसौ महर्द्धिं
चूडाभिर्नाकभाजां मणिमुकुटजुषामर्चितां स्रग्धराभिः[1] ॥१९६॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसङ्ग्रहे
भगवत्समवसृतिविभूतिवर्णनं नाम
त्रयोविंशं पर्व ।

सारथिके द्वारा वशमें किये हुए सात नयरूपी वेगशाली घोड़ोंसे जुते हुए स्याद्वादरूपी रथपर सवार हैं और जो भव्य जीवोंके बन्धु हैं ऐसे श्री जिनेन्द्रदेवरूपी सूर्य अतिशय देदीप्यमान हो रहे थे ॥१९५॥ इस प्रकार ऊपर जिसका सग्रह किया गया है ऐसी, धर्म-चक्रके अधिपति जिनेन्द्र भगवान्की इस समवसरणभूमिका जो भव्य जीव भक्तिसे मस्तक झुकाकर स्तुतिसे मुखको शब्दायमान करता हुआ स्मरण करता है वह अवश्य ही मणिमय मुकुटोंसे सहित देवोंके मालाओंको धारण करनेवाले मस्तकोंके द्वारा पूज्य, समस्त गुणोंसे भरपूर और बड़ी बड़ी ऋद्धियोंसे युक्त जिनेन्द्र भगवान्की लक्ष्मी अर्थात् अर्हन्त अवस्थाकी विभूतिको प्राप्त करता है ॥१९६॥

इस प्रकार भगवज्जिनसेनाचार्यप्रणीत त्रिषष्टिलक्षण श्रीमहापुराणके भाषानुवादमें
समवसरणविभूतिका वर्णन करनेवाला तेईसवाँ पर्व समाप्त हुआ ।

---

१ मालधारिणीभिः ।

चतुर्विंशतितमं पर्व

स जीयाद् वृषभो मोहविषसुप्त[1]मिदं जगत् । पट[2]विद्येव यद्विद्या सद्यः समुदतिष्ठि[3]पत् ॥१॥
श्रीमान् भरतराजर्षिः बुबुधे युगपत्त्रयम् । गुरोः कैवल्यसम्भूतिं सूतिञ्च[4] सुतचक्रयोः ॥२॥
ध[5]र्मस्थाद् गुरुकैवल्यं चक्रमायुधपालतः । काञ्चुकीयात् सुतोत्पत्तिं विदामास[6] तदा विभुः ॥३॥
पर्याकुल इवासीच्च क्षणं तद्यौग[7]पद्यतः । किमत्र प्रागनुष्ठेयं संविधा[8]नमिति प्रभुः ॥४॥
त्रिवर्गफलसम्भूतिः अक्रमोपनता[9] मम । पुण्यतीर्थं सुतोत्पत्तिश्चक्ररत्नमिति त्रयी ॥५॥
तत्र धर्मफलं तीर्थं पुत्रः स्यात् कामजं फलम् । अर्थानुबन्धिनोऽर्थस्य फलञ्चक्रं प्रभास्वरम् ॥६॥
अथवा सर्वमप्येतत्फलं धर्मस्य पुष्कलम्[10] । यतो धर्मतरोरर्थः फलं कामस्तु तद्रसः ॥७॥
कार्येषु प्राग्विधेयं तद्धर्म्यं श्रेयोनुबन्धि यत् । महाफलञ्च तद्देवसेवा प्राथमक[11]ल्पिकी ॥८॥
निश्चिचायेति राजेन्द्रो गुरुपूजनमादितः । अहो धर्मात्मनां[12] चेष्टा प्रायः श्रेयोऽनुबन्धिनी[13] ॥९॥
सानुजन्मा समेतोऽन्तःपुरपौरपुरोगमैः[14] । प्राज्यामिज्यां पुरोधाय[15] सज्जोऽभूद् गमनं प्रति ॥१०॥

जिनके ज्ञानने पटविद्या अर्थात् विष दूर करनेवाली विद्याके समान मोहरूपी विषसे सोते हुए इस समस्त जगत्को शीघ्र ही उठा दिया था– जगा दिया था वे श्री वृषभदेव भगवान् सदा जयवन्त रहे ॥१॥ अथानन्तर राज्यलक्ष्मीसे युक्त राजर्षि भरतको एक ही साथ नीचे लिखे हुए तीन समाचार मालूम हुए कि पूज्य पिताको केवलज्ञान उत्पन्न हुआ है, अन्तःपुरमे पुत्रका जन्म हुआ है और आयुधशालामें चक्ररत्न प्रकट हुआ है ॥२॥ उस समय भरत महाराजने धर्माधिकारी पुरुषसे पिताके केवलज्ञान होनेका समाचार, आयुधशालाकी रक्षा करनेवाले पुरुषसे चक्ररत्न प्रकट होनेका वृत्तान्त, और कंचुकीसे पुत्र उत्पन्न होनेका समाचार मालूम किया था ॥३॥ ये तीनों ही कार्य एक साथ हुए है। इनमेसे पहले किसका उत्सव करना चाहिये यह सोचते हुए राजा भरत क्षण भरके लिये व्याकुलसे हो गये ॥४॥ पुण्यतीर्थ अर्थात् भगवान्को केवलज्ञान उत्पन्न होना, पुत्रकी उत्पत्ति होना और चक्ररत्नका प्रकट होना ये तीनों ही धर्म अर्थ काम तीन वर्गके फल मुझे एक साथ प्राप्त हुए हैं ॥५॥ इनमेसे भगवान्के केवलज्ञान उत्पन्न होना धर्मका फल है, पुत्रका होना कामका फल है और देदीप्यमान चक्रका प्रकट होना अर्थ प्राप्त करानेवाले अर्थ पुरुषार्थका फल है ॥६॥ अथवा यह सभी धर्मपुरुषार्थका पूर्ण फल है क्योकि अर्थ धर्मरूपी वृक्षका फल है और काम उसका रस है ॥७॥ सब कार्योंमें सबसे पहले धर्मकार्य ही करना चाहिये क्योंकि वह कल्याणोंको प्राप्त करानेवाला है और बड़े बड़े फल देनेवाला है इसलिये सर्व प्रथम जिनेन्द्र भगवान्की पूजा ही करनी चाहिये ॥८॥ इस प्रकार राजाओंके इन्द्र भरत महाराजने सबसे पहले भगवान्की पूजा करनेका निश्चय किया सो ठाक ही है क्योंकि धर्मात्मा पुरुषोंकी चेष्टायें प्रायः पुण्य उत्पन्न करनेवाली ही होती है ॥९॥ तदनन्तर महाराज भरत अपने छोटे भाई, अन्त.पुरकी स्त्रियाँ और नगरके मुख्य मुख्य लोगोंके साथ

---

१ अनिश्चयज्ञानमुपेतम् । २ विषापहरणविद्या । ३ उत्थापयति स्म । ४ उत्पत्तिम् । ५ धर्माधिकारिणः । ६ बुबुधे । ७ तेषामेककालीनत्वत । ८ सामग्रीम् । ९ युगपदागता । १० सम्पूर्णम् । ११ प्रथमं कर्तव्या । १२ धर्मबुद्धिमताम् । १३ पुण्यानुबन्धिनी ल० । १४ महत्तरैः । १५ अग्रे कृत्वा ।

गुरौ भक्ति परां तन्वन् कुर्वन् धर्मप्रभावनाम् । स भूत्या परयोत्तस्थे[1] भगवद्वन्दनाविधौ ॥११॥
अथ सेनाम्बुधेः क्षोभम् आतन्वन्नब्धिनिःस्वनः । आनन्दपटहो मन्द्रं दध्वान ध्वानयन् दिशः ॥१२॥
[2]प्रतस्थेऽथ महाभागो वन्दारुर्भरताधिपः । जिनं हस्त्यश्वपादातरथ[3]कड्यावृतोऽभितः ॥१३॥
रेजे प्रचलिता सेना [4]ततानकपृथुध्वनिः । वेलेव वारिधेः [5]प्रेङ्खदसङ्ख्यध्वजवीचिका ॥१४॥
[6]तया परिवृतः प्राप स जिनास्थानमण्डलम् । प्रसर्पत्प्रभया दिक्षु जितमार्तण्डमण्डलम् ॥१५॥
परीत्य पूजयन् मानस्तम्भान्[7]सोऽत्यैत्ततः परम् । खातां लतावनं सालं वनानाञ्च चतुष्टयम् ॥१६॥
द्वितीयं सालमुत्क्रम्य[8] ध्वजात् कल्पद्रुमावलिम् । स्तूपान् प्रासादमालाञ्च पश्यन् विस्मयमाप सः ॥१७॥
ततो दौवारिकैर्देवैः सम्भ्राम्यद्भिः प्रवेशितः । श्रीमण्डपस्य वैदग्धीं[9] सोऽपश्यत् स्वर्गजित्वरीम्[10] ॥१८॥
ततः प्रदक्षिणीकुर्वन् धर्मचक्रचतुष्टयम् । लक्ष्मीवान् पूजयामास प्राप्य प्रथमपीठिकाम् ॥१९॥
ततो द्वितीयपीठस्थान् विभोरष्टौ महाध्वजान् । सोऽर्चयामास सम्प्रीतिः[11] पूतैर्गन्धादिवस्तुभिः ॥२०॥
मध्ये[12]गन्धकुटीद्धर्द्धि परार्ध्ये हरिविष्टरे । उदयाचलमूर्धस्थमिवार्कं जिनमैक्षत ॥२१॥

पूजाकी बड़ी भारी सामग्री लेकर जानेके लिये तैयार हुए ॥१०॥ गुरुदेव भगवान् वृषभदेवमें उत्कृष्ट भक्तिको बढ़ाते हुए और धर्मकी प्रभावना करते हुए महाराज भरत भगवान्‌की वन्दनाके लिये उठे ॥११॥

तदनन्तर–जिनका शब्द समुद्रकी गर्जनाके समान है ऐसे आनन्दकालमें बजनेवाले नगाड़े सेनारूपी समुद्रमें क्षोभ फैलाते हुए और दिशाओंको शब्दायमान करते हुए गम्भीर शब्द करने लगे ॥१२॥ अथानन्तर–जो महाभाग्यशाली है, जिनेन्द्र भगवान्‌की वन्दना करनेका अभिलाषी है, भरत क्षेत्रका स्वामी है और चारो ओर से हाथी-घोड़े पदाति तथा रथोंके समूहसे घिरा हुआ है ऐसे महाराज भरतने प्रस्थान किया ॥१३॥ उस समय वह चलती हुई सेना समुद्रकी वेलाके समान सुशोभित हो रही थी क्योंकि सेनामें जो नगाडोंका शब्द फैल रहा था वही उसकी गर्जनाका शब्द था और फहराती हुई असख्यात ध्वजाए ही लहरोंके समान जान पड़ती थी ॥१४॥ इस प्रकार सेनासे घिरे हुए महाराज भरत, दिशाओंमें फैलती हुई प्रभासे जिसने सूर्यमण्डलको जीत लिया है ऐसे भगवान्‌के समवसरण मे जा पहुंचे ॥१५॥ वे सबसे पहले समवसरण भूमिकी प्रदक्षिणा देकर मानस्तम्भोंकी पूजा करते हुए आगे वढ़े, वहाँ क्रम क्रमसे परिखा, लताओंके वन, कोट, चार वन और दूसरे कोटको उल्लंघनकर ध्वजाओंको, कल्पवृक्षोंकी पंक्तियोंको, स्तूपोंको और मकानोंके समूहको देखते हुए आश्चर्यको प्राप्त हुए ॥१६–१७॥ तदनन्तर संभ्रमको प्राप्त हुए द्वारपाल देवोंके द्वारा भीतर प्रवेश कराये हुए भरत महाराजने स्वर्गको जीतनेवाली श्रीमंडपकी शोभा देखी ॥१८॥ तदनन्तर अतिशय शोभायुक्त भरतने प्रथम पीठिका पर पहुंचकर प्रदक्षिणा देते हुए चारों ओर धर्मचक्रोकी पूजा की ॥१९॥ तदनन्तर उन्होंने अत्यन्त प्रसन्न होकर दूसरे पीठपर स्थित भगवान्‌की ध्वजाओकी पवित्र सुगन्ध आदि द्रव्योंसे पूजा की ॥२०॥ तदनन्तर उदयाचल पर्वतके शिखरपर स्थित सूर्यके समान गन्धकुटीके बीचमें महामूल्य-श्रेष्ठ सिंहासनपर स्थित और अनेक देदीप्यमान ऋद्धियोंको

---

१ उद्यतोऽभूत् । उद्योग करोति स्मेत्यर्थः । २ चचाल । ३ रथसमूहः । ४ विस्तृत । ५ चलत् । ६ सेनया । ७ –नत्यैत्तत. ल० । अत्यैत् अतिक्रान्तवान् । ८ अतिक्रम्य । ९ सौन्दर्यम् । १० जयशीलाम् । ११ सम्प्रीतः ब०, ल०, द०, इ० । १२ गन्धकुट्या मध्ये ।

चलच्चामरसङ्घातवीज्यमानमहातनुम् । प्रपतन्निर्झरं मेरुरिव चामीकरच्छविम् ॥२२॥
महाशोकतरोर्मूले छत्रत्रितयसंश्रितम् । [1]त्रिधाभूतावधूद्भासिबलाहकमिवाद्रिपम् ॥२३॥
पुष्पवृष्टिप्रतानेन परितो भ्राजितं प्रभुम् । कल्पद्रुमप्रगलितप्रसूनमिव मन्दरम् ॥२४॥
नभो व्यापिभिरुद्घोषं सुरदुन्दुभिनिस्वनैः । प्रसरद्वेलमम्भोधिमिव वातविघूर्णितम् ॥२५॥
धीरध्वानं प्रवर्षन्तं धर्मामृतमतर्कितम् । आह्लादितजगत्प्राणं प्रावृषेण्य[2]मिवाम्बुदम् ॥२६॥
स्वदेहविसरज्ज्योत्स्नासलिलक्षालिता[3]खिलम् । क्षीराब्धिमध्यसद्वृद्धमिव भूघ्नं हिरण्मयम् ॥२७॥
सोऽन्व[4]क्प्रदक्षिणीकृत्य भगवन्तं जगद्गुरुम् । इयाज[5] यायजूकानां[6] ज्यायान्प्राज्ये[7]ज्यया प्रभुम् ॥२८॥
पूजान्ते प्रणिपत्येशं महीनिहित[8]जान्वसौ । वचःप्रसूनमालाभिरि[9]त्यानर्च गिरां पतिम् ॥२९॥
त्वं ब्रह्मा परमज्योतिस्त्वं प्रभूष्णुरजोऽरजाः[10] । त्वमादिदेवो देवानाम् अधिदेवो महेश्वरः ॥३०॥
त्वं स्रष्टा त्वं विधातासि त्वमीशानः पुरुः पुमान्[11] । त्वमादिपुरुषो विश्वेट् विश्वारा[12]ड् विश्वतोमुखः॥३१

धारण करनेवाले जिनेन्द्र वृषभदेवको देखा ॥२१॥ ढुरते हुए चमरोंके समूहसे जिनका विशाल शरीर संवीज्यमान हो रहा है और जो सुवर्णके समान कान्तिको धारण करनेवाले हैं ऐसे वे भगवान् उस समय ऐसे जान पड़ते थे मानो जिसके चारों ओर निर्झरने पड़ रहे हैं ऐसा सुमेरुपर्वत ही हो ॥२२॥ वे भगवान् बड़े भारी अशोकवृक्षके नीचे तीन छत्रोंसे सुशोभित थे और ऐसे जान पड़ते थे मानो जिसपर तीन रूप धारण किये हुए चन्द्रमासे सुशोभित मेघ छाया हुआ है ऐसा पर्वतोंका राजा सुमेरुपर्वत ही हो ॥२३॥ वे भगवान् चारों ओरसे पुष्पवृष्टिके समूहसे सुशोभित थे जिससे ऐसे जान पड़ते थे मानो जिसके चारों ओर कल्पवृक्षोंसे फूल गिरे हुए हैं ऐसा सुमेरुपर्वत ही हो ॥२४॥ आकाशमें व्याप्त होनेवाले देवदुन्दुभियोंके शब्दोंसे भगवान्के समीप ही बड़ा भारी शब्द हो रहा था जिससे वे ऐसे जान पड़ते थे मानो वायुके द्वारा चलायमान हुआ और जिसकी लहरें किनारे तक फैल रही हैं ऐसा समुद्र ही हो ॥२५॥ जिसका शब्द अतिशय गम्भीर है और जो जगत्के समस्त प्राणियोंको आनन्दित करनेवाला है ऐसे सन्देहरहित धर्मरूपी अमृतकी वर्षा करते हुए भगवान् वृषभदेव ऐसे जान पड़ते थे मानो गरजता हुआ और जलवर्षा करता हुआ वर्षाऋतुका बादल ही हो ॥२६॥ अपने शरीरकी फैलती हुई प्रभारूपी जलसे जिन्होंने समस्त सभाको प्रक्षालित कर दिया है ऐसे वे भगवान् ऐसे जान पड़ते थे मानो क्षीरसमुद्रके बीचमें बड़ा हुआ सुवर्णमय पर्वत ही हो ॥२७॥ इस प्रकार आठ प्रातिहार्यरूप ऐश्वर्यसे युक्त और जगत्के गुरु स्वामी वृषभदेवको देखकर पूजा करनेवालोंमें श्रेष्ठ भरतने उनकी प्रदक्षिणा दी और फिर उत्कृष्ट सामग्रीसे उनकी पूजा की ॥२८॥ पूजाके बाद महाराज भरतने अपने दोनों घुटने जमीनपर रखकर सब भाषाओंके स्वामी भगवान् वृषभदेवको नमस्कार किया और फिर वचनरूपी पुष्पोंकी मालाओंसे उनकी इस प्रकार पूजा की अर्थात् नीचे लिखे अनुसार स्तुति की ॥२९॥

हे भगवन्, आप ब्रह्मा हैं, परम ज्योतिस्वरूप हैं, समर्थ हैं, जन्मरहित हैं, पापरहित हैं, मुख्यदेव अथवा प्रथम तीर्थंकर हैं, देवोंके भी अधिदेव और महेश्वर हैं ॥३०॥ आप ही स्रष्टा हैं, विधाता हैं, ईश्वर हैं, सबसे उत्कृष्ट हैं, पवित्र करनेवाले हैं, आदि पुरुष हैं, जगत्के ईश हैं,

१ त्रैरूप्येण चन्द्रेणोद्भासितमेघम् । २ प्रावृषि भवम् । ३ प्रक्षालितसकलपदार्थम् । ४ अनुकूलो भूत्वा पश्चाद्वा । ५ पूजयामास । ६ इज्याशीलानाम् । 'इज्याशीलो यायजूकः' इत्यभिधानात् । ७ भूरिपूजया । ८ मह्यां निक्षिप्त जानु यस्मिन् कर्मणि । ९ वक्ष्यमाणप्रकारेण । १० कर्मरजोरहितः । ११ पुनातीति पुमान् । १२ विश्वस्मिन् राजते इति ।

विश्वव्यापी जगद्भर्ता विश्वदृग्विश्वभु[1]र्विभुः । विश्वतोऽक्षिमयं[2] ज्योतिर्विश्वयोनिर्वियोनिकः ॥३२॥
हिरण्यगर्भो[3] भगवान् वृषभो वृषभध्वजः । परमेष्ठी[4] परं तत्त्वं परमात्मात्म[5]भूरसि ॥३३॥
त्वमिनस्त्वमधिज्योति[6]स्त्वमीशस्त्वमयोनिजः । अजरस्त्वमनादिस्त्वम् अनन्तस्त्वं त्वमच्युतः ॥३४॥
त्वमक्षर[7]स्त्वमक्षय्यस्त्वमनक्षोऽस्यनक्षरः[8] । विष्णुर्जिष्णुर्विजिष्णुश्च त्वं स्वयम्भूः स्वयंप्रभः ॥३५॥
त्वं शम्भुः शम्भवः शंयुः[9] शंवदः[10] शङ्करो हरः । । हरिर्मोहासुरारिश्च तमोरिर्भव्यभास्करः ॥३६॥
पुराणः कविराद्यस्त्वं योगी योगविदां वरः । त्वं शरण्यो वरेण्योऽग्रपस्त्वं पूतः पुण्यनायकः ॥३७॥
त्वं योगात्मा[11] सयोगश्च सिद्धो बुद्धो निरुद्धवः[12] । सूक्ष्मो निरञ्जनः कञ्जसञ्जातो[13] जिनकुञ्जरः ॥३८
छन्दो[14]विच्छन्दसां[15] कर्ता वेदविद्वदतां[16] वरः । वाचस्पतिरधर्मारिर्धर्माधिर्धर्मनायकः ॥३९॥

जगत्में शोभायमान हैं और विश्वतोमुख अर्थात् सर्वदर्शी हैं ॥३१॥ आप समस्त संसारमें व्याप्त हैं, जगत्के भर्ता हैं, समस्त पदार्थोंको देखनेवाले हैं, सबकी रक्षा करनेवाले है, विभु हैं, सब ओर फैली हुई आत्मज्योतिको धारण करनेवाले है, सबकी योनिस्वरूप हैं—सबके ज्ञान आदि गुणोंको उत्पन्न करनेवाले है और स्वयं अयोनिरूप हैं—पुनर्जन्मसे रहित है ॥३२॥ आप ही हिरण्यगर्भ अर्थात् ब्रह्मा है, भगवान् है, वृषभ है, वृषभके चिह्नवाली ध्वजासे युक्त हैं, परमेष्ठी हैं, परमतत्त्व है, परमात्मा है और आत्मभू—अपने आप उत्पन्न होनेवाले है ॥३३॥ आप ही स्वामी हैं, उत्कृष्ट ज्योतिस्वरूप हैं, ईश्वर है, अयोनिज—योनिके बिना उत्पन्न होनेवाले हैं, जरा रहित हैं, आदिरहित हैं, अन्तरहित है और अच्युत हैं ॥३४॥ आप ही अक्षर अर्थात् अविनाशी हैं, अक्षय्य अर्थात् क्षय होनेके अयोग्य हैं, अनक्ष अर्थात् इन्द्रियोंसे रहित है, अनक्षर अर्थात् शब्दागोचर हैं, विष्णु अर्थात् व्यापक हैं, जिष्णु अर्थात् कर्मरूप शत्रुओंको जीतनेवाले है, विजिष्णु अर्थात् सर्वोत्कृष्ट स्वभाववाले हैं, स्वयंभू अर्थात् स्वयं बुद्ध है, और स्वयंप्रभ अर्थात् अपने आप ही प्रकाशमान हैं—असहाय, केवलज्ञानके धारक हैं ॥३५॥ आप ही शंभु हैं, शभव है, शंयु—सुखी है, शंवद हैं—सुख या शान्तिका उपदेश देनेवाले है, शंकर हैं—शान्तिके करनेवाले है, हर है, मोहरूपी असुरके शत्रु हैं, अज्ञानरूप अन्धकारके अरि है और भव्य जीवोंके लिये उत्तम सूर्य हैं ॥३६॥ आप पुराण हैं—सबसे पहलेके हैं, आद्य कवि है, योगी हैं, योगके जाननेवालोंमें श्रेष्ठ है, सबको शरण देनेवाले हैं, श्रेष्ठ हैं, अग्रेसर हैं, पवित्र हैं, और पुण्यके नायक हैं ॥३७॥ आप योगस्वरूप हैं—ध्यानमय हैं, योगसहित हैं— आत्मपरिष्पन्दसे सहित हैं, सिद्ध है—कृतकृत्य है, बुद्ध हैं—केवलज्ञानसे सहित है, सांसारिक उत्सवोंसे रहित है, सूक्ष्म है—छद्‌मस्थज्ञानके अगम्य है, निरंजन हैं—कर्म कलंकसे रहित हैं, ब्रह्मरूप हैं और जिनवरोंमें श्रेष्ठ हैं ॥३८॥ आप द्वादशांगरूप वेदोंके जाननेवाले हैं, द्वादशांगरूप वेदोंके कर्ता है, आगमके जाननेवाले हैं, वक्ताओंमे सर्वश्रेष्ठ है, वचनोंके स्वामी हैं, अधर्मके शत्रु हैं, धर्मोंमें

---

१ विश्वज्ञः । विश्वभुग् अ०, प०, स०, ल०, इ०, द० । २ आत्मस्वरूपज्योतिः । ३ हिरण्यं गर्भे यस्य । ४ परमेष्ठिपदस्थितः । ५ आत्मना भवतीति । ६ अधिकज्योतिः । ७ न क्षरतीति अक्षरः, नित्यः । ८ न विद्यते क्षरो नाशो यस्मात् । ९ सुखयोजकः । १० शं सुखं वदतीति । ११ ध्यानस्वरूपः । १२ विवाहमुत्सवरहितः । उत्कृष्टभर्तृरहितः । १३ सहस्रदल कर्णिकोपरि प्रादुर्भूतः । १४ छन्द इति ग्रन्थविशेषज्ञः । १५ छन्दःशब्देनात्र वेदो द्वादशाङ्गलक्षणो भण्यते । १६ आगमज्ञः ।

त्वं जिनः कामजिज्जेता त्वमर्हन्नरिहा[1] रहाः[2] । धर्मध्वजो धर्मपतिः कर्मारातिनिशुम्भनः[3] ॥४०॥
त्वं हि[4] भव्याब्जिनीबन्धुस्त्वं हविर्भुक्[5]त्वमध्वरः[6] । त्वं मखाङ्गं[7] मखज्येष्ठस्त्वं होता हव्य[8]मेव च ॥४१॥
[9]यज्वाज्यश्च त्वमिज्या च पुण्यो गण्यो गुणाकरः । त्वमपारि[10]रपारश्च त्वममध्योपि मध्यमः ॥४२॥
उत्तमोऽनुत्तरो[11] ज्येष्ठो गरिष्ठः[12] स्थेष्ठ[13] एव च । त्वमणीयान्[14] महीयांश्च[15] स्थवीयान्[16] गरिमास्पदम् ॥४३॥
महान् महीयितो[17] मह्यो[18] भूष्णुः स्थास्नु[19]रनश्वरः । जित्वरो[20]ऽनित्वरो[21] नित्यः शिवः[22] शान्तो भवान्तकः ४४
त्वं हि ब्रह्मविदां[23] ध्येयस्त्वं हि ब्रह्मपदेश्वरः । त्वां नाममालया देवमित्यभिष्टुमहे वयम् ॥४५॥
अष्टोत्तरशतं नाम्नाम् इत्यनुध्याय चेतसा । त्वामीडे नीडमीडानां[24] प्रातिहार्याष्टकप्रभुम् ॥४६॥
तवायं प्रचलच्छाखस्तुङ्गोऽशोकमहाङ्घ्रिपः । स्वच्छायासंश्रितान् पाति त्वत्तः शिक्षामिवाश्रितः ॥४७॥

प्रथम धर्म है और धर्मके नायक हैं ॥३९॥ आप जिन हैं, कामको जीतनेवाले हैं, अर्हन्त हैं– पूज्य हैं, मोहरूप शत्रुको नष्ट करनेवाले हैं, अन्तरायरहित हैं, धर्मकी ध्वजा है, धर्मके अधिपति हैं, और कर्मरूपी शत्रुओंको नष्ट करनेवाले हैं ॥४०॥ आप भव्यजीवरूपी कमलिनियोंके लिये सूर्यके समान है, आप ही अग्नि है, यज्ञकुंड है, यज्ञके अंग है,श्रेष्ठ यज्ञ है, होम करनेवाले हैं और होम करने योग्य द्रव्य है ॥४१॥ आप ही यज्वा है–यज्ञ करनेवाले है, आज्य है–घृतरूप हैं, पूजारूप है, अपरिमित पुण्यस्वरूप है, गुणोंकी खान है, शत्रुरहित है, पाररहित है, और मध्यरहित होकर भी मध्यम हैं । भावार्थ—भगवान् निश्चयनयकी अपेक्षा अनादि और अनन्त हैं जिसका आदि और अन्त नही होता उसका मध्य भी नहीं होता। इसलिये भगवान्‌के लिये यहाँ कविने अमध्य अर्थात् मध्यरहित कहा है परन्तु साथ ही 'मध्यम' भी कहा है। कविकी इस उक्तिमे यहाँ विरोध आता है परन्तु जब मध्यम शब्दका 'मध्ये मा अनन्तचतुष्टयलक्ष्मीर्यस्यस.'–जिसके बीचमें अनन्तचतुष्टयरूप लक्ष्मी है, ऐसा अर्थ किया जाता है तब वह विरोध दूर हो जाता है। यह विरोधाभास अलकार है ॥४२॥ हे भगवन्, आप उत्तम हो कर भी अनुत्तम है (परिहार पक्षमें 'नास्ति उत्तमो यस्मात्सः'– जिससे बढ़कर और दूसरा नही है) ज्येष्ठ है, सबसे बड़े गुरु है, अत्यन्त स्थिर है, अत्यन्त सूक्ष्म हैं, अत्यन्त बड़े है, अत्यन्त स्थूल है और गौरवके स्थान है ॥४३॥ आप बड़े है, क्षमा गुणसे पृथिवीके समान आचरण करनेवाले हैं, पूज्य है, भवनशील (समर्थ) है, स्थिर स्वभाव वाले है, अविनाशी है, विजयशील है, अचल है, नित्य है, शिव है, शान्त है, और संसारका अन्त करनेवाले हैं ॥४४॥ हे देव, आप ब्रह्म विद् अर्थात् आत्मस्वरूपके जाननेवालोंके ध्येय हैं–ध्यान करने योग्य है और ब्रह्मपद–आत्माकी शुद्ध पर्यायके ईश्वर हैं। इस प्रकार हमलोग अनेक नामोंसे आपकी स्तुति करते है ॥४५॥ हे भगवन्, इस प्रकार आपके एक सौ आठ नामोंका हृदयसे स्मरण कर मै आठ प्रातिहार्योंके स्वामी तथा स्तुतियोंके स्थानभूत आपकी स्तुति करता हूँ ॥४६॥ हे भगवन्, जिसकी शाखाएं अत्यन्त चलायमान हो रही है ऐसा यह ऊंचा अशोक महावृक्ष अपनी छायामें आये हुए जीवोंकी इस प्रकार

---

१ अरीन् हन्तीति अरिहा। २ रहस्यरहितः। 'रहःशब्देनान्तरायो भण्यते' 'विरहितरहस्कृतेभ्यः' इत्यत्र तथा व्याख्यानात्। ३ घातकः। ४ पादपूरणे। हि–द०, स०, ल०, म०, प०, अ०, इ०। ५ वह्निः। ६ यागः। ७ यजनकारणम्। ८ होतव्यद्रव्यम्। ९ पूजकः। १० अपगतारिः। ११ न विद्यते उत्तर श्रेष्ठो यस्मात्। १२ अतिशयेन गुरुः। १३ अतिशयेन स्थिरः। १४ अतिशयेन अणुः। १५ अतिशयेन महान्। १६ अतिशयेन स्थूल। १७ क्षमया महीवाचरितः। १८ पूज्यः। १९ स्थिरतरः। २० जयशीलः। २१ गमनशीलतारहित। २२ शिवं सुखमस्यातीति। २३ आत्मशालिनाम्। २४ स्तुतीनाम्।

तवामी चामरव्राता यक्षैरुत्क्षिप्य[1] वीजिताः । निर्धुनन्तीव निर्व्याजम् आगोगोमक्षिका नृणाम् ॥४८॥
त्वामापतन्ति परितः सुमनोऽञ्जलयो दिवः । तुष्टया स्वर्गलक्ष्म्येव मुक्ता हर्षाश्रुबिन्दवः ॥४९॥
छत्रत्रितयमाभाति सूच्छ्रितं जिन तावकम् । मुक्तालम्बनविभ्राजि लक्ष्म्याः क्रीडास्थलायितम् ॥५०॥
तव हर्यासनं भाति विश्वभर्तुर्भवद्भरम्[2] । कृतयत्नैरिवोद्वोढुं न्य[3]ग्भूयोढं मृगाधिपैः ॥५१॥
तव देहप्रभोत्सर्पः इदमाक्रम्यते सदः । पुण्याभिषेकसम्भारं[4] लम्भयद्भि[5]रिवाभितः ॥५२॥
तव वाक्प्रसरो दिव्यः पुनाति जगतां मनः । मोहान्धतमसं धुन्वन् [6]स्वज्ञानार्कांशुकोपमः ॥५३॥
प्रातिहार्याण्यहार्याणि[7] तवामूनि चकासति । लक्ष्मी हंस्याः समाक्रीडपुलिनानि शुचीनि वा ॥५४॥
नमो विश्वात्मने तुभ्यं तुभ्यं विश्वसृजे नमः । स्वयंभुवे नमस्तुभ्यं क्षायिकैर्लब्धिपर्ययैः ॥५५॥
ज्ञानदर्शनवीर्याणि विरतिः[8] शुद्धदर्शनम् । दानादिलब्धयश्चेति [9]क्षायिक्यस्तव शुद्धयः ॥५६॥

रक्षा करता है मानो इसने आपसे ही शिक्षा पाई हो ॥४७॥ यक्षोंके द्वारा ऊपर उठाकर ढोले गये ये आपके चमरोंके समूह ऐसे जान पड़ते हैं मानो बिना किसी छलके मनुष्योंके पापरूपी मक्खियोको ही उड़ा रहे हों ॥४८॥ हे नाथ, आपके चारों ओर स्वर्गसे जो पुष्पाञ्जलियोंकी वर्षा हो रही है वह ऐसी जान पड़ती है मानो सतुष्ट हुई स्वर्ग-लक्ष्मीके द्वारा छोड़ी हुई हर्ष-जनित आसुओंकी बूंदे ही हों ॥४९॥ हे जिनेन्द्र, मोतियोंके जालसे सुशोभित और अतिशय ऊचा आपका यह छत्रत्रितय ऐसा जान पडता है मानो लक्ष्मीका क्रीडा-स्थल ही हो ॥५०॥ हे भगवन्, सिहोंके द्वारा धारण किया हुआ यह आपका सिहासन ऐसा सुशोभित हो रहा है मानो आप समस्त लोकका भार धारण करनेवाले है–तीनों लोकोंके स्वामी है इसलिये आपका बोझ उठानेके लिये सिहोंने प्रयत्न किया हो, परन्तु भारकी अधिकतासे कुछ झुककर ही उसे धारण कर सके हों ॥५१॥ हे भगवन्, आपके शरीरकी प्रभाका विस्तार इस समस्त सभाको व्याप्त कर रहा है और उससे ऐसा जान पड़ता है मानो वह समस्त जीवोंको चारों ओरसे पुण्यरूप जलके अभिषेकको ही प्राप्त करा रहा हो ॥५२॥ हे प्रभो, आपके दिव्य वचनोंका प्रसार (दिव्यध्वनिका विस्तार) मोहरूपी गाढ़ अन्धकारको नष्ट करता हुआ जगत्के जीवोंका मन पवित्र कर रहा है इसलिये आप सम्यग्ज्ञानरूपी किरणोंको फैलानेवाले सूर्यके समान हैं ॥५३॥ हे भगवन्, इस प्रकार पवित्र और किसीके द्वारा हरण नही किये जा सकने योग्य आपके ये आठ प्रातिहार्य ऐसे देदीप्यमान हो रहे है मानो लक्ष्मीरूपी हसीके क्रीड़ा करने योग्य पवित्र पुलिन (नदीतट) ही हों ॥५४॥ हे प्रभो, ज्ञानकी अपेक्षा आप समस्त संसारमे व्याप्त है अथवा आपकी आत्मामें संसारके समस्त पदार्थ प्रतिविम्बित है इसलिये आपको नमस्कार हो, आप जगत्की सृष्टि करनेवाले है इसलिये आपको नमस्कार हो, कर्मोंके क्षयसे प्रकट होनेवाली नौ लब्धियोंसे आप स्वयंभू है इसलिये आपको नमस्कार हो ॥५५॥ हे नाथ, क्षायिकज्ञान, क्षायिकदर्शन, क्षायिकसम्यक्त्व, क्षायिक चारित्र और क्षायिकदान, लाभ, भोग, उपभोग तथा वीर्य ये आपकी नौ क्षायिक शुद्धियां

---

१ उद्धृत्य । २ भवतो भरम् । ३ अधोभूत्वा । ४ समूहम् । ५ प्रापयद्भिः । ६ त्वं ज्ञाना– ल०, द०, इ०, अ०, प०, स०, म० । ७ सहजानीत्यर्थः । ८ चारित्रम् । ९ क्षये भवाः ।

ज्ञानमप्रतिघं[1] विश्वं पर्यच्छै[2]त्सीत्तवाक्रमात्[3] । अयं ह्यावरणादेतद्व्य[4]वधिः करणं[5] क्रमः[6] ॥५७॥
चित्रं[7] जगदिदं चित्रं[8] त्वयाबोधि यदक्रमात् । अक्रमोऽपि क्वचिच्छ्लाघ्यः प्रभुमाश्रित्य लक्ष्यते ॥५८॥
इन्द्रियेषु समग्रेषु तव सत्स्वप्यतीन्द्रियम् । ज्ञानमासीदचिन्त्या हि योगिनां प्रभुशक्तयः ॥५९॥
यथा ज्ञानं तवैवाभूत् क्षायिकं तव दर्शनम् । [9]ताभ्यां युगपदेवासीद् उपयोग[10]स्तवाद्भुतम् ॥६०॥
तेन त्वं विश्वविज्ञेय[11]व्यापिज्ञानगुणा[12]द्भुतः । सर्वज्ञः सर्वदर्शी च योगिभिः परिगीयसे ॥६१॥
विश्वं विजानतोऽपीश [13]यत्तेनास्ता[14]श्रमक्लमौ । अनन्तवीर्यताशक्तेस्तन्माहात्म्यं परिस्फुटम् ॥६२॥
रागादिचित्तकालुष्यव्यपायादुदिता तव । [15]विरतिः सुखमात्मोत्थं व्यनक्त्यान्तन्तिकं विभो ॥६३॥
विरतिः[16] सुखमिष्टं चेत् सुखं त्वय्येव केवलम् । नो चेन्नैवासुखं नाम किञ्चिदत्र जगत्त्रये ॥६४॥

कही जाती है ॥५६॥ हे भगवन्, आपका बाधारहित ज्ञान समस्त संसारको एक साथ जानता है सो ठीक ही है क्योंकि व्यवधान होना, इन्द्रियोंकी आवश्यकता होना और क्रमसे जानना ये तीनों ही ज्ञानावरण कर्मसे होते है परन्तु आपका ज्ञानावरण कर्म बिलकुल ही नष्ट हो गया है इसलिये निर्बाधरूपसे समस्त ससारको एक साथ जानते है ॥५७॥ हे प्रभो, यह एक बड़े आश्चर्यकी बात है कि आपने इस अनेक प्रकारके जगत् को एक साथ जान लिया अथवा कही कही बडे पुरुषोंका आश्रय पाकर क्रमका छूट जाना भी प्रशसनीय समझा जाता है ॥५८॥ हे विभो, समस्त इन्द्रियोंके विद्यमान रहते हुए भी आपका ज्ञान अतीन्द्रिय ही होता है सो ठीक ही है क्योंकि आपकी शक्तियोंका योगी लोग भी चिन्तवन नही कर सकते है ॥५९॥ हे भगवन्, जिस प्रकार आपका ज्ञान क्षायिक है उसी प्रकार आपका दर्शन भी क्षायिक है और उन दोनोंसे एक साथ ही आपके उपयोग रहता है यह एक आश्चर्यकी बात है भावार्थ–ससारके अन्य जीवोंके पहले दर्शनोपयोग होता है बादमे ज्ञानोपयोग होता है परन्तु आपके दोनो उपयोग एक साथ ही होते है ॥६०॥ हे देव, आपका ज्ञानगुण संसारके समस्त पदार्थोमे व्याप्त हो रहा है, आप आश्चर्य उत्पन्न करनेवाले है और योगी लोग आपको सर्वज्ञ तथा सर्वदर्शी कहते है ॥६१॥ हे ईश, आप संसारके समस्त पदार्थोको जानते है फिर भी आपको कुछ भी परिश्रम और खेद नही होता है । यह आपके अनन्त बलकी शक्तिका प्रकट दिखाई देनेवाला माहात्म्य है ॥६२॥ हे विभो, चित्तको कलुषित करनेवाले राग आदि विभाव भावोके नष्ट हो जानेसे जो आपके सम्यक्चारित्र प्रकट हुआ है वह आपके विनाशरहित और केवल आत्मासे उत्पन्न होनेवाले सुखको प्रकट करता है ॥६३॥ यदि विषय और कषायसे विरक्त होना ही सुख माना जावे तो वह सुख केवल आपमें ही माना जावेगा और यदि विषय कषाय से विरक्त न होनेको सुख माना जावे तो फिर यही मानना पडेगा कि तीनों लोकोंमे दु:ख है ही नही । भावार्थ–निर्वृति अर्थात् आकुलताके अभावको सुख कहते है विषय कषायोंमें प्रवृत्ति करते हुए आकुलताका अभाव नही होता इसलिये उनमे वास्तविक सुख

---

१ विघ्नरहित । 'प्रतिघः प्रतिघाते च रोषे च प्रतिघो मतः ।' २ परिच्छिनत्ति स्म, निश्चयमकरोदित्यर्थः । ३ युगपदेव । क्रमकरणव्यवधानमन्तरेणेत्यर्थः । ४ व्यवधानम् । ५ इन्द्रियम् । ६ परिपाटी । ७ नानाप्रकारम् । ८ तदाश्चर्यम् । ९ ज्ञानदर्शनाभ्याम् । १० परिच्छित्तिः (सकलपदार्थपरिज्ञानम्) । ११ विश्वव्यापी विज्ञेयव्यापी । १२ सकलपदार्थव्यापिज्ञानगुणेनात्मज्ञानान्तमाश्चर्यवानित्यर्थः । १३ यस्मात् कारणात् । यत्ते न स्तः–द०, ल०, म०, अ०, स० । १४ अभवताम् । १५ विरतिः निस्पृहता । विरतिः निवृत्तिः । १६ विरतिः सुखमितीष्ट चेत्तर्हि केवल सुखं त्वय्येवास्ति, नान्यस्मिन्, नो चेत् विरतिः सुखमिति नेष्टम् अनिवृत्तिरेव सुखमिति चेत्तर्हि किञ्चिदसुखं नास्त्येव ।

[1]प्रसन्नकलुषं तोयं यथेह स्वच्छतां व्रजेत् । मिथ्यात्वकर्दमापायाद्दृक्[2]शुद्धिस्ते तथा मता ॥६५॥
सत्योऽपि लब्धयः [3]शेषास्त्वयि नार्थक्रिया[4]कृतः । कृतकृत्ये बहिर्द्रव्यसम्बन्धो हि निरर्थकः ॥६६॥
एवं[5] प्राया गुणा नाथ भवतोऽनन्तधा मताः । तानहं लेशतोऽपीश न स्तोतुमलमल्पधीः ॥६७॥
तवास्तां[6] ते गुणस्तोत्रं नाममात्रञ्च कीर्तितम् । पुनाति नस्ततो[7] देव त्वन्नामोद्देशतः[8] श्रिताः ॥६८॥
हिरण्यगर्भमाहुस्त्वां यतो वृष्टिर्हिरण्मयी । गर्भावतरणे नाथ प्रादुरासीत्तवाद्भुता[9] ॥६९॥
वृषभोऽसि सुरैर्वृष्टरत्नवर्षः स्वसम्भवे । [10]जन्माभिषिक्तये मेरु [11]मृष्टवान्वृषभोऽप्यसि ॥७०॥
अशेषज्ञेयसङ्क्रान्तज्ञानमूर्तिर्यतो भवान् । अतः सर्वगतं प्राहुस्त्वां देव परमर्षयः ॥७१॥
त्वयीत्यादीनि नामानि [12]बिभ्रत्यन्वर्थतां यतः । ततोऽसि त्वं जगज्ज्येष्ठः परमेष्ठी सनातनः ॥७२॥
त्वद्भक्तिचोदितामेनां मामिकां धियमक्षमः । धर्तुं स्तुतिपथे तेऽद्य प्रवृत्तोस्म्येव[13]मक्षर[14] ॥७३॥

नहीं है परन्तु आप विषय-कषायोंसे निवृत्त हो चुके हैं—आपकी तद्विषयक आकुलता दूर हो गई है इसलिये वास्तविक सुख आपमें ही है। यदि विषयवासनाओंमें प्रवृत्ति करते रहनेको सुख कहा जावे तो फिर सारा संसार सुखी ही सुखी कहलाने लगे क्योंकि ससारके सभी जीव विषयवासनाओंमें प्रवृत्त हो रहे हैं परन्तु उन्हें वास्तविक सुख प्राप्त हुआ नहीं मालूम होता इसलिये सुखका पहला लक्षण ही ठीक है और वह सुख आपको ही प्राप्त है ॥६४॥ हे भगवन्, जिस प्रकार कलुष—मल अर्थात् कीचड़के शान्त हो जानेसे जल स्वच्छताको प्राप्त हो जाता है उसी प्रकार मिथ्यात्वरूपी कीचड़के नष्ट हो जानेसे आपका सम्यग्दर्शन भी स्वच्छताको प्राप्त हुआ है ॥६५॥ हे देव, यद्यपि दान, लाभ आदि शेष लब्धियाँ आपमें विद्यमान है तथापि वे कुछ भी कार्यकारी नहीं है क्योंकि कृतकृत्य पुरुषके बाह्य पदार्थोंका ससर्ग होना बिलकुल व्यर्थ होता है ॥ ६६ ॥ हे नाथ, ऐसे ऐसे आपके अनन्तगुण माने गये है, परन्तु हे ईश, अल्पबुद्धिको धारण करनेवाला मैं उन सबकी लेशमात्र भी स्तुति करनेके लिये समर्थ नहीं हूँ ॥६७॥ इसलिये हे देव, आपके गुणोंका स्तोत्र करना तो दूर रहा, आपका लिया हुआ नाम ही हम लोगोंको पवित्र कर देता है अतएव हम लोग केवल नाम लेकर ही आपके आश्रयमें आये है ॥६८॥ हे नाथ, आपके गर्भावतरणके समय आश्चर्य करनेवाली हिरण्यमयी अर्थात् सुवर्णमयी वृष्टि हुई थी इसलिये लोग आपको हिरण्यगर्भ कहते है ॥६९॥ आपके जन्मके समय देवोंने रत्नोंकी वर्षा की थी इसलिये आप वृषभ कहलाते हैं और जन्माभिषेकके लिये आप सुमेरुपर्वतको प्राप्त हुए थे इसलिये आप ऋषभ भी कहलाते हैं ॥७०॥ हे देव ! आप संसारके समस्त जानने योग्य पदार्थोंको ग्रहण करनेवाले ज्ञानकी मूर्तिरूप हैं इसलिये बड़े बड़े ऋषि लोग आपको सर्वगत अर्थात् सर्वव्यापक कहते है ॥७१॥ हे भगवन्, ऊपर कहे हुए नामोंको आदि लेकर अनेक नाम आपमें सार्थकताको धारण कर रहे है इसलिये आप जगज्ज्येष्ठ (जगत्में सबसे बड़े), परमेष्ठी और सनातन कहलाते है ॥७२॥ हे अविनाशी, आपकी भक्तिसे प्रेरित हुई अपनी इस बुद्धिको मै स्वयं धारण करनेके लिये समर्थ नहीं हो सका इसलिये ही आज आपकी स्तुति करनेमें प्रवृत्त हुआ हूँ। भावार्थ—योग्यता न रहते हुए भी मात्र भक्तिसे प्रेरित होकर आपकी स्तुति कर रहा

---

१ प्रशान्त– ल०, इ०, द०, प०, अ०, स०, म०। २ दर्शन। ३ वीर्यादयः। ४ अर्थक्रियाकारिण्यः। ५ एवमादयः। ६ तिष्ठतु। ७ कारणात्। ८ नामसकीर्तनमात्रतः। ९ –त्तवाद्भुता– ब०, द०, ल०, इ०, म०, अ०, स०, प०। १० अभिषेकाय। ११ गतवान्। १२ धारयन्ते। १३ प्रवृत्तोऽस्म्यहमक्षर –ल०, म०। १४ अविनश्वर।

त्वयोपदर्शितं मार्गम् उपास्य शिवमीप्सितः । त्वां देवमित्यु[1]पासीनान् प्रसीदानुगृहाण नः ॥७४॥
भवन्तमित्यभिष्टुत्य विष्टपातिगवैभवम् । त्वय्येव भक्तिमकृशां प्रार्थये नान्यदर्थये[2] ॥७५॥
स्तुत्यन्ते[3] सुरसङ्घातरीक्षितो विस्मितेक्षणैः । श्रीमण्डपं प्रविश्यास्मिन्नध्युवासोचितं सदः ॥७६॥
ततो निभृतमासीने प्रबुद्धकरकुड्मले । सदःपद्माकरे भर्तुः[4] प्रबोधमभिलाषुके ॥७७॥
प्रीत्या भरतराजेन विनयानतमौलिना । विज्ञापनमकारीत्थं [5]तत्त्वजिज्ञासुना गुरोः ॥७८॥
भगवन्बोद्धु[6]मिच्छामि कीदृशस्तत्त्वविस्तरः । मार्गो मार्गफलञ्चापि कीदृक् तत्त्वविदां वर ॥७९॥
तत्प्रश्ना[7]वसिताविथं भगवानादितीर्थकृत् । तत्त्वं प्रपञ्च[8]यामास गम्भीरतरया गिरा ॥८०॥
प्रवक्तुरस्य वक्त्राब्जे विकृतिर्नैव काप्यभूत् । दर्पणे किमु भावानां विक्रियास्ति प्रकाशने ॥८१॥
ताल्वोष्ठमपरिस्पन्दि नच्छायान्तरमानने । अस्पृष्ट[9]करणा वर्णा मुखादस्य विनिर्ययुः ॥८२॥
स्फुरद्गिरिगुहोद्भूतप्रतिश्रुद्[10]ध्वनिसन्निभः । प्रस्पष्टवर्णो निरगाद् ध्वनिः स्वायम्भुवान्मुखात् ॥८३॥

हूँ ॥७३॥ हे प्रभो, आपके द्वारा दिखलाये हुए मार्गकी उपासना कर मोक्ष प्राप्त करनेकी इच्छा करनेवाले और देव मानकर आपकी ही उपासना करनेवाले हमलोगोपर प्रसन्न हूजिये और अनुग्रह कीजिये ॥७४॥ हे भगवन्, इस प्रकार लोकोत्तर वैभवको धारण करनेवाले आपकी स्तुति कर हम लोग यही चाहते है कि हम लोगोकी बड़ी भारी भक्ति आपमें ही रहे, इसके सिवाय हम और कुछ नही चाहते ॥७५॥

इस प्रकार स्तुति कर चुकनेपर जिसे देवोके समूह आश्चर्यसहित नेत्रोंसे देख रहे थे ऐसे महाराज भरत श्रीमण्डपमे प्रवेश कर वहां अपनी योग्य सभामे जा बैठे ॥७६॥ तदनन्तर भगवान्से प्रबोध प्राप्त करनेकी इच्छा करनेवाला वह सभारूपी सरोवर जब हाथरूपी कुड्मल जोड़कर शान्त हो गया–जब सब लोग तत्त्वोंका स्वरूप जाननेकी इच्छासे हाथ जोडकर चुपचाप बैठ गये तब भगवान् वृषभदेवसे तत्त्वोंका स्वरूप जाननेकी इच्छा करनेवाले महाराज भरतने विनयसे मस्तक झुकाकर प्रीतिपूर्वक ऐसी प्रार्थना की ॥७७–७८॥ हे भगवन्, तत्त्वोंका विस्तार कैसा है ? मार्ग कैसा है ? और उसका फल भी कैसा है ? हे तत्त्वोंके जाननेवालोंमे श्रेष्ठ, मै आपसे यह सब सुनना चाहता हूँ ॥७९॥ इस प्रकार भरतका प्रश्न समाप्त होनेपर प्रथम तीर्थंकर भगवान् वृषभदेवने अतिशय गम्भीर वाणीके द्वारा तत्त्वोंका विस्तारके साथ विवेचन किया ॥८०॥ कहते समय भगवान्के मुखकमलपर कुछ भी विकार उत्पन्न नही हुआ था सो ठीक है, क्योंकि पदार्थोको प्रकाशित करते समय क्या दर्पणमे कुछ विकार उत्पन्न होता है ? अर्थात् नही होता ॥८१॥ उस समय भगवान्के न तो तालु ओठ आदि स्थान ही हिलते थे और न उनके मुखकी कान्ति ही बदलती थी । तथा जो अक्षर उनके मुखसे निकल रहे थे उन्होंने प्रयत्नको छुआ भी नही था –इन्द्रियोंपर आघात किये बिना ही निकल रहे थे ॥८२॥ जिसमें सब अक्षर स्पष्ट है ऐसी वह दिव्यध्वनि भगवान्के मुखसे इस प्रकार निकल रही थी जिस प्रकार कि किसी पर्वतकी गुफाके अग्रभागसे प्रतिध्वनि निकलती है ॥८३॥

---

१ सेवमानान् । २ प्रार्थयेऽहम् । ३ स्तुत्यवसाने । ४ भर्तुःसकाशात् । ५ तत्त्व ज्ञातुमिच्छुना । तत्त्वं जिज्ञासुना- ल०, द०, इ । ६ श्रोतु– इ०, ल० । ७ प्रश्नावसाने । ८ विस्तारयामास । ९ इन्द्रियप्रयत्नरहिता इत्यर्थः । १० प्रतिध्वानरवः ।

विवक्षा[1]मन्तरेणास्य वि[2]विक्तासीत् सरस्वती । महीं[3]यसामचिन्त्या हि योगजाः[4] शक्तिसम्पदः ॥८४॥
आयुष्मन् शृणु तत्त्वार्थान् वक्ष्यमाणाननुक्रमात् । जीवादीन् कालपर्यन्तान् सप्रभेदान् सपर्ययान् ॥८५॥
जीवादीनां पदार्थानां याथात्म्यं[5] तत्त्वमिष्यते । सम्यग्ज्ञानाङ्गमेतद्धि विद्धि [6]सिद्ध्यङ्गमङ्गिनाम् ॥८६॥
तदेकं तत्त्वसामान्याज्जीवाजीवाविति द्विधा । त्रिधा मुक्तेतराजीवविभागात्परिकीर्त्यते ॥८७॥
जीवो मुक्तश्च संसारी संसार्यात्मा द्विधा मतः । भव्योऽभव्यश्च साजीवास्ते चतुर्धा[7] विभाविताः ॥८८॥
मुक्तेतरात्मको जीवो मूर्तामूर्तात्मकः परः[8] । इति वा तस्य तत्त्वस्य चातुर्विध्यं विनिश्चितम् ॥८९॥
पञ्चास्तिकायभेदेन तत्तत्त्वं पञ्चधा स्मृतम् । ते जीवपुद्गलाकाशधर्माधर्माः सपर्ययाः[9] ॥९०॥
त एव[9] कालसंयुक्ताः षोढा तत्त्वस्य भेदकाः । इत्यनन्तो भवेदस्य प्रस्तारो विस्तरैषिणाम्[10] ॥९१॥
चेतनालक्षणो जीवः सोऽनादिनिधनस्थितिः । ज्ञाता द्रष्टा च कर्ता च भोक्ता देहप्रमाणकः ॥९२॥
गुणवान् कर्मनिर्मुक्तावूर्ध्वव्र[11]ज्यास्वभावकः । परिण[12]न्तोपसंहारविसर्पाभ्यां प्रदीपवत् ॥९३॥

भगवान्‌की वह वाणी बोलनेकी इच्छाके बिना ही प्रकट हो रही थी सो ठीक ही है क्योंकि योगवलसे उत्पन्न हुई महापुरुषोंकी शक्तिरूपी सम्पदाएं अचिन्तनीय होती हैं– उनके प्रभुत्वका कोई चिन्तवन नही कर सकता ॥८४॥ भगवान् कहने लगे कि हे आयुष्मन्, जिनका स्वरूप आगे अनुक्रमसे कहा जावेगा, ऐसे भेद प्रभेदों तथा पर्यायोंसे सहित जीव पुद्गल, धर्म, अधर्म, आकाश और काल इन द्रव्योंको तू सुन ॥८५॥ जीव आदि पदार्थोंका यथार्थ स्वरूप ही तत्त्व कहलाता है, यह तत्त्व ही सम्यग्ज्ञानका अग अर्थात् कारण है और यही जीवोंकी मुक्तिका अंग है ॥८६॥ वह तत्त्व सामान्य रीतिसे एक प्रकारका है, जीव और अजीवके भेदसे दो प्रकारका है, तथा जीवोंके ससारी और मुक्त इस प्रकार दो भेद करनेसे ससारी जीव, मुक्त जीव और अजीव इस प्रकार तीन भेदवाला भी कहा जाता है ॥८७॥ संसारी जीव दो प्रकारके माने गये हैं एक भव्य और दूसरा अभव्य, इसलिये मुक्त जीव, भव्य जीव, अभव्य जीव और अजीव इस तरह वह तत्त्व चार प्रकारका भी माना गया है ॥८८॥ अथवा जीवके दो भेद हैं एक मुक्त और दूसरा संसारी, इसी प्रकार अजीवके भी दो भेद हैं एक मूर्तिक और दूसरा अमूर्तिक दोनोंको मिला देनेसे भी तत्त्वके चार भेद निश्चित किये गये हैं ॥८९॥ पांच अस्तिकायोंके भेदसे वह तत्त्व पांच प्रकारका भी स्मरण किया गया है। अपनी अपनी पर्यायों सहित जीवास्तिकाय, पुद्गलास्तिकाय, आकाशास्तिकाय, धर्मास्तिकाय और अधर्मास्तिकाय ये पांच अस्तिकाय कहे जाते हैं, ॥९०॥ उन्ही पाच अस्तिकायोंमें कालके मिला देनेसे तत्त्वके छह भेद भी हो जाते है इस प्रकार विस्तारपूर्वक जाननेकी इच्छा करनेवालोंके लिये तत्त्वोंका विस्तार अनन्त भेदवाला हो सकता है ॥९१॥ जिसमें चेतना अर्थात् जानने-देखनेकी शक्ति पाई जावे उसे जीव कहते हैं, वह अनादि निधन है अर्थात् द्रव्य-दृष्टिकी अपेक्षा न तो वह कभी उत्पन्न हुआ है और न कभी नष्ट ही होगा। इसके सिवाय वह ज्ञाता है– ज्ञानोपयोगसे सहित है, द्रष्टा है–दर्शनोपयोगसे युक्त है, कर्ता है–द्रव्यकर्म और कर्मोंको करनेवाला है, भोक्ता है–ज्ञानादि गुण तथा शुभ-अशुभ कर्मोंके फलको भोगनेवाला है और शरीरके प्रमाणके बराबर है–सर्वव्यापक और अणुरूप नही है ॥९२॥ वह अनेक गुणोंसे युक्त है, कर्मोंका सर्वथा नाश हो जानेपर ऊर्ध्वगमन करना उसका

१ वक्तुमिच्छया विना । २ निश्चिता । ३ अतिशयेन महताम् । ४ ध्यानजाताः । ५ निश्चयस्वरूपम् । ६ मोक्षकारणम् । ७ भव्यससारी, अभव्यससारी, मुक्तः, अजीवश्चेति । ८ अजीवः । ९ ते पञ्चास्तिकाया एव । १० विस्तरमिच्छताम् । ११ ऊर्ध्वगमन । १२ परिणमनशीलः ।

तस्येमे मार्गणोपाया[1] गत्याद्य उदाहृताः । चतुर्दशगुणस्थानैः सो[2]ऽत्र मृग्यः[3] सदादिभिः[4] ॥९४॥
गतीन्द्रिये च कायश्च योगवेदकषायकाः । ज्ञानसंयमदृग्लेश्या भव्यसम्यक्त्वसञ्ज्ञिनः ॥९५॥
सममाहारकेण स्युः मार्गणस्थानकानि वै । [5]सोऽन्वेष्य[6]स्तेषु सत्सङ्ख्याद्यनु[7]योगैर्विशेषतः ॥९६॥
[8]सत्सङ्ख्याक्षेत्रसंस्पर्शकालभावान्तरै रयम् । बहुत्वाल्पत्वतश्चात्मा[10] मृग्यः स्यात् स्मृतिचक्षुषाम्[11] ॥९७॥
स्युरिमेऽधिगमोपाया[12] जीवस्याधिगमः पुनः । प्रमाणनयनिक्षेपैः अवसेयो[13] मनीषिभिः ॥९८॥
[14]तस्यौपशमिको भावः क्षायिको मिश्र एव च । स्व[15]तत्त्वमुदयोत्थश्च पारिणामिक इत्यपि ॥९९॥
निश्चितो यो गुणैरेभिः स जीव इति लक्ष्यताम् । द्वेधा तस्योपयोगः स्याज्ज्ञानदर्शनभेदतः ॥१००॥
ज्ञानमष्टतय[16] ज्ञेयं दर्शनञ्च [17]चतुष्टयम् । साकारं ज्ञानमुद्दिष्टम् अनाकारञ्च दर्शनम् ॥१०१॥
भेदग्रहणमाकारः प्रतिकर्मव्यवस्थया[18] । सामान्यमात्रनिर्भासाद् अनाकारं तु दर्शनम् ॥१०२॥

स्वभाव है और वह दीपकके प्रकाशकी तरह सकोच तथा विस्ताररूप परिणमन करनेवाला है । भावार्थ–नामकर्मके उदयसे उसे जितना छोटा बड़ा शरीर प्राप्त होता है वह उतना ही संकोच विस्ताररूप हो जाता है ॥९३॥ उस जीवका अन्वेषण करनेके लिये गति आदि चौदह मार्गणाओंका निरूपण किया गया है । इसी प्रकार चौदह गुणस्थान और सत्सख्या आदि अनुयोगोंके द्वारा भी वह जीव तत्त्व अन्वेषण करनेके योग्य है । भावार्थ–मार्गणाओं, गुणस्थानों और सत्संख्या आदि अनुयोगोंके द्वारा जीवका स्वरूप समझा जाता है ॥९४॥ गति, इन्द्रिय, काय, योग, वेद, कषाय, ज्ञान, सयम, दर्शन, लेश्या, भव्यत्व, सम्यक्त्व, सज्ञित्व और आहारक ये चौदह मार्गणास्थान हैं । इन मार्गणास्थानोमे सत्सख्या आदि अनुयोगोंके द्वारा विशेषरूपसे जीवका अन्वेषण करना चाहिये–उसका स्वरूप जानना चाहिये ॥९५–९६॥ सिद्धान्तशास्त्ररूपी नेत्रको धारण करनेवाले भव्य जीवोंको सत्, सख्या, क्षेत्र, स्पर्शन, काल, भाव, अन्तर, अल्पबहुत्व इन आठ अनुयोगोंके द्वारा जीवतत्त्वका अन्वेषण करना चाहिये ॥९७॥ इस प्रकार ये जीवतत्त्वके जाननेके उपाय हैं । इनके सिवाय विद्वानोंको प्रमाण नय और निक्षेपोंके द्वारा भी जीवतत्त्वका निश्चय करना चाहिये–उसका स्वरूप जानकर दृढ़ प्रतीति करना चाहिये ॥९८॥ औपशमिक, क्षायिक, क्षायोपशमिक, औदयिक और पारिणामिक ये पांच भाव जीवके निजतत्त्व कहलाते हैं, इन गुणोंसे जिसका निश्चय किया जावे उसे जीव जानना चाहिये । उस जीवका उपयोग ज्ञान और दर्शनके भेदसे दो प्रकारका होता है ॥९९–१००॥ इन दोनों प्रकारके उपयोगोंमेसे ज्ञानोपयोग आठ प्रकारका और दर्शनोपयोग चार प्रकारका जानना चाहिये । जो उपयोग साकार है अर्थात् विकल्पसहित पदार्थको जानता है उसे ज्ञानोपयोग कहते हैं और जो अनाकार है–विकल्परहित पदार्थको जानता है उसे दर्शनोपयोग कहते हैं ॥१०१॥ घटपट आदिकी व्यवस्था लिये हुए किसी वस्तुके भेदग्रहण करनेको आकार कहते हैं और सामान्यरूप ग्रहण करनेको अनाकार कहते हैं । ज्ञानोपयोग वस्तुको भेदपूर्वक ग्रहण करता है इसलिये वह साकार–सविकल्पक उपयोग कहलाता है और

१ विचारोपायाः । २ तत्त्वविचारविषये । ३ विचार्यः । ४ सत्संख्याक्षेत्रादिभिः । ५ जीवः । ६ अन्वेष्टु योग्यः । विचार्य इत्यर्थः । ७ प्रश्नैः । विचारैरित्यर्थः । ८ सदित्यस्तित्वनिदशः । संख्या भेदगणना । क्षेत्रं वर्तमानकालविषयो निवासः । सस्पर्शः त्रिकालगोचरम् तत्क्षेत्रमेव । कालः वर्तनालक्षण. । भावः औपशामिकादिलक्षणः । अन्तरः विरहकालः । ९ अन्योन्यापेक्षया विशेषप्रतिपत्तितः । १० एतैरयमात्मा मृग्यः विचारणीयः । ११ आगमचक्षुषाम् । १२ विज्ञानोपायाः । १३ निश्चेयः । १४ जीवस्य । १५ स्वस्वभावः । १६ मतिज्ञातादिपञ्चकं कुमतिकुश्रुतिविभङ्गाश्चेत्यष्टप्रकारम् । १७ चक्षुरचक्षुरवधिकेवलदर्शनमिति । १८ प्रतिविषयनियत्या ।

जीवः प्राणी च जन्तुश्च क्षेत्रज्ञः पुरुषस्तथा। पुमानात्मान्तरात्मा च ज्ञो ज्ञानीत्यस्य पर्ययाः ॥१०३॥
यतो जीवत्यजीवीच्च जीविष्यति च जन्मसु। ततो जीवोऽयमाम्नातः सिद्धः स्तात्[1]द्भूतपूर्वतः[2] ॥१०४॥
प्राणा दशास्य सन्तीति प्राणी जन्तुश्च जन्मभाक्। क्षेत्रं स्वरूपमस्य स्यात्तज्ज्ञानात् स तथोच्यते[3] ॥१०५॥
पुरुषः पुरु[4]भोगेषु शयनात् परिभाषितः। पुनात्यात्मानमिति च पुमानिति निगद्यते ॥१०६॥
भवेष्वतति[5] सातत्याद् एतीत्यात्मा निरुच्यते। सोऽन्तरात्माष्टकर्मान्तर्वतित्वादभिलप्यते ॥१०७॥
ज्ञः स्याज्ज्ञानगुणोपेतो ज्ञानी च तत एव सः। पर्यायशब्दैरेभिस्तु नि[6]र्णेयोऽन्यैश्च तद्विधैः ॥१०८॥
शाश्वतोयं भवेज्जीवः पर्यायस्तु पृथक् पृथक्। मृद्द्रव्यस्येव पर्यायैस्तस्योत्पत्ति[7]विपत्तयः ॥१०९॥
अभूत्वाभाव उत्पादो भूत्वा चाभवनं व्ययः। ध्रौव्यन्तु तादवस्थ्यं[8] स्यात् एवमात्मा त्रिलक्षणः ॥११०॥
एवं धर्माणमात्मानम् अजानानाः कुदृष्टयः। बहुधात्र विमन्वाना[9] विवदन्ते[10] परस्परम् ॥१११॥

दर्शनोपयोग वस्तुको सामान्यरूपसे ग्रहण करता है इसलिये वह अनाकार–अविकल्पिक उपयोग कहलाता है ॥१०२॥ जीव, प्राणी, जन्तु, क्षेत्रज्ञ, पुरुष, पुमान्, आत्मा, अन्तरात्मा, ज्ञ और ज्ञानी ये सब जीवके पर्यायवाचक शब्द हैं ॥१०३॥ चूँकि यह जीव वर्तमान कालमें जीवित है, भूतकालमें भी जीवित था और अनागत कालमें भी अनेक जन्मोंमें जीवित रहेगा इसलिये इसे जीव कहते हैं। सिद्ध भगवान् अपनी पूर्वपर्यायोंमें जीवित थे इसलिये वे भी जीव कहलाते हैं ॥१०४॥ पांच इन्द्रिय, तीन बल, आयु और श्वासोच्छ्वास ये दश प्राण इस जीवके विद्यमान रहते हैं इसलिये यह प्राणी कहलाता है, यह बार बार अनेक जन्म धारण करता है इसलिये जन्तु कहलाता है, इसके स्वरूपको क्षेत्र कहते हैं और यह उसे जानता है इसलिये क्षेत्रज्ञ भी कहलाता है ॥१०५॥ पुरु अर्थात् अच्छे अच्छे भोगोंमें शयन अर्थात् प्रवृत्ति करनेसे यह पुरुष कहा जाता है और अपने आत्माको पवित्र करता है। इसलिये पुमान् भी कहा जाता है ॥१०६॥ यह जीव नर नारकादि पर्यायोंमें अतति अर्थात् निरन्तर गमन करता रहता है इसलिये आत्मा कहलाता है और ज्ञानावरणादि आठ कर्मोंके अन्तर्वर्ती होनेसे अन्तरात्मा भी कहा जाता है ॥१०७॥ यह जीव ज्ञानगुणसे सहित है इसलिये ज्ञ कहलाता है और इसी कारण ज्ञानी भी कहा जाता है, इस प्रकार यह जीव ऊपर कहे हुए पर्याय शब्दों तथा उन्हींके समान अन्य अनेक शब्दोंसे जाननेके योग्य है ॥१०८॥ यह जीव नित्य है परन्तु उसकी नर नारकादि पर्याय जुदी जुदी है। जिस प्रकार मिट्टी नित्य है परन्तु पर्यायोंकी अपेक्षा उसका उत्पाद और विनाश होता रहता है उसी प्रकार यह जीव नित्य है परन्तु पर्यायोंकी अपेक्षा उसमें भी उत्पाद और विनाश होता रहता है। भावार्थ–द्रव्यत्व सामान्यकी अपेक्षा जीव द्रव्य नित्य है और पर्यायोंकी अपेक्षा अनित्य है। एक साथ दोनों अपेक्षाओंसे यह जीव उत्पाद-व्यय और ध्रौव्यरूप है ॥१०९॥ जो पर्याय पहले नहीं थी उसका उत्पन्न होना उत्पाद कहलाता है, किसी पर्यायका उत्पाद होकर नष्ट हो जाना व्यय कहलाता है और दोनों पर्यायोंमें तदवस्थ होकर रहना ध्रौव्य कहलाता है इस प्रकार यह आत्मा उत्पाद, व्यय तथा ध्रौव्य इन तीनों लक्षणोंसे सहित है ॥११०॥ ऊपर कहे हुए स्वभावसे युक्त आत्माको नहीं जानते हुए मिथ्यादृष्टि पुरुष उसका स्वरूप अनेक

१ भवेत्। २ पूर्वस्मिन् काले जीवनात्। ३ क्षेत्रज्ञ इत्युच्यते। ४ बहु। ५ अतति इति कोऽर्थः। सातत्यात् अनिःस्यूतवृत्त्यातिगच्छतीत्यर्थः। ६ निर्ज्ञेयोऽन्यैश्च। ७ उत्पत्तिनाशाः। ८ उत्पत्तिव्यययोः स्थितिः। ९ विपरीत मन्वानाः। १० विपरीतं जानन्ति।

नास्त्यात्मेत्याहुरेकेऽन्ये सोऽस्त्यनित्य इति स्थिताः । न कर्तेत्यपरे केचिद् अभोक्तेति च दुर्दृशः ॥११२॥
अस्त्यात्मा किन्तु मोक्षोऽस्य नास्तीत्येके विमन्वते । मोक्षोऽस्ति तदुपायस्तु नास्तीतीच्छन्ति केचन ॥११३॥
इत्यादि दुर्णयानेतान् अपास्य सुनया[१]न्वयात् । यथोक्तलक्षणं जीवं त्वमायुष्मन्विनिश्चिनु ॥११४॥
संसारश्चैव मोक्षश्च [२]तस्यावस्थाद्वयं मतम् । संसारश्चतु[३]रङ्गेऽस्मिन् भवावर्ते विवर्तनम् ॥११५॥
निःशेषकर्मनिर्मोक्षो मोक्षोऽनन्तसुखात्मकः । सम्यग्विशेषणज्ञानदृष्टिचारित्रसाधनः ॥११६॥
आप्तागमपदार्थानां श्रद्धानं परया मुदा । सम्यग्दर्शनमाम्नातं प्रथमं मुक्तिसाधनम् ॥११७॥
ज्ञानं जीवादिभावानां याथात्म्यस्य प्रकाशकम् । अज्ञानध्वान्तसन्तानप्रक्षयानन्तरोद्भवम् ॥११८॥
माध्यस्थलक्षणं प्राहुश्चारित्रं वितृषो मुनेः । मोक्षकामस्य निर्मुक्तचेलस्याहिंसकस्य तत् ॥११९॥
त्रयं समुदितं[४] मुक्तेः साधनं दर्शनादिकम् । नैकाङ्गविकलत्वेपि तत्स्वकार्यकृदिष्यते ॥१२०॥
सत्येव दर्शने ज्ञानं चारित्रञ्च फलप्रदम् । ज्ञानञ्च दृष्टिस[५]च्चर्यासान्निध्ये मुक्तिकारणम् ॥१२१॥
चारित्रं दर्शनज्ञानविकलं नार्थकृन्मतम् । [६]प्रपातायैव [७]तद्धि स्याद् अन्धस्येव [८]विवल्गितम् ॥१२२॥

प्रकारसे मानते है और परस्परमे विवाद करते है ॥१११॥ कितने ही मिथ्यादृष्टि कहते है कि आत्मा नामका पदार्थ ही नही है, कोई कहते है कि वह अनित्य है, कोई कहते हैं कि वह कर्ता नही है, कोई कहते है कि वह भोक्ता नही है, कोई कहते है कि आत्मा नामका पदार्थ है तो सही परन्तु उसका मोक्ष नही है, और कोई कहते है कि मोक्ष भी होता है परन्तु मोक्ष प्राप्तिका कुछ उपाय नही है इसलिये हे आयुष्मन् भरत, ऊपर कहे हुए इन अनेक मिथ्या नयोको छोडकर समीचीन नयोके अनुसार जिसका लक्षण कहा गया है ऐसे जीवतत्त्वका तू निश्चय कर ॥११२–११४॥ उस जीवकी दो अवस्थाये मानी गई हैं एक ससार और दूसरी मोक्ष । नरक, तिर्यञ्च, मनुष्य और देव इन चार भेदोसे युक्त ससाररूपी भॅवरमे परिभ्रमण करना ससार कहलाता है ॥११५॥ और समस्त कर्मोका बिलकुल ही क्षय हो जाना मोक्ष कहलाता है वह मोक्ष अनन्तसुख स्वरूप है तथा सम्यग्दर्शन सम्यग्ज्ञान और सम्यग्चारित्र रूप साधनसे प्राप्त होता है ॥११६॥ सच्चे देव, सच्चे शास्त्र और समीचीन पदार्थोका बड़ी प्रसन्नतापूर्वक श्रद्धान करना सम्यग्दर्शन माना गया है, यह सम्यग्दर्शन मोक्षप्राप्तिका पहला साधन है ॥११७॥ जीव, अजीव आदि पदार्थोके यथार्थस्वरूपको प्रकाशित करनेवाला तथा अज्ञानरूपी अन्धकारकी परम्पराके नष्ट हो जानेके बाद उत्पन्न होनेवाला जो ज्ञान है वह सम्यग्ज्ञान कहलाता है ॥११८॥ इष्ट-अनिष्ट पदार्थोमे समताभाव धारण करनेको सम्यक्चारित्र कहते हैं, वह सम्यक्चारित्र यथार्थरूपसे तृष्णारहित, मोक्षकी इच्छा करनेवाले, वस्त्ररहित और हिसाका सर्वथा त्याग करनेवाले मुनिराजके ही होता है ॥११९॥ सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र ये तीनों मिलकर ही मोक्षके कारण कहे गये है यदि इनमेसे एक भी अगकी कमी हुई तो वह अपना कार्य सिद्ध करनेमे समर्थ नही हो सकते ॥१२०॥ सम्यग्दर्शनके होते हुए ही ज्ञान और चारित्र फलके देनेवाले होते हैं इसी प्रकार सम्यग्दर्शन और सम्यक्चारित्रके रहते हुए ही सम्यग्ज्ञान मोक्षका कारण होता है ॥१२१॥ सम्यग्दर्शन और सम्यग्ज्ञानसे रहित चारित्र कुछ भी कार्यकारी नही होता किन्तु जिस प्रकार अन्धे पुरुषका दौड़ना उसके पतनका कारण होता है उसी प्रकार सम्यग्दर्शन और सम्यग्ज्ञानसे शून्य पुरुषका चारित्र भी उसके पतन अर्थात् नरकादि गतियोंमें परिभ्रमणका कारण होता

१ सुनयानुगमात् । २ जीवस्य । ३ चतुरवयवे । ४ समुदायीकृतम् । ५ दर्शनचारित्रसामीप्ये सति । ६ नरकादिगतौ पतनायैव । ७ दर्शनविकलचारित्रम् । ८ वल्गनमुत्पतनम् ।

[1]त्रिष्वेकद्वयविश्लेषाद्[2] उद्भूता मार्गदुर्णयाः । षोढा भवन्ति मूढानां तेऽप्यत्र विनिपातिताः[3] ॥१२३॥
[4]इतो नाधिकमस्त्यन्यत् नाभून्नैव भविष्यति । इत्याप्तादित्रये दार्ढ्याद् दर्शनस्य विशुद्धता ॥१२४॥
आप्तो गुणैर्युतो धूतकलङ्को निर्मलाशयः । निष्ठितार्थो भवेत् [5]सार्वस्तदाभासास्ततोऽपरे ॥१२५॥
आगमस्तद्वचोऽशेषपुरुषार्थानुशासनम् । नयप्रमाणगम्भीरं तदाभासोऽसतां वचः ॥१२६॥
पदार्थस्तु द्विधा ज्ञेयो जीवाजीवविभागतः । यथोक्तलक्षणो जीवस्त्रिकोटि[6]परिणामभाक् ॥१२७॥
भव्याभव्यौ तथा मुक्त इति जीवस्त्रिधोदितः । भविष्यत्सिद्धिको भव्यः सुवर्णोपलसन्निभः ॥१२८॥
अभव्यस्तद्विपक्षः स्याद् अन्धपाषाणसन्निभः । मुक्तिकारणसामग्री न [7]तस्यास्ति कदाचन ॥१२९॥
कर्मबन्धननिर्मुक्तस्त्रिलोकशिखरालयः । सिद्धो निरञ्जनः प्रोक्तः प्राप्तानन्तसुखोदयः ॥१३०॥

है ॥१२२॥ इन तीनोंमेसे कोई तो अलग अलग एक एकसे मोक्ष मानते है और कोई दो दोसे मोक्ष मानते हैं इस प्रकार मूर्ख लोगोंने मोक्षमार्गके विषयमें छह प्रकारके मिथ्या-नयोंकी कल्पना की है परन्तु इस उपर्युक्त कथनसे उन सभीका खण्डन हो जाता है। भावार्थ–कोई केवल दर्शनसे, कोई ज्ञानमात्रसे, कोई मात्र चारित्रसे, कोई दर्शन और ज्ञान दो से, कोई दर्शन और चारित्र इन दोसे और कोई ज्ञान तथा चारित्र इन दोसे मोक्ष मानते है इस प्रकार मोक्षमार्गके विषयमे छह प्रकारके मिथ्यानयकी कल्पना करते है परन्तु उनकी यह कल्पना ठीक नही है क्योंकि तीनोंकी एकतासे ही मोक्षकी प्राप्ति हो सकती है ॥१२३॥ जैनधर्ममें आप्त, आगम तथा पदार्थका जो स्वरूप कहा गया है उससे अधिक वा कम न तो है न था और न आगे ही होगा। इस प्रकार आप्त आदि तीनोंके विषयमे श्रद्धानकी दृढता होनेसे सम्यग्दर्शनमे विशुद्धता उत्पन्न होती है ॥१२४॥ जो अनन्तज्ञान आदि गुणोंसे सहित हो, घातिया कर्मरूपी कलकसे रहित हो, निर्मल आशयका धारक हो, कृतकृत्य हो और सबका भला करनेवाला हो वह आप्त कहलाता है। इसके सिवाय अन्य देव आप्ताभास कहलाते है ॥१२५॥ जो आप्तका कहा हुआ हो, समस्त पुरुषार्थोका वर्णन करनेवाला हो और नय तथा प्रमाणोंसे गंभीर हो उसे आगम कहते है, इसके अतिरिक्त असत्पुरुषोंके वचन आगमाभास कहलाते है ॥१२६॥ जीव और अजीवके भेदसे पदार्थके दो भेद जानना चाहिये। उनमेंसे जिसका चेतनारूप लक्षण ऊपर कहा जा चुका है और जो उत्पाद व्यय तथा ध्रौव्यरूप तीन प्रकारके परिणमनसे युक्त है वह जीव कहलाता है ॥१२७॥ भव्य-अभव्य और मुक्त इस प्रकार जीवके तीन भेद कहे गये है, जिसे आगामी कालमें सिद्धि प्राप्त हो सके उसे भव्य कहते है, भव्य जीव सुवर्ण पाषाणके समान होता है अर्थात् जिस प्रकार निमित्त मिलने पर सुवर्णपाषाण आगे चलकर शुद्ध सुवर्णरूप हो जाता है उसी प्रकार भव्यजीव भी निमित्त मिलने पर शुद्ध-सिद्धस्वरूप हो जाता है ॥१२८॥ जो भव्यजीवसे विपरीत है अर्थात् जिसे कभी भी सिद्धि की प्राप्ति न हो सके उसे अभव्य कहते हैं, अभव्यजीव अन्धपाषाणके समान होता है अर्थात् जिस प्रकार अन्धपाषाण कभी भी सुवर्णरूप नही हो सकता उसी प्रकार अभव्य जीव भी कभी सिद्धस्वरूप नहीं हो सकता। अभव्य जीवको मोक्ष प्राप्त होनेकी सामग्री कभी भी प्राप्त नही होती है ॥१२९॥ और जो कर्मबन्धनसे छूट चुके हैं, तीनों लोकोंका

---

१ दर्शनज्ञानचारित्रेषु । २ केचिद्दर्शनं मुक्त्वाऽन्ये ज्ञानं विहाय परे चारित्रं विना द्वाभ्यामेव मोक्षमिति वदन्ति। द्वयविशेषात्। अन्ये ज्ञानादेव, दर्शनादेव, चारित्रादेव मोक्षमिति वदन्ति इति मार्गदुर्नयाः षट्प्रकाराः भवन्ति। ३ निराकृताः। ४ यथोक्ताप्तादित्रयात्। ५ सर्वहितः। ६ उत्पत्तिस्थितिप्रलयरूपपरिणमनभाक्। ७ अभव्यस्य।

इति जीवपदार्थस्ते संक्षेपेण निरूपितः । अजीवतत्त्वमप्येवम् अवधारय धीधन ॥१३१॥
अजीवलक्षणं तत्त्वं पञ्चधैव प्रपञ्च्यते । धर्माधर्मवियाकाशं कालः पुद्गल इत्यपि ॥१३२॥
जीवपुद्गलयोर्यत्स्याद् गत्युपग्रहका[1]रणम् । धर्मद्रव्यं तदुद्दिष्टम् अधर्मः स्थित्युपग्रहः[2] ॥१३३॥
गतिस्थि[3]तिमतामेतौ गतिस्थित्योरुपग्रहे । धर्माधर्मौ प्रवर्तेते न स्वयं प्रेरकौ मतौ ॥१३४॥
यथा मत्स्यस्य गमनं विना नवाम्भसा भवेत् । न चाम्भः प्रेरयत्येनं तथा [4]धर्मास्त्यनुग्रहः ॥१३५॥
तरुच्छाया यथा मर्त्यं स्थापयत्यर्थिनं स्वतः । न त्वेषा प्रेरयत्येनमथ[5] च स्थितिकारणम् ॥१३६॥
तथैवाधर्मकायोपि जीवपुद्गलयोः स्थितिम् । निवर्तयत्युदासीनो न स्वयं प्रेरकः स्थितेः ॥१३७॥
जीवादीनां पदार्थानाम् अवगाहनलक्षणम् । यत्तदाकाशमस्पर्शम् अमूर्तं व्यापि निष्क्रियम् ॥१३८॥
वर्तनालक्षणः कालो वर्तना स्वप[6]राश्रया । यथास्वं गुणपर्यायैः [7]परिणन्तृत्वयोजना ॥१३९॥
यथा कुलालचक्रस्य भ्रमणेऽधःशिला स्वयम् । धत्ते निमित्ततामेवं कालोऽपि कलितो बुधैः ॥१४०॥

शिखर ही जिनका स्थान है, जो कर्म कालिमासे रहित है और जिन्हे अनन्तसुखका अभ्युदय प्राप्त हुआ है ऐसे सिद्ध परमेष्ठी मुक्त जीव कहलाते हैं ॥१३०॥ इस प्रकार हे वुद्धिरूपी धनको धारण करनेवाले भरत, मैंने तेरे लिये सक्षेपसे जीवतत्त्वका निरूपण किया है अब इसी तरह अजीवतत्त्वका भी निश्चय कर ॥१३१॥ धर्म, अधर्म, आकाश और पुद्गल इस प्रकार अजीवतत्त्वका पॉच भेदों द्वारा विस्तार निरूपण किया जाता है ॥१३२॥ जो जीव और पुद्गलोंके गमनमे सहायक कारण हो उसे धर्म कहते है और जो उन्हींके स्थित होनेमे सहकारी कारण हो उसे अधर्म कहते हैं ॥१३३॥ धर्म और अधर्म ये दोनों ही पदार्थ अपनी इच्छासे गमन करते और ठहरते हुए जीव तथा पुद्गलोंके गमन करने और ठहरनेमें सहायक होकर प्रवृत्त होते है स्वय किसीको प्रेरित नही करते हैं ॥१३४॥ जिस प्रकार जलके बिना मछलीका गमन नही हो सकता फिर भी जल मछलीको प्रेरित नहीं करता उसी प्रकार जीव और पुद्गल धर्मके बिना नही चल सकते फिर भी धर्म उन्हे चलने के लिये प्रेरित नही करता किन्तु जिस प्रकार जल चलते समय मछलीको सहारा दिया करता है उसी प्रकार धर्म पदार्थ भी जीव और पुद्गलोंको चलते समय सहारा दिया करता है ॥१३५॥ जिस प्रकार वृक्षकी छाया स्वयं ठहरनेकी इच्छा करनेवाले पुरुषको ठहरा देती है—उसके ठहरनेमें सहायता करती है परन्तु वह स्वय उस पुरुषको प्रेरित नही करती तथा इतना होनेपर भी वह उस पुरुषके ठहरनेकी कारण कहलाती है उसी प्रकार अधर्मास्तिकाय भी उदासीन होकर जीव और पुद्गलोंको स्थित करा देता है—उन्हें ठहरनेमे सहायता पहुँचाता है परन्तु स्वय ठहरनेकी प्रेरणा नही करता ॥१३६-१३७॥ जो जीव आदि पदार्थोंको ठहरनेके लिये स्थान दे उसे आकाश कहते हैं । वह आकाश स्पर्शरहित है, अमूर्तिक है, सब जगह व्याप्त है और क्रियारहित है ॥१३८॥ जिसका वर्तना लक्षण है उसे काल कहते हैं, वह वर्तना काल तथा कालसे भिन्न जीव आदि पदार्थोंके आश्रय रहती है और सब पदार्थोंका जो अपने अपने गुण तथा पर्यायरूप परिणमन होता है उसमें सहकारी कारण होती है ॥१३९॥ जिस प्रकार कुम्हारके चक्रके फिरनेमें उसके नीचे लगी हुई शिला कारण होती है उसी प्रकार कालद्रव्य भी सब पदार्थोंके परिवर्तनमें कारण होता है ऐसा विद्वान् लोगोंने निरूपण

---

१ गमनस्योपकारे कारणम् । २ स्थितेरुपकारः । ३ जीवपुद्गलानाम् । ४ धर्मास्तिकायस्योपकारः । धर्मेऽस्त्यनुग्रहः ल० । ५ मपि च । ६ स्वस्थकालस्य परस्य वस्तुन आश्रयो यस्याः सा । ७ परिणमनंतृत्वस्य योजनं यस्याः सा । परिणेतृत्व– ल० ।

व्यवहारात्मकात् कालान्मुख्यकालविनिर्णयः । [1]मुख्ये सत्येव गौणस्य बाह्लीकादेः[2] प्रतीतितः ॥१४१॥
स कालो लोकमात्रैः स्वैः अणुभिर्निचितः स्थितः । ज्ञेयोऽन्योन्यमसङ्कीर्णै रत्नानामिव राशिभिः ॥१४२॥
प्रदेशप्रचया[3]योगाद् अकायोऽयं प्रकीर्तितः । शेषाः पञ्चास्तिकायाः स्युः प्रदेशोपचितात्मकाः ॥१४३॥
धर्माधर्मवियत्कालपदार्था मूर्तिवर्जिताः । मूर्तिमत्पुद्गलद्रव्यं तस्य भेदानितः[4] शृणु ॥१४४॥

किया है । भावार्थ–कुम्हारका चक्र स्वय घूमता है परन्तु नीचे रखी हुई शिला या कीलके बिना वह घूम नही सकता इसी प्रकार समस्त पदार्थोमे परिणमन स्वयमेव होता है परन्तु वह परिणमन कालद्रव्यकी सहायताके बिना नही हो सकता इसलिये कालद्रव्य पदार्थोके परिणमनमें सहकारी कारण है ॥१४०॥ (वह काल दो प्रकारका है एक व्यवहार काल और दूसरा निश्चयकाल । घडी घंटा आदिको व्यवहारकाल कहते है और लोकाकाशके प्रत्येक प्रदेशपर रत्नोंकी राशिके समान एक दूसरेसे असपृक्त होकर रहनेवाले जो असख्यात कालाणु है उन्हे निश्चयकाल कहते है) व्यवहारकालसे ही निश्चयकालका निर्णय होता है, क्योंकि मुख्य पदार्थके रहते हुए ही वाह्लीक आदि गौण पदार्थोकी प्रतीति होती है ॥ भावार्थ– वाह्लीक एक देशका नाम है परन्तु उपचारसे वहाके मनुष्योंको भी वाह्लीक कहते है । यहां वाह्लीक शव्दका मख्य अर्थ देशविशेष है और गौण अर्थ है वहां पर रहनेवाला सदाचारसे पराङमुख मनुष्य । यदि देशविशेष अर्थको बतलानेवाला वाह्लीक नामका कोई मुख्य पदार्थ नही होता तो वहा रहनेवाले मनुष्योंमे भी वाह्लीक शब्दका व्यवहार नही होता इसी प्रकार यदि मुख्य काल द्रव्य नही होता तो व्यवहार-काल भी नही होता । हम लोग सूर्योदय और सूर्यास्त आदिके द्वारा दिन-रात महीना आदिका ज्ञान प्राप्त कर व्यवहारकालको समझ लेते है परन्तु अमूर्तिक निश्चयकालके समझनेमे हमे कठिनाई होती है इसलिये आचार्योंने व्यवहारकालके द्वारा निश्चयकालको समझनेका आदेश दिया है क्योंकि पर्यायके द्वारा ही पर्यायीका बोध हुआ करता है ॥१४१॥ वह निश्चयकाल लोकाकाशके प्रत्येक प्रदेशपर स्थित लोकप्रमाण (असख्यात) अपने अणुओसे जाना जाता है और कालके वे अणु रत्नोंकी राशिके समान परस्परमे एक दूसरेसे नही मिलते, सब जुदे जुदे ही रहते है ॥१४२॥ परस्परमें प्रदेशोंके नही मिलनेसे यह कालद्रव्य अकाय अर्थात् प्रदेशी कहलाता है । कालको छोडकर शेष पाच द्रव्योके प्रदेश एक दूसरेसे मिले हुए रहते है इसलिये वे अस्तिकाय कहलाते है । भावार्थ–जिसमें वहुप्रदेश हों उसे अस्तिकाय कहते है, जीव, पुद्गल, धर्म, अधर्म और आकाश ये द्रव्य वहुप्रदेशी होनेके कारण अस्तिकाय कहलाते हें और कालद्रव्य एकप्रदेशी होनेसे अनस्ति-काय कहलाता है ॥१४३॥ धर्म, अधर्म, आकाश और काल ये चार पदार्थ मूर्तिसे रहित है, पुद्गलद्रव्य मूर्तिक है । अब आगे उसके भेदोंका वर्णन सुन । भावार्थ–जीव द्रव्य भी अमूर्तिक है परन्तु यहां अजीव द्रव्योंका वर्णन चल रहा है इसलिये उसका निरूपण नही किया है । पांच इन्द्रियोंमेसे किसी भी इन्द्रियके द्वारा जिसका स्पष्ट ज्ञान हो उसे मूर्तिक कहते है, पुद्गलको छोडकर और किसी पदार्थका इन्द्रियोंके द्वारा स्पष्ट ज्ञान नही होता

---

१ सिंहो माणवक इत्येव । २ म्लेच्छजनादेः । ३ बहुप्रदेशाभावादित्यर्थः । ४ इतः परम् ।

वर्णगन्धरसस्पर्शयोगिनः पुद्गला मताः । पूरणाद् गलनाच्चैव सम्प्राप्तान्वर्थनामकाः ।।१४५।।
स्कन्धाणुभेदतो द्वेधा पुद्गलस्य व्यवस्थितिः । स्निग्धरूक्षात्मकाणूनां सङ्घातः स्कन्ध इष्यते ।।१४६।।
द्वयणुकादिर्महास्कन्धपर्यन्तस्तस्य विस्तरः । छायातपतमोज्योत्स्नापयोदादिप्रभेदभाक् ।।१४७।।
अणवः कार्यलिङ्गाः स्युः[1] द्विस्पर्शाः[2] परिमण्डलाः[3] । एकवर्णरसा नित्याः स्युरनित्याश्च पर्ययैः ।।१४८।।
सूक्ष्मसूक्ष्मास्तथा सूक्ष्माः सूक्ष्मस्थूलात्मकाः परे । स्थूलसूक्ष्मात्मकाः स्थूलाः स्थूलस्थूलाश्च पुद्गलाः१४९
सूक्ष्मसूक्ष्मोऽणुरेकः स्याद् अदृश्योऽस्पृश्य एव च । सूक्ष्मास्ते कर्मणास्कन्धाः[4] प्रदेशानन्त्ययोगतः[5] ।।१५०।
शब्दः स्पर्शो रसो गन्धः सूक्ष्मस्थूलो निगद्यते । [6]अचाक्षुषत्वे सत्येषाम् इन्द्रियग्राह्यतेक्षणात् ।।१५१।।
स्थूलसूक्ष्माः पुनर्ज्ञेयाश्छायाज्योत्स्नातपादयः । चाक्षुषत्वेऽप्यसंहार्य[7]रूपत्वादविघातकाः ।।१५२।।
द्रवद्रव्यं जलादि स्यात् स्थूलभेदनिदर्शनम् । स्थूलस्थूलः पृथिव्यादिर्भेद्यः स्कन्धः प्रकीर्तितः ।।१५३।।

इसलिये पुद्गलद्रव्य मूर्तिक है और शेष द्रव्य अमूर्तिक है ।।१४४।। जिसमे वर्ण, गन्ध, रस और स्पर्श पाया जावे उसे पुद्गल कहते है । पूरण और गलन रूप स्वभाव होनेसे पुद्गल यह नाम सार्थक है। भावार्थ–अन्य परमाणुओंका आकर मिल जाना पूरण कहलाता है और पहलेके परमाणुओंका बिछुड जाना गलन कहलाता है, पुद्गल स्कन्धोमे पूरण और गलन ये दोनों ही अवस्थाए होती रहती है, इसलिये उनका पुद्गल यह नाम सार्थक है ।।१४५।। स्कन्ध और परमाणुके भेदसे पुद्गलकी व्यवस्था दो प्रकारकी होती है । स्निग्ध और रूक्ष अणुओंका जो समुदाय है उसे स्कन्ध कहते है ।।१४६।। उस पुद्गल द्रव्य का विस्तार दो परमाणुवाले द्वयणुक स्कन्धसे लेकर अनन्तानन्त परमाणुवाले महास्कन्ध तक होता है । छाया, आतप, अन्धकार, चादनी, मेघ आदि सब उसके भेद-प्रभेद है ।।१४७।। परमाणु अत्यन्त सूक्ष्म होते है, वे इन्द्रियोंसे नही जाने जाते । घट पट आदि परमाणुओंके कार्य है उन्हींसे उनका अनुमान किया जाता है । उनमे कोई भी दो अविरुद्ध स्पर्श रहते है, एक वर्ण, एक गन्ध और एक रस रहता है । वे परमाणु गोल और नित्य होते है तथा पर्यायोंकी अपेक्षा अनित्य भी होते है ।।१४८।। ऊपर कहे हुए पुद्गल द्रव्यके छह भेद है– १ सूक्ष्मसूक्ष्म, २ सूक्ष्म, ३ सूक्ष्म स्थूल, ४ स्थूलसूक्ष्म, ५ स्थूल और ६ स्थूल-स्थूल ।।१४९।। इनमेसे एक अर्थात् स्कन्धसे पृथक् रहनेवाला परमाणु सूक्ष्मसूक्ष्म है क्योंकि न तो वह देखा जा सकता है और न उसका स्पर्श ही किया जा सकता है । कर्मोके स्कन्ध सूक्ष्म कहलाते है क्योंकि वे अनन्त प्रदेशोंके समुदायरूप होते है ।।१५०।। शब्द, स्पर्श, रस और गन्ध सूक्ष्मस्थूल कहलाते है क्योकि यद्यपि इनका चक्षु इन्द्रियके द्वारा ज्ञान नहीं होता इसलिये ये सूक्ष्म है परन्तु अपनी अपनी कर्ण आदि इन्द्रियोके द्वारा इनका ग्रहण हो जाता है इसलिये ये स्थूल भी कहलाते है ।।१५१।। छाया, चादनी और आतप आदि स्थूलसूक्ष्म कहलाते है क्योंकि चक्षु इन्द्रियके द्वारा दिखाई देनेके कारण ये स्थूल है परन्तु इनके रूपका संहरण नही हो सकता इसलिये विघातरहित होनेके कारण सूक्ष्म भी है ।।१५२।। पानी आदि तरल पदार्थ जो कि पृथक् करनेपर भी मिल जाते है स्थूल भेदके उदाहरण है, अर्थात् दूध पानी आदि पतले पदार्थ स्थूल कहलाते है और पृथिवी आदि स्कन्ध जो कि भेद किये जानेपर फिर न मिल सके स्थूलस्थूल कहलाते

---

१ कर्मानुयोगाः । २ स्निग्धरुक्षद्वयस्पर्शवन्तः । ३ सूक्ष्माः । ४ कर्मण स्कन्धाः– ल० । ५ अनन्तस्य योगात् । ६ येषा शब्दादीनामचाक्षुषत्वे सत्यपि शेषेन्द्रियग्राह्यताया ईक्षणात् । सूक्ष्मस्थूलत्वम् । ७ अनपहार्यस्वरूपत्वात् ।

इत्यमीषां पदार्थानां याथात्म्यमविपर्ययात्[1]। यः श्रद्धत्ते स भव्यात्मा परं ब्रह्माधिगच्छति ॥१५४॥
तत्त्वार्थसङ्ग्रहं कृत्स्नम् इत्युक्त्वास्मै विदां वरः। कानिचित्तत्त्वबीजानि पुनरुद्देशतो[1] जगौ ॥१५५॥
पुरुषं पुरुषार्थञ्च मार्गं मार्गफलं तथा। बन्धं मोक्षं तयोर्हेतुं बद्धं मुक्तञ्च सोऽभ्यधात् ॥१५६॥
त्रिजगत्समवस्थानं[2] नरकप्रस्तरानपि[3]। द्वीपाब्धिह्रदशैलादीनप्यथास्मा[4]युपादिशत् ॥१५७॥
त्रिषष्टिपटलं स्वर्गं देवायुर्भोगविस्तरम्। ब्रह्मस्थान[5]मपि श्रीमान् लोकनाडीञ्च सञ्जगौ ॥१५८॥
तीर्थेशानां पुराणानि चक्रिणामर्धचक्रिणाम्। तत्कल्याणानि तद्धेतूनप्याचख्यौ जगद्गुरुः ॥१५९॥
गतिमागतिमुत्पत्तिं च्यवनं[6]ञ्च शरीरिणाम्। [7]भुक्तिमृद्धिं कृतं[8]ञ्चापि भगवान् व्याजहार सः ॥१६०॥
भवद्भविष्यद्भूतञ्च यत्सर्वंद्रव्यगोचरम्। तत्सर्वं सर्ववित्सर्वो भरतं प्रत्यबूबुधत् ॥१६१॥
श्रुत्वेति तत्त्वसद्भावं गुरोः परमपूरुषात्। प्रह्लादं परमं प्राप भरतो भक्तिनिर्भरः ॥१६२॥
ततः सम्यक्त्वशुद्धिञ्च व्रतशुद्धिञ्च पुष्क[9]लाम्। निष्क[10]लाद्भरतो भेजे परमानन्दमुद्वहन् ॥१६३॥
प्रबुद्धो मानसीं शुद्धिं परमां परमर्षितः। सम्प्राप्य भरतो रेजे शरदीवाम्बुजाकरः ॥१६४॥

१ नाशरहित. । 'दिष्टान्त. प्रत्ययोऽत्यय.' इत्यभिधानात् । २ अनशनव्रती । ३ सुगी – ल०, इ०, अ०, प०, स० । ४ धृष्टः । ५ विशिष्यत इति । ६ शिष्टपालकः । ७ कमनीयः । ८ ज्ञानेन निश्चयेन ग्राह्यः । ९ शब्दयोनिः ।

सत्यात्मा सत्यविज्ञानः सत्यवाक् सत्यशासनः । सत्याशीः सत्यसन्धानः[1] सत्यः सत्यपरायणः ॥१७५॥
स्थेयान्[2] स्थवीयान्[3]नेदीयान्[4] दवीयान्[5] दूरदर्शनः । अणोरणीयाननणुर्गुरुराद्यो गरीयसाम् ॥१७६॥
सदायोगः सदाभोगः सदातृप्तः सदाशिवः । सदागतिः सदासौख्यः सदाविद्यः सदोदयः ॥१७७॥
सुघोषः सुमुखः सौम्यः सुखदः सुहितः सुहृत् । सुगुप्तो गुप्तिभृद् गोप्ता[6] लोकाध्यक्षो दमीश्वरः ।१७८।
इति असंस्कृताविंशतम् ।
बृहद्बृहस्पतिर्वाग्मी वाचस्पतिरुदारधीः । मनीषी धिषणो धीमान् शेमुषीशो गिरां पतिः ॥१७९॥
नैकरूपो नयोत्तुङ्गो नैकात्मा नैकधर्मकृत् । अविज्ञेयोऽप्रतर्क्यात्मा कृतज्ञः [7]कृतलक्षणः ॥१८०॥

सत्य-स्वरूप होनेसे सत्यात्मा ६६६, यथार्थ विज्ञानसे सहित होनेके कारण सत्य विज्ञान ६६७, सत्यवचन होनेसे सत्यवाक् ६६८, सत्यधर्मका उपदेश देनेसे सत्यशासन ६६९, सत्य आशीर्वाद होनेसे सत्याशी, ६७०, सत्यप्रतिज्ञ होनेसे सत्यसंधान ६७१, सत्यरूप होनेसे सत्य ६७२, और सत्यमें ही निरन्तर तत्पर रहनेसे सत्यपरायण ६७३ कहलाते हैं ॥१७५॥ अत्यन्त स्थिर होनेसे स्थेयान् ६७४, अतिशय स्थूल होनेसे स्थवीयान् ६७५, भक्तोंके समीपवर्ती होनेसे नेदीयान् ६७६, पापोंसे दूर रहनेके कारण दवीयान् ६७७, दूरसे ही दर्शन होनेके कारण दूरदर्शन ६७८, परमाणुसे भी सूक्ष्म होनेके कारण अणो अणीयान् ६७९, अणुरूप न होनेसे अनणु ६८० और गुरुओंमे भी श्रेष्ठ गुरु होने से गरीयमामाद्य* गुरु ६८१ कहलाते हैं ॥१७६॥ सदा योगरूप होनेसे सदायोग ६८२, सदा आनन्दके भोक्ता होनेसे सदाभोग ६८३, सदा संतुष्ट रहनेसे सदातृप्त ६८४, सदा कल्याणरूप रहनेसे सदा शिव ६८५, सदा ज्ञानरूप रहनेसे सदागति ६८६, सदा सुखरूप रहनेसे सदासौख्य ६८७, सदा केवलज्ञानरूपी विद्यासे युक्त होनेके कारण सदाविद्य ६८८ और सदा उदयरूप रहनेसे सदोदय ६८९ माने जाते हैं ॥१७७॥ उत्तमध्वनि होनेसे सुघोष ६९०, सुन्दर मुख होनेसे सुमुख ६९१, शान्तरूप होनेसे सौम्य ६९२, सब जीवोंको सुखदायी होनेसे सुखद ६९३, सबका हित करनेसे सुहित ६९४, उत्तम हृदय होनेसे सुहृत् ६९५, सुरक्षित अथवा मिथ्यादृष्टियोंके लिये गूढ होनेसे सुगुप्त ६९६, गुप्तियोंको धारण करनेसे गुप्तिभृत् ६९७, सबके रक्षक होनेसे गोप्ता ६९८, तीनों लोकोंका साक्षात्कार करनेसे लोकाध्यक्ष ६९९, और इन्द्रियविजयरूपी दमके स्वामी होनेसे दमेश्वर ७०० कहलाते हैं ।१७८॥

इन्द्रोंके गुरु होनेसे बृहद्बृहस्पति ७०१, प्रशस्त वचनोंके धारक होनेसे वाग्मी ७०२, वचनोंके स्वामी होनेसे वाचस्पति ७०३, उत्कृष्ट बुद्धिके धारक होनेसे उदारधी ७०४, मनन शक्तिसे युक्त होनेके कारण मनीषी ७०५, चातुर्यपूर्ण बुद्धिसे सहित होनेके कारण धिषण ७०६, धारण पटु बुद्धिसे सहित होनेके कारण धीमान् ७०७, बुद्धिके स्वामी होनेसे शेमुषीश ७०८, और सब प्रकारके वचनोंके स्वामी होनेसे गिरापति ७०९, कहलाते हे ॥१७९॥ अनेकरूप होनेसे नैकरूप ७१०, नयोंके द्वारा उत्कृष्ट अवस्थाको प्राप्त होनेसे नयोत्तुङ्ग ७११, अनेक गुणोंको धारण करनेसे नैकात्मा ७१२, वस्तुके अनेक धर्मोंका उपदेश देनेसे नैकधर्मकृत् ७१३, साधारण पुरुषोंके द्वारा जाननेके अयोग्य होनेसे अविज्ञेय ७१४,

---

१ सत्यप्रतिज्ञ । २ स्थिरतर । ३ स्थूलतर. । ४ समीपस्थः । ५ दूरस्थः । ६ रक्षक. । ७ सम्पूर्णलक्षण. ।

*यहांपर 'गरीयसामाद्य' और गरीयसा गुरु' इस प्रकार दो नाम भी निकलते है परन्तु इस पक्षमें ६२७ और ६२८ इन दो नामोके स्थानमें 'जातसुव्रत' ऐसा एक नाम माना जाता है ।

ज्ञानगर्भो दयागर्भो रत्नगर्भः प्रभास्वरः । पद्मगर्भो जगद्गर्भो हेमगर्भः सुदर्शनः ॥१८१॥
लक्ष्मीवांस्त्रिदशाध्यक्षो द्रढीयानिन ईशिता । मनोहरो मनोज्ञाङ्गो[1] धीरो गम्भीरशासनः ॥१८२॥
धर्मयूपो दयायागो धर्मनेमिर्मुनीश्वरः । धर्मचक्रायुधो देवः कर्महा धर्मघोषणः ॥१८३॥
अमोघवागमोघाज्ञो निर्मलोऽमोघशासनः । सुरूपः सुभगस्त्यागी समयज्ञः समाहितः ॥१८४॥
सुस्थितः स्वास्थ्यभाक् स्वस्थो नीरजस्को निरुद्धवः[2] । अलेपो निष्कलङ्कात्मा वीतरागो गतस्पृहः ॥१८५॥
वश्येन्द्रियो विमुक्तात्मा निःसपत्नो जितेन्द्रियः । प्रशान्तोऽनन्त[3]धामर्षिर्मङ्गलं [4]मलहानघः ॥१८६॥

तर्क-वितर्करहित स्वरूपसे युक्त होनेके कारण अप्रतर्क्यात्मा ७१५, समस्त कृत्य जाननेसे कृतज्ञ ७१६ और समस्त पदार्थोंका लक्षणस्वरूप बतलानेसे कृतलक्षण ७१७ कहलाते हैं ॥१८०॥ अन्तरङ्गमें ज्ञान होनेसे ज्ञानगर्भ ७१८, दयालुहृदय होनेसे दयागर्भ ७१९, रत्नत्रयसे युक्त होनेके कारण अथवा गर्भ कल्याणके समय रत्नमयी वृष्टि होनेसे रत्नगर्भ ७२०, देदीप्यमान होनेसे प्रभास्वर ७२१, कमलाकार गर्भाशयमें स्थित होनेके कारण पद्मगर्भ ७२२, ज्ञानके भीतर समस्त जगत्के प्रतिबिम्बित होनेसे जगद्गर्भ ७२३, गर्भवासके समय पृथिवीके सुवर्णमय होजाने अथवा सुवर्णमय वृष्टि होनेसे हेमगर्भ ७२४ और सुन्दर दर्शन होनेसे सुदर्शन ७२५ कहलाते हैं ॥१८१॥ अन्तरङ्ग तथा बहिरङ्ग लक्ष्मीसे युक्त होनेके कारण लक्ष्मीवान् ७२६, देवोंके स्वामी होनेसे त्रिदशाध्यक्ष ७२७, अत्यन्त दृढ़ होनेसे द्रढीयान् ७२८, सबके स्वामी होनेसे इन ७२९, सामर्थ्यशाली होनेसे ईशिता ७३०, भव्यजीवोंका मनहरण करनेसे मनोहर ७३१, सुन्दर अगोके धारक होनेसे मनोज्ञाङ्ग ७३२, धैर्यवान् होनेसे धीर ७३३ और शासनकी गम्भीरता से गम्भीरशासन ७३४ कहलाते हैं ॥१८२॥ धर्मके स्तम्भरूप होनेसे धर्मयूप ७३५, दयारूप यज्ञके करनेवाले होनेसे दयायाग ७३६, धर्मरूपी रथकी चक्रधारा होनेसे धर्मनेमि ७३७, मुनियोंके स्वामी-होनेसे मुनीश्वर ७३८, धर्मचक्ररूपी शस्त्रके धारक होनेसे धर्मचक्रायुध ७३९, आत्मगुणोंमें क्रीड़ा करनेसे देव ७४०, कर्मोका नाश करनेसे कर्महा ७४१, और धर्मका उपदेश देनेसे धर्मघोषण ७४२ कहलाते हैं ॥१८३॥ आपके वचन कभी व्यर्थ नही जाते इसलिये अमोघवाक् ७४३, आपकी आज्ञा कभी निष्फल नही होती इसलिये अमोघाज्ञ ७४४, मल रहित है इसलिये निर्मल ७४५, आपका शासन सदा सफल रहता है इसलिये अमोघशासन ७४६, सुन्दर रूपके धारक हैं इसलिये सुरूप ७४७, उत्तम ऐश्वर्य से युक्त हैं इसलिये सुभग ७४८, आपने पर पदार्थोंका त्याग कर दिया हैं इसलिये त्यागी ७४९, सिद्धान्त, समय अथवा आचारके ज्ञाता हैं इसलिये समयज्ञ ७५० और समाधानरूप हैं इसलिये समाहित ७५१ कहलाते हैं ॥१८४॥

सुखपूर्वक स्थित रहनेसे सुस्थित ७५२, आरोग्य अथवा आत्मस्वरूपकी निश्चलताको प्राप्त होनेसे स्वास्थ्यभाक् ७५३, आत्मस्वरूपमे स्थित होनेसे स्वस्थ ७५४, कर्मरूप रजसे रहित होनेके कारण नीरजस्क ७५५, सांसारिक उत्सवोंसे रहित होनेके कारण निरुद्धव ७५६, कर्मरूपी लेपसे रहित होनेके कारण अलेप ७५७, कलङ्करहित आत्मासे युक्त होनेके कारण निष्कलंकात्मा ७५८, राग आदि दोषोंसे रहित होनेके कारण वीतराग ७५९ और सांसारिक विषयोंकी इच्छासे रहित होनेके कारण गतस्पृह ७६० कहलाते हे ॥१८५॥ आपने इन्द्रियोंको वश कर लिया हैं इसलिये वश्येन्द्रिय ७६१ कहलाते हैं आपकी आत्मा कर्मबन्धनसे

१ मनोज्ञार्हो– इ० । २ उत्कृष्टो धवः उद्धवः उद्धवः निःक्रान्तो निरुद्धवः । ३ अनन्ततेजाः । ४ मलं पापं हन्तीति ।

अनीदृगुपमाभूतो दिष्टि[1]र्दैव[2]मगोचरः । अमूर्तो मूर्तिमानेको नैको नानैकतत्त्व[3]दृक् ॥१८७॥
अध्या[4]त्मगम्यो गम्यात्मा योगविद् योगिवन्दितः । सर्वत्रगः सदाभावी[5] त्रिकालविषयार्थदृक् ॥१८८॥
शंकरः शंवदो दान्तो[6] दमी क्षान्तिपरायणः । अधिपः परमानन्दः परात्मज्ञः परापरः[7] ॥१८९॥
त्रिजगद्वल्लभोऽभ्यर्च्यस्त्रिजगन्मङ्गलोदयः । त्रिजगत्पतिपूज्याङ्‌घ्रिस्त्रिलोकाग्रशिखामणिः ॥१९०॥

इति बृहदादिशतम् ।

छूट गई है इसलिये विमुक्तातमा ७६२ कहे जाते है, आपका कोई भी शत्रु या प्रतिद्वन्द्वी नहीं है इसलिये निःसपत्न ७६३ कहलाते हैं, इन्द्रियोंको जीत लेनेसे जितेन्द्रिय ७६४ कहे जाते है, अत्यन्त शान्त होने से प्रशान्त ७६५ है, अनन्ततेजके धारक ऋषि होनेसे अनन्त धामर्षि ७६६ है, मंगलरूप होनेसे मङ्गल ७६७ हैं, मलको नष्ट करनेवाले है इसलिये मलहा ७६८ कहलाते है और व्यसन अथवा दुःखसे रहित है इसलिये अनघ ७६९ कहे जाते है* ॥१८६॥ आपके समान अन्य कोई नही है इसलिये आप अनीदृक् ७७० कहलाते हैं, सबके लिये उपमा देने योग्य है इसलिये उपमाभूत ७७१ कहे जाते है, सब जीवोंके भाग्यस्वरूप होनेके कारण दिष्टि ७७२ और दैव ७७३ कहलाते है, इन्द्रियोके द्वारा जाने नही जा सकते अथवा केवलज्ञान होनेके बाद ही आप गो अर्थात् पृथिवीपर विहार नही करते किन्तु आकाशमे गमन करते है इसलिये अगोचर ७७४ कहे जाते है, रूप रस गन्ध स्पर्शसे रहित होनेके कारण अमूर्त ७७५ हैं, शरीरसहित है इसलिये मूर्तिमान् ७७६ कहलाते हैं, अद्वितीय है इसलिये एक ७७७ कहे जाते हैं, अनेक गुणोंसे सहित है इसलिये नैक ७७८ कहलाते हैं और आत्माको छोडकर आप अन्य अनेक पदार्थोंको नही देखते—उनमे तल्लीन नही होते इसलिये नानैकतत्त्वदृक् ७७९ कहे जाते हैं ॥१८७॥ अध्यात्मशास्त्रोंके द्वारा जानने योग्य होनेसे अध्यात्मगम्य ७८०, मिथ्यादृष्टि जीवोके जानने योग्य न होनेसे अगम्यातमा ७८१, योगके जानकार होनेसे योगविद् ७८२, योगियोंके द्वारा वन्दना किये जानेसे योगिवन्दित ७८३ केवल ज्ञानकी अपेक्षा सब जगह व्याप्त होनेसे सर्वत्रग ७८४, सदा विद्यमान रहनेसे सदाभावी ७८५, और त्रिकालविषयक समस्त पदार्थोको देखनेसे त्रिकालविषयार्थदृक् ७८६ कहलाते हैं, ॥१८८॥ सबको सुखके करनेवाले होनेसे शंकर ७८७, सुखके बतलानेवाले होनेसे शंवद ७८८, मनको वश करनेसे दान्त ७८९, इन्द्रियोका दमन करनेसे दमी ७९०, क्षमा धारण करनेमे तत्पर होनेसे क्षान्तिपरायण ७९१, सबके स्वामी होनेसे अधिप ७९२, उत्कृष्ट आनन्दरूप होनेसे परमानन्द ७९३, उत्कृष्ट अथवा पर और निजकी आत्माको जाननेसे परात्मज्ञ ७९४, और श्रेष्ठसे श्रेष्ठ होनेके कारण परात्पर ७९५ कहलाते हैं ॥१८९॥ तीनों लोकोंके प्रिय अथवा स्वामी होनेसे त्रिजगद्वल्लभ ७९६, पूजनीय होनेसे अभ्यर्च्य ७९७, तीनों लोकोंमें मगलदाता होनेसे त्रिजगन्मंगलोदय ७९८, तीनों लोकोंके इन्द्रों द्वारा पूजनीय चरणोंसे युक्त होनेके कारण त्रिजगत्पतिपूज्याङ्‌घ्रि ७९९ और कुछ समयके बाद तीनों लोकोंके अग्रभागपर चूड़ामणिके समान विराजमान होनेके कारण त्रिलोकाग्रशिखामणि ८०० कह-

---

१ प्रमाणानुपातिनी मतिः । २ स्तुत्यम् । ३ अनेकैकतत्त्वदर्शी । ४ ध्यानगोचरः । ५ नित्याभिप्रायवान् । ६ दमितः । ७ सार्वकालीनः । परात्परः– ल० ।

*यद्यपि ६४७ वा नाम भी अनघ है इसलिये ७६९ वां अनघ नाम पुनरुक्त सा मालूम होता है परन्तु अघ शब्दके 'अघ तु व्यसने दुःखे दुरिते च नपुसकम्' अनेक अर्थ होनेसे पुनरुक्तिका दोष दूर हो जाता है ।

त्रिकालदर्शी लोकेशो लोकधाता दृढव्रतः । सर्वलोकातिगः पूज्यः सर्वलोकैक[1]सारथिः ॥१९१॥
पुराणः पुरुषः पूर्वः कृतपूर्वाङ्गविस्तरः । आदिदेवः पुराणाद्यः पुरुदेवोऽधिदेवता ॥१९२॥
युगमुख्यो युगज्येष्ठो युगादिस्थितिदेशकः । कल्याणवर्णः कल्याणः कल्यः[2] कल्याणलक्षणः ॥१९३॥
कल्याणप्रकृतिर्दीप्र[3]कल्याणात्मा विकल्मषः । विकलङ्कः कलातीतः कलिलघ्नः कलाधरः ॥१९४॥
देवदेवो जगन्नाथो जगद्बन्धुर्जगद्विभुः । जगद्धितैषी लोकज्ञः सर्वगो[4] जगदग्रगः ॥१९५॥
चराचरगुरुर्गोप्यो गूढात्मा गूढ[5]गोचरः । सद्योजातः प्रकाशात्मा ज्वलज्ज्वलनसप्रभः ॥१९६॥

लाते हैं ॥१९०॥ तीनों कालसम्बन्धी समस्त पदार्थोंको देखनेवाले हैं इसलिये त्रिकालदर्शी ८०१, लोकोंके स्वामी होनेसे लोकेश ८०२, समस्त लोगोंके पोषक या रक्षक होनेसे लोकधाता ८०३, व्रतोंको स्थिर रखनेसे दृढव्रत ८०४, सब लोकोंसे श्रेष्ठ होनेके कारण सर्वलोकातिग ८०५, पूजाके योग्य होनेसे पूज्य ८०६, और सब लोगोंको मुख्यरूपसे अभीष्ट स्थान तक पहुँचानेमें समर्थ होनेसे सर्वलोकैकसारथि ८०७ कहलाते हैं ॥१९१॥ सबसे प्राचीन होनेसे पुराण ८०८, आत्माके श्रेष्ठ गुणोंको प्राप्त होनेसे पुरुष ८०९, सर्व प्रथम होनेसे पूर्व ८१०, अङ्ग और पूर्वोका विस्तार करनेसे कृतपूर्वाङ्गविस्तर ८११, सब देवोंमें मुख्य होनेसे आदिदेव ८१२, पुराणोंमें प्रथम होनेसे पुराणाद्य ८१३, महान् अथवा प्रथम तीर्थ कर होनेसे पुरुदेव ८१४, और देवोंके भी देव होनेसे अधिदेवता ८१५, कहलाते हैं ॥१९२॥ इस अवसर्पिणी युगके मुख्य पुरुष होनेसे युगमुख्य ८१६, इसी युगमें सबसे बड़े होनेसे युगज्येष्ठ ८१७, कर्मभूमिरूप युगके प्रारम्भमें तत्कालोचित मर्यादाके उपदेशक होनेसे युगादिस्थितिदेशक ८१८, कल्याण अर्थात् सुवर्णके समान कान्तिके धारक होनेसे कल्याणवर्ण ८१९, कल्याणरूप होनेसे कल्याण ८२०, मोक्ष प्राप्त करनेमें सज्ज अर्थात् तत्पर अथवा निरामय-नीरोग होनेसे कल्य ८२१, और कल्याणकारी लक्षणोंसे युक्त होनेके कारण कल्याणलक्षण ८२२ कहलाते हैं ॥१९३॥ आपका स्वभाव कल्याण-रूप है इसलिये आप कल्याण प्रकृति ८२३ कहलाते हैं, आपकी आत्मा देदीप्यमान सुवर्णके समान निर्मल है इसलिये आप दीप्रकल्याणात्मा ८२४ कहे जाते हैं, कर्मकालिमासे रहित हैं इसलिये विकल्मष ८२५ कहलाते हैं, कलङ्करहित हैं इसलिये विकलङ्क ८२६ कहे जाते हैं, शरीररहित हैं इसलिये कलातीत ८२७ कहलाते हैं, पापोंको नष्ट करने वाले हैं इसलिये कलिलघ्न ८२८ कहे जाते हैं, ओर अनेक कलाओंको धारण करने वाले हैं इसलिये कलाधर ८२९ माने जाते हैं ॥१९४॥ देवोंके देव होनेसे देवदेव ८३०, जगत्के स्वामी होनेसे जगन्नाथ ८३१, जगत्के भाई होनेसे जगद्बन्धु ८३२, जगत्के स्वामी होनेसे जगद्विभु ८३३, जगत्का हित चाहनेवाले होनेसे जगद्धितैषी ८३४, लोकको जाननेसे लोकज्ञ ७३५, सब जगह व्याप्त होनेसे सर्वग ८३६ और जगत्में सबमें ज्येष्ठ होनेके कारण जगदग्रज ८३७ कहलाते हैं ॥१९५॥ चर, स्थावर सभीके गुरु होनेसे चराचर-गुरु ८३८, बड़ी सावधानीके साथ हृदयमें सुरक्षित रखनेसे गोप्य ८३९, गूढ़ स्वरूपके धारक होनेसे गूढात्मा ८४०, अत्यन्त गूढ़ विषयोंको जाननेसे गूढगोचर ८४१, तत्कालमें उत्पन्न हुएके समान निर्विकार होनेसे सद्योजात ८४२, प्रकाशस्वरूप होनेसे प्रकाशात्मा ८४३ और जलती हुई अग्निके समान शरीरकी प्रभाके धारक होनेसे ज्वलज्ज्वलनसप्रभ

---

१ सर्वलोकस्य एक एव नेता । २ प्रशस्तः । ३ दीप्तकल्याणात्मा ल० । ४ सर्वेशो –इ० । जगदग्रजः ल०, द०, इ० । ५ गूढेन्द्रियः ।

आदित्यवर्णो भर्माभः सुप्रभः कनकप्रभः । सुवर्णवर्णो रुक्माभः सूर्यकोटिसमप्रभः ॥१९७॥
तपनीयनिभस्तुङ्गो बालार्काभोऽनलप्रभः । सन्ध्याभ्र[1]बभ्रुर्हेमाभस्तप्तचामीकरच्छविः ॥१९८॥
निष्टप्तकनकच्छायः कनत्काञ्चनसन्निभः । हिरण्यवर्णः स्वर्णाभः शातकुम्भनिभप्रभः ॥१९९॥
द्युम्नाभो [2]जातरूपाभस्तप्तजाम्बूनदद्युतिः । सुधौतकलधौतश्रीः प्रदीप्तो हाटकद्युतिः ॥२००॥
शिष्टेष्टः पुष्टिदः पुष्टः स्पष्टः स्पष्टाक्षरः क्षमः । शत्रुघ्नोऽप्रतिघोऽमोघाः प्रशास्ता शासिता स्वभूः ॥२०१॥
शान्तिनिष्ठो मुनिज्येष्ठः शिवतातिः[3] शिवप्रदः । शान्तिदः शान्तिकृच्छान्तिः कान्तिमान्कामितप्रदः ॥२०२॥
[4]श्रेयांनिधिरधिष्ठानमप्रतिष्ठा प्रतिष्ठितः[5] । सुस्थिरः स्थावरः स्थास्नुः[6] प्रथीयान्[7]प्रथितः पृथुः ॥२०३॥
इति त्रिकालदर्श्यादिशतम् ।

---

८४४ कहलाते हैं ॥१९६॥ सूर्यके समान तेजस्वी होनेसे आदित्यवर्ण ८४५, सुवर्णके समान कान्तिवाले होनेसे भर्माभ ८४६, उत्तमप्रभासे युक्त होनेके कारण सुप्रभ ८४७, सुवर्णके समान आभा होनेसे कनकप्रभ ८४८, सुवर्णवर्ण ८४९ और रुक्माभ ८५० तथा करोड़ों सूर्योंके समान देदीप्यमान प्रभाके धारक होनेसे सूर्यकोटिसमप्रभ ८५१ कहे जाते हैं ॥१९७॥ सुवर्णके समान भास्वर होनेसे तपनीयनिभ ८५२, ऊंचा शरीर होनेसे तुङ्ग ८५३, प्रातःकालके सूर्यके समान बालप्रभाके धारक होनेसे बालार्काभ ८५४, अग्निके समान कान्तिवाले होनेसे अनलप्रभ ८५५, सध्याकालके बादलोके समान सुन्दर होनेसे सन्ध्याभ्रबभ्रु ८५६, सुवर्णके समान आभावाले होनेसे हेमाभ ८५७ और तपाये हुए सुवर्णके समान प्रभासे युक्त होनेके कारण तप्तचामीकरप्रभ ८५८ कहलाते हैं ॥१९८॥ अत्यन्त तपाये हुए सुवर्णके समान कान्तिवाले होनेसे निष्टप्तकनकच्छाय ८५९, देदीप्यमान सुवर्णके समान उज्ज्वल होनेसे कनत्काञ्चनसन्निभ ८६० तथा सुवर्णके समान वर्ण होनेसे हिरण्यवर्ण ८६१, स्वर्णाभ ८६२, शातकुम्भनिभप्रम ८६३, द्युम्नाभ ८६४, जातरूपाभ ८६५, तप्तजाम्बूनदद्युति ८६६, सुधौतकलधौतश्री ८६७ और हाटकद्युति ८६८ तथा देदीप्यमान होनेसे प्रदीप्त ८६९ कहलाते हैं ॥१९९–२००॥ शिष्ट अर्थात् उत्तम पुरुषोंके इष्ट होनेसे शिष्टेष्ट ८७०, पुष्टिको देनेवाले होनेसे पुष्टिद ८७१, बलवान् होनेसे अथवा लाभान्तराय कर्मके क्षयसे प्रत्येक समय प्राप्त होनेवाले अनन्त शुभ पुद्गलवर्गणाओंसे परमौदारिक शरीरके पुष्ट होनेसे पुष्ट ८७२, प्रकट दिखाई देनेसे स्पष्ट ८७३, स्पष्ट अक्षर होनेसे स्पष्टाक्षर ८७४, समर्थ होनेसे क्षम ८७५, कर्मरूप शत्रुओंको नाश करनेसे शत्रुघ्न ८७६, शत्रु रहित होनेसे अप्रतिघ ८७७, सफल होनेसे अमोघ ८७८, उत्तम उपदेशक होनेसे प्रशास्ता ८७९, रक्षक होनेसे शासिता ८८० और अपने आप उत्पन्न होनेसे स्वभू ८८१ कहलाते हैं ॥२०१॥ शान्त होनेसे शान्तिनिष्ठ ८८२, मुनियोंमे श्रेष्ठ होनेसे मुनिज्येष्ठ ८८३, कल्याण परम्पराके प्राप्त होनेसे शिवताति ८८४, कल्याण अथवा मोक्ष प्रदान करनेसे शिवप्रद ८८५, शान्तिको देनेवाले होनेसे शान्तिद ८८६, शान्तिके कर्ता होनेसे शान्तिकृत् ८८७, शान्तस्वरूप होनेसे शान्ति ८८८, कान्तियुक्त होनेसे कान्तिमान् ८८९ और इच्छित पदार्थ प्रदान करनेसे कामितप्रद ८९० कहलाते हैं ॥२०२॥ कल्याणके भण्डार होनेसे श्रेयोनिधि ८९१, धमके आधार होनेसे अधिष्ठान ८९२, अन्यकृत प्रतिष्ठासे रहित होनेके कारण अप्रतिष्ठ ८९३, प्रतिष्ठा अर्थात् कीर्तिसे युक्त होनेके कारण प्रतिष्ठित ८९४, अतिशय स्थिर होनेसे सुस्थिर ८९५, विहार रहित होनेसे स्थावर ८९६, अचल होनेसे स्थाणु ८९७,

---

१ सन्ध्याकालमेघवत् पिङ्गलः। २ कनकप्रभा । ३ सुखपरम्परः। ४ श्रेयोनिधि अ०, ल०, स० । ५ स्थैर्यवान् । ६ सुस्थितः द०, ल०, अ०, प०, इ० । स्थाणुः ल०, अ० । ७ –अतिशयेन पृथुः ।

दिग्वासा वातरशनो निर्ग्रन्थेशो निरम्बरः । निष्किञ्चनो निराशंसो[1] ज्ञानचक्षुरमोमुहः[2] ॥२०४॥
तेजोराशिरनन्तौजा ज्ञानाब्धिः शीलसागरः । तेजोमयोऽमितज्योतिर्ज्योतिर्मूर्तिस्तमोपहः[3] ॥२०५॥
जगच्चूडामणिर्दीप्तः शंवा[4]न्विघ्नविनायकः[5] । कलिघ्नः[6] कर्मशत्रुघ्नो लोकालोकप्रकाशकः ॥२०६॥
अनिद्रालुरतन्द्रालुर्जागरूकः[7] प्रमामयः[8] । लक्ष्मीपतिर्जगज्ज्योतिर्धर्मराजः प्रजाहितः ॥२०७॥
मुमुक्षुर्बन्धमोक्षज्ञो जिताक्षो जितमन्मथः । प्रशान्तरसशैलूषो[9] भव्यपेटक[10]नायकः ॥२०८॥
मूलकर्ताखि[11]लज्योतिर्मलघ्नो मूलकारणम् । आप्तो वागीश्वरः श्रेयान् श्रायसोक्ति[12]र्निरुक्तवाक् ॥२०९॥

अत्यन्त विस्तृत होनेसे प्रथीयान् ८९८, प्रसिद्ध होनेसे प्रथित ८९९ और ज्ञानादि गुणोंकी अपेक्षा महान् होनेसे पृथु ९०० कहलाते हैं ॥२०३॥

दिशारूप वस्त्रोंको धारण करने–दिगम्बर रहनेसे दिग्वासा ९०१, वायुरूपी करधनीको धारण करनेसे वातरशन ९०२, निर्ग्रन्थ मुनियोंके स्वामी होनेसे निर्ग्रन्थेश ९०३, वस्त्र रहित होनेसे निरम्बर ९०४, परिग्रह रहित होनेसे निष्किञ्चन ९०५, इच्छा रहित होनेसे निराशस ९०६, ज्ञानरूपी नेत्रके धारक होनेसे ज्ञानचक्षु ९०७ और मोहसे रहित होनेके कारण अमोमुह ९०८ कहलाते हैं ॥२०४॥ तेजके समूह होनेसे तेजोराशि ९०९, अनन्त प्रतापके धारक होनेसे अनन्तौज ९१०, ज्ञानके समुद्र होनेसे ज्ञानाब्धि ९११, शीलके समुद्र होनेसे शीलसागर ९१२, तेज स्वरूप होनेसे तेजोमय ९१३, अपरिमित ज्योतिके धारक होनेसे अमितज्योति ९१४, भास्वर शरीर होनेसे ज्योतिर्मूर्ति ९१५ और अज्ञानरूप अन्धकारको नष्ट करनेवाले होनेसे तमोऽपह ९१६ कहलाते हैं ॥२०५॥ तीनों लोकोंमे मस्तकके रत्नके समान अतिशय श्रेष्ठ होनेसे जगच्चूड़ामणि ९१७, देदीप्यमान होनेसे दीप्त ९१२, सुखी अथवा शान्त होनेसे शवान् ९१९, विघ्नोंके नाशक होनेसे विघ्नविनायक ९२०, कलह अथवा पापोंको नष्ट करनेसे कलिघ्न ९२१, कर्म रूप शत्रुओंके घातक होनेसे कर्मशत्रुघ्न ९२२ और लोक तथा अलोकको प्रकाशित करनेसे लोकालोकप्रकाशक ९२३ कहलाते हैं ॥२०६॥ निद्रा रहित होनेसे अनिद्रालु ९२४, तन्द्रा-आलस्य रहित होनेसे अतन्द्रालु ९२५, सदा जागृत रहनेसे जागरूक ९२६, ज्ञानमय रहनेसे प्रमामय ९२७, अनन्त चतुष्टयरूप लक्ष्मीके स्वामी होनेसे लक्ष्मीपति ९२८, जगत् को प्रकाशित करनेसे जगज्ज्योति ९२९, अहिसा धर्मके राजा होनेसे धर्मराज ९३० और प्रजाके हितैषी होनेसे प्रजाहित ९३१ कहलाते हैं ॥२०७॥ मोक्षके इच्छुक होनेसे मुमुक्षु ९३२, बन्ध और मोक्षका स्वरूप जाननेसे बन्ध मोक्षज्ञ ९३३, इन्द्रियों को जीतनेसे जिताक्ष ९३४, कामको जीतनेसे जितमन्मथ ९३५, अत्यन्त शान्तरूपी रसको प्रदर्शित करनेके लिये नटके समान होनेसे प्रशान्तरसशैलूष ९३६ और भव्यसमूहके स्वामी होनेसे भव्यपेटकनायक ९३७ कहलाते हैं ॥२०८॥ धर्मके आद्यवक्ता होनेसे मूलकर्ता ९३८, समस्त पदार्थोंको प्रकाशित करनेसे अखिलज्योति ९३९, कर्ममलको नष्ट करनेसे मलघ्न ९४०, मोक्षमार्गके मुख्य कारण होनेसे मूलकारण ९४१, यथार्थवक्ता होनेसे आप्त ९४२, वचनोंके स्वामी होनेसे वागीश्वर ९४३, कल्याणस्वरूप होनेसे श्रेयान् ९४४, कल्याणरूप वाणीके होनेसे श्रायसोक्ति ९४५ और सार्थकवचन होनेसे निरुक्तवाक् ९४६ कहलाते हैं ॥२०९॥

---

१ निराशः । २ भृशं निर्मोहः । ३ आदित्यः । ४ श सुखमस्यास्तीति । ५ अन्तरायनाशकः । ६ दोषघ्नः । ७ जागरणशीलः । ८ ज्ञानमयः । ९ उपशान्तरसनर्तकः । १० समूह । ११ जगज्ज्योतिः । १२ प्रशस्तवाक् ।

प्रवक्ता वचसामीशो मारजिद्विश्वभाववित् । सुतनुस्तनुनिर्मुक्तः सुगतो हतदुर्नयः ॥२१०॥
श्रीशः श्रीश्रितपादाब्जो वीतभीरभयङ्करः । उत्सन्न[1]दोषो निर्विघ्नो निश्चलो लोकवत्सलः ॥२११॥
लोकोत्तरो लोकपतिर्लोकचक्षुरपारधीः । धीरधीर्बुद्धसन्मार्गः शुद्धः सूनृतपूतवाक् ॥२१२॥
प्रज्ञापारमितः प्राज्ञो यतिर्नियमितेन्द्रियः । भदन्तो[2] भद्रकृ[3]द्भद्रः[4] कल्पवृक्षो वरप्रदः ॥२१३॥
समुन्मीलितकर्मारिः कर्मकाष्ठाशु[5]शुक्षणिः । कर्मण्यः[6] कर्मठः[7] प्रांशु[8]र्हेयादेयविचक्षणः ॥२१४॥
अनन्तशक्तिरच्छेद्यः त्रिपुरारि[9]स्त्रिलोचनः[10] । त्रिनेत्रस्त्र्यम्बकस्त्र्यक्षः केवलज्ञानवीक्षणः ॥२१५॥

श्रेष्ठ वक्ता होनेसे प्रवक्ता ९४७, वचनोंके स्वामी होनेसे वचसामीश ९४८, कामदेवको जीतनेके कारण मारजित् ९४९, संसारके समस्त पदार्थोंको जाननेसे विश्वभाववित् ९५०, उत्तम शरीरसे युक्त होनेके कारण सुतनु ९५१, शीघ्र ही शरीर बन्धनसे रहित हो मोक्षकी प्राप्ति होनेसे तनुनिर्मुक्त ९५२, प्रशस्त विहायोगति नामकर्मके उदयसे आकाशमें उत्तम गमन करने, आत्मस्वरूपमें तल्लीन होने अथवा उत्तमज्ञानमय होनेसे सुगत ९५३ और मिथ्यानयोंको नष्ट करनेसे हतदुर्नय ९५४ कहलाते हैं ॥२१०॥ लक्ष्मीके ईश्वर होनेसे श्रीश ९५५ कहलाते हैं, लक्ष्मी आपके चरण कमलोंकी सेवा करती है इसलिये श्रीश्रित-पादाब्ज ९५६ कहे जाते हैं, भयरहित है इसलिये वीतभी ९५७ कहलाते हैं, दूसरोंका भय नष्ट करनेवाले हैं इसलिये अभयंकर ९५८ माने जाते हैं, समस्त दोषोंको नष्ट कर दिया है इसलिये उत्सन्नदोष ९५९ कहलाते हैं, विघ्न रहित होनेसे निर्विघ्न ९६०, स्थिर होनेसे निश्चल ९६१ और लोगोंके स्नेहपात्र होनेसे लोक-वत्सल ९६२ कहलाते है ॥ २११ ॥ समस्त लोगोंमे उत्कृष्ट होनेसे लोकोत्तर ९६३, तीनों लोकोंके स्वामी होनेसे लोकपति ९६४, समस्त पुरुषोंके नेत्रस्वरूप होनेसे लोकचक्षु ९६५, अपरिमित बुद्धिके धारक होनेसे अपारधी ९६६, सदा स्थिर बुद्धिके धारक होनेसे धीरधी ९६७, समीचीन मार्गको जान लेनेसे बुद्धसन्मार्ग ९६८, कर्ममलसे रहित होनेके कारण शुद्ध ९६९ और सत्य तथा पवित्र वचन बोलनेसे सत्यसूनृतवाक् ९७० कहलाते हैं ॥२१२॥ बुद्धिकी पराकाष्ठाको प्राप्त होनेसे प्रज्ञापारमित ९७१, अतिशय बुद्धिमान् होनेसे प्राज्ञ ९७२, विषय कषायोसे उपरत होनेके कारण यति ९७३, इन्द्रियोंको वश करनेसे नियमितेन्द्रिय ९७४, पूज्य होनेसे भदंत ९७५, सब जीवोंका भला करनेसे भद्रकृत् ९७६, कल्याणरूप होनेसे भद्र ९७७, मनचाही वस्तुओंका दाता होनेसे कल्पवृक्ष ९७८ और इच्छित वर प्रदान करनेसे वरप्रद ९७९ कहलाते है ॥२१३॥ कर्मरूप शत्रुओंको उखाड देनेसे समुन्मूलितकर्मारि ९८०, कर्मरूप ईंधनको जलानेके लिये अग्निके समान होनेसे कर्मकाष्ठाशुशुक्षणि ९८१, कार्य करनेमें निपुण होनेसे कर्मण्य ९८२, समर्थ होनेसे कर्मठ ९८३, उत्कृष्ट अथवा उन्नत होनेसे प्रांशु ९८४ और छोड़ने तथा ग्रहण करने योग्य पदार्थोके जाननेमें विद्वान् होनेसे हेयादेयविचक्षण ९८५ कहलाते है ॥२१४॥ अनन्त-शक्तियोंके धारक होनेसे अनन्तशक्ति ९८६, किसीके द्वारा छिन्न-भिन्न करने योग्य न होनेसे अच्छेद्य ९८७, जन्म जरा और मरण इन तीनोंका नाश करनेसे त्रिपुरारि ९८८, त्रिकालवर्ती पदार्थोके जाननेसे त्रिलोचन ९८९, त्रिनेत्र ९९०, त्र्यम्बक ९९१ और त्र्यक्ष ९९२ तथा केवलज्ञानरूप नेत्रसे सहित होनेके कारण केवलज्ञानवीक्षण ९९३ कहलाते

१ निरस्तदोषः । २ पूज्यः । ३ सुखकरः । ४ शोभनः । ५ कर्मेन्धनकृशानुः । ६ कर्मणि साधुः । ७ कर्मशूरः । ८ उन्नतः । ९ जन्मजरामरणत्रिपुरहरः । १० त्रिकालविषयावबोधात् त्रिलोचनः ।

समन्तभद्रः[1] शान्तारिः धर्माचार्यो दयानिधिः । सूक्ष्मदर्शी जितानङ्गः कृपालुर्धर्मदेशकः ॥२१६॥
शुभंयुः[2] सुखसाद्भूतः[3] पुण्यराशि[4]रनामयः । धर्मपालो जगत्पालो धर्मसाम्राज्यनायकः ॥२१७॥
इति दिग्वासाद्यष्टोत्तरशतम् ।

धाम्नां पते तवामूनि नामान्यागमकोविदैः । समुच्चितान्यनुध्यायन् पुमान् [5]पूतस्मृतिर्भवेत् ॥२१८॥
गोचरोऽपि गिरामासां त्वमवाग्गोचरो मतः । स्तोता तथाप्यसन्दिग्धं त्वत्तोऽभीष्टफलं भजेत् ॥२१९॥
त्वमतोऽसि जगद्बन्धुः त्वमतोऽसि जगद्भिषक् । त्वमतोऽसि जगद्धाता त्वमतोऽसि जगद्धितः ॥२२०॥
त्वमेकं जगतां ज्योतिः त्वं [6]द्विरूपोपयोगभाक् । त्वं [7]त्रिरूपैकमुक्त्यङ्गः स्वोत्थानन्तचतुष्टयः ॥२२१॥
त्वं [8]पञ्चब्रह्मतत्त्वात्मा पञ्चकल्याणनायकः । [9]षड्भेदभावतत्त्वज्ञ त्वं सप्तनयसङ्ग्रहः ॥२२२॥
[10]दिव्याष्टगुणमूर्तिस्त्वं नवकेवललब्धिकः । दशावतार[11]निर्धार्यो मां पाहि परमेश्वर ॥२२३॥
युष्मन्नामावलीदृब्ध[12]विलसत्स्तोत्रमालया । भवन्तं परिवस्यामः[13] प्रसीदानुगृहाण नः ॥२२४॥

है ॥२१५॥ सब ओरसे मगलरूप होनेके कारण समन्तभद्र ९९४, कर्मरूप शत्रुओंके शान्त हो जानेसे शान्तारि ९९५, धर्मके व्यवस्थापक होनेसे धर्माचार्य ९९६, दयाके भण्डार होनेसे दयानिधि ९९७, सूक्ष्म पदार्थोको भी देखनेसे सूक्ष्मदर्शी ९९८, कामदेवको जीत लेनेसे जितानङ्ग ९९९, कृपायुक्त होनेसे कृपालु १०००, और धर्मके उपदेशक होनेसे धर्मदेशक १००१ कहलाते हैं ॥२१६॥ शुभ युक्त होनेसे शुभयु १००२, सुखके आधीन होनेसे सुखसाद्भूत १००३, पुण्यके समूह होनेसे पुण्यराशि १००४,रोग रहित होनेसे अनामय १००५, धर्मकी रक्षा करनेसे धर्मपाल १००६, जगत्‌की रक्षा करनेसे जगत्पाल १००७ और धर्मरूपी साम्राज्यके स्वामी होनेसे धर्मसाम्राज्यनायक १००८ कहलाते हैं ॥२१७॥

हे तेजके अधिपति जिनेन्द्रदेव, आगमके ज्ञाता विद्वानोंने आपके ये एक हजार आठ नाम संचित किये हैं, जो पुरुष आपके इन नामोंका ध्यान करता है उसकी स्मरणशक्ति अत्यन्त पवित्र हो जाती है ॥२१८॥ हे प्रभो, यद्यपि आप इन नामसूचक वचनोंके गोचर हैं तथापि वचनोंके अगोचर ही माने गये हैं यह सब कुछ है परन्तु स्तुति करनेवाला आपसे निःसन्देह अभीष्ट फलको पा लेता है ॥२१९॥ इसलिये हे भगवन्, आप ही इस जगत्‌के बन्धु हैं, आप ही जगत् के वैद्य हैं, आप ही जगत्‌का पोषण करनेवाले हैं और आप ही जगत्‌का हित करनेवाले हैं ॥२२०॥ हे नाथ, जगत्‌को प्रकाशित करनेवाले आप एक ही हैं। ज्ञान तथा दर्शन इस प्रकार द्विविध उपयोगके धारक होनेसे दो रूप हैं, सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्चारित्र इस प्रकार त्रिविध मोक्षमार्गमय होनेसे तीन रूप हैं, अपने आप में उत्पन्न हुए अनन्तचतुष्टयरूप होनेसे चार रूप हैं ॥२२१॥ पच परमेष्ठी स्वरूप होने अथवा गर्भादि पंच कल्याणकोंके नायक होनेसे पांच रूप है, जीव-पुद्गल, धर्म-अधर्म, आकाश और काल इन छह द्रव्योंके ज्ञाता होनेसे छह रूप है, नैगम आदि सात नयोंके संग्रहस्वरूप होने से सात रूप हैं, सम्यक्त्व आदि आठ अलौकिक गुणरूप होनेसे आठ रूप है, नौ केवललब्धियोंसे सहित होनेके कारण नव रूप हे और महाबल आदि दश अवतारोंसे आपका निर्धार होता है इसलिये दश रूप है इस प्रकार हे परमेश्वर, संसारके दुःखोंसे मेरी रक्षा कीजिये ॥२२२-२२३॥ हे भगवन्, हम

---

१ समन्तात् मङ्गलः । २ शुभं युनक्तीति । ३ सुखाधीनः । ४ पुण्यराशिर्निरामयः । ५ पवित्रज्ञानी । ६ ज्ञानदर्शनोपयोग । ७ रत्नत्रयस्वरूप । ८ पञ्चपरमेष्ठिस्वरूपः । ९ षड्द्रव्य-स्वरूपज्ञः । १० सम्यक्त्वाद्यष्टगुणमूर्तिः । अथवा पृथिव्याद्यष्टगुणमूर्तिः । ११ महाबलादिपुरुजिन-पर्यन्तदशावतार । १२ रचित । १३ आराधयामः ।

इदं स्तोत्रमनुस्मृत्य पूतो भवति भाक्तिकः । यः संपाठं पठत्येनं स स्यात् कल्याणभाजनम् ॥२२५॥
ततः सदेवं पुण्यार्थी पुमान् पठतु पुण्यधीः । पौरुहूतीं श्रियं प्राप्तुं परमामभिलाषुकः ॥२२६॥
स्तुत्वेति मघवा देवं चराचरजगद्गुरुम् । ततस्तीर्थविहारस्य व्यधात् प्रस्तावनामिमाम्[1] ॥२२७॥
भगवन् भव्यसस्यानां [2]पापावग्रहशोषिणाम् । धर्मामृतप्रसेकेन त्वमेधि[3] शरणं विभो ॥२२८॥
भव्यसार्थाधिपप्रोद्यद्दयाध्वजविराजित । धर्मचक्रमिदं सज्जं त्वज्जयोद्योगसाधनम् ॥२२९॥
निर्धूय मोहपृतनां मुक्तिमार्गोपरोधिनीम् । तवोपदेष्टुं सन्मार्गं कालोऽयं समुपस्थितः ॥२३०॥
इति प्रबुद्धतत्त्वस्य स्वयं भर्तुर्जिगीषतः । पुनरुक्ततरा वाचः प्रादुरासन् शतक्रतोः ॥२३१॥
अथ त्रिभुवनक्षोभी तीर्थकृत् पुण्यसारथिः । भव्याब्जानुग्रहं कर्तुम् उत्तस्थे[4] जिनभानुमान् ॥२३२॥
मोक्षाधिरोहनिःश्रेणीभूतच्छत्रत्रयोद्धुरः[5] । यशः क्षीरोदफेनाभसितचामरवीजितः ॥२३३॥
ध्वनन्मधुरगम्भीरधीरदिव्यमहाध्वनिः । भानुकोटिप्रतिस्पर्धिप्रभावलयभास्वरः ॥२३४॥
[6]मरुत्प्रहतगम्भीरवंध्वनद्दुन्दुभिः प्रभुः । सुरोत्करकरोन्मुक्तपुष्पवर्षार्चितक्रमः ॥२३५॥

लोग आपकी नामावलीसे बने हुए स्तोत्रोंकी मालासे आपकी पूजा करते हैं, आप प्रसन्न होइए, और हम सबको अनुगृहीत कीजिये ॥२२४॥ भक्त लोग इस स्तोत्रका स्मरण करने मात्रसे ही पवित्र हो जाते हैं और जो इस पुण्य पाठका पाठ करते हैं वे कल्याणके पात्र होते हैं ॥२२५॥ इसलिये जो बुद्धिमान् पुरुष पुण्यकी इच्छा रखते हैं अथवा इन्द्रकी परम विभूति प्राप्त करना चाहते हें वे सदा ही इस स्तोत्रका पाठ करें ॥२२६॥ इस प्रकार इन्द्रने चर और अचर जगत्के गुरु भगवान् वृषभदेवकी स्तुति कर फिर तीर्थ विहारके लिये नीचे लिखी हुई प्रार्थना की ॥२२७॥ हे भगवन्, भव्य जीवरूपी धान्य पापरूपी अनावृष्टिसे सूख रहे हैं सो हे विभो, उन्हें धर्मरूपी अमृतसे सींचकर उनके लिये आप ही शरण होइए ॥२२८॥ हे भव्य जीवोंके समूहके स्वामी, हे फहराती हुई दयारूपी ध्वजासे सुशोभित, जिनेन्द्रदेव, आपकी विजयके उद्योगको सिद्ध करनेवाला यह धर्मचक्र तैयार है ॥२२९॥ हे भगवन्, मोक्षमार्गको रोकनेवाली मोहकी सेनाको नष्ट कर चुकनेके बाद अब आपका यह समीचीन मोक्षमार्गके उपदेश देनेका समय प्राप्त हुआ है ॥२३०॥ इस प्रकार जिन्होंने समस्त तत्त्वोंका स्वरूप जान लिया है और जो स्वयं ही विहार करना चाहते हैं ऐसे भगवान् वृषभदेवके सामने इन्द्रके वचन पुनरुक्त हुए से प्रकट हुए थे। भावार्थ–उस समय भगवान् स्वयं ही विहार करनेके लिये तत्पर थे इसलिये इन्द्र द्वारा की हुई प्रार्थना व्यर्थ सी मालूम होती थी ॥२३१॥

अथानन्तर–जो तीनों लोकोंमे क्षोभ उत्पन्न करनेवाले हैं और तीर्थंकर नामक पुण्य प्रकृति ही जिनका सारथि–सहायक है ऐसे जिनेद्रदेवरूपी सूर्य भव्य जीवरूपी कमलोंका अनुग्रह करनेके लिये तैयार हुए ॥२३२॥ जो मोक्षरूपी महलपर चढ़नेके लिये सीढ़ियोंके समान छत्रत्रयसे सुशोभित हो रहे हैं, जिनपर क्षीर समुद्रके फेनके समान सुशोभित चमर ढोले जा रहे हैं, मधुर, गंभीर, धीर तथा दिव्य महाध्वनिसे जिनका शरीर शब्दायमान हो रहा है, जो करोडों सूर्योंसे स्पर्धा करनेवाले भामण्डलसे देदीप्यमान हो रहे हैं, जिनके समीप ही देवताओंके द्वारा बजाये हुए दुन्दुभि गंभीर शब्द कर रहे हैं, जो स्वामी हैं, देव-समूहके हाथोंसे छोडी हुई पुष्पवर्षासे जिनके चरण कमलोंकी पूजा हो रही है, जो मेरु पर्वतकी शिखरके समान अतिशय ऊँचे सिंहासनके स्वामी हैं, छाया और फल सहित अशोकवृक्षसे

१ अवसरम् ।　२ अनावृष्ट्या इत्यर्थः । 'वृष्टिवर्षे तद्विघातेव ग्रहावग्रहौ समौ' इत्यमरः ।
३ 'अस भुवि' । भव ।　४ उदोनूर्ध्वंहीतीति तङ, उद्युक्तोऽभूत् ।　५ उत्कटः ।　६ सुरताड्यमान ।

मेरुशृङ्गसमुत्तुङ्गसिंहविष्टरनायकः । सच्छायसफलाशोकप्रकटीकृतचेष्टितः ॥२३६॥
धूलिसालवृतास्थानजगतीपरिमण्डलः । मानस्तम्भनिरुद्धान्यकुदृष्टिमदविभ्रमः ॥२३७॥
स्वच्छाम्भःखातिकाभ्यर्णव्रततीवनवेष्टिताम्[1] । सभाभूमिमलङ्कुर्वन् अपूर्वविभवोदयाम् ॥२३८॥
समग्रगोपुरोदग्रैः प्राकारवलयैस्त्रिभिः । परार्घ्यरचनोपेतैः आविष्कृतमहोदयः ॥२३९॥
अशोकादिवनश्रेणीकृतच्छायसभावनिः । स्रग्वस्त्रादिध्वजोल्लाससमाहूतजगज्जनः ॥२४०॥
[2]कल्पद्रुमवनच्छायाविश्रान्तामरपूजितः । प्रासादरुद्धभूमिष्ठकिन्नरोद्गीतसद्यशाः ॥२४१॥
ज्वलन्महोदयस्तूपप्रकटीकृतवैभवः । नाट्यशालाद्वयेद्धर्द्धिसंवर्धितजनोत्सवः ॥२४२॥
धूपामोदितदिग्भागमहागन्धकुटीश्वरः । त्रिविष्टपपतिप्राज्यपूजार्हः[3] परमेश्वरः ॥२४३॥
त्रिजगद्वल्लभः श्रीमान् भगवानादिपूरुषः । प्रचक्रे विजयोद्योगं धर्मचक्राधिनायकः २४४॥
ततो भगवदुद्योगसमये समुपेयुषि । प्रचेलुः प्रचलन्मौलिकोटयः सुरकोटयः ॥२४५॥
तदा सम्भ्रान्तनाकीन्द्रतिरीटोच्चलिता ध्रुवम् । जगन्नीराजयामासुः मणयो दिग्जये विभोः ॥२४६॥
जयत्युच्चैर्गिरो देवाः प्रोर्णुवाना[4] नभोऽङ्गणम् । दिशां मुखानि तेजोभिर्द्योतयन्तः प्रतस्थिरे ॥२४७॥
जिनोद्योगमहावात्या[5]क्षुभिता देवनायकाः । चतुर्निकायाश्चत्वारो महाब्धय इवाभवन् ॥२४८॥
प्रतस्थे भगवानित्थम् अनुयातः सुरासुरैः । अनिच्छापूर्विकां वृत्तिम् आस्कन्दन्भानुमानिव ॥२४९॥

जिनकी शान्त चेष्टाएं प्रकट हो रही है, जिनके समवसरणकी पृथिवीका घेरा धूली-साल नामक कोटसे घिरा हुआ है, जिन्होंने मानस्तम्भोंके द्वारा अन्य मिथ्यादृष्टियोंके अहकार तथा सन्देहको नष्ट कर दिया है, जो स्वच्छ जलसे भरी हुई परिखाके समीपवर्ती लतावनोंसे घिरी हुई और अपूर्व वैभवसे सम्पन्न सभाभूमिको अलकृत कर रहे है, समस्त गोपुरद्वारोंसे उन्नत और उत्कृष्ट रचनासे सहित तीन कोटोंसे जिनका बड़ा भारी माहात्म्य प्रकट हो रहा है, जिनकी सभाभूमिमे अशोकादि वनसमूहसे सघन छाया हो रही है, जो माला वस्त्र आदिसे चिह्नित ध्वजाओंकी फडकनसे जगत्के समस्त जीवोंको बुलाते हुए से जान पड़ते है, कल्पवृक्षोंके वनकी छायामें विश्राम करनेवाले देव लोग सदा जिनकी पूजा किया करते है, बड़े बड़े महलोंसे घिरी हुई भूमिमें स्थित किन्नरदेव जोर जोरसे जिनका यश गा रहे है, प्रकाशमान और बड़ी भारी विभूतिको धारण करनेवाले स्तूपोंसे जिनका वैभव प्रकट हो रहा है, दोनों नाट्यशालाओंकी बढ़ी हुई ऋद्धियोंसे जो मनुष्योंका उत्सव बढा रहे हैं, जो धूपकी सुगन्धिसे दशों दिशाओंको सुगन्धित करनेवाली बडी भारी गन्धकुटीके स्वामी हैं, जो इन्द्रोंके द्वारा की हुई बड़ी भारी पूजाके योग्य हैं, तीनो जगत्के स्वामी हैं और धर्मके अधिपति हैं ऐसे श्रीमान् आदिपुरुष भगवान् वृषभदेवने विजय करनेका उद्योग किया–विहार करना प्रारम्भ किया ॥२३३–२४४॥ तदनन्तर भगवान्के विहारका समय आनेपर जिनके मुकुटोंके अग्रभाग हिल रहे हैं ऐसे करोडों देव लोग इधर उधर चलने लगे ॥२४५ भगवान्के उस दिग्विजयके समय घबड़ाये हुए इन्द्रोंके मुकुटोंसे विचलित हुए मणि ऐसे जान पड़ते थे मानो जगत्की आरती ही कर रहे हों ॥२४६॥ उस समय जय जय इस प्रकार जोर जोरसे शब्द करते हुए, आकाशरूपी आंगनको व्याप्त करते हुए और अपने तेजसे दिशाओंके मुखको प्रकाशित करते हुए देव लोग चल रहे थे ॥२४७॥ उस समय इन्द्रों सहित चारों निकायके देव जिनेन्द्र भगवान्के विहाररूपी महावायुसे क्षोभको प्राप्त हुए चार महासागरके समान जान पडते थे ॥२४८॥ इस प्रकार सुर और असुरोंसे सहित भगवान्ने सूर्यके समान इच्छा रहित वृत्तिको धारण

१ लतावन । २ वृक्ष–ल० । ३ इन्द्रादिकृतादभ्रः । ४ आच्छादयन्तः । ५ महावायुसमूहः ।

अर्धमागधिकाकारभाषापरिण[1]ताखिलः । त्रिजगज्जनतामैत्रीसम्पादितगुणाद्भुतः ॥२५०॥
स्वसन्निधानसम्फुल्लफलिताङ्कुरितद्रुमः । आदर्शमण्डलाकारपरि[2]वर्तितभूतलः ॥२५१॥
सुगन्धिशिशिरानुच्चै[3]रनुयायिसमीरणः । [4]अकस्माज्जनतानन्दसम्पादिपरमोदयः ॥२५२॥
मरुत्कुमार[5]सम्मृष्टयोजनान्तररम्यभूः । [6]स्तनितामरसंसिक्तगन्धाम्बुविरजोवनिः ॥२५३॥
मृदुस्पर्शसुखाम्भोजविन्यस्तपदपङ्कजः । शालिव्रीह्यादिसम्पन्नवसुधासूचितागमः ॥२५४॥
[7]शरत्सरोवरस्पर्धिव्योमोदाहृत[8]सन्निधिः । ककुबन्तरवैमल्यसन्दर्शितसमागमः ॥२५५॥
द्युस[9]त्परस्पराह्वानध्वानरुद्धहरिन्मुखः[10] । सहस्रारस्फुरद्धर्मचक्ररत्नपुरःसरः ॥२५६॥
पुरस्कृताष्टमा[11]ङ्गल्यध्वजमालाततताम्बरः । सुरासुरानुयातोऽभूद्[12] विजिहीर्[13]षुस्तदा विभुः ॥२५७॥
तदा मधुरगम्भीरो जजृम्भे दुन्दुभिध्वनिः । नभः समन्तादापूर्य क्षुभ्यदब्धिस्वनोपमः ॥२५८॥
ववृषुः सुमनोवृष्टिम् आपूरितनभोङ्गणम् । सुरा भव्यद्विरेफाणां सौमनस्य[14]विधायिनीम् ॥२५९॥
समन्ततः स्फुरन्ति स्म पालिके[15]तनकोटयः । आह्वातुमिव भव्यौघान् एतैतेति[16] मरुद्धताः ॥२६०॥

कर प्रस्थान किया ॥२४९॥ जिन्होंने अर्धमागधी भाषामें जगत्के समस्त जीवोंको कल्याणका उपदेश दिया था जो तीनो जगत्के लोगोमे मित्रता कराने रूप गुणोंसे सबको आश्चर्यमें डालते है, जिन्होंने अपनी समीपतासे वृक्षोंको फूल फल और अंकुरोंसे व्याप्त कर दिया है, जिन्होंने पृथिवीमण्डलको दर्पणके आकारमे परिवर्तित कर दिया है, जिनके साथ सुगन्धित शीतल तथा मन्द मन्द वायु चल रही है, जो अपने उत्कृष्ट वैभवसे अकस्मात् ही जन-समुदायको आनन्द पहुँचा रहे है, जिनके ठहरनेके स्थानसे एक योजन तककी भूमिको पवनकुमार जातिके देव झाड़-बुहारकर अत्यन्त सुन्दर रखते है, जिनके विहारयोग्य भूमिको मेघकुमार जातिके देव सुगन्धित जलकी वर्षा कर धूलि-रहित कर देते है, जो कोमल स्पर्शसे सुख देनेके लिये कमलोंपर अपने चरण-कमल रखते है, शालि व्रीहि आदिसे संपन्न अवस्थाको प्राप्त हुई पृथिवी जिनके आगमनकी सूचना देती है, शरदृतुके सरोवरके साथ स्पर्धा करनेवाला आकाश जिनके समीप आनेकी सूचना दे रहा है, दिशाओंके अन्तरालकी निर्मलतासे जिनके समागमकी सूचना प्राप्त हो रही है, देवोंके परस्पर–एक दूसरेको बुलानेके लिए प्रयुक्त हुए शब्दोंसे जिन्होने दिशाओंके मुख व्याप्त कर दिये है, जिनके आगे हजार अरवाला देदीप्यमान धर्मचक्र चल रहा है, जिनके आगे आगे चलते हुए अष्ट मंगल-द्रव्य तथा आगे आगे फहराती हुई ध्वजाओंके समूहसे आकाश व्याप्त हो रहा है और जिनके पीछे अनेक सुर तथा असुर चल रहे है ऐसे विहार करनेके इच्छुक भगवान् उस समय बहुत ही अधिक सुशोभित हो रहे थे ॥२५०–२५७॥ उस समय क्षुब्ध होते हुए समुद्रकी गर्जनाके समान आकाशको चारों ओरसे व्याप्त कर दुन्दुभि बाजोंका मधुर तथा गभीर शब्द हो रहा था ॥२५८॥ देव लोग भव्य जीवरूपी भ्रमरोंको आनन्द करनेवाली तथा आकाशरूपी आगनको पूर्ण भरती हुई पुष्पोंकी वर्षा कर रहे थे ॥२५९॥ जिनके वस्त्र वायुसे हिल रहे है ऐसी करोड़ों ध्वजाएं चारों ओर फहरा रही थी और वे ऐसी जान पड़ती थी मानो 'इधर आओ इधर आओ' इस प्रकार भव्य जीवोंके समूहको बुला ही रही हों

---

१ परिणमितसर्वजीवः । २ परिणमित । ३ मन्दं मन्दम् । ४ कारणमन्तरेण । ५ वायुकुमारसम्मार्जित । ६ मेघकुमार । ७ शरत्कालसरोवर । ८ उदाहरणीकृतसन्निधिः । ९ अमर । १० दिङ्मुखः । ११ अष्टमङ्गल । १२ –यातोऽभाद्-ब०, प०, अ०, स०, द०, इ०, ल० । १३ विहर्तुमिच्छः । १४ प्रसन्नचित्तवृत्तिम् । १५ ध्वज । १६ आगच्छताऽऽगच्छतेति ।

तर्जयन्निव कर्मारीन् ऊर्जस्वी रुद्धदिङमुखः । ढङ्कार एष ढक्कानाम् अभूत्प्रतिपदं विभोः २६१॥
नभोरङ्गे नटन्ति स्म प्रोल्लसद्‌भ्रूपताकिकाः । सुराङ्गना विलिम्पत्यः स्ववेहप्रभया दिशः ॥२६२॥
विबुधाः पेठुरुत्साहात् किन्नरा मधुरं जगुः । वीणावादनमातेनुर्गन्धर्वाः सहखेचरैः ॥२६३॥
प्रभामयमिवाशेषं जगत्कर्तुं समुद्यताः । प्रतस्थिरे सुराधीशा ज्वलन्मुकुटकोटयः ॥२६४॥
दिशः प्रसेदुरुन्मुक्तधूलिकाः[1] प्रमदादिव । बभ्राजे धृतवैमल्यम् अनभ्र[2] वर्त्म वार्मुचाम् ॥२६५॥
परिनिष्पन्नशाल्यादिसस्यसम्पन्मही तदा । उद्‌भूतहर्षरोमाञ्चा स्वामिलाभादिवाभवत् ॥२६६॥
ववुः सुरभयो वाताः स्वर्धुनीशीकरस्पृशः । आकीर्णपङ्कजरजःपटवासपटावृताः[3] ॥२६७॥
मही समतला रेजे सम्मुखीन[4]तलोज्ज्वला । सुरैर्गन्धाम्बुभिः सिक्ता स्नातेव विरजाः सती ॥२६८॥
अकालकुसुमोद्‌भेदं दर्शयन्ति स्म पादपाः । ऋतुभिः सममागत्य संरुद्धाः[5] साध्वसादिव ॥२६९॥
सुभिक्षं क्षेममारोग्यं गव्यूतीनां[6] चतुःशती । भेजे भर्जिनमाहात्म्याद् अजातप्राणिहिंसना ॥२७०॥
अकस्मात् प्राणिनो भेजुः प्रमदस्य परम्पराम् । तेनुः [7]परस्परां मैत्रीं बन्धु[8]भूयमिवाश्रिताः ॥२७१॥
मकरन्दरजोवर्षि प्रत्यग्रोद्‌भिन्नकेसरम् । विचित्ररत्ननिर्माणकर्णिकं विलसद्दलम् ॥२७२॥

॥२६०॥ भगवान्‌के विहारकालमे पद पदपर समस्त दिशाओंको व्याप्त करनेवाला और ऊँचा जो भेरियोंका शब्द हो रहा था वह ऐसा जान पड़ता था मानो कर्मरूपी शत्रुओंको तर्जना ही कर रहा हो—उन्हें धौस ही दिखला रहा हो ॥२६१॥ जिनकी भौहरूपी पताकाएँ उड़ रही है ऐसी देवागनाएं अपने शरीरकी प्रभासे दिशाओंको लुप्त करती हुई आकाशरूपी रंगभूमिमें नृत्य कर रही थी ॥२६२॥ देव लोग बड़े उत्साहके साथ पुण्यपाठ पढ़ रहे थे, किन्नरजातिके देव मनोहर आवाजसे गा रहे थे और गन्धर्व विद्याधरोंके साथ मिलकर वीणा बजा रहे थे ॥२६३॥ जिनके मुकुटोंके अग्रभाग देदीप्यमान हो रहे हैं ऐसे इन्द्र समस्त जगत्‌को प्रभामय करनेके लिये तत्पर हुए के समान भगवान्‌के इधर उधर चल रहे थे ॥२६४॥ उस समय समस्त दिशाएं मानो आनन्दसे ही धूमरहित हो निर्मल हो गई थी और मेघरहित आकाश अतिशय निर्मलताको धारण कर सुशोभित हो रहा था ॥२६५॥ भगवान्‌के विहारके समय पके हुए शालि आदि धान्योंसे सुशोभित पृथ्वी ऐसी जान पड़ती थी मानो स्वामीका लाभ होनेसे उसे हर्षके रोमाञ्च ही उठ आये हो ॥२६६॥ जो आकाशगगाके जलकणोंका स्पर्श कर रही थी और जो कमलोंके पराग-रजसे मिली हुई होनेसे सुगन्धित वस्त्रोंसे ढकी हुई सी जान पड़ती थी ऐसी सुगन्धित वायु बह रही थी ॥२६७॥ उस समय पृथ्वी भी दर्पणतलके समान उज्ज्वल तथा समतल हो गई थी, देवोने उसपर सुगन्धित जलकी वर्षा की थी जिससे वह धूलिरहित होकर ऐसी सुशोभित हो रही थी मानो रजोधर्मसे रहित तथा स्नान की हुई पतिव्रता स्त्री ही हो ॥२६८॥ वृक्ष भी असमयमे फूलोंके उद्भेदको दिखला रहे थे अर्थात् वृक्षोंपर बिना समयके ही पुष्प आ गये थे और उनसे वे ऐसे जान पड़ते थे मानो सब ऋतुओंने भयसे एक साथ आकर ही उनका आलिगन किया हो ॥२६९॥ भगवान्‌के माहात्म्यसे चार सौ कोश पृथ्वी तक सुभिक्ष था, सब प्रकारका कल्याण था, आरोग्य था और पृथिवी प्राणियोंकी हिसासे रहित हो गई थी ॥२७०॥ समस्त प्राणी अचानक आनन्दकी परम्पराको प्राप्त हो रहे थे और भाईपनेको प्राप्त हुएके समान परस्परकी मित्रता बढ़ा रहे थे ॥२७१॥ जो मकरन्द और परागकी वर्षा कर रहा है, जिसमें नवीन केशर उत्पन्न हुई है जिसकी कर्णिका अनेक प्रकारके रत्नोंसे बनी हुई है

---

१ धूमिकाः—ल०, द०, इ० । २ निर्मेघम् । ३ गन्धचूर्ण एव पटवासस्तेनावृताः । ४ दर्पणतल । ५ आवृताः । ६ क्रोशानाम् । ७ पारस्परीम् । ८ बन्धुत्वम् ।

भगवच्चरणन्यासप्रदेशेऽधिनभःस्थलम् । मृदुस्पर्शमुदारश्रि पङ्कजं हैममुद्बभौ ॥२७३॥
पृष्ठतश्च पुरश्चास्य पद्माः सप्त विकासिनः । प्रादुर्बभूवुरुद्गन्धिसान्द्रकिञ्जल्करेणवः ॥२७४॥
तथान्यान्यपि पद्मानि तत्पर्यन्तेषु रेजिरे । लक्ष्म्यावसथ[1]सौधानि सञ्चारीणीव खाङ्गणे ॥२७५॥
हेमाम्भोजमयां श्रेणीम् अलिश्रेणिभिरन्विताम् । सुरा [2]व्यरचयन्नेनां सुरराजनिदेशतः ॥२७६॥
रेजे राजीवराजी[3] सा [4]जिनपत्पङ्कजोन्मुखी । [5]आदित्सुरिव [6]तत्कान्तिम् अतिरेकादधःस्रुताम् ॥२७७॥
ततिर्विहारपद्मानां जिनस्योपाङ्घ्रि सा बभौ । नभःसरसि सम्फुल्ला त्रिपञ्चककृतप्रमा ॥२७८॥
तदा हेमाम्बुजैर्व्योम समन्तादाततं बभौ । सरोवरमिवोत्फुल्लपङ्कजं जिनदिग्जये ॥२७९॥
प्रमोदमयमातन्वन् इति विश्वं जगत्पतिः । विजहार महीं कृत्स्नां प्रीणयन् स्ववचोमृतैः ॥२८०॥
मिथ्यान्धकारघटनां विघटय्य वचोंऽशुभिः । जगदुद्योतयामास जिनार्को जनतार्तिहृत् ॥२८१॥
[7]यतो विजह्रे भगवान् हेमाब्जन्यस्तसत्क्रमः । धर्मामृताम्बुसंवर्षैस्ततो[8] भव्या धृतिं दधुः ॥२८२॥
जिने घन[9] इवाभ्यर्णे धर्मवर्षं प्रवर्षति । जगत्सुखप्रवाहेण पुप्लुवे[10] धृतनिर्वृति[11] ॥२८३॥
धर्मवारि जिनाम्भोदात्पायं[12] पायं कृतस्पृहाः । चिरं धृततृषो [13]दध्रुः तदानीं भव्यचातकाः ॥२८४॥

जिसके दल अत्यन्त सुशोभित हो रहे हैं, जिसका स्पर्श कोमल है और जो उत्कृष्ट शोभासे सहित है ऐसा सुवर्णमय कमलोंका समूह आकाशतलमें भगवान्के चरण रखनेकी जगहमें सुशोभित हो रहा था ॥२७२–२७३॥ जिनकी केशरके रेणु उत्कृष्ट सुगन्धिसे सान्द्र हैं ऐसे वे प्रफुल्लित कमल सात तो भगवान्के आगे प्रकट हुए थे और सात पीछे ॥२७४॥ इसी प्रकार और कमल भी उन कमलोंके समीपमें सुशोभित हो रहे थे, और वे ऐसे जान पड़ते थे मानो आकाशरूपी आंगनमें चलते हुए लक्ष्मीके रहनेके भवन ही हों ॥२७५॥ भ्रमरोंकी पङ्क्तियोंसे सहित इन सुवर्णमय कमलोंकी पङ्क्तिको देवलोग इन्द्रकी आज्ञासे बना रहे थे ॥२७६॥ जिनेन्द्र भगवान्के चरणकमलोंके सन्मुख हुई वह कमलोंकी पङ्क्ति ऐसी जान पड़ती थी मानो अधिकताके कारण नीचेकी ओर बहती हुई उनके चरणकमलोंकी कान्ति ही प्राप्त करना चाहते हों ॥२७७॥ आकाशरूपी सरोवरमें जिनेन्द्रभगवान्के चरणोंके समीप प्रफुल्लित हुई वह विहार कमलोंकी पङ्क्ति पन्द्रहके वर्ग प्रमाण अर्थात् २२५ कमलोंकी थी ॥२७८॥ उस समय, भगवान्के दिग्विजयके कालमें सुवर्णमय कमलोंसे चारों ओरसे व्याप्त हुआ आकाश ऐसा सुशोभित हो रहा था मानो जिसमें कमल फूल रहे हैं ऐसा सरोवर ही हो ॥२७९॥ इस प्रकार समस्त जगत्के स्वामी भगवान् वृषभदेवने जगत्को आनन्दमय करते हुए तथा अपने वचनरूपी अमृतसे सबको संतुष्ट करते हुए समस्त पृथिवीपर विहार किया था ॥२८०॥ जनसमूहकी पीड़ा हरनेवाले जिनेन्द्ररूपी सूर्यने वचनरूपी किरणोंके द्वारा मिथ्यात्वरूपी अन्धकारके समूहको नष्ट कर समस्त जगत् प्रकाशित किया था २८१॥ सुवर्णमय कमलोंपर पैर रखनेवाले भगवान्ने जहां जहांसे विहार किया वहीं वहींके भव्योंने धर्मामृतरूप जलकी वर्षासे परम सन्तोष धारण किया था ॥२८२॥ जिस समय वे जिनेन्द्ररूपी मेघ समीपमें धर्म-रूपी अमृतकी वर्षा करते थे उस समय यह सारा संसार संतोष धारण कर सुखके प्रवाह-से प्लुत हो जाता था–सुखके प्रवाहमें डूब जाता था ॥२८३॥ उस समय अत्यन्त लालायित हुए भव्य जीवरूपी चातक जिनेन्द्ररूपी मेघसे धर्मरूपी जलको बार बार पी

---

१ निवासहर्म्याणि । २ रचयन्ति स्म । ३ पंक्तिः । ४ जिनपादकमलोन्मुखी । ५ आदातुमिच्छुः । ६ पदकमलकान्तिम् । ७ यस्मिन् । ८ तस्मिन् । ९ मेघ इव । १० मज्जति स्म । ११ धृतसुखम् । १२ पीत्वा पीत्वा । १३ धृतिमाययुः ।

वसन्ततिलकावृत्तम्

इत्थं चराचरगुरुर्जगदुज्जिहीर्षन्[1]
संसारखञ्ज[2]ननिमग्नमभग्नवृत्तिः ।
देवासुरैरनुगतो विजहार पृथ्वीं
हेमाब्जगर्भविनिवेशितपादपद्मः ॥२८५॥
तीव्राजवञ्जवदवानलदह्यमानम्
आह्लादयन् भुवनकाननमस्ततापः ।
धर्मामृताम्बुपृषतैः[3] परिषिच्य देवो
रेजे घनागम इवोदितदिव्यनादः ॥२८६॥
काशीमवन्तिकुरुकोसलसुह्मपुण्ड्रान्
[4]चेद्यङ्गवङ्गमगधान्ध्रकलिङ्गमद्रान् ।
पाञ्चालमालवदशार्णविदर्भदेशान्
सन्मार्गदेशनपरो विजहार धीरः ॥२८७॥
देवः प्रशान्तचरितः[5] शनकैर्विहृत्य
देशान् बहूनिति विबोधितभव्यसत्त्वः ।
भेजे जगत्त्रयगुरुर्विधुवीध्र[6]मुच्चैः
कैलासमात्मयशसोऽनुकृतिं[7] दधानम् ॥२८८॥

शार्दूलविक्रीडितवृत्तम्

तस्याग्रे सुरनिर्मिते सुरुचिरे श्रीमत्सभामण्डले
पूर्वोक्ताखिलवर्णना[8]परिगते स्वर्गश्रियं तन्वति ।
श्रीमान् द्वादशभिर्गणैः परिवृतो भक्त्या नतैः सादरैः
आसामा[9]सविभुर्जिनः प्रविलसत्सत्प्रातिहार्याष्टकः ॥२८९॥

कर चिरकालके लिये सन्तुष्ट हो गये थे ॥२८४॥ इस प्रकार जो चर और अचर जीवोंके स्वामी हैं, जो ससाररूपी गर्तमें डूबे हुए जीवोंका उद्धार करना चाहते हैं, जिनकी वृत्ति अखण्डित है, देव और असुर जिनके साथ हैं तथा जो सुवर्णमय कमलोके मध्यमें चरण कमल रखते है ऐसे जिनेन्द्र भगवान्ने समस्त पृथ्वीमे विहार किया ॥२८५॥ उस समय, ससाररूपी तीव्रदावानलसे जलते हुए संसाररूपी वनको धर्मामृतरूप जलके छींटोंसे सींचकर जिन्होंने सबका संताप दूर कर दिया है और जिनके दिव्यध्वनि प्रकट हो रही है ऐसे वे भगवान् वृषभदेव ठीक वर्षाऋतुके समान सुशोभित हो रहे थे ॥२८६॥ समीचीन मार्गके उपदेश देनेमे तत्पर तथा धीर वीर भगवान्ने काशी, अवन्ति, कुरु, कोशल, सुह्म, पुण्ड्र, चेदि, अग, बंग, मगध, आध्र, कलिङ्ग, मद्र, पञ्चाल, मालव, दशार्ण और विदर्भ आदि देशोंमें विहार किया था ॥२८७॥ इस प्रकार जिनका चरित्र अत्यन्त शान्त है, जिन्होंने अनेक भव्य जीवोंको तत्त्वज्ञान प्राप्त कराया है और जो तीनों लोकोंके गुरु है ऐसे भगवान् वृषभदेव अनेक देशोंमें विहार कर चन्द्रमाके समान उज्ज्वल, ऊँचे और अपना अनुकरण करनेवाले कैलास पर्वतको प्राप्त हुए ॥ २८८ ॥ वहां उसके अग्रभागपर देवोंके द्वारा बनाये हुए, सुन्दर, पूर्वोक्त समस्त वर्णनसे सहित और स्वर्गकी शोभा बढानेवाले सभामण्डपमें विराजमान हुए । उस समय वे जिनेन्द्रदेव

---

१ उद्धर्त्तुमिच्छन् । २ गर्त । ३ बिन्दुभिः । पृषन्ती बिन्दु पृषता स पुमासो विप्रुषस्त्रियः । ४ चेदि अङ्ग । ५ प्रकर्षेण शान्तवर्तनः । ६ विमल । ७ अनुकरणम् । ८ वर्णनायुक्ते । ९ आस्ते स्म ।

तं देवं त्रिदशाधिपार्चितपदं घातिक्षयानन्तर-
प्रोत्थानन्तचतुष्टयं जिनमिनं[1] भव्याब्जिनीनामिनम्[2] ।
मानस्तम्भविलोकनानतजगन्मान्यं त्रिलोकीपतिं
प्राप्ताचिन्त्यबहिर्विभूतिमनघं भक्त्या प्रवन्दामहे ॥२९०॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसङ्ग्रहे
भगवद्विहारवर्णनं नाम पञ्चविंशतितमं पर्व ।

अनन्तचतुष्टयरूप लक्ष्मीसे सहित थे, आदरके साथ भक्तिसे नम्रीभूत हुए बारह सभाके लोगोंसे घिरे हुए थे और उत्तमोत्तम आठ प्रातिहार्योंसे सुशोभित हो रहे थे ॥२८९॥ जिनके चरणकमल इन्द्रोंके द्वारा पूजित हैं, घातियाकर्मोंका क्षय होनेके बाद जिन्हें अनन्तचतुष्टयरूपी विभूति प्राप्त हुई है, जो भव्यजीवरूपी कमलिनियोंको विकसित करनेके लिये सूर्यके समान है, जिनके मानस्तम्भोंके देखने मात्रसे जगत्के अच्छे अच्छे पुरुष नम्रीभूत हो जाते हैं, जो तीनों लोकोंके स्वामी हैं, जिन्हें अचिन्त्य बहिरङ्ग विभूति प्राप्त हुई है, और जो पाप रहित हैं ऐसे श्रीस्वामी जिनेन्द्रदेवको हमलोग भी भक्तिपूर्वक नमस्कार करते हैं ॥२९०॥

इस प्रकार भगवज्जिनसेनाचार्य प्रणीत त्रिषष्टिलक्षण महापुराणसंग्रहमें भगवान्के-विहारका वर्णन करनेवाला पच्चीसवां पर्व समाप्त हुआ ।

---

१ प्रभम । २ सर्यम ।

महापुराण-प्रथमभागस्थ-

श्लोकानामकाराद्यनुक्रमः

आ

इ

घ

च

फ

ब

य

र

श